काव्यमाला. ९४.

धारेश्वरश्रीभोजदेवविरचितं

# सरस्वतीकण्ठाभरणम् ।

रामसिंहविरचितया तृतीयपरिच्छेदान्तया
जगद्धरविरचितया च चतुर्थपरिच्छेद-
टीकया सनाथीकृतम् ।

मूल्यं ५ रूप्यकाः ।

S. Book Prakash
Revised Price R. 25.00

KĀVYAMĀLĀ 94.

THE

# SARASWATĪ KAṆṬHĀBHARAṆA

BY

DHĀRESHVARA BHOJADEVA.

WITH

Commentaries of Rāmsinha (I-III)

AND

JAGADDHARA (IV).

EDITED

BY

PAṆḌIT KEDĀRṆĀTH S'ARMĀ

AND

WĀSUDEV LAXMAṆ S'ĀSTRĪ PAṆS'ĪKAR.

Second Edition.

PUBLISHED

BY

PĀNDURANG JĀWAJĪ,

PROPRIETOR OF THE "NIRṆAYA SĀGAR" PRESS,

BOMBAY.

1934.

S. Book Prakash

Revised Price R: 25-00

[ All rights reserved by the publisher. ]

Publisher:-Pandurang Jawaji,<br>Printer:-Ramchandra Yesu Shedge, } 'Nirnaya-sagar' Press, 26-28, Kolbhat Lane, Bombay

काव्यमाला ९४.

धारेश्वरश्रीभोजदेवविरचितं

# सरस्वतीकण्ठाभरणम् ।

रामसिंहविरचितया तृतीयपरिच्छेदान्तया
जगद्धरविरचितया च चतुर्थपरिच्छेद-
टीकया सनाथीकृतम् ।

जयपुरमहाराजाश्रितमहामहोपाध्यायपण्डितदुर्गाप्रसादतनय-
पण्डितकेदारनाथशर्मणा, मुम्बापुरवासिपणशीकरोपाह्व-
विद्वद्वरलक्ष्मणशर्मतनुजनुषा वासुदेवशर्मणा च
संशोधितम् ।

द्वितीयावृत्तिः ।

तच्च
मुम्बय्यां
पाण्डुरङ्ग जावजी इत्येतैः
स्वीये निर्णयसागराख्यमुद्रणयन्त्रालये मुद्रयित्वा प्राकाश्यं नीतम् ।

शकाब्दाः १८५६, खिस्ताब्दाः १९३४.

Revised Price R: 25.00

॥ श्रीः ॥

# सरस्वतीकण्ठाभरणे समुदाहृतानां पद्यानां कवयो ग्रन्थाश्च ।

**अद्भुतपुण्यः**—सुभाषितावलौ कवेरस्य 'आयाते दयिते मरुस्थलभुवां' इत्यादि पद्यं 'अद्भुतफुल्लस्य' इति नाम्ना समुपलभ्यते । शार्ङ्गधरपद्धतौ तु पद्यमेतदथ 'आयाते दयिते मनोरथशतैः' इत्यादिपद्यं चाद्भुतपुण्यनाम्नैवोल्लिखिते । अद्भुतपुण्यः, अद्भुतफुल्लश्चाभिन्नाविति प्रतीयते । सरस्वतीकण्ठाभरणे 'आयाते दयिते मरुस्थलभुवां' इत्यादि पद्यमुदाहृतम्, दशरूपके च । कवेः समयोऽस्यानिश्चितः ।

**अभिनन्दः**—कादम्बरीकथासारकर्ता काश्मीरकः कविरनुमानतः ख्रिस्तीयाष्टमशतकोत्तरभागे समुत्पन्नः । यतोऽस्य पञ्चमः पूर्वपुरुषः शक्तिस्वामी कर्कोटवंशोद्भवस्य मुक्तापीडनरपतेर्मन्त्रिप्रवर आसीदिति ग्रन्थकारः स्ववंशविस्तृतिमवर्णयद् ग्रन्थारम्भे । मुक्तापीड इति तु ललितादित्यस्यापरं नामेति राजतरङ्गिण्यां प्रसिद्धमेव, एवं स ख्रिस्तीयसप्तमशतकोत्तरभागे समासीदिति च ।

**अमरुः**—अस्य सरस्वतीकण्ठाभरणे त्रयोदशपद्यान्युदाहृतानि । सोऽयं प्रसिद्धः कविः कदा समुत्पन्न इति न ज्ञायते । किंतु श्रीमान् आनन्दवर्धनाचार्यः स्वीये ध्वन्यालोके तृतीयोद्योते 'मुक्तकेषु हि प्रबन्धेष्विव रसबन्धाभिनिवेशिनः कवयो दृश्यन्ते । तथा ह्यमरुकस्य कवेर्मुक्तकाः शृङ्गाररसस्यन्दिनः प्रबन्धायमानाः प्रसिद्धा एव ।' इति लिखति । आनन्दवर्धनाचार्यात् प्राचीनोऽयमिति नवमख्रिस्तशताब्द्या अस्य पूर्वभवत्वं सिध्यति ।

**आनन्दवर्धनः**—सुप्रसिद्धस्य ध्वन्यालोकस्य रचयिता काश्मीरक आलंकारिकः कविः । काश्मीरेष्वयमवन्तिवर्मणः समये ख्रिस्तीयनवमशताब्द्यामासीदिति कल्हणस्य राजतरङ्गिणीतो ज्ञायते—

मुक्ताकणः शिवस्वामी कविरानन्दवर्धनः ।
प्रथां रत्नाकरश्चागात्साम्राज्येऽवन्तिवर्मणः ॥

अस्य कवेः श्रीमता भोजदेवमहाराजेन षट् कारिका उट्टङ्किताः । १. (शृङ्गार एव

मधुरः ) पृ० ६२८,२. ( शृङ्गारे विप्रलम्भाख्ये ) पृ० ६२८,३. ( रौद्रादयो रसा दीप्ताः ) पृ० ६२८,४. ( समर्थकत्वं वाक्यस्य ) पृ० ६२८,५. ( रसवन्ति हि वस्तूनि ) पृ० ६३१,६. ( रसाक्षिप्ततया यस्य ) पृ० ६३१, ध्वन्यालोके समुदाहृतानि चाष्टौ पद्यान्युदाहरणत्वेन गृहीतानि । तानि यथा—( येन ध्वस्तमनोभवेन ) पृ० १९२, ( तस्या विनापि हारेण ) पृ० २२२ ( अनुरागवती संध्या ) पृ० ३३२ ( कस्स व ण होइ रोसो ) पृ० ४५२, ( प्राप्तश्रीरेष कस्मात् ) पृ० ४५५,७१३. ( शेषो हेमगिरिस्त्वं च ) पृ० ४७५, ( कुविआओ वि पसन्नाओ ) पृ० ६७१.

**उदात्तराघवकर्ता**—कवेरस्य नामविषये कालविषये च न किमपि ज्ञायते । धनिकेन दशरूपके ( ४।२६ ) उदाहृतं 'मृगरूपं परित्यज्य' इत्यादिपद्यमत्रापि समुदाहृतम् ( पृ. ७३९ ) ।

**कालिदासः**—अत्र महाकवेरस्य रघुवंश–कुमारसंभव–मेघदूतकाव्येभ्यः, शाकुन्तलविक्रमोर्वशीयनाटकाभ्यां चोद्धृतानि पद्यानि । रघुवंशीयानि ४८ अष्टचत्वारिंशत् पद्यानि, कुमारसंभवाच्च ५३ त्रिपञ्चाशत् पद्यानि, मेघदूताच्च १४ चतुर्दश पद्यानि, अभिज्ञानशाकुन्तलनाटकाच्च ३७ सप्तत्रिंशत् पद्यानि, विक्रमोर्वशीयनाटकाच्च १६ षोडश पद्यानि समुदाहृतानि प्राप्यन्ते । सोऽयं पञ्चम्यां ख्रिस्तीयशताब्द्यां समुदभवदिति बहूनां पाश्चात्यानां पौरस्त्यानां च विदुषां मतम् ।

**कुमारदासः**—जानकीहरणकर्ता सिंहलद्वीपस्थः कविः । अयं कालिदाससमकालिक इति किंवदन्ती ॥

'कमले कमलोत्पत्तिः श्रूयते नापि दृश्यते ।
बाले तव मुखाम्भोजे कथमिन्दीवरद्वयम् ॥'

इति पद्यं चोभयकविकर्तृकं प्रसिद्धम् । क्षेमेन्द्रेणौचित्यविचारचर्चायां 'अयि विजहीहि दृढोपगूहनं' इत्यादि पद्यं कुमारदासनाम्ना लिखितमत्रापि प्राप्यते ( पृ० १५१ ) ।

**चण्डकः**—'च्युतामिन्दोर्लेखां' ( पृ० ६०८ ) इत्यादि पद्यं सुभाषितावल्यां चण्डकनाम्ना, शार्ङ्गधरपद्धतौ च क्रीडाचन्द्रनाम्ना प्राप्यते । समयोऽस्यानिश्चितः ।

**चाणक्यः**—'शैले शैले न माणिक्यं' इत्यादि पद्यं ( पृ० २५४ ) चाणक्यशतकादुद्धृतमत्रोदाहृतम् । अशोकपितामहश्चन्द्रगुप्तः ख्रिस्ताब्दारम्भात्पूर्वं सप्तविंशत्यधिकशतत्रयपरिमितेषु वर्षेषु राज्यं चकारेति सिद्धमेव । कौटिल्यापरनामधेय-

चाणक्यस्तन्मन्त्री तदानीमासीदिति निश्चितमेव । केनापि विदुषा चाणक्यनाम्नैव तदेतन्नीतिशतकं विरचितं भवेद् यदधुना बालकैः पठ्यते ।

**चित्तमः, चित्रमो वा**—अस्य चित्रप इति छित्तप इति वा नामेति ऑफ्रेक्ट-पण्डितः । शार्ङ्गधरपद्धतौ 'छित्रम' इति, गणरत्नमहोदधौ तु चित्तप इति नाम समुपलभ्यते । 'कल्पान्ते शमितत्रिविक्रम' ( पृ० २६१ ) इति पद्यमेकमेवोपलब्धम् । कालविषयेस्य न किमपि ज्ञातम् ।

**जैमिनिसूत्रवृत्तिः**—'जरद्गवः कम्बलपादुकाभ्यां' ( पृ० ३६ ) इत्यादिपद्यं मीमांसावृत्तेरुद्धृतं भोजदेवेन ।

**दण्डी**—काव्यादर्शः, दशकुमारचरितम्, छन्दोविचितिश्चेति ग्रन्थत्रयस्य निर्माता षष्ठे शतके समुत्पन्नः । सरस्वतीकण्ठाभरणे काव्यादर्शात् ४१ एकचत्वारिंशत् कारिकाः १६४ चतुःषष्ठ्युत्तरैकशतमुदाहरणानि च संकलितानि श्रीमता भोजदेवेन । प्रायो ग्रन्थेऽस्मिन् दण्डिविरचितस्य काव्यादर्शस्यैव विस्तरः ।

**दीपकः**—सुभाषितावल्यै 'यदि स्मरामि तां तन्वीं' इति पद्यमुपलभामहे । अत्राप्येतत् पद्यमुदाहृतम् ( पृ० ३०४ )।

**द्रोणपर्व**—'ततः कुमुदनाथेन' पृ० १३४ इत्यादि पद्यं महाभारतीयद्रोणपर्वत उद्धृत्योदाहृतं भोजदेवेन ।

**धनिकः**—धनिको धनञ्जयश्च विष्णुतनूजौ भ्रातरौ मुञ्जसमकालिकौ दशमशतकोत्पन्नौ । दशरूपकस्य कर्ता धनंजयः, तदालोकस्य कर्ता च धनिकः । दशरूपकालोकसरस्वतीकण्ठाभरणयोः षोडशोदाहरणानि समानि ।

**धाराकदम्बः**—'बाले मालेयमुच्चैर्न' पृ० २४४ इति पद्यं सुभाषितावल्यां शार्ङ्गधरपद्धतौ च धाराकदम्बनाम्ना प्राप्यते ।

**नमिसाधुः**—रुद्रटालंकारस्य टीकाकर्ता । सरस्वतीकण्ठाभरण उदाहृतानि चत्वार्युदाहरणानि नमिसाधोष्टीकयामुपलभ्यन्ते । तानि यथा—'अयं पद्मासनासीनः' पृ० ४२, 'चन्द्रायसे शुक्ररुचाथ' पृ० ४११,१९ 'यस्या बीजमहंकृतिः' पृ० ४२३, 'यश्च निम्बं परशुना' पृ० ४७७, सोऽयं नमिसाधुः १०६९ खिस्तवर्षे टीकां रचितवानिति टीकासमाप्तिश्लोकाज् ज्ञायते ।

**नारायणः**—वेणीसंहारनामकनाटकस्य रचयिता । ध्वन्यालोकेऽपि तदीयानि पद्यानि समुपलभ्यन्त इति नवमशतकात् पूर्वतनोऽयं कविः । सरस्वतीकण्ठाभरणे ११ एकादशपद्यान्युदाहरणरूपेण संप्राप्यन्तेऽस्य ।

**निद्रादरिद्रः**—'जाने कोपपराङ्मुखी प्रियतमा' पृ० ६०८ इति पद्यं सुभाषितावलौ निद्रादरिद्रकर्तृकत्वेन लिखितम् । तदेतत्पद्यं काव्यप्रकाशेऽपि श्रीमता मम्मटाचार्येण समुदाहृतम् ।

**निशानारायणः**—शार्ङ्गधरपद्धतौ 'अक्षुद्रारिकृताभिमन्यु' पृ० ५८६, 'उत्तिष्ठन्त्या रतान्ते' पृ० १६१, पृ० ६२०, इति पद्यद्वयी निशानारायणनाम्नोट्टङ्किता ।

**पञ्चस्तवीकर्ता**—कवेर्नाम न लब्धम् । काव्यमालायां मुद्रितैवेयं पञ्चस्तवी । 'चञ्चत्काञ्चनकाञ्चयो' पृ० २४९, 'लक्ष्मीवशीकरणचूर्ण' पृ० ७१३ इति पद्यद्वयी सरस्वतीकण्ठाभरणे समुदाहृता पञ्चस्तव्यां प्राप्यते ।

**प्रभाकरः**—'दिग्व्यातङ्गघटाविभक्त' पृ० ११४, १७५, ४१९ इति पद्यं क्षेमेन्द्रस्यौचित्यविचारचर्चायां प्रभाकरस्येति संलिखितम् ।

**प्रवरसेनः**—सेतुबन्धकाव्यकर्ता । ३१ एकत्रिंशत् पद्यानि सेतुबन्धादुद्धृतानि *सरस्वतीकण्ठाभरणे । सोऽयं कविः कैनिंगहाममतेन ४३२ खिस्ताब्देऽर्थात्* पञ्चमशताब्द्यामुत्पन्नः काश्मीरेषु ।

**बाणः**—महाकवेरस्य सप्तमशतकोत्पन्नत्वं सुप्रसिद्धम् । श्रीमान् भोजदेवो द्वितीये परिच्छेदे—

'यादृग्गद्यविधौ बाणः पद्यबन्धे न तादृशः ।
गत्यां गत्यामियं देवी विचित्रा हि सरस्वती ॥'

इति बाणविषये लिखति । सरस्वतीकण्ठाभरणे कादम्बरीतः-'हर इव जितमन्मथो' पृ० १५४ इति *गद्यभागः, 'दिशामलीकालकभङ्गतां' इति पद्यं च समुदाहृते ।* चण्डीशतकाच्च—'विद्राणे रुद्रवृन्दे' पृ० २४७ 'नीते निर्व्याजदीर्घा' पृ० २४७, 'प्राक् कामं दहता कृतः परिभवो' पृ० ७०० इति पद्यत्रयी समुदाहृता । सुभाषितावलौ शार्ङ्गधरपद्धतौ च बाणकर्तृकत्वेनोल्लिखितं पद्यद्वयं—'सर्वाशारुधि दग्धवीरुधि' पृ० २४८, ७११, 'उद्यद्बर्हिषि दर्दुरारवपुषि' पृ० २४८, अत्रोदाहृतम् ।

**बृहदारण्यकोपनिषद्**—अस्या उपनिषदः 'यस्मिन् पञ्च पञ्च जनाः' पृ० २६, इति पद्यमथ 'दमं दानं दयां शिक्षेः' पृ० ३८५ इति मन्त्रपूर्णं पद्यं चोद्धृत्योदाहृते भोजदेवेन ।

**ब्रह्मबिन्दूपनिषद्**—अस्याश्चोपनिषदः—'एक एव हि भूतात्मा' पृ० ४०४ एष श्लोकः समुद्धृत्योदाहृतः ।

**भट्टकपर्दी**—सुभाषितावलौ 'अम्बा तुष्यति न मया' पृ० ५२४ इति पद्यं भट्टकपर्दिनाम्नोट्टङ्कितम् ।

**भट्टिः**—भट्टिकाव्याद् भोजदेवेन षट् पद्यान्युद्धृतानि । ऑफ्रेक्टपण्डितमतेन भट्टिः, भट्टस्वामी, भर्तृस्वामी चैकस्यैव विदुषो नामानि । वेबरमतानुसारं भट्टिकाव्यं षष्ठ्यां सप्तम्यां वा शताब्द्यां श्रीधरसेननामकस्य राज्ञः पुत्रे वलभीं शासति तत्रैव रचितं भट्टिकविनेति सुभाषितावलौ डॉ. पीटरसनः संलिखति ।

**भरतः**—नाट्यशास्त्रात् सरस्वतीकण्ठाभरणे कारिकाद्वयी पञ्चमपरिच्छेदारम्भे संगृहीता 'रतिर्हासश्च शोकश्च' इति, 'स्तम्भस्तनूरुहोद्भेदः' इति च । कालोऽस्याप्यनिश्चित एव ।

**भर्तृहरिः**—नीतिशतकात् 'इतः स्वपिति केशवः' पृ० ४६० इति पद्यं संकलितं भोजदेवेन । एतदीयं वाक्यपदीयं हेलाराजपुञ्जराजाभ्यां विरचितया टीकया सनाथमिति हेलाराजात् प्राग्भवत्वमस्यैवं हेलाराजस्य कल्हणात् प्राचीनत्वमिति बहु प्राचीनोऽयम् । अस्य विषये जयपुरस्थानां प्रधानराज्याधिकारिणां **रायबहादूर पुरोहित श्रीगोपीनाथ एम्. ए., सी. आई. ई.** इति सुगृहीतनामधेयैः संलिखिता शतकत्रयभूमिका समालोच्या भावुकैः ।

**भल्लटः**—भल्लटशतककर्ता । 'किं जातोऽसि चतुष्पथे' पृ० ४५८ इति पद्यं सुभाषितावलौ भल्लटनाम्नोपलब्धम् ।

**भवभूतिः**—उत्तररामचरित-महावीरचरित-मालतीमाधवनाटकानां कर्ता । डॉक्तर्श्रीरामकृष्णगोपालभाण्डारकरमतेनाष्टमशताब्द्याः पूर्वभागे समुत्पन्नः । सरस्वतीकण्ठाभरण उत्तररामचरिताद् २२ द्वाविंशतिः पद्यानाम्, महावीरचरिताच्च पद्यानां १६ षोडशी, मालतीमाधवाच्च ३५ पञ्चत्रिंशत् पद्यान्युदाहृतानि भोजदेवेन ।

**भामहः**—आलंकारिकोऽयं सुप्रसिद्धः । अस्य ग्रन्थोऽपि प्रकाशित एव । ध्वनिकारादानन्दवर्धनादयं प्राचीनः । 'किंशुकव्यपदेशेन' इति पद्यं पृ० ४६९ सुभाषितावलौ भामहनाम्नोल्लिखितम् ।

**भारविः**—किरातार्जुनीयकर्ता । सप्तमशताब्द्यामुल्लिखिते द्वितीयस्य पुलकेशिनः शिलालेखे कवेरस्य कालिदासस्य च नामोपलब्ध्या ततः प्राक्तनत्वमस्य सिध्यति । भोजदेवेन स्वग्रन्थे ३८ अष्टात्रिंशत् पद्यान्युद्धृतानि ।

**भासः**—कालिदासादयं प्राचीन इति बहूनां मतम् । अस्य नाटकचक्रं महामहोपाध्यायगणपतिदेवशास्त्रिभिः सुष्ठु संपादितं प्रकाशितं च ।

**भोजराजः**—'कियन्मात्रं जलं विप्र' इति पद्यं पृ० १२२,२९८ शार्ङ्गधरपद्धतौ भोजराजनाम्ना लभ्यते । सोऽयमस्माकं सरस्वतीकण्ठाभरणकर्ता भोजदेवः । परंत्वेतत्पद्यं न भोजस्य स्वोपज्ञमेवेति ज्ञायते । यतो राजशेखरः स्वीयकाव्यमीमांसायां श्लोकमेनमुदाजहार । राजशेखरश्च भोजात् प्राचीनः ।

**मञ्जीरः**—'अन्यतो नय मुहूर्तमाननं' इति पद्यं (पृ० ४३७) सुभाषितावलौ मञ्जीरनाम्ना लिखितम् ।

**महानाटककर्ता**—महानाटककर्ता हनुमान्नामकविः श्रीरामदूतो हनुमान् वेति न निश्चितम् । ग्रन्थेऽस्मिन् बहवः श्लोका ग्रन्थान्तरीया अपि सन्तीति समालोचकभणितिः । एवमपि प्रवादो यदेतन्नाटकं समुद्रे शिलोल्लिखितप्रक्षिप्तं भोजदेवेनैव संलब्धं प्रकाशितं च । संभाव्यतेऽत एवास्माभिरपि यदत्र शीर्णो भागः प्राक्तनैः प्रसिद्धैः पद्यैः पूरितो भवेत् केनचित् कविनेति ।

**माघः**—शिशुपालवधकाव्यस्य रचयिता सुप्रसिद्धो माघः कविः खिस्ताब्दीयनवमशतकात्कथमपि नार्वाचीनः । यतो ध्वन्यालोके माघकाव्यादुदाहृतानि पद्यानि श्रीमतानन्दवर्धनाचार्येण । ४४ चतुश्चत्वारिंशत्पद्यान्युदाहरणरूपेण सरस्वतीकण्ठाभरणे भोजदेवेनापि संकलितानि । कवेरस्य विशेषवर्णनं द्रष्टुकामैरस्मत्पितृचरणैः श्रीमन्महामहोपाध्यायदुर्गाप्रसादमहोदयैः संपादितस्य माघस्य भूमिका विलोक्या ।

**मालवरुद्रः**—'अभिनववधूरोषस्वादुः' पृ० १३१, ७२२ इत्यादि पद्यं मालवरुद्रनाम्नोदाहृतं क्षेमेन्द्रेणौचित्यविचारचर्चायाम् ।

**मुञ्जः**—वाक्पतिरिति प्रसिद्धोऽयं मुञ्जोऽस्माकं ग्रन्थकर्तुर्भोजदेवस्य ज्येष्ठः पितृव्यः । दशरूपकभूमिकायां हालपण्डितः सुष्ठु वर्णितवान् विषयमेनम् । ऑफ्रेक्टपण्डितमतेन 'सौजन्याम्बुनिधे' पृ० ६० श्लोकोऽयं मुञ्जकृतः । परं श्लोकेऽस्मिन् मुञ्जं लक्ष्यीकृत्यैवोक्तिः । सेयमुक्तिर्भोजदेवस्य संभाव्यते ।

**मेण्ठः**—हयग्रीववधनामकस्य काव्यस्य रचयिता काश्मीरकोऽयं महाकविः ।

'मधुविकचसितोत्पलावतंसं' पृ० ३३८ इत्यादि पद्यं सुभाषितावलौ मेण्ठनाम्ना प्राप्यते । क्षेमेन्द्रः सुवृत्ततिलके हयग्रीववधस्य प्रथमं पद्यमेवमाचख्यौ—

'आसीद्दैत्यो हयग्रीवः सुहृद्वेश्मसु यस्य ताः ।
प्रथयन्ति बलं बाह्वोः सितच्छत्रस्मिताः श्रियः ॥'

राजतरङ्गिण्यां तृतीये तरङ्गे कह्लणपण्डितः कविमेनं मातृगुप्तकालिकं कथयति । मातृगुप्तश्च विक्रमादित्यकाले समभवदित्यस्य पञ्चमशतकोत्पन्नत्वं सिध्यति ।

**यशोवर्मा**—'यत्त्वन्नेत्रसमानकान्ति' पृ० ४१२।७२५ इत्यादि पद्यं क्षेमेन्द्रस्य सुवृत्ततिलके यशोवर्मनाम्नोल्लिखितम् । 'कृतककुपितैर्बाष्पाम्भोभिः' पृ० ६९६ इत्यादि च पद्यं सुभाषितावलौ यशोवर्मण एव । सोऽयमष्टमशताब्द्यां कान्यकुब्जेश्वर आसीत् ।

**राजशेखरः**—बालरामायणनाटकस्य, विद्धशालभञ्जिकाया नाटिकायाः, कर्पूरमञ्जरीनामकसट्टकस्य प्रचण्डपाण्डवापरनामकबालभारतनाटकस्य, काव्यमीमांसाख्यसाहित्यग्रन्थस्य च रचयिता यायावरीयः प्रसिद्धः कविः खिस्तीयदशमशतकप्रारम्भे महेन्द्रपालनामकभूपतेः सभायामासीत् । भोजदेवेन बालरामायणनाटकात् ५ पञ्च पद्यानि, विद्धशालभञ्जिकायाश्च पद्यत्रयमुदाहृतं स्वालंकारग्रन्थे ।

**रुद्रटः**—काव्यालंकारस्य रचयितालंकारिकः कविर्भोजदेवात्प्राचीनः । १९ एकोनविंशतिपद्यान्युदाहृतानि ग्रन्थादस्य भोजदेवेन ।

**लक्ष्मीधरः**—'कम्पन्ते कपयो भृशं' पृ० ३१६ इत्यादि पद्यं शार्ङ्गधरपद्धतौ लक्ष्मीधरनाम्ना प्राप्यते ।

**वामनः**—काव्यालंकारसूत्रकर्ता प्रसिद्धः काश्मीरको विद्वान् खिस्ताब्दीयनवमशतकान्नार्वाचीनः । यतोऽस्य ध्वन्यालोकलोचने नामोपलभ्यत इति । २२ द्वाविंशतिधोदाहृतानि भोजदेवेनास्य ग्रन्थे प्राप्यमाणानि पद्यानि ।

**वाक्पतिः**—गौडवहो नामकः प्राकृतकाव्यकर्ता । गोडवहो काव्यात् उद्धृता 'उव्वहइ दइ अगदि याह' पृ० ५७६ इत्यादि गाथा समुदाहृता भोजदेवेन । कवेरस्य यशोवर्मराज्यकालः पञ्चमशताब्दी खिस्तीया कालोऽवगन्तव्यः ।

**विकटनितम्बा**—सेयं प्रसिद्धा कवयित्री । 'किं द्वारि दैवहतके' पृ० १९२, ७०९, ७१८ इत्यादि पद्यं त्रिधोदाहृतं भोजदेवेन । समयोऽस्या अद्याप्यनिश्चितः ।

**विजयपालः**—'अमृतममृतं चन्द्रश्चन्द्रः' पृ० २५४ इत्यादि पद्यं सुभाषितावलौ विजयपालनाम्ना प्राप्यते ।

**विज्जिका**—( विज्जका वा ) इयमपि स्त्री कविः । अस्याश्चापरं 'मारुला' इति नाम

'नीलोत्पलदलश्यामां विज्जकां मामजानता ।
वृथैव दण्डिना प्रोक्तं सर्वशुक्ला सरस्वती ॥'

इत्यपि पद्यं सुभाषितावलौ प्राप्यते । ततो दण्डिन अर्वाचीनेयमिति सिध्यति । अस्याः 'उन्नमय्य सकचग्रहमास्यं' पृ० ८७, ६०१ इत्यादि पद्यम्, 'विलासमसृणोल्लसत्' पृ० ६०२ इत्यादि पद्यं च सुभाषितावलावुद्धृते ।

**विद्यापतिः**—'सुभ्रूस्त्वं कुपितेत्यपास्त' पृ० १९१ इत्यादि पद्यं शार्ङ्गधरपद्धतौ विद्यापतिनाम्ना प्राप्यते ।

**विशाखदत्तः**—मुद्राराक्षसनाटककर्ता । अस्य 'उवरि घणं घणपडिअं' इत्यादि प्राकृतं पद्यं सरस्वतीकण्ठाभरणे संस्कृतभाषोपनिबद्धं 'उपरि घनं घनपटलं' पृ० ३५३ इति प्राप्यते ।

**विष्णुशर्मा**—पञ्चतन्त्रस्य रचयिता । 'श्रूयतां धर्मसर्वस्वम्' पृ० ७१ इत्यादि पद्यमुदाहृतं भोजदेवेन । पञ्चतन्त्रे याज्ञवल्क्यस्मृतेर्नामोपलभ्यत इति सोऽयं कविः खिस्तीयतृतीयशताब्ध्याः परतश्चतुर्थशताब्ध्याश्च पूर्वं समुत्पन्न इति प्रतीयते ।

**बिह्लणकविः**—महाकविरयं खिस्तीयैकादशशताब्ध्यामुत्पन्नः । अस्य चौरीसुरतपञ्चाशिकातः 'अद्यापि तत्कनककुण्डल' पृ० १३६ इत्यादि पद्यमुदाहृतं ग्रन्थकर्त्रा ।

**शूद्रकः**—मृच्छकटिकप्रकरणस्य कर्ता । स्कन्दपुराणस्य कुमारिकाखण्डानुसारमेष कलिवर्षेषु ३२९० वर्षेषु व्यतीतेषूदभवत् । मार्समैननामकपाश्चात्यविदुषा लिखितस्य भारतेतिहासस्यानुसारं मगधशासकः सिपरुकनामको राजमन्त्री १९१ खिस्तवर्षे शूद्रकेण हत इति शूद्रको द्वितीयखिस्तशताब्ध्यामासीत् । 'पक्विबले लम्बदशाकपाले' पृ० ६९२ इत्यादि पद्यं 'जदिच्छसे' इत्यादि मृच्छकटिके प्राप्यते ।

**श्रीहर्षः**—रत्नावलीनाटिकायाः, प्रियदर्शिकानाटिकायाः, नागानन्दनाटकस्य, च कर्ता सुप्रसिद्धः कान्यकुब्जेश्वरो बाणमयूरादिप्रसिद्धकवीनामाश्रयभूतः सप्तमशतकोत्पन्नः । रत्नावल्या नव पद्यानि, नागानन्दाच्चैकं पद्यं 'दृष्टा दृष्टिमधो ददाति'

११९ इत्यादि समुदाहृतं श्रीमता भोजदेवेन। [ तदेतदाश्चर्यं यद् भोजदेवेन श्रीहर्षविरचितात् नैषधीयचरितात् पद्यमेकमपि नोदाहृतम् । ]

**सातवाहनः**—गाथासप्तशतीकर्ता प्रसिद्धः शालिवाहनो राजा शकप्रवर्तकः। गाथासप्तशत्याः ११३ त्रयोदशोत्तरमेकशतं गाथानामुदाहृतं भोजदेवेन। अस्माभिर्योदाहरणानुक्रमणिका योजिता तत्रैता गाथाः सातवाहनस्य गाथासप्तशतीस्था इत्यस्माकं सहृदयैः साहित्याचार्यभट्टश्रीमथुरानाथैः साहित्याध्यापकैः सूचिताः। महाभागैरेभिः गाथासप्तशती संस्कृतभाषायामार्याभिरनूदिता, एवं व्यङ्ग्यार्थबोधिनी टीकापि विरचितेति हर्षास्पदम्

'अणुमरणपत्थिआए' गा. स. ७।२३

'अण्णमहिलापसंगं गा. स. १।४८

'अण्णह न तीरइच्चिअ' गा. स. ४।४९

'अण्णुह णाहं कुविआ' गा. स. २।८४

'अत्तात्तह रमणिज्जं' गा. स. १।८

'अमअमअगअणसेहर' गा. स. १।१६

'आलाओ मा दिज्जउ' गा. स. ६।१४

'आलोअंति दिसाओ' गा. स. ६।४६

'उद्धच्छो पिअइ जलं' गा. स. २।६१

'गम्मिहिसि तस्स पासं' गा. स. ७।७

'घरिणिघणत्थणपेल्लण' गा. स. ६।६१

'घरिणीए महाणसकम्मलग्ग' गा. स. १।१३

'चत्तर धरिणी पिअदंसणाअ' गा. स. १।३६

'चिंताणिअदइअसमागमम्मि' गा. स. १।६०

[ 'पाअडिअणेह'='पअडिअसणेह' ] गा. स. २।९९

'सा तइ सहत्थदिण्णं' गा. स. २।९४

[ टीकाकर्त्रो: श्रीरामसिंहो नेपालाभिजनः, जगद्धरश्च चतुर्थपरिच्छेदटीकाकर्ता काश्मीरकः सुप्रसिद्धो वासवदत्तादिटीकाकर्तेति ज्ञेयम् ]

**विशेषतो द्रष्टव्यम्**—सरस्वतीकण्ठाभरणे यान्युदाहरणानि यत्र उद्धृतानीति सूचिका **Col. G. A. Jacob** नाम्ना पाश्चात्यविदुषा भूयसा श्रमेण विरचितास्माकं सहृदयैः **Dr. F. W. Thomas M. A., Ph. D.** महोदयैः इण्डियाऑफिसपुस्तकालयाध्यक्षैः सकृपं संप्रेषिता । तदाधारेण अथ **Dr. Peterson M. A.** नामकविदुषा रचितायाः सुभाषितावलीभूमिकायाः संग्रहैषा कविनामसूची निर्मितास्माभिः । वयं **डॉक्तर तामस**-महोदयाय धन्यवादान् वितरामः ।

संपादकौ ।

॥ श्रीः ॥

# परमारवंश्यो भोजदेवः ।

परमारवंश्यानां प्राचीनशिलालेखादिभिः, परिमलपरनामधेयपद्मगुप्तरचितान्नवसाहसाङ्कचरितात् काव्याच्चैवं ज्ञायते यदेतद्वंशीयमूलपुरुषो वासिष्ठादग्निकुण्डादर्बुदाचलपर्वते प्रादुरासीदिति ।

सरस्वतीकण्ठाभरणेऽपि नायकगुणेषु पुंसो महाकुलीनत्वोदाहरणे श्रीभोजदेवः [1]स्ववंशोत्पत्तिमेवमुल्लिलेख—

'वासिष्ठैः सुकृतोद्भवोऽध्वरशतैरस्त्यग्निकुण्डोद्भवो
भूपालः परमार इत्यधिपतिः सप्ताब्धिकाञ्चेर्भुवः ।
अद्याप्यद्भुतहर्षगद्गदगिरो गायन्ति यस्योद्भटं
विश्वामित्रजयोर्जितस्य भुजयोर्विस्फूर्जितं गुर्जराः ॥'

सोऽयं परमारवंशोऽग्निकुलत्वेनात्मानं ख्यापयति । परमाराः, प्रतीहाराः, चालुक्याः, चाहमानाश्चेति चतुर्विधाः क्षत्रिया नानाशाखासु विभक्ताः स्वमग्निवंशोद्भवं मन्यन्ते । यद्यपि परमाराणामेवाग्निवंशोद्भवत्वं सिध्यति यतो विविधेषु शिलालेखेषु चालुक्यादीनां सूर्यवंशोद्भवत्वं वर्णितम् । तथापि पृथ्वीराजरासोनाम्नि डिङ्गलाख्यभाषाग्रन्थे चतुर्विधा अप्येते क्षत्रिया अग्निवंश्यत्वेन वर्णितास्तथैवाधुना प्रसिद्धाश्च ।

---

१. 'अस्त्युर्वीध्रः प्रतीच्यां हिमगिरितनयः सिद्धदाम्पत्यसिद्धेः
स्थानं च ज्ञानभाजामभिमतफलदोऽखर्वितः सोऽर्बुदाख्यः ।
विश्वामित्रो वसिष्ठादहरत बलतो यत्र गां तत्प्रभावा-
ज्जज्ञे वीरोऽग्निकुण्डाद्रिपुबलनिधनं यश्चकारैक एव ॥
मारयित्वा परान् धेनुमानिन्ये स ततो मुनिः ।
उवाच परमाराख्यः पार्थिवेन्द्रो भविष्यसि ॥'
एपिग्राफियाइण्डिकाप्रथमपुटके पञ्चमभागः—उदयपुरप्रशस्तिः ।

२. नवसाहसाङ्कचरितकाव्येऽप्येकादशे सर्गे—

'ब्रह्माण्डमण्डपस्तम्भः श्रीमानस्त्यर्बुदो गिरिः ।
उरोढहंसिका यस्य सरितः सालभञ्जिकाः ॥ ४९ ॥

.....................................

.....................................

अतिस्वाधीननीवारफलमूलसमित्कुशम् ।
मुनिस्तपोवनं चक्रे तत्रेक्ष्वाकुपुरोहितः ॥ ६४ ॥
हृता तस्यैकदा धेनुः कामसूर्गाधिसूनुना ।
कार्तवीर्यार्जुनेनेव जमदग्नेरनीयत ॥ ६५ ॥
स्थूलाश्रुधारासंतानस्नपितस्तनवल्कला ।
अमर्षपावकस्याभूद्भर्तुः समिदरुन्धती ॥ ६६ ॥
अथाथर्वविदामाद्यः समन्त्रामाहुतिं ददौ ।
विकसद्विकटज्वालाजटिले जातवेदसि ॥ ६७ ॥
ततः क्षणात्सकोदण्डः किरीटी काञ्चनाङ्गदः ।
उज्जगामाभितः कोऽपि सहेमकवचः पुमान् ॥ ६८ ॥
दूरं सन्तमसेनेव विश्वामित्रेण सा हृता ।
तेनानिन्ये मुनेर्धेनुर्दिनश्रीरिव भानुना ॥ ६९ ॥
ततस्तापसकन्याभिरानन्दाश्रुलवाङ्कितः ।
कपोलः पाणिपर्यङ्कात्साश्रुलेखादपास्यत ॥ ७० ॥

परमारवंशवर्णनम्—

परमार इति प्रापत्स मुनेर्नाम चार्थवत् ।
मीलितान्यनृपच्छत्रमातपत्रं च भूतले ॥ ७१ ॥
प्रवर्तितातिविस्तीर्णसप्ततन्तुपरम्परः ।
पुराणकूर्मशेषं यश्चकाराम्भोनिधेः पयः ॥ ७२ ॥

.....................................

.....................................

वंशः प्रववृते तस्मादादिराजान्मनोरिव ।
नीतः सुवृत्तैर्गुरुतां नृपैर्मुक्ताफलैरिव ॥ ७४ ॥'

इत्यादि—

परं शिलालेखादिप्रमाणैः केवलं परमाराणामेवाग्निवंश्यत्वं सिध्यति । अन्येषां च सूर्यवंश्यत्वं चन्द्रवंश्यत्वं च । परमारवंशो मालवदेशस्याधिपत्यमासीदिति तदन्ववायानां मालवाधीशत्वेनापि प्रसिद्धिः । वंशेऽस्मिन् उपेन्द्रः ( कृष्णराजापरनामधेयः ) अनुमानतो 800 A. D.–825 A. D. काले प्रसिद्धो बभूव ।

## मालवाधीशानां परमाराणां वंशवृक्षः ।

| संख्या | राजनाम | ज्ञातसमयः ( A. D. ) | विशेषता । |
|---|---|---|---|
| १. | उपेन्द्रः | ( ८००–८२५ ) | |
| २. | वैरिसिंहः १ | ( ८२५–८५० ) | |
| ३. | सीयकः १ | ( ८५०–८७५ ) | |

तत एवास्मिन् वंशे समुद्भूतानां राज्ञां नामानि शिलालेखादिपूट्टङ्कितान्यधिगम्यन्ते ।

| संख्या | राजनाम | ज्ञातसमयः | विशेषता |
|---|---|---|---|
| ४. | वाक्पतिः १ | ( ८७५–९१४ ) | |
| ५. | वैरिसिंहः २ ( वज्रटापरनाधेयः ) | ( ९१४–९४१ ) | असौ धारानगर्यां राज्यं स्थापितवान् । |
| ६. | सीयकः २ ( हर्षदेवापरनामा ) | | एष राष्ट्रकूटवंशोद्भवं खोट्टिगं पराजितवान् (971–A.D.) |
| ७. | महाराजाधिराजो वाक्पतिः २ ( मुञ्जापरनामा ) | ( ९७७–९९७ ) | अतिप्रसिद्धोऽयं राजा चेदिवंशोद्भवं राजानं जितवान् ( ९७५–१००० ) |
| ८. | सिन्धुराजः (सिन्धुल इति ख्यातः) | ( ९९७–१११० ) | नवसाहसाङ्कचरितकाव्यस्य नायकः । |
| ९. | भोजदेवः १ | ( १०१०–१०५५ ) | सरस्वतीकण्ठाभरणस्य रचयिता चालुक्यगुर्जरस्य भीमदेवस्य समसामयिकः । ( १०२२–६३ ) |

---

एवमुपेन्द्रमारभ्य भोजदेवपर्यन्तं वंशपरम्परा । ऐतरेयब्राह्मणानुसारं भोजशब्दो राजवाचकः । वैदिककाले भोजशब्देन राज्ञां परिचय आसीत् । सत्यव्रतसामश्रमिणां मतेन भोज इति वंशनाम । यद्वा तद्वा भवतु भोजशब्दार्थः परंत्वेतत्तु निश्चितमेव यद् भोजशब्दो राज्ञो राजवंश्यस्य वा बोधक आसीत्तदानीम् । सोऽयमस्माकं सर-

स्वतीकण्ठाभरणकर्ता भोजदेवः १०१० खृस्तीयकालमारभ्य १०५५ खृस्तीयसंवत्सरपर्यन्तं धारानगर्यां राजमान आसीत् । महाराजाधिराजस्यास्य स्वहस्ताक्षरालंकृतं दानपत्रत्रयमद्यावधि समुपलब्धम् । असौ भोजदेवः कविः कवीनां संरक्षको वास्तवं दानवीर आसीत् । आबालवृद्धं विक्रमादित्यनामेव भोजराजनाम्नापि सुविदितः । मूलमस्य विद्वत्समादर एवेति न नामाविदितं कस्यापि संस्कृतभाषाभाषिणः । 'प्रत्यक्षरं लक्षं ददौ' इति वारंवारं समुल्लिखन् बल्लालपण्डितः स्वीयभोजप्रबन्धे प्राक्तनानपि विदुषो भोजसमकालिकानेव विदधानस्तेषां राजसभायां समुचितं समादरं रारटीति।

कह्लणपण्डितोऽपि—

**'स च भोजनरेन्द्रश्च दानोत्कर्षेण विश्रुतौ ।**
**सूरी तस्मिन्क्षणे तुल्यं द्वावास्तां कविबान्धवौ ॥'**

(राजतरङ्गिणी ७।२५९)

एवं भोजसमानकालिकः साहित्यविद्यासूत्रधारः श्रीमम्मटपण्डितोऽपि

'भोजनृपतेस्तत्त्यागलीलायितम् ।'

इति काव्यप्रकाशे दानवीरमेनं विद्वज्जनवल्लभं स्तौति । अस्मद्गुरुचरणानां जयपुरराजकीयसंस्कृतपाठशालाध्यक्षाणां महामहोपाध्यायश्रीदुर्गाप्रसादद्विवेदिमहोदयानां तु मतेन 'प्रत्यक्षरं लक्षं ददौ' इत्यस्य 'प्रत्यक्षरं लक्ष्यं ददौ' इति परिवर्तनं कियन्तमतिशयं धत्ते नामेति विद्वद्भिर्विशेषतो कवयितृभिर्विचार्यं नाम ।

यतो राजा यदि स्वयमेवंविधविधो भवेद् यः प्रत्यक्षरं लक्ष्यं दद्यात्तदा तल्लक्ष्यमूल्यतो लक्षस्य द्रविणस्य नातिरेकः ।

भोजदेवसमये काष्ठवाहकोऽपि संस्कृतभाषापरिचित आसीत् । सरस्वतीकण्ठाभरणे—

**'भूरिभारभराक्रान्त बाधति स्कन्ध एष ते ।**
**न तथा बाधते स्कन्धो यथा बाधति बाधते ॥'**

इति स्वयमुदाहरन्नस्माकं प्रियतरो दानविश्रुतो भोजः स्वस्य संस्कृतविद्याप्रेमोत्तम्भयामास ।

तस्मिन् काले राजसभा विद्वत्प्रवेश्या कथंविधासीदिति कल्पने यायावरीयो राजशेखरः काव्यमीमांसायामेवमादिक्षत्—

राजा कविः कविसमाजं विदधीत । राजनि कवौ सर्वो लोकः कविः स्यात् । स काव्यपरीक्षायै सभां कारयेत् । सा षोडशभिः स्तम्भैश्चतुर्भिर्द्वारैरष्टभिर्मत्तवारणीभि-

रुपेता स्यात्। तदनुलग्नं राज्ञः केलिगृहम्। मध्ये चतुःस्तम्भान्तरा हस्तमात्रोत्सेधा समणिभूमिका वेदिका। तस्यां राजासनम्। तस्य चोत्तरतः संस्कृताः कवयो निविशेरन्। बहुभाषाकवित्वे यो यत्राधिकं प्रवीणः स तेन व्यपदिश्यते। यस्त्वनेकत्र प्रवीणः स संक्रम्य तत्र तत्रोपविशेत् ततः परं वेदविद्याविदः प्रामाणिकाः पौराणिकाः स्मार्ता भिषजो मौहूर्तिका अन्येऽपि तथाविधाः। पूर्वेण प्राकृताः कवयः ततः परं नटनर्तकगायन( क? ) वादकवाग्जीवनकुशीलवतालावचरा अन्येऽपि तथाविधाः। दक्षिणतो भूतभाषाकवयः, ततः परं चित्रलेप्यकृतो माणिक्यबन्धका वैकटिकाः स्वर्णकारवर्धकिलोहकारा अन्येऽपि तथाविधाः। दक्षिणतो भूतभाषाकवयः, ततः परं भुजङ्गगणिकाः प्लवकशौभिकजम्भकमल्लाः शस्त्रोपजीविनोऽन्येऽपि तथाविधाः।

तत्र यथासुखमासीनः काव्यगोष्ठीं प्रवर्तयेत् भावयेत् परीक्षेत च। वासुदेवसातवाहनशूद्रकसाहसाङ्कादीन् सकलान् सभापतीन् दानमानाभ्यामनुकुर्यात्। तुष्टपुष्टाश्चास्य सभ्या भवेयुः। स्थाने च पारितोषिकं लभेरन्। लोकोत्तरस्य काव्यस्य च यथार्हा पूजा कवेर्वा। अन्तरान्तरा च काव्यगोष्ठीं शास्त्रवादाननुजानीयात्। मध्वपि नानवदंशं स्वदते। काव्यशास्त्रविरतौ विज्ञानिष्वभिरमेत। देशान्तरागतानां च विदुषाम(न्य? )द्वारा सङ्गं कारयेदौचित्याद् यावत्स्थितिपूजां च। वृत्तिकामांश्चोपजपेत् संगृह्णीयाच्च पुरुषरत्नानामेक एव राजोदन्वान् भाजनम्। राजचरितं च राजोपजीविनोऽप्यनुकुर्युः। राज्ञ एव ह्यसावुपकारो यद्राजोपजीविनां संस्कारः।

महानगरेषु च काव्यशास्त्रपरीक्षार्थं ब्रह्मसभाः कारयेत्। तत्र परीक्षोत्तीर्णानां ब्रह्मरथयानं पट्टबन्धश्च। श्रूयते चोज्जयिन्यां काव्यकारपरीक्षा—

'इह कालिदासमेण्ठावत्रामररूपसूरभारवयः।
हरिचन्द्रचन्द्रगुप्तौ परीक्षिताविह विशालायाम्॥'

श्रूयते च पाटलिपुत्रे शास्त्रकारपरीक्षा—

'अत्रोपवर्षवर्षाविह पाणिनिपिङ्गलाविह व्याडिः।
वररुचिपतञ्जली इह परीक्षिताः ख्यातिमुपजग्मुः॥'

इत्थं गभ्रपतिर्भूत्वा यः काव्यानि परीक्षते। यशस्तस्य जगद्व्यापि स सुखी तत्र तत्र च॥'

सरस्वतीकण्ठाभरणकर्तुर्भोजदेवस्यापि विद्वत्सभावश्यमेवैतादृशी संभाव्यते। तत्र च तत्समसामयिकानां विदुषां राजसभासभास्तारत्वमपि तथैवास्ते सेत्यपि निश्चितमनुमीयते।

भोजप्रबन्धकर्तुर्बल्लालपण्डितस्य मतेन तु सर्वेऽपि महाकवयो बाणमयूरादयस्त-

दानीमेव समासन् । परं नात्र किमपि तथ्यमिति भोजप्रबन्धस्याप्रामाणिकतेदानीं सुप्रसिद्धैव ।

वाजसनेयिसंहितायाष्टीकाकर्ता औवटपण्डितो भोजसमकालिक इति तदीयलेखतो विज्ञायते । तथैव तिलकमञ्जर्याख्याया आख्यायिकायाः कर्ता धनपालोऽपि भोजस्य, भोजपितुः सिन्धुलस्य, भोजपितामहस्य मुञ्जस्य च काले जीवित आसीत् । एवमन्येऽपि दशरूपकादिकर्तारो धनिकप्रभृतयः ।

सिन्धुलो मुञ्जस्य कनिष्ठभ्राता, तत्पुत्रश्च भोजदेव आसीदिति सिध्यत्युपरिलिखितलेखेभ्यः ।

यद्यपि—

**'मान्धाता स महीपतिः क्षितितलालंकारभूतो गतः**
**सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः ।**
**अन्ये चापि युधिष्ठिरप्रभृतयो यावन्त एवाभवन्**
**नैकेनापि समं गता वसुमती मुञ्ज त्वया यास्यति ॥'**

इति पद्यं भोजोक्त्या प्रसिद्धं वर्तते । यदा किल मुञ्जाज्ञया भोजो वधिकेन शिरश्छेदाय विजने नीतोऽथ संसूचितो मुञ्जाज्ञया तदानीं विलिख्यैतत् पद्यं संप्रेषितं भोजदेवेन मुञ्जान्तिके इति भोजप्रबन्धानुसारमाबालवृद्धं प्रसिद्धिः ।

एवं सरस्वतीकण्ठाभरण एव चाटूक्त्युदाहृतौ—

**'सौजन्याम्बुनिधे बुधप्रिय गुणप्राकार धर्मद्रुम-**
**प्रारोह प्रतिपन्नवत्सल महात्यागिन् विवेकाश्रय ।**
**लक्ष्म्यावास मनस्विनीमनसिजव्यापारदीक्षागुरो**
**श्रीमन् मुञ्ज किमित्यमुं जनमुपस्प्रष्टुं दृशा नार्हसि ॥'**

इति पूर्वश्लोकोपोद्वलकं पद्यमप्युपलभामहे । मुञ्जे राज्यं शासति सति भोजोऽवश्यमेव निरपत्यस्यास्यासूयोद्भावकोऽभूदित्यपि नाश्चर्यम् । यतोऽस्मिन् पद्ये 'किमित्यमुं जनमुपस्प्रष्टुं दृशा नार्हसि' इति वाक्यं भोजोक्तिर्भवेदेषेति प्रमाणयति । यद्वा तद्वा भवतु परं मुञ्जोत्तरं तत्कनीयान् सिन्धुलो राजाभवत् तदुत्तरं च भोजदेव इति तु निश्चितमेव ।

मुञ्जश्च तत्प्रधानमन्त्रिणा रुद्रादित्येन निषिद्धोऽपि पूर्वं षड्वारं तैलपं विजिग्ये इति सप्तमवारमपि गोदावरीं समुल्लङ्घ्याहवे प्रविष्टस्त्रिकलिङ्गदेशाधिपतिना तैलपेन

पराजितो निगडितश्च । अथ काष्ठपञ्जरे प्रवेशितः शेषमायुः शेषितवान् । तत्र च परिचर्यानियुक्तया तैलपराजभगिन्या विधवया मृणालवत्या सह तस्य प्रेमबन्धः संजातः । मुञ्जमन्त्रिभिश्च निगडस्थानं यावद् भूगर्भे गुप्तमार्गः सुरङ्गाभिधो विरचितः । तद्द्वारा मुञ्जे स्वराज्यं जिगमिषति मृणालवन्तीं तत्र पट्टमहिषीत्वेन संमानयिष्यामीति प्रतिज्ञातवति तां सह निनीषति च मृणालवती तत्र न विश्वसिति स्म । यतो मृणालवत्यास्तदानीं वयो मध्यमासीद्यदि किंचित्कालानन्तरं मत्परित्यागं कुर्यान्मुञ्जस्तदाहं किं करिष्यामीति संदिहाना सा स्वीयालंकरणपुटकमानयामीति मिषेण स्वसहोदरान्तिके सर्वमप्येतद्वृत्तमाचख्यौ । तैलपः श्रुत्वैतद्वृत्तजातं परं क्रुद्धो मुञ्जेन सह कठोरमाचरणं विदधे । खापमानं नगरे भ्रामयित्वा च शूले समारोपितवान् तमिति मेरुतुङ्गाचार्यः स्वीयप्रबन्धचिन्तामणौ मुञ्जप्रबन्धे विलिखति । रायबहादुरपण्डितश्रीगौरीशङ्करहीराचन्दओझामहोदयानां संमतौ वृत्तमेतदतिशयोक्तिमूलमुपहासमूलं च । केवलं सत्यांशोऽत्रैतावानेव यन्मुञ्जो युद्धे मृतो वा निगडितो वा न परावृत्तः स्वीयामुज्जयिनीं राजधानीमिति । सिन्धुलकालपण्डितो नवसाहसाङ्ककर्ता परिमलोऽप्यल्पितवान् मुञ्जपराजयमिति विमर्शकोक्तिः साधीयसी । यतः—

'स्वेनारातिकरालकालरचनाचण्डासिदण्डेन यो
हत्वा मुञ्जमहानृपप्रणयिनीं संग्रामरङ्गाङ्गणे ।
लक्ष्मीमम्बुधिमेखलावलयितक्ष्मावर्तिनीं प्रापयद्
भूपश्रीरणरङ्गभीमभवने साक्षात्कुलस्त्रीव्रतम् ॥'

इति पद्यं तैलपनामकस्य द्वितीयभिल्लमस्य ताम्रपत्रे समुपलभ्यते । यत्र च रणरङ्गभीमस्य तैलपस्य सदने मुञ्जप्रियां लक्ष्मीं भिल्लमः कुलस्त्रीव्रतं प्रापयदिति वर्णनं मुञ्जस्य पराभवं प्रकाशयति ।

अथेदानीं वयमप्यत्र मुञ्जराजवृत्तपुरःसरं तदानींतनमैतिह्यं विलिखामः । बल्लालपण्डितः किल स्वीये भोजप्रबन्धे सिन्धुलो नाम राजा कनिष्ठे भ्रातरि मुञ्जे राज्यभारं संस्थाप्याल्पवयस्कं भोजनामानमात्मजं तदधीनं कृतवान्, अथ मुञ्जो राज्यशासनलोलुपतया भोजस्य शिरश्छेदाय प्रयतितवानिति लिखति । किंतु नागरादधिगते ११६१ विक्रमवर्षीयलेखे—

"वंशेऽस्मिन् वैरिसिंहः क्षितिपतिरभवद् भूरिभूतिप्रभाव...... । तस्माद्वै... श्रीसीयकोऽभून्नृपः । तस्माद्वैरिवरूथिनीबहुविधप्रारब्धयुद्धाध्वरप्रध्वंसैकपिनाकपाणिरजनि श्रीमुञ्जराजो नृपः । ... । तस्यासीदथ पार्थिवः पृथुयशाः श्रीसिन्धुराजो

नृपः ।...। तत्सूनुर्भुवनैकभूषणमभूद्भूपालचूडामणिश्छायाडम्बरचुम्बिताङ्घ्रिकमलः श्रीभोजदेवो नृपः (एपिग्राफिया इण्डिका भा० २ पृ० १८३-१८५)

वैरिसिंहस्य पुत्रः श्रीसीयकः, ततस्तत्सुतो मुञ्जः, ततश्च तत्कनिष्ठो भ्राता सिन्धुलस्ततश्च तदात्मजो भोजो बभूवेति स्पष्टं विज्ञायते ।

नवसाहसाङ्ककाव्यस्य रचयिता परिमलकविरपि—

'वैरिसिंह इति प्रापज्जन्म तस्माज्जनाधिपः ।
कीर्तिभिर्यस्य कुन्देन्दुविशदाभिः सटायितम् ।

.........................................

श्रीसीयक इति श्रेष्ठं यशसामुदभूत्ततः ।
दिलीपप्रतिमः पृथ्वीशुक्तिमुक्ताफलं नृपः ॥

.........................................

श्रीमद्वाक्पतिराजोऽभूदग्रजोऽस्याग्रणीः सताम् ।
सगरापत्यदत्ताब्धिपरिखायाः पतिर्भुवः ॥
अतीते विक्रमादित्ये गतेऽस्तं सातवाहने ।
कविमित्रे विशश्राम यस्मिन्देवी सरस्वती ॥

.........................................

पुरं कालक्रमात्तेन प्रस्थितेनाम्बिकापतेः ।
मौर्वीकिणाङ्कवत्यस्य पृथ्वी दोष्णि निवेशिता ॥
प्रशास्ति परितो विश्वमुज्जयिन्यां पुरि स्थितः ।
अयं ययातिमान्धातृदुष्यन्तभरतोपमः ॥

.........................................

सदा समकरस्यास्य लक्ष्मीकुलगृहस्य च ।
सिन्धुराज इति व्यक्तं नाम दुग्धोदधेरिव ॥
अनेन विहितान्यत्र यत् साहसशतान्यतः ।
नवीनसाहसाङ्कोऽयं वीरगोष्ठीषु गीयते ॥'

( नवसाहसाङ्कचरितकाव्ये एकादशे सर्गे )

धनपालश्च तिलकमञ्जर्याम्—

'श्रीवैरिसिंह इति दुर्धरसैन्यदन्तिदन्ताग्रभिन्नचतुर्णवकूलभित्तिः ॥ ४० ॥

तत्राभूद्वसतिः श्रियामपरया श्रीहर्ष इत्याख्यया
विख्यातश्चतुरम्बुराशिरसनादाम्नः प्रशास्ता भुवः।
भूपः खर्वितवैरिगर्वगरिमा श्रीसीयकः सायकाः
पञ्चेषोरिव यस्य पौरुषगुणाः केषां न लग्ना हृदि ॥ ४१ ॥
तस्योदग्रयशाः समस्तसुभटग्रामाग्रगामी सुतः
सिंहो दुर्धरशत्रुसिन्धुरततेः श्रीसिन्धुराजोऽभवत्।
एकाधिज्यचतुर्जिताब्धिवलयावच्छिन्नभूर्यस्य स
श्रीमद्वाक्पतिराजदेवनृपतिर्वीराग्रणीरग्रजः ॥ ४२ ॥
आकीर्णाङ्घ्रितलः सरोजकलशच्छत्रादिभिर्लाञ्छनै-
स्तस्याजायत मांसलायतभुजः श्रीभोज इत्यात्मजः।
प्रीत्या योग्य इति प्रतापवसतिः ख्यातेन मुञ्जाख्यया
यः स्वे वाक्पतिराजभूमिपतिना राज्येऽभिषिक्तः स्वयम् ४३'

मुञ्जः संस्कृतभाषारसिकः स्वयं च प्रगल्भ आसीदितीतस्ततो वर्तमानैर्वृत्तैर्विदितचरम्। तदुत्तराधिकारी सिन्धुलोऽपि कुमारनारायणापरनामधेयो नवसाहसाङ्कत्वेन परिमलकविग्रन्थे नायकत्वेन वर्णितः।

भोजोऽपि स्वपूर्वपूरुषानुयायी संस्कृतभाषारसिकत्वेन जगत्प्रसिद्धः। अवन्तीमुज्जयिन्यां विक्रमादित्य इव भोजोऽप्यापामरं प्रसिद्धोऽनेकविधासु च कथासु गीतोऽद्वितीयो जातः।

उदयपुरप्रशस्तौ—

'साधितं विहितं दत्तं ज्ञातं तद् यन्न केनचित्।
किमन्यत्कविराजस्य श्रीभोजस्य प्रशस्यते ॥'

इति भोजप्रशंसापरं पद्यम्।

एष एव भोजदेवः काश्मीरककविविरचिते पृथ्वीराजविजयमहाकाव्ये—

'अगम्यो यो नरेन्द्राणां सुधादीधितिसुन्दरः।
जग्ने यशश्चयो यश्च भोजेनावन्तिभूभुजा ॥'

वीर्यरामनाम्ना प्रसिद्धस्य शाकंभरि(सांभर)राज्ञो यशोहारको मारकश्च वर्णितः।

उदयपुरप्रशस्ताविव—

'चेदीश्वरेन्द्ररथतोग्गलभीममुख्यान्
कर्णाटलाटपतिगुर्जरराट्तुरुष्कान् ।
यद्भृत्यमात्रविजितानवलोक्य मौला
दोष्णां बलानि कलयन्ति न योद्धृलोकान् ॥

केदाररामेश्वरसोमनाथसुण्डीरकालानलरुद्रसत्कैः ।
सुराश्रयैर्व्याप्य च यः समन्ताद्यथार्थसंज्ञां जगतीं चकार ॥'

एवमाहिमालयमामलयं च भोजदेवस्य प्रभुत्वं वर्णितम् ।

परमियान् प्रदेशस्तु नासीद्भोजशासने केवलं मालवदेशस्तत्प्रान्तीयो भूयान् भूभागश्च तदधीन आसीदिति कविकृतैवेयं रचनेत्यनुमीयते । भोजे शासति पृथ्वीं चेदीश्वरो गाङ्गेयदेवः कलचूरिवंशीयः कर्णदेवश्च तत्प्रतिद्वन्द्विनावास्ताम् । कर्णदेवश्च भोजजीवनकालं यावत् धाराविजिगीषया युद्धं कुर्वाण आसीत् । अत एव भोजस्यापि कर्णगाङ्गेययोरुपरि पराक्रमः संभाव्यते । इन्द्ररथतोग्गलयोर्विषये न किमपि विदितमद्यापि । भीमो गुर्जरदेशाधिपतिश्चौलुक्यवंशीय आसीत् । तमेव भोजदेवो विजितवानिति वर्णना प्रबन्धचिन्तामणिप्रभृतिग्रन्थेषूपलब्धा । यदा भीमदेवः सिन्धुदेशमाक्रान्तवान् तदानीमेव भोजमन्त्रिणा जैनधर्मावलम्बिना कुलचन्द्रेण भीमदेवराज्यं विजितमथ जयपत्रलेखपूर्वं मालवे परावृत्तम् । एवमेकवारं दुष्कालावसरे भोजदेवेन भीमदेवोपर्याक्रमः कृतस्तदा भीमेन सान्धिविग्रहिकं डामरं संप्रेष्य दण्डं प्रदाय संधिः कृता । परस्परं कलहं कुर्वाणयोर्भोजभीमयोर्नासीत् कदापि शान्तिः । भोजस्यान्तिमसमये चेदीश्वरेण कर्णेन धारोपर्याक्रमणं कृतं तदैव भीमदेवोऽपि तेन कर्णेन सह संपृक्तः । परं विशेषो लाभस्तत्र कर्णस्यैव संजातः । जैनकविना हेमचन्द्रेण स्वीये द्व्याश्रयकाव्ये न किमप्यस्मिन्विषये संलिखितम् । यतो हेमचन्द्राचार्यो गुर्जरदेशीयभूभुजो राजसभायां प्रविष्ट आसीत् । भोजः कर्णाटदेशीयान् दक्षिणचालुक्यान् पराक्रान्तवानिति राजवल्लभविरचिताद् भोजचरित्रादपि ज्ञायते । यदा युवावस्थो भोजदेवो राज्यप्रबन्धे संलग्नमना आसीत्तदानीमेकदैकरूत्समक्षे मुञ्जशिरश्छेदविषयकोऽभिनयोऽभिनीतः । तं दृष्ट्वैव दक्षिणदेशं विजेष्यामीत्युत्कण्ठा तन्मनसि प्रादुर्भूता । आक्रान्तश्च तेन दक्षिणदेशः । तस्मिन् तत्सहायका अप्यासन् पार्श्ववर्तिदेशानामधिपा अन्येऽपि राजानः । भोजशब्दानुसारं

तैलप एव ( परं तैलपपौत्रो विक्रमादित्यो भवेत् ? ) विजितः शिरश्छेदपूर्वं मुञ्जप्रतीकारो गृहीतश्च । परं मुञ्जमरणकाले भोजदेवो बालक आसीत् तैलपश्च कियताचित् कालेन मृत इति तैलपपौत्रो विक्रमादित्यो विजितः स्यात् । यः किल कल्याणनगरस्याधिपतिरासीत् । अथ विक्रमादित्योत्तराधिकारिणस्तद्भ्रातुर्जयसिंहदेवस्य शकसंवत् ९४१ काले लिखिते लेखे जयसिंहो मालवसैन्यस्य विजेता भोजरूपकमलस्य कृते चन्द्रत्वेन च वर्णितः ।

एवमुदयपुरशस्तौ कर्णाटकविजेतृत्वेन भोजो वर्णितः । परस्परं युध्यतोरनयोः स्वस्वविजयवर्णनमुचितमेव । परं विजयोऽत्र भोजस्यैव विशेषतोऽनुमीयते । यतो जयसिंहपुत्रेण सोमेश्वरेणापि भोजविजिगीषया धारोपर्याक्रान्तमासीत् ।

• काश्मीरको बिल्हणपण्डितश्च विक्रमाङ्कदेवचरिते सोमेश्वरप्रतापवर्णनमेव चकार—

'दीपप्रतापानलसंनिधानाद्बिभ्रत्पिपासामिव यत्कृपाणः ।
प्रमारपृथ्वीपतिकीर्तिधारां धारामुदारां कवलीचकार ॥
अगाधपानीयनिमग्नभूरिभूभृत्कुटुम्बोऽपि यदीयखड्गः ।
भाग्यक्षयान्मालवभर्तुरासीदेकां न धारां परिहर्तुमीशः ॥
निःशेषनिर्वासितराजहंसः खड्गेन बालाम्बुदमेचकेन ।
भोजक्ष्माभृद्भुजपञ्जरेऽपि यः कीर्तिहंसीं विरसीचकार ॥
भोजक्ष्मापालविमुक्तधारानिपातमात्रेण रणेषु यस्य ।
कल्पान्तकालानलचण्डमूर्तिश्चित्रं प्रकोपाग्निरवाप शान्तिम् ॥
यः कोटिहोमानलधूमजालैर्मलीमसीकृत्य दिशां मुखानि ।
तत्कीर्तिभिः क्षालयति स्म शश्वदखण्डतारापतिपाण्डुराभिः ॥
ध्रुवं रणे यस्य जयामृतेन क्षीवः क्ष्माभर्तुरभूत्कृपाणः ।
एका गृहीता यदनेन धारा धारासहस्रं यशसोऽवकीर्णम् ॥'

अतो जयसिंहस्य भोजकमलकृते चन्द्रत्ववर्णनं कविकल्पनमात्रं सिध्यति । एवं बिल्हणपण्डितः—

'भोजः क्ष्माभृत्स खलु न खलैस्तस्य साम्यं नरेन्द्रै-
स्तत्प्रत्यक्षं किमिति भवता नागतं हा हतास्मि ।
यस्य द्वारोड्डमरशिखरक्रोडपारावतानां
नादव्याजादिति सकरुणा व्याजहारेव धारा ॥'
( विक्रमाङ्कदेवचरिते सर्गः १८ श्लो० ९६ )

भोजप्रशंसनपरं भोजवियोगं वर्णयति ।

यच्चोदयपुरप्रशस्तौ तुरुष्कविजेतृत्वेन भोजवर्णनमुपलभ्यते ततो महमूदगझनवीति समाख्यातस्य तुरुष्कस्याक्रमणकालः हिजरी सन् ४१३= विक्रमसंवत् १०७८ खिस्तसंवत् १०२१ संभाव्यते। यतस्तेन दुष्टेन यदा गोपाद्रिदुर्गं प्रति ( ग्वालियर ) समाक्रान्तं तदानीं मालवदेशस्याधिपतिर्भोजदेव एवासीत् । गोपाद्रिदुर्गस्याधिपतिश्च कच्छपघातवंशीय आसीत् । यस्मिन् वंशेऽधुना जयपुरराज्यमास्ते । तुरुष्केण सह भोजस्य युद्धमभूदिति प्रायो निश्चितमेव ।

एवमेव भोजस्य देशविदेशेषु देवमन्दिरादिनिर्माणवर्णनमपि न निर्मूलम् । यतः कल्हणपण्डितः—

**'मालवाधिपतिर्भोजः प्रहितैः स्वर्णसंचयैः ।**
**अकारयद्येन कुण्डयोजनं कपटेश्वरे ॥**
**प्रतिज्ञा भोजराजेन पापसूदनतीर्थजैः ।**
**सततं वदनस्नाने या तोयैर्विहिताभवत् ॥**
**अपूरयत्तस्य यस्तां दुस्तरां नियमादितः ।**
**प्रहितैः काचकलशीकुलैस्तद्वारिपूरितैः ॥**
**स तस्य पद्मराजाख्यः पर्णप्राप्तिकदैशिकः ।**
**प्रियताम्बूलशीलस्य त्यागिनो वल्लभोऽभवत् ॥'**

( चक्कलकम् )

( राजतरङ्गिण्यां सप्तमतरङ्गे श्लो० १९०–१९३ )

प्रकारेणानेन भोजस्य कपटेश्वरे कुण्डनिर्मितिम्, प्रत्यहं पापसूदनतीर्थजैस्तोयैर्मुखप्रक्षालनम्, पद्मराजाख्यस्य ताम्बूलविक्रेतुस्तत्प्रतिज्ञानिर्वहणं च सुष्ठु वर्णितं काश्मीरकविदुषा । सोऽयं पर्णविक्रेता पद्मराजः काश्मीरकभूपतेरनन्तदेवस्यातीव वल्लभ आसीत् । कपटेश्वरकुण्डेऽद्यापि पाषाणमयी भित्तिर्भोजदेवस्य कीर्तिरूपेण तिष्ठति । कुण्डस्यास्य व्यासः १२० हस्तपरिमितः खातश्चापि तथाविधः । अस्यैव कुण्डस्य समीपे शिवमन्दिरमपि भोजदेवनिर्मितमिति किंवदन्ती । यथा पूर्वकाले राजानो भूयसा श्रमेण व्ययेन च गङ्गादितीर्थोदकमानीय प्रतिज्ञापूर्वं पीतवन्तस्तथैव स्वर्गवासिनो जयपुरनरेन्द्रस्य माधवसिंहवर्मणोऽपि प्रतिज्ञानं प्रतिवर्षं 'श्रीगङ्गाजलसंग्रहश्चास्माभिः प्रत्यक्षं दृष्टम् । भवेदेवमेव भोजस्यापि प्रतिज्ञानं पापसूदनतीर्थतोयतो मुखप्रक्षालनविषयकमिति नाश्चर्यास्पदम् ।

श्रीमता भोजदेवेन धारायां सरस्वतीकण्ठाभरणनाम्नी पाठशाला स्थापितासीत् । तत्र च बहवो ग्रन्थाः श्यामपाषाणशिलासूत्कीर्णा भोजकालिका भोजोत्तरकालिका उदयादित्यनरवर्मार्जुनवर्मकालिकाश्चोपलब्धाः । अतीव खेदास्पदं यत्तुरुष्कैः पाठशालास्थानं परमेश्वरस्मृतिस्थानत्वेन ( मसजिद्नाम्ना ) कल्पितमथ ताः शिलाः सोपानत्वेनाधोमुखीकृत्य स्थापिताः । पुरातत्त्वविद्भिरन्विष्यान्विष्य शिलासु तासु भोजकृतं कूर्मशतकं प्राकृतभाषानिबद्धमथोऽवनिशतकमपि तद्भाषोपनिबद्धम्, पारिजातमञ्जरी नाटिका, भर्तृहरिकारिका एवमादयोऽन्येऽपि ग्रन्थाः समुद्भाविताः । पाठशालायाः सरस्वतीकण्ठाभरणाख्यायाः सविध एव कूपमेकं सरस्वतीकूपत्वेन पुरा प्रसिद्धमासीद् यस्याधुनापि 'अकलकुई' इति नाम्ना प्रसिद्धिः ।

भोजदेवेन बहुषु विषयेषु बहवो ग्रन्था उपनिबद्धाः ।

तेषां नामानि यथा—

आदित्यप्रतापसिद्धान्तः ( ज्योतिषे )
आयुर्वेदसर्वस्वम् ( वैद्यके )
चम्पूरामायणम् ( चम्पूः )
चाणक्यनीतिः ( ? )
चारुचर्या ( धर्मशास्त्रे )
तत्त्वप्रकाशः ( शैवविषये )
नाममालिका ( कोषे )
युक्तिकल्पतरुः
राजमार्तण्डः ( पतञ्जलिकृतयोगसूत्राणां टीका )
राजमार्तण्डः ( वेदान्ते )
,, ( ज्योतिषे )
राजमृगाङ्कः ( ज्योतिषे करणग्रन्थः । )
विद्याविनोदकाव्यम्
विद्वज्जनवल्लभाख्यो ज्योतिषविषयकः प्रश्नग्रन्थः
विश्रान्तविद्याविनोदाख्यो वैद्यकग्रन्थः
व्यवहारसमुच्चयाख्यो धर्मशास्त्रग्रन्थः
शब्दानुशासनम्
शालिहोत्राख्योऽश्ववैद्यकग्रन्थः ।

शिवतत्त्वरत्नकलिका

समराङ्गणसूत्रधाराख्यः शिल्पविषयकग्रन्थः ।

सरस्वतीकण्ठाभरणाख्योऽलंकारग्रन्थः ।

सिद्धान्तसंग्रहाख्यो ग्रन्थः शैवविषयकः ।

सुभाषितप्रबन्धाख्यः सुभाषितग्रन्थः ।

एवमादयो बहवो ग्रन्थाः श्रीमता भोजदेवेन रचिताः समुपलभ्यन्ते । डॉ०टी० आफ्रेक्टपण्डितविरचितपुस्तकसूचीग्रन्थे (Catalogus Cotalogarum) एत एव निबद्धाः । हनुमन्नाटकविषयेऽपि किंवदन्ती प्रसिद्धा यदेतन्नाटकं शिलोत्कीर्णं समुद्रप्रक्षिप्तमासीद् ततो भोजदेवेनैवोद्धृतमासीदिति ।

श्रीमतो भोजदेवस्य स्वहस्ताक्षराङ्कितं ताम्रपत्रत्रयमद्यावध्यधिगतम् । तेषु ताम्रपत्रद्वयं काव्यमालायामेव प्राचीनलेखमालानामके शिलालेखसंग्रहे समुद्धृतमेव । यत्तृतीयमधिगतं तदप्यत्र समुद्धरामः ।

## श्रीमतो भोजदेवस्य ताम्रपत्रम् ।

'ॐ जयति व्योमकेशोऽसौ यः सर्गाय बिभर्ति ताम् ।
ऐन्दवीं शिरसा लेखां जगद्बिजाङ्कुराकृतिम् ॥ १ ॥
तन्वन्तु वः स्मराराते: कल्याणमनिशं जटाः ।
कल्पान्तसमयोद्दामतडिद्वलयपिङ्गलाः ॥ २ ॥

परमभट्टारकमहाराजाधिराजपरमेश्वरश्री [ सी ] यकदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीवाक्पतिराजदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीसिन्धुराजदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीभोजदेवः कुशली । स्थलीमण्डले घाघ्रदोरभोगान्तःपातिवटपद्रके समुपगतान् समस्तराजपुरुषान् ब्राह्मणोत्तरान् प्रतिनिवासिजनपदादींश्च समादिशत्यस्तु वः संविदितं यथास्माभिः कोङ्कणविजयपर्वणि स्नात्वा चराचरगुरुं भगवन्तं भवानीपतिं समभ्यर्च्य संसारस्यासारतां दृष्ट्वा—

'वाताभ्रविभ्रममिदं वसुधाधिपत्य-
मापातमात्रमधुरो विषयोपभोगः ।
प्राणास्तृणाग्रजलबिन्दुसमा नराणां
धर्मः सखा परमहो परलोकयाने ॥

भ्रमत्संसारचक्राग्रधाराधारमिमां श्रियम् ।
प्राप्य ये न ददुस्तेषां पश्चात्तापपरं फलम् ॥'

इति जगतो विनश्वरं स्वरूपमाकलय्योपरि स्वहस्तोऽयं श्रीभोजदेवस्य ।

---

लिखितग्रामात् भूनिवर्तनशतैकानि १०० स्वसीमातृणगोचरयूतिपर्यन्तं हिरण्यादायसमेतं सभागभोगं सपरिकरं सर्वादायसमेतं ब्राह्मणभाईलाय वामनसुताय वशिष्ठसगोत्राय वाजिमाध्यंदिनशाखायैकप्रवणाय च्छिच्छास्थानविनिर्गतपूर्वजाय मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये अदृष्टफलमङ्गीकृत्य चन्द्रार्कार्णवक्षितिसमकालं यावत्परया भक्त्या शासनेनोदकपूर्वं प्रतिपादनमिति मत्वा तन्निवासिजनपदैर्यथादीयमानभागभोगकरहिरण्यादिकमाज्ञाश्रवणविधेयै भूत्वा सर्वमस्मै समुपनेतव्यमिति । सामान्यं चैतत्पुण्यफलं बुद्ध्वास्मद्वंशजैरन्यैरपि भाविभोक्तृभिरस्मत्प्रदत्तधर्मादायोऽयमनुमन्तव्यः पालनीयश्च ।

उक्तं च—

'बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
यानीह दत्तानि पुरा नरेन्द्रै-
र्दानानि धर्मार्थयशस्कराणि ।
निर्माल्यवान्तिप्रतिमानि तानि
को नाम साधुः पुनराददीत ॥
अस्मत्कुलक्रममुदारमुदाहरद्भि-
रन्यैश्च दानमिदमभ्यनुमोदनीयम् ।
लक्ष्म्यास्तडित्सलिलबुद्बुदचञ्चलाया
दानं फलं परयशःपरिपालनं च ॥
सर्वानेतान्भाविनः पार्थिवेन्द्रान्
भूयो भूयो याचते रामभद्रः ।

सामान्योऽयं धर्मसेतुर्नृपाणां
काले काले पालनीयो भवद्भिः ॥
इति कमलदलाम्बुबिन्दुलोलां
श्रियमनुचिन्त्य मनुष्यजीवितं च ।
सकलमिदमुदाहृतं च बुद्ध्वा
न हि पुरुषैः परकीर्तयो विलोप्याः ॥'

संं० १०७६ माघशुदि ५ इति

स्वयमाज्ञा मङ्गलं महाश्रीः

स्वहस्तोऽयं श्रीभोजदेवस्य ।

सोऽयं तृतीयो लेखः श्रीभोजदेवस्य एपिग्राफियाइण्डिकायां प्रकाशितस्तत एवास्माभिरत्र समुद्धृतः । श्रीभोजदेवे शासति गुर्जरदेशीयानन्दपुरग्रामवासिना वज्रटसुतेनोव्वटेनोज्जयिन्यां निवसता शुक्लयजुर्वेदभाष्यमरचीति भाषान्ते स्पष्टमेवोल्लिखितं प्राप्यते । एवं प्रसिद्धस्य ज्योतिर्विदो भास्कराचार्यस्य पूर्वजाय भास्करभट्टाय भोजदेवेन विद्यापतिरित्युपाधिः प्रदत्तासीत् । एवं शकसंवत्सरे ९६४ विक्रमसंवत्सरे १०९९ भोजदेवेन राजमृगाङ्काख्यः करणग्रन्थो व्यरचीति तदारम्भीयाहर्गणसाधनपद्यतोऽवसीयते । एवं आलबिरूनीनामा यात्रिकः इण्डियानाम्नि स्वपुस्तके ( विक्रमसंवत् १०३० खिस्तसंवत् १०८७ लिखिते ) धारायाः शासको भोज इति लिखति ।

भोजदेवो यदा कीर्तिमात्रावशेषो जातस्ततः कियन्तं चित् कालं पूर्वमेव चेदिदेशाधिपतिना कर्णराजेनार्धराज्यदानप्रलोभनेन गुर्जरदेशाधिपतिर्भीमः साहाय्यायाहूत आसीत् । उभाभ्यां च ताभ्यां भोजराजधानी समाक्रान्ता । अस्मिन्नेव काले श्रीमान् भोजदेवो ज्वरेण ग्रस्तः कथामात्रशेषः संजात इति कर्णेन सर्वमपि तदीयं राज्यं लुण्ठितमिति च प्रबन्धचिंतामणितो ज्ञायते ।

राजमृगाङ्कानुसारं १०९९ विक्रमसंवत्सरं यावत् भोजसत्ता निश्चीयते । तदनन्तरमपि तस्य जीवितमासीदिति जयसिंहताम्रपत्रानुसारमनुमातुं शक्यम् । यतो जयसिंहस्तदुत्तराधिकारी जातः । तदीयं दानपत्रं च १११२ संवत्सरोऽङ्कितमधिगम्यते । अतः सर्वथा १११० विक्रमसंवत्सरासन्ने काले भोजदेवस्य परलोकयात्रा प्रायो निश्चिता ।

एवं—

'पञ्चाशत्पञ्च वर्षाणि सप्तमासं दिनत्रयम् ।
भोजराजेन भोक्तव्यः सगौडो दक्षिणापथः ॥'

इति बल्लालपण्डितोक्तिरपि भविष्यदर्थबोधिका प्रायः पूर्वलिखितसंवत्सरासन्न एव समाप्यते । यतो मुञ्जमरणोत्तरं भोजशासनकालस्यावधिरपीयत्येव ।

राजतरङ्गिणीकर्त्रा कल्हणेन कलशराजसमकालिको भोजदेव आसीदिति लिखितम् । कलशश्च विक्रमसंवत्सरं ११२० आरभ्य विक्रमसंवत्सरं ११४६ पर्यन्तं विद्यमान आसीत् । एतदाधारेणैव दाक्तरबूलरपण्डितः, श्रीमान् दाक्तरः स्टीन॰ पण्डितश्च कलशसमकालिकं भोजं मत्वा भोजजीवितं ११२० विक्रमवर्षपर्यन्तं मन्वाते । परं १११२ विक्रमवर्षीयो जयसिंहलेखः, जयसिंहोत्तराधिकारिण उदयादित्यस्य १११६ विक्रमवर्षीयलेखश्च प्राप्ताविति भोजदेव १११० कालासन्न एव काले भोजस्त्यक्तवान् लोकमेनमिति सिध्यति ।

राजतरङ्गिणीकर्ता बहुकालानन्तरं रचयामास ग्रन्थमिति कर्णाकर्ण्येव लिखितमेतेन भोजसमकालिकत्वं कलशस्य ।

एवं किल भोजवृत्तमस्माभिरत्र संक्षेपतो लिखितम् । विशेषतो द्रष्टुकामैः 'Paramaras of Dhar' इति नाम्ना प्रसिद्धे पुस्तके प्राप्यं स्यात् ।

पुस्तकस्यास्य कर्तुभिरेकं पुस्तकमस्मत्सकाशेऽपि संप्रेषितमिति तेभ्यो धन्यवादान्वितरामः ।

पुस्तकस्यास्य मुद्रणे वे. शा. सं. रा. रा. श्रीवीरेश्वरशास्त्रिसंपादितमेकं मुद्रितं पुस्तकम्, आनन्दराम बहोरा B. A. B. C. S. संपादितमन्यदेकं मुद्रितमेव पुस्तकम्, एवं जयपुरराजगुरुश्रीचन्द्रदत्तमैथिलानामेकं पुस्तकं लिखितं प्रायः प्रत्नमशुद्धतरं च तथा साहित्यशास्त्रीकन्हैयालालप्रश्नवरप्रदत्तमेकं पुस्तकमेवं पुस्तकचतुष्कं मुद्रणार्थं साहाय्यरूपेण संगृहीतम् ।

तथा द्वितीयपरिच्छेदपर्यन्तं पुस्तकद्वितयं डेक्कनकॉलेजतः प्राप्तम् । मुद्रितपुस्तकद्वितयं क. ख. संज्ञाभ्यां लिखितं च पुस्तकद्वितयं ग. घ. संज्ञाभ्यां संज्ञातमस्माभिः ।

अत्र येषां ग्रन्थकाराणां पद्यान्युदाहृतानि तेषां कति पद्यान्युद्धृतान्यत्र कश्च कालस्तेषामित्यपि परिशिष्टरूपेण योजितमस्माभिः ।

भोजदेवस्य प्रधानः पण्डितो गोविन्दभट्ट आसीत्, अतो वयमनुमिनुमो यत् सरस्वतीकण्ठाभरणरचनेऽवश्यमेव तत्साहाय्यं भवेत्। नलोदयाख्यस्य काव्यस्य रचयिता कालिदासोऽपि भोजसभायामासीदित्येव भोजकालिदासविषयिणीनां कथानां मूलम्।

अलंकारग्रन्थेषु सरस्वतीकण्ठाभरणस्य प्रमुखग्रन्थेषु गणना। सोऽयं ग्रन्थः काव्यादर्शस्य दण्डिविरचितस्य विशेषा संस्कृतिर्नाम। अत्र बहवः श्लोकाः काव्यादर्शस्थाः कारिकारूपेणोदाहरणरूपेण च संकलिताः।

काव्यप्रकाशरचनापि तदानींतनैवेति प्रायो ग्रन्थस्यास्य रचनोत्तरमेव काव्यप्रकाशनिर्मितिः संभाव्यते।

एवं ग्रन्थोऽयमस्माभिर्भूयसा श्रमेण मुद्रितः। अत्र द्वितीयपरिच्छेदपर्यन्तं संपादने पं. भवदत्तशास्त्रिणो नियुक्ता आसन्, तैश्च कार्यबाहुल्यादनवहिततया पाठभेदसंयोजने समुदासीनतया च नोचितं कृतमित्यपराधक्षमाप्रार्थनं विधाय विरमावः। अग्रिमसंस्करणे च संशोधनं विधास्यावः.

जयपुरम्
२२-११-२४

संशोधकौ,
केदारनाथ-वासुदेवशास्त्रिणौ।



॥ श्रीः ॥

# श्रीभोजदेवविरचितस्य सरस्वतीकण्ठाभरणाख्यालंकार-ग्रन्थस्य विषयानुक्रमणिका ।


विषयः पृष्ठसङ्ख्या.

दोषगुणविवेचनो नाम प्रथमः परिच्छेदः ।

( पृ. १–पृ. १४० )

१. मङ्गलाचरणम् ... १
२. संबन्धप्रयोजने ... २
३. दोषसामान्यलक्षणम्, विभागश्च ३
४. पददोषाः षोडश ... ४
५. विभागप्रयोजनम् ... ४
६. पददोषेष्वसाधु, सोदाहरणम् ४
अप्रयुक्तम्, सोदा० ... ५
कष्टम्, सोदा० ... ६
अनर्थकम्, सोदा० ... ६
अन्यार्थम्, सोदा० ... ७
अपुष्टार्थम्, सोदा० ... ८
असमर्थम्, सोदा० ... ८
अप्रतीतम्, सोदा० ... ९
क्लिष्टम्, सोदा० ... १०
गूढार्थम्, सोदा० ... १०
नेयार्थम्, सोदा० ... ११
संदिग्धम्, सोदा० ... १२
विपरीतम्, सोदा० ... १२
अप्रयोजकम्, सोदा० १३
देश्यम्, सोदा० ... १३
ग्राम्यं त्रिविधमश्लीलामङ्गलघृणावदर्थभेदेन ... १४
तेषु–त्रिविधमश्लीलमसभ्यार्थासभ्यार्थान्तरासभ्यस्मृतिहेतुभेदेन, सोदा० १४,१५
त्रिविधममङ्गलार्थमशस्तार्थाशस्तार्थान्तराशस्तस्मृतिहेतुभेदेन, सोदा० १५,१६
त्रिविधं घृणावत्, घृणावदर्थघृणावदर्थान्तरघृणावत्स्मृतिहेतुभेदेन १६,१७
७. वाक्यदोषाः षोडश ... १७
तेषु–शब्दहीनम्, सोदा० १८
क्रमभ्रष्टम्, सोदा० ... १९
विसंधि, सोदा० ... १९
पुनरुक्तिमत्, सोदा० २०
व्याकीर्णम्, सोदा० ... २१
संकीर्णम्, सोदा० ... २१

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| अपदम्, सोदा० ... | २२ |
| वाक्यगर्भितम्, सोदा० | २४ |
| भिन्नलिङ्गम्, भिन्नवचनं च सोदा० ... | २४ |
| द्वयोरपि पृथक् पृथगुदाहरणे ... | २५ |
| न्यूनोपमम्, सोदा० | २५ |
| अधिकोपमम्, सोदा० | २६ |
| भग्नच्छन्दः, सोदा०... | २६ |
| भग्नयति, सोदा० ... | २७ |
| अशरीरम्, सोदा० ... | २७ |
| नवभेदमरीतिमत्, ... | २८ |
| तत्र—श्लेषविपर्ययः, सोदा० | २८ |
| समताविपर्ययः, सोदा० | २९ |
| असौकुमार्यम्, सोदा० | ३० |
| प्रसादविपर्ययः, सोदा० | ३० |
| अर्थव्यक्तिविपर्ययः, सोदा० | ३१ |
| कान्तिविपर्ययः, सोदा० | ३२ |
| ओजोविपर्ययः, सोदा० | ३२ |
| दाक्षिणात्या नैनं प्रयुञ्जते | ३३ |
| *माधुर्यविपर्ययः* ... | ३४ |
| औदार्यविपर्ययः ... | ३५ |
| उदाराख्यगुणविषये काव्यादर्शमतोद्धृतिः... | ३५ |
| ८. वाक्यार्थदोषाः षोडश ... | ३५ |
| तेषु—अपार्थम्, सोदा०... | ३६ |
| व्यर्थम्, सोदा० ... | ३६ |

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| एकार्थम्, सोदा० (उदाहरणद्वयम्) ... | ३८ |
| संदिग्धार्थम्, सोदा० | ३८ |
| अपक्रमम्, सोदा० ... | ३९ |
| खिन्नम्, सोदा० ... | ३९ |
| अतिमात्रम्, सोदा० | ४० |
| परुषम्, सोदा० ... | ४० |
| विरसम्, सोदा० ... | ४१ |
| हीनोपमम्, सोदा० | ४१ |
| *अधिकोपमम्, सोदा०* | *४२* |
| असदृशोपमम्, सोदा० | ४२ |
| अप्रसिद्धोपमम्, सोदा० | ४३ |
| निरलंकारम्, सोदा० | ४३ |
| अश्लीलम्, सोदा०... | ४४ |
| विरुद्धं प्रत्यक्षानुमानागमविरोधेन त्रिविधम् ... | ४५ |
| तत्रापि प्रत्यक्षविरुद्धं देशकाललोकविरोधेन त्रिविधम् | ४५ |
| तत्र—देशविरोधोदाहरणम् | ४५ |
| कालविरोधोदाहरणम् | ४५ |
| *लोकविरोधोदाहरणम्* | *४५* |
| *अनुमानविरुद्धमपि युक्त्यौचित्य*प्रतिज्ञाविरोधेन त्रिविधम् | ४६ |
| तत्र—युक्तिविरुद्धोदाहरणम् | ४६ |
| औचित्यविरुद्धोदाहरणम् | ४६ |
| प्रतिज्ञाविरुद्धोदाहरणम् | ४७ |
| आगमविरुद्धमपि धर्मार्थकाम*शास्त्रादिविरोधेनानेकविधम्* | ४८ |

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| तत्र, धर्मशास्त्रविरोधः ... | ४८ |
| अर्थशास्त्रविरोधः ... | ४८ |
| कामशास्त्रविरोधः ... | ४८ |
| ९. पदवाक्यवाक्यार्थदोषाणां हेयत्वम् ... | ४९ |
| १०. सालंकारस्यापि काव्यस्य गुणयोगो मुख्यः ... | ४९ |
| ११. बाह्याभ्यन्तरवैशेषिकभेदेन गुणानां त्रैविध्यम्, ... | ४९ |
| १२. बाह्यगुणानां शब्दाश्रयत्वम्, आन्तरगुणानामर्थाश्रयत्वम्, वैशेषिकगुणानां दोषत्वेऽपि गुणत्वम् ... | ४९ |
| १३. शब्दगुणाश्चतुर्विंशतिः ... | ४९ |
| तेषु–श्लेषः सोदा० ... | ५० |
| प्रसादः, सोदा० ... | ५१ |
| समता, सोदा० ... | ५२ |
| माधुर्यम्, सोदा० | ५३,५४ |
| सुकुमारता, सोदा०... | ५५ |
| अर्थव्यक्तिः, सोदा० ... | ५५ |
| कान्तिः, सोदा० ... | ५६ |
| उदारत्वम्, सोदा०... | ५७ |
| उदात्तता, सोदा० ... | ५८ |
| ओजः, सोदा० ... | ५९ |
| और्जित्यम्, सोदा०... | ६० |
| प्रेयः, सोदा० ... | ६० |
| सुशब्दता, सोदा० ... | ६१ |
| समाधिः, सोदा० ... | ६३ |

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| सौक्ष्म्यम्, सोदा० ... | ६३ |
| गाम्भीर्यम्, सोदा०... | ६४ |
| विस्तरः, सोदा० ... | ६६ |
| संक्षेपः, सोदा० ... | ६७ |
| संमितत्वम्, सोदा०... | ६७ |
| भाविकत्वम्, सोदा० | ६८ |
| गतिः सोदा० | ६८,६९ |
| रीतिः, सोदा० ... | ६९ |
| उक्तिः, सोदा० ... | ७० |
| प्रौढिः, सोदा० ... | ७१ |
| १४. एत एव वाक्यार्थगुणाश्चतुर्विंशतिः ... | ७२ |
| तेषु–श्लेषः, सोदा० ... | ७३ |
| प्रसादः, सोदा० ... | ७४ |
| समत्वम्, सोदा० ... | ७४ |
| माधुर्यम्, सोदा० ... | ७५ |
| सौकुमार्यम्, सोदा० | ७५ |
| अर्थव्यक्तिः, सोदा०... | ७६ |
| कान्तिः, सोदा० ... | ७६ |
| उदारता, सोदा० ... | ७७ |
| उदात्तता, सोदा० ... | ७८ |
| ओजः, सोदा० ... | ७८ |
| और्जित्यम्, सोदा०... | ७९ |
| प्रेयः, सोदा० ... | ७९ |
| सुशब्दता, सोदा० ... | ८० |
| समाधिः, सोदा० ... | ८० |
| सौक्ष्म्यम्, सोदा० ... | ८१ |
| गाम्भीर्यम्, सोदा०... | ८१ |

विषयः — पृष्ठसङ्ख्या.

विस्तरः, सोदा० ... ८२
संक्षेपः, सोदा० ... ८२,८३
संमितत्वम्, सोदा० ... ८३
भाविकत्वम्, सोदा० ... ८४
गतिः, सोदा० ... ८४
रीतिः, सोदा० ... ८५
उक्तिः, सोदा० ... ८५
प्रौढिः, सोदा० ... ८६
१५. अनुकरणादिषु पदवाक्यवाक्यार्थदोषाणां चतुर्विंशतिविधानां गुणत्वम्, ते दोषगुणाः ... ८७
तेषु—असाधुताख्यपददोषस्यानुकरणे गुणत्वम्... ८७
अप्रयुक्तस्याप्यनुकरणे गुणत्वम्, ... ८८
कष्टस्य दुर्वचकादिषु गुणत्वम् ... ८८
अनर्थकस्य यमकादिषु गुणत्वम् ... ८९
अन्यार्थस्य प्रहेलिकादिषु गुणत्वम् ८९,९०
अपुष्टार्थस्य च्छन्दोऽनुरोधेन गुणत्वम् ... ९०
असमर्थस्य तीर्थकृतादिषु गुणत्वम् ... ९१
अप्रतीतस्य तद्विद्यसंभाषादौ गुणत्वम् ... ९१

विषयः — पृष्ठसङ्ख्या.

क्लिष्टस्य झटित्यर्थप्रतीतौ गुणत्वम् ... ९२
गूढार्थस्य तथाख्यानेन गुणत्वम् ... ९३
नेयार्थस्य प्रहेलिकादिषु गुणत्वम् ... ९४
संदिग्धस्य प्रकरणानुरोधेन गुणत्वम् ... ९५
विरुद्धस्य तथाभूताभिधानेन गुणत्वम् ... ९५
अप्रयोजकस्य स्वरूपवचने गुणत्वम् ... ९६
देश्यस्य महाकविप्रयोगे गुणत्वम् ... ९७
ग्राम्यस्य संवीतगुप्तलक्षितेषु गुणत्वम् ... ९८
अश्लीलादीनामपि गुणत्वम् ... १००
तदुदाहरणत्रयम् ... १००
घृणावदर्थादीनामपि गुणत्वम् ... १००
घृणावदर्थस्य गुणत्व उदाहरणम् ... १०१
घृणावदर्थान्तरस्य गुणत्व उदाहरणम् ... १०१
घृणावत्स्मृतिहेतोर्गुणत्व उदाहरणम् ... १०२
अश्लीलादेरप्याश्रयसंबन्धाद्गुणत्वम्, सोदा० ... १०३

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| विरुद्धस्य संनिवेशवशाद्गुणत्वम्, सोदा० | १०३ |
| १६. पूर्वनिर्दिष्टानां पदसमाश्रयाणां षोडशदोषाणां गुणत्वप्रतिपत्तये चतुर्विंशतिधा संख्यानम्, वाक्यदोषाणां गुणीभावाभिधानं च | १०४ |
| तत्र–शब्दविहीनस्य गुणत्वम्, सोदाहरणम्; सप्रमाणं च | १०४ |
| क्रमभ्रष्टस्य गुणत्वम्, सोदा० | १०५ |
| विसंधेर्गुणत्वम्, सोदाहरणम्, सप्रमाणं च | १०६ |
| प्रगृह्यादौ गुणत्वोदाहरणम्, प्रमाणं च | १०६ |
| पुनरुक्तस्य गुणत्वम्, सोदा० | १०७ |
| व्याकीर्णस्य गुणत्वम्, सोदा० | १०८ |
| संकीर्णस्य गुणत्वम्, सोदा० | १०९ |
| अपदस्य गुणत्वम्, सोदा० | ११० |
| वाक्यान्तरगर्भितस्य गुणत्वम्, सोदा० | ११३,११४ |
| भिन्नलिङ्गभिन्नवचनयोर्गुणत्वम् | ११५ |

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| तयोरेकमेवोदाहरणम् | ११५ |
| भिन्नलिङ्गस्य पृथगुदाहरणम् | ११६ |
| भिन्नवचनस्य पृथगुदाहरणम् | ११७ |
| न्यूनोपमस्य गुणत्वम्, सोदा० | ११८ |
| एतत्प्रमाणं च सोदाहरणम् | ११९ |
| अधिकोपमस्य गुणत्वम्, सोदा० | ११९ |
| छन्दोभङ्गस्य गुणत्वम्, सोदा० | १२० |
| यतिभङ्गस्य गुणत्वम्, सोदाहरणम्, सप्रमाणं च | १२१ |
| अशरीरस्य गुणत्वम्, सोदा० | १२२ |
| शैथिल्यस्य गुणत्वम्, सोदा० | १२३ |
| वैषम्यस्य गुणत्वम्, सोदा० | १२३ |
| कठोरत्वस्य गुणत्वम्, सोदा० | १२४ |
कवेः शृङ्गारित्वे जगतो रसमयत्वम्, तस्यैवाशृङ्गारित्वे नीरसत्वं च ... ५५५
सरसनीरसवाक्ययोरुदाहृतिप्रदर्शनम् ... ५५५
ग्राम्यार्थात्मनो वैरस्यहेतुत्वम् ... ५५५
अग्राम्यार्थात्मनो रसावहत्वम् ... ५५५
रसाहरणे नवार्थादीनां हेतुत्वम् ... ५५५
वक्रोक्त्यादिसूक्तीनां रसोक्तेः प्राधान्यम् ... ५५५
चतुर्विंशतिसंख्याका रसान्वयविभूतयः ... ५५६
रसान्वयविभूतीनां स्वरूपज्ञानेन काव्यकरणसामर्थ्यम् ... ५५६
भावस्य लक्षणम् ... ५५६
रत्यादयोऽष्टौ स्थायिभावाः ५५६
स्तम्भादयोऽष्टौ सात्त्विकभावाः ... ५५६
स्मृत्यादयस्त्रयस्त्रिंशद् व्यभिचारिणो भावाः ५५६
स्थायिभावलक्षणम् ... ५५६
सात्त्विकभावलक्षणम् ५५६
व्यभिचारिभावलक्षणम् ५५६
प्रकारान्तरेण व्यभिचारिभावलक्षणम् ... ५५७
स्मृत्यादीनां प्रेमादौ सत्तासत्ते ... ५५७
रतौ संचारिणां गर्वेहादीनां, उद्धतप्रेमःशान्तोदात्तेषु च स्थायिनां सत्ता ... ५५७
संस्कारपाटवादिहेतुकमनुभावस्य, संचारिणः, सात्त्विकस्य वा निजाश्रये जन्म ... ५५७
अनुबन्धस्य लक्षणम् ... ५५७
निष्पत्तेर्लक्षणम् ... ५५७
पुष्टेर्लक्षणम् ... ५५७
संकरस्य लक्षणम् ... ५५७
ह्रासस्य लक्षणम् ... ५५७
आभासस्य लक्षणम् ... ५५७
(प्र)शमस्य लक्षणम् ... ५५७
शेषस्य लक्षणम् ... ५५७
विशेषस्य लक्षणम् ... ५५८
परिशेषस्य लक्षणम् ... ५५८

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| रत्यादिसमुद्भवप्रकारः | ५५८ |
| आलम्बनविभावः, ततश्च संस्कारोद्भवः... | ५५८ |
| माल्यर्तुचन्दनादय उद्दीपनविभावाः ... | ५५८ |
| स्वेदरोमोद्गमादयोऽनुभावाः ... | ५५८ |
| हर्षामर्षादयः संचारिणः | ५५८ |
| वरस्त्रीणां लीलादयो विलासाः ... | ५५८ |
| लीलाविलासविच्छित्त्यादीनामनुभावेषूपसंख्यानम् ... | ५५८ |
| नाट्येष्वभिनीता एत एवानुभावाः, संचारिणश्चाभिनयाः ... | ५५९ |
| प्रकर्षमधिगच्छन् रतिर्नाम भावो यदाभीष्टं नाधिगच्छति तदा विप्रलम्भः ... | ५५९ |
| विप्रलम्भः पूर्वानुरागादिभिश्चतुःकाण्डः | ५५९ |
| पूर्वानुरागलक्षणम् ... | ५५९ |
| मानलक्षणम् ... | ५५९ |
| प्रवासलक्षणम् ... | ५५९ |
| करुणलक्षणम् ... | ५५९ |
| रतिरेवेष्टसंप्राप्तौ पुष्टः संभोगः, सोऽपि चतुर्विधः | ५५९ |

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| विप्रलम्भेन विना संभोगः पुष्टिं नाश्नुत इति कषायितवस्त्रदृष्टान्तद्वारा संस्थापनम्... | ५५९ |
| विप्रलम्भसंभोगयोश्चेष्टाविशेषाणां नामभेदः ... | ५६० |
| एवं प्रेम्णः परीक्षाः परीष्टयः | ५६० |
| विप्रलम्भशब्दस्य तदङ्गानां च विशेषतो निरुक्तिः | ५६०,५६१,५६२ |
| संभोगशब्दस्य तदङ्गानां च निरुक्तिः ... | ५६४ |
| द्वादश महर्द्धयः | ५६५,५६६ |
| प्रेमपुष्टयः ... | ५६६ |
| द्वादश नायकनायिकभेदाः | ५६६ |
| तत्र—नायकलक्षणम् ... | ५६६ |
| प्रतिनायकलक्षणम् ... | ५६७ |
| उपनायकलक्षणम् ... | ५६७ |
| अनुनायकलक्षणम् ... | ५६७ |
| नायिकालक्षणम् ... | ५६७ |
| प्रतिनायिकालक्षणम्... | ५६७ |
| उपनायिकालक्षणम्... | ५६७ |
| अनुनायिकालक्षणम्... | ५६७ |
| नायकनायिकयोराभासाः, गुणादिभिस्तेषां भेदाश्च ... | ५६७ |
| गुणत उत्तमो मध्यमोऽधमश्च नायकः ... | ५६७ |
| प्रकृतिहेतुकं सात्त्विक- | |

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| राजसतामससाधारणान्यजातिभेदेन तद्भेदाः | ५६७ |
| धैर्यप्रवृत्तिहेतुकमुद्धतललितशान्तोदात्ताख्या भेदाः, प्रवृत्तितश्च शठधृष्टानुकूलदक्षिणाख्याः भेदाः | ५६७ |
| एवं गुणतो नायिकाया अप्युत्तममध्यमाधमभेदाः | ५६७ |
| मुग्धा मध्या प्रगल्भा चेत्यादयो नायिकाभेदाः | ५६८ |
| अष्टौ खण्डिताद्या अवस्थाभेदतो नायिकाः | ५६८ |
| तत्र—खण्डिताया लक्षणम् | ५६८ |
| कलहान्तरिताया लक्षणम् | ५६८ |
| विप्रलब्धाया लक्षणम् | ५६८ |
| वासकसज्जाया लक्षणम् | ५६८ |
| स्वाधीनपतिकाया लक्षणम् | ५६८ |
| अभिसारिकाया लक्षणम् | ५६८ |
| प्रोषितभर्तृकाया लक्षणम् | ५६८ |
| विरहोत्कण्ठिताया लक्षणम् ... | ५६८ |
| एवं द्वात्रिंशन्नायिकाभेदाः | ५६८ |
| पीठमर्दविदूषकाद्याः शेषाणि हीनपात्राणि ... | ५६८ |
| महाकुलीनतादयो नायकेऽवभिगामिका गुणाः | ५६८ |
| मृद्वीकानालिकेराम्रपाकाद्याः पाकभक्तयः | ५६९ |
| नीलीकुसुम्भमञ्जिष्ठाद्या रागभक्तयः ... | ५६९ |
| अन्तर्व्याजबहिर्व्याजाद्या व्याजभक्तयः ... | ५६९ |
| धर्मार्थकामाद्याः प्रेमसूदर्कभक्तयः ... | ५६९ |
| सूरयोऽनौचित्यपरिहारेण वाक्यवत् प्रबन्धेष्वपि रसालंकारसंकरान् प्रयुञ्जते ... | ५६९ |
| चतुर्वृत्त्यङ्गसंपन्नं चतुरोदात्तनायकं चतुर्वर्गफलं प्रबन्धं को न बान्धवीयति ... | ५६९ |
| मुखप्रतिमुखाद्याः प्रबन्धे पञ्च संधयः ... | ५६९ |
| अविस्तृतादिगुणयुक्तं काव्यं लोकाभिनन्द्यम् ... | ५६९ |
| पुरोपवनराष्ट्रादिवर्णनं रसोत्कर्षावहम् ... | ५६९ |
| ऋतुरात्रिंदिवार्केन्दूदयादिवर्णनं काव्येषु रसपुष्टिं नियच्छति ... | ५६९ |
| राजकन्याकुमारादिवर्णनं काव्येषु रसस्रोतोऽधितिष्ठति ... | ५६९ |
| उद्यानसलिलक्रीडावर्ण- | |

विषयः पृष्ठसङ्ख्या.

नादि च काव्येषु रसावहम् ... ५७०
मन्त्रदूतप्रयाणादिवर्णनपुरःसरा पुरुषकारस्य पुष्टिः काव्येषु रसं वर्षति ... ... ५७०
शैलर्तुवर्णनेनैव तोषे नगर्यादेरवर्णनं न दोषाय ५७०
नायकं प्राग् गुणतः समुपन्यस्य तद्वारकं विद्विषां निराकरणमिति प्रकृतिसुन्दरः पन्थाः ५७०
रिपोरपि वंशवीर्यश्रुतादीनि वर्णयित्वा तज्जयान्नायकोत्कर्षकथनं सरस्वतीकण्ठाभरणग्रन्थकर्तुः संमतम् ... ५७०
१. अथैषां लक्षणोदाहरणानि ५७०
तत्र—रतिलक्षणम्, प्रीतिलक्षणं च ... ... ५७०
तद्रूपेण रसस्य भाव उदाह०
तद्रूपेणैव सात्त्विकोत्पत्तौ जन्मन उदाहरणम् ५७१
संचार्युत्पत्तौ जन्मन उदाह० ५७१
अनुभावोत्पत्तौ तस्यैवोदाहरणम् ... ५७१
अनुभावादेरनेकस्यैकस्य वा पुनरुत्पत्तिरनुबन्धः। तत्र—अनेकस्यानुबन्ध उदाह० ५७१
एकस्यैव पुनः पुनरुत्पत्तावुदाहरणम् ... ५७२
रतिरूपेणैव रसनिष्पत्तेरुदाहरणम् ... ५७२
रतिरूपेणैव रसपुष्टेरुदाह० ५७३
रतौ भयादिसंकरस्योदाह० ५७४
रतिरूपेण रसप्रकर्षस्य ह्रासोदाहरणम् ... ५७५
रतिरूपेण हीनपात्रेषु रसाभासस्योदाह० ५७५
रतिरूपेण तिर्यक्षु रसाभासस्योदाह० ... ५७६
रतिरूपेण नायकप्रतियोगिषुर साभासस्योदाहरणम् ... ५७६
रतिरूपेण गौणेषु रसाभासस्योदाह० ... ५७६
त एते चत्वारोऽपि रसाभासाः ५७६
रतावेव लज्जारोषरूपरसान्तरयोः प्रशमस्योदाहरणम् ... ५७७
रतावेव रोषरूपरसस्य शेष उदाहरणम्. ५७७
त एते भावादयो दशापि रसप्रकारा हासादिष्वपि प्रायो दृश्यन्ते,

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| ग्रन्थगौरवभयात् क्वचित् क्वचिद्योदाह्रियन्ते | ५७७ |
| २. हासस्य लक्षणम् | ५७७ |
| तद्रूपेण रसस्य भाव उदाहरणम् | ५७७ |
| ३. शोकस्य लक्षणम् | ५७८ |
| तद्रूपेण रसस्य निष्पत्ते-रुदाहरणम् | ५७८ |
| ४. क्रोधस्य लक्षणम् | ५७८ |
| तद्रूपेण रसस्य निष्पत्ते-रुदाहरणम् | ५७८ |
| ५. उत्साहस्य लक्षणम् | ५७८ |
| तद्रूपेण रसस्य जन्मन्यु-दाहरणम् | ५७८ |
| ६. भयस्य लक्षणम् | ५७९ |
| तद्रूपेण रसस्यानुबन्ध-स्योदाहरणम् | ५७९ |
| ७. जुगुप्सायाः लक्षणम् | ५७९ |
| तद्रूपेण रसस्यानुगम उदाहरणम् | ५७९ |
| ८. विस्मयस्य लक्षणम् | ५८० |
| तद्रूपेण रसनिष्पत्ते-रुदाहरणम् | ५८० |
| ९. स्तम्भस्य लक्षणम् | ५८० |
| तद्रूपेण रसस्य पुष्टेरुदाह० | ५८० |
| १०. रोमाञ्चस्य लक्षणम् | ५८० |

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| तद्रूपेण रसस्य जन्मन्यु-दाहरणम् | ५८१ |
| ११. गद्गदस्य लक्षणम् | ५८१ |
| तद्रूपेण रसनिष्पत्ते-रुदाहरणम् | ५८१ |
| १२. स्वेदस्य लक्षणम् | ५८१ |
| तद्रूपेण रसस्य जन्मन्यु-दाहरणम् | ५८१ |
| १३. वेपथोर्लक्षणम् | ५८१ |
| तद्रूपेण रसस्य जन्मन्यु-दाहरणम् | ५८१ |
| १४. विवर्णतायाः लक्षणम् | ५८२ |
| तद्रूपेण रसस्य निष्पत्ता-वुदाहरणम् | ५८२ |
| १५. अश्रुणो लक्षणम् | ५८२ |
| तद्रूपेण रसस्यानुबन्ध उदाहरणम् | ५८२ |
| १६. प्रलयस्य लक्षणम् | ५८२ |
| तद्रूपेण रसस्य निष्पत्ता-वुदाहरणम् | ५८२ |
| १७. स्मृतेर्लक्षणम् | ५८३ |
| तद्रूपेण रसस्यानुबन्ध उदाहरणम् | ५८३ |
| १८. ऊहस्य लक्षणम् | ५८३ |
| तद्रूपेण रसस्य निष्पत्ता-वुदाहरणम् | ५८३ |
| १९. अभिलाषस्य लक्षणम् | ५८३ |

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| तद्रूपेण रसस्य निष्पत्तिह्रासयोरुदाहरणम् | ५८३ |
| २०. चिन्ताया लक्षणम् ... | ५८४ |
| तद्रूपेण रसस्य प्रकर्षे उदाहरणम् ... | ५८४ |
| २१. चपलताया लक्षणम् ... | ५८४ |
| तद्रूपेण रसस्य जन्मन्युदाहरणम् ... | ५८४ |
| २२. मतेर्लक्षणम् ... | ५८४ |
| तद्रूपेण रसस्यानुबन्ध उदाहरणम् ... | ५८५ |
| २३. गर्वस्य लक्षणम् ... | ५८५ |
| तद्रूपेण रसस्य पुष्टावुदाह० | ५८५ |
| २४. चित्तार्द्रताया लक्षणम् ... | ५८५ |
| तद्रूपेण रसस्य निष्पत्तावुदाहरणम् ... | ५८५ |
| २५. धृतेर्लक्षणम् ... | ५८५ |
| तद्रूपेण रसस्य प्रकर्षे उदाहरणम् ... | ५८६ |
| २६. व्रीडाया लक्षणम् ... | ५८६ |
| तद्रूपेण रसस्य प्रकर्षे क्रोधशोकाभ्यां संकर उदाहरणम् ... | ५८६ |
| २७. अवहित्थस्य लक्षणम् ... | ५८६ |
| तद्रूपेण रसस्यानुबन्ध उदाहरणम् ... | ५८६ |

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| अत्र प्रहर्षाकारोत्पत्तौ देवर्षिवाक्यम् ... | ५८७ |
| २८. मूढताया लक्षणम् ... | ५८७ |
| तद्रूपेण रसनिष्पत्तावुदाहरणम् ... | ५८७ |
| २९. मदस्य लक्षणम् ... | ५८७ |
| तद्रूपेण रसस्य निष्पत्तावुदाहरणम् ... | ५८७ |
| ३०. हर्षस्य लक्षणम् ... | ५८७ |
| तद्रूपेण रसस्य प्रकर्षे उदाहरणम् ... | ५८८ |
| ३१. अमर्षस्य लक्षणम् ... | ५८८ |
| तद्रूपेण रसस्य प्रकर्षे उदाहरणम् ... | ५८८ |
| ३२. असूयाया लक्षणम् ... | ५८८ |
| तद्रूपेण रसस्य जन्मन्युदाहरणम् ... | ५८८ |
| ३३. ईर्ष्याया लक्षणम् ... | ५८९ |
| तद्रूपेण रसस्य प्रकर्षे उदाहरणम् ... | ५८९ |
| ३४. विषादस्य लक्षणम् ... | ५८९ |
| तद्रूपेण रसस्य प्रकर्षे उदा० | ५८९ |
| ३५. दैन्यस्य लक्षणम् ... | ५९० |
| तद्रूपेण रसस्यानुबन्ध उदाहरणम् ... | ५९० |
| ३६. उग्रताया लक्षणम् ... | ५९० |
| तद्रूपेण रसस्य प्रकर्षे उदाहरणम् ... | ५९१ |

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| ३७. त्रासस्य लक्षणम् ... | ५९० |
| तद्रूपेण रसस्य जन्मन्युदाहरणम् ... | ५९० |
| ३८. शङ्काया लक्षणम् ... | ५९१ |
| तद्रूपेण रसस्य प्रकर्ष उदाहरणम् ... | ५९१ |
| ३९. गदस्य लक्षणम् ... | ५९१ |
| तद्रूपेण रसस्य जन्मन्युदाहरणम् ... | ५९१ |
| ४०. ग्लानेर्लक्षणम् ... | ५९१ |
| तद्रूपेण रसस्यानुबन्ध उदाहरणम् ... | ५९१ |
| ४१. उन्मादस्य लक्षणम् ... | ५९२ |
| तद्रूपेण रसस्य जन्मन्युदाहरणम् ... | ५९२ |
| ४२. संभ्रमस्य लक्षणम् ... | ५९२ |
| तद्रूपेण रसस्य संकर उदाहरणम् ... | ५९२ |
| ४३. खेदस्य लक्षणम् ... | ५९२ |
| तद्रूपेण रसस्य शेष उदाहरणम् ... | ५९२ |
| ४४. जाड्यस्य लक्षणम् ... | ५९३ |
| तद्रूपेण रसस्य निष्पत्तावुदाहरणम् ... | ५९३ |
| ४५. आलस्यस्य लक्षणम् ... | ५९३ |
| तद्रूपेण रसस्य निष्पत्तावुदाहरणम् ... | ५९३ |
| ४६. निद्राया लक्षणम् ... | ५९४ |

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| तद्रूपेण रसस्यानुबन्ध उदाहरणम् ... | ५९४ |
| ४७. सुप्तस्य लक्षणम् ... | ५९४ |
| तद्रूपेण रसप्रकर्ष उदा० | ५९४ |
| ४८. प्रबोधस्य लक्षणम् ... | ५९४ |
| तद्रूपेण रसस्यानुबन्ध उदाहरणम् ... | ५९४ |
| एवं भावादिभेदेन रत्यादिरसा उक्ताः, अधुनैतेषु केषांचिद्विशेषाणामभिधाने प्रतिज्ञा | ५९५ |
| ४९. शृङ्गाराद्या रसाः ... | ५९५ |
| ५०. रतेः प्रकाराः ... | ५९५ |
| ५१. प्रीतेः प्रकाराः ... | ५९५ |
| तदुदाहरणोपन्यासप्रतिज्ञा ... | ५९५ |
| तत्र—शृङ्गाररसोदाहरणम् | ५९५ |
| वीररसोदाहरणम् ... | ५९६ |
| करुणरसोदाहरणम् ... | ५९६ |
| रौद्ररसोदाहरणम् ... | ५९६ |
| अद्भुतरसोदाहरणम् ... | ५९६ |
| भयानकरसोदाहरणम् | ५९७ |
| बीभत्सरसोदाहरणम् | ५९७ |
| हास्यरसोदाहरणम् ... | ५९७ |
| प्रेमरसोदाहरणम् ... | ५९८ |
| रतिप्रीत्योः प्रेयानेव मूलप्रकृतिरित्यत्र प्रमाणोपन्यासः ... | ५९८ |

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| शान्तरसोदाहरणम् ... | ५९८ |
| अन्येषां मते शान्तस्य शम एव प्रकृतिः परं शमो धृतेरेव विशेषः | ५९९ |
| उदात्तरसोदाहरणम् ... | ५९९ |
| उद्धतरसोदाहरणम् ... | ५९९ |
| अत्रोदाहृतिपूर्वमन्यमतोपन्यासः ... | ५९९ |
| ५२. रतिविशेषेषु नैसर्गिक्या उदाहरणम् ... | ५९९ |
| सांसर्गिक्या उदाह० | ६०० |
| औपमानिक्या उदाह० | ६०० |
| आध्यात्मिक्या उदाह० | ६०० |
| आभियोगिक्या उदाह० | ६०१ |
| सांप्रयोगिक्या उदाह० | ६०१ |
| आभिमानिक्या उदाह० | ६०१ |
| वैषयिकीषु शब्दोदाह० | ६०२ |
| वैषयिकीषु स्पर्शोदाह० | ६०२ |
| ,, रूपोदाहरणम् | ६०२ |
| ,, रसोदाहरणम् | ६०२ |
| ,, गन्धोदाहरणम् | ६०२ |
| ५३. प्रीतिविशेषेषु नैसर्गिक्या उदाहरणम् ... | ६०३ |
| सांसर्गिक्या उदाहरणम् | ६०३ |
| औपमानिक्या उदाह० | ६०३ |
| आध्यात्मिक्या उदाह० | ६०३ |
| आभियोगिक्या उदाह० | ६०४ |

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| सांप्रयोगिकीस्थान आभ्यासिक्या उदाह० | ६०४ |
| अत्र यल्लक्षणं घटते तस्योपन्यासः ... | ६०४ |
| आभिमानिक्या उदाह० | ६०४ |
| वैषयिकीषु शब्दोदाह० | ६०५ |
| ,, स्पर्शोदाहरणम् | ६०५ |
| ,, रूपोदाहरणम् | ६०५ |
| ,, रसोदाहरणम् | ६०५ |
| ,, गन्धोदाहरणम् | ६०५ |
| उत्साहस्य युद्धवीरादयः, क्रोधस्य भामादयः, हासस्य स्मितादयः, सुप्तप्रलयमत्यादीनां स्वप्नमरणशमादयो भेदाः ... ... | ६०६ |
| तेषु—युद्धवीरस्योदाहरणम् | ६०६ |
| दानवीरस्योदाहरणम् | ६०६ |
| दयावीरस्योदाहरणम् | ६०६ |
| क्रोधस्य यद्यपि भामादयो मानभेदाश्चतुर्विंशतिस्तथापि ललिताललितोभयभेदरूपेण त्रय एव प्रकाराः ... | ६०६ |
| तेषु—स्त्रीणां ललितकोपस्य भामस्योदाहरणम् ... | ६०७ |
| प्रियापराधजन्मनो दुःखोत्पीडस्य मन्योरुदाहरणम् ... | ६०७ |

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| प्रियादिषु व्याजनिन्दो-रप्रासस्य लक्षणम्... | ६०७ |
| हासस्य यद्यप्युपहासादयो भेदास्तथापि विहसितेन तेषां संग्राह्यीषन्न्यूनाधिकमिति त्रयस्तद्भेदाः | ६०७ |
| तत्र-ईषद्धसितस्य स्मितस्योदाहरणम् ... | ६०७ |
| दृष्टदशनकान्तेर्हसितस्योदाहरणम् ... | ६०८ |
| तस्यैव सविशेषस्य हसितस्योदाहरणम् ... | ६०८ |
| सुप्तविशेषस्य स्वप्नस्योदाहरणम् ... ... | ६०८ |
| मूर्च्छाविशेषस्य मरणस्योदाहरणम् ... | ६०८ |
| मतिविशेषस्य श्रमस्योदाहरणम् ... | ६०९ |
| एवमन्येऽपि रसभावादिसंश्रया विशेषा ऊह्याः, अधुना परिशेषो निदर्श्यत इति प्रतिज्ञानम् | ६०९ |
| तत्राश्रयस्त्रिधा पुमान्, स्त्री, तिर्यगादयः ... | ६०९ |
| तेषु—पुंस्सुदाहरणम् ... | ६०९ |
| स्त्रीषूदाहृतिः ... | ६०९ |
| तिर्यगादिषूदाहरणम् ... | ६०९ |
| विषयस्त्रिधा—चेतनः, तिर्यग्, अचेतनश्च | ६१० |
| तेषु—चेतनस्योदाह० ... | ६१० |
| तिरश्च उदाहरणम् ... | ६१० |
| अचेतनस्योदाहरणम् ... | ६१० |
| ज्ञानं त्रिधा दृष्टम्, श्रुतम्, अनुमानजं च | ६१० |
| तेषु—दृष्टस्योदाहरणम् | ६११ |
| श्रुतस्योदाहरणम् ... | ६११ |
| अनुमानस्योदाह० ... | ६११ |
| संस्कारस्त्रिधा—आदृतः, पटुः, अभ्यस्तश्च | ६११ |
| तत्र—आदृतस्योदाह० | ६११ |
| विषयगुणेन पटुप्रत्ययादुत्पन्नस्य पटोरुदाह० | ६११ |
| ज्ञानपौनःपुन्येनाभ्यासप्रत्ययादुत्पन्नस्याभ्यस्तस्योदाहरणम् ... | ६१२ |
| ५३. उद्दीपनविभावेषु माल्यवस्त्रविभूषणादयो माल्यादयः ... | ६१२ |
| तेषु—माल्यस्योदाहरणम् | ६१२ |
| वस्त्रस्योदाहरणम् ... | ६१२ |
| विभूषणस्योदाहरणम्... | ६१२ |
| ५४. ऋतुवयोमदादय ऋत्वादयः | ६१३ |
| तेषु—ऋतोरुदाहरणम्... | ६१३ |
| वयस उदाहरणम् ... | ६१३ |
| मदस्योदाहरणम् ... | ६१३ |

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| चन्दनस्नानधूपादय-श्चन्दनादयः ... | ६१३ |
| तेषु—चन्दनस्योदाहरणम् | ६१३ |
| स्नानस्योदाहरणम् ... | ६१३ |
| धूपस्योदाहरणम् ... | ६१४ |
| चन्द्रोदयो घनध्वनिरुप-कारस्मरणमित्याद्या-श्चन्द्रोदयादयः ... | ६१४ |
| तेषु—चन्द्रोदयस्योदाह० | ६१४ |
| घनध्वनेरुदाहरणम् ... | ६१४ |
| उपकारस्मरणस्योदाह० | ६१४ |
| ५५. अनुभावेषु स्मरतेरुदाह० | ६१५ |
| ,, वाञ्छतेरुदाह० | ६१५ |
| ,, प्रयतते यथा ... | ६१५ |
| ,, अवैति यथा ... | ६१६ |
| ,, मन्यते यथा ... | ६१६ |
| ,, वक्ति यथा ... | ६१६ |
| ,, चेष्टते यथा ... | ६१६ |
| ५६. संचारिषु स्वेदरोमाञ्चवेप-थूनामुदाहरणम् ... | ६१७ |
| ,, अश्रुण उदाह० | ६१७ |
| ,, हर्षस्योदाहरणम् | ६१७ |
| ,, अमर्षस्योदाह० | ६१७ |
| लीलादिषु प्रियजनचेष्टा-नुकृतेर्लीलाया उदाह० | ६१८ |
| नेत्रभ्रूवक्रकर्मणां विशे-षेण लसनस्य विला-सस्योदाहरणम् ... | ६१८ |

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| विभूषणादीनामनादरवि-न्यासस्य विच्छित्ते-रुदाहरणम् ... | ६१८ |
| विभूषणादीनामस्थान-प्रयोगस्य विभ्रम-स्योदाहरणम् ... | ६१८ |
| स्मितरुदितहसितादीनां हर्षादसकृदेकीकर-णस्य किलकिञ्चित-स्योदाहरणम् ... | ६१९ |
| इष्टजनकथायां तद्भाव-भावनोत्थितविकारस्य मोट्टायितस्योदाह० | ६१९ |
| केशस्तनाधरादिग्रहणा-द्दुःखेऽपि सुखबुद्धि-चेष्टायाः कुट्टमित-स्योदाहरणम् ... | ६१९ |
| अभीष्टप्राप्तावभिमानगर्व-संभावनानादरकृतस्य विकारस्य विब्बोक-स्योदाहरणम् ... | ६१९ |
| सुकुमारतया करचरणा-द्यन्यासस्य ललित-स्योदाहरणम् ... | ६१९ |
| वक्तव्यसमयेऽपि वचसा-भिभाष्य क्रियातुष्टा-नस्य विहृतस्योदाह० | ६१९ |

| विषयः | पृष्ठसङ्ख्या. | विषयः | पृष्ठसङ्ख्या. |
|---|---|---|---|
| बाल्यकौमारयौवनसाधारणस्य विहारविशेषस्य क्रीडितस्योदाहरणम् | ६१९ | पूर्वानुरागः, मानः, प्रवासः, करुणश्च... | ६२३ |
| क्रीडितस्यैव प्रियतमविषये केलेरुदाहरणम् ... | ६२० | तेषु—प्रागसंगतयोः पूर्वानुरागः पुरुषप्रकाण्डे यथा ... | ६२३ |
| हेलादिषु रागतः सहसा प्रवृत्तिहेतुश्चित्तोल्लासो हेला, सा स्त्रियां यथा | ६२० | स एव स्त्रीप्रकाण्डे यथा | ६२४ |
| सैव पुरुषे यथा ... | ६२० | संगतयोर्मानः, स निर्हेतुर्यथा | ६२४ |
| हेलैव सवचनविन्यासो हावः स स्त्रियां यथा | ६२० | स एव सहेतुर्यथा ... | ६२४ |
| स एव पुरुषे यथा ... | ६२१ | संगतवियुक्तयोः प्रवासः, स नवानुरागो यथा | ६२५ |
| आदिग्रहणेन भावादयो गृह्यन्ते, तेषु भावाः स्त्रियां यथा ... | ६२१ | स एव प्रौढानुरागो यथा | ६२५ |
| व्याजः पुंसो यथा ... | ६२१ | संगतयोरेवान्यतरव्यपाये करुणः, स स्त्रीव्यपाये पुरुषस्य यथा | ६२५ |
| विस्रम्भभाषणं स्त्रिया यथा | ६२१ | स एव पुरुषस्य व्यपाये स्त्रिया यथा ... | ६२५ |
| चाटु स्त्रीपुंसयोर्यथा ... | ६२२ | हीनपात्रादिषु चैतदाभासा भवन्ति, तत्र हीनपात्रेषु पुंसि प्रेमानुरागो यथा ... | ६२६ |
| प्रेमाभिसंधानं पुंसो यथा | ६२२ | अत्रैव स्त्रियां मानो यथा | ६२६ |
| परिहासः स्त्रिया यथा | ६२२ | तिर्यक्षु पक्षिणि प्रवासो यथा | ६२६ |
| कुतूहलं पुंसो यथा ... | ६२२ | अत्रैव करिणि करुणो यथा | ६२६ |
| चकितं स्त्रिया यथा ... | ६२३ | तेषु—प्रथमानुरागानन्तरो यथा ... | ६२७ |
| हेलादयो विलासिनां चेष्टा उक्ताः, शेषाणां विप्रलम्भादौ रूपमाविर्भविष्यतीति प्रतिज्ञानम् ... | ६२३ | मानानन्तरो यथा ... | ६२७ |
| तत्र—विप्रलम्भशृङ्गारश्चतुर्धा | | प्रवासानन्तरो यथा ... | ६२७ |
| | | करुणानन्तरो यथा ... | ६२८ |

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| तेषु–प्रथमानुरागेण यथा | ६२८ |
| मानेन यथा ... | ६२८ |
| प्रवासेन यथा ... | ६२८ |
| करुणेन यथा ... | ६२९ |
| तिर्यगादिषु चैतदाभासा भवन्ति, तेषु सरीसृपमृगयोर्यथा ... | ६२९ |
| पशुपक्षिणोर्यथा ... | ६२९ |
| किंनरेषु यथा ... | ६२९ |
| तरुषु यथा ... | ६२९ |
| विप्रलम्भचेष्टासु प्रथमानुरागे स्त्रिया यथा | ६२९ |
| पुंसो यथा ... | ६३० |
| माने स्त्रिया यथा ... | ६३० |
| ,, पुंसो यथा ... | ६३० |
| प्रवासे स्त्रिया यथा ... | ६३० |
| ,, पुंसो यथा ... | ६३१ |
| करुणे स्त्रिया यथा ... | ६३१ |
| ,, पुंसो यथा ... | ६३१ |
| करुणवर्जं स्त्रिया यथा | ६३१ |
| स्त्रिया एव प्रथमानुरागवर्जं यथा ... | ६३२ |
| प्रथमानुरागवर्जं पुंसो यथा | ६३२ |
| पुंस एव प्रवासकरुणयोर्यथा | ६३२ |
| संभोगचेष्टासु पूर्वानुरागान्तरे चुम्बनं यथा | ६३२ |
| अत्रैवालिङ्गनं यथा ... | ६३३ |
| मानानन्तरे चुम्बनं यथा | ६३३ |
| अत्रैवालिङ्गनं यथा ... | ६३३ |
| प्रवासानन्तरे चुम्बनं यथा | ६३३ |
| करुणानन्तरमालिङ्गनं यथा | ६३३ |
| प्रथमानुरागानन्तरे दन्तक्षतं यथा ... | ६३४ |
| तदेव मानानन्तरे यथा | ६३४ |
| प्रवासानन्तरे दन्तक्षतादयो यथा ... | ६३४ |
| प्रथमानुरागानन्तरे नखक्षतं यथा ... | ६३४ |
| अत्रैव पुरुषायितं यथा | ६३५ |
| सर्वं सर्वत्र यथा ... | ६३५ |
| विप्रलम्भपरीष्टिष्वभियोगतः प्रेमपरीक्षा यथा | ६३५ |
| प्रश्नाभियोगतो यथा ... | ६३५ |
| विषहरणेन यथा ... | ६३६ |
| विमर्शेन यथा ... | ६३६ |
| बहुमानेन यथा ... | ६३६ |
| श्लाघया यथा ... | ६३६ |
| इङ्गितेन यथा ... | ६३७ |
| दूतसंप्रेषणेन यथा ... | ६३७ |
| दूतप्रश्ने यथा ... | ६३७ |
| लेखविधानेन यथा ... | ६३७ |
| लेखवाचनेन यथा ... | ६३८ |
| संभोगपरीष्टिषु प्रथमानुरागानन्तरे साध्वसेन पुंसो यथा | ६३८ |
| अत्रैव दोहदेन मुग्धाया उदाहरणम् ... | ६३८ |

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| अत्रैव प्रगल्भायाः प्रियवाक्यवर्णनेन यथा | ६३८ |
| मानानन्तरे स्त्रियाः कैतवस्मरणेन यथा ... | ६३९ |
| स्त्रिया एव सखीवाक्यस्याक्षेपेण यथा ... | ६३९ |
| तस्या एव तदनुष्ठानविघ्नेन यथा ... | ६३९ |
| प्रवासानन्तरं स्त्रिया यथा | ६३९ |
| अत्रैव स्त्रीपुंसयोर्यथा | ६४० |
| सामान्यत एव प्रवाससाध्वसेन स्त्रिया यथा | ६४० |
| प्रवासविलम्बेन पुंसो यथा | ६४० |
| परिहारे खेदादिभिः स्त्रिया यथा ... | ६४० |
| करुणानन्तरे पुंसो यथा | ६४१ |
| विप्रलम्भनिरुक्तिषु प्रथमानुरागे प्रतिश्रुत्यादानं यथा ... | ६४१ |
| माने विसंवादनं यथा | ६४१ |
| प्रवासे कालहरणं यथा | ६४२ |
| करुणे प्रत्यादानं यथा | ६४२ |
| अत्र संबद्धोऽर्थः ... | ६४३ |
| प्रथमानुरागे वञ्चनमात्रं विविधम् ... | ६४३ |
| माने विरुद्धं यथा ... | ६४३ |
| प्रवासे व्याविद्धं यथा ... | ६४३ |
| करुणे निषिद्धं यथा ... | ६४४ |

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| प्रथमानुरागेण सहरागो यथा | ६४४ |
| तत्रैव पश्चाद् यथा ... | ६४४ |
| तत्रैवानुरूपो यथा ... | ६४५ |
| तत्रैवानुगता यथा ... | ६४५ |
| माने मान्यते येनेति यथा | ६४५ |
| यं प्रियत्वेन मन्यते यथा | ६४६ |
| यः प्रेम मनुते यथा ... | ६४६ |
| प्रेम मिमीते यथा ... | ६४७ |
| प्रवासे वसत इत्युपलक्षणेनात्मानमङ्गना न भूषयन्ति ... | ६४७ |
| युवानः प्रियासंनिधौ न वसन्ति यथा ... | ६४७ |
| उत्कण्ठादिभिश्चेतो वासयति यथा ... | ६४८ |
| प्रमापयति यथा ... | ६४८ |
| करुणे करोतेर्भूतोपादनार्थत्वे कुरुते मूर्च्छां यथा ... | ६४८ |
| उच्चारणार्थत्वे कुरुते विलापं यथा ... | ६४९ |
| अवस्थापनार्थे कुरुते साहसे मनो यथा | ६४९ |
| अभ्यञ्जनार्थत्वे करोति चित्तं दुःखेन यथा | ६४९ |
| संभोगनिरुक्तिषु प्रथमानुरागानन्तरे पालनार्थो यथा ... | ६४९ |

विषयः पृष्ठसंख्या.

मानानन्तरे कौटिल्यार्थो यथा ६५०
प्रवासानन्तरेऽभ्यवहारार्थो यथा ... ६५०
करुणानन्तरेऽनुभवार्थो यथा ६५०
अत्र प्रथमानुरागानन्तरे संभोगः संक्षिप्तो यथा ६५१
स एव मानानन्तरे संकीर्णो यथा ... ६५१
प्रवासानन्तरे संपूर्णो यथा ६५१
करुणानन्तरे समृद्धो यथा ६५२
प्रथमानुरागानन्तरे सहार्थान्वयो यथा ... ६५२
तत्रैव पश्चार्थान्वयो यथा ६५२
अत्रैवानुरूपार्थान्वयो यथा ६५३
तत्रैवानुगतार्थान्वयो यथा ६५३
मानानन्तरे पूजार्थान्वयो यथा ... ६५४
अत्रैव मानं प्रति प्रियत्वाभिमानार्थान्वयो यथा ... ... ६५४
अत्रैव प्रेमावरोधार्थान्वयो यथा ... ६५५
तत्रैव प्रेमप्रमाणार्थान्वयो यथा ... ६५५
मानशेषान्वयो यथा ... ६५६
प्रवासानन्तरे प्रिया न वसत इत्यर्थस्यान्वयो यथा ... ६५६

विषयः पृष्ठसंख्या.

तत्रैव युवानः प्रियासंनिधौ न वसन्तीत्यर्थस्यान्वयो यथा ६५७
अत्रैवोत्कण्ठादिभिर्श्वेतो वासयतीत्यर्थस्यान्वयो यथा ... ६५७
अत्रैव प्रमापयतीत्यर्थस्यान्वयो यथा ... ६५७
करुणानन्तरेऽनुभूतप्रादुर्भावान्वयार्थो यथा ... ६५८
तत्रैवोच्चारणान्वयार्थो यथा ६५८
अत्रैव मनोऽभ्यस्थापनान्वयार्थो यथा ... ६५९
अत्रैवार्धशरीरप्रदानमहासाहसं यथा ... ६५९
तत्रैवाभ्यञ्जनान्वयार्थो यथा ६५९
प्रकीर्णकेषु स्पृहयन्तीव्रतमष्टमीचन्द्रको यथा ६६४
कुन्दचतुर्थी यथा ... ६६४
सुवसन्तको यथा ... ६६४
आन्दोलनचतुर्थी यथा ६६४
एकशाल्मली यथा ... ६६५
मदनोत्सवो यथा ... ६६५
उदकक्ष्वेडिका यथा ... ६६५
अशोकोत्तंसिका यथा ... ६६६
चूतभञ्जिका यथा ... ६६६
पुष्पावचायिका यथा ६६६

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| चूतलतिका यथा ... | ६६७ |
| भूतमातृका यथा ... | ६६७ |
| कदम्बयुद्धानि यथा ... | ६६७ |
| नवपत्रिका यथा ... | ६६८ |
| बिसखादिका यथा ... | ६६८ |
| शक्रार्चा यथा ... | ६६८ |
| कौमुदी यथा ... | ६६८ |
| यक्षरात्रिर्यथा ... | ६६९ |
| अभ्यूषखादिका यथा | ६६९ |
| नवेक्षुभक्षिका यथा ... | ६६९ |
| तोयक्रीडा यथा ... | ६७० |
| प्रेक्षा यथा ... | ६७० |
| द्यूतानि यथा | ६७० |
| मधुपानं यथा ... | ६७० |
| नित्यः प्रेमप्रकारो यथा | ६७१ |
| नैमित्तिको यथा ... | ६७१ |
| सामान्यो यथा ... | ६७१ |
| विशेषवान् यथा ... | ६७१ |
| प्रच्छन्नो यथा ... | ६७२ |
| प्रकाशो यथा ... | ६७२ |
| कृत्रिमो यथा ... | ६७२ |
| अकृत्रिमो यथा ... | ६७३ |
| सहजो यथा ... | ६७३ |
| आहार्यो यथा ... | ६७३ |
| यौवनको यथा ... | ६७३ |
| विस्रम्भजो यथा ... | ६७४ |
| चक्षुःप्रीतिर्यथा ... | ६७४ |
| मनःसङ्गो यथा ... | ६७४ |

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| संकल्पोत्पत्तिर्यथा ... | ६७४ |
| प्रलापो यथा ... | ६७५ |
| जागरो यथा ... | ६७५ |
| कार्श्यं यथा ... | ६७५ |
| अरतिर्विषयान्तरे यथा | ६७५ |
| लज्जाविसर्जनं यथा ... | ६७६ |
| व्याधिर्यथा ... | ६७६ |
| उन्मादो यथा ... | ६७६ |
| मूर्च्छा यथा ... | ६७६ |
| मरणं यथा ... | ६७७ |
| नायकेषु कथाव्यापी नायको यथा ... | ६७७ |
| प्रतिनायको यथा ... | ६७७ |
| उपनायको यथा ... | ६७७ |
| अनुनायको यथा ... | ६७८ |
| कथाव्यापिनी नायिका यथा | ६७८ |
| प्रतिनायिका यथा ... | ६७८ |
| उपनायिका यथा ... | ६७८ |
| अनुनायिका यथा ... | ६७८ |
| आभासेषु नायकाभासो यथा ... | ६७९ |
| नायिकाभासो यथा ... | ६७९ |
| उभयाभासो यथा ... | ६७९ |
| तिर्यगाभासो यथा ... | ६७९ |
| नायकेषु सर्वगुणसम्पद्योगादुत्तमो यथा | ६८० |
| पादोनगुणसम्पद्योगान्मध्यमो यथा ... | ६८० |

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| अर्धगुणसंपद्योगात् कनिष्ठो यथा | ... ६८० |
| सात्त्विको यथा | ... ६८० |
| राजसो यथा | ... ६८१ |
| तामसो यथा | ... ६८१ |
| साधारणो यथा | ... ६८१ |
| असाधारणो यथा | ... ६८१ |
| धीरोद्धतो यथा | ... ६८१ |
| धीरललितो यथा | ... ६८२ |
| धीरप्रशान्तो यथा | ... ६८२ |
| धीरोदात्तो यथा | ... ६८२ |
| शठो यथा | ... ६८२ |
| धृष्टो यथा | ... ६८३ |
| अनुकूलो यथा | ... ६८३ |
| दक्षिणो यथा | ... ६८३ |
| नायिकागुणेषु सर्वगुणसंपद्योगादुत्तमा यथा | ... ६८३ |
| पादोनगुणसंपद्योगान्मध्यमा यथा | ... ६८३ |
| मुग्धा यथा | ... ६८४ |
| मध्यमा यथा | ... ६८४ |
| प्रगल्भा यथा | ... ६८४ |
| धीरा यथा | ... ६८५ |
| अधीरा यथा | ... ६८५ |
| आत्मीया यथा | ... ६८५ |
| परकीया यथा | ... ६८५ |
| ऊढा यथा | ... ६८६ |

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| कुमारी यथा | ... ६८६ |
| ज्येष्ठा यथा | ... ६८६ |
| कनीयसी यथा | ... ६८७ |
| उद्धता यथा | ... ६८७ |
| उदात्ता यथा | ... ६८७ |
| शान्ता यथा | ... ६८७ |
| ललिता यथा | ... ६८८ |
| सामान्या यथा | ... ६८८ |
| पुनर्भूर्यथा | ... ६८८ |
| स्वैरिणी यथा | ... ६८८ |
| गणिका यथा | ... ६८९ |
| रूपजीवा यथा | ... ६८९ |
| विलासिनी यथा | ... ६८९ |
| खण्डिता यथा | ... ६८९ |
| कलहान्तरिता यथा | ... ६९० |
| विप्रलब्धा यथा | ... ६९० |
| वासकसज्जा यथा | ... ६९० |
| स्वाधीनपतिका यथा | ... ६९० |
| अभिसारिका यथा | ... ६९१ |
| प्रोषितभर्तृका यथा | ... ६९१ |
| विरहोत्कण्ठिता यथा | ... ६९१ |
| हीनपात्रेषु शकारो यथा | ६९२ |
| ,, ललको यथा | ... ६९२ |
| अमात्यादिरासनार्हः पाषण्डादिर्वा पीठमर्दः, तयोरमात्येषु माल्यवान् यथा | ... ६९२ |
| पाषण्डेषु भैरवानन्दो यथा | ६९३ |

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| विदूषकलक्षणम्, तदुदा० | ६९३ |
| विटलक्षणं तदुदाहरणं च | ६९३,६९४ |
| धात्रेयकश्चेटो यथा ... | ६९४ |
| पताकालक्षणम् ... | ६९४ |
| तासु—पताकाहनूमान् यथा | ६९४ |
| आपताकाप्रकर्यौ मारीच-जटायुषौ यथा ... | ६९४ |
| सखीलक्षणम् ... | ६९४ |
| तासु—लवङ्गिकादिः सहजा यथा ... ... | ६९४ |
| कामन्दक्यादिः पूर्वजा यथा ... ... | ६९४ |
| त्रिजटादिरागन्तुर्यथा... | ६९५ |
| नायकगुणेषु महाकुलीनत्वं पुंसो यथा ... | ६९५ |
| औदार्यं यथा ... ... | ६९५ |
| महाभाग्यं यथा ... | ६९५ |
| कृतज्ञता यथा ... | ६९६ |
| रूपसंपद् यथा ... | ६९६ |
| यौवनसंपद् यथा ... | ६९६ |
| वैदग्ध्यसंपद् यथा ... | ६९६ |
| शीलसंपद् यथा ... | ६९६ |
| सौभाग्यसंपद् यथा ... | ६९६ |
| मानिता यथा... ... | ६९७ |
| उदारवाक्यत्वं यथा ... | ६९७ |
| स्थिरानुरागिता यथा... | ६९७ |
| नायिकागुणेषु स्त्रिया महाकुलीनता यथा... | ६९७ |

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| औदार्यं यथा... ... | ६९८ |
| महाभाग्यं यथा ... | ६९८ |
| कृतज्ञता यथा ... | ६९८ |
| रूपसंपद् यथा ... | ६९८ |
| यौवनसंपद् यथा ... | ६९८ |
| वैदग्ध्यसंपद् यथा ... | ६९८ |
| शीलसंपद् यथा ... | ६९९ |
| सौभाग्यसंपद् यथा ... | ६९९ |
| मानिता यथा ... | ६९९ |
| उदारवाक्यत्वं यथा ... | ६९९ |
| स्थिरानुरागिता यथा | ७०० |
| पाकभक्तिषु आदावस्वादु, अन्ते स्वादु मृद्वीकापाकं यथा ... | ७०० |
| आद्यन्तयोः स्वादु नारिकेलीपाकं यथा ... ... | ७०० |
| आदिमध्यान्तेषु स्वादु स्वादुतरं स्वादुतममित्याम्रपाकं यथा ... ... | ७०० |
| यन्नापैति न चातिशोभते तन्नीलीरागं यथा ... | ७०१ |
| यदपैति च शोभते च तत् कुसुम्भरागं यथा ... | ७०१ |
| यन्नापैत्यति च शोभते तन्मञ्जिष्ठारागं यथा ... | ७०१ |
| गूढव्यलीकमन्तर्व्याजं यथा | ७०२ |
| अगूढव्यलीकं बहिर्व्याजं यथा | ७०२ |
| अव्यलीकं निर्व्याजं यथा | ७०२ |

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| धर्मानुबन्धि धर्मोदर्कं यथा | ७०२ |
| अर्थानुबन्धि अर्थोदर्कं यथा | ७०३ |
| यत् पुनः काममेवानुबध्नाति तत् कामोदर्कं यथा ... | ७०३ |
| अलंकारेषु गुणरसानामपि संग्रह इति प्रतिपादनम्, परमतोपन्यासश्च ... | ७०४ |
| श्लेषादिषु गुणत्वमिवालंकारत्वमपि ... ... | ७०४ |
| शुक्लोत्कर्षाणामूर्जस्विरसवत्प्रेयसामलंकारेषूपदेशः | ७०४ |
| ऊर्जस्विरसवत्प्रेयसामेकदालंकारत्वमन्यदा च गुणत्वम् ... ... ... | ७०५ |
| गुणरसानामलंकारत्वे षट्प्रकारोऽलंकारसंकरः ... | ७०६ |
| त्रिविधा अपि गुणा उल्लेखवन्तो निरुल्लेखाश्च ... | ७०६ |
| तत्र—सजातीयानां सोल्लेखानां विजातीयानां निरुल्लेखानामपि संकरव्यवहारः | ७०६ |
| तेषु—सजातीयानां शब्दगुणेषु समाध्यादीनां यथा | ७०७ |
| अर्थगुणेषु श्लेषादीनां यथा | ७०७ |
| दोषगुणेषु ग्राम्यादीनां यथा ... ... | ७०७ |
| अत्र परमतोपन्यासः | ७०८ |
| अर्थाद्विजातीयानां शब्द- | |

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| गुणानामर्थगुणानां च संकरो यथा ... | ७०८ |
| शब्दगुणानां दोषगुणानां च यथा ... ... | ७०८ |
| अर्थगुणानां दोषगुणानां यथा ... ... | ७०९ |
| अथालंकारसंकरः ... | ७०९ |
| स शब्दालंकारसंकरादिभेदेन षोढा ... | ७१० |
| तेषु—शब्दालंकारसंकरो यथा | ७१० |
| अर्थालंकारसंकरो यथा | ७१० |
| उभयालंकारसंकरो यथा | ७११ |
| शब्दार्थालंकारसंकरो यथा ... ... | ७११ |
| शब्दोभयालंकारसंकरो यथा ... ... | ७१२ |
| अर्थोभयालंकारसंकरो यथा ... ... | ७१२ |
| क्वचिद्गुणस्य क्वचिदलंकारस्य प्राधान्यमिति गुणालंकारयोः संकरव्यवहारः ... ... | ७१२ |
| स शब्दगुणप्रधानादिभेदेन षोढा ... ... | ७१२ |
| तेषु—शब्दगुणप्रधानो यथा | ७१३ |
| अर्थगुणप्रधानो यथा | ७१३ |
| दोषगुणप्रधानो यथा... | ७१४ |
| गुणालंकारयोश्च तुल्यक- | |

विषयः पृष्ठसङ्ख्या.

क्षतायामलंकारः प्रधानं न गुणः ... ७१४
गुणैर्हि गुणभूतैरेवालंकाराः प्राय आरभ्यन्ते ७१४
रीतिषु गुणविभागः ७१४,७१५
शब्दालंकारप्रधानो यथा ७१५
अर्थालंकारप्रधानो यथा ७१६
उभयालंकारप्रधानो यथा ७१६
रससंकरोऽपि चालंकारसंकरवदेव ... ७१६
भावरसाभासप्रशमानां तिलतण्डुलादिप्रकारेण संकरः षट्प्रकारको भवति ... ७१७
तत्र—भावानां तिलतण्डुलप्रकारो यथा ... ... ७१७
क्षीरनीरप्रकारो यथा ७१७
छायादर्शप्रकारो यथा ७१७
नरसिंहप्रकारो यथा ... ७१८
कुत्सायां कप्रत्यये प्रमाणोपन्यासः ... ७१८
तदुदाहरणं च... ... ७१९
पांसूदकप्रकारो यथा... ७१९
चित्रवर्णप्रकारो यथा... ७१९
अथ रसगुणसंकरः ... ७२०
यत्र—गुणरसानां वाक्ये संनिवेशस्तत्र संकरव्यवहारो न प्रवर्तते ... ७२०

विषयः पृष्ठसङ्ख्या.

गुणानां रसारम्भकत्वे संकराप्रसिद्धौ प्रमाणोपन्यासः ... ७२१
गुणरसानां वाक्ये विनिवेशस्तत्र संकरव्यवहारः ... ... ७२१
स गुणप्रधानादिभेदेन षोढा ... ... ७२१
तेषु—गुणप्रधानो यथा ... ७२१
रसप्रधानो यथा ... ७२२
उभयप्रधानो यथा ... ७२२
उभयाप्रधानो यथा ... ७२२
गुणाधिको यथा ... ७२३
रसाधिको यथा ... ७२३
रसालंकारसंकरोऽप्येतेन व्याख्यातः ... ७२४
रसालंकारसंकरो द्विधा रसप्रधानोऽलंकारप्रधानश्च ... ... ७२४
तत्र—रतावुपमायाः संकरो यथा ... ... ७२४
रतावेव विपरीतोपमा यथा ... ... ७२५
रतावेव पर्यायस्य यथा ७२५
रतावेव समाधिर्यथा... ७२६
रतावेवार्थश्लेषस्य यथा ७२६
रतावेव पर्यायोक्तिर्यथा ७२६

| विषयः | पृष्ठसङ्ख्या. |
| --- | --- |
| रसभावादेः संकरप्रकारमभिधित्सुः स्वभावोक्तिं वक्रोक्तिं वावलम्बते ... ... | ७२७ |
| तत्र–स्वभावोक्तिपक्षे जातिः | ७२७ |
| सा विधिमुखेन यथा... | ७२७ |
| जातिरेव निषेधमुखेन यथा ... ... | ७२७ |
| सैव विधिनिषेधाभ्यां यथा | ७२८ |
| वक्रोक्तिपक्ष उपमादयः | ७२८ |
| तेषु–उपमा यथा ... | ७२८ |
| उपमैव रसाभाससंकरविषया यथा ... | ७२९ |
| रसप्रशमयोरुपमासहोक्तिर्यथा ... ... | ७२९ |
| क्वचिदवास्तवमपि रसाभाससंकरं कवयः प्रकल्पयन्ति ... | ७३० |
| स रूपकश्लेषेण यथा | ७३० |
| श्लेषानुविद्धार्थान्तरन्यासेन यथा... ... | ७३० |
| श्लेषोपमा यथा ... | ७३१ |
| श्लेषव्यतिरेकेण यथा... | ७३१ |
| श्लेषरूपकेण यथा ... | ७३१ |
| समाधिरूपकेण यथा | ७३२ |
| एवमन्येऽप्यन्तर्भूताः | ७३२ |
| अलंकारसंसृष्टेर्द्वयी गतिर्लक्षणीया... ... | ७३२ |

| विषयः | पृष्ठसङ्ख्या. |
| --- | --- |
| तत्र–अङ्गाङ्गिभावेनावस्थानं यथा ... ... | ७३२ |
| सर्वेषां समकक्षता यथा | ७३३ |
| अत्र प्रमाणोपन्यासः | ७३४ |
| इवादिशब्दप्रयोगो यथा तथैवोत्प्रेक्षायां मन्ये, शङ्के, इत्यादीनामपि | ७३५ |
| चतुर्वृत्त्यङ्गसंपन्नमित्यत्र चतस्रो वृत्तयो भारती, आरभटी, कैशिकी, सात्त्वती चेति ... | ७३७ |
| तासां पृथक् पृथक् लक्षणानि ... ... | ७३७ |
| आसामङ्गानि षोडश... | ७३७ |
| तेषु–प्ररोचना, वीथी, प्रस्तावना, प्रहसनमिति चत्वारि भारत्यङ्गानि ... | ७३७ |
| तत्र–प्ररोचना यथा ... | ७३८ |
| प्रस्तावना यथा ... | ७३८ |
| उद्घात्यकादीनामङ्गानां प्रवृत्तिर्वीथी ... | ७३८ |
| तत्र–उद्घात्यको यथा ... | ७३८ |
| कथोद्घातो यथा ... | ७३८ |
| प्रयोगातिशयो यथा ... | ७३८ |
| प्रवर्तको यथा ... | ७३९ |
| अवलगितं यथा .... | ७३९ |
| उपहासपरं वचः प्रहसनम् ... ... | ७३९ |

| विषयः | पृष्ठसङ्ख्या. |
|---|---|
| संक्षिप्तिका, अवपातः वस्तूत्थापनम्, संस्फोट इत्यारभ्यङ्गानि चत्वारि | ७३९ |
| तेषु—संक्षिप्तिका यथा | ७३९ |
| अवपातो यथा | ७४० |
| वस्तूत्थापनं यथा | ७४० |
| संस्फोटो यथा | ७४० |
| नर्म, नर्मस्फिजः, नर्मस्फोटः, नर्मगर्भ इति चत्वारि कैशिक्यङ्गानि | ७४० |
| तेषु—नर्म यथा | ७४० |
| नर्मस्फिजो यथा | ७४० |
| नर्मस्फोटो यथा | ७४० |
| नर्मगर्भो यथा | ७४१ |
| उत्थापकः, परिवर्तकः, संलापकः, संघात्यक इति चत्वारि सात्वत्यङ्गानि | ७४१ |
| तेषु—उत्थापको यथा | ७४१ |
| परिवर्तको यथा | ७४१ |
| संलापको यथा | ७४१ |
| संघात्यको यथा | ७४१ |
| ग्रन्थोपसंहारः | ७४३ |
| एवमनङ्गसर्वस्वभूतस्यास्य ग्रन्थस्य भावनया परिषदि विदुषां परितोषः | ७४३ |
| ग्रन्थसमाप्तौ मङ्गलाशंसनम् | ७४४ |


इति रसविवेचनो नाम पञ्चमः परिच्छेदः ।

ग्रन्थसमाप्तिः ॥

इति सरस्वतीकण्ठाभरणानुक्रमणी ।

# काव्यमाला ।

## श्रीमन्महाराजाधिराजश्रीभोजदेवविरचितं

# सरस्वतीकण्ठाभरणम् ।

श्रीरत्नेश्वरविरचितया रत्नदर्पणाख्यया व्याख्यया समेतम् ।

### प्रथमः परिच्छेदः ।

एकेन यस्य यमिनः प्रमदेव देहमर्धेन राजति पुमानिव चापरेण ।
तत्त्वक्रमादथ च न प्रमदा पुमान्वा श्रेयांसि वर्धयतु स स्मरशासनो वः ॥

श्रीरामसिंहदेवेन दोर्दण्डदलितद्विषा ।
क्रियतेऽवन्तिभूपालकण्ठाभरणदर्पणः ॥

कण्ठाभरणमनर्घ्यं वाग्देवीरत्नदर्पणोत्सङ्गे ।
अस्मिन्पश्यतु निभृतं प्रकाशसर्वाङ्गलावण्यम् ॥

ग्रन्थारम्भे समुचितेष्टदेवतानमस्कारेण शिष्टाचारमनुवर्तते—

**ध्वनिर्वर्णाः पदं वाक्यमित्यास्पदचतुष्टयम् ।**
**यस्याः सूक्ष्मादिभेदेन वाग्देवीं तामुपास्महे ॥ १ ॥**

**ध्वनिरिति ।** वाचामधिष्ठात्री देवी द्योतमाना स्वप्रकाशशब्दब्रह्मरूपा भारती । कथमुपास्यते । सूक्ष्मादिभेदेन ध्वन्यादिभेदेन च विवक्षितो नमस्कारः । शब्दब्रह्मणश्चतस्रो भिदा भवन्ति । सूक्ष्मा, पश्यन्ती, मध्यमा, वैखरी चेति । तत्राविकारदशा सूक्ष्मा । सा हि सर्वस्य प्राणापानान्तरालवर्तिनी विगतप्रादुर्भावतिरोभावा सम्यक्प्रयोगपरिशीलनात्मना कर्मयोगेन मननादिना ज्ञानयोगेन च सम्यगधिगम्यते । 'सेयमाकीर्यमाणापि नित्यमागन्तुकैर्मलैः । अन्त्या कला हि सोमस्य नात्यन्तमभिभूयते ॥ तस्यां विज्ञातमात्रायामधिकारो निवर्तते । पुरुषे षोडशकले तामा-

हुरमृतां कलाम् ॥' इति । तस्य ब्रह्मणोऽनाद्यविद्यावशादाद्यः परिणामः पश्यन्तीरूपो जायते । स हि वर्णविभागादक्रमः स्वयंप्रकाशश्च । पूर्वापरे स्वावस्थे पश्यतीति पश्यन्तीत्युच्यते । ततः परमविद्योपादानादन्तःसंकल्परूपक्रमवान् श्रोत्रग्राह्यवर्णाभिव्यक्तिरहितस्तृतीयः परिणामो मध्यमारूपो जायते । सा किल द्वयोः परिणामयोर्मध्ये सदा तिष्ठतीति मध्यमेत्युच्यते । अन्तरं दूरप्रसृतायामविद्यायां स्थानकरणप्रयत्नव्यज्यमानश्रोत्रसंवादिवीणादुन्दुभिवादपरिचयगद्गदाव्यक्ताकारादिवर्णसमुदायात्मकस्तृतीयः परिणामो वैखरीरूपो जायते । विशिष्टं खमाकाशं राति प्रयच्छतीति विखरो देहेन्द्रियसंघातः । तथा च श्रुतिः—'न ह वै सशरीरस्य प्रियाप्रिययोरपहतिरस्ति । अशरीरं वा व सन्तं प्रियाप्रिये न स्पृशतः ॥' इति । तत्र भवा वैखरीति । तदेतासामवस्थानामाद्यास्तिस्रो नित्या अतीन्द्रियाः । तदुक्तम्—'स्थानेषु विवृते वायौ कृतवर्णपरिग्रहा । वैखरी वाक्प्रयोक्तॄणां प्राणवृत्तिनिबन्धना ॥ केवलं बुद्ध्युपादानक्रमरूपानुपातिनी । प्राणवृत्तिमतिक्रम्य मध्यमा वाक्प्रवर्तते ॥ अविभागात्तु पश्यन्ती सर्वतः संहृतक्रमा । स्वरूपज्योतिरेवान्तःसूक्ष्मा सा चानपायिनी ॥' इति । श्रुतिरप्याह—'चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः । गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥' इत्यादिकमागमसमुच्चयादेवावसेयम् । का पुनस्ता वाचो यासामियमधिष्ठात्रीत्यत उक्तम्—'ध्वनिर्वर्णाः पदं वाक्यमित्यास्पदचतुष्टयम् । यस्याः' इति । आस्पदमधिष्ठानमवच्छेदः । ध्वन्यादिभिरवच्छिन्ना परा वाक् तद्व्यवहारहेतुः । साहित्यप्रसिद्धाभिधानध्वननलक्षणव्यवहारकारित्वमेकस्मिन् वर्णे न निरूप्यते इति बहुवचनम् । पदवाक्ययोरस्ति प्रत्येकमपि तथाभाव इति ताभ्यामेकवचनमुपात्तम् । तदयमत्र तात्पर्यसंक्षेपः । साहित्यस्वरूपनिरूपणाय किलैष ग्रन्थारम्भः । साहित्यं च शब्दार्थयोः संबन्धः । तत्र शब्द एव क इत्यपेक्षायामयं विभागो ध्वनिरित्यादिः । अर्थस्तु स्तम्भकुम्भादिलक्षणो लोके शास्त्रे च प्रसिद्धः । संबन्धः कश्चिदनादिः । सर्वस्यायमानस्तु संबन्धो नान्यत्रेत्यस्मिन्नायतते । स चतुर्विधः—दोषहानम्, गुणोपादानम्, अलंकारयोगः, रसाभियोगश्चेति ॥

प्रेक्षावत्प्रवृत्त्यङ्गसंबन्धप्रयोजने दर्शयति—

**निर्दोषं गुणवत्काव्यमलंकारैरलंकृतम् ।**
**रसान्वितं कविः कुर्वन्कीर्तिं प्रीतिं च विन्दति ॥ २ ॥**

निर्दोषमिति । प्रीतिः संपूर्णकाव्यार्थस्वादसमुत्थ आनन्दः काव्यार्थभावनाद-

शायां कवेरपि सामाजिकत्वाङ्गीकारात् । सहृदयश्लाघया च प्रीतिरदृष्टं प्रयोजनम् । कीर्तिरदृष्टद्वारा स्वर्गफलेत्यदृष्टम् । यदाहु—'कीर्तिं स्वर्गफलमाहुः' इति । अस्मिन् काव्यस्य प्रयोजनान्वाख्यानेनाङ्गभूतस्यास्य प्रयोजनसंबन्ध उक्तः । यद्यपि काव्य-शब्दो दोषाभावादिविशिष्टावेव शब्दार्थौ ब्रूते, तथापि लक्षणया शब्दार्थमात्रे प्रयुक्तः । लक्षणाप्रयोजनं चाभिधेयानामुद्देशः । त्रिधा हि शास्त्रशरीरम्—'उद्देशः, लक्षणम्, परीक्षा चे'ति । उदाहरणव्याख्याग्रन्थः सर्वत्र परीक्षापर इत्यसङ्करः । प्रयोजनाभिसंबन्धपरादेवोद्देशो लभ्यत इति न विरोधः । अत एव दोषाद्युद्देशक्रमेण परिच्छेदाः । निर्दोषं दोषात्यन्ताभाववत्, अवयवैकदेशवर्तिना श्वित्रेणेव कामिनी-शरीरस्य वर्णमात्रगतेनापि दोषेण काव्यवैरस्यनियमात्। अत एवामङ्गलप्रायाणामपि दोषाणां प्रथममुपादानम् । अयमेव हि प्राचः कवेर्व्यापारो यद्दोषहानं नाम । गुण-वदिति । भूम्नि प्रशंसायां वा मतुप् । अलंकृतमित्येव वक्तव्येऽलंकारैरिति प्रसिद्धा-लंकारपरिग्रहार्थम् । तथालंकारैरित्येव वाच्ये प्रसिद्धानामपि वक्ष्यमाणानामेवोपादा-नार्थमलंकृतपदम्। रसान्वितं रसेन नित्यसंबद्धम् । 'नास्त्येव तत्काव्यं यत्र परम्प-रयापि विभावादिपर्यवसानं न भवति' इति काश्मीरिकाः । एतेन काव्यलक्षणमपि कटाक्षितम् । ईदृशं काव्यं तत्कुर्वन् । कविरिति कवेरपि लक्षणमिति ॥

अथोद्देशक्रमेण दोषाणां सामान्यलक्षणं विभागं चाह—

**दोषाः पदानां वाक्यानां वाक्यार्थानां च षोडश ।**
**हेयाः काव्ये कवीन्द्रैर्ये तानेवादौ प्रचक्ष्महे ॥ २ ॥**

दोषाः पदानामिति । हेया इत्यनेन सामान्यलक्षणम् । ये हेयास्ते दोषा इत्यभिप्रायात् । अभिमतप्रतीतिव्यवधायकतया विघ्नभूतः शश्वत्काव्ये हेयतामासा-दयति स एव दोषः । अयमेवार्थः 'मुख्यार्थहतिर्दोषः—' इति पदेनान्येषामभिमतः । स च पद-वाक्य-वाक्यार्थविषयतया पूर्वं त्रिविधः । पदपूर्वकत्वाद्वाक्यस्य तत्पूर्वक-त्वाद्वाक्यार्थस्य युक्तः क्रमः । वर्णमात्रदोषो नोल्लेखीत्युपेक्षितवान् । अवान्तरविभागे तु क्रियमाणे प्रत्येकं षोडशभिरुपाधिभिः संकुलमित्याह—षोडशेति । काव्यप्रका-शकारादिभिरुक्तानामधिकानामिहान्तर्भावः । अनन्तर्भावे तु दोषत्वमेव नास्तीत्य-भिप्रायः, न तु देसीयराजन्यायेन स्वमतप्रकाशनम् । प्रतीतिव्यवधायकानां सर्वदा तद्रूपत्वात् । उक्तमेवाभिसंधानम्—तानेवादाविति ॥

विभागमन्तरेण विशेषलक्षणानवतारात्पददोषान्विभजते—

असाधु चाप्रयुक्तं च कष्टं चानर्थकं च यत्।
अन्यार्थकमपुष्टार्थमसमर्थं तथैव च ॥ ४ ॥
अप्रतीतमथ क्लिष्टं गूढं नेयार्थमेव च।
संदिग्धं च विरुद्धं च प्रोक्तं यच्चाप्रयोजकम् ॥ ५ ॥
देश्यं ग्राम्यमिति स्पष्टा दोषाः स्युः पदसंश्रयाः।

**असाध्विति**। मुख्यार्थहतौ मिथोऽनपेक्षासूचनया समासः। अत एव लाघवेऽनादरः। कथं पदप्रतीकदोषा न गण्यन्त इति शङ्कामभिप्रेत्याह—स्पष्टा इति। पदसंश्रयाः पदान्वयव्यतिरेकानुविधायिनः। एवं वाक्यादावपि गुणादावपीदमेवाश्रितत्वम्॥

विभागप्रयोजनमाह—

अथैषां लक्षणं सम्यक्सोदाहरणमुच्यते ॥ ६ ॥

**अथैषामिति**। परीक्षां प्रतिजानीते—सम्यगिति। लक्षणदोषशून्यं लक्षणानुपपत्तिनिर्णजनमेव हि परीक्षापदार्थः। कथमेतत्संपत्स्यते इत्यत आह—सोदाहरणमिति॥

शब्दस्वरूपलक्षणः प्रथमनिरस्यो दोष इत्याशयेन प्रागुद्दिष्टस्यासाधोर्लक्षणमाह—

शब्दशास्त्रविरुद्धं यत्तदसाधु प्रचक्षते।

यथा—

'भूरिभारभराक्रान्त बाधति स्कन्ध एष ते।
तथा न बाधते स्कन्धो यथा बाधति बाधते ॥ १ ॥'

अत्र बाधतेरात्मनेपदित्वाद् 'बाधते' इति स्यात्, न पुनर् 'बाधति' इति॥

**शब्देति**। शब्दाः शिष्यन्ते प्रकृतिप्रत्ययविभागपरिकल्पनया ज्ञाप्यन्ते येन तच्छब्दशास्त्रं त्रिमुनिव्याकरणं तेन विरुद्धं तदाम्नातप्रातिस्विकविशेषपरित्यक्तमतो न देशीयपदानामसाधुत्वम्। तथा च प्राच्यैः—'नाथ ते कुचयुगं पत्राकृतं मा कृथाः' इति अन्यकारकवैयर्थ्यमिति, 'सलीलपाणिद्वयलोलनालमानर्तितातास्रदलं दधन्तीम्' इति च तादृशमेवोदाहृतम्। अत्र केचिदाहुः—'बाधतिधातुं संस्कारप्रच्यावनेन

बाधते इति बाधतिबाधस्तस्य संबोधनं बाधतिबाधेति । ते तव । वचनमिति शेषः' इति, तदसत् । नेयार्थत्वप्रसङ्गात् । अन्ये तु 'बाधतिर्बाधते यथा' इति पठन्ति । इदं तत्त्वम् । विद्यमानस्यार्थवत्त्वस्याविवक्षायां गविल्यमाहेत्यादाविव प्रातिपदिकसंज्ञा न प्रवर्तते ॥

## कविभिर्न प्रयुक्तं यदप्रयुक्तं तदुच्यते ॥ ७ ॥

यथा—

'कामचीकमथाः केऽमी त्वामजिह्लायकीयिषन् ।
स सस्ति किं वचन्तीमे कम्वः शम्वं घरिष्यति ॥ २ ॥'

अत्र 'अचीकमथाः', 'अजिह्लायकीयिषन्', 'सस्ति', 'वचन्ति', 'घरिष्यति', 'कम्वः', 'शम्वम्' इति शब्दानुशासनसिद्धान्यपि कविभिर्न प्रयुज्यन्ते ॥

**कविभिरिति**। अस्ति हि किंचित्पदं यत्राप्रयोज्यत्वेनैव हेयता। यद्येवं लोके प्रयुज्यमानस्य साधुतैव प्रसक्ता इत्यत उक्तम्—कविभिरिति । काव्ये यस्याप्रयोज्यत्वमेव दुष्टत्वबीजं तदित्यर्थः । तथाभूता च पदजातिरलंकारकारसमयादवसीयते । तथा चैकेन पुंदैवतशब्दोऽपरेण चीर्णशब्द उदाहृतः । एवमन्यदप्यप्रयुक्तमित्याशयवान्किंचिदुदाहरति—कामचीकमथा इति । उदाहरणत्वान्नैकोऽत्र श्लोको गवेष्यः । एकपदमात्रप्रयोगस्तु त्याज्यः समयविरोधाभावादित्याराध्याः । 'अचीकमथाः' इति कमेर्णिङन्तस्य लुङि चङि द्विर्वचनसन्वद्भावदीर्घत्वह्रस्वत्वणिलोपेषु रूपम् । कां नायिकां कामितवानसीत्यर्थः । अमी च के । त्वामात्मनो ह्लायकमेषितुमिष्टवन्तः । ह्लायकशब्दात् क्यच् । ततः सन् । ततो लङि अजिह्लायकीयिषन्निति रूपम् । स कश्चित् सस्ति स्वपिति । 'षस सस्ति स्वप्ने' इति धातो रूपम् । कम्वः शम्वमिति । कंशंशब्दौ जलवाचकौ ताभ्याम् । 'कंशंभ्यां बभयुस्तितुतयसः' इति मत्वर्थीयो बप्रत्ययः । तत्राद्येन जलधरो जलाशयं सेक्ष्यतीत्यर्थः । 'शम्वः कम्वन्' इति क्वचित्पठ्यते । तत्र कल्याणवान् कपालिनं सेक्ष्यतीत्यर्थो बोद्धव्यः । 'घृ सेचने' इत्यस्य धातोर्घरिष्यतीति रूपम् । स हि धातुः 'घृतघृणाघर्मेभ्यो नान्यत्र युज्यते' इति पूर्वाचार्याः । कविभिरित्यनेनासाधुशङ्का व्यावर्तितेत्याह—शब्दानुशासनसिद्धान्यपीति ॥

**पदं श्रुतेरसुखदं कष्टमित्यभिशब्दितम्।**

यथा—

'वर्वर्ष्टि जलदो यत्र यत्र दुर्धर्ष्टि चातकः।
पोफुल्लति नीपः कालोऽयं चर्कर्ति हृदयं मम॥ ३॥'

अत्र वर्वर्ष्ट्यादीनि क्रियापदानि श्रुत्यसुखदानि श्रूयन्ते॥

**पदमित्यादि**। दुर्वचवर्णारब्धपदं कष्टोच्चारणीयतया कष्टमुच्यते। श्रुतेरसुखदमिति दूषकताबीजोद्घाटनम्। कदर्थिता हि तेन श्रुतिशक्तिर्न तद्वाक्यप्रतीकपरामर्शक्षमेति। काव्यप्रकाशकृता पदैकदेशः कष्ट उक्तः, यथा—'तद्गच्छ सिद्ध्यै', 'अपेक्षसे प्रत्ययमङ्गलब्ध्यै' इत्यत्र 'ध्यै' 'ध्यै' इति, तत्राह—पदमिति। न हि समस्तवस्तुकष्टत्व एव पदं कष्टत्वमासादयति। कार्तार्थ्यमित्यादौ तदुदाहृते तदभावात्। एकदेशकष्टतया पदकष्टत्वमिति चात्रापि न दण्डवारितमिति भावः। वर्वर्ष्टि पुनः पुनर्वर्षति। वृषेर्यङ्लुगन्तस्य रूपम्। दर्धर्ष्टि पुनः पुनर्धृष्टो भवति। 'ञिधृषा प्रागल्भ्ये' इत्यस्य तत्रैव रूपम्। 'दर्दर्ष्टि' इति पाठे दृशेर्यङ्लुक्यमागमे च रूपम्। पुनः पश्यति। नीपः कदम्बः। पोफुल्लति। 'फुल्ल विकसने' इत्यस्य तत्रैव रूपम्। एवंभूतो वर्षासमयो मम विदूरकान्तस्य हृदयं चर्कर्ति पुनः पुनरतिशयेन वा छिनत्ति। 'कृती छेदने' इत्यस्य रूपम्। भूयसां कष्टपदानां समभिव्याहाराद्वाक्यदोष इति भ्रान्तिः स्यात्तत्राह—क्रियापदानीति। कथमेवं विभागोऽवसीयत इत्यत आह—श्रूयन्त इति। श्रोत्रप्रत्यक्षेणैव पदमात्रगामितया कष्टत्वमनुभूयत इत्यर्थः॥

**पादपूरणमात्रार्थमनर्थकमुदाहृतम्॥ ८॥**

यथा—

'बिभर्ति यश्च देहार्धे प्रियामिन्दुं हि मूर्धनि।
स वै देवः खलु त्वां तु पुनातु मदनान्तकः॥ ४॥'

अत्र 'च' 'हि' 'वै' 'खलु' 'तु' इत्येतानि पदानि पादानेव पूरयन्ति॥

**पादपूरणेति**। द्योतनीयमर्थमन्तरेण प्रयुक्तमव्ययमनर्थकमभिमतम्, अत एव प्रत्यैकार्थविपदमव्ययमिति प्रयोगबीजकथनार्थं नहि निर्मूलः प्रयोगः संभवति वृत्तिनिर्वहणसमर्थः। प्रायेणाव्ययपदानि क्षिप्त्वा तत्पूरयति। तदुक्तम्—'कुकवि-

प्रबन्ध इव श्लिष्टपदप्रचारः । अकटतुहिनचयो जनाकीर्णश्च' इति । बिभर्तीति । कः समुच्चयादिषु चतुर्षु प्रसिद्धप्रयोगो न च तेषामन्यतमोऽप्यत्र संभवति । नाप्युपावन्धार्थकः इति भाषणेनार्थान्तरमपि । एवं हिप्रभृतिष्ववसेयम् । एतेनैतदप्यपास्तम् । यदाहुरेके—पदादिविशेषानुपादानात्पदैकदेशोऽप्यनर्थकोऽभिमतः । तथा च—'आदावञ्जनपुञ्जलिप्तवपुषां श्वासानिलोल्लासितप्रोत्सर्पद्विरहानलेन च ततः संतापितानां दृशाम् । संप्रत्येव निषेकमश्रुपयसा देवस्य चेतोभुवो भल्लीनामिव पानकर्म कुरुते कामं कुरङ्गेक्षणा ॥' इत्यत्र दृशामिति बहुवचनमनर्थकं कुरङ्गेक्षणाया एकस्या एवोपादानात् । न चात्र व्यापारे दृक्शब्दो वर्तते, अञ्जनपुञ्जलेपादीनामनन्वयापत्तेः । तथा 'कुरुते' इत्यात्मनेपदमनर्थकमकर्त्रभिप्रायक्रियाफलादिति । अपि च । बहुत्वकर्त्रभिप्रायफलाभावे कथनं द्वयोरसाधुत्वमिति राजमार्ग एव भ्रमः । नहि स्वरूपत एव किंचिदसाधु साधु वा संभवति ॥

**रूढिच्युतं पदं यत्तु तदन्यार्थमिति श्रुतम् ।**

यथा—

'विभजन्ते न ये भूपमालभन्ते न ते श्रियम् ।
आवहन्ति न ते दुःखं प्रसरन्ति न ये प्रियाम् ॥ ५ ॥'

अत्र विभजतेर्वण्टने, आलभतेर्मारणे, आवहतेः करणे, प्रसरतेर्विसरणे रूढिः । न तु विशेषसेवायाम्, अभितो लाभे, समन्ताद्वहने, प्रकृष्टसरणे चेति ॥

रूढिच्युतमिति । शक्तिमनपेक्ष्य प्रयुक्तं रूढिच्युतम् । अत एव यदभिसंधाय प्रयुज्यते न कथंचन यस्यासावर्थ इति अन्वर्थमन्यार्थमिति नाम । एतदेव धातुविशेषोऽवान्तरमुपसर्गविशेषयोगतो योगवानित्यादिनान्यैरुक्तम् । विभजन्त इति । भजिः सेवार्थो विरुपसर्गस्तद्गतविशेषद्योतकस्ततश्च यथा वियोतत इति । अत्र विशिष्टधात्वनुरूपप्रयोगाभिधानं तथात्रापि भविष्यतीति भ्रमो बीजमत्र शब्दशक्तिस्वभावात् । क्वचिदुपसर्गोपसंदानेन धातुरर्थान्तर एव वर्तते । यदाहुः—'उपसर्गेण धात्वर्थो बलादन्यत्र नीयते । प्रहाराहारसंहारविहारपरिहारवत् ॥' इति । तदाह—अत्र विभजतेरित्यादि । नन्वर्थापेक्षित्वे पदार्थदूषणमेवंविधमिति वामनः । नैतत् । पदस्यैवान्वयव्यतिरेकवत्त्वात् । नह्यत्रान्वयस्यापराधः कश्चित् । किं तु

शब्द एव श्रुतिस्खलितादिभिरपराध्यति। यदि चार्थापेक्षितामात्रेणार्थदोषत्वं कथमसाधुप्रभृतीनामपि शब्ददूषणता। नहि तानि स्वरूपत एव तथापि त्वर्थविशेषो विशेष एवाश्वगोश्वादिवदिति। अर्थदोषास्तु यथा भवन्ति तथा वक्ष्यामः।

**यत्तु तुच्छाभिधेयं स्यादपुष्टार्थं तदुच्यते॥ ९॥**

यथा—

'शतार्धपञ्चाशभुजो द्वादशार्धार्धलोचनः।
विंशत्यर्धार्धमूर्धा वः पुनातु मदनान्तकः॥ ६॥'

अत्र दशबाहुः, त्रिलोचनः, पञ्चवक्त्र इति तुच्छमेवाभिधेयमतुच्छशब्दैरुक्तमिति अपुष्टार्थम्॥

**यत्तु तुच्छाभिधेयमिति।** स्तोकशब्दाभिलभ्येऽर्थे बहुतरशब्दबहुलमित्यर्थः। नहि तथा क्रियमाणमल्पीयसीमपि प्रकर्षतां पुष्यति येन त्याज्यं न स्यादित्यपुष्टपदेन सूचितम्। शतस्यार्धं पञ्चाशत्तेषां पञ्चतमोऽंशो दश। समासे पूरणप्रत्ययलोपः॥

**असंगतं पदं यत्तदसमर्थमिति स्मृतम्।**

यथा—

'जलं जलधरे क्षारमयं वर्षति वारिधिः।
इदं बृंहितमश्वानां ककुद्मानेष हेषते॥ ७॥'

अत्र जलधरो मेघः, वारिधिः समुद्रः, बृंहितं गजानाम्, हेषितमश्वानामिति लोकप्रसिद्धम्। तदिह समुद्र-मेघ-अश्व-वृषभविषयतया प्रयुज्यमानमसंगतार्थत्वादवाचकमित्यसमर्थम्॥

**असंगतमिति।** कथं पुनरिदमन्यार्थाद्भिद्यते। अत्राराध्याः। अन्यार्थे केवलं योगाद्रूढिर्बलवती। असमर्थे तु केवलयोगाद्योगरूढिः। तदपरे दूषयन्ति। तथापि रूढिच्युतिः साधारण्येव तदवान्तरं विशेषद्वयमन्यदिति। तन्न। भावानवबोधात्। किंचिद्धि पदमपवादकारणबलादवगम्यमानमपि योगमनपेक्ष्यैव क्वचिदर्थविशेषे वर्तते। यथा—गौरिति। नहि गमनस्य वाक्यार्थे प्रवेशः संभवति। किंचित्पुनर-

सति बाधहेतौ बुध्यमानस्य त्यागायोग्यद्योगविशिष्टमेवोपाधिमभिधत्ते । यथा—पङ्कजमिति । तत्राद्यप्रकारे रूढिरेव सर्वस्वमिति तत्परित्यागे रूढिच्युतम् । द्वितीये तु योगमात्रे प्रयुक्तमसंगतं शक्तिशून्ये प्रयुक्तं शक्त्यैकदेशे प्रयुक्तमिति भिन्नोऽर्थस्तदेतत्सर्वं व्याख्यानेन स्फुटयति—अत्र जलधरेति । जलधरादिपदानि जलधारणादिविशिष्टे मेघत्वादौ रूढाभिधानशक्तीनि । कथमेतदवसितमिति चेत्तत्राह—लोकप्रसिद्धिमिति । लोकाधीनावधारणत्वाच्छब्दार्थसंबन्धस्येति भावः । ततश्च यद्विशिष्टस्य योगस्य शक्तिविषयतया न तेन संकेतः । यत्र च समुद्रादौ प्रयोगो न तदुपाधिभिः समुद्रत्वाद्यैः संभूय शक्त्या संकेतः । क्षारादिपदोपसंदानेन च समुद्रादौ प्रयोग उन्नीयत इत्याह—तदिहेति । अत एव न तदवस्थस्य पदं वाचकमत एव चाक्षमत्वादसमर्थमिति संज्ञयैव व्यवह्रियत इति संक्षेपः ॥

**अप्रतीतं तदुद्दिष्टं प्रसिद्धं शास्त्र एव यत् ॥ १० ॥**

यथा—

'किं भाषितेन बहुना रूपस्कन्धस्य सन्ति मे न गुणाः ।
गुणनान्तरीयकं च प्रेमेति न तेऽस्त्युपालम्भः ॥ ८ ॥'

अत्र रूपस्कन्ध-नान्तरीयकशब्दयोः शास्त्रप्रसिद्धत्वादन्यत्राप्रतीयमानयोः प्रयोगादप्रतीतम् ॥

**अप्रतीतमिति** । शास्त्रमात्रप्रसिद्धं शास्त्रव्यवहारिभिः संकेतितमित्यर्थः । प्रतीताप्रतीतसमभिव्याहाररूपं हि वाक्यमशास्त्रज्ञविषयं प्रयुक्तमभिमतार्थप्रतीतिं न जनयितुमीष्टे । तत्राप्रतीतानामेवापराधोऽतः परिस्खलनखेददायितया भवति दुष्टत्वम् । अत एवाप्रयुक्ताद्बहिर्भावः । किं भाषितेनेति । रूपस्कन्धवाचोयुक्तिः सौगतसमयप्रसिद्धा । तेषां रूपं वेदना संज्ञा संस्कारो विज्ञानमिति पञ्चस्कन्धाः । तत्रापि रूपस्कन्धपदार्थ एकादशपदार्थकः । पञ्चेन्द्रियाणि पञ्च विषया विज्ञप्तिरेकादशीति प्रक्रिया । अन्तरमिति विनार्थे गहादौ पठ्यते । 'तत्र भवः' इति छे स्वार्थिके च कनि नञ्समासे पृषोदरादित्वान्नलोपाभाव इति भाष्यटीका । प्रेम्णो व्यापका गुणा न सन्ति मे न च व्यापकमन्तरेण व्याप्यं भवतीति व्यापकानुपलब्धिप्रयुक्तत्वात्प्रेमाभावस्य तथोपालम्भे वाच्यता नास्तीति भावः । शास्त्र एवेत्यवधारणेन यद्व्यावर्त्यते तदाह—अन्यत्रेति । लोक इत्यर्थः ।

**दूरे यस्यार्थसंवित्तिः क्लिष्टं नेष्टं हि तत्सताम् ।**

यथा—

'विजितात्मभवद्वेषिगुरुपादहतो जनः ।
हिमापहामित्रधरैर्व्याप्तं व्योमाभिनन्दति ॥ ९ ॥'

अत्र विना गरुत्मता जित इन्द्रस्तस्यात्मभवोऽर्जुनस्तस्य द्वेषी कर्णस्तस्य गुरुः सूर्यस्तत्पादैरभिहतो लोक आकाशमभिनन्दति । कीदृशम् । हिमापहो वह्निस्तस्यामित्रो जलं तद्धारयन्ति ये मेघास्तैर्व्याप्तमिति व्यवहितार्थप्रत्ययं क्लिष्टमेतत् ॥

**दूर इति ।** दूरं चिरं विलम्ब इत्यनर्थान्तरम् । क्लेशो द्विविधः—पदविषयः, वाक्यविषयश्च । आद्यः सामान्यशब्दस्य प्रकरणादिकमनपेक्ष्य क्वचिदभिप्रेतविषये प्रयोगः । तथा सति वाचकतायामपि झटिति प्रतिपत्तिर्न भवति । किं तु परस्परान्वयपर्यालोचनया चिरेणेति विरसत्वम् । यदाह—'नेष्टं हि तत्प्रसितानाम्' इति, अयमेवार्थो व्यवधानपदेन वामनादिभिरुक्तः । द्वितीयस्तु व्याकीर्णादिपदेनान्यथा वक्ष्यते—विजितेति । विशब्देन पक्षिसामान्यवचनेन तद्विशेषो गरुडात्मा विवक्षितः । तज्जितोऽपि विशेष एव । एवमन्यत्रापि । न चात्रापि किंचिज्झटिति प्रतीत्यनुगुणं नियमकारणमस्तीति युक्तमेव व्यवधानम् । हिमापहो वह्निरिति हन्तेर्डप्रत्यये रूपम् । तथा च चन्द्रगोमी डप्रकरणे 'हन्तेर्डः' इत्येव सूत्रितवान् । हिमापहो वह्निरिति क्विपि व्यभिचारं दृष्ट्वा 'ब्रह्मभ्रूण–' इत्यादि सूत्रितं चन्द्रगोमिना ॥

**गूढार्थमप्रसिद्धार्थे प्रयोगं ब्रुवते बुधाः ॥ ११ ॥**

यथा—

'सहस्रगोरिवानीकं भवतो दुःसहं परैः ।
हरेरिव तवाभान्ति नान्यतेजांसि तेजसि ॥ १० ॥'

सहस्रगुशब्देन सहस्राक्ष उक्तः । न च गोशब्दस्याक्ष्णि भूयसी प्रसिद्धिः । हरिशब्देन च सहस्रांशुः सोऽपि न तेन नाम्ना बहुभिरुच्यत इति गूढत्वम् ॥

**गूढार्थमिति** । यस्य पदस्य द्वावर्थौ सिद्धश्चासिद्धश्च तच्चेदप्रसिद्धे प्रयुक्तं तदा गूढार्थम् । अप्रसिद्धार्थप्रयोगमिति । अप्रसिद्धेऽर्थे प्रयोगो यस्येति गमकत्वाद्बहुव्रीहिः । तव तेजसि नान्यतेजांसि भान्तीति योजना । 'गौः शराक्षिपशुःस्वर्गपशुमेदवचःसु च' इत्याम्नातोऽपि तथा नाक्षिण प्रयुज्यते यथा पशुमेदादावित्याह—न च गोशब्दस्येति । 'हरिः कृष्णे च सिंहे च भेकार्कभुजगेषु च' इति स्वसंकेतितस्यापि हरिशब्दस्य न तथा रवौ प्रसिद्धिर्यथान्यत्रेत्याह—सोऽपि नेति ॥

**स्वसंकेतप्रक्लृप्तार्थं नेयार्थमिति कथ्यते ।**

यथा—

'मुखांशवन्तमास्थाय विमुक्तपशुपङ्क्तिना ।
पङ्क्त्यनेकजनामध्रुत्तुका जित उलूकजित् ॥ ११ ॥'

**अत्र पङ्क्तिशब्देन दशसंख्या, अनेकजनामेत्यनेन चक्रम्, तद्रु इत्यनेन रथस्ताभ्यां दशरथस्तस्य तुक् बालको लक्ष्मणस्तेन जित उलूकजिदिन्द्रजित् । किं कृत्वा । मुखांशवन्तमास्थाय हनुमन्तम् । किंभूतेन । विमुक्तपशुपङ्क्तिना विमुक्तेषु पशुपङ्क्तिना । अत्र पशुशब्देन गोशब्दो लक्ष्यते तेनेषवस्तदिदं स्वसंकेतकल्पितार्थं नेयार्थमुच्यते ॥**

**स्वसंकेतेति** । कल्पितार्थं नेयार्थमिति सूत्रयित्वा वामनेन व्याख्यातम् । अश्रौतस्यार्थस्य कल्पना कल्पनाकल्पितार्थम् । अस्यार्थः—यत्पदं नानार्थस्वपर्यायलक्षणया विवक्षितप्रतीतिपर्यन्तं नीयते तत्कल्पितार्थमिति केचित् । तदयुक्तम् । स्वपर्यायेत्यस्य व्यर्थत्वादव्यापकत्वाच्च । तस्मात्प्रयोजनं विना लक्षणया प्रयुक्तमित्येवार्थः । यदाह काव्यप्रकाशकारः—नेयार्थेयत्त्वशक्तित इति यस्मिन्निषिद्धं लाक्षणिकमिति । प्रयोजनं विना रूढं लक्षणापरिग्रहे न दोषः । तथा च द्विरेफरथाङ्गनामादिपदानां रेफद्वयानुगतभ्रमरादिशब्दलक्षणाद्वारेण षट्पदादौ वृत्तिर्वृद्धव्यवहारपरम्परानुपातिनीति तेषां प्रयोगोऽयुक्त एव । अत एव 'तुरङ्गकान्तामुखहव्यवाहज्वालेव भित्त्वा जलमुल्ललास' इत्यादिकमपि नेयार्थमिति काश्मीरकाः । तदेतत्स्वपदेन दर्शितवान् । मुखस्यांशो हनुरत्राभिमतः । पङ्क्तिरिति दशाक्षरं छन्दः दशसंख्या लक्ष्यते । अनेकजो द्विजश्चक्रवाकस्तस्य नाम चक्रं रथैकदेशस्तद्धारयतीति

धारयतेर्मूलविभुजादित्वात्कः । ताभ्यामिति । पङ्क्तिरनेकज इति नाम यस्येत्यर्थात् । तुक् तोकं तोक्ममित्यपत्यनामानि । उपलक्षणतयैकदेशं व्याचष्टे । अत्र पशुशब्देन गोशब्दो लक्ष्यत इति प्रकृतापेक्षया । तेनेषवः प्रत्याय्यन्त इति शेषः ॥

**न यत्पदं निश्चयकृत्संदिग्धमिति तद्विदुः ॥ १२ ॥**

यथा—

'नीललोहितमूर्तिर्यो दहत्यन्ते जगत्त्रयम् ।
स एष हि महादेवस्त्रिषु लोकेषु पूज्यते ॥ १२ ॥'

अत्र वह्निरर्कः शिवो वेति न निश्चीयते ॥

**न यत्पदमिति** । पदस्वरूपमेव संदिह्यमानमत्र । तथाहि—स एष हि महादेव इत्यत्र स किमेष हि महादेव इति च्छेदो विधीयतां महादेव इति वा साधकबाधकप्रमाणाभावे संदिह्यते । न च विशेषणनियमहेतुः । वह्न्यर्कावपि हि भगवतो नीललोहितमूर्तिभूतौ हिमापहौ च न निश्चयकृदिति दूषणताबीजप्रदर्शनम् । यदैको विवक्षितस्तदा दोषः । साधुचर इत्यत्रापि 'भूतपूर्वे चरट्' इति चरट्प्रत्यये किं पूर्वं साधुरथवा चरेष्टप्रत्यये साधुषु चरतीति पदमेव संदिह्यते तेन पदावयवः संदिग्ध इति केनचिदुक्तम्, तदप्यपास्तम् ॥

**विपरीतं विरुद्धार्थप्रकल्पनमिहोच्यते ।**

यथा—

'अनुत्तमानुभावस्य परैरपिहितौजसः ।
अकार्यसुहृदोऽस्माकमपूर्वास्तव कीर्तयः ॥ १३ ॥'

अत्र अनुत्तमा इत्यनेन यथोत्कृष्टस्तथापकृष्टोऽपि । अपिहितमित्यनेन यथा नाच्छादितं तथाच्छादितमिति । अकार्यसुहृदित्यनेन यथाकार्यमन्तरेण सुहृदेवमकार्ये यः सुहृत्सोऽप्युच्यते । अपूर्वाः कीर्तय इत्यनेन यथाद्भुताः कीर्तय एवमकीर्तयोऽप्युच्यन्ते ॥

**विपरीतमिति** । विपरीतं प्रकृतोपमर्दकमर्थकल्पनं यत्र । तथा हि—अनुत्तमेत्यादौ प्रकरणादिभिः स्तुतिपरत्वे व्यवस्थिते उत्तमत्वाभावादिना विरुद्धेनार्थेन तत्र

पर्यवसाययितुं न शक्यते । संशयं युगपद्विवक्षायामपि न विरोधः । इह तु स्तुतिनिन्दयोर्यौगपद्यमसंभावितमत एवैकस्य संभवे त्वपरस्य बाध एव । यथा—'चिरकालपरिप्राप्तलोचनानन्ददायिनः । कान्ता कान्तस्य सहसा विदधाति गलग्रहम् ॥' इति गलग्रहशब्दस्य कण्ठग्रहप्रतिद्वन्द्विन्यर्थे विवक्षिते पूर्वप्रक्रान्तानन्ददायित्वं बाध्यते । अत्रानुत्तम इति बहुव्रीहितत्पुरुषाभ्यामपिहितमिति 'वष्टि भागुरिः' इत्यादिना विकल्पेनाकारलोपविधानात् । अपूर्वा इति पक्षान्तरेऽकारपूर्वाः । नियामकसद्भावे तु गुण एव । यथा—'अपूर्वं यद्वस्तु प्रथयति विना कारणकलाम्' इति शब्दरूपान्तरमेव विरुद्धोपस्थायकमित्यन्वयव्यतिरेकाभ्यां शब्ददोषताव्यवस्थितिः ॥

## अप्रयोजकमित्याहुरविशेषविधायकम् ॥ १३ ॥

यथा—

'तमालश्यामलं क्षारमत्यच्छमतिफेनिलम् ।
फालेन लङ्घयामास हनूमानेष सागरम् ॥ १४ ॥'

अत्र तमालश्यामलमित्यादीनि सागरविशेषणानि तानि न हनूमतो लङ्घनेऽतिशयं सूचयन्ति ॥

**अप्रयोजकमित्याहुरिति** । तदेव हि कवीनामुपादेयं यद्वाक्यार्थे प्रकृष्टकाष्ठां पुष्णाति । अन्यथानङ्गाभिधानेऽवाच्यवचनमेव स्यात्सार्थकत्वादनन्वयत्वाच्च । न वृत्तपूरणमात्रप्रयोजनता नातिशयमिति । सागरलङ्घनद्वारा हनूमतः प्रकर्षो वाच्यः । न च तमालश्यामलत्वादिविशेषणानि कथंचित्प्रकर्षमर्पयन्ति यानि दूरत्वादीनि तथा न तेषामुपादानम् ॥

## तद्देश्यमिति निर्दिष्टं यदव्युत्पत्तिमत्पदम् ।

यथा—

'गल्लौ लावण्यतल्लौ ते लडहौ मडहौ भुजौ ।
नेत्रे वोसट्टकन्दोट्टमोट्टायितसखे सखि ॥ १५ ॥'

अत्र गल्लतल्लादयः शब्दा अव्युत्पत्तिमन्तो देश्या दृश्यन्ते ॥

**तद्देश्यमिति** । अव्युत्पत्तिमत् प्रकृतिप्रत्ययविभागशून्यं लोकमात्रप्रयुक्तं पद-

मनादेयं भवति । तद्द्विविधम्—अभागं भागवच्चेति । आद्यं देश्यम्, द्वितीयं ग्राम्यमिति विभागः । व्युत्पन्नानामन्यादृशी च्छाया देश्यानां च न तादृशीति देश्यवैद्यपदसमभिव्याहारे प्रायेण छायावैरूप्यं बन्धस्य भवतीति सहृदयहृदयसाक्षिकं दोषबीजम् । तल्लमल्पसरः, लडहं मनोहरम्, मडहं कृशम्, वोसट्टं विकसितम्, कन्दोट्टं नीलोत्पलम्, मोट्टायितं विलासः ॥

**अश्लीलामङ्गलघृणावदर्थं ग्राम्यमुच्यते ॥ १४ ॥**
**अत्राश्लीलमसभ्यार्थमसभ्यार्थान्तरं च यत् ।**
**असभ्यस्मृतिहेतुश्च त्रिविधं परिपठ्यते ॥ १५ ॥**

तेष्वसभ्यार्थं यथा—

'छत्राकारशिराः शिरालसरसस्थूलप्रकाण्डो महा-
न्मध्ये भानुसुताभ्रसिन्धुविपुलाभोगो वटः पातु वः ।
कायैक्ये विकटप्रसारितमहाजङ्घं महीसुतयो-
र्यः खण्डेन्दुकिरीटकैटभजितोः काटश्रियं कर्षति ॥ १६ ॥'

तदेतच्छत्राकारशिराः काट इत्यादेरसभ्यार्थत्वादसभ्यार्थम् ॥

**अश्लीलेति** । देश्यातिरिक्तं लोकमात्रप्रयुक्तं ग्राम्यम् । तत्त्रिधा—व्रीडाजुगुप्सातङ्कदायित्वात् । तत्राद्यमश्लीलं श्रीर्यस्यास्ति तच्छ्लीलम् । सिध्मादेराकृतिगणत्वाल्लच् । कपिलकादिपाठाल्लत्वम् । न श्लीलमश्लीलम् । व्रीडादायित्वेनाकान्तमित्यर्थः । द्वितीयं घृणावदर्थकम् । जुगुप्सादायि प्रत्याय्यमस्येति । तृतीयममङ्गलार्थमातङ्कदायिज्ञाप्यमस्येति कृत्वाश्लीलपर्यायोऽसभ्यशब्दः । सभायां साधुरित्यर्थे तेनापि शास्त्रे व्यवहार इति प्रदर्शनार्थमसत्यशब्देनाश्लीलमनूद्य व्याचष्टे । तत्रासभ्यमिति । अर्थस्यासभ्यत्वात्पदमप्यसभ्यम् । स चार्थः क्वचित्प्रकृतोऽप्रकृतोऽपि श्लेषोपस्थित एकदेशात्स्मृतिमात्रारूढो वा । तत्र यथाक्रममसभ्याद्यस्त्रयः । एवममङ्गलादयोऽपि । सूर्यसुता यमुना । अभ्रसिन्धुर्गङ्गा । तयोर्मध्ये 'पारे मध्ये षष्ठ्या वा' इत्यव्ययीभावः । अर्धं हरेरर्धं हरस्येति शरीरैक्ये काटशब्दस्यासभ्यार्थत्वे तद्विशेषणानामप्यसभ्यत्वमिति तान्यादाय व्याचष्टे—अत्र छत्राकारेति ॥

असभ्यार्थान्तरं यथा—

'विद्यामभ्यसतो रात्रावेति या भवतः प्रिया ।
वनितागुह्यकेशानां कथं ते पेलबन्धनम् ॥ १७ ॥'

तदेतया भवतः प्रिया गुह्यकेशानां पेलबन्धनशब्दानामसभ्यार्थान्तरत्वादसभ्यार्थान्तरम् ॥

विद्यामिति । या रात्रौ विद्यामभ्यसतो भवतः सावर्तयतस्तव प्रिया समायाति सा यक्षिणी । अतः कथं ते धनं पेलवं कोमलम् । स्वल्पमिति यावत् । किं तु यक्षिणीप्रसादाद्बहु धनं तवोचितमित्यर्थः । प्रकृतपदानि त्वसभ्यार्थान्तराणि तान्युद्धृत्य व्याचष्टे—तदेतया भवतः प्रियेति । असभ्यार्थप्रकाशनमेव षष्ठ्या आक्रोश इत्यर्थः । या भवतः प्रियेति एकं पदं याभो मैथुनं तद्वतः प्रियेत्यर्थात् । योनिर्वनितायाः गुह्यस्तस्य केशाः । पेलशब्दो मुष्कयोः प्रसिद्धः । तत्र बन्धनमिति ॥

असभ्यस्मृतिहेतुर्यथा—

'उत्कम्पयसि मां चूत पिकवाकाटवेन किम् ।
कृतः कृकाटिकायां ते पादः प्राणेन यास्यता ॥ १८ ॥'

तदिदं काटवकृकाटिकापादयोरसभ्यस्मृतिहेतुत्वादसभ्यस्मृतिहेतुता ॥

उत्कम्पयसीति । हे चूतवृक्ष, कोकिलस्य वाचा कटुत्वेन दुःखदायित्वात् किं मां भापयसि । ननु तव कृकाटिकायां ग्रीवायां पादं दत्त्वा चलिता मम प्राणास्तेन मया जितम् । व्यर्थस्तवायं परिश्रम इति वाक्यार्थो विवक्षितः । काटवशब्दे काट एकदेशः कृकाटिकाशब्दे काटिकेति लोपः । काटः काटिका ॥

**लोकेषु यदशस्तार्थमशस्तार्थान्तरं च यत् ।**
**अशस्तस्मृतिहेतुश्चामङ्गलार्थं त्रिधैव तत् ॥ १६ ॥**

तेष्वशस्तार्थं यथा—

'खेटके भक्तसूपस्य वलभ्याः पतनस्य च ।
अतृप्तोऽहं मरिष्यामि हेहले भाषितस्य च ॥ १९ ॥'

अत्र मरिष्यामीतिपदमशस्तार्थम् ॥

**खेटक इति** । अतृप्तः सुखस्येयत्तापरिच्छेदाभावात् । खेटके ग्रामे यद्भक्तं सूपश्चोत्पद्यते तस्य मत्तनस्य नगरस्य या वलभी तस्यां सुहितार्थयोगे षष्ठीनिषेधाल्लिङ्गादनुमीयते तृप्त्यर्थयोगे षष्ठी भवति । अन्ये तु व्याचक्षते—भक्तसूपपदनामा दक्षिणापथे विषयस्तत्सद्मनि खेटके वलभीनाम कस्यचिद्विरूपाक्षाधिष्ठानस्य तत्रैव पत्तनस्य हेहले इति स्त्रीणामव्याजमन्योन्यप्रेमातिशयगर्भस्य भावितस्येति ॥

अशस्तार्थान्तरं यथा—

'प्रवासयति या कान्तं वसन्ते गृहसंस्थितम् ।
विनाशपथदानेन पिशाची सा न चाङ्गना ॥ २० ॥'

अत्र प्रवासयति-संस्थितं-विनाशपथदानेन-पिशाचीपदानामशस्तार्थान्तरत्वम् ॥

**प्रवासयतीति** । शपथदानेन विना प्रवासयति अन्यत्र प्रहिणोति गृहे सम्यक् स्थितं प्रियं साङ्गना न, किं तु पिशाचीवदनुचितकारिणीत्यर्थोऽभिमतः । अन्यत्र प्रवासनमुच्चाटनं संस्थानं विनाशः विनाशस्य पन्थास्तस्य दानम् । पिशितमश्नातीति पिशाची । पृषोदरादित्वात् । तदेतद्व्याचष्टे—अत्र प्रवासयतीति ।

अशस्तस्मृतिहेतुर्यथा—

'मारीचोऽयं मुनिर्यस्य कृत्या कालान्तकालये ।
पत्न्यां संक्रन्दनादीनां सुतानामाक्षयेऽभवन् ॥ २१ ॥'

अत्र मारीचकृत्या कालान्तक-संक्रन्दन-पदानामशस्तार्थस्मृतिहेतुत्वम् ॥

**मारीचोऽयमिति** । मरीचेरपत्यं मारीचः काश्यपः संक्रन्दनादीनिन्द्रादीन् द्वादश पुत्रानादित्यानुत्पादितवान् । तच्च कालान्तकस्य भगवतो महादेवस्यालये याः कृत्याः क्रिया भगवदाराधनरूपास्तासां फलमित्यर्थः । मारीचशब्दे मारकदेशः कृत्या इति सुबन्तपदे कृत्येत्येकदेशः, कालान्तकालय इत्यत्रान्तकेति, संक्रन्दने शब्दकन्दनेति ॥

पदमर्थे घृणावन्तं यदाहार्थान्तरं च यत् ।
घृणावत्स्मृतिहेतुर्यत्तद्घृणावदिह त्रिधा ॥ १७ ॥

तेषु घृणावदर्थं यथा—

'पर्दते हदते स्तन्यं वमत्येष स्तनंधयः ।
मुहुरुत्कौति निष्ठीवत्यात्तगर्भा पुनर्वधूः ॥ २२ ॥'

पर्दते हदते वमति निष्ठीवतीति शब्दानां घृणावदर्थत्वम् ॥

**पर्दत इति** । उत्कौति उत्कारं करोति । निष्ठीवति थूत्करोति । आत्तगर्भा पुनर्वधूरिति बालस्य स्तन्यवमनादिनिदानसूचनम् । अत एव 'न गर्भिण्याः पिबेत्क्षीरं पारगर्भिककृत्तु तत्' इति वैद्यकम् ॥

घृणावदर्थान्तरं यथा—

'बाष्पक्लिन्नाविमौ गण्डौ विपूयापाण्डरौ तव ।
प्रियोऽग्रे विष्ठितः पुत्रि स्मितवर्चोभिरर्चति ॥ २३ ॥'

अत्र क्लिन्नगण्डविपूयाविष्ठितवर्चःपदानां घृणावदर्थान्तरम् ॥

**बाष्पेति** । विपूयो मुञ्जः । विशेषेण स्थितो विष्ठितः स्मितवर्चो हास्यतेजः । तव कपोलौ दृष्ट्वा पुरःस्थितस्तव प्रिय ईषद्धास्यं कुर्वन् कपोलयोर्हास्यज्योत्स्नया पूजां करोतीत्यर्थः । अन्यत्र बाष्पेणोष्मणा क्लिन्नो मृदूभूतः गण्डो व्रणः । विशिष्टः पूयो विपूयस्तेन पाण्डरः । विष्ठितो विष्ठा संजातास्य । वर्चः पुरीषम् । यत्स्मरणाद्बाष्पादीनां घृणावति वृत्तिस्तदेव पृथक्कृत्याह—अत्र क्लिन्नेति ॥

घृणावत्स्मृतिहेतुर्यथा—

'प्रत्यार्द्रयन्तो रूढानि मदनेषुव्रणानि नः ।
हृदयक्लेदयन्त्येते पुरीषण्डमहद्रुमाः ॥ २४ ॥'

अत्र रूढव्रणक्लेदपुरीषण्डपदानां घृणावत्स्मृतिहेतुत्वम् ॥

**प्रत्यार्द्रयन्त इति** । अन्योन्यलग्नो वृक्षसमूहः षण्डः । रूढानीत्यनेन मदनेषुव्रणानां विशेषितत्वात् । मदनेषुभागमपहाय व्रणभागमात्रेण रूढव्रणस्मृतिर्भवन्तीपदादेवेति विवक्षितवान् । पुरीषण्डशब्दे पुरीषेत्येकदेशः ॥

तदेवं पददोषांल्लक्षयित्वा क्रमप्राप्तवाक्यदोषा लक्षणीया इति तान्विभजते—

**शब्दहीनं क्रमभ्रष्टं विसंधि पुनरुक्तिमत् ।
व्याकीर्णं वाक्यसंकीर्णमपदं वाक्यगर्भितम् ॥ १८ ॥**

**द्वे भिन्नलिङ्गवचने द्वे च न्यूनाधिकोपमे ।**
**भग्नच्छन्दोयती च द्वे अशरीरमरीतिमत् ॥ १९ ॥**
**वाक्यस्यैते महादोषाः षोडशैव प्रकीर्तिताः ।**

**शब्दहीनमिति** । उक्तेनैव प्रयोजनेनासमासद्वन्द्वगर्भबहुव्रीहिसमासौ । एवं गुणादिविभागवाक्येष्वपि प्रयोजनमवसेयम् । भिन्नलिङ्गवचने इत्यादौ तु द्वन्द्वलक्षणस्य समासस्य पूर्ववर्तिनां भिन्नादिपदानां प्रत्येकमन्वयः । यमनं यतिरिति भग्नच्छन्दो भग्नयतिरिति केचित् । तथा च व्यतिकीर्णोऽर्थः स्यात् । अरीतिमदिति । रीतिरस्यास्तीति नित्ययोगे मतुप् । नित्ययोगप्रतिपादनं हि दूषकताबीजोद्घाटनायोपपद्यते । अत एव बहुव्रीहौ लाघवं तत्र नादरः ॥

**अथैषां लक्ष्म संक्षेपात्सनिदर्शनमुच्यते ॥ २० ॥**

असाधुवदसाधुमत्त्वस्य प्राथम्याल्लक्षणमाह—

**उच्यते शब्दहीनं तद्वाक्यं यदपशब्दवत् ।**

यथा—

'नीरन्ध्रं गमितवति क्षयं पृषत्कै-
    र्भूतानामधिपतिना शिलावितानें ।
गाण्डीवी कनकशिलानिभं भुजाभ्या-
    माजघ्ने विषमविलोचनस्य वक्षः ॥ २५ ॥'

अत्र गमितवतीति क्तवतोः कर्मणि, आजघ्न इति आत्मनेपदस्यास्वाङ्गकर्मणि प्रयोगादपशब्दौ । तौ च शिलावितानत्र्यक्षवक्षःसंबन्धाद्वाक्यदोषौ जायमानौ असाधुनाम्नः पददोषाद्भिद्येते ॥

**उच्यत इति** । अपशब्दत्वं पद एव नियतं वाक्ये संस्कारप्रसक्तेरभावादपशब्दत्वं न वाक्यदूषणम् । तथा हि—'कर्तरि कृत्' इति नियमात्कर्मणि क्तवतुरसाधुः । 'अकर्मकाच्च' इत्यनुवृत्तौ 'आङो यमहनः' इत्यात्मनेपदमकर्मक एव प्राप्तं 'स्वाङ्गकर्मकाच्च' इति वाक्यैकवाक्यतापर्यालोचनयास्वाङ्गकर्मण्यसाधुः कथं वाक्यदूषणता । नहि वाक्यान्तःपातितामात्रेण सा युज्यतेऽतिप्रसङ्गादित्याशङ्क्योक्तम् । तौ

चेति । नहि यथा बाधृधातुः परस्मैपदान्त इत्येवासाधुत्वम्, तथात्र पदान्तरसंनिधानापेक्षत्वेऽध्यवसीयते । भूतानामधिपतिना शिलावितान इति यावन्नानुसंधीयते तावद्भ्रमित्वतीति किं कर्तरि कर्मणि वेति संदेहानिवृत्तेः । तथा गाण्डीवी विषमविलोचनस्य वक्ष इत्येतावत्प्रतीत्य कथमाजघ्न इत्यस्याङ्ग कर्मणि आत्मनेपदमध्यवसानयोग्यम् । इयमेव हि वाक्यदोषता यदनेकपदनिरूप्यता नाम बाधतीत्यत्रापि किं बाधशब्दात् क्विबन्तात्तिप्, उत बाधृधातुरिति संदेह इति कुदेश्यम् । स्कन्धादिपदसंनिधानेऽपि तस्यानिवृत्तेः । 'तेन त्वामनुनाथते कुचयुगम्—' इत्यादिकमत्रत्यमुदाहरणं प्रमादात् काव्यप्रकाशकृता पददोषेषु लिखितम् । यथा च । 'उदपूतितः को न हीयते' इति रुद्रटेन । तत्र हि 'अपादाने चाहीयरुहोः' इति तसिप्रत्ययनिषेधः । स च पदान्तरसंनिधानेनैवेति स्वयमालोचनीयम् । शिलावितानत्र्यक्षवक्ष इत्युपलक्षणम् । अधिपतिगाण्डीविशब्दावपि बोद्धव्याविति ॥

**क्रमभ्रष्टं भवेदार्थः शाब्दो वा यत्र तत्क्रमः ॥ २१ ॥**

यथा—

'तुरङ्गमथ मातङ्गं प्रयच्छास्मै मदालसम् ।
कान्तिप्रतापौ भवतः सूर्याचन्द्रमसोः समौ ॥ २६ ॥'

अत्र मातङ्गमथ तुरङ्गमिति वक्तव्ये तुरङ्गमथ मातङ्गमित्यर्थः । कान्तिप्रतापौ चोक्त्वा सूर्याचन्द्रमसोः समाविति शाब्दः क्रमभ्रंशो लक्ष्यते ॥

**क्रमभ्रष्टमिति** । अर्थादागतः क्रम आर्थः । शब्दादागतः शाब्दः । अर्थक्रमभ्रंशः कथं शब्ददूषणमत आह—इति वक्तव्य इति । मातङ्गो दीयतामथ तद्दानसामर्थ्यं नास्ति तदा तुरङ्ग इति वक्तव्ये रचनावैपरीत्यमात्रमत्रापराध्यति । नार्थ इति युक्ता शब्ददोषता ॥

**विसंहितो विरूपो वा यस्य संधिर्विसंधि तत् ।**

यथा—

'मेघानिलेन अमुना एतस्मिन्नद्रिकानने ।
मञ्जर्युद्गमगर्भासौ तर्वाल्युर्वी विधूयते ॥ २७ ॥'

अत्र मेघानिलेन अमुना एतस्मिन्नसंहितया विवक्षामीत्यभिसंधानं विसंधिः । मञ्जर्युद्गमगर्भासौ इत्यादौ तु विरूपसंधानं विसंधिः ॥

**विसंहित इति** । विशब्दो विगमं वैपरीत्यं च द्योतयति । तेनार्थद्वयं संपद्यते । 'परः संनिकर्षः संहिता' । तया तत्कार्यं लक्ष्यते । संधानं संधिः । अर्धमात्राकालव्यवधानं । तथा च—संहिताकार्यशून्यं संधानं यत्रेत्यर्थः । 'संहितैकपदे नित्या' इति समयादन्यत्र विकल्पः । ततो नासंधावन्तर्भावः । वैरूप्यं द्विविधम् । दुर्वचकत्वम्, अश्लीलत्वं च । तत्राद्यमुपलक्षणतयोदाहृतम् । द्वितीयं यथा—'उड्डीय गगने दूरं चलन् डामरचेष्टितः । अयमुत्पतते पत्री ततोऽत्रैव रुचिं कुरु ॥' ननु यदि संधिकार्यं वैकल्पिकं कथमत्र दोष इत्यत आह—न संहितामिति । यदि संहिताप्रतिषेधः स्यात्तदा सकृद्विसंधिकरणेन तथावैरूप्यं भवतीति कवेरपराधो न संभाव्यते, यदि तु प्रतिषेधो नास्ति असकृद्वोपादानं तदा व्यक्तवैरूप्यप्रतिभासात्कथं न दोष इत्यर्थः । न विवक्षामित्युपलक्षणम् । विवक्षायामप्यसकृत्प्रयोगो विरस एव । यथा—'तत उदित उदारहारहारी' इति । विशेषं वैशेषिके वक्ष्यामः ॥

## पदं पदार्थश्चाभिन्नौ यत्र तत्पुनरुक्तिमत् ॥ २२ ॥

यथा—

'उत्कानुन्मनयन्त्येते गम्भीराः स्तनयित्नवः ।
अम्भोधरास्तडित्वन्तो गम्भीराः स्तनयित्नवः ॥ २८ ॥

अत्र उत्कानुन्मनयन्तीत्यर्थपुनरुक्तम् । गम्भीराः स्तनयित्नव इति शब्दपुनरुक्तम् ॥

**पदं पदार्थश्चाभिन्नाविति** । पदमभिन्नमभिन्नतात्पर्याभिधेयमिति विशेषः । तेन तात्पर्यभेदे लाटानुप्रासोऽभिधेयभेदे यमकं च न दोषः । पदार्थोऽभिन्नपर्यायशब्दोपात्त इति शेषः । तेन पूर्वस्माद्विशेषः । स्वाभिधेयतात्पर्यकपदावृत्तिः पर्यायोपादानं च द्वयमपि शब्दपुनरुक्तमिष्यते । तथा च पारमर्षं सूत्रम्—'शब्दयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात्' इति । युक्तं चैतत् । एकस्याभिधेयस्य द्विरभिधानं दोषः । तच्चाभिधानं तेनैव पदेन पर्यायेण वा संभवतीति शब्दमर्यादयैव तस्य व्यवस्था पुनरुक्तिरत्रैव पदे भवति, तत्कोऽत्र मत्वर्थ इत्यत उक्तम्—यत्र तदिति । *यत्र समुदायेऽवयवः पुनरुक्तरूपः स मतुबर्थः । अत एव नानापदनिरूपणीयतया*

वाक्यदूषणमिति स्फुटोऽर्थः । विकल्पितं चेदं लक्षणमेकस्यैव दूषणधुरारोहणक्षमत्वात् । संक्षेपार्थं त्वेकमुदाहरणम् । अर्थमादायैव पुनरभिधानं पुनरुक्तमिति विभावयितुं लक्षणक्रमवैपरीत्येन प्रथममर्थपुनरुक्तमुदाहृतमित्याशयवान् । व्याख्यानेऽपि तमेव क्रममाद्रियमाण आह—अत्रोत्कानिति । उत्क उन्मनाः । उन्मनयन्तीति उन्मनसं कुर्वन्तीति णिचि इष्ठवद्भावे टिलोपे च रूपम् । अम्भोधरा इति विशेष्यपदम् । शेषाणि विशेषणानि—गम्भीरा मांसलाः, स्तनयित्नवः शब्दायमानाः, तडित्वन्तः प्रकृष्टतडिद्युक्ताः ॥

**व्याकीर्णं तन्मिथो यस्मिन्विभक्तीनामसंगतिः ।**

यथा—

'दण्डे चुम्बति पद्मिन्या हंसः कर्कशकण्टके ।
मुखं वल्गुरवं कुर्वंस्तुण्डेनाङ्गानि घट्टयन् ॥ २९ ॥'

अत्र कर्कशकण्टके दण्डेऽङ्गानि घट्टयन् हंसः पद्मिन्या मुखं चुम्बतीति वक्तव्ये यथानिर्दिष्टरूपे विघट्टितविभक्तिकयुक्तित्वाद्व्याकीर्णम् ॥

**व्याकीर्णं तदिति** । पदानामक्लेशेऽप्यर्थप्रतीतिहेतुभूताकाङ्क्षावद्विभक्तिव्यवधानादनाकाङ्क्षितविभक्तिसंनिधानाच्च नाहत्यपदानि विशिष्टार्थज्ञानजननसमर्थानि भवन्ति । विलक्षणलक्षणक्लेशपदानि भ्रमकराणीति वदतामाराध्यानामयमेवाभिप्रायो बोद्धव्यः । विभक्तिव्यवधानमात्रकृतस्तु क्लेशः प्रायेण पदैकवाक्यतायामुत्पद्यते । दण्ड इति । आधारविभक्तिराधेयविभक्तिमपेक्षते, न तु चुम्बतीति क्रियाविभक्तिम् । सापि कारकविभक्तिमाकाङ्क्षति । पद्मिन्या इति संबन्धविभक्तिकमेव तत्र बोद्धव्यम् । क्लेशेन योऽत्रावगम्यते तमभिमतमर्थमावेदयति—अत्र कर्कशेति । अत एव नापार्थकत्वेन संकरः समुदायार्थस्य प्रतीयमानत्वात् । अस्ति कश्चिदुच्चारणयोर्विशेषो येन वाक्यार्थप्रतीतिः क्वचिदाहत्य भवति । क्वचित्तु नेति स एव विशेषः । संनिधानं व्यवधानमिति व्याख्यायते । कार्यदर्शनादर्शनाभ्यां चोन्नीयत इत्याशयवानाह—यथोक्तरूपेणेति(?) ॥

**वाक्यान्तरपदैर्मिश्रं संकीर्णमिति तद्विदुः ॥ २३ ॥**

१. अयं प्रतीको मूले तु नोपलभ्यते, तेन कदाचिदयं प्रतीकपाठः प्रक्षिप्तो भवेत्.

यथा—

'काअं खाअइ खुहिओ कूरं फेल्लेइ णिब्भरं रुट्ठो ।
सुणअं गेण्हइ कण्ठे हक्केइअ णत्तिअं ठेरो ॥ ३० ॥'

[काकं खादति क्षुधितः कूरं फेल्लति निर्भरं रुष्टः ।
श्वानं गृह्णाति कण्ठे हक्कायति नप्तारं स्थविरः ॥]

अत्र काकं क्षिपति, कूरं खादति, कण्ठे नप्तारं गृह्णाति, श्वानं भीषयते, इत्यादौ वक्तव्ये[1] यथोक्तपदविन्यासः संकीर्यते ॥

**वाक्यान्तरपदैरिति** । वाक्यान्तरसंवलितानि पदानि वाक्यान्तरमनुप्रविश्य तथा प्रतीतिं विघ्नन्ति, यथा समुदाय एव दूषितो भवति ॥ काकमिति । कूरं भक्तं क्षुधितः खादति, काकं च निर्भरं रुष्टः सन् क्षिपति, श्वानं च निवारयति, नप्तारं च कण्ठे गृह्णाति स्थविरजातिः ॥ आकाङ्क्षाक्रमेण किंचित्पदं कस्यचिद्वाक्यस्य संबद्धमिति ज्ञायत एव । तदाह—अत्र काकं क्षिपतीति । शब्ददोषत्वं प्रकाशयति—इति वक्तव्य इति । यथोक्तपदविन्यास इत्यनेन संकीर्यत इत्यस्यार्थो विवक्षितः । एवंप्रकारः संकर इत्यर्थः । द्विजातीयसंवलने लोके संकरव्यवहारः ॥

**विभिन्नप्रकृतिस्थादि पदयुक्त्यपदं विदुः ।**

यथा—

'आउज्झिअ[2] पिट्टिअए जह कुक्कुलि णाम मज्झ भत्ताले ।
पेक्खन्तह लाउलकम्मिआह हा कस्स कन्देमि ॥ ३१ ॥'

[आवर्ज्य पीड्यते यथा कुक्कुरो नाम मम भर्ता ।
प्रेक्षंत राजकुलकर्मकरा अहह कस्य क्रन्दामि ॥]

तदेतत्प्रकृतिस्थकोमलकठोराणां नागरोपनागराणां ग्राम्याणां वा पदानामयुक्तेरपदम् ॥

**विभिन्नेति** । षोढा पदं भवति—प्रकृतिस्थम्, कोमलम्, कठोरम्, ग्राम्यम्, नागरम्, उपनागरं च । तत्रानेकदीर्घस्वरकृतगौरवमेकसंयोगकृतगौरवं पदं प्रकृ-

१. टीकादर्शनेन 'इति वक्तव्ये' इति भवेत्. २. 'ज्झि' इति सटीकपुस्तकपाठः.

तिस्थम् । यथा—नीहारतारानीकाशसारसीत्यादि, हस्तपल्लवकङ्कणकर्पूरादि च। यथा च—पाडिव आमाण सिणिवं आलग्गोलेत्यादि, लज्जतुज्झउत्ताविलविहत्थति-अच्छेत्यादि च। एकस्वरकृतगौरवं गुरुशून्यं वा कोमलम्। करेणुतारकसरोजनिकरादि, मधुरमसृणसरससरलेत्यादि च। यथा—नीहारबाण इवाणवेणीत्यादि, परकुअलडहतलिणेत्यादि च। सानुस्वारविसर्गदीर्घस्वरकृतगौरवं संयोगबहुलं वाक्कठोरम्। यथा शुद्धं पयः पाचयांबभूव ता पिब, आहिषातामित्यत्र। अच्छाच्छतत्रस्थव्यूढोरस्कप्रच्छन्नेत्यादि च। यथा च—आ ई इ ए इत्यादि। उप्पिच्छउप्पुपुअएक्कमेक्कमित्यादि च। प्रसिद्धिमादाय ग्राम्यादित्रयं भवति। प्रसिद्धिस्त्रिधा। सार्वलौकिकी, पण्डितजनगामिनी, तदुपजीविविश्चितुरलौकिकगामिनी चेति। तत्र सर्वलोकप्रसिद्धं ग्राम्यम्। देशीपदानि सर्वाण्येव संस्कृतेषु हस्तविवाहभगिनीहारकङ्कणादिकम्, तुंभ अंभ हलिद्दासाहज्जादिकं च। एतदपभ्रंशसमानप्रसिद्धिकमतिप्रसिद्धं चेति गीयते। *ग्राम्यवैपरीत्येन नातिप्रसिद्धं नागरं नगरेणोपमितमिति कृत्वातिप्र*सिद्धाभावेनोपमा। इदमेव नात्यप्रसिद्धमुपनागरमित्युच्यते। यथा—आयाशकिंशारुखुरलीलातङ्केत्यादि, सुदेवअच्छेवगुप्पन्ती विवलाआ इत्यादि च। शृङ्गारप्रकाशे तु भाषाणामपि भेदो पदमित्युक्तम्। इह तु शब्दजात्यौचित्याविवेचनेन गतमिति ग्रन्थकर्तुराशयः। तदेवं स्थिते प्रतिपदं कवीनां कोऽपि क्रमो निर्वाह्यो न त्वकस्मादेवाल्हनविशीर्णभावो विधेयः। तदिदमाह—विभिन्नेत्यादि। युक्तिरुचिता योजना सा प्रकृतिस्थादीनां विभिन्नान्यथानीतात्युक्तिरिति यावत्। एतद्वक्ष्यति—अयुक्तेरिति॥ आउज्झिअ इति। आवर्ज्य केशेषु नमयित्वा। 'आउज्झिए' इति पाठे निर्भर्त्स्य। पिट्टिअए ताड्यते। जह कुक्कुलि यथा कुर्कुरी नामशब्दः प्राकाश्ये प्रकाशमेव ताडितमित्यर्थः। मज्झ भत्तालें मम भर्ता। पेक्खन्तह लाउलकण्णिआह। अनादरे षष्ठी। राजकुलनियुक्तान् प्रेक्षमाणाननादत्येत्यर्थः। हाशब्दः खेदे। कस्य कन्दामि। कस्य फूत्करोमीत्यर्थः। अत्र प्रथमे पादे आउज्झिए इत्युपनागरं प्रकृतिस्थं च। 'आउज्झी' इति पाठे ग्राम्यं प्रकृतिस्थं च। भत्ताल इत्यपि तथा। तृतीयपादे पेक्खन्तहेति कठोरमुपनागरं च। राउलकण्णिआहेति ग्राम्यं प्रकृतिस्थं च। हेति ग्राम्यं कोमलं च। कस्सेति प्रकृतिस्थमुपनागरं च। कन्देमीति ग्राम्यं प्रकृतिस्थं च। तदिहैकरूप एव कर्मकरवधूलक्षणे ग्राम्ये वक्तरि एकरूप एव वाक्यार्थे सर्वदोषतिरोधायकरसदीप्त्यभावे च यथा भाषाणां व्यतिकरो दूषणं तथा *ग्राम्यादीनामिति* सहृदयमात्रवेद्यश्चायं पन्था इत्यवहितैर्भवितव्यम्। एतेषां च

स्वरूपं स्वयमेव गुणीभावप्रस्तावे लेशतः प्रकाशयिष्यति तेनेह संक्षिप्तवान् । नैवंविधः कदापि व्यतिकरो महाकविगिराभाजानिकः प्रवर्तते । तथा हि—'त्यजतो मङ्गलक्षौमे दधानस्य च वल्कले । ददृशुर्विस्मितास्तस्य मुखरागं समं जनाः ॥' अत्र प्रथमादिषु पादेषु क्षौमचीरविस्मितरागपदानि उपनागराणि शेषाणि ग्राम्याणि । प्रतिपादं च प्रकृतिस्थकोमलाभ्यामेव निर्वाहः । एवमन्यत्रापि प्रत्येकं द्वन्द्वसमुदायैः प्रतिपादमुपक्रमोपसंहारनिर्वाहक्रमः स्वयमुपलक्षणीय इत्यास्तां तावत् ॥

**वाक्यान्तरसगर्भं यत्तदाहुर्वाक्यगर्भितम् ॥ २४ ॥**

यथा—

'योग्यो यस्ते पुत्रः सोऽयं दशवदन लक्ष्मणेन मया ।
रक्षैनं यदि शक्तिर्मृत्युवशं नीयते विवशः ॥ ३२ ॥'

अत्र योग्यो यस्ते पुत्रो लक्ष्मणेन मया मृत्युवशं नीयत इति वाक्यस्य रक्षैनं यदि शक्तिरिति वाक्यान्तरेण सगर्भत्वाद्गर्भितम् ॥

**वाक्यान्तरेति** । मध्यप्रविष्टं वाक्यं पूर्वोत्तरभागाभ्यामेकीभूतस्य गर्भायमाणमेकस्वरसप्रसूतां प्रतीतिं विघ्नयदात्मना सहैव समुदायविरसकक्षामारोहयति । वाक्यान्तरवाक्यस्य विशेषो विवक्षितः प्रतीतिव्यवधायक इति यावत् ॥ योग्य इति । मयेति । कारकविभक्तेः क्रियाकाङ्क्षणशीलायास्तामसंगमय्य मध्ये रक्षैनं शक्तिरित्येतावता गर्भस्थानीयेन विरसीकरणमित्याह—अत्र योग्यो य इति । एवं वाक्यरूपताभङ्गहेतून्दोषानभिधाय तत्रैव काव्यभावप्रत्यूहहेतवोऽभिधातव्यास्ते च गुणभङ्गद्वारकाः, अलंकारभङ्गद्वारकाः, छन्दोभङ्गद्वारकाः, यतिभङ्गद्वारकाश्चेति चतुर्धा विप्रथन्ते । ततश्च यद्यपि प्रथमं गुणभङ्गद्वारका वक्तुमुचितास्तथापि तेषां बहुत्वाद्गुरुत्वाच्च सूचीकटाहन्यायेन पश्चात्करणमलंकारभेदादिषु च मध्ये प्रतियोगिद्वारालंकारभङ्गस्य प्राधान्यमिति तद्द्वारा दोषांल्लक्षयति ॥

**यत्रोपमा भिन्नलिङ्गा भिन्नलिङ्गं तदुच्यते ।**
**भवेत्तद्भिन्नवचनं यद्भिन्नवचनोपमम् ॥ २५ ॥**

यथा—

'अविगाह्योऽसि नारीणामनन्यवचसामपि ।
विषमोपलभिन्नोर्मिरापगेवोचितीर्षतः ॥ ३३ ॥'

अत्रापगेव त्वमविगाह्योऽसीति लिङ्गभेदः । नारीणामुच्चितीर्षत इति लिङ्गभेदो वचनभेदश्च । तदिदं द्वयोरेकमेवोदाहरणम् ॥

यत्रोपमेति । उपमाग्रहणमुपलक्षणमित्यग्रे वक्ष्यामः । उपमा उपमितिः सादृश्यभिन्नोपमानवाचिन उपमेयवाचिनश्च लिङ्गं स्त्रीपुंनपुंसकं यस्य सा तथोक्ता । एवं भिन्नवचनोपममित्यत्रापि व्याख्येयम् ॥ अविगाह्योऽसीति । अविगाह्यतामात्रमत्र सादृश्यं विवक्षितमेतदुपयुक्तमेव विशेषणमुपमानोपमेययोरुपादानयोग्यमित्यकस्मादेव विकृतवचनभेदनिबन्धनः प्रयोजनमाकाङ्क्षति । तथा तदनुसंधानप्रवणस्य प्रकृतप्रतीतिराच्छाद्यत इति दूषणसिद्धिः । एतेन दूषणता व्याख्याता । विभागवाक्ये सहितावस्थयोरुद्देशादिह च मिलितयोरुदाहरणात्तथाभावो दोषत्वमिति भ्रान्तिं निरस्यति—तदिदमिति । एकमुदाहरणं नत्वेकः संमिश्र उपाधिः प्रत्येकमेव त्वस्ति समर्थत्वादित्यर्थः । एतदेवानुसंधाय विभागवाक्ये द्वे पदम् ॥

तत्किमुदाहरणस्य संकीर्णत्वमेव नेत्याह—

अथ भिन्नलिङ्गस्यैव यथा—

'वापीव विमलं व्योम हंसीव धवलः शशी ।
शशिलेखेव हंसोऽयं हंसालिरिव ते यशः ॥ ३४ ॥'

भिन्नवचनस्यैव यथा—

'सरांसीवामलं व्योम काशा इव सितः शशी ।
शशीव धवला हंसी हंसीव धवला दिशः ॥ ३५ ॥'

अथ भिन्नलिङ्गस्यैवेति । द्वयमपि निगदव्याख्यातम् ॥

जातिप्रमाणधर्मतो न्यूनता उपमानस्य न्यूनोपमत्वम् । तत्र जातिप्रमाणन्यूनतार्थदोषः । धर्मन्यूनता तु धर्माभिधायकपदन्यूनतालक्षणाशब्ददोष एव । एतेनाधिकत्वं व्याख्यातमित्याशयवानाह—

न्यूनोपममिह न्यूनमुपमानविशेषणैः ।

यथा—

'सहअचक्कवाअजुआ विअसिअकमला मुणालसंच्छण्णा ।
वावी वहु व्व रोअणविलित्तथणआ सुहावेइ ॥ ३६ ॥'

[संहतचक्रवाकयुगा विकसितकमला मृणालसंच्छन्ना।
वापी वधूरिव रोचनाविलिप्तस्तनी सुखयति॥]

अत्र नेत्रबाहूपमापदानां वधूविशेषणत्वेनानुक्तत्वादिदं न्यूनोपमम्॥

**न्यूनोपममिहेति।** इहशब्दो येषु मध्येषूपमानस्य स्तोकविशेषणतयोपमेयन्यूनेत्युक्तं तथाधिकोपममिति वक्ष्यति—संहतेत्यादि। अत्र चक्रवाकयुगोपमानमपदमेव परमुपात्तम्। रोचनाविलिप्तस्तनीत्यनेन कमलस्योपमानं नेत्रपदं मृणालस्योपमानं बाहुपदं च नोपात्तं तदपि च सविशेषणमुपादेयं भवति। येन विकासादिसमभिव्याहारसामञ्जस्यमपि स्यादिति। पदानामिति बहुवचनाभिप्रायः। अत एव धर्माणामेकनिर्देशेऽन्यसंवित्साहचर्यादिति नावतरति व्यभिचारात्। किमर्थं तस्योपमानमनुसंधेयमित्यपि न वाच्यम्। मात्रापि नानर्थिका कविनोपादेयेति साहित्यविदाम्नायव्यवस्थितावुपमेयविशेषणस्योपमानविशेषणतया प्रयोजनचिन्तायां पूर्ववदेव प्रतीतिप्रत्यूहस्य सुलभत्वादनुक्तत्वादितिशब्दप्रधानकतामाचष्टे। एवमुत्तरत्र॥

अधिकं यत्पुनस्तैः स्यात्तमाहुरधिकोपमम्॥ २६॥

यथा—

'अहिणवमणहरविरइअवलअविहूसा विहाइ णववहुआ।
कुन्दलएव्व समुप्फुल्लगुच्छपरिणित्तभमरगणा॥ ३७॥'

[अभिनवमनोहरविरचितवलयविभूषा विभाति नववधूः।
कुन्दलतेव समुत्फुल्लगुच्छपरिणीयमानभ्रमरगणा॥]

इदं भ्रमरगणस्योपमानविशेषणस्याधिक्यादधिकोपमानम्॥

**अधिकमिति।** यद्यप्येकस्य विशेषणाधिक्ये विशेषणन्यूनत्वे वान्यविशेषणस्य न्यूनाधिकभावो नियतस्तथाप्युपमानगतमेव द्वयं निरूप्यते। तत्र हि दृष्टमुपमेये प्रतिबिम्बकल्पमुपस्थाप्यते तेनान्तो नोपमेये तयोर्निरूपणमिति॥

भग्नच्छन्द इति प्राहुर्यच्छन्दोभङ्गवद्वचः।

यथा—

'यस्मिन्पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः।
तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः॥ ३८॥'

अत्र पञ्चमवर्णस्य लघोः स्थाने गुरोः करणाच्छन्दोभङ्गः ॥

**भग्नच्छन्द इति** । वाचां श्रव्योऽवच्छेदश्छन्दस्तस्यैवोपमानयुक्तादयस्तेनैव गुरुलघुनिवेशक्रमेण श्रव्यता भवतीत्याशयात् । तस्य विपर्यासश्छन्दोभङ्गो व्यक्त एव वैरस्यहेतुः प्राहुरिति । पद्योदाहरणत्वावच्छेदविपर्यासत्वे च भग्नवृत्तव्यवहारादिदमेव निमित्तमस्यावधार्यत इत्यर्थः । पञ्चेति । पञ्चजनाः पुरुषास्ते देवपितृगन्धर्वराक्षसासुरभेदात्पञ्च । अथवा निषादपञ्चमब्राह्मणादिचतुष्टयभेदात् । तमेवात्मानं ब्रह्मापरपर्यायं विज्ञाय श्रवणमनननिदिध्यासनैरुपास्य प्रज्ञां प्रकृष्टं ज्ञानं साक्षात्कुर्वीत ॥ अत्र पञ्चमवर्णस्येति । 'पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः । षष्ठं गुरुं विजानीयाच्छेषास्त्वनियता मताः ॥' इत्यनुष्टुपछन्दसो लक्षणम् ॥

## अस्थाने विरतिर्यस्य तत्तु भग्नयतीष्यते ॥ २७ ॥

यथा—

'ब्रह्मेन्द्रोपेन्द्रादिगीर्वाणवन्द्यो भक्तानां भूयाच्छ्रिये चन्द्रचूडः ।
स्त्रीणां संगीतं समाकर्णयन्केतूदस्ताम्भोदं सदध्यास्त ईशः ॥ ३९ ॥'

अत्र चतुर्थस्थाने यतौ कर्तव्यायां तदन्यत्र यतिकरणाद्भग्नयतीदम् ॥

**अस्थान इति** । श्रव्यः पठिति विच्छेदो यतिर्विच्छिद्य विच्छिद्य पठ्यमाना भारती स्वदते । श्रव्यतोपलक्षणार्थं च द्विमुनिवेदादिसंज्ञया तत्र तत्र विविच्यते । तथा चास्ति कश्चिद्विशेषो येन क्रियमाणापि विरतिर्न सौभाग्यपदं पुष्यति । स च विशेषो नाम भागभेदोऽस्वरसंधिकृतश्च प्रायेण एतेषां स्वभावविशेषादेव स्थाने क्रियमाणापि विरतिरन्यत्रैव परं प्रकाशते । न तत्र कथंचन सौभाग्यमुन्मीलयति । स्थानपरिभाषया व्यावर्तितत्वात् । तदिदमुक्तम्—अस्थान इति । वामनोऽप्याह—'विरसविरामं कष्टम्' इति । सदो गृहरूपा सभा केतूदस्ताम्भोदं ध्वजदण्डोत्क्षिप्तजलधरमित्युच्चस्त्वम् । 'वेदच्छेदा शालिनी मोऽथ तौ गौ' इत्युपलक्षणं श्रव्यरतेः । अत्र द्वितीयपादे धातुभागभेदः शेषपादत्रये नामभागभेदाः । न चात्र स्वरसंधानमस्तीति ॥

## क्रियापदविहीनं यदशरीरं तदुच्यते ।

यथा—

'सेलसुआरुद्धद्धं मुद्धाणाबद्धमुद्धससिलेहम् ।
सीसपरिट्ठिअगङ्गं संज्झापणअं पमहणाहम् ॥ ४० ॥'

[ शैलसुतारुद्धार्धं मूर्धाबद्धमुग्धशशिलेखम्।
शीर्षपरिष्ठितगङ्गं संध्याप्रणतं प्रमथनाथम्॥ ]

क्रियापदाभावादशरीरमिदम्॥

**क्रियापदेति**। क्रियेत्युपलक्षणम्। प्रधानपदहीनमिति बोद्धव्यम्। प्रधानाविमर्शे हि वाक्यशरीरमेव न निष्पन्नं स्यात्॥ शैलेति। वाक्ये क्रियाप्रधानमिति दर्शने तत्पदानुपादानादत्र प्रधानाविमर्शः। शैलसुतयावरुद्धमर्धं यस्य। मुद्धाणो मूर्धा तत्राबद्धा मुग्धा शशिलेखा येन। शीर्षे प्रतिष्ठा गङ्गा येन। यश्च संध्यायै प्रणतस्तं प्रमथनाथं प्रमथा गणास्तेषां नाथम्। कर्मविभक्तेः क्रियामन्तरेणाचरितार्थत्वात्क्रियाया नमस्काररूपाया व्यभिचारेणार्थापत्तिविषयतानुपपत्तेरिति। अस्यां च गाथायां स्त्रीमयव्यापाररूपता भगवतः प्रतीयते इति रहस्यमाराध्या मन्यन्ते॥

गुणभङ्गद्वारकदोषनिरूपणावसरोऽयमित्याशयवानाह—

**गुणानां दृश्यते यत्र श्लेषादीनां विपर्ययः॥ २८॥**
**अरीतिमदिति प्राहुस्तत्त्रिधैव प्रचक्षते।**
**शब्दार्थोभययोगस्य प्राधान्यात्प्रथमं त्रिधा॥ २९॥**
**भूत्वा श्लेषादियोगेन पुनस्त्रेधोपजायते।**
**अत्र यः श्लेषसमता सौकुमार्यविपर्ययः॥ ३०॥**
**शब्दप्रधानमाहुस्तमरीतिमतिदूषणम्।**

तत्र—

**विपर्ययेण श्लेषस्य संदर्भः शिथिलो भवेत्॥ ३१॥**

यथा—

'आलीयं मालतीमाला लोलालिकलिला मनः।
निर्मूलयति मे मूलात्तमालमलिने वने॥ ४१॥'

अत्र भिन्नानामपि पदानामेकपदता प्रतिभासहेतुरनतिकोमलो बन्धविशेषः श्लेषः। तद्विपर्ययेण शब्दप्रधानोऽयं श्लेषविपर्ययः॥

**गुणानामिति** । समाध्यादिभङ्गोऽपि तर्हि दोषः स्यादित्यत आह—श्लेषादीनामिति । श्लेषप्रसादसमता सौकुमार्यार्थव्यक्तिमाधुर्यकान्त्युदारतौजसाम् । एतद्योगाद्वाक्यं वक्ररूपतामासाद्य काव्यव्यपदेशं लभते । तेषां गुणानां भङ्गः काव्याभासत्वपर्यवसायी दोषः । ते च श्लेषादयो नवैव । तेषामन्यतमाभावे काव्यस्याभासत्वात् । तेषां हि विपर्यये रीतिरवश्यं भज्यते । तस्या गुणवत्पदरचनारूपत्वात् । अत एव पानकरसन्यायेन संभूयचित्रास्वादपर्यवसानक्षमं गुणसंवलनमेव रीतिरिति लोचनकारः । रीतिः साररूपतया काव्यस्यात्मेत्युच्यते । यथा चित्रस्य लेखा उत्तुङ्गप्रत्यङ्गलावण्योन्मीलनक्षमा, तथा रीतिरिति द्वितीये विस्तरः । तन्निधेति । तदिति काकाक्षिगोलकवत्पूर्वापराभ्यामभिसंबध्यते । यत्र गुणानां विपर्ययस्तदरीतिमत् । तत्रिधेत्यर्थः । त्रिधाभूतं भूयस्त्रिधा प्रचक्षते । तेन नवभेदाः । तदेतद्विवृणोति—शब्दार्थेति । योगशब्दः प्रत्येकमन्वीयते । शब्दप्रधानत्वमर्थानपेक्षशब्दनिरूप्यत्वम् । वाक्यगुणस्य श्लेषादित्रयस्य । एवशब्दानपेक्षार्थनिरूपणीयत्वं तादृशस्य कान्त्यादित्रयस्य । एतेनौजःप्रभृतित्रिकस्योभयप्रधानता व्याख्याता । तेनायमर्थः शब्दार्थोभयप्रधानतया सामान्यतस्त्रिधा भूत्वा श्लेषादित्रिकविवक्षया प्रत्येकं त्रिधा भवतीति । तेषु शब्दस्य प्राथम्यात्तत्प्रधानकगुणभङ्गः प्रथमं विवेक्तव्य इत्याह—तत्रेति । अरीतिमतीति निर्धारणे सप्तमी । जात्यभिप्रायमेकवचनम् । विपर्ययेणेति । श्लेषः संधानं घटनमित्यनर्थान्तरम् । न चैतावतैव गुणत्वं वाक्यमात्रसाधारणत्वात् । तेन बहूनामपि पदानामेकताप्रतिभासहेतुत्वमनतिकोमलत्वं च विशेषणमिच्छन्ति । विशेषमर्थगुणकाण्डे वक्ष्यामः । एवंभूतविशेषणविपर्यासे शिथिलो बन्धोऽतिकोमलो विकीर्णप्रायश्चेत्यर्थः । आलीयमित्यादौ दन्त्यवर्णप्रायतयातिकोमलत्वं विकीर्णता च व्यक्तैव । नास्य निरूपणे क्वचिदप्यर्थापेक्षेति स्फुटयन्नाह—अत्र भिन्नानामिति । श्लेषस्य शब्दप्रधानतया तद्विपर्ययोऽपि शब्दप्रधानो भवतीत्याह—शब्दप्रधानोऽयमिति । अन्यतरविशेषणहानावपि श्लेषाभावो भवत्येव । तेन पूर्वार्धस्य श्लेशत ऐक्यप्रतिभानसंभवेऽप्यतिकोमलतया दुष्टत्वम् ॥

**भवेत्स एव विषमः समताया विपर्ययात् ।**

यथा—

'कोकिलालापवाचालो मामेति मलयानिलः ।
उच्छलच्छीकराच्छाच्छनिर्झराम्भःकणोक्षितः ॥ ४२ ॥'

अत्र पूर्वार्धस्य मृदुबन्धत्वादुत्तरार्धस्य च गाढबन्धत्वात्समबन्धेषु विषममिति विषमो नाम शब्दप्रधानः समताविपर्ययो दोषः ॥

भवेदिति। स एव संदर्भो मृदुमध्यकठोरवर्णनिर्व्यूढास्तिस्रो बन्धजातयस्तत्रैकरूपे वाक्यार्थे एकैव जातिरुपादेयेति तद्विपर्यासो वैरस्यहेतुरेव। उच्छलन्तः शीकरा यस्मात्तथाच्छाच्छमत्यच्छम्। द्वयमपि निर्झराम्भोविशेषणम्। मलयमारुतस्योद्दीपनविभावभूतस्य वर्णमात्रवैरूप्यमस्येत्याशयवानाह—अत्र पूर्वार्धस्येति। शब्दप्रधानतामस्य विवृणोति—समबन्धेष्विति ॥

सौकुमार्यविपर्यासात्कठोर उपजायते ॥ ३२ ॥

यथा—

'असितार्तितुगद्रिच्छित्स्वःक्षितांपतिरद्रिदृक्।
अमिद्भिः शुभ्रदृग्दष्टैर्द्विषो जेघ्नीयिषीष्ट वः ॥ ४३ ॥'

अत्रातिकठोरत्वादसौकुमार्यं सुप्रतीतमेव ॥

सौकुमार्यविपर्यासादिति। अकठोराक्षरप्रायताबन्धस्य सुकुमारत्वं तद्विपर्यये कठोरता श्रुतिकटुत्वं भवति। असितर्तीति। 'ऋ गतौ' इति धात्वनुसारादर्तिर्वर्त्म। असिता कृष्णा ऋतिर्वर्त्म यस्य कृष्णवर्त्मा वह्निस्तस्य तुगपत्यम्। अद्रिच्छिदिति क्रौञ्चदारणत्वात्। स्वर्गे क्षियन्ति निवसन्ति ये देवास्तेषां पतिः सेनानीत्वात्। अद्रिदृग्द्वादशलोचनत्वात्। स एवंभूतो भगवान् कुमारोऽमिद्भिरस्निग्धै रूक्षैः शुभ्रदृग्दष्टैर्धवलाक्षिविलोकितैः सक्रोधनिभालने तारकाभागस्योर्ध्वतया नयनात्तथाभावो जातिर्वो युष्माकं द्विषः शत्रूञ्जेघ्नीयिषीष्ट। अत्यर्थं पुनः पुनर्वा वध्यादित्यर्थः। हन्तेर्यङि घ्नीभावे आशीर्लिङि रूपम्। स्वतश्चास्य पदस्य श्रुतिकटुता पददोषः। इह तु पदानामतथाभावे र्ति द्रि च्छि इत्यादीनां वर्णानां परस्परसंनिधाने घटनैव कठोरेत्याह—अत्रातिकठोरत्वादिति ॥

या तु कान्तिप्रसादार्थव्यक्तीनामन्यथा गतिः।
अर्थप्रधानः प्रोक्तः स वाक्ये गुणविपर्ययः ॥ ३३ ॥
अप्रसन्नं भवेद्वाक्यं प्रसादस्य विपर्ययात्।

यथा—

'अनङ्गकमलंचक्रे मयमाना मरालिका ।
यस्यानत्यर्जुनाब्जन्म सदृक्षाङ्को वलक्षगुः ॥ ४४ ॥'

अत्र शब्दानामनतिप्रसिद्धत्वादनतिप्रसन्नत्वमिति सोऽयमर्थप्रधानः प्रसादविपर्ययो दोषः ॥

या तु कान्तीति । 'कान्तिप्रसादार्थव्यक्तीनाम्' इति प्रमादात्पाठः । विवरणक्रमानुरोधेन 'प्रसादार्थव्यक्तिकान्तीनाम्' इति पठनीयम् । अप्रसन्नमिति । श्रुतमात्रस्यैव यस्यार्थश्चित्ते प्रतिफलति स प्रसन्नः शब्दः । तथा चार्थस्य प्राकट्यं झटिति प्रतिबन्धयोग्यत्वम् । 'पश्चादिव गतिर्वाचः पुरस्तादिव वस्तुनः' इति सहृदयव्यवहारार्थविषयत्वं प्रसादोऽर्थनिरूपणीय इति भवत्यर्थप्रधानः । न चासौ पदमात्रमुल्लिखतीति वाक्यांशो भवति । तेन तद्विपर्ययोऽपि वाक्यगामी । 'अर्थस्य यत्र झटिति प्रतीतिरुपजायते । तत्र तत्र महाराज शब्द एवापराध्यति ॥' इति वाक्यदोषेषु परिगणनमभ्यर्च्छतया च शब्दानां प्रतीतिः स्खलन्ती दूषणतामस्य स्थापयति—अनङ्गकमिति । न विद्यतेऽङ्गं यस्येत्यनङ्गकमाकाशं मयमाना गच्छन्ती । अयमयेति दण्डकेषु पठितान्मयधातोः शानच् । मरालिका हंसी । अलंचक्रे शोभितवती । ननु हंस्यागमनपथालंकरणकालो रात्रिस्तस्यां च तुषारकिरण एव तदलंकारकारी किमनया वराक्येत्यत आह—यस्येति । यदनत्यर्जुनं न भवति अब्जन्म तोयभवम् । नीलोत्पलमिति यावत् । तत्सदृशलाञ्छनो वलक्षगुर्वलक्षो गौः किरणो यस्य शुभ्रांशुश्चन्द्रः । तेनासौ सकलङ्कतया न तथालंकाराय यथेयमित्यर्थः । पश्येति वाक्यार्थकर्मकमेके पठन्ति । तत्र युक्तम् । चक्र इति परोक्षतया स्वरसभङ्गापत्तेः । उक्तयुक्त्या वाक्यदोषत्वमाह—अत्र शब्दानामिति । न च मयमानादीनां श्लिष्टता । तल्लक्षणविरहात् । नापि गूढार्थत्वं तत एव ॥

**वाक्यं भवति नेयार्थमर्थव्यक्तेर्विपर्ययात् ॥ ३४ ॥**

यथा—

'मही महावराहेण लोहितादुद्धृतोदधेः ।
इतीयत्येव निर्दिष्टे नेया लौहित्यहेतवः ॥ ४५ ॥'

तदिदं निगदेनैव व्याख्यातमित्यर्थप्रधानोऽयमर्थव्यक्तिविपर्ययः ॥

**वाक्यमिति**। संपूर्णं वाक्यत्वमर्थव्यक्तिं करोतीति वक्ष्यति । सर्वस्य वाक्यस्य विशेषणविशेष्यभावबोधकत्वनियमे यावतां विशेषणविशेष्यभावोऽभिमतस्तावत्प्रतिपादकपदोपादानं संपूर्णता । सा च विशेषणविशेष्यभावानुरूपार्थनिरूपणीयतयार्थप्रधानेति तद्विपर्ययोऽपि तत्प्रधान इति पूर्ववन्नेयम् । अत एव विवक्षितवाक्यान्यथानुपपत्त्या नेयः कल्पनीयोऽर्थो यस्येति नेयार्थमित्यर्थोऽपि घटते । **महीति**। पूर्वार्ध एव काव्यं निर्वर्तितम् । न च तावता विवक्षितार्थलाभः । तथा हि—समुद्रमध्यात्पृथिव्यामुद्ध्रियमाणायां महासुरविमर्दे तेषां दंष्ट्रया पाटनेन रुधिरशबलतया लोहितत्वमुदधेरिति वाक्यार्थोऽभिप्रेतः । लक्षणाया अभावान्न नेयार्थत्वं पददूषणमत्र संभावनामारोहति । दूषणताबीजं चात्र स्फुटमेव । अशरीरं तु क्रियापदशून्यमित्युक्तम् । तदेतत्सर्वमभिप्रेत्याह—तदिदं निगदेनैवेति ॥

**कान्तेर्विपर्ययाद्वाक्यं ग्राम्यमित्यपदिश्यते ।**

यथा—

'विरहे ते विषीदन्तं निषीदन्तं तवान्तिके ।
कन्ये कामयमानं मां त्वं न कामयसे कथम् ॥ ४६ ॥'

इदमुक्तेर्ग्राम्यतया कान्तिहीनमित्यर्थप्रधानोऽयं कान्तिविपर्ययो दोषः॥

**कान्तेरिति**। रसस्य दीप्तिः कान्तिरग्रे विवरिष्यते तेनार्थप्रधानता व्यक्ता । तस्यामस्ति वाक्यवाच्ययोर्व्यापारः । वाक्यं विदग्धोक्तिकं व्याप्रियते । अतथाभूतस्य रसाव्यञ्जकत्वनियमात् । तथाहि—कन्ये इति संबोधनेन रसविरोधिनीविलसिताक्षमता प्रतीयते । कामयमानमित्यनेनानावरणमुच्यमानोऽर्थः कथं न वैरस्यमावहतीत्यादिकमुन्नेयम् । तदिदमाह—इदमुक्तेर्ग्राम्यतयेति ॥

**ओजोमाधुर्यमौदार्यं न प्रकर्षाय जायते ॥ ३५ ॥
यस्मिंस्तमाहुरुभयप्रधानं तद्विपर्ययात् ।
वाक्ये यः खण्डयन्रीतिं भवत्योजोविपर्ययः ।
असमस्तमिति प्राहुर्दोषं तमिह तद्विदः ॥ ३६ ॥**

यथा—

'स्वरः खरः खलः कान्तः कायः कोपधनः कृशः ।
च्युतो मानोऽधिको रागो मोहो जातोऽसवो गताः ॥ ४७ ॥

अत्र सत्यसमस्तपदाभिधाने सत्यपि चार्थसौकुमार्ये श्लेषादिगुणसामग्र्यभावान्न वैदर्भी रीतिः । नापि यथोक्तलक्षणाभावाद्गौडीयादय इति । खण्डितरीतित्वाद्यमोजोविपर्ययः शब्दार्थप्रधानो गुणविपर्ययो दोषो भवति । यदाह—

इत्यादिबन्धपारुष्यं शैथिल्यं च नियच्छति ।
अतो नैनमनुप्रासं दाक्षिणात्याः प्रयुञ्जते ॥ ३७ ॥

वाक्ये य इति । ननु समासभूयस्त्वमोजोऽभिधास्यते तत्कथमस्याभावोऽर्थप्रधानोऽपि कथं च दोष इत्यत आह—खण्डयन्रीतिमिति । रीतिभङ्गपर्यवसायी तस्याभावो दूषणम् । न तु तन्मात्रमित्यर्थः । एतदुक्तं भवति । शब्दार्थयोरुचिता प्रौढिरोजः । यदाह—'रौद्रादयो रसा दीप्त्या लक्ष्यन्ते काव्यवर्तिनः । तद्व्यक्तिहेतुशब्दार्थावाश्रित्यौजो व्यवस्थितम् ॥' इति । तत्रार्थव्यक्तिमर्थगुणेषु विवेचयिष्यामः । शब्दस्य तु पारुष्यशैथिल्यव्यतिकरलक्षणा सा च क्वचित्समासदीर्घतया व्यज्यते । यथा—'चञ्चद्भुजभ्रमितचण्डगदाभिघातसंचूर्णितोरुयुगलस्य सुयोधनस्य ।' इति । क्वचित् अन्यथापि प्रकाश्यते । यथा—'यो यः शस्त्रं बिभर्ति' इत्यादि । तदेवं तत्त्वव्यवस्थितौ पूर्वाचार्यव्यवस्थित्या गुणकाण्डे समासभूयस्त्वमोजोलक्षणं व्यभिचरितगुणमध्ये समासरचनासौष्ठवं वक्तृक्षमतया गुण इत्यभिप्रायाद्विशेषं तत्र वक्ष्यामः—तदिदमिति । रीतिं खण्डयतीति । नहि प्रौढेरभावे गुणसंबन्धनात्मिका रीतिर्नामेति विपर्ययपदेन साधारणेन पारुष्यशैथिल्ये दर्शयति—अत्रेति । एतदेवाचार्यमतेन द्रढयति—यदाहेति । यद्यप्यत्रानुप्रासोऽस्ति तथापि रीतिमन्तरेण मृतशरीर इव काव्ये नालंकरणतामभ्यास्ते । ततश्च न प्रकृतः कोऽपि चमत्काराविर्भाव इति नास्यैव काव्यतां प्रयोजयतीत्यर्थः । दाक्षिणात्या वैदर्भीमाहुः । पारावरीणास्ते हि विशिष्टरीतिस्वरूपमवधारयितुं क्षमा इति ॥

माधुर्यव्यत्ययो यस्तु जायते रीतिखण्डनात् ।
तदनिर्व्यूढमित्युक्तं काव्यसर्वस्ववेदिभिः ॥ ३८ ॥

यथा—

'नखिनां च नदीनां च शृङ्गिणां शस्त्रपाणिनाम् ।
विश्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु च ॥ ४८ ॥'

अत्र नखिनां च नदीनां चेति षष्ठ्यन्ताच्चकारेण रीतेरुपक्रमे शृङ्गिणां शस्त्रपाणिनामिति चकारानिर्वाहात् स्त्रीषु राजकुलेषु चेति षष्ठीपरित्यागादमधुरार्थत्वाच्च माधुर्यविपर्ययनामायं शब्दार्थप्रधानो गुणविपर्ययो दोषः । यदाह—

**मधुरं रसवद्वाचि वस्तुन्यपि रसस्थितिः ।**
**येन माद्यन्ति धीमन्तो मधुनेव मधुव्रताः ॥ ३९ ॥**
**यया कयाचिच्छ्रुत्या यत्समानमनुभूयते ।**
**तद्रूपा हि पदासत्तिः सानुप्रासा रसावहा ॥ ४० ॥**

**माधुर्यव्यत्यय इति** । शब्दार्थयोश्चित्तद्रुतिविधायित्वं माधुर्यम् । निचुलितत्वमिवार्द्रतापदाभिधेया चेतसोऽवस्था तत्कारिता माधुर्यम् । सा च शृङ्गारकरुणान्यतरप्रकाशानुगुणव्यापारावेशेन भवति । यदाह—'शृङ्गार एव मधुरः परः प्रह्लादनो रसः । तन्मयं काव्यमाश्रित्य माधुर्यं प्रतितिष्ठति ॥ शृङ्गारे विप्रलम्भाख्ये करुणे च प्रकर्षवत् । माधुर्यमार्द्रतां याति यतस्तत्राधिकं मनः ॥' इति । तत्र शब्दस्य माधुर्यं पृथक्पदतया व्यज्यते । दीर्घसमासस्य यत्नान्तरसाध्यतया सुकुमाररसप्रकाशसामग्रीबहिर्भावात् । ततश्च शब्ददूषणप्रस्तावे पृथक्पदतामात्रप्रत्ययो यद्युच्यते गौडीया दुष्टा स्यात्, इति रीतिखण्डनपर्यवसायितयाभिधानम् । भवति हि कदाचित्कवेः शक्तिवशात्सोल्लेखेऽपि समासे रसव्यक्तिः । यथा—'याते द्वारवतीं तदा मधुरिपौ तद्दत्तसङ्कानतां कालिन्दीतटरूढवञ्जुललतामालिङ्ग्य सोत्कण्ठया । उद्गीतं गुरुबाष्पगद्गदगलत्तारस्वरं राधया येनान्तर्जलचारिभिर्जलचरैरप्युत्कमुत्कूजितम् ॥' एवं चास्खलितप्रतीतिविषयस्यैव संदर्भस्य रसत्वं पदघटनारूपस्य च संदर्भस्यानिर्वाहादेव प्रतीतिः स्खलतीत्याह—तदनिर्व्यूढमिति । काव्यसर्वस्वं रसप्रकाशस्तद्वेदिभिस्तदुपायभूतघटनास्वरूपवेदिभिः । एतदेव व्याख्यानेन स्फुटयति—अत्रेति । नखिनां च नदीनां चेति चकारेणोत्तरत्र तत्परित्यागेऽनुपपत्तिर्जागर्ति तदेव प्रतीतेः संवलनम् । एवमुत्तरत्रापि । अस्तु तर्हि वस्त्वसत्त्वेऽप्येकदिङ्माधुर्यसंपत्तौ काव्यताप्रतिलम्भ इत्यत आह—अमधुरार्थत्वाच्चेति । स्पष्टमेतच्छब्दार्थप्रधानतां माधुर्यस्य पूर्वाचार्यसंमत्या द्रढयति—यदाहेति । माद्यन्ति आर्द्रचित्ता भवन्ति । मधुरसादृश्यादयं व्यवहार इत्यत आह—मधुनेति । इदं च घटनाया माधुर्ये परमं रहस्य-

मित्याह—यया कयाचिदिति । औष्ठ्यकण्ठ्यादिकं वा तद्रूपसमानश्रुतिकमादौ यस्य तथाभूतस्य पदस्य प्रत्यासत्तिः । 'तद्रूपा हि' इति पाठे व्यक्त एवार्थः । अत एव सानुप्रासा ततश्च रसावहेत्यर्थः । यदाह—'कङ्कणादिविमुक्तापि कान्ता किमपि शोभते । कुङ्कुमेनाङ्गरागश्चेत्सर्वाङ्गीणः प्रवर्तते ॥' इति ॥

विकटतामात्रभावस्यादोषत्वाद्विशेषयन्नाह—

**यस्तु रीतेरनिर्वाहादौदार्यस्य विपर्ययः ।**
**वाक्यं तदनलंकारमलंकारविदो विदुः ॥ ४१ ॥**

यथा—

'दीर्घपुच्छश्चतुष्पादः ककुद्मांल्लम्बकम्बलः ।
गोरपत्यं बलीवर्दस्तृणमत्ति मुखेन सः ॥ ४९ ॥'

तदिदमपुष्टार्थत्वादनुत्कृष्टविशेषणमनुदारं निरलंकारमाचक्षते सोऽयमौदार्यविपर्ययो नाम शब्दार्थप्रधानो गुणविपर्ययो दोषः । यदाह—

**श्लाघ्यैर्विशेषणैर्युक्तमुदारं वाक्यमिष्यते ।**
**यथा लीलाम्बुजक्रीडासरोहेमाङ्गदादयः ॥ ४२ ॥**
**उत्कर्षवान्गुणः कश्चिदुक्तेर्यस्मिन्प्रतीयते ।**
**तदुदाराह्वयं तेन सनाथा काव्यपद्धतिः ॥ ४३ ॥**

**यस्तु रीतेरिति** । काव्यरूपताप्रयोजकं शब्दार्थयोर्वक्रता उदारता नहि वक्रतामन्तरेण काव्यपदवीप्राप्तिस्तदाह—'यत्तु वक्रं वचः शास्त्रे लोके च वच एव तत् । वक्रं यदनुरागादौ तत्र काव्यमिति श्रुतिः ॥' इति । तदेतदलंकारसामान्यमस्याभावे निरलंकारता भवतीत्याह—अनलंकारमिति । दीर्घपुच्छ इत्यादौ प्रकृतोदाहरणे द्वयोरवक्रत्वं स्फुटयति—यथेति । विविच्य गुणप्रस्तावे कथयिष्यामः । अर्थपोषमाह—उत्कर्षवानिति । उभयप्रधानतामुपसंहरति—काव्येति ॥

तदेवं वाक्यदोषाँल्लक्षयित्वा क्रमप्राप्ता वाक्यार्थदोषा लक्षणीया इति तान्विभजते—

**अपार्थं व्यर्थमेकार्थं ससंशयमपक्रमम् ।**
**खिन्नं चैवातिमात्रं च परुषं विरसं तथा ॥ ४४ ॥**

हीनोपमं भवेच्चान्यदधिकोपममेव च ।
असदृक्षोपमं चान्यदप्रसिद्धोपमं तथा ॥ ४५ ॥
निरलंकारमश्लीलं विरुद्धमिति षोडश ।
उक्ता वाक्यार्थजा दोषास्तेषां वक्ष्यामि लक्षणम् ॥ ४६ ॥
समुदायार्थशून्यं यत्तदपार्थं वचः स्मृतम् ।

यथा—

'जरद्गवः कम्बलपादुकाभ्यां द्वारि स्थितो गायति मङ्गलानि ।
तं ब्राह्मणी पृच्छति पुत्रकामा राजन्रुमायां लशुनस्य कोऽर्थः ॥५०॥'

अत्र समुदायार्थः कोऽपि नास्तीत्यपार्थमिदम् ।

**अपार्थमिति** । उद्देशे दोषाणां व्यासेनोक्तिः पूर्वोक्तप्रयोजनानुरोधेनेति । समुदायिपदानां विशेषणविशेष्यभावः समुदायार्थः । तेन शून्यं पदजातमपार्थकं पदार्थानामसंसर्गेण पदानामसंसर्गोऽभिधीयते । तेनार्थदोषत्वम् । जरद्गव इति । कम्बलपादुकाभ्यामिति लक्षणे तृतीया । न च ताभ्यां वृद्धोक्षस्य संबन्धः । कथं च तस्य मङ्गलानां धवलादीनाम् । 'मद्रकाणाम्' इति पाठे गीतकविशेषाणां वा संगतिः, कथं वा पुत्रकामायास्तत्प्रश्नसंसर्गः, कथं च राजन्निति संबोधनं घटते, पुत्रकामायाश्च रुमालवणार्थप्रश्नः । रुमा लवणाकरः । तथा च प्रयोगः—'रुमाघासकान्तादिलवणात्मकत्' इति ॥

व्यर्थमाहुर्गतार्थं यद्यच्च स्यान्निष्प्रयोजकम् ॥ ४७ ॥

यथा—

'आहिषातां रघुव्याघ्रौ शरभङ्गाश्रमं ततः ।
स्वामहौषीत्तनुं वह्नौ दृष्ट्वा तौ रामलक्ष्मणौ ॥ ५१ ॥'

अत्राहिषातां दृष्ट्वेत्येताभ्यामेव ताविति, रघुव्याघ्रावित्यनेनैव रामलक्ष्मणाविति, तनुमित्यनेनैव स्वामिति, अहौषीदित्यनेनैव वह्नाविति, गम्यत इति गतार्थत्वम् । न च शरभङ्गाश्रमगमनं तनुहोमो वाग्रतः कथाशरीरोपयोगीति निष्प्रयोजकत्वम् । अतोऽयं व्यर्थनामा वाक्यस्य

महावाक्यस्य च दोषो भवति । आर्थ्या च वृत्त्या लब्धस्य शास्त्रेतिहासादौ शब्दवृत्त्या भणनमपौनरुक्त्यायेत्यर्थपुनरुक्तेर्भिद्यते ॥

**व्यर्थमिति** । विज्ञानो वा विगतो वार्थोऽभिधेयं प्रयोजनं यस्य तद्व्यर्थं स्वतन्त्रं च दूषणमिति वैशेषिके वक्तव्यम् । तथा हि—आहिषातामिति । अंहेर्गतिकर्मणो लुङि रूपम् । स च प्राचुर्यप्रयोगः प्राप्त्यवच्छिन्नं व्यापारप्रचयमभिधत्ते । तथा चार्थसिद्धायां प्राप्तौ शब्देनोपादानमनुचितं लोकानुसारेण काव्ये दृशिश्चाक्षुष एव ज्ञाने प्रयुज्यते । यथा—'मया तावद्दृष्टो न खलु कलिकन्दर्पनृपतेर्गुणैस्तुल्यः कोऽपि क्वचिदपि किमश्रावि भवता । इति प्रश्नं श्रुत्वा क्वणितमिव कर्णान्तिकमगान्मृगाक्षीणां चक्षुश्चटुलमवता चान्ततरलम् ॥' यथा वा—'नैवादर्शि न चाश्रावि फलं मलयभूरुहः ।' चक्षुश्च प्राप्तमेव गृह्णातीत्यर्थलब्धायां प्राप्तौ कथं शब्देनोपादानम् । तदिदमुक्तम्—एताभ्यामेवेति । रघुव्याघ्रादिप्रकरणादिकमासाद्य विशेषपर्यवसायि यौगिकत्वान्न तु विशेष एव शक्तम् । 'उपगम्य रघुव्याघ्रः कच्छभूभागचारिणीम् । लुलभे मुनिधेनुं तां वेलामिव महार्णवः ॥' इति महर्षिप्रयोगात् । एतेन पुष्पवदादिपदवद्वचनभेदोऽप्यपास्तः । एवं च प्रकरणादिना रघुव्याघ्रपदं रामलक्ष्मणपरमेवेति पूर्वार्धे तयोरेव प्रक्रान्तत्वादुत्तरार्धे सर्वनाम्ना परामर्शो युज्यते, न तु स्वशब्देन । तनुप्रभृतिशब्दानां संबन्धिशब्दत्वात्समभिव्याहृतशब्दार्थसंबन्धकत्वं लोके व्युत्पन्नम् । यथा—'करौ धुनाना नवपल्लवाकृतीर्वृथा कृथा मानिनि मा परिश्रमम् ।' इति शब्दान्तरसंनिधाने तु क्वचित्ताद्रूप्यावगमो भवति । यथा—'उमास्तनोद्भेदमनुप्रवृद्धो मनोरथो यः प्रथमं बभूव । तमेव मेनादुहितुः कथंचिद्विवाहदीक्षातिलकं चकार ॥' तदिहान्यस्यानुपादानाच्छरभङ्गसंबन्धिन्येव तनुः प्रतीयते । जुहोतिश्च वह्न्याधारकमेव हविर्द्रव्यत्यागमभिधत्ते तेन 'वह्नौ' इत्यपि न वाच्यम् । गतार्थशब्दं व्याचष्टे—गम्यत इति । अस्मिन्नेवोदाहरणे निष्प्रयोजनत्वमाह—न चेति । शरभङ्गाश्रमगमनं तनुहोमश्चात्र वाक्यार्थद्वयं न प्रयोजनवत् । अस्य वाक्यस्य चरितार्थत्वात् । किं प्रयोजनान्तरगवेषणयेत्यत आह—अत इति । यद्वाक्यपोषणानौपयिकपदमप्रयोजकवचसा प्रागुक्तं तथा च प्रबन्धाद्यर्थपोषपर्यवसायि वाक्यमेव । इहाप्यवाच्यवचनस्य स्फुटत्वात् । न चाश्रमगमनतनुहोमौ करिष्यमाणवीररसोन्नितकथाशरीरे कामपि शोभामात्रामर्पयत इति वाक्यस्य महावाक्यस्य चेति यथासंख्यमन्वयः । कथं पुनर्गतार्थं प्रसाधितस्येत्यादेरर्थपुनरुक्ताद्भिद्यत इत्यत आह—आर्थ्या

चेति। शब्दवृत्त्यैवावगतस्य शब्दवृत्त्या पुनरुक्तम्। अर्थतो लब्धस्य शब्दवृत्त्या भणनमित्येकः प्रकारः। अर्थतो लाभं व्युत्पादयति—शास्त्रेति। अस्य रघुकुलभुवः शरभङ्गाश्रमगमनमितिहासाच्चक्षुषः प्राप्तस्यैव ज्ञानजनकत्वं शास्त्रात्। शरभङ्गसंबन्धिन्येव तनुर्लोकव्युत्पत्तेस्तेन नियमेन ह्यर्थतः प्राप्तिर्भवतीत्यभिप्रायः॥

**उक्त्यभिन्नार्थमेकार्थं**

यथा—

'प्रसाधितस्याथ मुरद्विषोऽभूदन्यैव लक्ष्मीरिति युक्तमेतम्।
वपुष्यशेषेऽखिललोककान्ता सानन्यकान्ता ह्युरसीतरा तु॥५२॥'

इत्युक्तैकार्थमेवाह—

'कपाटविस्तीर्णमनोरमोरःस्थलस्थितश्रीललनस्य तस्य।
आलिङ्गिताशेषजना बभूव सर्वाङ्गसङ्गिन्यपरैव लक्ष्मीः॥५३॥'

अनयोः श्लोकयोरभिन्नार्थमेकं वाक्यं महावाक्ये दुष्यति॥

**उक्त्यभिन्नार्थमिति**। वाक्यान्तरोक्त्यभिन्नस्तात्पर्यार्थो यस्य तत्तथोक्तम्। तथा हि—'प्रसाधितस्य—' इत्यादिश्लोके श्लेषोपहितेन व्यतिरेकेण काप्यपूर्वा कृष्णस्य लक्ष्मीस्तत्काले बभूवेति तात्पर्यार्थः। तेनैव प्रकारेण 'कपाट—' इत्यग्रिमश्लोके स एवास्ति। तुल्यार्थत्वं उपादानं भिन्नार्थत्वेऽपि। तदिदमाह—अनयोः श्लोकयोरिति। महावाक्ये श्लोकद्वयरूपे एकम्, अन्यतरद्दुष्यति। हेयं भवतीत्यर्थः॥

**संदिग्धार्थं ससंशयम्।**

यथा—

'मनोरथप्रियालोकरसलोलेक्षणे सखि।
आराद्वृत्तिरियं माता न क्षमा द्रष्टुमीदृशम्॥ ५४॥'

अत्राराल्प्रभृतिशब्दानामुभयार्थत्वान्माता द्रक्ष्यति न वेति संदिग्धम्॥

**संदिग्धार्थमिति**। शब्दस्वरूपनिश्चयेऽपि वाक्यार्थो दोलायित इत्यर्थदोषत्वम्। तथा हि—मनोरथेत्यादौ मनोरथे यः प्रियो वल्लभस्तदालोकरसेन लोलेक्षणे चपललोचने तव मातेयमाराद्वृत्तिर्दूरवर्तिनी। अतो नैतादृशं सानुरागाङ्गनाजन्मोद्यं द्रष्टुं क्षमा इति व्यवस्थापनाभावलोकयितुं शक्या ततो निःशङ्कमालोकस्वेति

वाक्यार्थे उतेयमाराद्वृत्तिः समीपदेशवर्तिनी । 'आराद्दूरसमीपयोः' । तथा चेदृशं कुलाङ्गनानुचितं चारित्रखण्डनं द्रष्टुं न क्षमा न सहिष्णुरतोमानयनचापलं कार्षीरिति । नानार्थपदप्रक्षेपात्साधकबाधकप्रमाणाभावाच्च संदिग्धत इत्याह—अत्राराद्प्रभृतिशब्दानामिति । न च मिथो विरोधिनोरेकत्र विवक्षा संभवति । न चास्ति प्रकरणादिकमेकनियामकं । न च मातुः प्रकोपशङ्कया प्रियविलोकनरसोत्काया मनोरथभङ्गो न भवतीत्यर्थः ॥

**वाक्यं यत्तु क्रमभ्रष्टं तदपक्रममुच्यते ॥ ४८ ॥**

यथा—

'काराविऊण खउरं गामउलो मज्जिओ अ जिमिओ अ ।
णक्खत्ततिहिवारे जोइसिअं पुच्छिउं चलिओ ॥ ५५ ॥'

[कारयित्वा क्षौरं ग्रामप्रधानो मज्जितश्च भुक्तवांश्च ।
नक्षत्रतिथिवाराञ्ज्यौतिषिकं प्रष्टुं चलितः ॥]

अत्र क्षुरकर्मणोऽनन्तरं नक्षत्रादिप्रश्नादिदमपक्रमम् ॥

**वाक्यं यत्त्विति** । कारयित्वा क्षौरं गामउलो ग्रामप्रधानपुरुष इति देशीयाः । ग्रामेऽपि वा यः कुटोऽव्युत्पन्नः । मज्जिओ अ सुस्नातश्च जिमिओ अ भुक्तवांश्च ततो नक्षत्रं तिथिवारौ च ज्यौतिषिकं प्रष्टुं चलितः । तिथिवारज्ञानानन्तरं क्षुरकर्म, ततः स्नानभोजने, इति लौकिकः क्रमस्तस्य विपर्यासो व्यक्त एव श्रुतिवचनात् । क्रियमाणेऽपि रचनावैपरीत्येन क्रमभ्रंशः समाधीयत इति नासौ शब्ददोषः । अत्र पूर्वार्धोपात्तानां क्रमो न विपर्यस्तः, किंतु क्षौरोत्तरार्धोक्तयोरित्याह—अत्र क्षुरकर्मण इति ॥

**जात्याद्युक्तावनिर्व्यूढं खिन्नमाहुर्महाधियः ।**

यथा—

'वेवाहिऊण वहुआ सासुरअं दोलिआइ णिज्जन्ती ।
रोअइ दिअरो तं संठवेइ पास्सेण वच्चन्तो ॥ ५६ ॥'

[विवाह्य वधूः श्वाशुरकं दोलिकया नीयमाना ।
रोदिति देवरस्तां संस्थापयति पार्श्वेन व्रजन् ॥]

अत्र प्रक्रान्तस्य नवपरिणयवतीस्वरूपभणनस्यानिर्व्यूढत्वात्खिन्नत्वम् ॥

**जात्यादीति** । वाक्यार्थो द्विविधः—स्वतःसंभवी, कविप्रौढोक्तिनिर्मितश्च । तत्रासति विशेषहेतौ यज्जातीयमर्थं बुद्ध्या व्यवस्थाप्य वचनोपक्रमस्तज्जातीयस्यैव समस्तवाक्यनिर्वाहो युक्तो न त्वन्तरेण परित्यागेन भेदः । उपक्रान्तनिर्वाहाशक्तो लोके खिन्न इत्युच्यते । तदिदमुक्तम्—जात्यादीति । आदिपदेन स्वतःसंभविविशेषाणामुपमादीनां कविप्रौढिनिर्मितानां च रूपकादीनां परिग्रहः । विवाह्य नववधूः सासुरअं श्वशुरगृहं दोलिकया नीयमाना रोदितीति स्वतःसंभवी । नवपरिणीतास्वभावलक्षणार्थस्तावदुपक्रान्तस्तथा सति यो जन्माभ्यस्तपितृगृहवियोगवेदनादूनमानसाया अत्यन्तापरिशीलितेन देवरेण संस्थापनप्रकारः स न जातौ निविशते । परिशीलितभर्तृकुलया कुलायां वा । तस्यौचित्यात्तस्या एव हि किंचन वक्तव्यं भवतीत्याह—अत्र प्रक्रान्तस्येति ॥

**यत्सर्वलोकातीतार्थमतिमात्रं तदुच्यते ॥ ४९ ॥**

यथा—

'भृङ्गेण कलिकाकोषस्तथा भृशमपीड्यत ।
ववर्ष विपिनोत्सङ्गे गोष्पदप्रं यथा मधु ॥ ५७ ॥'

अत्र कलिकाकोषे गोष्पदप्रमधुवर्षस्यासंभवादतिमात्रत्वम् ॥

**यत्सर्वलोकेति** । गोष्पदप्रमिति पूरेर्णिजन्ताद् 'वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम्' इति णमुल्, ऊलोपश्च । कलिकामकरन्दपरिणामस्यैतावतो लोके न प्रसिद्धिः । न चैतत्खिन्नमेव । कलिकाकुसुमस्यानुपक्रमात्, किं तु स्वरूपप्रमालोकमर्यादातिरिक्तवृत्तमुपात्तमिति पृथगेव दोषः ॥

**यत्तु क्रूरार्थमत्यर्थं परुषं तु तदुच्यते ।**

यथा—

'खाहि विसं, पिअ मुत्तं, णिज्जसु मारीअ, पडउ दे वज्जम् ।
दन्तक्खण्डिअथणआ खिविऊण सुअं सवइ माआ ॥ ५८ ॥'

[ खाद विषं, पिब मूत्रं, नीयस्व मार्या, पततु ते वज्रम् ।
दन्तखण्डितस्तनी क्षिप्त्वा सुतं शपति माता ॥ ]

अत्र खाद विषमित्यादीनां क्रूरार्थानामभिधानात्पारुष्यम् ॥

**यस्त्विति** । 'खाद विषं, पिब मूत्रं, नीयस्व मार्या, पततु ते वज्रम्' इत्थं माता पुत्रमाक्रोशति । किं कृत्वा । क्षिप्त्वा भूमौ निरस्य । कुतः । दन्तखण्डितस्तनी । यतो बालो दन्तैर्मातुः स्तनं दशतीति जातिस्तस्याः पुनरेवंविधं परुषाभिधायित्वमनुचितम् । अतिपारुष्यमेव चात्र विरसताहेतुः । तेनातिमात्राद्भेदः ॥

**अप्रस्तुतरसं यत्स्याद्विरसं तन्निगद्यते ॥ ५० ॥**

यथा—

'तव वनवासोऽनुचितः पितृमरणशुचं जहीहि किं तपसा ।
सफलय यौवनमेतत्सममनुरक्तेन सुतनु मया ॥ ५९ ॥'

अत्र पितृमरणसंतप्तायाः संभोगप्रवर्तनमप्रकृतरसत्वाद्विरसम् ॥

**अप्रस्तुतेति** । अप्रस्तुतः प्रस्तावमन्तरेण सूचितो रसो यत्र तत्तथा । एकरसप्रक्रमे हि विरोधिरसान्तरप्रस्ताव एव क्रियमाणो नौचित्यवान् । न चौचित्यमन्तरेण रसस्य पदसंबन्धः संभवति । यदाह—'अनौचित्यादृते नास्ति रसभङ्गस्य कारणम् । प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परा ॥' इति । तव वनवास इत्यादौ पितृमरणानुभवप्राप्तशोकप्रकर्षायाः शृङ्गारप्रस्तावना विरसायते । सा हि स्वभावत एव करुणेन सहैकवाक्यसमावेशविरोधिनी । न चैकस्य बाध्यत्वमङ्गभावो वावगम्यते । नाप्युभयोरन्यगुणीभावोऽवगम्यते । येनायं विरोधः समाधीयताम् । युक्तिरत्र विदग्धैव । अर्थस्तु रसात्माविरोधेन पदं बध्नाति ततः कान्तिविपर्ययाद्भेदः । न च करुणोक्तिरुपक्रान्ता यतस्तदनिर्वाहे खेदसंभावना स्यात् । किंतु पितृमरणशुचं जहीहीत्यनेन शोकाविष्टायां शृङ्गारप्रस्तावना । तथा च भिन्नमेव दुष्टताबीजं तदेतत्सर्वमपि संधाय व्याचष्टे—अत्रेति ॥

इदानीमनौचित्यरूपदूषणप्रस्तावः । अर्थालंकारेषूपमाप्रधानमिति प्रसिद्ध्या तस्यामेवोपलक्षणतयानौचित्यं प्रपञ्चयति—

**हीनं यत्रोपमानं स्यात्तत्तु हीनोपमं स्मृतम् ।**

यथा—

'क्वचिदग्रेऽप्रसरता क्वचिदाप्लुत्य निघ्नता ।
शुनेव सारङ्गकुलं त्वया भिन्नं द्विषत्कुलम् ॥ ६० ॥'

अत्र शौर्यशालिनः शुनोपमितत्वाद्धीनोपममिदम् ॥

**हीनमित्यादि** । हीनमपकृष्टमसजातीयमुपमानमित्युपमानप्रसिद्धा विशेषा उपमेये प्रतिबिम्बकल्पाश्च प्रतीयन्त इत्युक्तम् । उत्कृष्टजातीयस्योपमेयस्य हीनजातीयेन सामान्यमभिधीयमानं शाब्दन्यायेन बोधयदनुचितमेव भवति । यथा—'रणाश्वमेधे पशुतामुपागताः' इति । नन्वत्र रूपकबलेन वर्णनीयस्य पशुतावगम्यत इति युक्तमनौचित्यम् । क्वचिदग्र इत्यादौ प्रकृतोदाहरणे तु कथम् । नह्यत्र प्रस्तुतोपश्लोकस्य सारमेयतावगम्यते अग्रे प्रसरणमाङ्गुल्य निहननं च सादृश्यमुपात्तमुचितमेवेति नैतत् । तत्त्वप्रतिबिम्बे सादृश्यप्रतीतिरपि शब्देन क्रियमाणा लोके कान्तिं प्रति पुष्णाति । न हि कदापि हीनेन सादृश्योक्तौ वर्णना सजीवा प्रतीयते । प्रतीतिमात्रपरमार्थं च काव्यदर्शनमिति ॥

**तदेव यस्मिन्नधिकं तद्भवेदधिकोपमम् ॥ ५१ ॥**

यथा—

'अयं पद्मासनासीनश्चक्रवाको विराजते ।
युगादौ भगवान्ब्रह्मा विनिर्मित्सुरिव प्रजाः ॥ ६१ ॥'

अत्र चक्रवाकस्य जगत्स्रष्ट्रा ब्रह्मणोपमितत्वादधिकोपममिदम् ॥

**तदेवेति** । हीनेनोत्कृष्टं यथा नोपमीयत इति लोकमर्यादा तथोत्कृष्टेन हीनम् । तथा हि—चक्रवाकोपमितिमनुसंदधतां विशेषावगतिविधुराणां च सहृदयानां प्रतीतिः स्खलन्ती जनयत्येव वैरस्यमिति सूक्ष्मेक्षिकया दूषणम् ॥

इदमपरमायातमनौचित्यं यत्सादृश्यबुद्ध्या निबन्धेऽप्यसादृश्यपर्यवसानमित्याह—

**यत्त्वतुल्योपमानं तद्वदन्त्यसदृशोपमम् ।**

यथा—

'णमह हरं रोसाणलणिद्दड्ढमुद्धमम्महसरीरम् ।
वित्थअणिअम्बणिग्गअगङ्गासोत्तं व हिमवन्तम् ॥ ६२ ॥'

[नमत हरं रोषानलनिर्दग्धमुग्धमन्मथशरीरम् ।
विस्तृतनितम्बनिर्गतगङ्गास्रोतसमिव हिमवन्तम् ॥]

अत्र कोपानलनिर्दग्धमुग्धमन्मथशरीरस्य हरस्य नितम्बनिर्गतस्रोतसा हिमवद्गिरिणा सहासादृश्यादिदमसदृशोपमम् ॥

---

१. 'यदतु' इति मूलपुस्तकपाठः.

**यस्त्विति**। यद्यपि बलवत्त्वादिना प्रतीयमानं हिमवद्भगवतोरस्ति सादृश्यम्, तथापि वाच्योपमाभ्रमेणायं निबन्धः, सा च न संपन्ना, नहि रोषेण विदग्धमन्मथशरीरदाहो विस्तृतनितम्बनिर्गतगङ्गास्रोतःप्रतिबिम्बभूतः। धातुरङ्गरञ्जितो गङ्गाप्रवाहोऽभिमतस्य भवति ललाटनेत्राग्निज्वालाप्रतिबिम्बमित्यपि न वाच्यम्, येनानघत्वप्रसङ्गात्। नितम्बसंबन्धोक्तिश्च न संगता स्यात्। कथं च मन्मथशरीरदाहः प्रतिबिम्बायत इत्याशयेन व्याचष्टे—अत्रेति। विशेषणयोर्बिम्बप्रतिबिम्बभावाभावे विशिष्टयोरुपमानं संभवतीति मत्वा विशेषणद्वयमदोषायैवेति व्याख्यातवान्॥

इदानीं कविसमयबहिर्भूतत्वेनोपमानौचितीमाह—

**अप्रसिद्धोपमानं यदप्रसिद्धोपमं हि तत्॥ ५२॥**

यथा—

'कुमुदमिव मुखं तस्या गौरिव महिषः शशीव काव्यमिदम्।
शरदिव विभाति तरुणी विकसितपुलकोत्करा सेयम्॥ ६३॥'

अत्र कुमुदमुखयोर्गोमहिषयोः काव्यशशिनोश्च प्रतीयमाने शरत्तरुण्योश्च विधीयमाने सादृश्ये उपमानोपमेयस्याप्रसिद्धत्वादप्रसिद्धोपममिदम्॥

**अप्रसिद्धेति**। कमलमुखयोरिव कुमुदमुखयोर्गोगवययोरिव गोमहिषयोः काव्यशब्दयोरिव काव्यशशिनोरस्ति सादृश्यं सौरभादिकमेवानुपात्तमपि प्रसिद्धतया प्रतीयमानम्। शरत्तरुण्योस्तु न तथा प्रसिद्धमिति विकसितपुलकाङ्कुरा भातीत्येताभ्यामुपात्तम्। पुलक इवाङ्कुरा इति तत्राशयात्। विशिष्टभानस्य च द्वयानुगतत्वेनैव प्रतीयमानत्वात्तथापि पद इवालंकारेऽपि कविभिरप्रयुज्यमानत्वमेव दोष इति व्याचष्टे—अत्रेति। प्रतीयमान इति। इवशब्दस्य द्योतकमात्रत्वात्। अभिधीयमानं व्याख्यातम्॥

वक्रताविशेषविशिष्टस्यैवार्थस्य काव्यकोटिनिवेशादवक्रो हेय इत्याह—

**यदलंकारहीनं तन्निरलंकारमुच्यते।**

यथा—

'कोला खणन्ति मोत्थं, गिद्धा खाअन्ति मडअमंसाइं,।
उलुआ हणन्ति काए, काआ उलुए वि वाअन्ति॥ ६४॥'

[कोलाः खनन्ति मुस्ताः(न्), गृध्राः खादन्ति मृतकमांसानि ।
उलूका घ्नन्ति काकान्, काका उलूकानपि वायन्ति ॥]

अत्र कोलादेः स्वरूपाद्यनभिधानाज्जात्याद्यलंकारासंभवे निरलंकारनामायं वाक्यार्थदोषः । सविशेषणाद्घोरपत्यमित्यादेर्वाक्यदोषाद्भिद्यते ॥

यदिति । वक्रताव्यतिरेकेऽलंकारसामान्यमेव न स्यादिति निरलंकारमित्युक्तम् । वायन्ति क्षिपन्ति खादन्ति । 'वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु' इति धात्वनुसारात् । नन्वस्ति कोलादिस्वरूपमत्र । ततो जात्यलंकारेण वक्रत्वमाक्षिप्यते । विशेषस्य च सामान्यमान्तरीयकत्वात्कथमुच्यते निरलंकारमित्यत आह—अत्रेति । स्वं रूपं चमत्कारकारि कविप्रतिभामात्रप्रकाशनीयं रूपं तदेवालंकारकक्षामधिशेते । न चात्र तथा किंचिदभिहितमतो न जात्यलंकारः । एवमन्योऽप्यलंकारो नास्ति । कथं तर्हि वक्रताभावरूपदीर्घपुच्छ इत्यादेः शब्ददोषाद्भिद्यते तदाह—सविशेषणादिति । तत्र विशेषणप्रयोगे शब्दानामेव वक्रताव्यतिरेकेणापवाद इति शब्ददूषणमिह तु न तथा । किं तूक्तमेव स्वरूपं न वक्रमिति वाक्यार्थ एव दुष्टः ॥

## अश्लीलमिति निर्दिष्टमश्लीलार्थप्रतीतिकृत् ॥ ५२ ॥

यथा—

'उद्यतस्य परं हन्तुं स्तब्धस्य विवरैषिणः ।
पतनं जायतेऽवश्यं कृच्छ्रेण पुनरुन्नतिः ॥ ६५ ॥'

अत्रोद्यतस्य परं हन्तुमिति संभोगारम्भविषया, स्तब्धस्य विवरैषिण इति वराङ्गविषया, पतनं जायतेऽवश्यमिति रेतोविसर्गविषया, कृच्छ्रेण पुनरुन्नतिरिति नष्टरागप्रत्यानयनविषया अश्लीलवाक्यार्थविषया प्रतीतिर्भवति ॥

अश्लीलमिति । उद्यतस्येति । परमन्यं हन्तुमुद्यतस्य विवरैषिण इति प्रमादकृतावधानस्य स्तब्धस्यात्मन्युत्कर्षाभिधानेनान्यानवधीरयतः पतनमावश्यकमुद्गमः कृच्छ्रादिति संसर्गोऽभिमतः । एषामेव पदार्थानां संसर्गान्तरमश्लीलमेवेत्याह—अत्रोद्यतस्येति । एतेन पददोषाद्भेद उक्तः ॥

देशकालादेः काव्याङ्गत्वात्तद्विरोधेनार्थो दुष्टः । विरोधश्च बाधः । स प्रमाणेनैव ततो लोकादिविरोधस्यालंकारसमयसिद्धस्य प्रमाणविरोधपर्यवसायित्वं विवक्षन्नाह—

**विरुद्धं नाम तद्यत्र विरोधस्त्रिविधो भवेत् ।**
**प्रत्यक्षेणानुमानेन तद्वदागमवर्त्मना ॥ ५४ ॥**
**यो देशकाललोकादिप्रतीपः कोऽपि दृश्यते ।**
**तमामनन्ति प्रत्यक्षविरोधं शुद्धबुद्धयः ॥ ५५ ॥**

तत्र देशविरोधो यथा—

'सुराष्ट्रेष्वस्ति नगरी मथुरा नाम विश्रुता ।
अक्षोटनारिकेराढ्या यदुपान्ताद्रिभूमयः ॥ ६६ ॥'

अत्र सुराष्ट्रेषु मथुरा नास्ति । तत्पर्यन्तादिभूमिषु चाक्षोटनारिकेराणामभावात् । देशोऽद्रिवनराष्ट्रादिरित्ययं देशकृतः प्रत्यक्षविरोधः ॥

**विरुद्धमिति** । तत्र देशकालादौ प्रत्यक्षत एव वर्ण्यमानस्याभावो निश्चीयते इति देशादिविरोधः प्रत्यक्षविरोधः । शूरसेनेषु मथुरा न सुराष्ट्रेषु । तत्पर्यन्तभूमिष्वक्षोटा नालिकेरा वा न संभवन्ति । अद्रीणां कथं देशत्वमित्यत आह—देशोऽद्रिवनराष्ट्रादिरिति ॥

कालविरोधो यथा—

'पद्मिनी नक्तमुन्निद्रा स्फुटत्यह्नि कुमुद्वती ।
मधुरुत्फुल्लनिचुलो निदाघो मेघदुर्दिनः ॥ ६७ ॥'

अत्र पद्मिन्या नक्तं कुमुद्वत्या अह्नि मधौ निचुलानामुन्निद्रत्वाद्यभावान्निदाघस्य चामेघदुर्दिनत्वात् । कालो नक्तं दिनर्तव इति कालकृतोऽयं प्रत्यक्षविरोधः ॥

**पद्मिनीति** । नक्तं रात्रौ । मधुर्वसन्तः । निचुला हिज्जलाः । ते वर्षासु पुष्यन्ति न वसन्ते । यद्यपि कालस्वरूपमप्रत्यक्षं तथापि तदुपाधीनां व्यवहाराङ्गतेव प्रत्यक्षता चेत्याह—कालो नक्तं दिनर्तव इति ॥

लोकविरोधो यथा—

'आधूतकेसरो हस्ती तीक्ष्णशृङ्गस्तुरङ्गमः ।
गुरुसारोऽयमेरण्डो निःसारः खदिरद्रुमः ॥ ६८ ॥'

अत्र हस्तिहयैरण्डखदिराणां केसरादिसद्भावस्य प्रत्यक्षेणानुपलम्भात् । जङ्गमस्थावरो लोक इति लोककृतोऽयं प्रत्यक्षविरोधः ॥

**आधूतेति ।** अन्ते प्रत्यक्षविरोधशब्दार्थं व्याचष्टे—प्रत्यक्षेणानुपलम्भादिति । कथमयं लौकिकविरोध इत्यत आह—जङ्गमेति । जङ्गमस्थावरं जीवच्छरीरं लोकः । तत्र जङ्गमं गवाश्वादि स्थावरं लतावृक्षादि राष्ट्रादावेव देशपरिभाषा इदं प्रकारान्तरेण देशशब्देनाभिधीयते ॥

युक्त्यौचित्यप्रतिज्ञादिकृतो यस्त्विह कश्चन ।
अनुमानविरोधः स कविमुख्यैर्निगद्यते ॥ ५६ ॥

तत्र युक्तिविरुद्धं यथा—

'सुरहिमहुपाणलम्पडभमरगणाबद्धमण्डलीबन्धम् ।
कस्स मणं णाणन्दइ कुम्मीपुट्ठट्ठिअं कमलम् ॥ ६९ ॥'

[सुरभिमधुपानलम्पटभ्रमरगणाबद्धमण्डलीबन्धम् ।
कस्य मनो नानन्दयति कूर्मीपृष्ठस्थितं कमलम् ॥]

अत्र कूर्मीपृष्ठे कमलोद्गतेरयुक्तियुक्तत्वाद्युक्तिविरुद्धमिदम् ॥

**युक्तीति ।** सामान्यतस्तावदनुमानविरोधो यत्प्रमाणाभावः । नहि प्रमेयाभावे प्रमाणं प्रसिद्धम् । तदयमर्थो युक्तिः प्रमाणम् । आधूतकेसरेत्यादौ उदाहरणे क्वचिदेव व्यक्तिविशेषे केसरादिसंबन्धप्रतिपादनं कथमन्यथा तेषामेरण्डं निर्दिशति । ततो भवति प्रत्यक्षेणैव विरोधः । इह तु न तथा । नहि विशेषतः कापि कूर्मपृष्ठव्यक्तिरस्तीति सामान्याकारेण विवक्षितम् । ततश्च कमलजातेः पङ्कजप्रभवाया एव निश्चयात्कूर्मपृष्ठादुद्गमे न कश्चित्प्रमाणं कदापि कस्याप्यवतरतीत्याशयवान् व्याचष्टे—अत्रेति । अयुक्तियुक्तत्वादिति । युक्तेः प्रमाणत्वेनासंबद्धत्वादित्यर्थः ॥

औचित्यविरुद्धं यथा—

'पट्टंसुउत्तरिज्जेण पामरो पामरीएँ परिपुसइ ।
अइगरुअकूरकुम्भीभरेण सेउल्लिअं वअणम् ॥ ७० ॥'

[पट्टांशुकोत्तरीयेण पामरः पामर्याः प्रोञ्छति ।
अतिगुरुकूरकुम्भीभरेण स्वेदार्द्रितं वदनम् ॥]

अत्र पामरस्य पट्टांशुकोत्तरीयाभरणानौचित्याद् औचित्यविरुद्धमिदम् ॥

**औचित्यविरुद्धमिति ।** औचित्यं योग्यता तस्य परामृश्यमानस्य विवक्षितविपरीतपर्यवसानमन्योऽनुमानविरोधः । तथा हि—पट्टांशुकोत्तरीयेण पामरः पामर्या प्रोञ्छति । अतिगुरुककूरकुम्भीभरेण खेदार्द्रितं वदनमित्यत्र पूर्ववत्संबन्धग्राहकप्रमाणाभावः । कदाचिद्राजप्रसादादिना तथा संभवात् । किं तु पामरौचित्यप्रतिसंधाने पट्टांशुकावगुण्ठनमनुचितम् । विदग्धनेपथ्यपरिग्रहादिनागरवृत्तापरिचय एव पामरत्वम् । ततश्चायमर्थो भवति—पट्टांशुकसंबन्धायोग्येयं पामरत्वादिति । कूरं भक्तम् । कुम्भी कलशी ॥

प्रतिज्ञाविरुद्धं यथा—

'यावज्जीवमहं मौनी ब्रह्मचारी च मे पिता ।
माता च मम वन्ध्यासीत्स्मराभोऽनुपमो भवान् ॥ ७१ ॥'

अत्र स्वयं वक्तुरेव 'यावज्जीवमहं मौनी' इत्यादिपदानामुक्त्या प्रतिज्ञाविरोधात्प्रतिज्ञाविरुद्धमिदम् ॥

**प्रतिज्ञाविरुद्धमिति ।** अभ्युपगमवाक्यं प्रतिज्ञा । यथा—'यद्यदादिशति स्वामी तत्करोम्यविचारयन्' इति । साध्यनिर्देशश्च—'अयं स रशनोत्कर्षी पीनस्तनविमर्दनः । नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥' इति । द्वयमपि प्रतिज्ञापदेनाभिमतम् । तत्राद्ये 'यावज्जीवमहं मौनी' इत्युदाहरणम् । अव्याहारो मौनम् । तदभ्युपगमवाक्येनैव बोध्यते । तथा हि—नायं मौनी वचनवत्त्वादित्यभ्युपगम्य मौनाभावपर्यवसन्नमिति तृतीयोऽयमनुमानविरोधः । द्वितीयपक्षकक्षीकरणेन चतुर्थोदाहरणे 'ब्रह्मचारी च मे पिता, माता च मम वन्ध्या' इति वक्ता यस्यौरसः सुतः स पितृपदेनाभिमतो न च तस्य ब्रह्मचारित्वं संभवति । माता जनन्येवाभिधीयते न च तस्या वन्ध्यात्वं संभवति । परस्परव्याघातो विरोधः । अयं च पञ्चमप्रकारो व्यापकद्वारा विरोधः । यथा—स्मराभोऽनुपम इति । नहि स्मराभत्वं लोके प्रसिद्धं किंतु स्मरतुल्यतां वदन् सोपमानत्वमभ्युपगच्छति । तच्चानुपमत्वेन विरुद्धम् । ततो व्यापकविरोधोऽयम् । यथा—वह्निरनुष्ण इति । आदिग्रहणाद्दृष्टान्तद्वारकोऽनुमानविरोधः संगृहीतः ॥

**धर्मार्थकामशास्त्रादिविरोधः कोऽपि यो भवेत् ।**
**तमागमविरोधाख्यं दोषमाचक्षते बुधाः ॥ ५७ ॥**

तेषु धर्मशास्त्रविरोधो यथा—

'असावनुपनीतोऽपि वेदानधिजगे गुरोः ।
स्वभावशुद्धस्फटिको न संस्कारमपेक्षते ॥ ७२ ॥'

अत्रानुपनीतस्य वेदाध्ययनानधिकाराद्धर्मशास्त्रविरोधः ॥

**धर्मार्थेति । वेदाध्ययनानधिकारादिति ।** 'अकृतव्रतबन्धे तु गुरावुपरते सति । नाभिव्याहारयेद् ब्रह्म स्वधानिनयनादृते ॥' इति धर्मशास्त्रम् ॥

अर्थशास्त्रविरोधो यथा—

'कामोपभोगसाकल्यफलो राज्ञां महीजयः ।
अहंकारेण जीयन्ते द्विषन्तः किं नयश्रिया ॥ ७३ ॥'

अत्र महीजयस्य फलत्वेन कामोपभोगानामर्थशास्त्रकारैरननुमतत्वाच्छत्रुविजये चाहंकारस्याहेतुत्वादर्थशास्त्रविरोधः ॥

**कामेति । अत्र महीजयस्येति ।** महीजयस्य धर्मः फलमिति नीतिशास्त्रे स्थितम् । अहंकारो मानः स न शत्रुविजये साधनम् । अरिषड्वर्गत्यागे हीन्द्रियजयः । तथा विजिगीषुता । तया च शत्रुपरिभव इति । यदाह—स रघुराड्विललास इत्युपक्रम्य कौटिल्याचार्यः मानाद्रावणः परदारानप्रयच्छन् दुर्योधनो राज्यांशं चेति ॥

कामशास्त्रविरोधो यथा—

'तवोत्तरोष्ठे बिम्बोष्ठि दशनाङ्को विराजते ।
पूर्णसप्तस्वरः सोऽयं भिन्नग्रामः प्रवर्तते ॥ ७४ ॥'

**अत्रोत्तरोष्ठे दशनाङ्कस्य कामशास्त्रकारैरननुज्ञानात्कामशास्त्रविरोधः । भिन्नग्रामाणां च पूर्णसप्तस्वरत्वानुपपत्तेः । कलाविरोधेऽपि तदंशत्वात्कामशास्त्रविरोध एव ॥**

**तवेति ।** अत्रोत्तरोष्ठ इत्युपरितन ओष्ठ उत्तरोष्ठमन्तरमुखं नयनान्तं च मुक्त्वा

चुम्बनवद्दशनच्छेद्यस्थानानीति कामसूत्रम् । भिन्नग्रामरागाणामिति । भिन्नमार्गेषु सप्तस्वराणां समवायो नोपनिबद्धः । तथा च 'प्रांशुस्तु धैवतन्यासः पञ्चमर्षभवर्जितः । षड्जो-दीच्यतां जा(या)तो भिन्नषड्ज उदाहृतः' । तमज्ञोऽप्याह—'षाडवौडविके जाती भिन्नग्राम उदाहृतः' इति । ततश्च षड्वा पञ्च वा स्वरा भवन्ति भिन्नग्रामे न तु सप्त । कामशास्त्रविरोधप्रस्तावे कथं कलाविरोध उदाह्रियत इत्यत आह—तदंशत्वादिति । गीतादिकलाचतुःषष्टेः कामाङ्गतया कामसूत्रकारैरुपदेशाद्भवति तद्विरोधे कामशास्त्रविरोध इत्यर्थः । आदिग्रहणाद्देवताभक्तितो मुक्तिर्न तत्त्वज्ञानसंपदेत्यादिकं मोक्षादिशास्त्रविरुद्धमुदाहरणीयम् ॥

दोषाणां प्रथममुद्देशोऽयमभिसंधाय कृतस्तं विशेषसंहारव्याजेन स्फुटयति—

एवं पदानां वाक्यानां वाक्यार्थानां च यः कविः ।
दोषान्हेयतया वेत्ति स काव्यं कर्तुमर्हति ॥ ५८ ॥
अलंकृतमपि श्रव्यं न काव्यं गुणवर्जितम् ।
गुणयोगस्तयोर्मुख्यो गुणालंकारयोगयोः ॥ ५९ ॥
त्रिविधाश्च गुणाः काव्ये भवन्ति कविसंमताः ।
बाह्याश्चाभ्यन्तराश्चैव ये च वैशेषिका इति ॥ ६० ॥
बाह्याः शब्दगुणास्तेषु चान्तरास्त्वर्थसंश्रयाः ।
वैशेषिकास्तु ते नूनं दोषत्वेऽपि हि ये गुणाः ॥ ६१ ॥
चतुर्विंशतिराख्यातास्तेषु ये शब्दसंश्रयाः ।
ते तावदभिधीयन्ते नामलक्षणयोगतः ॥ ६२ ॥
श्लेषः प्रसादः समता माधुर्यं सुकुमारता ।
अर्थव्यक्तिस्तथा कान्तिरुदारत्वमुदात्तता ॥ ६३ ॥
ओजस्तथान्यदौर्जित्यं प्रेयानथ सुशब्दता ।
तद्वत्समाधिः सौक्ष्म्यं च गाम्भीर्यमथ विस्तरः ॥ ६४ ॥
संक्षेपः संमितत्वं च भाविकत्वं गतिस्तथा ।
रीतिरुक्तिस्तथा प्रौढिरथैषां लक्ष्यलक्षणे ॥ ६५ ॥

तत्र

गुणः सुश्लिष्टपदता श्लेष इत्यभिधीयते ।

यथा—

'उभौ यदि व्योम्नि पृथक्प्रवाहावाकाशगङ्गापयसः पतेताम् ।
तदोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य वक्षः ॥ ७५ ॥'

अत्र भिन्नानामपि पदानामेकपदताप्रतिभासहेतुत्वेन संदर्भस्य सुश्लिष्टत्वादयं श्लेषो नाम शब्दगुणः ॥

**एवमिति** । तदेवं दोषलक्षणे वृत्ते क्रमप्राप्ता गुणा लक्षयितव्याः । तदेवमोजःप्रसादादयो गुणाः । यमकादयस्त्वलंकारा इति पूर्वप्रसिद्धौ सत्यां विचार्यते । किमेषां मिथो भेदनिबन्धनम्, कथं चालंकारेभ्यो गुणानां पूर्वनिपातः, रसस्य हि दोषाभावादित्रयसंस्कृत एव पदलाभ इत्यस्ति पश्चाद्भावे निबन्धनमिति तत्राह— अलंकृतमपीति । रसावलम्बिनो गुणाः, शब्दार्थावलम्बिनस्त्वलंकारा इति काश्मीरकाः । तदगमकम् । तथा हि—यदि काव्यस्य रसप्रधानात्मकतामाश्रित्यायं विभागः, अलंकारा अपि तर्हि तत्प्रवणा एव । अथ नायं नियमो यत्सर्वत्र रसः प्रधानमिति, तदात्र गुणेष्वपि कथं तदालम्बननियमः । किं चात्र प्रसादादिवत् श्लेषादयोऽपि शब्दार्थगता एव प्रत्यभिज्ञायन्ते तत्कथमयं विभागः । यद्यपि शब्दार्था ज्ञायन्ते, तथापि रसप्रवणा इति चेत् । किमिदं रसप्रवणत्वं, रसाश्रितत्वं तावन्न संभवत्येव । रसप्रतीतिपर्यवसानं च यथाकथंचिदलंकारेष्वपि तुल्यमित्यविचारितरमणीयोऽयं मार्गः । लोकशास्त्रवचनातिगामी कश्चिद्विशेषः शोभापदाभिलप्यो भवन्नखिलश्रव्यशब्दः शब्दार्थौ विषयीकरोति । ततश्च तथाभूतशोभानिष्पत्तिहेतवो गुणास्तदुत्कर्षहेतवस्त्वलंकाराः । यदाह—'काव्यशोभायाः कर्तारो धर्मा गुणास्तदतिशयहेतवस्त्वलंकाराः' इत्यन्ये, तदपि न । अस्य रसादिवदव्याप्तेः । नहि तेषां रीतिशरीरान्तर्निवेशः कैश्चिदभ्युपगम्यते, तस्मादालंकारिकसमयानुपाती श्लेषाद्यन्यतमो गुणः । जात्याद्यन्यतमश्चालंकार इति विभागः । तत एव च शोभाकारित्वेन गुणानामप्यलंकारपक्षनिक्षेपं करिष्यति । उद्भूतगुणं तु स्फुटालंकारहीनमपि चमत्कारमावहत्येव । यथा—'का त्वं शुभे कस्य परिग्रहो वा किं वा मदभ्यागमकारणं ते । आचक्ष्व मत्वा वशिनां रघूणां मनः परस्त्रीविमुखप्रवृत्ति ॥' यतो गुणयोगो मुख्यस्ततः प्रथममुद्दिष्टो लक्षितश्चैषः । सामान्यगुणस्थितौ गुणा-

न्विभजते—त्रिविधाश्चेति । शब्दः शरीरस्थानीयोऽधिष्ठेयतया प्रथमप्रतिसंधेयतया च बाह्यः । ततस्तदाश्रिता गुणा अपि बाह्याः । अर्थस्त्वात्मतुल्योऽधिष्ठायकतया पश्चाद्ग्राह्यतया चान्तरस्तेन तदाश्रिता गुणा अप्यान्तराः । अथेदानीं येषामग्रे दोषत्वं ततो गुणभावः । केचिद्विशेषमासाद्यन्ते वैशेषिकाः । पूर्वं दोषा अपि विशेषयोगेन गुणीभवन्तीत्यभिप्रायात् । 'माधुर्यौजःप्रसादास्त्रय एव गुणाः' इति ध्वनिकारस्य मतं निरस्यति—चतुर्विंशतिरिति । परस्परसंकीर्णत्वादुपाधीनामिति भावः । न चैतदस्माकं मनीषामात्रेण कल्पनमित्याह—आख्याता इति । निष्ठाप्रत्ययेनेदंप्रथमता द्योत्यते । उक्तविशेषादेव शब्दगुणानां पूर्वभाव इत्याह—तेष्विति । अभिधानं द्विविधं विभागतः, लक्षणतश्चेत्याह—नामलक्षणयोगत इति । पदघटनव्यवस्थितौ गुणान्तरगवेषणम् । अतः प्रथमं श्लेषलक्षणमाह—तत्रेति । श्लिष्टानि घटितानि पदानि यत्र तस्य भावस्तत्ता । न च घटनामात्रस्य गुणभाव इति शङ्क्यम् । सुपदं शोभना घटनेत्यर्थः । शोभनत्वं घटनाया मसृणत्वमेकताप्रतिभानसामर्थ्यं यद्बाह्यं सूत्रमुरःस्थल इति । बीजं चात्र श्रुत्यनुप्रासवत्त्वमलक्षितसंधिता च । तथा हि प्रकृतोदाहरणे उभावित्युकारभकारावोष्ठ्यौ । यदि 'व्य' इत्याद्यन्तौ वकारयकारौ तालव्यौ । न चायं वर्णानुप्रासः । ईषत्स्पृष्टत्वादिभेदात् । मध्ये दकारवकारौ दन्त्योष्ठ्यौ । 'भ्रि' इत्यत्र मकारो भकारेण, नकारो दकारेण समानश्रुतिक इत्यादि बोद्धव्यम् । तथा 'पृथक्प्रवाहौ' इति ककारस्य पवर्गगमनैकता प्रतिभासते, 'प्रवाहावाकाश' इत्यौकारस्यावादेशेन वर्णान्तरनिष्पत्त्या । एवं 'पयसः पतेताम्' इत्यादावुन्नेयम् । पृथगिति पार्श्वद्वये । तेन वक्षःस्थलदक्षिणवामभागयोर्लम्बमानो द्विसरो हार इति लभ्यते । अस्य वक्ष इति । अत्रास्येति पदेन नान्यस्य हार इत्थमनुपमो न चान्यस्य वक्षःस्थलमाकाशवदुन्नतविस्तीर्णमिति भगवतः सकलजगद्विलक्षणत्वध्वनिरित्याराध्याः ॥

**प्रसिद्धार्थपदत्वं यत्स प्रसादो निगद्यते ॥ ६६ ॥**

यथा—

'गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं
　छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु ।
विश्रब्धैः क्रियतां वराहपतिभिर्मुस्ताक्षतिः पल्वले
　विश्रामं लभतामिदं च शिथिलज्याबन्धमस्मद्धनुः ॥७६॥'

अत्र 'गाहन्तां महिषा निपानसलिलम्' इत्यादिप्रसिद्धार्थपदोपादानात्प्रसादः ॥

**प्रसिद्धार्थेति**। अस्यार्थः प्रागेव विवृतः। प्रसादो द्विधा—वाच्यविषयः, प्रतीयमानविषयश्च। तत्र प्रतीयमानविषयो यथा—'एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी। लीलाकमलपत्राणि गणयामास पार्वती ॥' अत्र श्रुतावगतादेव वाक्याल्लज्जादयो हस्तदत्ता इव प्रकाशन्ते ॥ वाक्यविषयो द्विधा भवति। ग्राम्यैरेव ग्राम्य उपनागरैर्वा, पदैः संदर्भनिर्वाहे। आद्यो यथा—'चन्द्रे कलङ्कः सुजने दरिद्रता विकाशलक्ष्मीः कमलेषु चञ्चला। मुखाप्रसादः सधनेषु सर्वदा यशो विधातुः कथयन्ति खण्डितम् ॥' द्वितीयमुदाहरति—गाहन्तामिति। अत्र प्रथमपादे गाहन्तां महिषा इति ग्राम्यम्। निपानसलिलमित्युपनागरम्। शृङ्गैरिति ग्राम्यम्। मुहुरित्युपनागरम्। ताडितमिति ग्राम्यम्। द्वितीयपादे कदम्बकरोमन्थशब्दावुपनागरौ शेषाणि ग्राम्याणि। एवं च चरमयोरपि स्वतो विवेचनीयम्। गाहनं विलोडनं तन्निःशङ्कमेव भवतीति विस्रम्भध्वनिः। अत एव त्रासाभावात्प्रकृतिप्रत्यापत्तौ। शृङ्गाभ्यां पर्यायेण जलताडनं महिषजातिः। छायाश्रयणं यूथबन्धश्च मृगजातिः। चिरपरस्परवार्तानभिज्ञानाद्दिवा निष्पलायनेन रोमन्थोऽपरिचित इवासीत्तस्येदानीं शिक्षाक्रमेण यदि परिचयः स्यादित्यभ्यस्यत्विति ध्वनिः। वराहपतिभिरिति न यादृशतादृशानामस्मन्मृगयासंरम्भगोचरत्वमिति प्रकाश्यते। ननु चात्र कर्तृप्रक्रमभेदो दूषणं कस्मान्न भवति। नैतत्। आपातशौण्डेषु परिणतिभीरुषु च महिषेषु स्वभावभीतेषु मृगेषु न तथायं संरम्भते यथा पुनरावृत्तिचतुरेषु प्रकारकोविदेषु च वराहेषु। ततश्च तेषामुचितक्रियासु कर्तृतामात्रमेव न सोढवानिति सांप्रतं कर्तृताभ्यनुज्ञानेन व्यज्यते। ततस्तृतीयायामौचित्यनिवेशिन्यां प्रक्रमभेदोऽप्युचित एवेति व्यक्तिविवेककारादीनामपि संमतः पन्थाः। इदं चेति चकारेण चेदस्मद्धनुरारूढमवतीर्णं वा तदैव संरम्भगोचराणां भयविस्रम्भाविति कोपप्रकर्षः। अत एवास्मदिति बहुवचनं सजीवम् ॥

**यन्मृदुप्रस्फुटोन्मिश्रवर्णबन्धविधिं प्रति।**
**अवैषम्येण भणनं समता साभिधीयते ॥ ६७ ॥**

यथा—

'यच्चन्द्रकोटिकरकोरकभारभाजि
बभ्राम बभ्रुणि जटापटले हरस्य ।
तद्वः पुनातु हिमशैलशिलानिकुञ्ज-
झाङ्कारडम्बरविरावि सुरापगाम्भः ॥ ७७ ॥'

अत्रोपक्रमादासमाप्ति स्फुटबन्धस्य निर्वाहात्समत्वम् ॥

**यदिति** । प्रतीत्यन्तेन मार्गो व्याख्यातः । अवैषम्येण भणनमित्यनेन वाग्भेदः स्वरेषु ह्रस्वान्त्याः, व्यञ्जनेषु वर्गान्त्या दन्त्याश्च मृदवः कोमला वर्णाः । दीर्घाः स्वराः व्यञ्जनेषु णकारवर्जटवर्गरेफशषहा अदन्त्यसंयोगाश्च प्रस्फुटाः । शेषाणि व्यञ्जनानि दन्त्यसंयोगाश्चोन्मिश्रमध्यमा वर्णास्तेषामन्यतमैर्वर्णैर्यो बन्धनविधिस्तं प्रति यदवैषम्येण उपक्रमनिर्वाहादिना करणेन भणनमुक्तिः सा समता । न चेयं दोषाभावमात्रमेकजातीयवर्णपरिचयप्रबन्धप्रवेशनिर्वाहाणां सिद्धिः शक्तिव्युत्पत्तिरूपतया प्रधानोत्कर्षपर्यवसानाद् । न च दोषाभावस्यैवंरूपता केनचित्प्रतिषिद्धा । अत एव श्लेषप्रसादयोरपि गुणभावः सिद्धः । ननु 'रक्ताशोककृशोदरी क्व नु गता त्यक्त्वानुरक्तं जनं नो दृष्टेति मुधैव चालयसि किं वाताभिभूतं शिरः । उत्कण्ठाघटमानषट्पदघटासंघट्टदष्टच्छदस्तत्पादाहतिमन्तरेण भवतः पुष्पोद्गमोऽयं कुतः ॥' इत्यत्र वैषम्यं दोष एव स्यात् । न ह्यत्र मुक्तस्थाने स्फुटता । तस्माद्यत्किंचिदेतद् । तदेवं निर्वाह्यत्रैविध्यात्समता त्रिरूपा भवति ग्राम्या परुषा उपनागरिका च । तत्रोन्मिश्रप्रायसंदर्भनिर्वाहे ग्राम्या । यथा—'पुरः पाण्डुच्छायं तदनु कपिलिम्ना कृतपदं ततः पाकोद्रेकादरुणगुणसंवर्धितवपुः । शनैः कोशारम्भे स्थपुटनिजविष्कम्भविषमे वने पीतामोदं बदरमरसत्व कलयति ॥' परुषा यथा—यच्चन्द्रेति । बालेन्दुमयूखमुकुलजालनिचुलितासु परमेश्वरजटावल्लरीषु भ्रमणाध्यासादिवाद्यापि हिमाद्रिकुञ्जेषु झाङ्कारिगङ्गाम्भ इति प्रतीयमानोत्प्रेक्षा । उपनागरिका यथा—'वसने परिधूसरे वसाना नियमक्षाममुखी धृतैकवेणिः । अतिनिष्करुणस्य शुद्धशीला मम दीर्घां विरहव्यथां व्यनक्ति ॥' अत्रास्मत्सहाध्यायिनः पूर्वार्धमेवोपनागरिकोदाहरणं मन्यन्ते । उत्तरार्धे हि विष्केत्यादिवर्णनिवेशनादुन्मिश्रत्वमेव । इयमपरोन्मिश्रा संदर्भजातिर्यत्कोमलकठोरवर्णतुल्यतया निर्वहणमिति ॥

या पृथक्पदता वाक्ये तन्माधुर्यमिति स्मृतम् ।

यथा—

'स्थिताः क्षणं पक्ष्मसु ताडिताधराः
पयोधरोत्सेधनिपातचूर्णिताः ।
वलीषु तस्याः स्खलिताः प्रपेदिरे
चिरेण नाभिं प्रथमोदबिन्दवः ॥ ७८ ॥'

अत्र पदेषु संहिताभावात्पृथक्पदत्वेन माधुर्यम् ॥

**या पृथगिति** । पृथगिव पदानि यत्र भासन्ते स पृथक्पदः संदर्भ इत्युपमागर्भो बहुव्रीहिश्च । तस्य भावस्तत्ता । माधुर्यमुक्तस्वरूपं तच्छब्दगतं पृथक्पदतया विच्छिद्यत इति । तदेव माधुर्यमुक्तम् । औचित्येन हि समासव्यतिरेक आकृष्यते कदाचिदनुद्धतो वा समासः । अनुद्धतिरनुल्लेखः । तदुक्तम्—'अवृत्तिर्मध्यवृत्तिर्वा माधुर्ये घटना तथा' इति । अत एव 'समासनिवृत्तिपरमेतत्' इति वामनः । कश्चित्समासो रसौचित्येनाकृष्टः परिभाव्यमानो मनीषिभिश्चमत्कारकारणं भवति । यथा—'तेषां गोपवधूविलाससुहृदां राधारहःसाक्षिणां क्षेमं तत्र कलिन्दशैलतनयातीरे लतावेश्मनाम् । विच्छिन्ने स्मरतल्पकल्पनमृदुच्छेदोपयोगेऽधुना ते नूनं जरठीभवन्ति विगलन्नीलत्विषः पल्लवाः ॥' अत्र तच्छब्दो येषां विलाससंपत्तिस्वभावलब्धप्रकर्षाणामनुभव एव साक्षीति विशेषप्राधान्यविवक्षया नसमासेनानिगमनात् । न या कापि वधूः, अपि तु गोपसंबन्धिनी कृतगोपाचारचातुरीपराधीना । नान्यत्र नीरसप्राये क्वचन सौहार्दं किं तु विलास एव । सोऽपि न यःकश्चित्, अपि तु गोपवधूसंबन्धीत्येवं बहूनां पिण्डीभावविवक्षया समास एवोचितः । एतावतैवाच्छेदोऽप्युचित एव । सर्वस्वायमानत्वात्तत्संबन्धजनितस्य विशेषस्य पृथगेवोक्तिरुचिता । राधारहःसाक्षिणामित्यत्रापि समासः पूर्ववत् । यद्यपि राधासंबन्धस्य वैवक्षिकं प्राधान्यमिति न समासः प्रतिभासते तथापि यदन्यस्य राधारहसि निवेशः क्षम इति भावयन्सुहृदामित्यपहाय साक्षिणामित्युक्तवान् । साक्षी हि तटस्थ एव व्याप्रियते । तेनावश्यकर्तव्यसाक्षिताप्राधान्यविवक्षया संभवति विरोधादित्यवसेयम् । स्थिता इति । पक्ष्मावस्थानेऽधरताडने स्तनतटनिपाते वलिभङ्गस्खलने नाभिनिम्नप्राप्तौ जलबिन्दूनां कर्तृतानिर्देशात्स्वाच्छन्द्यमुन्मीलितम् । तथा च—गौर्या बाह्यसंवेदनाभावस्तेन भगवद्गतोऽनुरागप्रकर्षः प्रथमपादेन । निदाघतापच्छिदा रजोहरणेन वसुंधरा सौरभोन्मीलनेन मयूरकेकायितादिना त्रिभुवनस्यापि

ये चमत्कारास्पदमिति ध्वनितम् । तथाभूतानामथ संवेदने पूर्वं एवाभिप्रायः । ताडितेत्याकारेण च्छेदोन्मेषः पयोधरेत्यादावोकारः । धकारतकारौ ॥

**अनिष्ठुराक्षरप्रायं सुकुमारमिति स्मृतम् ॥ ६८ ॥**

यथा—

'मण्डलीकृत्य बर्हाणि कण्ठैर्मधुरगीतिभिः ।
कलापिनः प्रनृत्यन्ति काले जीमूतमालिनि ॥ ७९ ॥'

अत्र सर्वकोमलत्वेऽसति श्लेषविपर्ययदोषशैथिल्याभावाद्बाहुल्याद्वर्णानामनैष्ठुर्यात्सौकुमार्यम् ॥

**अनिष्ठुरेति** । समस्त एव गुम्फे द्वित्राणि त्रिचतुराणि प्रस्फुटान्यक्षराणि निवेश्यन्ते स किलान्तरान्तरोपदंशन्यायेन चित्रास्वादपर्यवसायी सुकुमार इति प्राचां मतम् । अत एव समताया भेदः । मृद्वीकापाकः पुनरन्यादृशो वक्ष्यते । अनिष्ठुरे सुकुमारव्यवहारो लोके दृष्टः । मण्डलीकृत्येत्यादौ प्रथमपादे मण्डेति, कृत्येति, बर्हेति अत्र संयोगत्रयम् । द्वितीयपादे ण्ठेति, र्मेति च संयोगद्वयमुपन्यस्य गीतिदीर्घस्वरनिवेशो रूपान्तरमादाय विशेषशोभाहेतुः । तृतीयपादे केति न इति प्रनृत्यन्तीति च दीर्घविसर्गसंयोगा इति व्यन्तरम् । चतुर्थपादे दीर्घस्वरा एवान्तरान्तरेति सैव वासना । ननु अनिष्ठुराक्षरमयत्वं सुकुमारतेति वक्तव्ये प्रायशब्दः केन प्रयोजनेनेत्यत आह—अत्रेति । न चायमर्थगुणः स हि वाक्यार्थे धर्मिणि निरूप्यते । अयं तु पदसमुदाय इति युक्तं शब्दगुणेषु परिगणनम् । संमितत्वमन्यथा भविष्यति ॥

**यत्र संपूर्णवाक्यत्वमर्थव्यक्तिं वदन्ति ताम् ।**

यथा—

'वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ ८० ॥'

अत्र वाक्यपरिपूर्णतयार्थसमर्पकत्वादर्थव्यक्तिः ॥

**वागर्थाविवेति** । अत्र वन्दे इत्युत्तमपुरुषवचनेनैवाहमिति प्राप्तम् 'अस्मद्युत्तमः' इत्यत्र स्थानिनीत्यभिधानात् । किमिति कर्मापेक्षायां पार्वतीपरमेश्वराविति । तावपि

किंभूताविल्यतो जगतः पितराविति । तेन लक्ष्मीनारायणादिवैधर्म्येण नमस्कार्यत्वम् । एकशेषशब्देनैव मातृशब्दार्थः । स्त्रीपुंसयोरित्यौचित्याद्वागर्थाविवेति । किमर्थं नमस्कुरुत इत्यत्र वागर्थप्रतिपत्तये इति । तदेवं यादृशो यावांश्च विशेषणविशेष्यप्रकारोऽभिमतः स सर्व एव वागित्याद्युपात्तशब्दसमुदायमात्रेण निष्प्रत्यूहमवगम्यत इत्यर्थव्यक्तिशब्दार्थव्याख्यानेन स्फुटयति—अत्रेति । अर्थसमर्पकत्वादित्यनेन शब्दगुणता व्यक्तीकृता ॥

**यदुज्ज्वलत्वं बन्धस्य काव्ये सा कान्तिरुच्यते ॥ ६९ ॥**

यथा—

'निरानन्दः कौन्दे मधुनि विधुरो बालबकुले
न साले सालम्बो लवमपि लवङ्गे न रमते ।
प्रियङ्गौ नासङ्गं रचयति न चूते विचरति
स्मरंल्लक्ष्मीलीलाकमलमधुपानं मधुकरः ॥ ८१ ॥'

अत्र बन्धस्य छायावत्त्वेनौज्ज्वल्यं तदेव च कान्तिरुच्यते ॥

**यदुज्ज्वलत्वमिति** । किं पुनरिदमुज्ज्वलत्वं नाम । केचिदाहुरनुप्रासबहुत्वमिति, तदसत्—'तस्याः सुस्राव नेत्राभ्यां वारि प्रणयकोपजम् । कुशेशयपलाशाभ्यामवश्यायजलं यथा ॥' इत्यादावनुप्रासबहुलता संभवति । एवंविधं हि पुराणच्छायमामनन्ति । कान्तिविपर्ययः पुराणी छाया । यथा—'व्रजति गगनं भल्लातक्या दलेन सहोपमाम्' इति । अत एवाह—'पुराणचित्रस्थानीयं तेन वन्ध्यं कवेर्वचः' इति । तस्मादप्रहतपदैरारम्भः संदर्भस्यैव कान्तिः । तद्यथा—कुसुमस्य धनुरिति प्रहतम् । कौसुममित्यप्रहतम् । जलनिधाविति प्रहतम् । अधिजलधीत्यप्रहतम् । गुरुत्वमिति प्रहतम् । गौरवमित्यप्रहतमित्यादि । अत एव प्रहतशङ्का । चमत्कारित्वं तु सहृदयाह्लादकत्वमस्ति हि तुल्येऽपि वाचकत्वे पदानां कश्चिदवान्तरो विशेषो यमधिकृत्य किंचिदेव प्रयुञ्जते महाकवयो न तु सर्वम् । यथा—पल्लव इति वक्तव्ये किसलयमिति । स्त्रीति वक्तव्ये कान्तेति । कमलमिति वक्तव्ये राजीवमित्यादि । एतदेव महाकविभिरुपेयते । 'कत्ते मणाम इच्चं सच्चं कविए समं समग्गेसु ।··· सीमठ्ठेउण मुसिमतम्मि सच्चण वज्जेअ ॥' कान्तवर्णानुप्रासोऽपि कान्त एव भवतीति मत्वानुप्रासोत्कटमुदाहरति—निरानन्द इति । अस्ति कुन्दे मधु परं न कमल-

सजातीयमित्यासक्तो नानन्दमलभत । कुन्दस्येति प्रहतम्, कौन्दमित्यप्रहतम् । बालत्वे बकुलकुसुमानां न मधुप्रादुर्भाव इति एतत्काले रतिं न प्राप्तवानिति विधुर इत्यनेन व्यज्यते । कालान्तरेऽपि साले मधुनोऽसंभवादालम्बः प्रत्याशामात्रबन्धोऽपि न तस्यासीत् । आमोदप्रकर्षादन्तः क्षणं निपत्य रसमनासादयंल्लवङ्गमनुसरतीति लवमित्यनेन ध्वन्यते । एवमुत्तरार्धेऽपि पदस्वरसो गवेषणीयः । उक्तमेव विशेषमभिसंधाय व्याचष्टे—अत्रेति । छायौज्ज्वल्यं कान्तिरित्येकार्थतया लोके प्रसिद्धं तदिह यथा शब्देषु संगच्छते तथा पूर्वाचार्यप्रसिद्ध्या विवेचनीयमित्यभिप्रायः ॥

**विकटाक्षरबन्धत्वमार्यैरौदार्यमुच्यते ।**

यथा—

'आरोहत्यवनीरुहं प्रविशति श्वभ्रं नगैः स्पर्धते
खं व्यालेढि विचेष्टते क्षितितले कुञ्जोदरे लीयते ।
अन्तर्भ्राम्यति कोटरस्य विलसत्यालम्बते वीरुधः
किं तद्यन्न करोति मारुतवशं यातः कृशानुर्वने ॥८२॥'

अत्र विकटाक्षरबन्धत्वे नृत्यद्भिरिव पदैर्यद्वाक्यरचना सा उदारता ॥

**विकटेति** । विकटैरक्षरैर्बन्धो यस्य तस्य भावस्तत्त्वम् । अस्ति तावन्नृत्यन्तीव पदानीति सहृदयानां क्वचिदर्थे व्यवहारः । स च न निर्विषयो नान्यस्य विशेष इति तत्प्रमाणकमेव गुणान्तरमवस्थितमिति कश्चिद्व्याचष्टे । तथा तु न कथंचित्स्वरूपमुद्दिश्य दर्शितं भवति । अन्ये तु विसर्गानुप्रासादिग्रन्थिलत्वमनेनाभिमतमित्याहुः । तदपि न । और्जित्याबहिर्भावप्रसङ्गात् । तस्मादिदमत्र वाच्यम्—विकटानि विशालानि । प्रभूतानीति यावत् । तथाभूतान्यक्षराणि दीर्घानुस्वारादिरूपाणि सहृदयसंवेदनीयानि । अत एव नृत्यतुल्यता । यथा हि—नृत्येऽङ्गानामङ्गुल्यादीनामाकुञ्चनप्रसारणक्रमेण रञ्जकत्वं तथात्रापि । तथाहि—आरोहतीत्यादौ प्रथमपादे आकारोकाराभ्यां प्रसारः । हत्यवेति संकोचः । नीरुह इतीकारविसर्गाभ्यां प्रसरणम् । नगैः स्पर्धत इति विसर्गसंध्यक्षरैर्विकाशः । द्वितीयपादेऽपि प्रसारणेनोपक्रम्यत इति नैव निर्वहणमन्तरान्तरवरोहक्रमो भवति । न चात्र यतीनां संनिवेशोऽभिमतः । मारुतवशं यात इत्यनेनोन्मादरोगगृहीत इति शब्दमूलानुस्वान-

(सार)बलेनावगम्यते । उन्मादगृहीतोऽपि वृक्षारोहणादिकमसमञ्जसमव्यवस्थितं च करोति । वन इत्यनेन यत्र सर्वथैव प्रतीकारासंभव इति निरङ्कुशोन्मादचेष्टितमेवोपबृंहयति । नगैः स्पर्धते पर्वतोच्छ्रायमनुकरोतीति दूरप्रसृत उन्मादः । खं व्यालेढीत्यत्रापि तथैवाभिप्रायः । किं तद्यदिति न शक्यते गणयितुमुन्मादचेष्टितानीति प्रकाशन्तेत्येति ग्रन्थिलाविच्छेदात् । प्रसारणस्य पर्यवसानं श्वेत्यनेन प्रविशतीतिसंकोचः । अत एव परस्परपदयोर्निरन्तरमावाधः कान्तिविशेषकरत्वादुपादेय एव भवतीति ॥

**श्लाघ्यैर्विशेषणैर्योगो यस्तु सा स्यादुदात्तता ॥ ७० ॥**

यथा—

'श्रुत्वायं सहसागतं निजपुरात्त्रासेन निर्गच्छतां
शत्रूणामवरोधनैर्जललवप्रस्यन्दतिम्यत्पुटाः ।
शुभ्रे सद्मनि पल्लविन्युपवने वाप्यां नवाम्भोरुहि
क्रीडाद्रौ च सशाद्वले विवलितग्रीवैर्विमुक्ता दृशः ॥८३॥'

अत्र शुभ्रे पल्लविनि नवाम्भोरुहि इत्यादिश्लाघ्यविशेषणोपादानादुदात्तता ॥

**श्लाघ्यैरिति** । उत्कर्षेणानुदात्तो लोके प्रसिद्धः । बहूनां मध्ये यः श्लाघते स उत्कर्षवान् । तेन श्लाघ्यत्वमुदात्तलक्षणम् । तदिह काव्ये वाक्यार्थपोषाधायकतया सहृदयहृदयावर्जनक्षमत्वेन श्लाघाविषयत्वे विशेष्यत्वं च वाक्यार्थोऽतस्तद्विशेषणपदेषु यथोक्तरूप उत्कर्षोऽभिमतोऽनुदारश्चायं गुण इति स्वरूपविशेषकृतात्कान्तिशरीरान्तर्गताच्चमत्कारित्वाद्भिद्यते । नचात्र मुहृतिरभिमतेति नैकमपि कान्तिरूपमस्ति । अत एव पुराणच्छायमुदाहरति—श्रुत्वेति । श्रुतिमात्रेणेयं दशा दर्शने तु न ज्ञायते कथं भविष्यतीति । यमिति । न ह्यन्यस्य श्रुतमात्रस्य तादृशप्रभावसंभावना । सहसेति यावत्क्रीडासहचराणां धवलगृहादीनामपि च प्रेमानुरूपमापृच्छयते तावानपि समयो न लब्ध इति व्यज्यते । आगतमिति निष्ठाप्रत्ययेन चेदिच्छति सिद्धमेवागमनमिति द्योतयति—निजेति । यस्यान्येन धर्षणं स्वप्नेऽपि न बुद्धिविषय आसीत् । सोपद्रवस्यापि यस्य न त्यागः कदापि कथंचिदभूदिति व्यज्यते । निर्गच्छतामिति हृदयवमुख्येन पुनः पुनरवतिष्ठमानानामसंभवद्रूपं निर्गमनमिति

द्योत्यते । शत्रूणामिति बहुवचनेन यदैकावस्कन्दमुद्दिश्यायं प्रचलति तदा सर्वेषामियं दशा भवतीति प्रत्याय्यते । अत एवासमासः सजीवः । वियोगवेदनादूनमानसानामुद्गतोऽपि बाष्पस्रावादन्तरेव विच्छिद्यत इति लवपदेन ध्वन्यते । पुनः समागमाशंसनशीलानाममङ्गलभिया बाष्पस्तम्भो लवपदरहस्यमित्येके मन्यन्ते । अन्यस्य बाष्पस्य निर्गमनानुपपत्तौ पुटयोरार्द्रभावमात्रम् । शुभ्र इति यत्र चन्द्रातपेन पल्लविताः कान्तयः क्षणदाविलासविहारेषु कामपि रसमात्रामुत्कर्षयन्तीति व्यनक्ति । तदनन्तरमेव व्याप्यामित्याह—नवाम्भोरुहीति । पूर्ववत्संभोगोद्गारः । सशाद्वल इत्यनेन रतिकुतूहलोत्कण्ठितानामद्रिशृङ्गारोहणश्रान्तानां तदेवास्तरणमिति प्रकटीक्रियते । विवलितग्रीवतया च पश्चां पलायनमेव न तु शरीरवलनमपीति । शृङ्गाराद्भयानक एव रसः स्थायीति ध्वनितम् । तदेतत्सर्वमभिप्रेत्याह—अत्रेति ॥

अरीतिमत्करणोक्तमभिप्रेत्यौजोलक्षणमाह—

## ओजः समासभूयस्त्वम्

यथा—

'जयति भुजगरज्जुग्रन्थिनिष्पीडितेन्दु-
स्रवदमृतनिवृत्तप्रेमभावैः कपोलैः ।
विरचितनुतिबन्धो मूर्ध्नि सद्यः पुरारेः
परिणतबहुकल्पब्रह्मणां ब्रह्मघोषः ॥ ८४ ॥'

अत्र भुजगरज्जुग्रन्थीत्यादिना समासभूयस्त्वादोजः ॥

ओज इति । वैपुल्यवृत्तेर्बहुशब्दस्येयसुनि भूय इति रूपम् । तथा च समासस्य भूयस्त्वं वैपुल्यविकटत्वमिति यावत् । न चैवं गौडीया रीतिरेवेयमिति वाच्यम् । क्वचित्समासभूयस्तामात्रस्यैवौचितीवशेन विशेषशोभावहत्वात् । यथा—'नायन्ति दिग्गजगण्डकषणैर्भग्नस्रस्ता' इति । न च समासाभावो नोचितः । नह्येक एव समासो रूपभेदमादाय गुणत्वमनलंकारत्वं च प्रयोजयतीति किमनुपपन्नम् । एवं प्रकृतोदाहरणेऽपि । तथा हि—परिणताः परिणामं गताः । बहूनां कल्पानां ब्रह्माण इति चतुर्णां पदार्थानां पिण्डत्वे चत्वारिपदानि समबहुव्रीहिरूढिभिर्भुजगरज्जुभिरिति ग्रन्थिदृढताबोधनाय रूपकम् । अत एव निवीत्युपसर्गस्तात्पर्यवान् । सद्यो विरचितनुतीत्यनेन कपालिनामसाधारणो व्यापारः । बन्धो हि ब्राह्मरूपस्तात्वादिकमन्तरेण न निष्पद्यते । जीवनानन्तरमेव श्वासावेशात्स्तुतिरूप एव ब्रह्म-

घोष उदचरदिति भगवतस्त्रैलोक्यग्रहे निरङ्कुशप्रभावः सद्यःपदेन सूच्यते। अथवा चेदागमानामात्मलाभानन्तरमेव परमेश्वरस्तुतिरूपतात्पर्यावसानमिति सर्वस्या अपि श्रुतेः परमेश्वरप्रवणत्वमनन्यसाधारणभक्तिप्रह्वतां च कविरभिप्रैति। पुरारेरित्यनेन संहाररूपता भगवतः प्रकृतपोषानुगुणा प्रकाशिता ॥

**और्जित्यं गाढबन्धता।**

यथा—

'असिन्नीषद्वलितविततस्तोकविच्छिन्नभुग्नः
किंचिल्लीलोपचितविततः पुञ्जितश्चोच्छ्रितश्च।
धूमोत्पीडस्तरुणमहिषस्कन्धनीलो दवाग्नेः
स्वैरं सर्पन्सृजति गगने गत्वरानभ्रभङ्गान् ॥ ८५ ॥'

**अत्र गाढबन्धस्य स्पष्टमेव प्रतिभानादौर्जित्यम् ॥**

**और्जित्यमिति।** ऊर्जितो महाप्राणस्तस्य भाव और्जित्यं तत्र संदर्भस्य महाप्राणता गाढत्वमन्तरान्तराविलम्बितनयद्भिः प्रयोगैः कुण्डलत्वम्। गुणसामान्यलक्षणादतिप्रसङ्गो नास्ति। तथा हि—प्रकृतोदाहरणे प्रथमपादे विच्छिन्नभुग्न इत्यत्र तालव्यद्वयम्। कण्ठ्यदन्त्यसंयोगौ अस्फुटोन्मिश्रौ। अन्ये मृदवः। द्वितीयपादे ओष्ठ्योपध्मानीयतालव्यचतुष्कसंयोगाः प्रस्फुटाः। स्वरव्यञ्जनमध्ये विसर्गपाठ उभयसंज्ञाभिप्रायेणेति दुर्गसिंहः। तेन तदादेशस्यापि व्यञ्जनत्वम्। अन्ये मृदवः तृतीयपादे दन्त्योष्ठ्यदन्त्यकण्ठ्यसंयोगा उन्मिश्राः। अन्ये मृदवः। चतुर्थपादे रेफान्तसंयोगा मृदवो य इति न कापि कठोरता प्रतिभासते। तथा च—प्रथमतृतीयाभ्यामत्र द्वितीयचतुर्थयोर्गाढत्वम्। तथा—'हस्ते लीलाकमलमलकं बालकुन्दानुविद्धम्—' इत्यादेरगाढप्रथमतृतीययोरप्यस्ति धारणी महाप्राणता व्यक्तेत्याह—अत्रेति ॥

**प्रेयः प्रियतराख्यानं चाटूक्तौ यद्विधीयते ॥ ७१ ॥**

यथा—

'सौजन्याम्बुनिधे बुधप्रिय गुणप्राकार धर्मद्रुम-
प्रारोह प्रतिपन्नवत्सल महात्यागिन्विवेकाश्रय।
लक्ष्म्यावास मनस्विनीमनसिजव्यापारदीक्षागुरो
श्रीमन्मुञ्ज किमित्यमुं जनमुपस्प्रष्टुं दृशा नार्हसि ॥८६॥'

अत्र सौजन्याम्बुनिध इत्यादीनां प्रियार्थानां पदानामुपादानं प्रेयः ॥

**प्रेय इति** । परप्रियाख्यानं चाटूक्तिस्तत्र यद्विधीयते स प्रेयो नाम गुणः किं तु क्रियते इत्याह—प्रियतराख्यानमिति । प्रत्ययांशे तात्पर्यं लोके साधारण एव प्रिय इत्युच्यमाने यस्तत्रासाधारणः प्रकर्षोऽवसीयते स इत्यर्थो भवति । एतेन लक्षणपदे ईयसुन् व्याख्यातः । उक्तिखण्डैरुपचितोऽर्थः सन्नसन्वा भवतु कविप्रतिकृष्टा सूक्तिरेक एव त्रिभुवने भूयसीनामपामधिष्ठानम् । एवं भवानपि तत्स्थानीयस्य सौजन्यस्येति प्रतीयते । बुधप्रियेति बहुव्रीहितत्पुरुषाभ्यामर्थद्वयमुपात्तम् । सूक्ष्मगुणप्रतिबिम्बभासितया यावदभिमतदायितया च प्रीतिध्वनितया च प्रकर्षमर्पयति—गुणप्राकारेति । यथा प्राकारे उपर्युपरि शिलादीनामवस्थितिरेवमहमहमिकया त्वयि गुणानाम् । अथवा यथा प्राकारः कलत्रावेक्षणस्थानमेवं भवानपि गुणानामेव प्रोच्यते । धर्मद्रुमप्रारोहेति । प्रारोहः प्ररोहोऽङ्कुरः । तेनातिजरतो भग्नानेकविक्रमादित्यादिशाखस्य धर्मतरोस्त्वमग्रिमः संतानोऽवलम्बः । यदि वाधोमुखी लम्बमानलता प्ररोहः । तथा च धर्मतरोरुपरि ब्रह्मलोकादिबद्धविस्तारस्य भगवद्रूपः प्रारोहो भूपृष्ठमधितिष्ठतीति कोऽपि प्रीतौ प्रकर्षः । प्रतिपन्नवत्सलेति । उपकर्तव्यतया प्रतिपन्नः स्वीकृतस्तत्र वत्सलो झटिति स्नेहार्द्रान्तःकरणस्तेनाङ्गीकृतभङ्गभीरुतामात्रेण पुरुहूतादिवन्नापि श्लेषाविश्लेषान्विततया बलिकर्णादिवत्किं तु भवान् सिन्धुरिव वाञ्छितादिकमुपकारं करोतीति समानं पूर्वेण । महात्यागिन्निति । त्यागिनामपि यः पूज्यः स महात्यागी तेन नूनं दधीचिप्रभृतयो विश्राणितार्था अपि न तव तुल्यतामारोढुमीशत इति पर्यवस्यन् । विवेकाश्रय इति । यथाकर्तव्यताज्ञानं विवेकस्तस्याश्रयो विश्रान्तिस्थानं यदि त्वं मूलस्तम्भो नाभूस्तदा कमाश्रित्य विवेकप्रासादः पदमारोपयेदित्यादिकं स्वभावदर्शितमिति तदेतत्सर्वं सूचयन्नाह—प्रियार्थानां पदानामिति । प्रियार्थानां प्रीतिप्रकर्षार्थानाम् ॥

व्युत्पत्तिः सुप्तिङां या तु प्रोच्यते सा सुशब्दता ।

*यथा—*

'तस्याजीवनिरस्तु मातरवमा जीवस्य माजीवतो
[1]भूयाद्वाऽजननिः किमम्ब जनुषा जन्तोर्वृथा जन्मनः ।

१. 'जनिना' इति सटीकपुस्तकपाठः.

यस्त्वामेव न वन्दते न यजते नोपैति नालोकते
नोपस्तौति न मन्यते न मनुते नाध्येति न ध्यायति ॥ ८७ ॥'

अत्र अजीवनिः—अजननिः—इत्यादीनां सुबन्तानां वन्दते—यजते—इत्यादीनां तिङन्तानां च व्युत्पत्तिः सुशब्दता ॥

**व्युत्पत्तिरिति** । विशिष्टा उत्पत्तिर्व्युत्पत्तिः । सुबन्तानां तिङन्तानां च बहूनामपि चकारादिमन्तरेण घटनासौष्ठवार्पकतया चमत्कारकारित्वमित्यर्थः । 'आक्रोशे नञ्यनिः' । किमर्थमिदमाशास्यत इत्यत आह—जीवतोऽवमान इति । जीवतोऽवमाननं माभून्मरणमपि तदपेक्षया वरमित्यर्थः । आयुःकर्मवशात्तथाभूतोऽपि जीविष्यतीति यदि तदाऽजननिरनुत्पत्तिरेव भूयात् । कुत इत्यत आह—किमिति । जनिनेति पुंलिङ्गनिर्देशश्चिन्त्यः इकः स्त्रीप्रकरणे विधानात् । जनिरुत्पत्तिरिति साहचर्याच्च । कस्येदं सर्वमाशास्यत इत्यत आह—यस्त्वामेवेति । त्वदन्यदेवताप्रवणस्य जन्मादिकं विफलमिति वदतः कोऽपि भगवतीविषये भक्तिप्रकर्षोऽवसीयते । अन्ये तु व्याचक्षते कवेः पदपरिचयान्तरी व्युत्पत्तिः । पदं च सुप्तिङन्ततया द्विविधम् । तयोरेकमुभयं वा यत्र निवेश्यमानं व्युत्पत्तिमभिव्यनक्ति तत्र सौशब्द्यमिति लक्षणार्थः । तथा हि—अजीवनिरिति सोपाधिसिद्धकृदन्तं जीवितमुपन्यस्य तदेव जीवस्य जीवत इति निरुपाधिसिद्धसाध्यार्थाभिधायिकृदन्तमुपन्यस्तवान् । मातरवमेति मातृत्वमुभयथोत्प्रेक्षितवान् । द्वितीयपादे जनिजीवमिवोपक्षिप्य जनिना जन्मेति तमेव प्रकारद्वयेनोपात्तवान् । एकैकधातुप्रपञ्चानां सुबन्तानां दुर्घटमेकसंदर्भप्रवेशं तत्तदुचितक्रियासंगमेन विहितवानिति सुबन्तव्युत्पत्तिरिति दिक् । अवमेति अस्त्वित्यनुषज्यते । वृथादिवा पूर्वेणापि संबध्यते । अथोत्तरार्धे तिङन्तव्युत्पत्तिः । तत्र पूर्वप्रकारभेदो न घटते । अतः साभिप्रायाणामेवोत्प्रेक्षणं सा वाच्या । तथा हि—वन्दत इति जायमानमात्राभिवाद्यतया त्रिभुवनमातृता । यजत इति समस्तदेवतारूपत्वम् । उपैतीति सर्वोपगम्यतया जगच्छरण्यत्वम् । आलोकत इति विश्ववर्ति यावन्मनोहरत्वम् । स्तौतीति समस्ताभिमतदायिता । मन्यत इति निखिलज्ञेयस्वरूपता । मनुत इत्यवधारणीयतया तत्त्वात्मकता । अध्येतीति कान्तारादिस्मर्तव्यतया दुर्गादिभेदेन प्रपञ्च्यमानत्वम् । ध्यायतीति निदिध्यासनविषयतया प्रत्यग्ज्योतीरूपतेति परापरभेदभिन्ना भगवती स्तुता भवति । मन्यते मनुते इति यथा सामान्यविशेषाभिधायिनौ तथाध्येति ध्यायतीत्यपि । तिङन्तानां च दुर्घटोऽपि परस्पर-

मन्वयः केनापि प्रकारेण घटित इति पूर्ववद्बोद्धव्यः । तदेतदाह—अत्रेत्यादिपदमुभाभ्यां संबध्यते । तेन जीवितवर्गो जनिवर्गश्चाभिमतः । मतिः सकृदेवावृत्त इति नोक्तः भूयसा हि लोके व्यपदेशो दृश्यत इति ॥

**समाधिः सोऽन्यधर्माणां यदन्यत्राधिरोपणम् ॥ ७२ ॥**

यथा—

'प्रतीच्छत्याशोकीं किसलयपरावृत्तिमधरः
कपोलः पाण्डुत्वादवतरति तालीपरिणतिम् ।
परिम्लानप्रायामनुवदति दृष्टिः कमलिनी-
मितीयं माधुर्यं स्पृशति च तनुत्वं च भजते ॥ ८८ ॥'

अत्र प्रतीच्छति—अवतरति—अनुवदति—इत्यादिचेतनक्रियाधर्माणामचेतनेष्वधरादिषूपचारेणाध्यारोपणं समाधिः ॥

**समाधिरिति** । सम्यगाधानमारोपणं समाधिः । सम्यक्त्वं च वक्रतालोकातिगत्वं न तदधिकभावः । तदिदं लक्षणे स्फुटम् । 'कमलानि निमीलन्ति कुमुदान्युन्मिषन्ति च' इत्यादौ व्यभिचाराच्च । तेन संबन्धिता न धर्मविशेषणमत्राभिमता । अलंकाराद्भेदश्चतुर्थे वक्ष्यते—प्रतीच्छतीति । प्रत्येषणं दीयमानस्य ग्रहणं चेतनधर्मः स विरहवत्या अचेतनेऽधरे समारोपितः । किसलयकान्तिमितो मन्दीभूततामवगमयति । देयस्य दातुरपसरणेऽन्यत्र संक्रान्तौ च प्रत्येषणनिर्वाहाच्च । तथा चाशोककिसलयेभ्योऽपि कोमलपाटलत्वमधरस्येति माधुर्यपोषः । तदभिमुखप्रवर्तनमवतरणमपि चेतनधर्मः सोऽचेतने कपोले समारोपितः किंचित्पाण्डुतामवद्योतयति । न च प्रत्येषणवत्सामस्त्येन ग्रहणमपि तु संमुखीभावमात्रमित्याशयात् । तथा च पूर्ववन्माधुर्यं पुष्णाति, अनुवादोऽपि चेतनधर्म एव सोऽचेतनायां दृष्टावारोपितः पर्युषितकमलच्छायामखण्डामेवात्र बोधयति । परप्रकर्षाभिमुखेऽपि विप्रलम्भे कदाचित्संकल्पोपस्थितप्राणनाथायां दृष्टौ कान्ती भवतीति प्रायःपदेन सूचितम् । स्पर्शस्य माधुर्यविषयेऽसंभवात्स्पृशतीत्यप्यारोपः । प्रथमविग्रहशोभाविर्भावमभिव्यनक्ति—चेतनक्रियेति । प्रकृतापेक्षया क्रियाक्रियावतोः सादृश्याभावान्नेयं गौणी किं तूपचरितैव शुद्धेत्याह—उपचारेणेति । एतेन रूपकादिभ्यो भेदः समर्थितः ॥

**अन्तः संजल्परूपत्वं शब्दानां सौक्ष्म्यमुच्यते ।**

यथा—

'केवलं दधति कर्तृवाचिनः प्रत्ययानिह न जातु कर्मणि।

धातवः सृजतिसंहृशास्तयः स्तौतिरत्र विपरीतकारकः॥ ८९॥'

अत्र श्रुतावगतवाक्यार्थस्य सृजति—संहरति—शास्ति—स्तूयते—इति शब्दानामन्तःसंजल्परूपेण सूक्ष्मतया सूक्ष्मत्वम्॥

**अन्तरिति**। यथा करितुरगादिरूपकाणां पाषाणशिलादावभिव्यक्तमवस्थितौ सूक्ष्मरूपता तथा शब्दानां श्रूयमाणानामपि कथमन्यथा वाक्यार्थभावनदशायां शेषनियमेनोन्मेषः। केवलमित्यादौ 'सृजति—संहरति—शास्तयो धातवः कर्तर्येव भगवद्विषये प्रयुज्यमानाः प्रत्ययान्प्रयोजयन्ति न कर्मणीति वाक्यार्थो यदा भाव्यते तदैवायं सृजति संहरति शास्ति, न तु सृज्यते संह्रियते शिष्यते इति शब्दाः प्रकाशन्ते। एवं स्तौतिर्विपरीतकारकः। अत्र स्तौतिः कर्मण्येव प्रत्ययप्रयोजको न कर्तरीति वाक्यार्थभावनासमय एव नायं किंचित्स्तौति किंतु सर्वैः स्तूयत एवेति शब्दा उन्मिषन्ति। तदेतदाह—अत्र श्रुतावगतेति। यावदेव वाक्यं श्रूयमाणमवगम्यते तस्यैव भावनापल्लवः पश्चादवसीयत इति वटबीजन्यायमुपोद्बलयति। सोऽयं सहृदयप्रतीतिसाक्षिकोऽर्थः॥

## ध्वनिमत्ता तु गाम्भीर्यम्

यथा—

'मौलौ धारय पुण्डरीकममितं तन्वात्मनो विक्रमं
चक्राङ्कं वह पादयुग्ममवनीं दोष्णा समभ्युद्धर।
लक्ष्मीं भ्रूनिकटे निवेशय भव ज्यायान्दिवौकस्पते-
र्विश्वान्तःकरणैकचौर तदपि ज्ञातं हरिः खल्वसि॥ ९०॥'

अत्र नाभ्यां पुण्डरीकधारणं परिमितविक्रमत्वं चक्राङ्कितकरत्वं दंष्ट्रया वसुधोद्धारणं वक्षःस्थलनिवेशितलक्ष्मीकत्वमिन्द्रावरजत्वं च ध्वनयतीति गाम्भीर्यम्॥

**ध्वनिमत्तेति**। ध्वननं ध्वनिर्व्यञ्जनात्मा व्यापारः। स द्विविधः—शब्दध्वनिः

अर्थध्वनिश्च । येन शब्द एव ध्वन्यते स शब्दध्वनिरभिमत इति केचित्, तन्न । शब्दस्यैव ध्वन्यतानङ्गीकारात् । नाम्यां पुण्डरीकधारणमित्यादि व्याख्याग्रन्थभङ्गप्रसङ्गाच्च । तस्माच्छब्दाश्रितं ध्वननं शब्दध्वनिरर्थाश्रितं चार्थध्वनिरिति वक्तव्यम् । प्रभूतध्वनिसंबद्धपदकदम्बकस्य गाम्भीर्यम् । अथवा ध्वनयतीति ध्वनिः शब्दात्मको यत्रास्ति पदसमुदायस्तद्गाम्भीर्यम् । तथा हि पुण्डरीकपदप्रस्तावात्सितच्छत्रे नियताभिधानशक्तिकं कांस्यतालानुस्वानस्थानीयां सिताम्भोजव्यक्तिमुपजनयच्चोपलभ्यते । अनेकार्थनियताभिधानशक्तिकत्वाच्च । तदाह—'अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते । संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनम् ॥' इति । एवं विक्रमादिषु । तथापि विक्रमः पौरुषं परिशिष्टः पादविक्षेपश्च । चक्रं चक्रवर्तिचिह्नं रेखासंनिवेशलक्षणमायुधविशेषश्च । अभ्युद्धरणं सम्यग्लाभपालनप्रापणमुत्थापनं च । लक्ष्मीः संपद्देवताविशेषश्च । ज्यायान् प्रशस्यतरो वयोज्येष्ठश्च । इदमेवाभिसंधाय दिवौकस्पतेरित्यन्तं व्याचष्टे—अत्रेति । तदपीत्यपिशब्देन विरोधद्योतिना हरिभावमाचरन्निति प्रतीयते पुण्डरीकधारणादेरुभयतुल्यत्वान्मौलावित्यादिविरुद्धम्, अतस्तद्विपरीतस्थानीयं विष्णौ ध्वनयत्प्रसिद्धिबलान्नाभ्यादिकमेव ध्वनयति । प्रसिद्धिरपि हि विशिष्टार्थप्रतिपत्तौ कारणमेवेत्यभिप्रेत्य शब्दध्वनिप्रस्तावेऽप्यन्यद्व्याख्यातवान् । अन्यथा तु प्रकृतासंगतिशङ्कया न वाच्यार्थपुष्टिः स्यात् । सोऽयं विरोधरूपमूलः प्रतीयमानव्यतिरेको वाक्यार्थः शब्दध्वनिश्चात्र जीवभूतः । विश्वान्तःकरणैकचोर इत्यनेन त्रिभुवनमनोहरता । दिवानिशमन्तःकरणानि चोरयन्नभ्यासकौशल्यादिवात्यन्तप्रसिद्धानि नारायणचिह्नानि गोपायसीति प्रतीयमानोत्प्रेक्षा । ननु वस्तुध्वनिं शब्दशक्तिमूलमेके न मन्यन्ते । कथं तर्हि 'पन्थिअ न एत्थ सत्थरमत्थि मणं पत्थरत्थले गामे । उन्नअपओहरं पेक्खिअ उण जइ वससि ता वससु ॥' इत्यादौ वस्तुवर्णनं ? न ह्यत्र श्लेषन्यायो न वा समासोक्तिन्यायः संभवति । किं चालंकारध्वनावपि शब्दशक्तिरेवोपयुक्तेत्यक्षुण्णः शब्दध्वनिः । ये तु वदन्ति शब्दस्याभिधाव्यतिरिक्ता वृत्तिरेव नास्तीति, लक्षणापि तैरनङ्गीकरणीया स्यात् । न चानङ्गीकर्तव्येति वाच्यम् । "गङ्गायां घोषः" इत्यत्र सप्तम्यनन्वयापत्तेः । प्रकृत्यनुगतस्वार्थाभिधानं हि विभक्तीनां व्युत्पन्नमिति घोषप्रतियोगिकाधिकरणभावयोग्यः कश्चिदर्थो गङ्गापदस्य वक्तव्यः । तथा च कान्या नाम लक्षणा । एवं पुण्यत्वादि-

१. 'पथिक नात्र स्रस्तरमस्ति मनाक्प्रस्तरस्थले ग्रामे ।
उन्नतपयोधरं प्रेक्ष्य पुनर्यदि वससि तद्वस ॥' इति च्छाया.

प्रतीतिस्तत एव भवन्ती ध्वननमुपस्थापयतीत्यादिकमस्माभिः काव्यप्रकाशविवरणे प्रपञ्चितम् । इह तु ग्रन्थगौरवभिया विरम्यते ॥

**व्यासेनोक्तिस्तु विस्तरः ॥ ७३ ॥**

यथा—

'जनः पुण्यैर्यायाज्जलधिजलभावं जलमुच-
स्तथावस्थं चैनं निदधतु शुभैः शुक्तिवदनैः ।
ततस्तां श्रेयोभिः परिणतिमसौ विन्दतु यथा
रुचिं तन्वन्पीनस्तनि हृदि तवायं विलुठति ॥ ९१ ॥'

अत्र कथमहं त्वत्कुचतटे विलुठामीत्यभिप्रायस्य विस्तरेण प्रकाशितत्वादयं विस्तरः ॥

**व्यासेनेति** । यत्र स्तोकेऽपि वाच्ये वचनपल्लवश्चमत्कारकारी तत्र स एव गुणकक्षाधिरोहणक्षम इति शब्दगुणेषु युक्तो विवेकुमत एवोक्ति विशेष्यतया निर्दिशति । जनः पुण्यैरित्यादौ कथमहमित्यादौ निर्दिष्टोऽपि वक्त्राभिप्रायरूपोऽर्थ उक्तिपल्लवेन प्रकर्षमानीयते । तथा हि जन इति तटस्थोक्त्या न ममेदृशानि भागधेयानि येनाहत्य मनो निर्वहति । पुण्यैरिति बहुवचनेनानेकजन्मोपात्तानामेवेदं फलम् । यायादिति संभावनाभिप्रायेण लिङा मुक्ताफलपरिणतियोग्यजलधिजलप्राप्तिसंभावनापि कस्यचिदेव धन्यजन्मन इति प्रकाशिते कोऽपि कारणप्रकर्षः । जलमुच इत्यनेन येषां न जलदानमेव व्यापारः, अपि तु विश्वसंतापच्छिदुराणामन्योपकारप्रवणतया शुक्तिमुखपर्यन्तमपि नयनमुपपद्यत इति । तथावस्थमित्यनेन यदैव स्मरावस्था तदैव जलधरैः पानमाशंसामात्रगोचरो न तु पूर्ववत्संभावनामात्रगोचरः, अत एव शुभैरिति समयविलम्बनस्य प्राक्तनपुण्यमानहेतुकत्वादित्यादि स्वयमवसेयम् । एतेन 'पदार्थे वाक्यरचनम्' इति यदन्यैर्गुणान्तरमभिहितं तद्विस्तारमेकमेव । घटनासौष्ठवमात्रोपयुक्तस्तु पल्लवो विशेषगुणेष्वस्माभिरभिधास्यते । त्वत्कुचतटे लुण्ठनमत्यल्पपुण्यस्य न संपद्यत इत्येतावानेवार्थो विवक्षाविषय इति कार्यविकासस्यैव चमत्कारार्पणे प्रागल्भ्यमिति शब्दप्रधानकतया युक्तमत्र परिसंख्यानमिति ॥

---

१. 'शुक्तिवदने' इति मूलपुस्तकपाठः

**समासेनाभिधानं यत्तु संक्षेप उदाहृतः ।**

यथा—

'स मारुतिसमानीतमहौषधिहृतव्यथः ।
लङ्कास्त्रीणां पुनश्चक्रे विलापाचार्यकं शरैः ॥ ९२ ॥'

अत्र कथाविस्तरप्रतिपाद्यस्यार्थस्य प्रकृतसंग्रामरसविच्छेदाशङ्कया श्लोकार्धमात्रेणोक्तत्वात्संक्षेपः ॥

**समासेनेति** । अस्ति कश्चिद्विशेषो यत्र वाक्यसंकोचः प्रकृतौचितीवशेन चमत्कारकारणम् । तथा हि—स मारुतीत्यादौ मारुतिना यदोषधेरानयनम्, यच्च तया व्यथाहरणम्, तदुभयमपीतिहासकथाविस्तरेण प्रतिपादितमिह तु श्लोकार्धमात्रेणेति शब्ददत्तभर एवायं गुणो यद्यपि भवति, तथापि यावद्विवक्षितोपादानकाव्यरूपेणार्थसंकोचो वक्तव्यः । स च तथाविधवक्रोक्तिसंकोच एव भवतीत्युक्तावेव संकोच उल्लिखति । कथमयं संकोचः प्राप्तोचितभाव इत्याह—प्रकृतेति । अत एवोपक्षिप्तमपीतिहासार्थमपहाय त्वराविष्टेन कविना प्रकृतमुत्तरार्ध एवासंहितं पूर्वोत्तरार्धसामञ्जस्याय संक्षिप्यैव प्रकृतमप्युक्तम् ॥

**यावदर्थपदत्वं च संमितत्वमुदाहृतम् ॥ ७४ ॥**

यथा—

'केचिद्वस्तुनि नो वाचि केचिद्वाचि न वस्तुनि ।
वाचि वस्तुनि चाप्यन्ये नान्ये वाचि न वस्तुनि ॥ ९३ ॥'

अत्रार्थस्य पदानां च तुलाविधृतवत्तुल्यत्वेन संमितत्वम् ॥

**यावदिति** । यावन्ति वर्णानि विना प्रकृतमनुसर्तुमेव न शक्यन्ते तावन्मात्रमयत्वं वाक्यस्य संमितत्वम् । अतः संक्षेपाद्भेदः । कवेः शक्तिव्युत्पत्तिभ्यामसत्यपि पल्लवे कदाचिद्घटनालावण्यमुन्मिषत्येव । यथा पूर्वमुदाहृतम्—'का त्वं शुभे कस्य परिग्रहो वा' इत्यादि । अर्थव्यक्तिसंकरशङ्काप्यत एव निराकृता । 'अस्त्युत्तरस्यां दिशि देवतात्मा' इति केचिदुदाहरन्ति तदयुक्तम् । अनेन नामपदयोः पल्लवरूपत्वात्संमितत्वाभावे कथमाभासत्वं भवतीति विस्मृतव्यभिचारिगुणप्रकरणस्य भाषितमुपेक्षणीयम् । केचिदिति सर्वनाम्न एवाभिमतकविविशेषे पर्य-

वसानं सामर्थ्येन संभवतीति नाध्याहारशङ्का । शङ्का इत्यादिक्रियापि सामर्थ्येनाव-सीयते तदेतत्सर्वमभिप्रेत्याह—तुल्यविधृतवदिति ॥

भावतो वाक्यवृत्तिर्या भाविकं तदुदाहृतम् ।

यथा—

'एह्येहि वत्स रघुनन्दन पूर्णचन्द्र
चुम्बामि मूर्धनि चिरं च परिष्वजे त्वाम् ।
आरोप्य वा हृदि दिवानिशमुद्वहामि
वन्देऽथवा चरणपुष्करकद्वयं ते ॥ ९४ ॥'

अत्र हर्षवशादनौचित्येनापि 'वन्देऽथवा चरणपुष्करकद्वयम्' इत्या-दीनामुक्तत्वाद् भाविकत्वम् ॥

**भावत इति** । भावनादशापन्ना चित्तवृत्तिर्भावः । भावना वासनाव्यतिरि-त्यनर्थान्तरम् । तथा ह्युच्यते—अनेन गन्धेन रसेन वा सर्वं भावितमिति । हर्षा-दिभावितचेतसो हि वीचिप्राया उक्तिभेदाः प्रादुर्भवन्ति यैरप्रत्यूहमेव भावोऽभि-व्यज्यते तदिदमुक्तं या भावतो वाचः काव्यरूपायाः प्रवृत्तिर्निष्पत्तिः सैव भाविकम् । भावप्रधानो निर्देशः । तथा हि—प्रकृतोदाहरणे एहीत्येकेनैव युष्मदर्थाविना-भाविनाभिमुखीकरणे वृत्ते द्वितीयस्य यदुपादानम्, पूर्णचन्द्रेति यदग्रिमक्रिया-स्वनुपयुक्तस्यैवाभिधानम्, चुम्बामीति करिष्यमाणस्यापि यो वर्तमानोपदेशः, चुम्बामीत्यत्र विशेषणमनुपादाय परिष्वज इत्यत्र चिरमिति यद्विशेषणोपादानम्, त्वमिति योग्यार्थस्यापि प्रयोगः पूर्वोपात्तवदुत्तरक्रियास्पर्धितया यदेकस्यैव वहनस्य भाषणमेव समस्तसमकक्षतयैव यद्वहनाभिधानम्, वत्सेत्यभिधाय चरणौ वन्द इति या विरुद्धोक्तिः, यच्च ते इत्यस्यावगतार्थस्यापि वचनम्, तत्सर्वमधर्मसिद्धमेवेति भावार्थस्य निष्पादितया स्वादहेतुर्भवति । प्रवर्तन्ते हि लौकिकानां स्नेहार्थानामु-त्कलिकाप्राया वाचः स्वदन्ते च । यथा—'इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयो-रसावस्याः स्पर्शो वपुषि बहलश्चन्दनरसः' इति । तदेतदभिप्रेत्य व्याचष्टे—अ-त्रेति । उद्भटत्वात्तेन शेषाण्युपलक्षयति—अनौचित्येनापि वन्द इति ॥

गतिर्नाम क्रमो यः स्यादिहारोहावरोहयोः ॥ ७५ ॥

यथा—

'वराहः कल्याणं वितरतु स वो यस्य शशभृ-
त्कलाकोटीकान्तं क्रमविगलदभ्युद्धृतिभिया ।
मिथः संमूर्च्छद्भिश्चतुरुदधिकल्लोलपटलै-
रनामृष्टं दंष्ट्राशिखरमधिशेते वसुमती ॥ ९५ ॥'

अत्र पूर्वार्धे स्वरस्यारोहादुत्तरार्धे चावरोहाद्गतिः ॥

**गतिरिति**। केचिद्व्याचक्षते। यतीनामारोहावरोहौ विवक्षितौ क्वचित्कविशक्तिवशाद्यदब्यारूढा अवरूढा इव प्रकाशन्ते। यथा—'भुवो नीचैर्नीचैरवटपरिपाटीषु पततां स्फुरत्सर्वाङ्गर्वागखिलभुवने भोगितिलकः। क्रमादुच्चैरुच्चैर्गिरिशिखरभाजामपि नृणामयं दूरे दूरे भवति भगवानम्बरमणिः ॥' अत्र यती नानारोहावरोहौ तिलतन्दुलवत्प्रकाशेते। इयं तु वृत्तौचिती वक्ष्यते। तथा च द्वितीये संगता स्यात्। तस्मादयमर्थः—स्वराणामकारादीनामुपर्युपरितया बोधः संनिकृष्टानामिव प्रकाशनं गतिरिति। तथा च व्याख्यास्यति—स्वरस्येति। तथा हि प्रकृतोदाहरणे वराहः कल्याणमित्यत्राकारद्वयं तुल्यजातीयं निर्दिश्य स वो इत्यत्रोकारेण तुङ्गत्वमिव विधाय द्वितीयपादोपक्रमे कलाकोटीकान्तमित्यत्राभिन्नजातीयारोहपरम्परा विहिता। उत्तरार्धे तु तथा नास्ति। शेते इत्यत्रापि न सोल्लेख आरोहः सोऽयमानुभविको गुणः श्लोकार्धश्लोकपादश्लोकांशक्रमेण नरसिंहवद्भवति। अत्रोपलक्षणत्वाद्यमुदाहरति—अत्र पूर्वार्ध इति। क्रमैरितस्ततश्चरणविन्यासैर्विगलन्ती असंपद्यमाना याभ्युद्धृतिरभ्युद्धरणं तस्या या भीर्भयं तयेति केचित्। अन्ये तु वदन्ति—क्रमेण विगलदभ्युद्धृतिभयमूर्ध्वनयने स्फुटनादिभयं यस्याः सा क्रमविगलदभ्युद्धृतिभियेति ॥

## उपक्रमस्य निर्वाहो रीतिरित्यभिधीयते ।

यथा—

'आहृता नासि गिरेः क्षता न पयसा नार्तासि न म्लापिता
न श्वासैः फणिनोऽसि न त्वदनुगा नायासिता कापि न ।

स्वं वेश्म प्रतिगच्छतोरिति मुहुः श्रीशार्ङ्गिणोः सस्पृहं
सा प्रश्नोत्तरयुग्मपङ्क्तिरुभयोरत्यायता पातु वः ॥ ९६ ॥'

अत्र प्रत्येकपदानन्तरं नञो विनिवेशात्क्रमाभेदो रीतिः ॥

**उपक्रमस्येति।** यादृशी पदसंनिवेशत्वेनोपक्रम्यते तादृश्या वृत्तनिर्वाहः कचिद्विशेषशोभावहो भवति । अत एवात्र नात्यन्तनिर्वाहोऽभिमतः । एकादशवृत्तेरप्यभिप्रायसमग्रकाव्यजीवभूतत्वादेतस्या एव नातिप्रसङ्गोऽपि तथा प्रकृतोदाहरणे प्रथमोत्थिताया अब्धिदुहितुरव्याजसर्वाङ्गीणलावण्यमवलोकयिता कृष्णः स्वचक्षुषोः कृतार्थतां गमितवान् । इदानीमधरोष्ठमुद्राभेदेन यदि वर्णमात्रामपि भारतीं निश्वरन्तीमाकर्णयामि तदा श्रोत्रयोः सफलता भवेदिति मन्यते । न चेत्थमेव मुग्धाङ्गनानामालापः प्रवर्तते अपि तु नायकसन्निधौ भयादेवेति प्रथमं पृच्छति—प्राण्णा नासि गिरेः क्षतेति । अनन्तरं च यदि न वक्ष्यामि तदा धृष्टामाकलयिष्यतीति जानत्या द्वयमुत्तरमौचित्यापन्नं स्यात् शिरःकम्प एकाक्षरं च। तत्राद्यः कालिदासेन प्रयुक्तो 'मूर्धकम्पमयमुत्तरं ददौ' इति । द्वितीयं कविना विनिवेशितम्—नेति । एवं श्रुतजल्पितामृतस्तदनुबन्धेन कृतकृत्यमिवात्मानं मन्यमानोऽधिकत्रासहेतुं स्मारयन्पृच्छति—पयसेति । तदिदमुक्तम्—आर्तेति । प्रकारान्तरेणोत्तरदानासंभवात्पुनरप्याह—नेति। तदनन्तरं व्याजरसायाः कियदधिकवचनश्रवणोत्कण्ठितः सर्वं लोकप्रसिद्धं भयहेतुं स्मारयन्पृच्छति—म्लायितेति । अभिमतस्यानिष्टं स्वप्नेऽपि न सज्जत इति दृष्टासीति नोक्तम् । एवं प्रसिद्धमपि वचनपल्लवनेन समस्तमुग्धाङ्गनाप्रसिद्धेन वचनोन्मुद्रणप्रकारेण पृच्छति—त्वदनुगेति । सर्वाकारेणोत्तमतामभिज्ञायमानो दृप्तः स्ववेश्म प्रत्येव गतवान् न तु पृष्टवानिति । तदिदं सर्वमभिप्रेत्य व्याचष्टे—अत्रेति ॥

**विशिष्टा भणितिर्या स्यादुक्तिं तां कवयो विदुः ॥७६॥**

यथा—

'कुशलं तस्या जीवति कुशलं पृच्छामि जीवतीत्युक्तम् ।
पुनरपि तदेव कथयसि मृतां नु कथयामि या श्वसिति ॥९७॥'

अत्र कुशलं तस्या इति पृष्टे कुशलमकुशलं वेति वक्तव्ये योऽयं जीवतीत्याद्युक्तिभङ्ग्या जीवितमात्रशेषताप्रतिपादनप्रकारः स काव्ये शब्दगुणेषूक्तिसंज्ञां लभते ॥

**विशिष्टेति** । लोकोत्तराः सन्ति हि भणितिप्रकारा लोकप्रसिद्धाः । यथा सुप्तोऽसीति प्रश्ने गृहे देवकुले वेत्यादि । एतत्प्रसिद्धिव्यतिक्रमेण तु या काचित्क-विप्रतिभया भणितिराकृष्यते सा भवति लोकोत्तरा । तथा च प्रतिभाकृष्टतया चम-त्कारित्वाद्गुणत्वम् । अत एव कवय इत्याह । कविसहृदयानामेव तादृशोक्तिपरिच-यसंभवात् । तथा हि—प्रकृतोदाहरणे कुशलप्रश्ने कुशलं वेति लोकप्रसिद्धमतस्त-देव वक्तुमर्हति । यत्तु तदपहाय जीवतीत्युपात्तमपरत्रापि प्रश्ने तथैवोक्तं तत्प्रति-भाकृष्टतथा साभिप्रायमुन्नीयत इत्याह—अत्र कुशलमकुशलमित्यादि ॥

संप्रति प्रकर्षकाष्ठालक्षणं वाक्यस्य गुणं लक्षयति—

**उक्तेः प्रौढः परीपाकः प्रोच्यते प्रौढिसंज्ञया ।**

यथा—

'अभ्युद्धृता वसुमती दलितं रिपूरः
क्षिप्तक्रमं कवलिता बलिराजलक्ष्मीः ।
अत्रैकजन्मनि कृतं यदनेन यूना
जन्मत्रये तदकरोत्पुरुषः पुराणः ॥ ९८ ॥'

अत्र प्रकृतिस्थकोमलकठोरेभ्यो नागरोपनागरग्राम्येभ्यो वा पदेभ्यो-ऽभ्युद्धृतादीनां ग्राम्यादीनामुभयेषां वा पदानामावापोद्वापाभ्यां सन्निवेश-चारुत्वेन योऽयमाभ्यासिको नालिकेरपाको मृद्वीकापाक इत्यादिर्वाक्य-परिपाकः सा प्रौढिरित्युच्यते । तथा चैतद्वाक्यं नालिकेरपाक इत्यु-च्यते । एवं सहकारमृद्वीकापाके अप्युदाहरणीये इति ॥

**उक्तेरिति** । उक्तेर्वाक्यस्यायं पाकः सा प्रौढिः । शब्दानां पर्यायपरिवर्तासहत्वं पाकः । यदाह—'यत्पदानि त्यजन्त्येव परिवृत्तिसहिष्णुताम् । तं शब्दन्यायनिष्णा-ताः शब्दपाकं प्रचक्षते ॥' इति । प्रौढ इति । उपक्रमोपसंहारयोर्निर्व्यूढः स चायं नायं नालिकेरसहकारमृद्वीकोपलक्षणैस्त्रिविधो गीयते । तद्यथा—नालिकेरफलं पक्वं त्वचि कठिनं शिरास्त्रविवृतकोमलप्रायं कपालिकायां कठिनतरं तथा कश्चित्संदर्भो मुखे कठिनस्तदनन्तरं मृदुप्रायस्ततः कठिनतरो नालिकेरपाक इत्युच्यते । तथा हि—प्रकृतोदाहरणे प्रथमपादेऽभ्युद्धृतेति वर्णचतुष्टयमारम्भे कठिनं 'वसुमती दलि'

इति वर्णषट्कं कोमलं 'तं रिपूरः' इत्यनुस्वाररेफदीर्घैरक्षरचतुष्टयं कठिनतरम् । अत्रापि तमिति मृदुप्रायनिवेशनेन कोमलकपालिकामुखभागसारूप्यं द्रढयतीत्यस्मदाराध्याः । एवं द्वितीयादिपादत्रये चतुष्कषट्कचतुष्कैर्नालिकेरफलसाम्यमुन्नेयम् । कथं पुनरेवंविधः पाकः संभवतीत्यत आह—अत्रेति । अभ्यासेन निर्वृत्त आभ्यासिकः । काव्यं कर्तुं विचारयितुं च ये जानन्ति तदुपदेशेन करणे योजने च पौनःपुन्येन प्रवृत्तिरभ्यासः । असावपि कथं पाकविशेषो भवतीत्यत आह—सन्निवेशचारुत्वेनेति । सन्निवेशो रचना तस्यां चारुत्वम् । तदपि कथमित्यत आह—आवापोद्वापाभ्यामिति । संदर्भानुप्रवेशनमावापः । ततः समुद्धरणमुद्वापः । केषामित्यत उक्तम्—पदानामिति । उद्धृतानामिति बुद्ध्या पृथक्कृतानाम् । केभ्य इत्यत उक्तम्—प्रकृतिस्थादित्यादि । तेनायमर्थः—प्रकृतिस्थादिपदतोऽप्येतदेवोद्धर्तव्यं यद् घटनासौष्ठवेन पर्यायपरिवर्तनं न सहते । भवति हि सहृदयानामेवमन्यत्पदं नास्तीति व्यवहारः । सोऽयं रचनासिद्धिविशेषः कथमन्यथा तज्जातीयमेव पदमन्यत्र संदर्भे निवेशितं न तथा स्वदते । अत एवासौ वाक्यगुणः । काठिन्यं च संयोगैर्दीर्घैर्वा स्वरैर्भवति । यथात्रैवोदाहरणे रिपूर इत्यादौ । सुप्तिङ्व्युत्पत्तिलक्षणस्तु वार्ताकपाकः कैश्चिदुक्तः, स तु सुशब्दतालक्षणगुण एव । एवमिति । यथा द्राक्षाफलं त्वच आरभ्य कोमलमन्तरा द्वित्रिचतुरास्थिसंपादितं किंचित्काठिन्यमेवं कश्चित्संदर्भमुपक्रमोपसंहारयोः कोमल एव मध्ये कठिन एव । संयोगदीर्घस्वरमात्रकृतमनाक्ठोरभावो मृद्वीकापाक इत्युच्यते । यथा—'अयि त्वदावर्जितवारिसंभृतं प्रवालमासामनुबन्धिवीरुधाम् । चिरोज्झितालक्तकपाटलेन ते तुलां यदारोहति दन्तवाससा ॥', यथा च—'अनवरतनयनजललवनिपतनपरिपीतहरिणमदतिलकम् । वदनमपयातमृगमदशशिकिरणं वहन्ति लोलदृशः ॥' अत एव कविकल्पलताकारादिभिरुक्तो नीलकपित्थपाकश्चतुर्थो नास्ति । यद्वच्च परिणतं सहकारफलमारम्भादेव कोमलमस्थनि तु कठोरप्रायमेवमपरः संदर्भो मुखादारभ्य मृदुरन्तरे कठिनतरः सहकारपाक इत्युच्यते । यथा—'कमलिनि कुशलं ते सुप्रभातं रथाङ्गाः कुमुदिनि पुनरिन्दावुद्गते त्वं रमेथाः । सखि रजनि गतासि त्वं तमो जीर्णमुच्चैरिति तरलितपक्षाः पक्षिणो व्याहरन्ति ॥' अत्रैवोदाहरणेऽपि द्विधा कठोरत्वमवसेयम् । तेऽमी त्रय एव शुद्धपाकाः । व्यतिकरजन्मानस्तु भूयांसः । एत एवार्थपाकाः पञ्चमे प्रकारान्तरेण प्रतिपादयिष्यन्ते ॥

सूत्रकार एवार्थगुणप्रकरणे संगतिं करोति—

**उक्ताः शब्दगुणा वाक्ये चतुर्विंशतिरित्यमी ॥ ७७ ॥**

**अथैतानेव वाक्यार्थगुणत्वेन प्रचक्ष्महे ।**
**तेषां श्लेष इति प्रोक्तः संविधाने सुसूत्रता ॥ ७८ ॥**

यथा—

'दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादरा-
देकस्या नयने निमील्य विहितक्रीडानुबन्धच्छलः ।
ईषद्वक्रितकन्धरः सपुलकः प्रेमोल्लसन्मानसा-
मन्तर्हासलसत्कपोलफलकां धूर्तोऽपरां चुम्बति ॥ ९९ ॥'

अत्रैकासनसंस्थितयोः प्रियतमयोर्विलासिना ह्येका नयनमीलनकेलिकर्मणा वञ्चिता । अन्या तु वदनचुम्बनेन रञ्जितेति । सेयं संविधाने सुसूत्रता । श्लेषो नाम वाक्यार्थगुणः ॥

**उक्ता इति** । वृत्तकीर्तनं हेतुभावप्रदर्शनार्थम् । एतानेव श्लेषादिनामकानिति । एषामिति निर्धारणे षष्ठी । 'वाक्यार्थशरीरभूतः श्लेषः प्रथमं लक्ष्यत इति । घटनाश्लेषः' इति सूत्रयित्वा 'क्रमकौटिल्यानुल्बणत्वोपपत्तियोगो घटना' इति **वामनेन** व्याख्यातम् । अस्यार्थः—इदं कृत्वा इदं कर्तव्यमिति क्रमस्तत्रैव कौटिल्यं लोकातिगामिनी वक्रता । अवक्रयोः शब्दार्थयोः वचनमात्रत्वात् । अतिमात्रतया प्रतिभासाभावोऽनुल्बणत्वम् । कथमेवमर्थः संगच्छत इत्यनुपपत्तिसमाधानौपयिकविशेषनिवेशनमुपपत्तिः । तथा च क्रमेण कौटिल्येनानुल्बणतया उपपत्त्या योजनमर्थस्य श्लेष इति तत्र संविधानक्रमानुल्बणत्वेन सूत्रशब्देनोपात्ते स्वपदेन कौटिल्यमुक्तमघटमानस्येव वाक्यार्थस्य बुद्धिचातुर्येण घटनेति वाक्यार्थः । दृष्ट्वेति । एका नायिका । अपरा नायिका न तत्सखी प्रच्छन्ननायकप्रेमपात्रं तेनैकासनसंगतिः । प्रियतमे इति तदनुरञ्जनमेव जीवितसर्वस्वमिति मन्यमानस्य युगपत्प्रवृत्तिः । आदरेण निभृतपदन्यासतया तथा भूत्वा युगपत्कराभ्यां नयनद्वयपिधानं लोकप्रसिद्धा केलिः । ईषदिति कन्धरामात्रं यथा चलते न तु शरीरमपि । अन्यथा चलनज्ञाने नायिकायाः कषायभावः स्यात् । निभृतरागोन्मुद्रणात् पुलकोद्गमः । अत एव प्रेम्णा स्वगोचरलोकोत्तरत्वाभिमानरूपेण तत्तदनेकभावोर्मिभिरान्दोलनं मनस उल्लासः । साधुवञ्चनं न जानातीत्यभिप्रायिकसपत्नीगतधिक्कारभावनया निभृतहासोन्मेषः । वञ्चनाचातुर्येण स्वमनीषितसंपादनं धूर्तता । तदेतद्व्याचष्टे—अत्रैकासनेति ॥

**यत्तु प्राकट्यमर्थस्य प्रसादः सोऽभिधीयते ।**

यथा—

'अयमुदयति मुद्राभञ्जनः पद्मिनीना-
मुदयगिरिवनालीबालमन्दारपुष्पम् ।
विरहविधुरकोकद्वन्द्वबन्धुर्विभिन्द-
न्कुपितकपिकपोलक्रोडताम्रस्तमांसि ॥ १०० ॥'

अत्र पद्मिनीविकासकरणे उदयशैलावतरणे कोकशोकहरणे तमोविदारणे चानुक्तोऽपि सूर्यलक्षणोऽर्थः प्रकटमुपलक्ष्यते ॥

**यत्तु प्राकट्यमिति** । समभिव्याहृतपदार्थसंसर्गात्मनि वाक्यार्थे दर्पणतल इवानुपात्तस्यापि विवक्षितस्य वस्तुनः प्रतिभासोऽर्थप्रसादः । न चेदमनुमानं समानसंवित्संवेद्यत्वात् । तदाह—अनुक्तोऽपि सूर्यलक्षणोऽर्थः प्रकटमुपलक्ष्यत इति ॥

**अवैषम्यं क्रमवतां समत्वमिति कीर्तितम् ॥ ७९ ॥**

यथा—

'अग्रे स्त्रीनखपाटलं कुरबकं श्यामं द्वयोर्भागयो-
र्बालाशोकमुपोढरागसुभगं भेदोन्मुखं तिष्ठति ।
ईषद्बद्धरजःकणाग्रकपिशा चूते नवा मञ्जरी
मुग्धत्वस्य च यौवनस्य च सखे मध्ये मधुश्रीः स्थिता ॥ १०१ ॥'

अत्र मधुश्रियो मौग्ध्यत्यागयौवनारम्भकृतानां विशेषणानामवैषम्यात्समता ॥

**अवैषम्यमिति** । येन रूपेण लोकेऽर्थः प्रतीतस्तदनतिक्रमेण तस्योक्तिः समता । वक्रता चात्र विशेषणमूहनीयम् । अन्यथा मुक्त्वा व्रजतीत्यतः को विशेषः स्यात् । अग्रे इति । मुग्ध इति कोषात्प्रथममुद्भिद्यमाना कुरबककलिका कान्तानखवत्पाटला भवतीति मधुश्रियो बाल्यम् । ततः प्रौढिमापद्यमानासु कलिकासु श्यामो वृन्तभागः स्फुटितत्वाद्द्विधावतिष्ठत इति यौवनम् । एवं बालाशोकमित्यादौ क्रमेण बाल्ययौवनचिह्नोपदर्शनमवसेयम् ॥

**माधुर्यमुक्तमाचार्यैः क्रोधादावप्यतीव्रता ।**

*यथा—*

'भ्रूभेदे सहसोद्गतेऽपि वदनं नीतं परां नम्रता-
मीषन्मां प्रति भेदकारि हसितं नोक्तं वचो निष्ठुरम् ।
अन्तर्बाष्पजडीकृतं प्रभुतया चक्षुर्न विस्फारितं
कोपश्च प्रकटीकृतो दयितया मुक्तश्च नो प्रश्रयः ॥ १०२ ॥'

अत्र वासवदत्तालक्षणस्यार्थस्य कोपेऽपि योऽयं विनयावलम्बनेन कोपचिह्ननिह्नवस्तन्माधुर्यम् ॥

**माधुर्यमिति ।** शृङ्गारकरुणौ हि मधुरौ ततस्तद्व्यञ्जकोऽर्थोऽपि मधुरस्तस्य शर्करादिरससोदरं माधुर्यम् । यथा हि—शर्करारसः सहृदयस्यासहृदयस्य वा, सुस्थस्यासुस्थस्य वा, झटिति रसनाग्रमर्पितश्चमत्कारमावहति, तथा चित्तद्रुतिसारचर्वणैकप्राणरसव्यञ्जकोऽर्थस्तेन तद्व्यञ्जनशक्तिसमुद्रेकनिर्वहणं वाक्यार्थस्य माधुर्यमिति पर्यवसितोऽर्थः । तत्र वासनापरिपाकवशादुदयव्ययवतीषु दीतश्चित्तवृत्तिषु जागरूकास्वपि समस्तान्यरभावनया विरोधः संपद्यत इति क्रोधादावप्यतीव्रता इत्युक्तम् । तथा हि—**भ्रूभेदे** इत्यादौ गात्रस्खलितादिना कदाचिदपराद्धे **नायके** प्रेमस्वभावादीर्ष्यारोषलक्षणव्यभिचारिप्रादुर्भावात्तदनुभावभ्रूभेदोद्गमो रति**प्रकर्षाद्ध**विष्णुनावहित्थेन न्यग्भाव्यते । विरोधिविजये हि भूयान्प्रकर्षः परस्य **भवति** । अत एव परामित्युक्तम् । एवं 'ईषन्मां प्रति भेदकारि हसितम्' इत्यादौ माधुर्यमुन्नेयम् । तदिदमाह—अत्र वासवदत्तालक्षणस्येति ॥

**अनिष्ठुरत्वं यत्प्राहुः सौकुमार्यं तदुच्यते ॥ ८० ॥**

*यथा—*

'सद्यः पुरीपरिसरेऽपि शिरीषमृद्वी
सीता जवात्त्रिचतुराणि पदानि गत्वा ।
गन्तव्यमस्ति कियदित्यसकृद्ब्रुवाणा
रामाश्रुणः कृतवती प्रथमावतारम् ॥ १०३ ॥'

---

१. 'प्रोक्तम्' ग.

अत्र सीतायाः पुरीपरिसरेऽपि कियदस्ति गन्तव्यमिति वचनं शृण्वतो रामस्य शिरीषमृदुतदङ्गावलोकनेनाश्रुणोऽवतारः सौकुमार्यमाह ॥

**अनिष्ठुरत्वमिति**। सामग्रीसंभवेऽपि चित्तद्रुतिमनासादयन्नीरसः कठोरोऽभिधीयते। अतथाभूतस्तु झटिति तन्मयीभवनयोग्यान्तःकरणः सुकुमारस्तदिदमुक्तमनिष्ठुरत्वमिति। प्राहुरित्यनेन प्रसिद्धिं द्योतयति—**सद्य इति**। सहगन्तुमुत्सुका कथमेवं सुकुमारप्रकृतिः कान्तारेषु भविष्यसीति वार्यमाणापि हृदयवैमुख्येन पथ्यामतित्वरितं गमिष्यामीति स्नेहमूढा त्रिचतुराणि पदानि जवाद्गतवती। अश्रुणः प्रथमावतारो भविष्यदश्रुपरम्पराप्रचारभूतः। सौकुमार्यमाहेति अश्रुपातेनानुभावाश्रुनिमित्तभूता चित्तद्रुतिः करतलामलकवत्प्रकाश्यते ॥

**अर्थव्यक्तिः स्वरूपस्य साक्षात्कथनमुच्यते ।**

यथा—

'पृष्ठेषु शङ्खशकलच्छविषु च्छदानां
रेखाभिरङ्कितमलक्तकलोहिताभिः[1] ।
गोरोचनाहरितबभ्रुबहिःपलाश-
मामोदते कुमुदमम्भसि पल्वलस्य ॥ १०४ ॥'

अत्र कुमुदस्वरूपस्य साक्षादिव प्रतीयमानत्वेन यत्स्पष्टरूपाभिधानमसावर्थव्यक्तिः ॥

**अर्थव्यक्तिरिति**। स्वरूपं स्वमसाधारणं कविप्रतिभैकगोचरं चमत्कारिरूपं तस्य साक्षात्कथनम्। कविशक्तिवशात्साक्षात्कारसोदरप्रतीतिजनकपदवत्त्वं संदर्भस्यार्थव्यक्तिनामा गुणः। अर्थो यथोक्तस्तस्य व्यक्तिः प्रत्यक्षायमाणता। जातेर्भेदस्तृतीये वक्ष्यते ॥ **पृष्ठेष्विति**[2]। ईषद्विकस्वरस्य कुमुदस्य किंचिद्विघटमानबहिःपलाशसंबन्धिषु शीतातपासंपर्कादत्यन्तविशदानां दलानां पृष्ठानि पाकलोहितरेखाङ्कितानि दृश्यन्ते। अत एवामोदते किंचिदुद्भिदुरेण मुखेन गर्भपिण्डितमामोदं मुञ्चतीति ॥

**कान्तिर्दीप्तरसत्वं स्यात्**

१. 'लोहिनीभिः' ग. २. 'पृष्ठेऽपि' इत्यादर्शपाठः.

यथा—

'मा गर्वमुद्वह कपोलतले चकास्ति
　कान्तस्वहस्तलिखिता मम मञ्जरीति ।
अन्यापि किं न सखि भाजनमीदृशीनां
　वैरी न चेद्भवति वेपथुरन्तरायः ॥ १०५ ॥'

अत्र नायिकायाः सपत्न्यामीर्ष्यानुबन्धेन प्रतिपादितस्य प्रियतमानुरागलक्षणस्य शृङ्गारस्य दीप्तरसत्वं कान्तिः ॥

**कान्तिरिति** । रसोऽभिमानात्मा शृङ्गारस्तस्य दीप्तत्वं विभावानुभावव्यभिचारिभिः सम्यक् संवलितेन स्थायिना निरन्तरमुपचीयमानस्य परमकोटिगमनम् । तथा हि—मा गर्वमित्यादौ यत्र भङ्गेषु बहुतरसूक्ष्मभङ्गविशेषमयमञ्जरीलिखितेन बहिर्विषयातिरोधानलक्षणतादवस्थ्यात् प्रकाशनेन नायकस्य सपत्न्यामनुरागे विच्छायभावोक्तिः । स्वात्मनि तु सहसाविर्भवत्सात्त्विकप्रतिपादनेन जीवितसर्वस्वाभिमानात्मकरतिस्थायिभावप्रकाशने तस्याः सापेक्षभावे नायिकाया अपि तदवस्थैव सा प्रतीयते । तदिदमाह—प्रियतमानुरागेति । अनुरागेण लक्ष्यते सप्तार्चिरिवार्चिषोपचीयत इत्यनुरागलक्षणः ॥

## भूत्युत्कर्ष उदारता ॥ ८१ ॥

यथा—

'प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने
　तोये काञ्चनपद्मरेणुकपिशे पुण्याभिषेकक्रिया ।
ध्यानं रत्नशिलागृहेषु विबुधस्त्रीसंनिधौ संयमो
　यद्वाञ्छन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी ॥१०६॥'

अत्र मारीचाश्रमस्य सत्कल्पवृक्षादिपदैर्वैभवोत्कर्षस्य प्रतिपादनमुदारता ॥

**भूतीत्यादि** । भूतिः संपत्तस्या उत्कर्षो लोकातिगप्रकर्षस्तस्यैव सहृदयचमत्कारार्पकतया गुणधुराधिरोहणक्षमत्वात् ॥ **प्राणानामिति** । उचिता तपोयोग्या ।

वनस्य कल्पतरुसंबन्धः संपत्, तत्रैव सत्पदेन मुक्तास्तबकमाणिक्यमञ्जरीचीनांशुककिसलयादिविशेषद्योतिना प्रकर्षः । पद्मप्रकरस्तोयसंपत्, तत्रैव काञ्चनमयत्वेन पद्मानां प्रकर्षः । बहुत्वं शिलावेश्मसंपत्, तत्रैव रत्नरूपताप्रकर्षः । संनिधिः स्त्रीप्रतियोगिकतासंपत्, तत्रैव विबुधेति प्रकर्षः । तदिदमाह—सत्कल्पवृक्षादिपदैरिति ॥

**आशयस्य य उत्कर्षस्तदुदात्तत्वमिष्यते ।**

यथा—

'पात्रे पुरोवर्तिनि विश्वनाथे क्षोदीयसि क्ष्मावलयेऽपि देये ।
व्रीडास्मितं तस्य तदा तदासीच्चमत्कृतो येन स एव देवः ॥१०७॥'

अत्र सकलक्ष्मावलयप्रदानेऽपि जातव्रीडतया बलेराशयोत्कर्षप्रतिपादनादुदात्तत्वम् ॥

**आशयस्येति** । उत्कर्षः पूर्ववत् । उच्चाशयो लोके उदात्त इति प्रतीतः ॥ **पात्र इति** । विश्वनाथ इति यदाज्ञावशंवदा त्रिलोकी सोऽपि यत्प्रार्थयत इति, वलयेऽपीत्यपिशब्देन यस्यैकदेशः कुरुपाण्डवनिधननिदानतया विख्यातस्तस्यापि देये लज्जत इति । देवासुरकिंनरादिरयं जङ्गमस्थावरप्रपञ्चो यदुच्छ्वासविलसितं सोऽपि चमत्कृत इति पदार्थानभिहितः प्रकर्षोऽभिधेयः ॥

**ओजः स्वाध्यवसायस्य विशेषोऽर्थेषु यो भवेत् ॥ ८२ ॥**

यथा—

'तान्येव यदि भूतानि ता एव यदि शक्तयः ।
ततः परशुरामस्य न प्रतीमः पराभवम् ॥ १०८ ॥'

अत्र परशुरामो विजयत एवेत्यस्मिन्नर्थे स्वाध्यवसायप्रतिपादनमोजः ॥

**ओज इति** । अध्यवसायो निश्चयस्तत्र विशेषः पूर्ववत् । स्वपदेन वक्त्रभिमतः ॥ **तानीति** । यदि हन्तव्यजातीयमेव न विपर्यस्तम् । ता एवेति । प्रभावोत्साहमन्त्रजास्तद्वदर्थनिबर्हणप्रौढिप्रख्यातकीर्तयः शक्तयो यदि न विलीनतामयासिषुः । **परशुराम इति** । अर्जुनभुजसहस्रच्छेदादिना यस्य परशु(राम)वैरदानेन त्रिभुवनेऽपि प्रसिद्ध इत्यादि ॥

रूढाहंकारतौर्जित्यम्[1]

यथा—

'उमा वधूर्भवान्दाता याचितार इमे वयम् ।
वरः शंभुरलं ह्येष त्वत्कुलोद्भूतये विधिः ॥ १०९ ॥'

अत्रेमे वयमित्यात्मान्वितव्रतचर्यादिसमुत्थप्रौढाहंकारप्रतिपादनादौर्जित्यम् ॥

**रूढेति** । ऊर्जितशब्दोऽहंकृते प्रसिद्धस्तात्कालिकनिमित्तोपनिपाते वासनाविकासात्तमोनिर्भेदस्थानेषु सुप्तप्रबुद्ध **इव** स्थायिभिरसंसृज्यमानः प्रथमप्रादुर्भूतोऽभिमानोऽहंकार इत्युच्यते । रूढः सूक्ष्मावस्थातो द्वितीयामाविर्भावदशामापन्नोऽहंकारो यस्य स रूढाहंकारस्तस्य भावस्तत्ता । सुगममुदाहरणम् ॥

प्रेयस्त्वर्थेष्वभीष्टता ।

यथा—

'रसवदमृतं कः संदेहो मधून्यपि नान्यथा
मधुरमधिकं चूतस्यापि प्रसन्नरसं फलम् ।
सकृदपि पुनर्मध्यस्थः सन्रसान्तरविज्जनो
वदतु यदिहान्यत्स्वादु स्यात्प्रियादशनच्छदात् ॥ ११० ॥'

अत्रामृतप्रभृतिभ्यः प्रियादशनच्छदस्याभीष्टताप्रतिपादनं प्रेयः ॥

**प्रेय इति** । शब्दगुणे तु निष्पादितवर्णनीयप्रीतिजनकत्वं पदानामुक्तम् । इह तु वाक्यार्थस्य वक्तृप्रीतिगोचरत्वमुच्यत इति विशेषः । प्रीतिरुक्तपूर्वा । तत्रैवाभिशब्देन प्रकर्षो द्योतितः । अभीष्टता प्रेय इति प्रेयःपदप्रवृत्तिनिमित्तम् । **रसवदिति** । प्रशंसायां मतुप् । अमृतमिति यस्य प्रसादात्त्रिदशैरमरत्वमासादितं नान्यथेति प्रत्यक्षसाक्षिके वस्तुनि प्रमाणान्तरानुसरणम् । प्रसन्नरसमिति अम्लतालक्षणकान्त्यार्थापगमेन परिणतिरित्यादि ॥

---

१. 'मौर्जित्यम्' क-ख.

**अदारुणार्थपर्यायो दारुणेषु सुशब्दता ॥ ८३ ॥**

यथा—

'देवव्रते वाञ्छति दीर्घनिद्रां द्रोणे च कर्णे च यशोऽवशेषे ।
लक्ष्मीसहायस्य तवाद्य वत्स वात्सल्यवान्द्रौणिरयं सहायः ॥१११॥'

अत्र मुमूर्षामरणादीनां दारुणार्थानां दीर्घनिद्रां वाञ्छति यशोऽवशेष इत्यादिभिः सुशब्दैः पर्यायेण भणनं सुशब्दता । सा च मुख्यार्थव्यतिक्रमस्य वाक्यार्थत्वान्न शब्दगुणः ॥

**अदारुणेत्यादि** । झटित्यातङ्कदायी दारुणस्तस्य साक्षादभिधाने विवक्षितप्रतीतिस्खलनखेदसंभवात्तदुपनीतस्य वस्तुनस्तदध्यासान्तरितस्य वाक्यार्थत्वादिति । सर्वत्रैव हि लक्षणायामर्थाध्यासोऽङ्गीक्रियते । लौकिकी चेयं लक्षणेति न प्रयोजनगवेषणमपीति । सुगममुदाहरणम् ॥

**व्याजावलम्बनं यत्तु स समाधिरिति स्मृतः ।**

यथा—

'दर्भाङ्कुरेण चरणः क्षत इत्यकाण्डे
तन्वी स्थिता कतिचिदेव पदानि गत्वा ।
आसीद्विवृत्तवदना च विमोचयन्ती
शाखासु वल्कलमसक्तमपि द्रुमाणाम् ॥ ११२ ॥'

अत्र गमने सति प्रियजनावलोकनाभिलाषिण्याः शकुन्तलाया दर्भाङ्कुरचरणक्षतिवल्कलव्यासङ्गादिव्याजावलम्बनं समाधिः ॥

**व्याजेति** । चित्तवृत्तिषु बलादाविर्भवन्तीषु प्रकृतरसौचित्यविरोधिप्रकर्षात्प्रकृष्टमनावरणीयासु च यदन्यथा समर्थनं तद्व्याजावलम्बनं प्रस्तुतोचितसमाधानात्मकत्वात् । तथा हि—पूर्वानुरागे त्रपासाध्वसविवशायास्तावन्नायकसमीपादपसरणमौचित्यापन्नम् । अनन्तरं तूत्कण्ठातरलितायाः कथमालोकमात्रेणापि कृतार्थः स्यादिति परावर्तनम् । तत्र च मौग्ध्यभङ्गशङ्कायां दर्भाङ्कुरक्षतिप्रभृतिव्याजावलम्बनमेव कार्यसर्वस्वमाभासत इति ॥

सौक्ष्म्यमित्युच्यते तत्तु यत्सूक्ष्मार्थाभिदर्शनम् ॥ ८४ ॥

यथा—

'अन्योन्यसंवलितमांसलदन्तकान्ति
सोल्लासमाविरलसं वलितार्धतारम् ।
लीलागृहे प्रतिकलं किलकिञ्चितेषु
व्यावर्तमानविनयं मिथुनं चकास्ति ॥ ११३ ॥'

अत्रान्योन्यसंवलितमांसलदन्तकान्तीत्यादिवाक्ये दंपत्योरनुरागलक्षणस्य सूक्ष्मार्थस्य दर्शनात्सौक्ष्म्यम् ॥

**सौक्ष्म्यमिति** । सूक्ष्ममित्यादिवाक्यैकगोचरोऽर्थः कुशाग्रीयबुद्धितया सूक्ष्मस्तस्य दर्शनमुपायवैलक्षण्यात्तद्विशेषवतः प्रत्यक्षायमाणता । सूक्ष्मालंकाराद्भेदस्तृतीये करिष्यते । स चायं भाव्यो वासनीयश्च । भावनामात्रगम्यो भाव्यो यथा—

'उच्चइ आगमहि आवड्ढ सिज्जन्तरो सपरिआरम् ।
पाणी पसरन्तमत्तान्वंवफलिहचसअम्मुहं बाला ॥'

एकाग्रताप्रकर्षगम्यो वासनीयस्तमुदाहरति—**अन्योन्येति** । व्याजापसृतपरिवारे लीलावेश्मनि तत्कालकलितमन्मथोन्माथं विदग्धमिथुनमुत्तरोत्तरमपनीयमानत्रपासाध्वसतया प्रतिकलं नवेन्दुवत्कान्तिविशेषमासादयति । विचित्रमव्यभिचार्यनुप्रवेशो हर्षरुदितस्मितादीनामव्यवस्थिततया व्यतिरेकरूपकिलकिञ्चिताख्यशृङ्गारभावोन्मेषः ॥

शास्त्रार्थसव्यपेक्षत्वं गाम्भीर्यमभिधीयते ।

यथा—

'मैत्र्यादिचित्तपरिकर्मविदो विधाय
क्लेशप्रहाणमिह लब्धसबीजयोगाः ।
ख्यातिं च सत्त्वपुरुषान्यतयाधिगम्य
वाञ्छन्ति तामपि समाधिभृतो निरोद्धुम् ॥११४॥'

---

१. 'संचलित' इति सटीकपुस्तके; 'संमिलित' ग.

२. 'उच्चा(?)गच्छेरावर्धय सिज्जन्तरः सपरिवारम् ।
पाणौ प्रसरन्त ··· ··· ··· ··· ··· ···बाला' इति च्छाया.

अत्र मैत्र्यादिपदानां शास्त्रार्थसव्यपेक्षत्वाद्गाम्भीर्यम् ॥

**शास्त्रार्थ इति ।** एकपुरुषार्थप्रयोजनकपदार्थव्युत्पादनं विधिनिषेधव्युत्पत्तिफलकं शास्त्रं तदर्थसव्यपेक्षत्वम्। तदुक्तप्रक्रियानिरूपणाधीननिरूपणत्वं वाक्यार्थस्य गाम्भीर्यम्। मैत्रीकरुणामुदितोपेक्षा इति चतस्रश्चित्तसंमार्जनाः। अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः। चित्तवृत्तिनिरोधो योगः; स एव व्युत्थानहेतुभिरनास्कन्दनीयः सबीजः। सत्त्वं प्रधानम्, पुरुषश्चिद्रूपस्तयोर्भेदः प्रथाख्यातिरिति सांख्यप्रक्रिया। अत्र मैत्र्यादिपदानामिति। वाक्यार्थस्यैव यथोक्तरूपत्वे तत्प्रतिपादकपदानामवश्यं तथाभावो भवतीति वैशेषिकाद्भेदो वक्ष्यते ॥

## विस्तरोऽर्थविकासः स्यात्

यथा—

'संग्रामाङ्गणमागतेन भवता चापे समारोपिते
देवाकर्णय येन येन सहसा यद्यत्समासादितम्।
कोदण्डेन शराः शरैररिशिरस्तेनापि भूमण्डलं
तेन त्वं भवता च कीर्तिरनघा कीर्त्या च सप्ताब्धयः ॥११५॥'

अत्र विपक्षवधात्सप्ताब्धिव्यापिनी कीर्तिरर्जितेत्येतावतोऽर्थस्य बहु-[1]विधं विकासितत्वाद्विस्तरः ॥

**विस्तर इति ।** वाक्यार्थस्य पल्लवभूततत्सहृदयचमत्कारिविशेषप्रसारणं संवृतविवृतपटवत् विस्तराख्यो गुणः। विस्तर इव विस्तरः शब्दप्रपञ्चवदित्यर्थः। अन्यथा विस्तार इति स्यात्। संग्रामाङ्गणेत्यादौ तु शत्रुशिरश्छेदात्सप्ताब्धिव्यापिनी त्वया कीर्तिरर्जितेत्येतावान्वाक्यार्थो लौकिकसाधारणतया च चमत्कारास्पदमिति संग्रामाङ्गणसंगतिरेव न तथा यथा वीरमात्रस्योचिता तत्रापि चापसमारोपणमिति काप्युत्साहशक्तिः। अत एव बलवदाश्रयप्रसक्तलुण्टाकवधेन यदवसितं तेनैव तदासादितमिति सोपस्कारकर्तृकर्मप्रपञ्चेन विकासनमेव काव्यपदवीप्राप्तिबीजम्। तदिदमाह—बहुविधं विकासितत्वादिति। नात्र शब्दविकासाधीनः प्रकर्ष इति शब्दविस्तराद्भेदः ॥

## संक्षेपस्तस्य संवृतिः ॥ ८५ ॥

---

१. 'बहुधा' क.

यथा—

'श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥ ११६ ॥'

अत्र शास्त्रे विस्तरप्रतिपादितस्य धर्मस्य श्लोकार्धेनोक्तत्वादयमर्थसंकोचः संक्षेपः ॥

**संक्षेप इति** । तस्येत्यर्थस्य समासे गुणीभूतस्यापि बुद्ध्या विभज्य परामर्शः । यथा—'अथ शब्दानुशासनम् । केषां ? शब्दानामि'ति । अशेषविशेषोपग्राहकपुरस्कारेण वाक्यार्थस्याभिधानं विवृतसंवृतपटवत्संक्षेपः ॥ श्रूयतामिति । अत्र तेन तेन विशेषेण विस्तरतः प्रतिपादयितव्यस्य धर्मस्य यत्किंचिदात्मनः प्रतिकूलमन्यस्य नाचरणीयमिति सामान्येनाभिधानमप्रवृत्तप्रवर्तने प्रगल्भायमानमतिसुन्दरमाभासते । नात्र रचनासंकोचप्रतिष्ठितं काव्यमिति शब्दगुणाद्भेदः ॥

**शब्दार्थौ यत्र तुल्यौ स्तः संमितत्वं तदुच्यते ।**

यथा—

'इन्दुर्मूर्ध्नि शिवस्य शैलदुहितुर्वक्त्रो नखाङ्कः स्तने
देयाद्वोऽभ्युदयं द्वयं तदुपमामालम्बमानं मिथः ।
संवादः प्रणवेन यस्य दलता कायैकतायां तयो-
रूर्ध्वद्वारविचिन्तितेन च हृदि ध्यातः स्वरूपेण च ॥११७॥'

अत्र प्रणवलक्षणस्यार्थस्य तुल्यत्वेन यथावद्विभज्य विनिवेशनं संमितत्वम् ॥

**शब्दार्थाविति** । शब्दस्यार्थौ तयोर्विभज्य विनिवेशनं संमितत्वमिति केचित्, तन्न । शब्दग्रहणवैयर्थ्यप्रसङ्गात् । द्वित्वाविवक्षाप्रसङ्गाच्च ।

'पल्लविअं विअ करपल्लवेहिं पप्फुल्लिअं व मुणइअच्छेहिम् ।
फलिअंमिव पीणपओहरेहिं अज्जाइ लावण्णम् ॥'

---

१. 'न परेषाम्' ख-ग.　२. 'प्रतिपादितत्वात्' ख.

३. 'पल्लवितमिव करपल्लवाभ्यां प्रफुल्लितमिव मुग्धाक्षिभ्याम् ।
फलितमिव पीनपयोधराभ्यामार्याया लावण्यम् ॥' इति छाया.

इत्यादौ द्विप्रभृतीनामर्थानामविभज्य विनिवेशनमिष्यते । तस्माच्छब्दश्चार्थश्च शब्दार्थौ । तयोस्तुल्यत्वं यावदुद्देशशब्दार्थम् । अर्थस्य विभज्य तुलाधृतवत्प्रतिनिवेशः संमितत्वमिति । अर्थमुद्दिश्य शब्दतुलनं काव्यभावबीजं शब्दगुणः शब्दमुद्दिश्य त्वर्थतुलनमर्थगुणश्च । तथाहि—परमेश्वरस्य मूर्ध्नि बालेन्दुः, पार्वतीस्तने नखाङ्क इति पृथक्शब्देनोद्दिश्य तदुपमायोग्यतया कार्यैकतायां दलनं हृत्पद्मनवमद्वारयोर्ध्यानेन युगपत्संनिधानमिति सम्यग्विभज्य तुलितस्येव प्रणवस्य प्रतिनिर्देश इति ॥ तदिदमाह—अत्रेति । यथावदिति । येन प्रकारेण संगच्छत इति तदनतिक्रमेणेति ॥

**साभिप्रायोक्तिविन्यासो भाविकत्वं निगद्यते ॥ ८६ ॥**

यथा—

'दृष्टिं हे प्रतिवेशिनि क्षणमिहाप्यस्मद्गृहे दास्यसि
प्रायेणास्य शिशोः पिता न विरसाः कौपीरपः पास्यति ।
एकाकिन्यपि यामि तद्वरमितः स्रोतस्तमालाकुलं
नीरन्ध्रास्तनुमालिखन्तु जरठच्छेदा नलग्रन्थयः ॥ ११८ ॥'

अत्र तमालमालावलयितसरित्तीरकृतसंकेतायाः कुलटायाः स्तनौ भाविनां परपुरुषनखक्षतानां नलग्रन्थ्यालेखव्याजगोपनेन साभिप्रायभणनं भाविकम् ॥

**साभिप्राय इति ।** अभिप्रायविशेषप्रतिबद्धस्य वाक्यार्थस्योक्तिविन्यास उक्त्या विशेषो न्यासः । शब्दगुणे पदानां भाव्यर्थनिष्पादिता इह त्वर्थस्येति विशेषः । तथा हि—दृष्टिमित्यादौ तनुमालिखन्तु जरठच्छेदा नलग्रन्थय इत्युक्त्या विन्यस्यमान एव भाविनलग्रन्थ्यालेख्यरूपार्थः कुलटास्वरूपानुसंधानदत्तान्तःकरणस्य प्रतिपत्तुरनन्तरमेव स्वैरविहारचिह्नगोपनमभिव्यनक्ति ॥

**गतिः सा स्यादवगमो योऽर्थादर्थान्तरस्य तु ।**

यथा—

'शुभे कोऽयं वृद्धो गृहपरिवृढः किं तव पिता
न मे भर्ता रात्रौ व्यपगतदृगन्यश्च बधिरः ।

हु हुं हुं श्रान्तोऽहं शिशयिषुरिहैवापवरके
क यामिन्यां यासि स्वपिहि ननु निर्दंशमशके ॥११९॥'

अत्र प्रश्नादर्थमवगम्य उत्तरादर्थान्तरावगमो गतिः ॥

**गतिरिति**। अर्थादर्थविशेषात्। हृदयसंवादिन इति यावत्। अर्थान्तरस्य तथाभूतस्य। तेन यत्र सहृदयहृदयंगमादर्थात्कांस्यतालानुस्वानुस्वानन्यायेन तादृशमर्थान्तरमवगम्यते सा गतिरिति लक्षणार्थः॥ **शुभे कोऽयं वृद्ध इति।** सर्वाकारमनवद्यायास्तावद्दास्यमपि नायमर्हतीति हृदयानुकूलमर्थं प्रश्नादवगत्य गृहपरिवृढ इत्युत्तरम्। अस्मादपि मम नायं कोऽपि किं तु गृहस्वामीति हृदयसंवादिनमर्थमवधार्य किं तत्र पितेत्यादिकप्रश्नोत्तरशृङ्खला गवेषणीया। तदेतद्याचष्टे—उत्तरादिति। उत्तरप्रत्युत्तरवाक्यात्। उत्तरं तु पदं प्रश्नपदमेव॥

**रीतिः सा यस्त्विहार्थानामुत्पत्त्यादिक्रियाक्रमः ॥८७॥**

यथा—

'प्रथममरुणच्छायस्तावत्ततः कनकप्रभ-
स्तदनु विरहोत्ताम्यत्तन्वीकपोलतलद्युतिः ।
प्रभवति पुनर्ध्वान्तध्वंसक्षमः क्षणदामुखे
सरसबिसिनीकन्दच्छेदच्छविर्मृगलाञ्छनः ॥ १२० ॥'

अत्रोदयादारभ्य चन्द्रस्योत्पत्त्यादिक्रियाक्रमो रीतिः ॥

**रीतिरिति**। उत्पत्त्यादीनां क्रियाणां क्रमः काव्यशोभावहत्वेन गुणः। नेदं वस्तुस्वभाववर्णनमिति जातेरर्थव्यक्तेश्च भेदः। सुगममुदाहरणम्॥

**उक्तिर्नाम यदि स्वार्थो भङ्ग्या भव्योऽभिधीयते ।**

यथा—

'त्वमेवंसौन्दर्या स च रुचिरतायाः परिचितः
कलानां सीमानं परमिह युवामेव भजथः ।
अपि द्वन्द्वं दिष्ट्या तदिति सुभगे संवदति वा-
मतः शेषं चेत्स्याज्जितमिह तदानीं गुणितया ॥१२१॥'

अत्राभीष्टस्य नायकनायिकासंगमस्य भङ्ग्या भणनमुक्तिः ॥

**उक्तिरिति** । स्वीयोऽमीष्टोऽर्थः स्वार्थः । तस्य साक्षात्प्रतिपादनमनुचितमिति अर्थान्तरभङ्गिभिः प्रतिपादनमर्थगुणः । भव्यो मनोहरः । सुगममन्यत् । नायकनायिकासंगमस्येति । नायकस्य नायिकया तस्याश्च नायकेनेति परस्परोत्कण्ठाप्रकर्षो विवक्षितः । तेनैकशेषो न भवति ॥

**विवक्षितार्थनिर्वाहः काव्ये प्रौढिरिति स्मृता ॥ ८८ ॥**

यथा—

'त्वद्वक्त्रेन्दुविलोकनाकुलधिया धात्रा त्वदीयां श्रियं
निक्षिप्य प्रतिराजकेषु विदुषां लक्ष्म्या त्वमापूरितः ।
तेनैते नियतं दरिद्रति गृहेष्वेषामियं दृश्यते
नैनामाद्रियसे त्वमिच्छसि नु तां त्वामेव सा धावति ॥१२२॥'

अत्र त्वद्वक्त्रविलोकनाकुलेन धात्रा त्वदीया लक्ष्मीः शत्रुषु निक्षिप्य विदुषां च लक्ष्मीस्त्वय्यारोपिता । अतस्त्वं विपक्षलक्ष्मीमाद्रियसे सा च त्वामनुधावति । या च विदुषां लक्ष्मीस्तया त्वमापूरितस्तेन ते दरिद्राः । अत एव त्वमेनां नाद्रियसे । इयं च विद्वद्गेहेष्वेव दृश्यते इत्येतावतः प्रभूतस्यार्थस्यानेकवाक्येन प्रतिपादितत्वाद्विवक्षितार्थनिर्वहणं प्रौढिः ॥

**विवक्षितेति** । कवेरभिमतस्य भूयसोऽप्यर्थस्य स्वल्पेनैव वाक्येन प्रतिपादनं प्रौढिः । तथा हि—त्वां निर्माय जगद्विलक्षणवस्तुनिर्वहणचमत्कृतस्य धातुस्त्वद्वक्त्रेन्दुविलोकनं तदासङ्गेन त्वदर्थनिर्मितायाः श्रियः प्रतिराजकेषु भ्रमणक्रमेण संचारणं तत्पूर्वापरप्रतिसंघात(न)बलाद्विद्वद्भ्यो लक्ष्मीमाकृष्येत्यादिको भूयानर्थः स्तोकेन वाक्येनोपनीत इति ॥

१. 'अतः' ग.

संप्रत्यतिप्रसङ्गवारणार्थं क्रमप्राप्ता वैशेषिकगुणा लक्षितव्याः । ते च दोषा अपि सन्तो गुणीभावमापन्ना उच्यन्ते । तत्रैष कवीनामालापः—

'सामण्णसुन्दरीणं विब्भममुव्वहइ अविणओच्चेअ ।
धूमोच्चिअ पज्जलिआणं बहुमओ सुरहिदारूणम् ॥'

दारुणानां गुणत्वमिति शङ्कां दर्शयन्नाह—

**पदाद्याश्रितदोषाणां ये चानुकरणादिषु ।**
**गुणत्वापत्तये नित्यं तेऽत्र दोषगुणाः स्मृताः ॥ ८९ ॥**
**त्रिविधा अपि ते भूयश्चतुर्विंशतिधा बुधैः ।**
**प्रोक्ता यथा गुणत्वेन प्रविभज्य तथोच्यते ॥ ९० ॥**
**या क्लिष्टम्लेच्छितादीनां पददोषेष्वसाधुता ।**
**निरूपितानुकरणे गुणत्वं सा प्रपद्यते ॥ ९१ ॥**

यथा—

'उन्नमय्य सकचग्रहमास्यं चुम्बति प्रियतमे हठवृत्त्या ।
हुं हु मुञ्च ममेति च मन्दं जल्पितं जयति मानवतीनाम् ॥१२३॥'

अत्र हुं हु ममेत्यसाध्वोरपि क्लिष्टम्लेच्छितयोरनुकरणत्वाद्गुणत्वम् ॥

**पदादीति** । पदवाक्यवाक्यार्थदोषाणां गुणत्वापत्तये नित्यं ये भवन्ति, तेऽनुकरणादिषु मध्ये दोषगुणाः स्मृता इति संबन्धः । यद्यपि चानुकरणादिका एव न गुणाः, तथाप्यनुक्रियमाणाद्यभेदोपचारेणोक्तम् । पदादिदोषेष्वन्त्यान्त्यस्यैकस्य नवधाभेदे चतुर्विंशतिप्रकाराः । **यथेति** । येनोपाधिना गुणीभवनमाचार्यैरुपपादितं तत्तदुपाधिविभागप्रदर्शनं करिष्यत इति । **या क्लिष्टेति** । इह द्वये दोषा नित्या अनित्याश्च । तत्रानुकरणमात्रानपवदनीयदोषभावाश्च्युतसंस्काराप्रयुक्तादयो नित्याः । अनुकरणीयानुकरणानपवादकहेतुकाः श्रुतिकटुत्वप्रभृतयस्त्वनित्याः । येषु पददोषेषु क्लिष्टम्लेच्छितप्रभृतीनां यासाधुता निरूपिता, सा गुणत्वमनुकरणे प्रपद्यत इत्यन्वयः । लुप्तैकदेशं क्लिष्टम् । अव्यक्तरूपं म्लेच्छितम् । आदिग्रहणेन ग्रस्तनिरस्तो-

---

१. 'सामान्यसुन्दरीणां विभ्रममुद्वहत्यविनयोच्छ्रायः ।
धूमोच्चयः प्रज्वलितानां बहुमतः सुरभिदारूणाम् ॥' इति छाया.

२. 'क्वचिद्दूषणानामपि गुणत्वमिति दर्शयन्नाह—' इति भवेत्.

पध्मातकम्पितादयः। हुं हु इति द्वितीयहुंकारे बिन्दुप्रोञ्छनान्म्लिष्टम्। ममेति किं मुश्च मुञ्चेति म्लिष्टमुत ममेति न निश्चीयते। **अनुकरणत्वाद्गुणत्वमिति।** अर्थविशेषे हि साधुत्वव्यवस्थेति। यच्चाशक्तिजमसाधुरूपम्, तस्यानुकरणे साधुत्वमिष्यत इत्युक्तम्, अनुक्रियमाणं तु स्वरूपपदानुकरणतया पूर्वार्थत्यागेन साध्वेव। तस्यैवानुकरणस्य तत्कालरञ्जकमानवतीममवचनानुकारतया च गुणीकरणसामर्थ्यमिति॥

**गुणत्वमप्रयुक्तस्य तथानुकरणे भवेत्।**

यथा—

'दिवं पत्काषिणो यान्ति येऽचीकमत भाषिणः।
पत्काषिणोऽपि नो यान्ति ये वचन्ति प्रयुञ्जते॥१२४॥'

अत्राचीकमत वचन्तीत्यादिपदानां कविभिरप्रयुक्तानामप्यनुकरणत्वाद्गुणत्वम्॥

**गुणत्वमिति।** पत्काषिण इति पादमपि कषन्तः। 'हिमकाषिहतिषु च' इति पादशब्दस्य पद्भावः। वचेर्वचन्तीत्येव रूपमप्रयुक्तम्। न त्वन्यथापि। 'सत्यं नाम न वच्मि' इत्यादेरनुमतत्वात्। इत्यादिपदानामित्युदाहरणान्तराभिप्रायेण॥

**यच्छ्रुतेर्विरसं कष्टं तस्य दुर्वचकादिषु।**
**गुणत्वमनुमन्यन्ते सानुप्रासस्य सूरयः॥ ९२॥**

यथा—

'त्वाष्ट्रास्त्वाष्ट्रारिराष्ट्रे न भ्राष्ट्रे नार्दंष्ट्रिणो[1] जनाः।
धार्तराष्ट्राः सुराष्ट्रे न महाराष्ट्रे च नोष्ट्रिणः॥ १२५॥'

अत्र श्रुतिविरसत्वात् कष्टत्वेऽपि दुर्वचकत्वाद्गुणत्वम्॥

**यच्छ्रुतेरिति।** दुर्वचकयोगा इति व्यावहारिकचतुःषष्ट्यां दुर्वचकप्रयोगोऽनुमतः। तस्यानुप्रासघटकत्वेऽलंकारनिर्वहणक्षमतया कविशक्तिव्यञ्जकस्य गुणीभावः। आदिपदेन रौद्रादिरसानुप्रवेशः। यदाह—

'शषौ सरेफसंयोगौ टवर्गश्चापि भूयसा।
विरोधिनः स्युः शृङ्गारे तेन वर्णा रसच्युताः॥

१. 'नाष्ट्रा' ख-ग; 'नांष्ट्रा' इति पठित्वा 'नांष्ट्रा राक्षसाः' इति व्याख्यातं काव्यानुशासनविवेके हेमचन्द्राचार्यैः.

त एव विनिवेश्यन्ते बीभत्सादौ रसे यदा ।
तदा तं दीपयन्त्येव तेन वर्णा रसच्युताः ॥' इति ।

त्वाष्ट्रा राक्षसास्त्वष्टुरपत्यं वृत्रस्तस्यारिरिन्द्रस्तस्य राष्ट्रे स्वर्गे न सन्ति । भ्राष्ट्रे चणकादिभर्जनस्थाने न कुण्ठदंष्ट्रा भवन्ति । असितचञ्चुचरणा हंसा धार्तराष्ट्रा न विद्यन्ते । उष्ट्रिण उष्ट्रोपजीविनः ॥

**यत्पादपूरणाद्यर्थमनर्थकमुदाहृतम् ।**
**गुणत्वमनुमन्यन्ते तस्यापि यमकादिषु ॥ ९३ ॥**

यथा—

'योषितामतितरां नखलूनं गात्रमुज्ज्वलतया न खलूनम् ॥ १२६ ॥'
बभौ मुखेनाप्रतिमेन काचन श्रियाधिकानां प्रति मेनका च न॥१२७॥'

अत्र खलुशब्दस्य चशब्दस्य च पादपूरणमात्रेऽपि प्रयोजने यमकत्वाद्गुणत्वम् ॥

**यत्पादपूरणेति** । द्योतनीयमर्थमन्तरेण प्रयुक्तमव्ययपदमनर्थकमित्युक्तम् । पादपूरणार्थत्वं तु दूषणताबीजम् । आदिग्रहणाद्दूषपूरणम् । सति तूपयोगे तस्य तद्बीजाभावाद्दोषभावविरहोऽलंकारारम्भे च गुणत्वम् । तदिदमुक्तम्—**यमकादिष्विति** । आदिशब्दोऽनुप्रासचित्रादिपरः । वाक्यालंकारार्थत्वमपि शब्दालंकारारम्भकत्वमेव । यदाह—'आर्षपिपुत्रकर्षिकवैदिकादिवाक्यानामलंकारहेतवो वाक्यालंकारार्थाः' इति । तेन—

'उत्फुल्लकमलकेसरपरागगौरद्युते मम हि गौरि ।
अभिवाञ्छितं प्रसिध्यतु भगवति युष्मत्प्रसादेन ॥' इति ।

अत्र हि प्र इत्येतयोर्न वाक्यालंकारप्रयोजकत्वमित्युक्तप्रायम् । योषितामित्यादावतितरां नखलूनं योषितां गात्रमुज्ज्वलतया नोनमित्येव पर्याप्ते द्वितीयपादे तदुभयमपि यमकारम्भकं सत्प्रस्तुतोपयोगितया कविव्युत्पत्तिपुरस्कारप्रवृत्तमपजहाति दोषभावमुपादत्ते च गुणत्वमिति ॥

**यत्तु रूढिच्युतत्वेन प्रोक्तमन्यार्थसंज्ञितम् ।**
**प्रहेलिकादिषु प्रायो गुणत्वं तस्य युज्यते ॥ ९४ ॥**

---

१. 'हंसा' ख.

यथा—

'खातयः कनि काले ते स्फातयः स्फार्हवल्गवः ।

चन्द्रे साक्षाद्भवन्त्यत्र वायवो मम धारिणः ॥ १२८ ॥'

अत्र खातय इत्यादीनां घर्घरिकादौ धृङश्चानवस्थाने न रूढिः । गूढार्थे तु प्रहेलिकादौ तन्न दुष्यतीति तेषां दोषगुणत्वम् ॥

**यत्त्विति** । रूढिच्युतत्वेन द्वितीयां संज्ञां प्रयोजयति । आकीर्णमन्त्रणाद्युपयोगिनी प्रहेलिका । तथा च—तद्विधसंभाषायां विदग्धैरुपन्यासैः स्वार्थाप्रत्यायकत्वलक्षणबीजाभावान्न दोषः, गुणस्तु भवति । अनुकरणादिकमादिपदेन गृह्यते । खातयो घर्घरिकाः । कनीति कन्यासंबोधनम् । कालश्चरणः कर्णाटदेशभाषानुसारात् । स्फातयः स्फीताः । स्फार्हो मनोहरः । वल्गुर्ध्वनिः । चन्द्र आह्लादकः । वायवः प्राणाः । धारिणोऽनवस्थिताः । तदयं वाक्यार्थः—हे कनि कन्ये, तवाह्लादकचरणबद्धा यथोक्तविशेषणा घर्घरिकाः साक्षाद्भवन्ति श्रोत्रेण प्रत्यक्षीक्रियन्ते । अत्र प्रस्तावे मम प्राणा उद्दीपनप्रकर्षमसहिष्णवो धारिणोऽनवस्थिता इति । व्रणप्ररोहस्थानादौ खात्यादिशब्दानां रूढिर्न तु घर्घरिकादावित्याह—अत्रेति । नामधातुविवक्षया द्विधा व्याख्यातम् ॥

तुच्छवाच्यमपुष्टार्थमिति यत्प्राक्प्रकाशितम् ।

तस्य च्छन्दोऽनुरोधादौ गुणत्वमवधार्यते ॥ ९५ ॥

यथा—

'द्विरष्टवर्षाकृतिमेनमर्थिनामुशन्ति कल्पोपपदं महीरुहम् ।

यमिन्द्रशब्दार्थनिषूदनं हरेर्हिरण्यपूर्वं कशिपुं प्रचक्षते ॥ १२९ ॥'

अत्र द्विरष्टवर्षाकृतिमिति कल्पोपपदं महीरुहमिति हिरण्यपूर्वं कशिपुमित्यस्य तुच्छार्थत्वेऽपि च्छन्दोऽनुरोधाद्गुणत्वम् ॥

**तुच्छेति** । शब्दपल्लवनस्य प्रकृतरसाननुगुणत्वेन दोषत्वप्रसङ्गे क्वचिदनन्यगतिकतया कवेरुत्पाद्यते । तथा हि—भिन्नसर्गान्तैरित्यादिना सर्गाणामौत्सर्गिकैकवृत्तनिर्वाहौचित्ये स यथोक्तसंक्षिप्तशब्दाप्रवेशात्पररूपेण तदर्थत्वस्य विवक्षितत्वाच्च

१–२. 'खादयः' ख.

शब्दविकासे न दोषः, किं तु गुण एव । प्रकृतोदाहरणे द्विरष्टवर्षाकृतिमिति कल्पोपपदं महीरुहमिति च निदर्शनं मन्यन्ते । षोडशादिशब्दानामपि वंशस्थप्रवेशत्वादनन्यगतिकत्वाभावात् । हिरण्यपूर्वं कशिपुमिति तु संगच्छते । नहि हिरण्यकशिपुशब्दोऽत्र प्रविशति । प्रदर्शनार्थं तु द्वयमन्यदप्युपात्तम् । एवंविधः शब्दविस्तरो गुणतामासादयतीत्याशयात् । तेनायमर्थः—पल्लवाख्यशब्दगुणे तावत्तुच्छता चमत्कारकारितया गुणधुराधिरूढैवाविस्तरविविक्तविषयतया क्व विशेषगुणस्य भवतीति जिज्ञासायां तु छन्दोऽनुरोधो विहितः । सोऽपि हि कादाचित्कः करोत्येव दोषभावव्यावृत्तिमिति ॥

**प्रतिपादितमादौ यदसमर्थमवाचकम् ।**
**तस्यापि खलु मन्यन्ते गुणत्वं सीत्कृतादिषु ॥ ९६ ॥**

यथा—

'आशु लङ्घितवतीष्टकराग्रे नीविमर्धमुकुलीकृतदृष्ट्या ।
रक्तवैणिककराहततन्त्री मण्डलक्वणितचारु चुकूजे ॥ १२० ॥'

अत्र कूजितस्य पक्षिणोऽन्यत्रावाचकत्वेऽपि कामशास्त्रेऽनुमतत्वाद्गुणत्वम् ॥

**प्रतिपादितमिति ।** अस्ति कश्चिदेवं विषयो यत्रासमर्थस्य चारुतया गुणभावः । तथा हि—यद्यपि गणपाठादव्यक्तशब्दः कूजितम्, तथापि लोके पक्षिविषय एव नियतम्, तथा चाभिमतविषये प्रयुक्तं पक्षिविरुताकारमावेदयति । 'हारीतप्रभृति-' इत्यादिना कामशास्त्रकारैः सीत्कारोपदेशनात् । सीत्कारस्य च चतुःषष्टिकलान्तर्गतत्वेन प्रवणतयात्यन्तमुपादेयत्वात् । तदाह—'अन्यान्यप्याकृतिग्रहणान्युपलक्षयेत्' इति ॥

**शास्त्रमात्रप्रतीतत्वादप्रतीतं यदुच्यते ।**
**गुणत्वं तस्य तद्विद्यसंभाषादौ विदुर्बुधाः ॥ ९७ ॥**

यथा—

'सर्वकार्यशरीरेषु मुक्त्वाङ्गस्कन्धपञ्चकम् ।
सौगतानामिवात्मान्यो नास्ति मन्त्रो महीभृताम् ॥ १२१ ॥'

अत्राङ्गस्कन्धपञ्चकमित्यस्य शास्त्रमात्रप्रसिद्धस्यापि तद्विद्यसंभाषायां गुणत्वम् ॥

**शास्त्रेति** । शास्त्रमात्रप्रसिद्धानामाहत्यप्रतीत्यजननेन विवक्षितवाक्यार्थप्रत्ययपरिस्खलनं खेददायी नानामृदुदुष्टताबीजम् । यदि तु कुतश्चिद्विशेषाज्झटित्येव प्रतीतिं जनयेत्तदा कथं दोषः । अस्ति च प्रतिपत्तिव्युत्पत्त्यतिशयलक्षणो विशेषः । तदिदमुक्तम्—तद्विद्येति । मन्त्रणाद्यवसरे औचितीवशात्तत्पदानां गुणत्वमपि निर्वहति । शास्त्रप्रक्रियापेक्षित्वं गाम्भीर्यम् । शास्त्रव्यवहारसंकेतितपदानां गुणत्वमित्यन्यः प्रकारः । यथावद्विनियोगः कार्यस्तस्य प्रकारसाकल्यं शरीरम्, शब्दच्छलात्कायः, आत्मा सारभूतः क्षेत्रज्ञश्च । कर्मणामारम्भोपायः पुरुषद्रव्यसंपद्देशकालविभागो विनिपातप्रतीकारः कार्यसिद्धिरिति पञ्चाङ्गानि । रूपं संज्ञा संस्कारो वेदना विज्ञानमिति पञ्च स्कन्धाः ॥

**अर्थप्रतीतिकृद्दूरे क्लिष्टं नाम यदुच्यते ।**
**झटित्यर्थप्रतीतौ तद्गुणत्वमनुगच्छति ॥ ९८ ॥**

यथा—

'अथात्मनः शब्दगुणं गुणज्ञः पदं विमानेन विगाहमानः ।
पितुः पदं मध्यममुत्पतन्ती काञ्चीगुणस्थानमनिन्दितायाः ॥१३२॥'

अत्रात्मना पदं शब्दगुणमिति पितुः पदं मध्यममिति चाकाशविषया काञ्चीगुणस्थानं नितम्बविषयमिति सर्वप्रसिद्धेर्झटित्येव प्रतीतिं करोतीति क्लिष्टस्यास्य गुणत्वम् ॥

**अर्थप्रतीतिकृदिति** । इहापि तदेव दूषणताबीजं झटिति प्रतीतिजनने सति समाधीयते । समाधानोपायश्च पदान्तरसंनिधानमतिप्रसिद्धिः प्रकरणं वा । तथा हि—प्रकृतोदाहरणे उत्तरार्धे हरिरित्यभिधानादात्मनः पदमिति हरेः पदमिति संपन्नम्, अस्य च सामान्यशब्दत्वादाकाशविषया प्रतीतिर्यद्यपि झटिति नोत्पत्तुमर्हति, तथापि शब्दगुणमिति विशेषणेन पदार्थान्तराद्यवच्छिद्य विवक्षिताभिमुखी प्रतीतिरुपजन्यते । पितुः पदमिति । यद्यपि पदमिति सामान्यं तथाप्याकाशस्यैव मध्यमचरणविन्यासस्थानत्वेन प्रसिद्धेर्न तथोचितप्रतीतिव्यवधानम् । काञ्चीगुणस्थानमिति । चरणादारभ्य वर्णनाक्रमे नितम्ब एव काञ्चीनिवेशनस्योचितत्वान्न प्रती-

तिव्यवधानम्। तदिदमुदाहरणत्रयप्रयोजनमुदाहरणादेरनेकोऽत्र वाक्यार्थो गवेषणीयः। कथं तर्हि सर्वप्रसिद्धेरिति ब्रवीति। इत्थं शब्दगुणशब्दस्य बहुव्रीहित्वादवश्यं विशेषपर्यवसानाय प्रसिद्धिरनुसरणीया। अवश्यं च वर्णनक्रमेऽपि काञ्चीगुणस्थानमनिन्दितायाः इत्यत्र काञ्चीगुणस्थानशब्दस्य नितम्बविशेषपर्यवसानार्थं कवीनामौचित्यप्रसिद्धिरङ्गीकर्तव्येति। ननु चात्मनः पदं शब्दगुणत्वमित्यत्र प्रसादः कस्मान्न भवति। एवमाह न भवतीति। उदाहरणस्यादूषणत्वात्सामान्यशब्दस्य विशेषपर्यवसानम्, अन्यच्च समभिव्याहृतपदार्थसंसर्गरूपे वाक्यार्थे स्वच्छसलिल इवाभिमतविशेषप्रतिबिम्बनमित्युपाधिद्वयस्य संकराच्च॥

**अप्रसिद्धार्थसंबन्धं यद्गूढार्थमिति स्मृतम्।**
**तद्व्याख्यानादिषु प्रायो गुणत्वेन तदिष्यते॥ ९९॥**

यथा—

'अम्हारिसा वि कइणो कइणो हलिबुड्ढसालिपमुहा वि।
मण्डुक्कमक्कडा वि हु होन्ति हरीसप्पसिंहा वि॥ १३३॥'

[अस्मादृशा अपि कवयः कवयो हरिवृद्धशालिप्रमुखा अपि।
मण्डूकमर्कटा अपि खलु भवन्ति हरिसर्पसिंहा अपि॥]

अत्र मण्डूकमर्कटसर्पसिंहेष्वप्रसिद्धप्रयोगत्वाद्गूढस्यापि हरिशब्दस्य स्वयं व्याख्यातत्वाद्गुणत्वम्॥

**अप्रसिद्धार्थसंबन्धमिति**। तस्य गुणार्थस्य व्याख्यानं तद्व्याख्यानम्। अत्राप्यतिप्रसिद्ध्याकृष्टस्यानतिप्रसिद्धार्थप्रतीत्यकरणं दुष्टताबीजमभिधानीयम्, तत्तु प्रतीतिपर्यवसानादेव निवर्तते। भवति चाभिधानकोष इव व्याख्याने झटिति प्रत्ययः। अस्मादृशा अपि मन्दप्रतिभानाः कवयः कविशब्दवाच्या हरिवृद्धशालिप्रमुखाश्च लोकोत्तरप्रतिभाशालिनस्तदवयवतां विख्याते चाविख्याते च शब्दाः साधारणा भवन्ति। तद्यथा—हरिशब्द एवेति व्याख्यानम्। ततो दोषत्वाभावः प्रतिवस्तुलक्षणालंकारपर्यवसायितया च प्रकृतार्थानुगुणत्वेन गुणत्वलाभः। तदेतद्व्याचष्टे—स्वयं व्याख्यातत्वाद्दोषाभावो गुणत्वं पुनराभिप्रायिकात्प्रकृतानुगुणभावादिति बोद्धव्यम्॥

१. 'अन्द (चन्द)' ख-ग.

**नेयार्थं यत्स्वसंकेतक्लृप्तवाच्यं निरूपितम्।**
**प्रहेलिकादिषु प्राज्ञैस्तद्गुणत्वेन गण्यते॥ १००॥**

यथा—

'मोरु कलावेण वहइ तह णामह सरिणाउ।
उस्सीसा पाअन्तिगओ अणुणत्तिहिं जणु णाउ॥ १३४॥'

[मयूरः कलापेन वहति तस्य नाम्नः सदृशनामा।
उच्छीर्षात्पादान्तगतोऽनुनक्तं यथा नौका॥]

अत्र मयूरबर्हचन्द्रकसंकेतेन कल्पितस्य चन्द्रनाम्नो नेयार्थत्वेऽपि प्रहेलिकात्वाद्गुणत्वम्॥

**नेयार्थमिति**। अत्रापि पूर्ववदेव वासना। आकीर्णामन्त्रणादौ विदग्धानां लक्षणादयः प्रहेलिकाविशेषानुन्मीलयन्त उपयुज्यन्ते। तथा हि—मयूरेति। 'जिअनाउ' इति पाठे जितनौक इति स एवार्थः। मयूरो बर्हभारे चन्द्रकं वहति। अनेन संकेतेन चन्द्रनाम लभ्यते। संविष्टस्य शिरोदेश उच्छीर्षम्, चरणदेशः पादान्तः। उच्छीर्षेण प्राची दिग्लक्ष्यते। 'प्राक्शिराः शयीत' इति वचनात्। अर्थात्पादान्तेन प्रतीची। ततश्च 'प्राच्याः प्रतीचिमर्धचन्द्रो गतः' इति प्रातःकालोद्भेदो वाक्यार्थः। 'अणुणेन्ति अजिणणाउ' इति पाठे सुभगमानिनं कान्तमनुनयन्त्या मया ज्ञात इति खण्डितकामिनीखेदोक्तिः। न चैनायां लक्षणानामस्ति किंचित्प्रयोजनमिति नेयार्थत्वप्रसक्तौ प्रहेलिकाभाव एव समाधानहेतुः। ननु चोच्छीर्षपादान्तरपदयोरस्तु, मयूरकलाप इत्यादौ तु कथम्। यमिति हि सर्वेनामाभिमतमेव तावदुपस्थापयति। बर्हं बहूनां बहुले कथमेकस्य प्रतीतिरित्यभिधानेऽपि कदाचित्क्लिष्टस्य विशेषगुणः स्यात्। नात्र नेयार्थता, किं तु तेन संकेतेन कल्पितस्य चन्द्रनाम्न इति। तस्य नाम्नः सदृशनामेत्यनेन मुख्यवृत्त्यैव विवक्षितसदृशलाभादिति। अत्रेदं वक्तव्यम्—तस्य नाम्न इत्यनेन चन्द्रकपदमुपस्थापितम्, न च तेन सहास्ति चन्द्रपदस्य सादृश्यमिति। तत्र लक्षणाश्रयणीया। तदिदमुक्तं चन्द्रसंकेतेन कल्पितस्य चन्द्रनाम्न इति। उपलक्षणतया च एकदेशव्याख्यानमिदम्॥

---

१. 'तदीरितम्' क-ख.

**यदनिश्चयकृत्प्रोक्तं संदिग्धं तद्गुणी भवेत् ।**
**भवेद्विशेषावगमो यदि प्रकरणादिभिः ॥ १०१ ॥**

यथा—

'महीभृतः पुत्रवतोऽपि दृष्टिस्तस्मिन्नपत्ये न जगाम तृप्तिम् ।
स शार्ङ्गचक्रासिगदाब्जपाणिर्मेघच्छविः पातु जगन्ति शौरिः ॥ १३५ ॥'

अत्र तस्मिन्नपत्ये इत्यनिश्चितस्याप्यपत्यविशेषस्य संदिग्धत्वेऽपि गौर्यामिति प्रकरणेन गम्यते । मेघच्छविरित्यस्य च नवश्यामादिपदानुपादानेऽपि शौरिसंबद्धत्वान्नवमेघच्छविर्मेघश्यामच्छविरिति वा विशेषो निश्चीयत इति तस्यापि गुणत्वम् ॥

**यदिति** । संशायकजातीयस्य संदेहजनकत्वं नाम दूषकताबीजम् । तद्यदि कुतश्चिद्विशेषाद्विवक्षितप्रतीतिरप्रत्यूहमुपपद्यते तदा भवत्येव दोषाभावः । विशेषावगमो विशेषदर्शनं तस्यैव संशयविरोधित्वात् । महीभृत इत्यादावपत्यशब्दो यद्यपि गौरीशब्दोऽपि तदितरदत्तपद इति संशायकजातीयो भवति, तथापि तच्छब्दोपस्थापित एव विवक्षितविशेषे पर्यवस्यन्नपजहाति दोषत्वम् । तच्छब्द एव कथं तमर्थमुपनयतीत्यत्र तु प्रकरणमेव जाग्रदवस्थमस्ति । मेघच्छविरित्यत्र तु यद्यपि मेघपदं श्यामाश्यामदत्तपदतया संशायकजातीयम्, तथापि प्रसिद्धपदनीलवर्णार्थगौरीपदसमभिव्याहाराच्छब्दान्तरसंनिधिरपि विशेषे नियमयति तद्वा छविपदं वा विशेषे पर्यवस्यति । अत्र प्रकरणादीनां विशेषस्मृतिहेतुत्वात् । अत एव सूत्रे बहुवचनादिपदानुपादानादनुपात्तास्तदेतदभिसंधाय व्याचष्टे—**अत्रेत्यादि** । एवं नवमेघच्छविरिति चोक्ते यथा नियमेनार्थप्रतीतिरप्रत्यूहा भवति तथा मेघच्छविरित्युक्त इति । अत एव कविसमयप्रसिद्धविशेषावगमसामग्रीसंपादनेन गुणत्वमिति । कथं पुनरिदं क्लिष्टस्य वैशेषिकं न भवति को वाक्यभूतेन भवति । किं तु संशायकत्वमापादयतः प्रतिभासोऽप्युक्तयुक्त्या निवर्तेत इत्यभिमतम् । न चैवंरूपता क्लिष्टवैशेषिके संभवति । एकस्यैव चित्रपदस्य संशयशक्तिरिति न वाक्यार्थगामिता ॥

**यत्तद्विरुद्धमित्युक्तं विपरीतप्रकल्पनम् ।**
**तथाभूताभिधानेन गुणत्वं प्रतिपद्यते ॥ १०२ ॥**

यथा—

'अभिधाय तदा तदप्रियं शिशुपालोऽनुशयं परं गतः।
भवतोऽभिमनाः समीहते सरुषः कर्तुमुपेत्य माननाम् ॥१३६॥'

अत्र विपरीतार्थकल्पनं विरुद्धत्वेऽपि संध्यर्थविग्रहार्थयोः स्फुटभिन्नार्थत्वेनाभिधानाद्गुणत्वम् ॥

**यत्तदिति**। एवं वस्तु प्रकृतमभिसंधाय वाक्यरचने तदुपमर्दकवस्त्वन्तरप्रवेशो विरोधः। यत्र द्वे अपि वस्तुनी प्रकृते वस्त्वन्तरमेव वा प्रकृतं तथथोक्तरूपाभावे कथं दोषः। तथा हि—अभिधायेत्यादौ दूतवाक्ये संधिविग्रहयोर्मिथो विरोधिनोरपि विवक्षितं स दोषः। सरुषः सक्रोधस्य तव माननां पूजां शिशुपाल इच्छति। अनुशयः पश्चात्तापः। अभिमुखं सोत्कण्ठं मनो यस्य स तथेति संधिपक्षे। विग्रहपक्षे त्वनुशयः क्रोधो भवतः सकाशादभि भयशून्यं मनो यस्येति नित्यसापेक्षत्वात्समासः। सरुषो मानना उपयोगस्तदिह निसृष्टार्थस्योभयोपन्यासो यद्रोचते तद्विधीयतामित्यभिसंधाय रचित इति गुणत्वमित्युभयविवक्षापक्षे व्याख्यानम्। यदा तु शासनहरो दूतस्तदोद्यतेष्वपि शस्त्रेषु यथोक्तवक्तारो दूता भवन्तीति न्यायेन विग्रहार्थमेवाभिमतः विपक्षस्यापि प्ररोचना दूतकर्तव्येति मुखे संधिः पर्यायभूतो युक्त एव। तदिदं व्याख्यानेन स्फुटयति—अत्रेति। संधिरूपोऽर्थः संध्यर्थः, विग्रहरूपोऽर्थो विग्रहार्थः। तयोरभिधानेन स्फुट एव भिन्नोऽर्थः प्रयोजनम्। पक्षद्वयेऽपि यत्प्रयोजनमुक्तं तदभिप्रायेणैतद्व्याख्यानम् ॥

अप्रयोजकमित्युक्तमविशेषविधायकम्।
स्वरूपमात्रे वक्तव्ये तस्यापि गुणतेष्यते ॥ १०३ ॥

यथा—

'तेऽप्याकाशमसिश्यामसुत्प्लुत्य परमर्षयः[1]।
साग्रं वर्षसहस्रं स तपस्तेपे महामनाः ॥ १३७ ॥'

अत्रासिश्याममित्याकाशं प्रति, साग्रमित्यनेन च वर्षसहस्रं प्रति विशेषानभिधानेऽपि दूरोत्पतनचिरतपश्चरणयोरुपयोगविवक्षायां गुणत्वम् ॥

---

१. 'वे चा' ख.

**अप्रयोजकमिति** । तदेव कविभिरुपादीयत इति यदभिप्रेतसंधिमाधत्ते । यत्र वाक्यार्थप्रविष्टमपि न तथाभावमासादयति तदप्रयोजकमित्युक्तम् । तस्य यदि विशेषस्वरूपाभिधाने पर्यवसानेन प्रयोगो न तर्हि दोषः । तथा हि—आकाशमित्यादौ नातिश्यामतारूपं विशेषमाकाशे कांचिदपि विशेषमात्रामुन्मुद्रयति, आकाशस्य सर्वदा तद्रूपानपायात् । एवमसमग्रस्य सहस्रत्वाभावात्साग्रमित्यपि न विशेषाधायकम् । आकाशसहस्रयोस्तु यदेव रूपमावेदनीयमित्यत्रैतावन्मात्राभिप्रायेण नास्ति दूषणम्, तथापि नान्तरीयकयोरभिधाने किं प्रयोजनं येनानयोर्गुणभावसंपत्तिरित्यत आह—**दूर इति** । अतिदूरे श्यामत्वमधिकं प्रतिभाति । क्षणमात्रमपि न विरतिरासीदिति साग्रपदाभिप्रायोऽत एव नात्र पौनरुक्त्यम् । तर्हि वाक्यार्थे विशेषाधायकत्वमेवानयोरिति कथं दूषणत्वसंभावना । इत्थम् । यस्मिन्ननुपादीयमानेऽपि नाभिमतन्यूनता तत्पदमप्रयोजकम् । अस्ति चात्र द्वयोरपि तज्जातीयतायां दोषत्वप्रसङ्गः । स प्रकृतोपयोगविवक्षायामेव निवर्तते । सर्वथा प्रकृतानुपयोगे दूषणत्वानपायिता । अस्ति चात्रोचित एवोपयोगो यो विवक्षितुमर्हतीत्याह—**विवक्षायामिति** ॥

**यदव्युत्पत्तिमदेश्यमिति पूर्वं निरूपितम् ।**
**महाकविनिबद्धं सत्तदप्यत्र गुणी भवेत् ॥ १०४ ॥**

यथा—

'षण्डेषूद्दण्डपिण्डीतगरतरलनाः प्रापिरे येन वेला-
मालम्ब्योत्तालतल्लस्फुटितपुटकिनीबन्धवो गन्धवाहाः ॥ १३८॥'
'पातालप्रतिमल्लगल्लविवरप्रक्षिप्तसप्तार्णवम् ॥ १३९ ॥'
'किरन्तः कावेरीलडहलहरीशीकरकणान् ॥ १४० ॥'

अत्र तल्लगल्ललडहलहरीप्रभृतीनामव्युत्पत्तिमत्त्वेनोद्देश्यत्वेऽपि महाकविभिरङ्गीकृतत्वाद्गुणत्वम् ॥

**यदिति** । संदर्भच्छायावैषम्यमत्र कष्टताबीजमिति पूर्वमुक्तं तत्र यदि समानच्छायशब्दमध्यनिवेशनेन प्रतिक्षिप्यते तदा कथं दोषः । तथाभूतानामेव पदानां संदर्भनिर्वाहकतया महाकविनिबद्धमिति । अत एव शब्दगमकतया गुणत्वलाभः । उद्दण्डत्वेन पिण्डीतगराणां कठोरता । तादृशानामपि तरलनेन प्रौढिः । उत्ताले-

स्याद्यनुप्रासवत्प्रौढपदसजातीयमेव तल्लपदम्। एवं गल्लेत्यादौ बोद्धव्यम्। तदिदमाह—**अत्र तल्लगल्लेत्यादि** ॥

**ग्राम्यं घृणावदश्लीलामङ्गलार्थं यदीरितम्।**
**तत्संवीतेषु गुप्तेषु लक्षितेषु न दुष्यति ॥ १०५ ॥**

तत्र संवीते यथा—

'तस्मै हिमाद्रेः प्रयतां तनूजां यतात्मने योजयितुं यतस्व।
योषित्सु तद्वीर्यनिषेकभूमिः सैव क्षमेत्यात्मभुवोपदिष्टम् ॥१४१॥'

अत्र तद्वीर्यनिषेकभूमिरित्यश्लीलस्यापि संवीतत्वाद्गुणत्वम् ॥

यदाह—

'संवीतस्य हि लोकेषु न दोषान्वेषणं क्षमम्।
शिवलिङ्गस्य संस्थाने कस्यासभ्यत्वभावना ॥'

**ग्राम्यमिति**। अत्र केचिद्यथासंख्यं व्याचक्षते—घृणावदादीनां त्रयाणां क्रमेण संख्यानगोपनलक्षणानि दोषत्वाभावबीजानीति, तदसत्। घृणावदर्थादिमात्र एवाग्रे प्रतिसंभेदत्रिकमुपादाय संव्यानादित्रिकस्योपदर्शनात्। एतादृशयथासंख्यसूचनायैव लक्षणातिक्रमेण घृणावतः प्रथममुपादानम्। तस्मात्संख्यानमिव संख्यानं लोकानुमतिः। किंचित्पदं दुष्टजातीयमपि लोके नोपादानात्ताद्रूप्यं जहात्येव। प्रायेण लोकानुसारि काव्यदर्शनं भवत्यतः प्रतिस्वं भेदत्रितयसंबन्धादुपपन्नं *यथासंख्यं* स्यादित्यभिधाय पूर्वक्रमेणोदाहरति—**अत्रेति**। एतेन संवीतेष्वित्यादिकं बहुवचनं व्याख्यातम्। यथा शिवलिङ्गस्य संस्थान इत्यत्र यद्यपि मुख्यविधैव शिवलिङ्गपदमश्लील एवार्थे, तथाप्यविगानेनादिप्रयोगयोगित्वान्न व्रीडादानक्षमं तथेहापि तद्वीर्येति। शिवलिङ्गेत्यत्र भगवत्संबन्धः प्रयोजक इति तु तुल्यमत्रापीत्याह—**तदिति**। अत्र हि जगदन्तर्यामिणो भगवतस्तद्विरोधितया प्रसिद्धिरुपजीव्या तदुपजीवने व्रीडादायिनी प्रतीतिरनुत्थायिन्येव। अत्रैवाचार्यमतं लिखति—**संवीतस्य हीति**। **कस्यासभ्यत्वेति**। भावना सकललोकसाधारणं ज्ञानम् ॥

गुप्ते यथा—

'सुदुस्त्यजा यद्यपि जन्मभूमिर्गजैरसंबाधमयांबभूवे।
स तेऽनुनेयः सुभगोऽभिमानी भगिन्ययं नः प्रथमाभिसंधिः॥१४२॥'

अत्र जन्मभूमिसंबाधसुभगभगिनीशब्दानामश्लीलार्थान्तरत्वेऽपि प्रथमार्थप्रभावभावनागुप्तत्वाद्गुणत्वम् ॥

यदाह—

'वस्तुमाहात्म्यगुप्तस्य पदार्थस्य विभावनात् ।
भगिनीभगवत्यादि नासभ्यत्वेन भाव्यते ॥'

यस्य पदस्य व्युत्पत्तिलभ्यमर्थान्तरं ग्राम्यम्, यस्य वा समभिव्याहारलभ्यम्, तत्र गोपनं समाधानबीजम् । तदुभयं भवति रूढेर्वा बलवत्त्वं जलधरादिष्विव तथा तात्पर्योन्नयनप्रतिबन्धेन विपरीतार्थतात्पर्योन्नयनपर्यवसानं वा । यथोदाहरिष्यमाणे तथा च प्रतीतेरप्रत्यूहे दूषणताबीजाभावस्तत्र प्रथमकक्षापक्षीकरणेनाद्यमुदाहरति । रूढ्युपस्थापितः प्राथमिकोऽर्थस्तस्य भावो झटिति वाक्यार्थज्ञानं तस्य भावना वासना तया गोपनं चमत्कारार्पणमतिरोधानम् । अमुमेवार्थमाचार्यमतेन स्वहस्तयति—**वस्तुमाहात्म्येति । अविभावनादिति ।** विरुद्धं व्रीडादायितया भावनं तस्याभावात् । तेन क्वचिद्योगोपादानेऽपि तथाभावसंपत्तौ न दोषः । एतदेवोदाहरणेन स्फुटयति—**भगिनीति** । एतेन भगवतीति पूर्वानुपात्तमुदाहरणं व्याख्यातम् । द्वितीयगोपनमशस्तार्थान्तरे व्यक्तीभविष्यतीति ॥

लक्षिते यथा—

'ब्रह्माण्डकारणं योऽप्सु निदधे बीजमात्मनः ।
उपस्थानं करोम्येष तस्मै शेषाहिशायिने ॥ १४३ ॥'

अत्र ब्रह्माण्डोपस्थानशब्दयोरसभ्यस्मृतिहेतुत्वेऽपि अन्यत्र लक्षितत्वाद्गुणत्वम् ॥

यस्य पदस्यैकदेशो ग्राम्यानुगामी तस्य स्मृतिहेतुता । तत्र कुत्रचिदुक्तिवैचित्र्यादेकदेशो झटिति स्मारकः, क्वचित्तथैव समुदायशक्त्या विपरीतार्थोपस्थापनाज्झटिति स्वार्थं समुदाय एव प्रतिपादयति । आद्यो दूषणम् । द्वितीयस्तु वैजात्याभावाद्गुणः । तदेवं लक्षणं यत्राये ग्राम्यत्वं ततोऽन्यत्रैव बहुधा लक्षणात्तदिदमुक्तम्—**अन्यत्र लक्षितत्वादिति** ॥

---

१. 'स्वाविभावनात्' इति पाठष्टीकानुसारी भवेत्.

एवमशस्तादीनामपि गुणत्वम्।

यथा—

'भद्रे मारि प्रशस्तं वद सदसि मुदा नृत्य कृत्ये मुहूर्तं
मृत्यो रत्नैश्चतुष्कं विरचय रचयारात्रिकं कालरात्रि।
चामुण्डे मुण्डमालामुपनय विनयस्तायतां भैरवीर्ष्या-
मेवं देवे भवानीं वदति परिजनव्याहृतिस्त्रायतां वः ॥१४४॥'

अत्र मारीकृत्यादीनामशस्तार्थानामपि पदानां समस्तमङ्गलायतनस्य भगवतो विश्वेश्वरस्य संबन्धेनोक्तत्वाद्गुणत्वम्॥

पुनरपरेण प्रकारेण संव्यानं भवतीत्यप्रशस्ते स्फोरयति। परमेश्वरस्य मङ्गलायतनत्वं तत्संबन्धिमात्रस्यैव मङ्गलीभवननियमेन शास्त्रेतिहासादौ प्रसिद्धत्वात्। तदुक्तम्—'तथापि स्मर्तॄणां वरद परमं मङ्गलमसि' इति। अयं च प्रकारोऽप्रशस्तार्थ एव भवति। मार्यादयो मातृविशेषाः। आरात्रिकं नीराजनदीपन्यासङ्गपात्रम्। परिजनपदं संबन्धं पुष्णाति॥

द्वितीयं गोपनप्रकारमशस्तार्थान्तरं व्यञ्जयति—

यथा वा—

'सत्पक्षा मधुरगिरः प्रसाधिताशा मदोद्धतारम्भाः।
निपतन्ति धार्तराष्ट्राः कालवशान्मेदिनीपृष्ठे ॥ १४५ ॥'

अत्र धार्तराष्ट्राः कालवशान्मेदिनीपृष्ठे निपतन्तीत्यस्यामङ्गलार्थान्तरत्वेऽपि 'हंसानहं धार्तराष्ट्रानिति व्यपदिशामि' इति वक्ष्यमाणवाक्यगुप्तत्वाद्गुणत्वम्॥

**यथा वेति**। पक्षः पतत्रं परिकरश्च। आशा दिक् प्रत्याशा च। मदः क्षीबता दर्पश्च। निपात आगमनं शस्त्रादिहतानां मेदिनीसंगतिश्च। रङ्गमङ्गलान्तः स्वस्त्ययनप्रवृत्तस्य सूत्रधारस्य मङ्गलार्थाधिकारवस्तुप्रस्तावनं तावद्बुद्धिपूर्वकमत्र न संभवति हंसानहमित्यादिना तात्पर्यस्य नियमितत्वात्। स्वशक्त्या तु पदार्थान्तरमा-

१. 'मुहूर्ते' ख. २. 'रात्रे' ख. ३. 'विनयस्त्रायतां' ख. ४. 'वाक्यान्तरगुप्तत्वात्' ख.

भासयन्ति पदानि दोषतया न प्रतिभासते । तत्र वीर्य्यङ्गविशेषोपक्षेपस्यामुखशरीरत्वादौचित्यनिवेश एव स्फुटं कारणमित्याशयो बोद्धव्यः । औचित्यविरोधो न सार्वत्रिक इति नातिप्रसङ्गः ॥

यथा च[1]—

'कोऽभिप्रेतः सुसंस्थानस्तस्या इति न निश्चयः ।
आशापिशाचिकैषा तु कुमारी मां वरिष्यति ॥ १४६ ॥'

अत्राभिप्रेतसुसंस्थानाशापिशाचिका कुमारीति पदानामशस्तस्मृतिहेतूनामपि लोकैरन्यत्र लक्षितत्वाद्गुणत्वम् ॥

कोऽभिप्रेत इत्यादौ पूर्ववदेव वासना ॥

एवं घृणावदर्थादीनामपि गुणत्वम् ।

तत्र घृणावतो यथा—

'पद्मान्यर्कांशुनिष्ठ्यूताः पीत्वा पावकविप्रुषः ।
भूयो वमन्तीव मुखैरुद्गीर्णारुणरेणुभिः ॥ १४७ ॥'

अत्र—

'निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम् ।
अतिसुन्दरमन्यत्तु ग्राम्यकक्षां विगाहते ॥'

घृणावदर्थान्तरस्य यथा—

'कामिनीगण्डनिस्यन्दबिन्दुरिन्दुर्मतो[2] मम[3] ।
अन्यथा कथमेतस्य जगदुद्द्योतिनी द्युतिः ॥ १४८ ॥'

अत्र रागातिशयहेतुभूतयोः कामिनीकपोलचन्द्रमसोः स्वरूपभावनामाहात्म्येनार्थान्तरभावना गुप्तेति गण्डनिस्यन्दबिन्दुरित्यस्य घृणावदर्थान्तरस्यापि न दोषत्वम्[4] ॥

अथापरं संख्यानप्रकारं घृणावदर्थे कथयति—**यथेति** । गुणवृत्तिव्यापाराश्रयेष्ववान्तरादिपदेषु प्रथमत एवान्यक्रियादिधर्माणामन्यत्रारोपे समाधिप्रादुर्भावा-

---

१. 'यथा वा' ग. २. 'मतः स्थित' ख. ३. 'मैतिर्मम' ख-ग. ४. 'दोषः' क-ख.

दनुत्थानं दोषाभावत्वद्वारं, ततश्च मुख्य एव स्थाने जुगुप्सादायित्वं पूर्वाचार्यश्लोकेनैव व्याचष्टे—**अत्रेत्यादि** । गुणग्रस्तत्वमभिप्रेत्यातिशयसंपत्तौ प्रकृतौचित्यात्कपोलस्यैव प्रतिभासस्तदिदमुक्तम्—**रागातिशयहेतुभूतयोरिति** । तथा च जगन्नयनानन्दभूतस्य निःशेषिताशेषतमसश्चन्द्रमसो यदिदमभिप्रेतकामिनीकपोललावण्यबिन्दुमात्रतया भानं तदुचितमेवेति ॥

प्राच्यानामेव वासनामभिसंधाय स्मृतिहेतुमुदाहरति—

घृणावत्स्मृतिहेतुर्यथा—

'विपूयरशनावन्तः पलाशाषाढधारिणः ।
ब्रह्मवर्चस्विनो[1] यान्ति द्विजपोगण्डका इमे ॥ १४९ ॥'

अत्र विपूयपलाशब्रह्मवर्चसपोगण्डशब्दानां घृणावत्स्मृतिहेतुत्वेऽप्यन्यत्र[2] लक्षितत्वाददोषत्वम् ॥

**यथेति** । आषाढो दण्डः । **ब्रह्मवर्चसिन इति** । 'ब्रह्महस्तिभ्यां वर्चसः' इति समासान्तस्ततो मत्वर्थीय इनिः । पोगण्डो बालः ॥

एवमन्यप्रकारमपि संव्यानादिकं स्वयमुन्नेयमित्याह—

एवमन्यदपि[3] द्रष्टव्यम् । अत्र च—

**किंचिदाश्रयसंबन्धाद्धत्ते शोभामसाध्वपि ।**
**कान्ताविलोचनन्यस्तं[4] मलीमसमिवाञ्जनम् ॥ १०६ ॥**

तद्यथा—

'अन्त्रप्रोतबृहत्कपालनलकक्रूरक्वणत्कङ्कण-
प्रायप्रेङ्खितभूरिभूषणरवैराघोषयत्यम्बरम् ।
पीतच्छर्दितरक्तकर्दमघनप्राग्भारघोरोल्लस-
द्व्यालोलस्तनभारभैरववपुर्दर्पोद्धतं धावति ॥ १५० ॥'

अत्राश्रयस्य बीभत्सरसोचितत्वाददोषत्वम्[5] ॥

---

१. 'ब्रह्मवर्चसिनः' इति पाठष्टीकानुसारी. २. 'प्यत्र' क-ख. ३. 'न्यत्र' क. ४. 'लोकने' क. ५. 'दोषः' क-ख.

**स्वमिति** । अनित्योऽयं दोषः । तेन यत्र दोषता नास्ति तत्र विषये रसप्रकाशसामर्थ्यामन्तर्भावात्कथं न गुणत्वम् । अन्तर्भावश्च द्विधा—प्रयोगविषयौचित्येन वा, वागनुभावौचित्येन वा । तत्र प्रथमं दर्शयति—**किंचिदिति** । यथाञ्जनस्य नाञ्जनवल्ल्यादिसंगतत्वेन शतशो भाव्यमानस्याप्युद्दीपनविभावना । भवति तु कान्ताविलोचनचुम्बितयानुसंधीयमानस्य । तथापदस्यापि विषयेऽतद्विषये च प्रयुज्यमानस्य । तदेतद्व्याचष्टे—**अत्राश्रयस्येति** ।

**संनिवेशवशात्किंचिद्विरुद्धमपि शोभते ।**
**नीलं पलाशमाबद्धमन्तराले स्रजामिव ॥ १०७ ॥**

तद्यथा—

'अन्त्रैः कल्पितमङ्गलप्रतिसराः स्त्रीहस्तरक्तोत्पल-
व्यक्तोत्तंसभृतः पिनह्य सहसा हृत्पुण्डरीकस्रजः ।
एताः शोणितपङ्ककुङ्कुमजुषः संभूय कान्तैः पिब-
न्त्यस्थिस्नेहसुराः कपालचषकैः प्रीताः पिशाचाङ्गनाः ॥१५१॥'

अत्र शृङ्गारिणो हि जगदपि शृङ्गारमयं पश्यन्तीति बीभत्सरसेऽपि माधवेनान्त्रादिपदानामन्तरालेषु निवेशितानां मङ्गलप्रतिसरादिपदानामदोषः ॥

द्वितीयमन्तर्भावप्रकारं व्युत्पादयति—**संनिवेशवशादिति** । संनिवेशो वागनुभावः । औचित्याकृष्टपदघटना तद्वशत्वं तदाकृष्टत्वमत एव विरोधिसंगततया विजातीययोरप्यौचितीवशेन कान्तिविशेषोन्मीलकत्वात् पत्रपुष्पव्यतिकरजमालासादृश्यं दर्शयति—**नीलमिति** । अन्त्रैरित्यादौ प्रत्युत्पन्नदोषोन्मत्तप्रेताङ्गनावलोकस्य माधवस्यालम्बनोद्दीपनविभावादिप्रकर्षे बीभत्सरसोत्सेकस्तावदुपपन्नः । यस्त्वयमकस्मादेव मङ्गलादिपदानां शृङ्गारानुयायिनामिह निवेशः स कथं दोषभावादपनेतव्यः, कथं वा गुणत्वमासादयितव्यमित्यतो हेतुगर्भं व्याचष्टे—**अत्र शृङ्गारिण इति** । शृङ्गारवासनानिविष्टः शृङ्गारी । तथा च पूर्वं बीभत्सरसान्वयेऽपि प्रकृतशृङ्गारभङ्गो मा भूदित्येतदर्थमेव कविना 'मम हि' इत्यादिना प्रतिज्ञाय 'लीनेव' इत्यादिवासनादृढत्वमुपपादितम् । अत एव प्रतिपदं रूपकमाविष्टाभिप्रायमेवं शृङ्गारमयं शृङ्गाराङ्ग-

१. 'दुरुक्त' ग. २. 'पिनद्धशिरसा' ग. ३. 'मार्दवेन' क.

तया रसतापन्नम्। उपपद्यते च तच्चित्तस्य सादृश्यमात्रेण तद्रूपतानुसंधानम्। ततश्च कथं नोद्दीपनता वस्तुसत्त्वस्यानुपयोगित्वात्। अत एव सूत्रितस्य बीभत्सस्य प्रकृतेन बाधात् प्रकृतार्थानुपोष इति॥

ननु कथमुद्देशे चतुर्विंशतिधेत्युक्तम्। दोषा हि पूर्वं षोडशैव विभक्ता इत्यत आह—

अश्लीलादेरमी भेदा भिद्यन्ते यत्त्रिधा त्रिधा।
भवन्ति नव तेनैते पूर्वोक्ता दश पञ्च च॥ १०८॥
चतुर्विंशतिरित्येषा प्रोक्ता पदसमाश्रया।
समासात्पूर्वनिर्दिष्टदोषाणां गुणक्लृप्तये॥ १०९॥
इत्येतत्पददोषाणामदोषत्वमुदीरितम्।

अश्लीलादेरिति। निगदव्याख्यातम्। चतुर्विंशतिरित्येषेति। आ दशभ्यः संख्या संख्येये वर्तते, ततः संख्याने संख्येये चाभिधानात् केवलसंख्यानवचनत्वेन गवां विंशतिरितिवत्पदसमाश्रयेत्युपपन्नम्।

इदानीं वाक्यदोषाणां गुणत्वमभिधीयते॥ ११०॥

क्रमप्राप्तवाक्यदोषगुणीभावव्युत्पादनमवतारयति—इदानीमिति॥

तत्र शब्दविहीनस्य विवक्षावशतः क्वचित्।
निसर्गसुन्दरत्वेन गुणत्वं परिकल्प्यते॥ १११॥

यथा—

'आक्षिपन्त्यरविन्दानि मुग्धे तव मुखच्छविम्।
कोशदण्डसमग्राणां किमेषां खलु दुष्करम्॥ १५२॥'

अत्र 'न लोकाव्ययनिष्ठाखलर्थतृनाम्' इति कर्तृकर्मणोः षष्ठीप्रतिषेधे किमेषां दुष्करमित्यपभाषणेऽपि संबन्धमात्रविवक्षातो गुणत्वम्।

यदाह—

'इदं हि शास्त्रमाहात्म्यदर्शनालसचेतसाम्।
अपभाषणवद्भाति न च सौभाग्यमुज्झति॥'

---

१. 'पूर्वदिष्टानां' ख. २. 'कल्पना' ग. ३. 'षामस्ति' ग.

यस्य वस्तुनो नानारूपाणि विजातीयरूपाणि तत्र तद्रूपविवक्षावैचित्र्याच्छब्दवैचित्र्यं संगच्छत इति दोषत्वाभावः । एवं रूपता गमितवतीत्यादौ कदापि नास्तीति दोषरूपतैषा । क्वचित्पुनरस्ति रूपान्तरमित्याह—**क्वचिदिति** । भवत्वेवम् । गुणत्वं तु कथमित्यत आह—**निसर्गेति** । नियतरूपविवक्षा हि महाकवीनां न लावण्यमनुसंधाय भवितुमर्हति । तथाहि—आक्षिपन्तीत्यादौ एषां दुष्करमित्यत्र खलर्थयोगे 'न लोकाव्ययनिष्ठाखलर्थतृनाम्' इत्यनेन षष्ठीप्रतिषेधादेषामिति कथं षष्ठीति दुष्टजातीयतामादाय शेषरूपविशेषविवक्षा समाधानहेतुः । अस्ति हि षष्ठ्यर्थस्य संबन्धस्य द्वैरूप्यम्—संबन्धसामान्यं विशेषश्च जन्यजनकभावादिः । तत्र संबन्धविशेषविहितषष्ठीमुपादाय 'न लोक–' इत्यादिना निषेधः । संबन्धसामान्यरूपमुपादाय षष्ठी केन वार्यते । अयमेव संबन्धः शेष इत्युच्यते । एवं तावन्न दोषत्वम् । यथा कोषसमग्राणां राज्ञां विपक्षश्रीहरणमुपदिश्य यत्किमपि संबन्धिमात्रमेव न दुष्करं तथा पद्मानामिति समर्थयामहे । कथमन्यथा दुरापत्वद्वदनश्रीहरणमिति प्रकृतपोषलाभाद्गुणत्वमतिसुलभं तदेतद्व्याचष्टे—**अत्रेति** । ननु संबन्धमात्रविवक्षायां दोषता मा भूत्, गुणत्वं तु कथमिति यथोक्तमभिसंधाय परमतं लिखति—**इदं हीति** । शास्त्रमाहात्म्यं विधिनिषेधयोः परस्परासंकीर्णविषयत्वम् ॥

**यत्नः संबन्धनिर्ज्ञानहेतुः कोऽपि कृतो यदि ।**
**क्रमलङ्घनमप्याहुर्न दोषं सूरयो यथा ॥ ११२ ॥**

बन्धुत्यागस्तनुत्यागो देशत्याग इति त्रिषु ।
आद्यन्तावायतक्लेशौ मध्यमः क्षणिकज्वरः ॥

आद्यन्तौ मध्यम इति संबन्धनिर्ज्ञानहेतोर्विधानान्न शाब्दक्रमलङ्घनं दोषः । वक्तुश्च बन्धुत्यागदेशत्यागयोस्तनुत्यागाद्दरीयस्त्वेनाभिमतत्वादित्यर्थक्रमलङ्घनस्यापि गुणत्वम् ॥

**यत्न इति** । क्रमभ्रंशे हि यथाभिमतान्वयप्रतीतिप्रत्यूहो दूषकताबीजम् । तद्यदि कुतश्चिद्विशेषादस्खलितैव प्रतीतिरुपजायते तदा बीजाभावेन तथाभावो निवर्तत एव । स च विशेषः प्रतिपदमनुक्रमितुं न शक्यते इति कोऽपि यत्न इति सामान्येन प्रतिपादितम् । सोऽयं शाब्दक्रमलङ्घनापवादः । अर्थक्रमलङ्घने त्वभि-

१. शब्दहीनदोषोदाहरणभूते 'नीरन्ध्रं गदितवति' इत्यादौ.

प्रायविशेषः । तथा हि—बन्धुत्याग इत्यादौ बन्धुत्यागतनुत्यागदेशत्यागान्क्रमेणोद्दिश्य तथैवानुदेशोऽप्यर्हति न त्वादिममुद्दिश्य ततोऽन्त्यस्ततो मध्य इति उद्देशानुदेशलक्षणशास्त्रक्रमभ्रंशजातीयत्वेऽपि संबन्धज्ञानहेतुयत्नकरणाददूषणत्वं व्यवस्थाप्यते । यत्नश्चायमेव यदादिपदैरुल्लेखः । तानि हि तत्तत्स्थानविशेषगामिन एवं प्रतीतिमुपजनयन्ति । अवश्यं चानेन क्रमेणात्र वक्तुमुचितं तनुत्यागस्य विजातीयताविवक्षया पृथगेव वक्तुमर्हत्वात् । एवं चानुपपत्तिर्लोके बन्धुत्यागापेक्षया शरीरत्यागस्यातिकृच्छ्रत्वेन प्रसिद्धिः । अतश्च 'मध्यम आयतक्लेश आद्यन्तौ क्षणिकज्वरौ' इति वचनमुचितमिति आर्थक्रमभ्रंशः कथं न भवति तत्राह— **वक्तुश्चेति** । अभिमतमित्यनेनाभिप्रायविशेषोऽपवादहेतुः—'यथारुचि यथार्थित्वं यथाव्युत्पत्ति भिद्यते । आभासो व्यर्थ एकस्मिन्ननुसंधानसाधितः ॥' इति न्यायादुपपन्नमेवैतदिति ॥

**विरूपसंधि यत्पूर्वं विसंधि च निरूपितम् ।**
**न च दुर्वचके प्रायः प्रगृह्यादौ च दुष्यति ॥ ११३ ॥**

तत्र दुर्वचके विरूपसंधिर्यथा—

'जयन्ति वर्षास्विति भर्गदुर्गयोः सुदुर्वचा दुर्वचकप्रयुक्तयः ।
अभेण्णगेड्जे खमपोग्रभोग्र॰ग्धुड्ग्रमब्रुण्मुखि सध्यगेधि नः ॥ १५३॥'

अत्रोत्तरार्धस्य विरूपसंधित्वेऽपि दुर्वचकत्वेन कलाविद्भिरादृतत्वाद्गुणत्वम् ।

यदाहुः—

'शुकस्त्रीबालमूर्खाणां मुखसंस्कारसिद्धये ।
प्रहासाय च गोष्ठीषु वाच्या दुर्वचकादयः ॥ १५४ ॥'

प्रगृह्यादौ विगतसंधिर्यथा—

'कमले इव लोचने इमे अनुबध्नाति विलासपद्धतिः ।
स इतोऽव्दऋतावृतप्रियो न ऋचस्त्वं न यजूंषि ऊहसे ॥ १५५॥'

अत्र विसंधेः प्रगृह्यादिहेतुकत्वाद्गुणत्वम् ।

---

१. 'मतत्वादि' इति स्यात्.

यदाह—

**न संहितां विवक्षामीत्यसंधानं पदेषु यत् ।**
**तद्विसंधीति निर्दिष्टं न प्रगृह्यादिहेतुकम् ॥ ११४ ॥**

**विरूपेति** । विरूपो दुर्वचको विसंधिर्विगतं संहिताकार्यं दुर्वचके कलाविशेषरूपतयानुमते संहिताकार्यनियमः । द्वितीये कुत्रादूषणमित्याह—**प्रगृह्यादाविति** । प्रगृह्यं 'ईदूदेद्द्विवचनं प्रगृह्यम्' इत्यादिना यत्र प्रगृह्यसंज्ञा विहिता, आदिग्रहणाद्विनापि प्रगृह्यसंज्ञया यत्र प्रकृतिभावविधानं तथोदाहरिष्यते । यत्र वा वक्तुः खेदादिना विच्छिद्य पाठे विरतिर्भवति । यथा—का एकशिरोरुहेति । तदेवं दुर्वचकप्रगृह्यादि यथासंख्यं विरूपविसंधिविगतसंधानयोरपवादकारणे इत्याह—**अत्रेति** । प्रयुज्यन्त इति प्रयुक्तयो दुर्वचकाश्च ताः प्रयुक्तयश्चेति दुर्वचकप्रयुक्तय इति कर्मधारयः । सुदुर्वचा इति अन्येनोच्चारयितुमशक्याः । स्वयमेव कविः प्रतिज्ञाय उत्तरार्धे दुर्वचकान्याह—**अमेङ्डित्यादि** । हे नगेड्जे पर्वतराजपुत्रि, खमाकाशं मेड् भानां नक्षत्राणामीडीश्वरश्चन्द्रः सोऽविद्यमानो यत्र । तिरोधानादसत्कल्पना चन्द्रमसः । केन पुनस्तिरोधानमित्याकाङ्क्षायां द्वितीयं विशेषणम्—**अपोग्रेति** । अपगतोग्रदीसिर्भ उग्ररुचिरादित्यस्तदीयद्रोहकारिणोऽभ्रपदवाच्या मेघा यत्र । अम्बुरोहतीत्यब्रुद पद्मं तद्वन्मुखं यस्या इति देवीसंबोधनम् । चेदीदृशं तर्हि सध्यङ् सहचरो भवास्माकमिति गौर्या उत्तरम् । कलारूपत्वेन विरूपसंधानस्य गुणत्वमित्याह—**कलाविद्भिरादृतत्वादिति** । **कमले इवे**त्यादावुदाहरणत्वाच्चैकः श्लोकार्धः । पूर्वार्धे कमले इत्यादित्रितयं प्रगृह्यसंज्ञोदाहरणम् । उत्तरार्धे विनैव प्रगृह्यसंज्ञां प्रकृतिभावविधानं यत्र तत्त्रितयोदाहरणम् । तथाहि—**अब्दऋताविति** । 'न ऋच' इति च 'ऋत्यकः' इत्यनेन प्रकृतिभावः । यजूंषि ऊहस इति 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च' इत्यनेन । अपरमादिपदग्राह्यं पूर्वमुदाहृतम् । अत्रापि स इति बोद्धव्यम् । तदेतच्छास्त्रानुमतमपि घटनासौष्ठवेन निवेशनीयम् । न त्वन्यथा । उक्तं च पूर्वमेव यत्प्रगृह्यादिहेतुकमपि नासकृत्प्रयोक्तव्यमिति ॥

**अनुकम्पाद्यतिशयो यदि कश्चिद्विवक्ष्यते ।**
**न दोषः पुनरुक्तेऽपि प्रत्युतेयमलंक्रिया ॥ ११५ ॥**

यथा—

'हन्यते सा वरारोहा स्मरेणाकाण्डवैरिणा।
हन्यते चारुसर्वाङ्गी हन्यते मञ्जुभाषिणी॥ १५६॥'

अत्र हन्यते हन्यत इति शब्दपुनरुक्तं चारुसर्वाङ्गी वरारोहेत्यर्थपुनरुक्तं तदुभयमप्यनुकम्पाद्यतिशयविवक्षायामदोष इति गुणत्वम्॥

**अनुकम्पेति**। संभ्रमादौ यावद्बोधमित्यादिना पदद्विरुक्त्यादेरनुमतत्वान्न दोषत्वम्। अभिप्रायव्यञ्जननैयत्येन प्रकृतिपोषानुगुणतया गुणत्वम्। तथाहि—हन्यत इत्यादौ हन्यत इति यद्यप्यभिधेयतात्पर्यमिति शब्दपुनरुक्तजातीयं भवति, यद्यपि च वरारोहेत्यभिधाय चारुसर्वाङ्गीत्यभिन्नाभिधेयतात्पर्यं पर्यायरूपत्वादर्थपुनरुक्तजातीयम्, तथापि विरहवेदनादूनायामनुकम्पातिशयादसकृदुपादानमहिरहिर्बुध्यस्वेति लोकानुसारात्। अनुकम्पाभयाद्यस्य हि तादृशी पदद्विरुक्तिरभिप्रायविशेषार्थनिष्पादितया गुणकक्षाधिरोहणक्षमैवेत्याशयवान्व्याचष्टे—**तदुभयमपीति**॥

**पदानां व्युत्क्रमो यत्र क्रमेण व्युत्क्रमेण वा।**
**तद्व्याकीर्णं विदुस्तस्य न दोषः क्वापि तद्यथा॥ ११६॥**

'जुगुप्सत सैनमदुष्टभावं मैवं भवानक्षतसाधुवृत्तः।
इतीव वाचो निगृहीतकण्ठैः प्राणैररुध्यन्त महर्षिसूनोः॥ १५७॥'

अत्र 'मा स्म जुगुप्सत' इति वक्तव्ये 'जुगुप्सत सैनमदुष्टभावं मैवम्' इति पदव्यतिक्रमस्य 'व्यस्तेऽपीच्छन्ति केचित्' इति लुङ्लङोर्विशेषलक्षणत्वाद्गुणत्वम्॥

**पदानामिति**। एकस्मिन् वाक्ये पदानामुचितसंनिवेशाविपर्यासः क्रमभ्रंशः। स द्विधा भवति—पूर्वापरभावनियतानां तादृशक्रमप्रच्यावनेन वा। यथा बहुतृणमित्यन्योऽर्थः, तृणं बह्वित्यन्यः। पूर्वापरनियमशून्यानामिति तादृगुच्चारणविपर्यासेन वा। यथा कपालमनुलिम्पति, दुकूलं परिदधातीत्यत्र क्रमनियमोऽभिमतः। अनुलिम्पति कपालम्, परिदधाति वस्त्रमित्यपि कृतेन तस्यैवार्थस्य लाभात्। यदा तु कपालं परिदधाति दुकूलमनुलिम्पतीति क्रियते तदा भवति संनिधिविपर्यासस्तदेतद्व्याकीर्णसंकीर्णयोस्तुल्यं, तदिदमुक्तम्—**क्रमेण व्युत्क्रमेण वा**। ननु 'स्रोतरे

लङ् च' इत्यनेन माशब्दादुत्तरं यत्र स्मशब्दप्रयोगस्तत्र लुङ्लङोर्विधाने पदक्रमनियमः कृतस्तत्कथं स्म ममेति प्रयुक्ते सोऽर्थः प्रत्येतव्य इत्यत आह—**व्यस्त इति**। विशेषेण लक्ष्यत इति विशेषणलक्षणं तस्य भावस्तत्त्वम् ॥

**पर्यायेण द्वयोर्यत्र वाक्यं प्रश्नोत्तरादिषु ।**
**संकीर्णं तन्न दोषाय वाकोवाक्यविदो विदुः ॥ ११७ ॥**

यथा—

'बाले नाथ विमुञ्च मानिनि रुषं रोषान्मया किं कृतं
　खेदोऽस्मासु न मेऽपराध्यति भवान्सर्वेऽपराधा मयि ।
तत्किं रोदिषि गद्गदेन वचसा कस्याग्रतो रुद्यते
　नन्वेतन्मम का तवास्मि दयिता नास्मीत्यतो रुद्यते ॥ १५८ ॥'

अत्र संकीर्णत्वेऽपि वाकोवाक्यत्वान्न दोषः ॥

**पर्यायेणेति** । यत्र वाक्यैकवाक्यतायामवान्तरवाक्येषु परस्परपदार्थप्रवेशेन यथाभिमतसंसर्गप्रतीतिः स्खलिता भवति तत्र संकरो दूषणम्, प्रतीतेरस्खलने तु न दोषः । स्खलनं चानेकवक्तृकपर्यायप्रवृत्तवाक्यावयवमिश्रणेन भवति । तदपि मिश्रणं प्रश्नोत्तररूपमन्यादृशं वा भवतीत्याह—**प्रश्नोत्तरादिष्विति** । विषयसप्तमीयम् । वाक्ये वाक्यं वाकोवाक्यं पृषोदरादित्वात्साधु । तत्र प्रश्नोत्तरादिरूपं वाकोवाक्यमुदाहरति—**बाले इति** । अत्र 'बाले विमुञ्च मां प्रति रुषम्' इति प्रथमप्रश्नवाक्यम् । 'नाथ रोषान्मया किं कृतम्' इति तादृशमेवोत्तरवाक्यम् । तत्र बाले इति वाक्यप्रतीकानन्तरमेव नाथेति वाक्यान्तरप्रतीकस्य निर्देशः संकीर्णजातीयतामाकारयितुमुद्यतः प्रश्नोत्तरप्रभावादपोह्यते । संकीर्णयोरपि वाक्ययोः पर्यायनिर्देशे भवत्येव वाकोवाक्यमिति चेत्, न । व्यतिकरस्याभिप्रायविशेषव्यञ्जकतया चमत्कारकारित्वेन विजातीयत्वात् । अत एव गुणत्वम् । तथा हि बाले इति पदं परचित्तानभिज्ञायाः क्षुद्रसहचरीवचसि विश्वासभाजः सोपालम्भं संबोधनमाविष्करोति । एतदाकर्ण्यानन्तरमेवेर्ष्याकषायकामिनीवचनमुचितमिति नाथेति संबोधनं साभिप्रायम्, प्रभुरसि न पुनरस्मासु दत्ताशयो न वा स्वाधीनतासौभाग्यभागिति विवक्षितत्वात् । एवमुत्तरत्र स्वयमुन्नेयम् । उपलक्षणं च द्वयोरिति एकस्यापि वक्तुः प्रहेलिकादौ तद्विधविषये तदाभाषणस्योचितत्वात् । विजातीयवाक्यद्वयसंदंशपतित-

पदे किमिदमनेनान्वीयतेऽनेन वेति संदेहसंकीर्णतासंशयोऽपि संकरमध्यासीन एवेति गुरवः । अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यत्र राजपदं संदंशपतितं किं पूर्वेणाथ परेणान्वीयत इति संदिह्यते । राजगोक्षीरादौ द्वयेनान्वयो गोपदस्य निश्चित इति ॥

**प्रकृतिस्थादिभेदेन ग्राम्यादिभिरथापि या ।**
**अपदं तस्य चानुज्ञा भाषाचित्रे विधीयते ॥ ११८ ॥**

यथा—

'हा तो जो ज्जलदेउ नैव मदनः साक्षादयं भूतले
[1]तर्किं दीसइ सच्चमा हतवपुः कामः किल श्रूयते ।
[2]ऐ दूए किअलेउ भूतपतिना गौरीविवाहोत्सवे
ऐसें सच्च जि बोलु हस्तकटकः किं दर्पणेनेक्ष्यते ॥ १५९ ॥'

अत्र ग्राम्यः प्रष्टा नगरमागतो राजानं दृष्ट्वा ग्राम्यैः प्रकृतिस्थैरेव वा पदैः प्राकृतेन पृच्छति—'हा तो जो ज्जलदेउ' इति । नागरश्च तमनुजिघृक्षुरुपनागरैः कोमलैर्वा पदैः सवक्रोक्ति प्रत्याचष्टे—'नैव मदनः साक्षादयं भूतले' इति । अथ ग्राम्य आहितप्रतिभः पूर्वपदानुरोधादर्धप्राकृतेनैव ग्राम्योपनागरैः प्रकृतिस्थकोमलैर्वा पदैस्तमुपालभते—'तर्किं दीसइ सच्चमा हतवपुः कामः किल श्रूयते' इति । अथ नागरो ज्ञाततत्प्रा[3]वीण्यः पादानुरोधादेव अर्धप्राकृतेन ग्राम्योपनागरनागरैः प्रकृतिस्थकोमलकठोरैर्वा पदैः समाधत्ते—'ऐ दूए किअलेउ भूतपतिना गौरीविवाहोत्सवे' इति । अथ ग्राम्यः श्लोकसमाप्तेः पादस्य तदुत्तरस्य चानुरोधाद्ग्राम्याणि प्रकृतिस्थानि वा त्रिचतुराणि पदानि प्राकृतेनोक्त्वा पादार्ध एव तिष्ठति—'ऐसें सच्च जि बोलु' इति । अथ नागरो जितकाशी ग्राम्यो-

---

१. 'ता किं' ग; परंतु 'तत्किम्' इति भवेत्. २. 'पच्छा ऐ' इति टीकासंमतमुख्यपाठः. ३. 'ण्यस्तत्पदा' क-ख.

पनागरनागरैः प्रकृतिस्थकोमलकठोरैर्वा पदैः श्लोकमुत्तरं च पूरयति— 'हस्तकटकः किं दर्पणेनेक्ष्यते' इति । तत्र च प्राकृतानां सर्वेषामपि ग्राम्यत्वम् । प्रष्टुः संस्कृतपदेषु वपुरित्युपनागरं शेषाणि ग्राम्याणि, प्रतिवक्तुश्च हस्तविवाहगौरीपदानि ग्राम्याणि, भूतपतिनेति नागरम्, शेषाण्युपनागराणि । तदिदमीदृशि प्रमेये तथैवोपक्रमादेतन्न दुष्यति ॥

**प्रकृतिस्थेति ।** 'विभिन्न–'इत्यादावपदलक्षणसूत्रे षण्णामिति व्यतिकर एकत्वेन नाभिप्रेतः । अपि तु ग्राम्यादित्रिकस्य वा प्रकृतिस्थादित्रिकस्य वेति विकल्पेनोपन्यासप्रयोजनमनुज्ञासंपत्तिस्तेन दोषताभावगुणीभावौ प्रतिपादितौ । विषयं दर्शयति—**भाषाचित्र इति ।** संस्कृतादिव्यतिकरस्यापदत्वेनाभिप्रेतत्वात् संस्कृतादयो ग्राम्यादयः प्रकृतिस्थादयश्च भाषाशब्देनाभिमताः । यथा हि—नानावर्णारब्धमालेख्यचित्रं यथा वा भिन्नप्रकारतन्तुनिर्वातः पटश्चित्रपटस्तथा नानाभाषाभिरारब्धं किंचित्काव्यं चित्रमुच्यते । चित्रमाश्चर्यं तत्कारि च चित्रम् । तेन रूपद्वयसंपत्तौ युक्तिपोषः स्यादेवं यथौचित्याकृष्टनानाभाषाव्यतिकरजमेकं संभवतीत्याशङ्क्य संक्षेपात्सर्वं भाषासंकरमेवोदाहरति—**यथेति ।** संकरमौचित्तीं च व्याख्यानेन स्फुटयति—**अत्र ग्राम्य इति ।** ग्रामवासी किंचिद्व्युत्पन्नश्च । ग्राम्याश्च नगरवस्तुन्यद्भुतचमत्कारवन्तो जिज्ञासवश्च भवन्तीति जातिः । तत्र राजानं दृष्टेति अद्भुतवस्तुकथनेन चमत्कारः । पृच्छतीति जिज्ञासा बहुमान आदरश्चमत्कारेणैव । यद्वा यान्पृच्छति तेष्वेव बहुमानो धन्यास्ते ये नामगोत्रादिकमेतस्य जानन्तः सततमेनमवलोकयन्त इत्याशयात् । प्रस्तुतग्राम्यप्रकृतेश्चास्य प्राकृतपदैरेव प्रश्नो योग्यः । तदेतत्सर्वमादर्शयितुं प्रश्नं पृथक्कृत्य दर्शयति—**हा तो इत्यादि ।** 'हा तो' इति महाराष्ट्रभाषायां प्रश्नकाकुरयं स इत्यर्थे । स इति यो नामैतन्नगरनायकत्वेनास्मद्ग्रामेऽपि बहुशो विख्यातकीर्तिरिति चमत्कारः । **जो जलदेउ इति ।** जिज्ञासासामान्यतश्च नगरसंचरिष्णुजनगोचरोऽयं प्रश्नः । अत्र सर्वाण्येव पदानि नातिहीनपात्रे ग्राम्ये प्रकृतिभवान्यपभ्रंशपदानि देशीपदत्वेन सर्वेषां ग्राम्यता । 'हा तो' इत्यनेन स्वरकृतगौरवम् । 'जो जलदेउ' इत्येकसंयोगवर्णापादितगौरवं च प्रकृतिस्थं तदत्र प्राकृतग्राम्ययोरौचित्याकृष्टम् । प्रकृतिस्थे तु नौचित्यमुपयुज्यते । अपि तु संदर्भारम्भस्तेन प्रक्रान्त इति विवक्षितम् । अधिकस्य प्रश्नव्यस्याभावादेतत्प्रश्नानन्तरमेवोत्तरावसरः । ततश्च नानौचित्यम् । प्रश्नो-

त्तरोपन्यासो हि प्रकृत्यैव च नागरका ग्राम्यमतविरोधिनो वक्रोक्तिरसिका भवन्ति। यदि तस्य ग्राम्ये जघन्यबुद्धिः किमित्युत्तरमेष दास्यतीत्यत उक्तम्—**अनुजिघृक्षुरिति**। सबहुमानं पृच्छति। ग्राम्ये यस्य दया तदानीमासीत्। जिज्ञासानिवर्तकज्ञानजननमनुग्रहः। यद्यपि नागरस्य नागराणि पदानि प्रयोक्तुमर्हन्ति, तथापि ग्राम्यानुग्रहे कर्तव्ये तद्बोधयोग्यमेवाभिमतं न तु नागरकत्वम्। तर्हि ग्राम्यैरेव कुतो न ब्रवीतीत्यपि न वाच्यम्। सहसैव तथाकरणे ग्राम्यमतविरोधः। अपि तूपनागरकरूपभङ्गप्रसङ्गात्, ततो मध्यमान्युपनागराणि प्रयोगयोग्यानीत्याह—**उपनागरैरिति**। स्वभावत एव प्राकृतप्रकृतिस्थानां संस्कृतप्रकृतिस्थानां प्रौढत्वं भवति। तेन यद्यपि ग्राम्यप्रयुक्तजातीयान्येव संदर्भैकरूपतासिद्ध्यर्थं घटयितुमुचितानि तथाप्यौचितीप्राप्तसंस्कृतपदनिवेशने यदि प्रकृतिस्थत्वमाद्रियेत ततश्छायावैरूप्यं स्यादित्याशयेन कोमलप्रायाण्येव निवेशितानीत्याह-**कोमलैर्वेति**। भूयसा व्यपदेशो भवतीति लोकन्यायानुसारात् 'साक्षात्' इत्येकस्य प्रकृतिस्थत्वेऽपि कोमलैरित्युक्तम्। साकाङ्क्षप्रश्ने च किमर्थं लोकोत्तरो 'जो जलदेउ' नान्यः कश्चित्तादृगिति **भावो** विवक्षितस्तत्र नेत्येवोक्तेनानुग्रहः कृतः स्यादित्यधिकमपि किंचिद्वक्तुमुचितमित्याह—**सवक्रोक्तीति**। एतेन नागरकवृत्तिरुपबृंहिता। नैवेत्येवकारेण मनुष्य एवायं न भवति दूरे तद्विशेषरूपो 'जो जलदेउ' इति प्रकाशितम्। साक्षादिति प्रत्यक्षेणावधार्यमाणः किंचिद्व्युत्पन्नत्वेन ग्राम्यस्योक्तत्वात्। कामव्यावृत्तसाक्षाद्भावलक्षणविरुद्धधर्मानुसंधानेन मदनदाहव्यतिकरता संभवतीति लब्धावसरं ग्राम्यानुयोगमवतारयति—**अथेति**। *शिक्षाविशेषस्पर्शिनी बुद्धिः प्रतिभा। मामेकान्ततो* नागरकवृत्तपरिचयपराधीनं मा शङ्किष्ठा इत्याशयशौटीर्येण नागरकप्रयुक्तजातीयैरेव पदैः प्रश्नो योग्यो न चैतावतैव सर्वथा प्रकृतित्यागोऽर्हतीत्यतः स्वप्रयोगयोग्यान्यपि प्रयोगमर्हन्ति तत्रार्धं प्रकृतिवैशसेनार्धं प्राकृतमर्धं ग्राम्यं च प्रश्नवाक्यानुचितमित्याह—**पूर्वपदानुरोधादिति**। पूर्वं परप्रयुक्तं पदं तर्कितम्। सच्चिमा सत्यः। यावती ग्राम्यस्य व्युत्पत्तिरर्हति तावतीमुपन्यस्यति—**श्रूयत इति**। ऐतिहासिकमुखादेवमाकर्णितं पुनरद्यापि निर्णयो वर्तत इत्यर्थः। तर्कितामिति प्रकृतिस्थम्। दीसइति कोमलम्। सच्चिमेति प्रकृतिस्थम्। हतवपुरिति **कोमलम्**। कामः किलेत्यपि तथा। श्रूयत इति प्रकृतिस्थमिति। अनन्तरं नागरिकस्योत्तरा-

---

१. 'मर्हाणि' इति स्यात्. २. 'तत् किम्' इति स्यात्. ३. 'सच्चमा' इति मूलादर्शत्रये पाठः.

वसरः । कथं परमार्थवादिन्युत्तरं दातव्यमित्यनुपपत्तावयं समाधानप्रकारो भवति । अस्ति ग्राम्यस्य 'किल श्रूयते' इत्येताभ्यां संदिहानत्वं किंचिद्व्युत्पन्नत्वं चोन्नीतमिति किमप्यलीकमेव बुद्धिकौशलात्तथा प्रतीयमानमभिधाय प्रतारणमुपपद्यते । तन्मात्रपरत्वाच्च सर्वाकारमधिकाव्युत्पत्तिराहत्य दर्शयितुमर्हतीति तर्कितमित्यादिपदे यावती ग्राम्यस्य व्युत्पत्तिस्तावदनुकरणं कियदधिकव्युत्पत्तिपुरस्कारमर्हतीत्याशयवानुत्तरमवतारयति—**अथेति** । पादस्तार्कितमित्यादिग्राम्यप्रयुक्तस्तस्यानुरोधो व्युत्पत्त्यनुकरणम् । पच्छा पश्चात् । ऐ एषः । 'ऐ दूए' इति पाठे दूअं व्याजोऽनेन व्याजेन । भूतपतिः पशुपतिः । ननु न क्वचिदेवं श्रूयते तत्कथं ग्राम्यस्य प्रबोधो भवतीत्याह—**गौरीविवाहोत्सव इति** । मा श्रूयतामुपपत्त्या तु सिद्धो द्वितीयो यदि कामप्रादुर्भावो न स्यात्कथं गौरीपाणिग्रहे भगवत उत्साह इत्यतस्तेनैव करुणासंतानशान्तात्मना भूयः सृष्टः स्यादित्यर्थः । पच्छेति प्रकृतिस्थम्, ऐ इति कठोरम्, किअलेउ इति कोमलम्, भूतपतिनेति तथा, गौरीविवाहोत्सव इति प्रकृतिस्थम् । 'ऐंदूऐं' इति पाठे द्वयमपि कठोरम् । तदत्र कठोरनिवेशनं व्युत्पत्त्याधिक्यसूचनाय । एतावत्युक्ते परीक्षणव्युत्पत्तिर्न किंचिद्ग्राम्यं प्रतिभाति । न च तस्याद्यापि निःशङ्कता वर्तते । ततो नागरकप्रामाण्यदत्तभरः प्रश्नो घटत इत्याशयवानवतारयति—**अथ ग्राम्य इति** । प्रकृत्यापन्न एव, तेन यथा प्रथमं 'हा तो' इत्यादिप्रश्ने गतिस्तथात्रापीति ग्राम्यप्रकृतिस्थयोरुपन्यासः । भाषावैचित्र्येण परस्परसंघर्षादेककाव्यरचनाप्रवृत्तयोर्ग्राम्यस्यापि श्लोकश्लोकसमाप्तिपदारम्भो योग्य एव । यदि चायमेव समस्तं निर्वाहयन्नशेषशङ्कानिवृत्त्युपयुक्तमुत्तरं नागरस्य निवेशितं स्यादिति तदुत्तरानुरोधेन पादार्ध एव विलम्बोऽप्युचितः । 'ऐसें' एवमित्यत्रार्थे काकुगर्भम् । 'सच्च जि बोल्लु' इति जिरवधारणे । सत्यमेवैतदुक्तम् । यदि सत्यपुरःसरं ब्रूयास्तदा प्रत्येमीत्यर्थः । एवं ग्राम्यताप्रतारणसिद्धौ किमत्र सर्वलोकसाक्षिके वस्तुनि वक्रोक्त्यैव पूर्वव्युत्पत्तिमात्रनिवेशनेनोत्तरं दत्त्वा श्लोकपूरणमेव नागरस्योचितमित्याशयेनोत्तरमवतारयति—**अथेति** । हत्थे इति प्रकृतिस्थम्, कटकमिति कोमलम्, दर्पणेनेक्ष्यते इत्येते प्रकृतिस्थे, इति प्रकृतिस्थादीनां सुपरिचेयत्वाद्ग्राम्यादीन्येव व्याचष्टे—**तत्र चेति** । प्रकृतिव्यतिकराव्यतिकरत्वयोरौचित्यापन्नत्वाद्भाषासंकरः शोभावहत्वेन गुण एव भवतीत्युक्तमुपसंहरति—**तदिति** ॥

**वाक्यान्तरसगर्भं यद्वाक्यं तद्वाक्यगर्भितम् ।**
**रसान्तरतिरस्कारे तदिष्टं नेष्टमन्यथा ॥ ११९ ॥**

यथा—

'दिङ्मातङ्गघटाविभक्तचतुराघाटा मही साध्यते
सिद्धा सा च वदन्त एव हि वयं रोमाञ्चिताः पश्यत ।
विप्राय प्रतिपाद्यते किमपरं रामाय तस्मै नमो
यस्मादाविरभूत्कथाद्भुतमिदं यत्रैव चास्तं गतम् ॥ १६० ॥'

अत्र 'यथोक्ता मही साध्यते, सिद्धा सा च विप्राय प्रतिपाद्यते' इति वक्तव्ये, येयं वीराद्भुतरसवशप्रवृत्तेन 'वदन्त एव हि वयं रोमाञ्चिताः पश्यत' इति वाक्येन प्रकृतवाक्योक्तेरसमाप्तावेव 'विप्राय' इत्यादिपदविच्छित्तिः सा रसान्तरतिरस्कृतिरित्युच्यते । तया चेदं वाक्यान्तरसगर्भमपि वाक्यं न दोषाय भवति ॥

**वाक्यान्तरेति** । रसान्तरं रसविशेषः प्रकृतरसानुसंहितो रसस्तेन तिरस्कारो दोषभावस्य, तस्मिन् सति तथाकृतं वाक्यमिष्टमेव कवीनामुपादानयोग्यमेव अन्यथा नेष्टं दुष्टमेवेत्यर्थः । तेनायमर्थो भवति—प्रकृतरसतिरोधायकत्वं किल दूषणताबीजं तदतिरोधानेनैव निवर्तते । प्रत्युत द्वितीयपरिच्छेदे वक्ष्यमाणगर्भादिवाक्ययोजनप्रकारसंपत्तावलंकारलाभे गुणत्वं भवति । तथा हि—दिङ्मातङ्गानां घटया विभक्ताः पृथगुद्धिय व्यवस्थापिताश्चत्वार आघाटा यस्यां सा, तथा तेन 'सप्तद्वीपा वसुमती साध्यते' इति विवक्षितम् । ये तावद्भरतभगीरथप्रभृतयः प्रथितप्रतापातिशयास्तेषां तद्दूषणपरिनिष्ठितशक्तीनामेकस्यापि समस्तक्षत्रवंशोन्मूलनेन नवखण्डमेदिनीसिद्धौ नोत्साहशक्तिः श्रवणगोचरतामयासीदिति लोकोत्तरा परशुरामस्योत्साहशक्तिरावेद्यते । 'सिद्धा सा च' इत्यनेन यावदभिलषितं तावदेव सिद्धमित्यहो विजिगीषुतेति पूर्ववदेवाभिप्रायः । न चेदसौ सिद्धिमभिसंधाय प्रवृत्तः । अनुपदमेव सा संपन्नेति चकारेण द्योत्यते । एवमभिहिते 'विप्राय' इत्यादिकमस्ति वाक्यशेषभूतम्, तद्विच्छिद्यैव मध्ये 'वदन्त एव हि वयं रोमाञ्चिताः' इति वाक्येन सगर्भता, सा न दोषाय । अनेन हि वाक्येन लोकोत्तरवस्तुभावनात्मकविभावसंपत्तौ प्रादुर्भवन् वक्तुमभिमतो रसो व्यज्यते । स च वीरानुसंधानहेतुर्वीराद्भुतयोः समानभूमिकयोरन्योन्यानुगमनेन प्रतिकूलता विरहता । तत्र यथा शृङ्गाररौद्रबीभत्सानामेक-

१. 'ऽभिप्राये' इत्यादर्शे पाठ आसीत्.

अघट्टकेन सूत्रेण संनिपातितैरपि हास्यकरुणभयानकैर्न तिरस्कारः, 'स्वाङ्गमव्यवधायकम्' इति न्यायात्, तथेह वीरस्याद्भुतेनात एवाद्भुतादुद्वेलस्य प्रादुर्भूतपुत्रकाङ्कुरलक्षणानुभावप्रदर्शनम्—'पश्यत' इति । न चात्र दोषोदाहरणे 'मया' इति कारकविभक्तेरस्थिताकाङ्क्षाया 'रक्षैनम्' इत्यादिना स्वरसंबाधस्तथात्र संभवति, 'सिद्धा' इत्येतावत्यपि दर्शिते वाक्यार्थपर्यवसानात् । न च संपूर्णे रसे 'वदन्त एव' इत्यादिकमभिधातुमर्हति । अद्भुतता च पार्थिवानुभावस्य तन्मात्रपूरणापेक्षत्वात् । एवं रसानुभावनातृप्तस्य तत्रैव पुनः पुनरुत्कण्ठायां जिगीषुकरणीयलब्धपात्रप्रतिपत्तिविशेषस्फोरणे 'विप्राय प्रतिपाद्यते' इत्युक्तम् । दानवीरोऽपि वीर एव । अत एवाधिकस्य कर्तव्यस्याभावे किमपरमित्यादिरुपसंहारः । तदेतत्सर्वं व्याचष्टे—अत्रेति ॥

**यद्भिन्नलिङ्गमित्युक्तं विभिन्नवचनं च यत् ।**
**उपमादूषणं तन्न यत्रोद्वेगो न धीमताम् ॥ १२० ॥**

यथा—

'अन्यदा भूषणं पुंसः शमो लज्जेव योषितः ।
पराक्रमः परिभवे वैयात्यं सुरतेष्विव ॥ १६१ ॥'

अत्र 'पुंसो योषित इव' 'शमो लज्जेव' 'पराक्रमो वैयात्यमिव' इति लिङ्गभेदः । 'परिभवे सुरतेष्विव' इति तु लिङ्गभेदो वचनभेदश्च दृश्यते । स चैषामेव परस्परमुपमानोपमेयभावविवक्षायां पर्यायान्तराभावादन्यथाकर्तुं न शक्यत इति सहृदयानुद्वेजकत्वान्न दुष्यतीति दोषस्यापि गुणत्वम् । तदिदं द्वयोरप्येकमुदाहरणम् ।

अथ भिन्नलिङ्गस्यैव यथा—

'यस्य त्रिवर्गशून्यानि दिनान्यायान्ति यान्ति च ।
स लोहकारभस्त्रेव श्वसन्नपि न जीवति ॥ १६२ ॥'

अत्र भस्त्रदेव पर्यायान्तराभावात् 'स लोहकारभस्त्रेव' इति लिङ्गभेदस्य न दोषः ॥

**यद्भिन्नेति**। दोषप्रकरणानुरोधेन समस्तव्यस्तोदाहरणं बोद्धव्यम्। सहृदयोद्वेजकत्वेन हि दोषता। यत्र तु कथंचित्तथाभावो न भवति, तत्र दोषत्वहानिरुचितैव। तथा हि स्त्रीपुंसयोरेव प्रकृतानुगुणोपमानोपमेयभावविवक्षायामावश्यकं लिङ्गवचनभेदयोरन्यतरदेकस्य पुंस उपमेयत्वेन दारशब्दस्य भिन्नवचनत्वनियमात्कलत्रपदं भिन्नवचनमेव। पर्यायाणामपि लिङ्गभेदो नियतः। न च पुंवचनं किंचित्समानस्वभावमस्ति येनायं प्रकारो निवर्तेत। न चैवंविधोपमामन्तरेण प्रस्तुतवाक्यार्थपोषः। एवमनन्यगतिका भिन्नलिङ्गता भिन्नवचनता वा साहित्यसमयविदामुद्वेगं नोत्पादयति। अत एवालंकारौचितीसंपदा गुणत्वसिद्धिः। एवं शमलज्जयोः पराक्रमवैयात्ययोः परिभवसुरतयोश्च बोद्धव्यमित्याशयवान् व्याचष्टे—**अत्रेति**। 'रतं, रहः, शयनं, मोहनम्' इति सुरतवाचिनां सर्वेषामेव नपुंसकता न दुष्यतीति सहृदयहृदयानुद्वेजकत्वादिति हेतुर्गुणत्वेत्वाभिप्रायिकः। स च दर्शित एव। **अथेति**। धर्मार्थकामास्त्रिवर्गः। वह्निविध्मापनचर्मपुटो भस्त्रा सा यथा वातेन पूर्यते, वातं च मुञ्चति, न तु किंचित्पुरुषार्थमासादयति, तथा त्रिवर्गशून्येऽपि भस्त्रापर्यायस्य समानलिङ्गस्याभावेन सहृदयानामनुद्वेगालंकारसंपत्त्या गुणत्वमुपपन्नमित्याह—**अत्र प्राग्वदेवेति**। अदोष[1] इत्युपलक्षणम्, गुणश्च भवतीत्यपि बोद्धव्यम्॥

भिन्नवचनस्यैव यथा—

'प्राज्यप्रभावः प्रभवो धर्मस्यास्तरजस्तमाः।
मुक्तात्मा नः शिवं नेमिरन्येऽपि ददतां जिनाः॥ १६३॥

अत्र 'नेमिरन्येऽपि' इति वचनभेददोषेऽपि 'ददताम्' इति क्रियापदादेर्वचनश्लेषमाहात्म्याद्गुणत्वम्। न चेदं वाच्यमत्रेवादिर्न विद्यत इति नोपमात्वम्। इवस्यापिना समुच्चयार्थेन तुल्यधर्माणां तु 'धर्मस्य प्रभवः' इत्यादिभिर्वचनश्लेषैर्विषयापहारात्। यथा अप्रतो द्योतकलोप उपमायाम्—'कोमलापाटलौ तन्वि पल्लवश्चाधरश्च ते।' नन्वेषोऽपि श्लेषः कस्मान्न भवति। उच्यते—'यत्र द्वयोः सदृशयोरभिधानं स श्लेषः। यत्र सदृशात्सदृशप्रतिपत्तिस्तदुपमानम्, यत्र द्वयोः सादृश्यमभिधीयते प्रतीयते वा

१. 'न दोषः' इति मूलपुस्तके.

सोपमा' इति प्रबन्धेनाग्रतो वक्ष्यामः । उपलक्षणं चैतत्—यदुपमाया-मेव लिङ्गवचनभेदो न दूषणमिति । तस्य सर्वालंकारसाधारणत्वात्केवलं सादृश्यमलंकार इति दर्शने उपमायामुदाह्रियते ॥

**प्राज्येति** । आर्हतानां नेमिनामा जिनविशेषोऽन्ये जिना ऋषभनाथप्रभृतयः प्राज्यमुचितं तथाभूतः प्रभावः सिद्धिरूपो यस्य तादृशो नेमिः शिवं ददतां ददातु । 'दद दाने' इति धात्वनुसारात् । कस्मै इत्यपेक्षायां मुक्तात्मा इत्यत्र नः । पक्षे वो युष्मभ्यं शिवं ददतां ददत्विति । धर्मस्य प्रभवमुत्पत्तिनिमित्तं नेमिः । प्रभवः प्रभुता यथावदनुशासनेन जिनाः । रजश्च तमश्च रजस्तमसी ते अस्ते क्षिप्ते येन स तथाभूतो नेमिः । अस्तं रजो यैस्तेऽस्तरजसस्तेषु प्रकृष्टास्तमप्यरजस्तमाः । मुक्तो निरावरण आत्मा आत्मशब्द आत्मवचनः स्वरूपवचन इति वा बहुव्रीहिस्तादृशो नेमिः । जिनास्तु मुक्तात्मान इति स्पष्टम् । तदिह वचनभेदमन्तरेण वचनश्लेषाभा-वाद्भिन्नवचनत्वस्यावश्यकत्वेन दोषः । श्लेषलक्षणालंकारघटनया गुणत्वम् । ननु च लिङ्गादिभेद उपमाया दूषणत्वमुक्तम्, इह त्वलंकारान्तर उदाह्रियते, तत्कथं पूर्वा-परसमञ्जसत्वम् । न चात्रोपमा संभवति, तत्सामग्र्यसंभवात् । उपमानोपमेयसा-धारणधर्मवादिशब्दाः किल तद्घटकाः । तदत्र त्रितयसंबद्धे त्वपीववद्वाप्रभृतिश-ब्दानुपादानात्कथमुपमेति शङ्कामुत्थाप्य निरस्यति—**न चेति** । इवादयो हि शब्दाः सादृश्यद्योतकाः । तथा च क्वचित्प्रसिद्धस्य प्रकृते संबन्धप्रतीति-स्तेभ्यो भवति बिम्बप्रतिबिम्बन्यायाश्रयणात् । एवं च न युगपत्तुल्यरूपसंबन्धः । अपिशब्दस्तु युगपत्तुल्यरूपसंबन्धं बोधयतीति विभिन्नविषयत्वम् । नहीवादि-शब्दाभावे सादृश्यमेव न प्रतीयते, लुप्तोपमाप्रपञ्चभङ्गप्रसङ्गात् । अन्यत एव प्रतीतिसिद्धेरुपायान्तरवैयर्थ्यात् । किमितीह नेवादिपदं प्रयुक्तमिति प्रश्नोऽवशि-ष्यते तत्रेदमुत्तरम्—**इवस्येत्यादि** । नेमिरन्येऽपीत्यपिशब्देन समुच्चयोऽप्य-वसीयते । स च युगपदेकसंबन्धाभिधाने निर्वहति । तेनानेकमुद्दिश्य किंचिदेक-संबन्धाभिधानं समुच्चयाभिधायिनो विषयः । एकमुद्दिश्य प्रसिद्धान्यधर्मविधानं तु यथेवादिरिति विषयविरोधान्न प्रयुज्यत इति । स्यादेतत्—इववद्वायथादिशब्दा

१. 'सादृश्यमात्र' ग. २. 'नोऽसभ्यं' इति स्यात्; यद्वा 'नोऽसभ्यम्' पक्षे 'वो युष्मभ्यम्' इत्येव पाठे 'प्राज्यप्रभाः' इति प्रथमान्तमपि पृथक् कल्पनीयम्. ३. 'प्रभव उत्पत्ति–' इति स्यात्. ४. 'बद्धेऽपीव' इति स्यात्. ५. 'धर्माभिधानं तु यथेवादे' इति स्यात्.

यत्परास्तस्यैवोपमानताप्रतीतिस्तथा चानेनेदं तुल्यमिति साधारणधर्मविधिरूपा कथमुपमेत्यत उक्तम्—**तुल्यधर्माणां त्विति**। नात्र वचनश्लेषतुल्यधर्मागमः, अपि तु तथा 'व्यवस्थितानामेव शब्दतन्त्रता' इति 'धर्मस्य प्रभवः' इत्यादिभिर्द्वि-वचनश्लेषैस्तथापि विषयोपहृत इति। यदि चेवादिमन्तरेण नोपमाप्रतीतिस्तर्हि प्रसिद्धमुपमोदाहरणं भज्येतेत्याह—**यथेति**। अग्रतश्चतुर्थपरिच्छेदे। अत्राप्यु-पमामनङ्गीकुर्वतो मतमाशङ्कते—**नन्विति**। इहापि चकाराभ्यां युगपत्पक्षबाध-रयोरेकधर्मविधानस्य तुल्यत्वादिति देश्याभिप्रायः। उक्तयुक्त्या दूषयति—**उच्यत इति**। तर्हि प्रकृतोदाहरणे नास्त्येवोपमा, कथं वचनभेदस्य गुणीभाव उदाह्रियत इत्याह—**यत्रेति**। यद्यप्यभिधीयमानं नास्ति सादृश्यम्, तथापि प्रतीयमानोपमा व्यवह्रियतामित्यर्थः। शब्दमात्रसाम्यं श्लेषसंकीर्णमेवेत्युपेक्षितवान्। ननु यत्रोप-मया काव्यव्यपदेशस्तत्र प्रतीयमानमपि सादृश्यमूरीक्रियते। यत्र त्वलंकार-स्वभावव्यवस्थापितमेव काव्यं न तत्रापीत्याह—**उपलक्षणमिति**। प्रतिपत्ति-वैरूप्यस्यालंकारान्तरसाधारण्यादुपमातोऽन्यत्रापि लिङ्गवचनभेदो दूषणमेव। तथथा 'मुखं पद्मम्' इति रूपके, 'मुखं पद्मं वा' इति संशये, 'न मुखं पद्ममेव' इत्यपह्नवे। एवमन्येऽपि। अत एव द्वे भिन्नलिङ्गवचने इत्यत्र नोपमाग्रहणम्। यद्येवं कथमु-पमायामेव दूषणमुदाह्रियत इत्यत आह—**केवलमिति**। चिरंतनैर्हि भरत-मुनिप्रभृतिभिर्द्वे एव यमकोपमे शब्दानुगतालंकारत्वे नेष्टे। तत्प्रपञ्चनमात्रं तु पुनरन्यैरलंकारकारैः कृतमुपमायाः प्रभूतविषयतया प्राधान्याच्चोदाहृतमतिस्फुटं भवतीति संक्षेपः॥

**यत्रोपमानधर्माः स्युर्नोपमेयेन संमिताः।**
**तद्धीनोपममित्याहुस्तत्प्रसिद्धौ न दुष्यति॥ १२१॥**

यथा—

'स मारुताकम्पितपीतवासा बिभ्रत्सलीलं शशिभासमब्जम्।
यदुप्रवीरः प्रगृहीतशार्ङ्गः सेन्द्रायुधो मेघ इवाबभासे॥ १६४॥'

अत्र सेन्द्रायुध इति कार्मुकमात्रस्योपादानं वासःशङ्खयोस्त्वनुपादा-नादूनोपमत्वम्। तत्रेन्दुविद्युतोरतिप्रसिद्धत्वाददोषत्वम्॥

१.'भिर्द्वि वचनश्लेष' इति स्यात्. २. 'कार्मुकमात्रोपादानं' क; 'कार्मुकस्योपादा' ग.

यदाह—

'सर्वं सर्वेण सारूप्यं नास्ति भावस्य कस्यचित् ।
यथोपपत्ति कृतिभिरुपमानं प्रयुज्यते ॥
अखण्डमण्डलः क्वेन्दुः क्व कान्ताननमद्युति ।
यत्किंचित्कान्तिसाम्यात्तु शशिनैवोपमीयते ॥'

**यत्रोपमानेति** । उपमेयेनोपमेयविशेषणेन संमितास्तुल्यसंख्याः । इन्द्रायुधमिन्द्रधनुरेकमुपमाने उपमेये पीतं वासः शार्ङ्गमब्जः शङ्ख इति त्रीणि विशेषणानि तदिहाधिकविशेषणविषय इति जिज्ञासासमकालमेवाप्रसिद्धेन्दुबिम्बयोरुपमानयोर्मेघानुसंधानात् स्खलनाभिमुखी प्रतीतिरवलक्ष्यते । ध्वननव्यापारोन्मेषाच्च गुणत्वलाभः । तदुक्तम्—'मुख्या महाकविगिरामलंकृतिभृतामपि । प्रतीयमानच्छायैषा भूषा लज्जेव योषिताम् ॥' इति । न चैवं स्तनितादीनामिति कथं प्रतीतिरिति वाच्यम् । प्रतीयमानस्यापि प्रतिपत्तिवैरूप्यसमाधानौपयिकस्थानाकाङ्क्षितत्वेनादरादित्याह—**सर्वं सर्वेणेति** । यथोपपत्तिपर्यन्तो यावतोपमानविशेषणत्वेन प्रकृतमुपमेयविशेषणप्रतिबिम्बता नीयते तदतिक्रमेणैकप्रतीत्यनुरोधे कल्पितेनाप्युपमेयविशेषणेनेत्यर्थः । अन्यथा चन्द्रमुखादीनां नोपमा पर्यवस्येतेत्याह—**अखण्डेति** ॥

अमुमेव प्रकारमधिकोपमेये योजयन्नाह—

**क्रमेणानेन कृतिभिरेष्टव्यमधिकोपमम् ।**
**विशेषस्तूपमेयाङ्गमनुमानात्प्रतीयते ॥ १२२ ॥**

यथा—

'स पीतवासाः प्रगृहीतशार्ङ्गो मनोज्ञभीमं वपुराप कृष्णः ।
शतह्रदेन्द्रायुधवान्निशायां संसृज्यमानः शशिनेव मेघः ॥१६५॥'

अत्र शशिनो ग्रहणादधिकोपमत्वेऽप्युपमानत्वेनाविवक्षितत्वाद्गुणत्वम् । यदि वोपमाने धर्मोद्घाटनानुमानात् 'शङ्खचक्रगदाधरो विष्णुः' इति प्रसिद्धेः शार्ङ्गमनुमेयम् ॥

**क्रमेणेति** । यत्रोपमानेऽधिकविशेषणसंक्षेपस्तद्वाक्यमधिकोपममित्युच्यते तत्र झटिति प्रतिबिम्बभूतोपमेयविशेषणप्रतिसंधानेन दोषः । तदेव तु कथमत उक्तम्—

**विशेषस्त्विति**। उपमेयांशे विशेषविशेषणमुपादाना(?)दुपमानविशेषणात्प्रतीयते। शतह्रदा विद्युत्। उपमानत्वेनाविवक्षितत्वादित्यापाततः। उपमानविशेषणानां यावत्प्रतीति न ग्रहणमिति प्रकाशयितुं पारमार्थिकस्त्वयं सिद्धान्त इत्याह—**यदि वेति**। उपमानधर्मस्याधिक्यस्योद्घाटनमभिधानं तस्यानु पश्चान्मानं ज्ञानम्। कथमेतदित्याह—**इति प्रसिद्धेरिति**॥

**यदा तीव्रप्रयत्नेन संयोगादेरगौरवम्।**
**न च्छन्दोभङ्ग[3] इत्याहुस्तदा दोषाय सूरयः॥ १२३॥**

यथा—

'जह ण्हाउं ओइण्णे अब्भन्तमुल्हासिअमंसुअद्धन्तम्।
तह अ ण्हाआ सि तुमं सच्छे गोलाणईतूहे॥ १६६॥'

[यथा स्नातुमवतीर्णे आर्द्रीभूतमुल्लासितमंशुकार्धान्तम्।
तथा च स्नाता भवसि त्वं स्वच्छे गोदानदीतीर्थे॥]

अत्र द्वितीयैकादशत्रयोविंशतिवर्णानां संयोगपरत्वाद्गुरुत्वेऽपि ण्हाल्हादिसंयोगस्य तीव्रप्रयत्नोच्चारणेन पूर्वलघुत्वे न छन्दोभङ्ग इति गुणत्वम्॥

**यदेति**। प्रयतनं प्रयत्नः स्थानकरणव्यापारस्तस्य तीव्रत्वमुद्रेकस्तत एव हि पिण्डाक्षरादीनामकठोरत्वमाभासते। आदिग्रहणाद्विहिकारौ सानुस्वारौ च केवलौ पदान्ते वर्तमानौ तत्तद्भाषाविषयेऽवसेयौ। क्वचिदेव हि वर्णे तथावभासते न तु सर्वत्र। तदुपलक्षणमेव 'रह वंजणसंजोए' ['रहौ व्यञ्जनसंयोगे'] इत्यादिकं छन्दोविचितौ दर्शितम्। **जहेति**। स्नातुमवतीर्णे त्वयि अंशुकार्धमुद्भ्रष्टं सदभ्यन्तमार्द्रीभूतं यथा चलत्वं[6] स्थितेस्तथावगम्यते न त्वन्तर्जलं जलकेलिस्थानमवतीर्णं इत्यभिप्रायशेषः। कथमन्यथा गोदावरीनद्याः स्वच्छं जलं दृश्यते इति। तूहं तीर्थम्। अत्र द्वितीयैकादशादिस्थानेषु यद्यपि संयोगात्पूर्वभावे गुरुत्वं विद्यते

१ इति मूले पाठः. २. 'विशेषादिति' इत्यादर्शपाठः. ३. 'भङ्गमप्याहुः' क. ४. 'पुनर्लघु' ग. ५. 'इहिकारा विन्दुजुआ' इति प्राकृतपिङ्गलोक्त्या 'हकारहिकारौ' इति; 'इहिकारौ' इति वा पाठः. ६. 'लब्धम्' स्यात्.

तथापि तीव्रप्रयत्नोच्चारणीयशकारहकारादिसंयोगमहिम्ना नावच्छेदश्रव्यता कलुषीक्रियत इति । एवमन्यदप्युदाहार्यम् । यथा—

'धवलाइं गलेत्ति मबलेहिँ अणञ्जणसामलेहि णिसालआए ।
णखवत्तकुसुमाइं णहअलाओ ओसरइ ॥'

इत्यादि नामधातुभागे स्वरासंधाने च पठितिविच्छेदो न भवतीत्युक्तं स तदुल्लङ्घनमात्रेण समाधीयते शोभां पुष्यतीति ॥

**वाक्यमस्थानविरति भ्रग्भग्नयतिसंज्ञया ।**
**समुद्दिष्टं यदधुना गुणत्वं तस्य कल्प्यते ॥ १२४ ॥**

यथा—

'शोभां पुष्यत्ययमभिनवः सुन्दरीणां प्रबोधः
किंचिद्भावालसमसरलप्रेक्षितं कामिनीनाम् ।
कार्याकार्याण्ययमविकलान्यागमेनैव पश्य-
न्वश्यामुर्वीं वहति नृप इत्यस्ति चायं प्रयोगः ॥ १६७ ॥'

अत्र पादत्रये चतुर्थस्थाने यतौ कर्तव्यायां पञ्चमस्थाने कृतत्वादपरत्र च पादस्य मध्यभागे निविष्टकेवलस्वरत्वाद् यतिभ्रंशोऽपि स्वरसंधिकृतत्वादविभिन्ननामधातुशरीरत्वाच्च न दोषत्वम् ॥

यदाह—

'स्वरसंध्यकृते प्रायो धातुभेदे तदिष्यते ।
नामभेदे च शेषेषु न दोष इति सूरयः ॥
लुप्ते पदान्ते शेषस्य पदत्वं निश्चितं यथा ।
तथा संधिविकारान्तं पदमेवेति वर्ण्यते ॥'

**वाक्यमिति** ।........................................................।
शोभामिति ।........................................................।

---

१. 'भुञ्जन्य' स्यात्. २. 'विकलेनागमेनैव' क.

कार्याकार्येति च नामभागमुल्लङ्घ्य विच्छेदश्रव्यता च परस्य यणादेशेन 'किंचिद्भावा' इति 'नृप' इति च स्वरसंधाने विच्छेदोऽत एव श्रव्यत्वमपि । तदेतद्याचष्टे—**अत्रेति** । 'मन्दाक्रान्ता मभनतयुगं गद्वयं वेददिग्भिः' इति चतुर्थदशमयोर्यतिराम्नाता । **पञ्चमस्थान इति** । प्रथमतृतीययोर्द्वितीये तु षष्ठे यतिकरणादिति बोद्धव्यम् । ननु पदच्छेदे स्वरसंधानपठितिविरामः सोल्लेखो लक्ष्यते, न तु चतुष्पादे तथास्तीति कथं श्रव्यत्वमत आह—**लुप्त इति** । संधौ विकारो यत्वयलोपादिकं कार्यं, तथा च पदान्ते सति पदच्छेद एवायमिकारोऽवतिष्ठत इत्यर्थः ॥

**अशरीरं क्रियाहीनं क्रियापेक्षा न यत्र तु ।**
**यत्रास्त्यादेरपेक्षा वा न दोषस्तत्र तद्यथा ॥ १२५ ॥**

यथा—

'कियन्मात्रं जलं विप्र जानुदघ्नं नराधिप ।
तथापीयमवस्था ते नहि सर्वे भवादृशाः ॥ १६८ ॥'

अत्र त्रिषु पादेषु पदानि क्रियापदं नापेक्षन्ते । सापेक्षं चासमर्थं भवति । चतुर्थे तु नहीत्यादिभिः सन्तीत्यपेक्ष्यते न चैतावतामीषामसामर्थ्यं भवति । यदाह—'यत्रान्यत् क्रियापदं नास्ति, तत्रास्ति भवतीति पदं प्रथमपुरुषे प्रयुज्यते' इति ॥

**अशरीरमिति** । प्रधानाविमर्शो हि दूषणमित्युक्तं तदुपात्तानामेव पदार्थानां प्रधानगर्भीकरणे तत्प्रतिबन्धेऽवश्यविधेयमन्यं प्रति गुणीभावे वा समाधीयते । अत एव विशेषाद्गुणत्वम् । तथा हि—'कियन्मात्रं' 'जानुदघ्नम्' इत्यनयोः परिमितम् । क्रिया प्रधानमर्भभूता । 'नहि सर्वे भवादृशाः' इत्यत्र तु सत्ताक्रियायाः सकलपदार्थाव्यभिचारात् 'अपेक्ष्यते' इति सिद्धिः । तदिदमाचार्यमतेनाह—**यत्रान्यदिति** । भवन्ती वर्तमाना । तदेतद्वाक्यं क्रियाप्रधानमिति ददर्श 'स प्रधानं

---

१. 'प्राशस्त्यादे' क. २. क्रिया विशेषक्रिया । क्रियासामान्यवाचकपदं तु 'तिङ्समानाधिकरणे प्रथमा' इत्युक्त्यनुसारेण प्रथमासिद्ध्यर्थमपेक्षितमेव । अतएव 'सापेक्षम्' इत्याद्यग्रिमग्रन्थसंगतिः. ३. 'प्रेक्ष्यते' इति स्यात्. ४. 'अस्तिर्भवन्तीपरः प्रथमपुरुषः' क. ५. 'परिमितिक्रिया' स्यात्. ६. 'दर्शने' इति स्यात्. ७. 'स' इति स्यात्.

विशेष्यमात्रं तु वाक्यार्थे' इति परमार्थः । तेन 'राधा रहः साक्षिणाम्' इत्यादावावश्यकविधेयसाक्षिभावादिगुणतया राधासंबन्धादीनां वैवक्षिकप्राधान्यानामपि प्रधानत्वाविमर्शो न दोष इत्युक्तं भवति ॥

**श्लिष्टमस्पृष्टशैथिल्यं शिथिलं तद्विपर्ययः ।**
**गौडीयैरिष्यते तत्तु बन्धप्राशस्त्यगौरवात् ॥ १२६ ॥**

यथा—

'लीलाविलोलललना ललितालकलालसाः ।
विलुसमालतीमाला जलकालानिला ववुः ॥ १६९ ॥'

अत्र शैथिल्यदोषेऽपि बन्धप्राशस्त्येन गौडैरादृतत्वाद्गुणत्वम् ॥

**श्लिष्टमिति** । पारुष्यशैथिल्याभ्यां विना कृतं श्लिष्टमित्युक्तं तस्य विपर्ययो विपरीतं वाक्यं शिथिलं भवति । परुषमल्पप्राणाक्षरोत्तरं वेत्यर्थः । एवंविधमपि चैतदनुप्राससौष्ठवात्पदानामेकताप्रतिभासे समाधीयत उद्भटानुप्रासतया च कान्तिप्राधान्ये गौडीयरीतिप्राधान्येन गुणत्वमासादयति तदिदमुक्तम्—**बन्धप्राशस्त्यगौरवादिति** । गौडीयैर्गौडीयरीतिगोचरहेतुवाक्प्रकर्षशालिभिः ॥ **लीलेति** । अत्र दन्त्यवर्णमयत्वेनाल्पप्राणाक्षरोत्तरतायामपि पदैकताप्रतिभासानुप्रासयोरुद्रेकः कान्तिप्रकर्षोऽवसेयः ॥

**न दोषः क्वापि वैषम्येऽप्यर्थालंकारकारणात् ।**
**पौरस्त्यैरादृतत्वाच्च शब्दाडम्बरतोऽपि वा ॥ १२७ ॥**

यथा—

'चन्दनप्रणयोद्गन्धिर्मन्दो मलयमारुतः ।
स्पर्धते रुद्धमद्धैर्यो वररामाननानिलैः ॥ १७० ॥'

अत्र सत्यपि वैषम्यदोषे शब्दालंकारगुणादर्थालंकारगुणात्पौरस्त्यैरादृतत्वाच्च गुणत्वम् ॥

**न दोष इति** । अर्थालंकारकारणादर्थालंकाररूपम् । यत्र हिशब्दस्यार्थोऽन्यथान्यथारूपं भजते तत्रावश्यं तदनुयायिना पदसंदर्भेण भिन्नरूपेण भाव्यम् । एवमपि छायावैरूप्यं वैरस्यमेवावहतीत्याशङ्क्य 'शब्दाडम्बर' इत्युक्तम् । आडम्बर

१. 'लासकाः' क. २. 'मुखा' क. ३. 'शब्दवैषम्यदोषे' ग.

उद्भटता । तस्याप्येकरीत्यनिर्वाहो दूषणमित्यत्र 'पौरस्त्यैः' इत्युक्तम् । शरावत्याः प्राग्देशभवाः पौरस्त्यास्तदीयहेवाकप्राचुर्यभाज एव हि खण्डरीतयः । **चन्दनेति** । अत्र यद्यपि मलयानिल एक एव वाक्यार्थस्तथापि चन्दनप्रणयेन प्रवृद्धसौरभे मन्द इत्याभ्यां शृङ्गाराङ्गताप्रतीतावुन्मिश्रः संदर्भः । मलयमारुत इति कोमलः, वररामामुखानिलैरित्यपि तथा, तत्राप्यारभटीप्रकाशने स्पर्धत इति स्फुटम् । एवं रुद्रमद्धैर्य इति । तदेवं समताविपर्यासेऽपि विशेषणानामर्थानां भिन्नभिन्नरसानुप्रवेशे पृथगर्थालंकाराः प्रकाशन्ते । अस्ति चात्र शब्दाडम्बरवशादेव छायात्मप्रतिभासः । लाटीया च रीतिः ॥

**कठोरमपि बध्नन्ति [1]दीप्तमित्यपरे पुनः ।**
**तेषां मतेन तस्यापि दूषणं नैव विद्यते ॥ १२८ ॥**

यथा—

'न्यक्षेण पक्षः क्षपितः क्षत्रियाणां क्षणादयम् ।'

अत्र कठोरत्वेऽपि दीप्तत्वाद्गुणत्वम् ॥

**कठोरमिति** । सुकुमारताविपर्यासः कठोरः संदर्भः प्रस्फुटतरवर्णप्रधानमिति यावत् । सोऽयं दीप्तरसानुप्रवेशादौचित्येन गुणत्वं भजत इति व्यक्तम् । अपरे पौरस्त्याः । न्यक्षेण सामस्त्येन ॥

**अविद्वदङ्गनाबालप्रसिद्धार्थं प्रसादवत् ।**
**विपर्ययोऽस्याप्रसन्नं चित्रादौ तन्न दुष्यति ॥ १२९ ॥**

यथा—

'याश्रिता पावनतया यातनाच्छिदनीचया ।
याचनीया धिया मायायामायासं स्तुता श्रिया ॥१७१॥'

अत्राप्रसाददोषेऽपि चित्रत्वाद्गुणत्वम् ॥

**अविद्वदिति** । विपर्ययः प्रत्यनीकभूतं वाक्यम् । आदिग्रहणाद्यमकश्लेषप्रहेलिकाप्रकरणानि । या देवी पवित्रत्वेनाश्रिता । अनीचया तुङ्गया बुद्ध्या मायायामस्य अविद्याविस्तारस्यायासं ग्लानिं विच्छेदं याचनीया प्रार्थनीया । मतो यातनं नरक-

1. 'प्रदीप्तमपरे' ग.

नुभवनीयं दुःखं छिनत्ति । श्रियापि स्तुतेति । अष्टदलकमलबन्धोऽयम् । तदिह तथा वरा(?)संनिवेशस्य चमत्कारकारित्वेन प्रसादोऽपि सहृदयश्लाघाविषयो गुणतामध्यास्त इति ॥

अध्याहारादिगम्यार्थं नेयार्थं प्रागुदाहृतम् ।
स गम्यते प्रसिद्धश्चेन्न तद्दोषवदिष्यते ॥ १३० ॥

यथा—

'मां भवन्तमनलः पवनो वा वारणो मदकलः परशुर्वा ।
वाहिनीजलभरः कुलिशं वा स्वस्ति तेऽस्तु लतया सह वृक्ष ॥१७२॥'

अत्र दहत्वित्यादीनामध्याहार्यतया नेयत्वेऽप्यतिप्रसिद्ध्या प्रतीयमानत्वाद्गुणत्वम् ॥

**अध्याहारेति**। असंपूर्णं वाक्यं नेयार्थमित्युक्तं तस्यैवंरूपता झटिति श्रुतार्थापत्तिप्रादुर्भावपरिह्वक्संधानात्समाधीयते । तथा हि—'मा भवन्तमनलः' इत्यादौ वृक्षसमभिव्याहारेण दहनादीनां योग्यतया शीघ्रमेव धाक्षीदित्यादिक्रियान्वयोऽवसीयते । स्वस्तिवचनेन चामङ्गलप्रस्तावनिरासात्तथाभूतक्रियानुपादानं वक्रक्षमतया गुण इति ॥

असभ्यार्थं मतं ग्राम्यं तद्ग्राम्योक्त्यैव दुष्यति ।
विदग्धोक्तौ तु तस्याहुर्गुणवत्त्वं मनीषिणः ॥ १३१ ॥

यथा—

कामं कन्दर्पचाण्डालो मयि वामाक्षि निर्दयः ।
त्वयि निर्मत्सरो दिष्ट्या सोऽयमस्मास्वनुग्रहः ॥ १७३ ॥'

अत्र ग्राम्यत्वेऽपि ग्राम्यार्थस्य विदग्धोक्त्या तिरस्कृतत्वाद्गुणत्वम् ॥

**असभ्यार्थमिति**। रसस्यादीप्तिः कान्तिविपर्ययो वैचनापराधेन दूषणतामध्यास्ते, स समाधीयतेऽत्र ग्राम्योक्तिपरिहारेणैव । अत एवोक्तिसमर्पितच्छायाविशेषयोगे गुणत्वलाभः । सहृदयसभायां न साधुरसभ्यः । वैदग्ध्यविधुरं ग्राम्यम् ॥

ओजः समासभूयस्त्वं तद्दीप्तार्थेषु बध्यते ।
विपर्ययोऽस्याः समस्तं तद्दीप्तं चेन्न दोषभाक् ॥१३२॥

१. 'निर्भत्सनो' ग. २. 'वचनापराधेन' इति पाठः.

यथा—

'यो यः शस्त्रं बिभर्ति स्वभुजगुरुमदः पाण्डवीनां चमूनां
यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा ।
यो यस्तत्कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः
क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तकस्यान्तकोऽहम् ॥ १७४॥'

अत्रासमस्तत्वेऽपि प्रौढबन्धत्वाद्गुणत्वम् ॥

**ओज इति ।** दीप्तरसानुप्रविष्टार्थप्रतिपादकसंदर्भौचित्येन समासभूयस्त्वमोजः । अस्य विपर्ययो दीप्तेरप्रत्यूहादेव समाधीयते । तदिदमुक्तम्—'दीप्तार्थं बध्यते यत्र तद्दीप्तं चेन्न दुष्यति' इति । सुगममुदाहरणम् । व्यूढः प्रौढः ॥

**समस्तमसमस्तं वा न निर्वहति यद्वचः ।**
**तदनिर्व्यूढमस्यापि न दोषः क्वापि तद्यथा ॥ १३३ ॥**

यथा—

'प्रसीद चण्डि त्यज मन्युमञ्जसा
जनस्तवायं पुरतः कृताञ्जलिः ।
किमर्थमुत्कम्पितपीवरस्तन-
द्वयं त्वया लुप्तविलासमास्यते ॥ १७५ ॥'

अत्रासमस्तरीत्यनिर्वाहादनिर्व्यूढत्वेऽपि रसान्तरपरिग्रहेण रीत्यन्तरपरिग्रहाद्गुणत्वम् ॥

**समस्तमिति ।** उपक्रान्तरीतेरनिर्वाहे मधुररसपर्यन्ता प्रतीतिः स्खलतीति दूषणताबीजमुक्तम् । तथाभूतरसानुगुणव्यभिचार्यनुप्रवेशव्यञ्जनौचित्यादुपक्रमनिर्वाहः सर्वस्वायमानो गुणतामासादयति । तथा हि—प्रसीदेत्यादौ प्रणयकेलिकुपितकामिनीप्रसादनायां शृङ्गारविरोधिसमासव्यतिकरेण रीतेरप्यपक्रमे रोषलक्षणभावानुभावभूः स्तनकम्पवर्णनायां समासोऽनुप्रविष्ट इति व्यक्तः पूर्वरीतेरनिर्वाहः । रसान्तरं प्रकृतविजातीयरससंबद्धो व्यभिचारी भावः ॥

१. 'व्यूढ' इति टीकासंमतः पाठः. २. 'अत्र समस्तरीत्य' क-ख. ३. 'मधुरसपर्यन्ता' इति स्यात्. ४. 'भूतस्तन' स्यात्.

**अनलंकारमित्याहुरलंकारोज्झितं वचः ।**
**पूर्वोत्तरानुसंधाने तस्य साधुत्वमिष्यते ॥ १३४ ॥**

यथा—

'निशम्य ताः शेषगवीरभिधातुमधोक्षजः ।
शिष्याय बृहतां पत्युः प्रस्तावमदिशद्दृशा ॥ १७६ ॥'

अस्यानलंकारत्वेऽपि पूर्वापरानुसंधानप्रयोजनभूतत्वाद्गुणत्वम् ॥

**अनलंकारमिति** । अनुत्कृष्टप्रविष्टविशेषणवद्वाक्यं निरलंकारः पूर्वोत्तरवाक्यसंगतिकरणप्रयोजनकतया न दोषः । कथं तथाभूतस्य काव्यत्वमित्यपि न वाच्यम् । अनुगतेन वक्रीभावेन तत्समर्थनात् । व्यक्तमुदाहरणम् ॥

सूत्रकार एव वाक्यार्थदोषगुणीभावविवेचनं संगमयति—

**वाक्याश्रयाणां दोषाणां गुणीभावोऽयमीरितः ।**
**अथ वाक्यार्थदोषाणामदोषः कथ्यतेऽधुना ॥ १३५ ॥**
**समुदायार्थशून्यं यत्तदपार्थं प्रचक्षते ।**
**तन्मत्तोन्मत्तबालानामुक्तेरन्यत्र दुष्यति ॥ १३६ ॥**

यथा—

'काकार्यं शशलक्ष्मणः क च कुलं भूयोऽपि दृश्येत सा
दोषाणामुपशान्तये श्रुतमहो कोपेऽपि कान्तं मुखम् ।
किं वक्ष्यन्त्यपकल्मषाः कृतधियो रेखैव सान्यादृशी
चेतः स्वास्थ्यमुपेहि कः खलु युवा धन्योऽधरं धास्यति ॥ १७७ ॥

अत्र समुदायार्थशून्यत्वेनापार्थस्याप्युन्मत्तवचनत्वाद्गुणत्वम् ॥

**वाक्याश्रयाणामिति** । मत्तादिवचनान्यनुक्रियमाणानि चमत्कारमर्पयन्ति । अत एव छायालंकारप्रादुर्भावाद्गुणः । अनित्यदोषतया चानुकरणादन्यदपि गुणीभवनबीजमुन्नेयमित्युदाहरणेन व्यञ्जयन्नाह—**काकूत्यमिति** । अत्र श्रुतिशालिनो

१. 'निरलंकार' ग. २. 'कुलं' ग. ३. 'धियः स्वप्नेऽपि सा दुर्लभा' ग. ४. 'मत्तादिवचनान्य' पाठः.

नायकस्य वासनापरिपाकवशाद्विप्रलम्भावेशेऽपि प्रथमं प्रादुर्भावः—'क्काकार्यं शशलक्ष्मणः क्व नु कुलम्' इति । तदेवं शान्तरसानुयायिनमनन्तरमेव बाधित्वा चित्तानुरञ्जकप्रकृतरसाव्यभिचारिणा औत्सुक्यस्य प्रादुर्भावः—'भूयोऽपि दृश्येत सा' इति। एवं 'दोषाणामुपशान्तये श्रुतम्' इत्याद्यौचित्यादीनां पूर्वपूर्वप्रादुर्भूतानामुत्तरोत्तरभाविभिश्चिन्ताप्रभृतिभिरपवादे प्रकृतवासना औढिरवसेया । **उन्मत्तवचनत्वादिति** । रसाविष्टचेतसस्तदुत्कलिकाप्रायाणां भावानामव्यवस्थया कीर्तनमुन्मादः ॥

**यदप्रयोजनं यच्च गतार्थं व्यर्थमेव यत् ।**
**तस्यापि क्वापि निर्दोषः प्रयोगो दृश्यते यथा ॥ १२७ ॥**

यथा—

'गीता विदुरवाक्यानि धर्माः शान्तनवेरिताः ।
न श्रुता भारते येन तस्य जन्म निरर्थकम् ॥ १७८ ॥'

अत्र गीताविदुरवाक्यादीनां कथायामप्रयोजकत्वेऽपीतिहासव्याजेन चतुर्वर्गप्रतिपादनस्यारम्भ एव प्रतिज्ञानाद्गुणत्वम् । तदिदमप्रयोजनम् ॥

**यदप्रयोजनमिति** । प्रबन्धार्थपोषानाधायकवाक्यमप्रयोजनम् । अर्थलाभप्रतिपादकतया कृतकरं व्यर्थम् । एवकारो भिन्नक्रमस्तच्छब्दानन्तरं द्रष्टव्यः । दृश्यत इत्यनेन तत्र तत्र प्रकृतसंगतौ सत्यां दोषाभावोऽवसेय इति दर्शितम् । यद्यपि भगवद्गीतायां मोक्षाधिकारिणामस्त्येव प्रकृतशान्तरसपरिपोषकत्वम्, तथापि तदन्तर्गतानां भूयसामाहत्य नास्ति । भीष्मविदुरवाक्यानां तु धर्माधिकारे प्रकृतानां व्यक्त एव निष्प्रयोजनप्रस्तावः । सोऽयं यथा समाधीयते तद्विवृणोति—**अत्रेति।** इतिहासरूपे प्रबन्धे सत्यपि शान्तस्य वाक्यार्थभावेन बहूनामितिहासानां त्रिवर्गाधिकारित्वाच्चतुर्वर्गप्रतिपादनमेव महर्षेरभिमतम्, धर्मादित्रितयस्य च प्रासङ्गिकतया न पूर्ववदस्यार्थैकताविरोधः । तदिदमुक्तम्—**व्याजेनेति** । एवं च व्युत्पादयितव्यविषयजिज्ञासोपादाने धर्मार्थप्रवृत्तये वाक्यमिदं सफलतामासादयद्गुण एव भवति ॥

१. 'प्रयोजकं' ग. २. 'पोषो नाधायक' पाठः. ३. 'स्तावः' पाठः.

एवं गतार्थमपि यथा—

'हृत्कण्ठवक्त्रश्रोत्रेषु कस्य नावस्थितं तव ।
श्रीखण्डहारकर्पूरदन्तपत्रप्रभं यशः ॥ १७९ ॥'

अत्रैकेनैवोपमानेन शौक्ल्यप्रतीतौ शेषोपमानपदानां व्यर्थत्वेऽपि यशसः स्मर्यमाणत्वगीयमानत्वस्तूयमानत्वश्रूयमाणत्वैर्हृदयादिषु श्रीखण्डादिवदनस्थानस्य प्रतीयमानत्वाद्गुणत्वम् ॥

**एवं गतार्थमपीति** । श्रीखण्डेनैवोपमाने यशसः शुद्धत्वमवगतं श्लेषोपमानपदानि केवलकृतकराणीति व्यर्थत्वप्रसङ्गे स्मरणादिविशेषविवक्षया तिरस्क्रियते, यथासंख्यादिभङ्गिसौभाग्येन च गुणीभाव इति ॥

**अविशेषेण पूर्वोक्तं यदि भूयोऽपि कीर्त्यते ।**
**तदेकार्थं रसाक्षिप्तचेतसां तन्न दुष्यति ॥ १३८ ॥**

यथा—

'असारं संसारं परिमुषितरत्नं त्रिभुवनं
निरालोकं लोकं मरणशरणं बान्धवजनम् ।
अदर्पं कन्दर्पं जननयननिर्माणमफलं
जगज्जीर्णारण्यं कथमसि विधातुं व्यवसितः ॥ १८० ॥'

'असारं संसारम्' इत्युक्त्वा 'परिमुषितरत्नं त्रिभुवनं निरालोकं लोकम्' 'जगज्जीर्णारण्यम्' इति यदुक्तम्, तस्य विशेषानभिधायकत्वेऽपि रसाक्षिप्तेन वक्त्राभिहितत्वाद्गुणत्वम् ॥

**अविशेषेणेति** । पूर्वोक्तपूर्वोक्ताभिन्नतात्पर्यकमविशेषेण तात्पर्यावृत्तिप्रयोजनमन्तरेण तन्मयीभवनं चेतस आक्षेपः । 'असारं संसारम्' इत्यनेन स्थावरजङ्गमप्रपञ्चस्य निःसारतां प्रतिपाद्य 'जातौ जातौ यदुत्कृष्टं तद्धि रत्नं प्रचक्षते' इति । 'परिमुषितरत्नम्' इत्यत्रापि तावानेव तात्पर्यार्थः । एवं 'निरालोकं लोकं', 'जगज्जीर्णारण्यम्' इत्यत्रापि द्रष्टव्यम् । सुगममन्यत् ॥

---

१. 'शुभ्रत्व' ग.

**संशयायैव संदिग्धं यदि जातु प्रयुज्यते।**
**स्यादलंकार एवासौ न दोषस्तत्र तद्यथा॥ १३९॥**

'कुत्तो लम्भइ पन्थिअ सत्थरअं एत्थ गामणिघरम्मि।
उण्णअपओहरे पेक्खिऊण जइ वससि ता वससु॥ १८१॥'

[कुतो लभ्यते पथिक स्रस्तरकमत्र ग्रामणीगृहे।
उन्नतपयोधरान्प्रेक्ष्य यदि वससि तदा वस॥]

अत्र केनापि पथिकयूना प्रावृडारम्भे ग्रामणीवधूः पीनोन्नतस्तनी सत्थरअमिति स्रस्तरकव्याजेन शस्तरतं याचिता। तं प्रत्याचक्षाणेव यथोक्तं ब्रूते—'कुतोऽत्र ग्रामणीगृहे स्रस्तरकः, कुतो वा शस्तं रतम्। उन्नतौ पयोधरौ मम हृदये नभसि वा पयोधरान्दृष्ट्वा यदि वससि तदा वस' इति तदेतस्य गोपनाय [1]द्व्यर्थैरेव पदैः प्रयुक्तमिति संदिग्धस्याप्यस्य गुणत्वम्॥

**संशयायैवेति**। मिथो विरुद्धार्थवाक्यं संशयापादनेन दुष्यतीत्युक्तम्। यदा तु संदेह एव तात्पर्यमवधार्यते तदा स एव रञ्जकतयालंकारतामारोहतीति [2]कथनं गुणीभाव इति, तदिदमुक्तम्—**स्यादलंकार एवेति**। कुतो लभ्यते पथिक स्रस्तरः शस्तरतं चात्र ग्रामणीगृहे। ग्रामणीर्ग्रामप्रधानम्। उन्नतपयोधरान्मेघान् पयोधरौ स्तनौ वा दृष्ट्वा यदि वससि तद्वस। अत्र प्रष्टुः संदेहजनकत्वेन निभृतानुरागप्रकाशनं पथिकविषये प्रतीयते॥ **द्व्यर्थैरिति**। तदुक्तम्—'द्व्यर्थैः पदैः पिशुनयेच्च रहस्यवस्तु' इति॥

**वाक्ये प्रबन्धे चार्थानां पौर्वापर्यविपर्ययः।**
**दोषः सोपक्रमो नाम चित्रहेतौ च दुष्यति॥ १४०॥**

यथा—

'पश्चात्पर्यस्य किरणानुदीर्णं चन्द्रमण्डलम्।
प्रागेव हरिणाक्षीणामुदीर्णो रागसागरः॥ १८२॥'

---

१. 'नानार्थैरेव' ग. २. 'कथं न' स्यात्.

अत्र पौर्वापर्यविपर्ययादपक्रमदोषस्य चन्द्रोदयं प्रति रागोद्दीपनप्रकर्षप्रकाशनत्वाददोषः ॥

**वाक्य इति** । अर्थानां कार्यकारणभूतानां तेषामेव पौर्वापर्यनियमाश्च इति पूर्वार्धेऽध्याहार्यम् । चित्रहेताविति प्रसिद्धरूपविपर्यासेन हेतुवचनद्वारा प्रकृतवाक्यार्थपरिपोषाधानं चित्रहेतुः । पर्यस्य विस्तार्य चन्द्रोदयरागोद्दीपनयोः सत्यपि हेतुहेतुमद्भावेन पौर्वापर्ये प्रथमं रागसागरः पश्चाच्चन्द्रमण्डलमुदीर्णमिति विपर्यासप्रतीतिसमसमयमुद्दीपनविभावनानुसंधानाद् हिमांशोरतिशीघ्रकारिताप्रकाशनात् प्रकृतशृङ्गाररसो दीप्यते । एवं कुलकादिरूपं प्रबन्धान्तर्गतवाक्येष्वपि गुणत्वमवसेयम् ॥

**यस्मिन्रीतेरनिर्वाहः खिन्नं तदभिधीयते ।**
**न दोषस्तस्य तु क्वापि यत्र च्छाया न हीयते ॥ १४१ ॥**

यथा—

'अभिनववधूरोषस्वादुः करीषतनूनपा-
दसरलजनाश्लेषक्रूरस्तुषारसमीरणः ।
गलितविभवस्याज्ञेवाद्य द्युतिर्मसृणा रवे-
र्विरहिवनितावक्त्रक्लैब्यं बिभर्ति निशाकरः ॥ १८३ ॥'

अत्रोपमानानि सामान्यवचनैः समस्यन्त इति प्रक्रान्तरीतेरनिर्वाहेऽपि समासव्याख्यापरत्वेनैव इवशब्दतद्धितयोः प्रयोगे प्रत्युत च्छायोत्कर्ष इति गुणत्वम् ॥

**यस्मिन्निति** । वाक्यार्थस्य धर्मिणो यदलंकारभङ्ग्या प्रक्रमस्थया निर्वहणमभावः खेदः । स तु पूर्वालंकारविश्रान्तौ प्रतीतेरस्खलने न दोषः । गुणत्वं च तस्य भङ्ग्यन्तरैरपि प्रकृतालंकारे ध्वननात् । तथा हि—'अभिनववधूरोषस्वादु असरलजनाश्लेष इव क्रूरः' इत्युपमानानि सामान्यवचनैः समस्यन्त इति समासद्वयेनोपमामुपक्रम्य मलिनविभवस्याज्ञेवेति समासत्यागाद्विरहिवनितावक्त्रक्लैब्यं बिभर्तीति चान्तरधर्मारोपेण चोपमात्यागात्सत्यपि रीतेरनिर्वाहे उपमायामेव पर्यवसानं समाधानहेतुः । गुणत्वहेतुमाह—व्याख्यापरत्वेनेति । गलितविभावाज्ञामसृणेति समासे कर्तव्ये योऽयमिवशब्दप्रयोगः स इवार्थे पूर्वौ समासौ बोधयति । क्लैब्यं

बिभर्तीति सामान्यालंकारे कथमन्यधर्ममन्यो वहतीति प्रतिसंधानसमसमयं वक्र-क्रैव्यमस्येत्यन्तर्गतोपमाप्रकटीभावे उपमासमासपदयोरपि सा प्रतीयते इति सेयं कविचातुरीप्रतीयमानच्छायामेव पुष्णाति । तदिदमुक्तम्—प्रत्युतेति ॥

लोकातीत इवार्थे यः सोऽतिमात्र इहेष्यते ।
वार्तादौ तेन तुष्यन्ति विदग्धा नेतरे जनाः ॥ १४२ ॥
तच्च वार्ताभिधानेषु वर्णनास्वपि विद्यते ।
कान्तं जगति तत्कान्तं लौकिकार्थानुयायि यत् ॥ १४३ ॥
लौकिकार्थमतिक्रम्य प्रस्थानं यत्प्रवर्तते ।
तदत्युक्तिरिति प्रोक्तं गौडानां मनसो मुदे ॥ १४४ ॥

यथा—

'देव धिष्ण्यमिवाराध्यमद्य प्रभृति नो गृहम् ।
युष्मत्पादरजःपातधौतनिःशेषकल्मषम् ॥ १८४ ॥'

अत्रातिमात्राख्ये दोषेऽपि वार्ताभिधानेऽभिधेयस्य कान्तिगुणस्याभ्यनुज्ञानाद्गुणत्वम् ।

यथा वा—

'अल्पं निर्मितमाकाशमनालोच्यैव वेधसा ।
इदमेवंविधं भावि भवत्याः स्तनजृम्भणम् ॥ १८५ ॥'

अत्रातिमात्रत्वेऽपि वर्णनार्थत्वाद्गुणत्वम् । अथानतिमात्रं कीदृक् । उच्यते—

वार्ते तावद्यथा—

'गृहाणि नाम तान्येव तपोराशिर्भवादृशः ।
संभावयन्ति यान्येवं पावनैः पादपांसुभिः ॥ १८६ ॥'

अथ वर्णनायां यथा—

'अनयोरनवद्याङ्गि स्तनयोर्जृम्भमाणयोः ।
अवकाशो न पर्याप्तस्तव बाहुलतान्तरे ॥ १८७ ॥'

लोकातीत इति । 'अनामये प्रियालापे वार्तं वार्ता च कीर्त्यते । वर्णनास्वपि' इत्यादिपदविवरणं दृश्यते । कान्तमित्यभिसंबन्धः । लौकिकार्थानुयायि यज्जगति लोके कान्तमुच्यते तथाभूतमतिक्रम्य यत्कवीनां प्रस्थानं प्रवर्तते तदपि गौडानां मनसो मुदे प्रोक्तम् । शब्दाडम्बरात्मकगौडरीतिप्रियाणां विदग्धकामाज्ञापकं सद्गुणी भवतीति श्लोकार्थः । धिष्ण्यं गृहम् । ननु प्रियालापवर्णनयोरेवंविधा एव लोके काव्ये च वचनसंदर्भा इति नास्त्यतिमात्रतानतिमात्रतयोर्भेद इति पृच्छति—अथेति । सुगममन्यत् ॥

परुषं निष्ठुरार्थं तु यदतीव विगर्हितम् ।
विरुद्धलक्षणाद्यासु तदुक्तिषु न दुष्यति ॥ १४५ ॥

यथा—

'हालाहलं विषं भुङ्क्ष्व सखि मा तत्र विश्वसीः ।
यद्वा न दह्यसे काष्ठैः स्वल्पैस्त्वमिति मे मतिः ॥ १८८ ॥'

अत्र पारुष्येऽपि विरुद्धलक्षणयार्थान्तरस्य लक्षितत्वाद्गुणत्वम् ॥

परुषमिति । विरुद्धलक्षणा लौकिकी तस्या हि झटित्यभिधानाविनाभावादपरुषार्थप्रतीतेरभिधानतः पारुष्यं न दोषो लक्षणापरिग्रहेण च गुणत्वम् । तदाहुः—'अभिधेयाविनाभावप्रतीतिर्लक्षणेति या । सैषा काव्ये दग्धवक्त्रा जीवितं वृत्तिरिष्यते ॥' इति ।

अप्रस्तुतरसं प्राहुर्विरसं वस्तु सूरयः ।
अप्राधान्ये तदेष्टव्यं शिष्टैः स्याद्रसवस्तुनोः ॥ १४६ ॥

यथा—

'क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोंऽशुकान्तं
गृह्णन्केशेष्वपास्तश्चरणनिपतितो नेक्षितः संभ्रमेण ।
आलिङ्गन्योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः
कामीवार्द्रापराधः स दहतु दुरितं शांभवो वः शराग्निः ॥१८९॥'

अत्र करुणे शृङ्गारस्याप्रकृतत्वेऽपि शंभुप्रभाववर्णनाङ्गभूतत्वेन द्वयोरप्यप्राधान्याददवैरस्येन गुणत्वम् ॥

१. 'स्तुतत्वे' इति सटीकपुस्तकपाठः.

अप्रस्तुतेति। अप्राधान्य इत्युपलक्षणं बाध्यत्वेऽपीति च बोद्धव्यम्। रसवस्तुनोः परस्परविरोधिरसव्यञ्जकयोः। यद्वा मिथोविरोधिरसरूपयोरेव वस्तुनः। तदाह—'बाध्यानामङ्गभावं वा प्राप्तानामविमुक्तता' इति॥

**हीनं यत्रोपमानं स्यादुपमेयं गुणाधिकम्।**
**हीनोपमं तदस्याहुः कवयः क्वाप्यदुष्टताम्॥ १४७॥**

यथा—

'ततः कुमुदनाथेन कामिनीगण्डपाण्डुना।
नेत्रानन्देन चन्द्रेण माहेन्द्री दिगलंकृता॥ १९०॥'

अत्रोपमानस्य हीनतायामपि रागातिशयहेतुत्वाद्गुणत्वम्॥

हीनमिति। जातिप्रमाणाभ्यामपकृष्टं हीनं चन्द्रापेक्षया कामिनीकपोलस्याप-कर्षे आत्मनस्तुल्यतामुद्दीपनस्य प्रतिपाद्यमानः प्रकृतशृङ्गारप्रकर्षमर्पयिष्यतीति गुण-त्वम्। एवमधिकोपमेऽपि॥

**यत्रोपमानमुत्कृष्टमुपमेयं निकृष्यते।**
**ज्ञेयं तदधिकौपम्यमस्यापि क्वाप्यदोषता॥ १४८॥**

यथा—

'कान्त्या चन्द्रमसं धाम्ना सूर्यं धैर्येण चार्णवम्।
राजन्ननुकरोषि त्वं सौभाग्येनापि मन्मथम्॥ १९१॥'

अस्याधिकौपम्येऽपि राज्ञो लोकपालांशत्वेन शिष्टैरादृतत्वाद्गुणत्वम्॥'

**उपमानस्य[२] वैषम्याद्भवेदसदृशोपमम्।**
**तस्याभ्यनुज्ञामिच्छन्ति व्यतिरेकोपमादिषु॥ १४९॥**

यथा—

'प्रहितः प्रधनाय माधवानहमाकारयितुं महीभुजा।
न परेषु महौजसश्छलादपकुर्वन्ति मलिम्लुचा इव॥ १९२॥'

---

१. 'मुक्तिवत्सला' इति पाठः. २. 'नेन' इति सटीकपुस्तकपाठः.

अस्यासदृशोपमत्वेऽपि व्यतिरेकोपपादकत्वाद्गुणत्वम् ॥

**उपमानस्येति** । उपमानेन वैषम्यमन्वयेन सादृश्याभावात् । व्यतिरेकोपमादीत्यादिग्रहणाद्व्यतिरेकदृष्टान्तोक्त्यादिपरिग्रहः ॥

**यस्योपमानं लोकेषु न प्रसिद्धं तदिष्यते ।**
**अप्रसिद्धोपमं नाम तत्कचिन्नैव दुष्यति ॥ १५० ॥**

यथा—

'उद्गर्भहूणरमणीरमणोपमर्द-
भुग्नोन्नतस्तननिवेशनिभं हिमांशोः ।
बिम्बं कठोरबिसकाण्डकडारगौरै-
र्विष्णोः पदं प्रथममग्रकरैर्व्यनक्ति ॥ १९३ ॥'

अस्यां प्रसिद्धोपमत्वेन दूषणत्वेऽपि द्वयोरपि शृङ्गारोद्दीपकत्वसाम्याद्गुणत्वम् ॥

**यस्योपमानमिति** । लोकप्रसिद्धमेव कविभिरुपमाने कान्तं भवति तेन यत्र लोके प्रसिद्धं तेन सहोपमावर्णने संभवदप्यप्रसिद्धोपमत्वं रसानुप्रवेशेन गुणी भवति । उद्गर्भत्वेन स्तनाग्रश्यामिका तया लाञ्छनानुकरणमभिलषितम् ॥

**निरलंकारमित्याहुरलंकारोज्झितं वचः ।**
**अर्थौर्जित्येषु तस्यापि क्वचिन्निर्दोषता मता ॥ १५१ ॥**

*यथा*—

'याच्ञा दैन्यपराभवप्रणयिनी नेक्ष्वाकवः शिक्षिताः
सेवासंवलितः कदा रघुकुले मौलौ निबद्धोऽञ्जलिः ।
सर्वं तद्विहितं तथाप्युदधिना नैवोपरोधः कृतः
पाणिः संप्रति मे हठात्किमपरं स्प्रष्टुं धनुर्वाञ्छति ॥१९४॥'

अत्र निरलंकारत्वेऽपि अर्थौर्जित्याद्गुणत्वम् ॥

**निरलंकारमिति** । दैन्यपराभवप्रणयिनीमित्याद्युत्कृष्टपुष्टिविशेषणयोगादस्तिशब्देऽस्पष्टे वक्रतार्थे तु नास्ति वक्रत्वं चालंकार इति । यद्यपि वाक्यार्थो निरलंकार

इव भासते, तथापि विशेषतोऽलंकाराध्यवसायेऽपि सामान्येन वक्रता प्रकाशत एव। नहि लौकिकशास्त्रीयवचनार्थवैपरीत्यमिह प्रतीयते। तदिदमुक्तमर्थौर्जित्यादिति॥

अस्ति हि वयं याचामह इत्युक्ते याच्ञा च भिक्षाकरानालक्षिता(?)इत्युक्तौ नायकप्रकर्षाभिव्यञ्जको विशेष इत्याह—

**असभ्यार्थं यदश्लीलं तदर्थान्तरवाचि वा।**
**तस्येह दृश्यते भूम्ना प्रयोगो नापि दुष्यति॥ १५२॥**

यथा—

'अद्यापि तत्कनककुण्डलघृष्टगण्ड-
मास्यं स्मरामि विपरीतरताभियोगे।
आन्दोलनश्रमजलस्फुटघर्मबिन्दु-
मुक्ताफलप्रकरविच्छुरितं प्रियायाः॥ १९५॥'

अत्राश्लीलार्थेऽपि कविभिरविगीतत्वाद्गुणत्वम्॥

**असभ्यार्थमिति**। क्वचित्प्राथमिक एव पदार्थसंसर्गोऽश्लीलः। क्वचित्तु न तस्मिंस्तथाभूतेऽपि संसर्गान्तरमिति यदश्लीलमर्थान्तरवाचि वेत्युक्तम्। कविभिरविगीतत्वादिति। अविपरीताद्विपरीतं रतमुत्कृष्यत इति शास्त्रकारैराम्नानात्तस्य शृङ्गारोद्दीपनतया कविभिरादृतत्वादित्यर्थः॥

**देशोऽद्रिवनराष्ट्रादिः कालो रात्रिंदिवर्तवः।**
**नृत्यगीतप्रभृतयः कलाः कामार्थसंश्रयाः॥ १५३॥**
**चराचराणां भूतानां प्रवृत्तिर्लोकसंज्ञिता।**
**हेतुविद्यात्मको न्यायः संस्मृतिः श्रुतिरागमः॥१५४॥**
**तेषु तेष्वयथारूढं यदि किंचित्प्रवर्तते।**
**कवेः प्रमादाद्देशादिविरोधीत्येतदुच्यते॥ १५५॥**
**विरोधः सकलेष्वेव कदाचित्कविकौशलात्।**
**उत्क्रम्य दोषगणनां गुणवीथीं विगाहते॥ १५६॥**

१. 'लोऽध्येष' इति सटीकपुस्तकपाठः.

तत्र देशविरुद्धस्य गुणीभावो यथा—

'तस्य राज्ञः प्रभावेण तदुद्यानानि जज्ञिरे ।
आर्द्रांशुकप्रवालानामास्पदं सुरशाखिनाम् ॥ १९६ ॥'

अत्र देशविरुद्धत्वेऽपि तस्य राज्ञः प्रभावेणेति कारणोपन्यासाद्गुणत्वम् ॥

**देशोऽद्रीति** । आदिपदेन द्वीपादिपरिग्रहः । कामार्थसंश्रयाः, अर्थसंश्रयाः प्रवृत्तयोऽवस्थाविशेषाः । हेतुविद्या आन्वीक्षिकी । अयथारूढं अप्रसिद्धम् ॥

कालविरुद्धस्य यथा—

'राज्ञां विनाशपिशुनश्चचार खरमारुतः ।
धुन्वन्कदम्बकुसुमैः सह सप्तच्छदोद्गमान् ॥ १९७ ॥'

अत्र कालविरुद्धत्वेऽपि राज्ञां विनाशपिशुन इत्यनिष्टसूचकोत्पातरूपत्वाद्गुणत्वम् ॥

**कालविरुद्धस्येति** । उपघात उत्पातः ॥

लोकविरुद्धस्य यथा—

'ऐन्दवादर्चिषः कामी शिशिरं हव्यवाहनम् ।
अबलाविरहक्लेशविह्वलो गणयत्ययम् ॥ १९८ ॥'

अत्र लोकविरुद्धत्वेऽपि कामिभिस्तथा संवेद्यमानत्वाद्गुणत्वम् ॥

युक्तिविरुद्धस्य यथा—

'स संकोचश्चन्द्रादिव कुमुदराशेरशरणः
स सूर्यात्कोकानां विरह इव लुप्तप्रतिविधिः ।
गुणेभ्यस्ते खेदप्रशमनकरेभ्योऽपि यदयं
खलानामुद्वेगस्तदिदममृतादेव मरणम् ॥ १९९ ॥'

अत्र युक्तिविरुद्धत्वेऽपि छेकोक्त्या संभाव्यमानोपमया तथाप्रतीतेर्गुणत्वम् ।

**स संकोच इति** । यदि चन्द्रादिभ्यः कुमुदसंकोचादयो भवेयुस्तदा भवद्गुणेभ्यः खलानामुद्वेग उपमीयेत न तु तथा संभवति तेनायमलौकिकत्वादाश्चर्यमर्पयतीति वाक्यार्थपरिपोषात्तथोपन्यासो गुण एवेति ॥

औचित्यविरुद्धस्य यथा—

'तेनाथ नाथ दुरुदाहरणातपेन
सौम्यापि नाम परुषत्वमभिप्रपन्ना ।
जज्वाल तीक्ष्णविशदाः सहसोद्गिरन्ती
वागर्चिषस्तपनकान्तशिलेव सीता ॥ २०० ॥'

अत्र स्त्रीत्वादौचित्यविरोधेऽपि तत्समयोचितत्वाद्गुणत्वम् ॥

वचनविरुद्धस्य यथा—

'परदाराभिलाषो मे कथमार्यस्य युज्यते ।
पिबामि तरलं तस्याः कदा नु रदनच्छदम् ॥ २०१ ॥'

अत्र वचनविरोधेऽपि वक्तुस्तथाविधावस्थत्वाद्गुणत्वम् ॥

**वचनविरुद्धस्येति** । अष्टमी कामावस्था ॥

धर्मविरोधस्य यथा—

'पञ्चानां पाण्डुपुत्राणां पत्नी पाञ्चालकन्यका ।
सतीनामग्रणीस्त्वासीद्दैवो हि विधिरीदृशः ॥ २०२ ॥'

अत्र धर्मविरोधेऽपि दैवो विधिरित्यनेनाभिहितत्वाददोषः ॥

**धर्मविरोधस्येति** । दैवो हीति । सिद्धादेशाच्च सतीत्वं पाञ्चालकन्यकायाः । तिरस्कृतमित्यत एव वा पञ्चधा विवक्षित इत्यागमः ॥

अर्थशास्त्रविरुद्धस्य यथा—

'नीतिरापदि यद्गम्यः परस्तन्मानिनो ह्रिये ।
विधुर्विधुंतुदस्येव पूर्णस्तस्योत्सवाय सः ॥ २०३ ॥'

---

१. प्रक्षिप्तोऽयं पाठः.

अत्रापन्नः शत्रुरभियातव्य इति नीतिः, तच्च मानिनो ह्रियै भवतीतिविरुद्धमपि उद्धतपुरुषभाषितत्वान्न दुष्यतीति गुणत्वम् ।

**अर्थशास्त्रेति** । उद्धतपुरुषभाषितत्वादिति । पूर्वपक्षतया सिद्धान्तोपोद्घातत्वादित्यर्थः ॥

कामशास्त्रविरुद्धस्य यथा—

'दोलातिप्रेरणत्रस्तवधूजनमुखोद्गतम् ।
कामिनां लयवैषम्याद्गेयं रागमवर्धयत् ॥ २०४ ॥'

अत्र त्रासतो लयवैषम्येण गेयस्य रागहेतुत्वेऽपि कामिनीमुखोद्गीर्णत्वाद्रागविवर्धनत्वेन गुणत्वम् ॥

**कामशास्त्रेति** । लयवैषम्यादिति गीतस्य कलाप्रकथनात्तस्य च विषमलयस्यारञ्जकत्वात्कथं रागवर्धनमिति दूषणं दोलागतागतत्रस्तकामिनीगीतप्रभावोक्तेश्चमत्कारित्वात्तिरोधीयत इति गुणभावं च नीयते । भावान्तरालवर्ती कालो लयः ॥

**इत्थं गुणाश्च दोषाश्च काव्ये दोषगुणाश्च ये ।**
**आख्यातास्ते स्फुटं संप्रत्यलंकारान्प्रचक्ष्महे ॥ १५७ ॥**

ननु गुणैरेव शब्दार्थयोः सनाथीकरणे किमलंकारविवेचनप्रयासेनेत्यत आह—

**युवतेरिव रूपमङ्ग काव्यं स्वदते शुद्धगुणं तदप्यतीव ।**
**विहितप्रणयं निरन्तराभिः सदलंकारविकल्पकल्पनाभिः १५८**

**युवतेरिति** । अङ्गेत्याक्षेपसंबोधने । अलंकारसाहित्यबुद्धिसंगतिः प्रणयः ॥

विकल्पो विशेषस्तर्हि किमुत्तरसिद्धौ पूर्वेणेति न्यायेन त्यज्यन्तां गुणा इत्यत आह—

**यदि भवति वचश्च्युतं गुणेभ्यो**
**वपुरिव यौवनबन्ध्यमङ्गनायाः ।**
**अपि जनदयितानि दुर्भगत्वं**
**नियतमलंकरणानि संश्रयन्ते ॥ १५९ ॥**

**यदि भवतीति** । विवृतमेतत् ॥

---

१. 'तोऽति' मूलपुस्तकपाठः.

ते चालंकारा यथास्थानं निवेश्यमाना एव सहृदयरञ्जनक्षमा इति कवीञ्शिक्षयति-

**दीर्घापाङ्गं नयनयुगलं भूषयत्यञ्जनश्री-**
**स्तुङ्गाभोगौ प्रभवति कुचावर्चितुं हारयष्टिः।**
**मध्ये क्षामे वपुषि लभते स्थानकूर्पासलक्ष्मीः**
**श्रोणीबिम्बे गुरुणि रशनादाम शोभां बिभर्ति ॥१६०॥**

**इति श्रीमहाराजाधिराजभोजदेवेन विरचिते सरस्वतीकण्ठाभरण-नाम्नि अलंकारशास्त्रे गुणविवेचनं नाम प्रथमः परिच्छेदः।**

**दीर्घेति**। तेन शब्दादिविषयविभागेनालंकारविवेचनं सप्रयोजनमेवेति तात्पर्यार्थः। शेषमतिरोहितम् ॥

इति श्री**मिश्ररत्नेश्वर**विरचिते **रत्नदर्पण**नाम्नि **सरस्वतीकण्ठाभरण**-विवरणे गुणविवेचनो नाम प्रथमः परिच्छेदः।

---

## द्वितीयः परिच्छेदः।

क्षेत्रमध्यं विशालाक्षी यस्याधिवसति प्रिया।
अविमुक्तप्रतिष्ठाय तस्मै कामद्रुहे नमः ॥
आद्यं स्फुरतु वाग्देव्याः कण्ठाभरणकौतुकम्।
मयि प्रह्वमनोवृत्तौ तन्वाने रत्नदर्पणम् ॥

एवं दोषगुणेषु निर्णीतेष्वलंकाराः प्राप्तावसरास्तत्रालंकारसामान्यलक्षणमाद्यपरिच्छेदे तद्विभागं दर्शयन्परिच्छेदत्रयं संगमयति—

**शब्दार्थोभयसंज्ञाभिरलंकारान्कवीश्वराः।**
**बाह्यानाभ्यन्तरान्बाह्याभ्यन्तरांश्चानुशासति ॥ १ ॥**

**शब्दार्थोभयसंज्ञाभिरिति**। इत्थंभूतलक्षणे तृतीया। मध्यमपदलोपीसमासः। तेन शब्दालंकारार्थालंकारोभयालंकारसंज्ञाभिरित्यर्थः। गुणप्रस्तावे त्राह्यत्वादिकं विवृतं शब्दोऽवच्छेदकतया प्रथमप्रतिसंधेयभावेन च शरीरस्थानीयो बाह्यस्ततस्तदाश्रया अलंकारा अपि बाह्याः। अर्थो विच्छेद्यतया पश्चादनुसंधेयतया चात्मतुल्य आभ्यन्तरत्वेन तदाश्रया अलंकारा अप्याभ्यन्तराः। एतेन बाह्याभ्यन्तरा व्याख्याताः। आश्रयाश्रयिभावश्च यथातथोक्तमेव। उभयालंकारेषु योगस्य प्रायिकत्वमाश्रित्य कवीश्वराणामनुशासनमुक्तम्। एतद्विवेचयिष्यते चतुर्थारम्भे ॥

शब्दालंकारसामान्यलक्षणमाह—

*ये व्युत्पत्त्यादिना शब्दमलंकर्तुमिह क्षमाः ।*
*शब्दालंकारसंज्ञास्ते ज्ञेया जात्यादयो बुधैः ॥ २ ॥*

**ये व्युत्पत्तीति** । विशिष्टा उत्पत्तिर्व्युत्पत्तिर्लोपागमविकारादिप्रपञ्चः । अत एव हि संस्कृतादिजातयो व्यवतिष्ठन्ते । आदिग्रहणाद्गुरुलघुसंनिवेशादयो गत्याद्यवच्छेदास्त्रयोविंशतिरुपात्ताः । बाह्यकङ्कणादिसाम्यादियं संज्ञा प्रवृत्तेत्याह—शब्दालंकारसंज्ञा इति ॥

जातिर्गती रीतिवृत्तिच्छायामुद्रोक्तियुक्तयः ।
भणितिर्गुम्फना शय्या पठितिर्यमकानि च ॥ ३ ॥
श्लेषानुप्रासचित्राणि वाकोवाक्यं प्रहेलिका ।
गूढप्रश्नोत्तराध्येयश्रव्यप्रेक्ष्याभिनीतयः ॥ ४ ॥

ते च प्रतिविशेषं वक्ष्यन्ते—

चतुर्विंशतिरित्युक्ताः शब्दालंकारजातयः ।
अथासां लक्षणं सम्यक्सोदाहरणमुच्यते ॥ ५ ॥

शब्दालंकारजातयः शब्दालंकारसामान्यानि ॥

स्वरूपस्थितौ रूपान्तरगवेषणमनुचितम् । अतो जातेः प्राधान्यात्प्रथमं लक्षणमित्याह—

तत्र संस्कृतमित्यादिर्भारती जातिरिष्यते ।
सा त्वौचित्यादिभिर्वाचामलंकाराय जायते ॥ ६ ॥

**तत्रेति** । संस्कृतमिति भावप्रधानो निर्देशः । भारतीग्रहणं स्पष्टार्थम् । नन्ववश्यं शब्देन संस्कृताद्यन्यतमेन भवितव्यम् । तत्कोऽत्र कवेः शक्तिव्युत्पत्त्योरंशो येनालंकारता स्यादित्यत आह—सेति । औचित्याकृष्ट एवालंकारः । अस्ति च संस्कृतादेरपि तथाभाव इति भावः ॥

यद्यप्यर्थौचिती पूर्वं दर्शयितुमुचिता तथापि प्राधान्यमावेदयितुं पृथक्त्वौचितीमाह—

संस्कृतेनैव केऽप्याहुः प्राकृतेनैव केचन ।
साधारण्यादिभिः केचित्केचन म्लेच्छभाषया ॥ ७ ॥

विषयौचितीमाह—

न म्लेच्छितव्यं यज्ञादौ स्त्रीषु नाप्राकृतं वदेत् ।
संकीर्णं नाभिजातेषु नाप्रबुद्धेषु संस्कृतम् ॥ ८ ॥

न म्लेच्छितव्यमित्यादि । म्लेच्छनमपशब्दः । प्राकृतं संस्कृतभवम् । अभिजातः शुद्धान्वयः ॥

अथ के संस्कृताद्युचितवक्तार इत्यत आह—

देवाद्याः संस्कृतं प्राहुः प्राकृतं किंनरादयः ।
पैशाचाद्यं पिशाचाद्या मागधं हीनजातयः ॥ ९ ॥

देवाद्या इति । आदिग्रहणेन ऋषिभूमिपतिप्रभृतयः ॥

वाच्यौचितीं दर्शयति—

संस्कृतेनैव कोऽप्यर्थः प्राकृतेनैव चापरः ।
शक्यो रचयितुं कश्चिदपभ्रंशेन जायते ॥ १० ॥

संस्कृतेनैवेति । यथा हि—देवतास्तुत्यादौ संस्कृतं प्रगल्भते न तथा प्राकृतादि । यथा च सूक्ष्मवस्तुस्वरूपोट्टङ्कने प्राकृतस्य सौष्ठवं न तथा संस्कृतादेरित्यादि ॥

पैशाच्या शौरसेन्यान्यो मागध्यान्यो निबध्यते ।
द्वित्राभिः कोऽपि भाषाभिः सर्वाभिरपि कश्चन ॥ ११ ॥

पैशाच्येति । द्वित्राभिः कोऽपि काव्यसमस्यामेदस्यार्थः । सर्वाभिः कश्चन प्रकरणादेरर्थः ॥

विषयौचित्यमेव क्वचिद्विशेषे कान्तिप्रकर्षमर्पयन्तीमाह—

नात्यन्तं संस्कृतेनैव नात्यन्तं देशभाषया ।
कथां गोष्ठीषु कथयँल्लोके बहुमतो भवेत् ॥ १२ ॥

नात्यन्तमिति । समानबुद्धिशीलवयसां विनोदार्थमासनबन्धो गोष्ठी ॥

देशौचितीमाह—

शृण्वन्ति लटभं लाटाः प्राकृतं संस्कृतद्विषः ।
अपभ्रंशेन तुष्यन्ति स्वेन नान्येन गुर्जराः ॥ १३ ॥

शृण्वन्तीति । लटभं मनोज्ञम् । स्वेन गुर्जरजातीयेन ॥

**ब्रह्मन्विज्ञापयामि त्वां स्वाधिकाराजिहासया ।**
**गौडस्त्यजतु वा गाथामन्या वास्तु सरस्वती ॥ १४ ॥**

**ब्रह्मन्निति** । ब्रह्मन्नित्यादिना निन्दार्थानुवादेन गौडेषु प्राकृतानौचित्यं **राजशेखरेण** व्यञ्जितम् ॥

समयौचितीं दर्शयति—

**केऽभूवन्नाढ्यराजस्य राज्ये प्राकृतभाषिणः ।**
**काले श्रीसाहसाङ्कस्य के न संस्कृतवादिनः ॥ १५ ॥**

**केऽभूवन्निति** । आढ्यराजः **शालिवाहनः** । साहसाङ्को **विक्रमादित्यः** । ग्रन्थकृत्पूर्वजतया श्रीपदम् ॥

ता इमाः परस्परसंकीर्णाः षडेव संस्कृतादिभाषा भवन्तीति सामान्यविभागमेतद्विरचनप्रयोजनं चोपसंहरति—

**गिरः श्रव्या दिव्याः प्रकृतमधुराः प्राकृतधुराः**
**सुभव्योऽपभ्रंशः सरसरचनं भूतवचनम् ।**
**विदग्धानामिष्टे मगधमथुरावासिभणिति-**
**र्निबद्धा यस्तेषां स इह कविराजो विजयते ॥१६॥**

**गिर इति** । दिव्याः संस्कृताः । भूतवचनं पैशाचम् । मथुरावासिभणितिः शौरसेनी । तेषामिति । तच्च भूतवचनं स चापभ्रंशस्ताश्च दिव्याद्या इति 'नपुंसकमनपुंसकेन' इत्येकशेषः । पाक्षिकं बहुवचनम् । प्रतिभार्थप्राणानां जीवद्वर्णनानिपुणो हि कविः, स एव हि सर्वपथीनतादृग्युक्तिसिद्धिसंपन्नः कविराजः, अत एव विजयते सकललोकशास्त्रवचननिर्मातृभ्यः प्रकर्षेण वर्तत इति ॥

संस्कृतादिषु यथायोगं शुद्धादिभेदेन जातिः षोढा भिद्यत इत्याह—

**शुद्धा साधारणी मिश्रा संकीर्णा नान्यगामिनी ।**
**अपभ्रष्टेति साचार्यैर्जातिः षोढा निगद्यते ॥ १७ ॥**

**शुद्धा साधारणीति** । इह भाषारूपविषयभेदेन भिन्नाः संस्कारा यानधिकृत्य **पाणिनि-वररुचि**-प्रभृतीनामनुशासनानि व्यवतिष्ठन्ते । तद्यत्रैक एव संस्कारः प्रत्यभिज्ञायते सा शुद्धा । संस्कारान्तराग्रहणात् । यत्र तु लक्षणसंभेदेन नानासंस्कारसंपातः क्षीरनीरवत्सा साधारणी । रूपसाधारण्यान्नरसिंहवद्भाषाभेदव्य-

वस्थितभागद्वयात्मिका मिश्रा। रूपमिश्रणात्तिलतण्डुलन्यायेन संकीर्णा। विजातीयवस्त्वन्तरव्यतिरेक एव लोके संकीर्णव्यवहारात्। या पुनः प्रकृतिभावेनापि भाषान्तरसंपर्कं न सहते सानन्यगामिनी। संस्कारसंभेदेन वा प्रकृतिभावेन वा नान्यं गच्छति यतोऽपशब्दरूपा सापभ्रष्टा॥

तासूत्तमपात्रप्रयोज्या संस्कृतजातिः शुद्धा यथा—

'उन्नमितैकभ्रूलतमाननमस्याः पदानि रचयन्त्याः।
कण्टकितेन प्रथयति मय्यनुरागं कपोलेन॥ १॥'

**तासूत्तमेति**। पात्रलक्षणमुत्तमादिभेदश्च पञ्चमे वक्ष्यते। उन्नमितैकेति। पदानि प्रकृतानङ्गलेखोचितानि निर्व्याजप्रेमगर्भाणि। अत एवावापोद्वापप्रतिसंधाननिमग्नमानसायाश्चिन्तानुभावरूपं भ्रूलताविरेचितमिवासीत्। हस्ततलनिहितैककपोलायास्तादृक्पुलकितैककपोलदर्शनादतिमानात्मा शृङ्गारः सुप्रबुद्ध इव तत्कालं नायकस्यापीति मिथोऽनुबन्धलक्षणापूर्वानुरागकक्षामधिरूढा रतिरेव काव्यसर्वस्वायते। अत्र च कस्यचित्पदस्य भाषान्तरसाधारण्येऽपि भूयसामुदाहरणत्वम्। एवमन्यत्रापि॥

मध्यमपात्रप्रयोज्या प्राकृतजातिः शुद्धा यथा—

'तुज्झ ण आणे हिअअं मम उण मअणो दिआ अ रत्तिं अ।
णिक्किव तवेइ वलिअं तुह जुत्तमनोरहाइं अङ्गाइं॥ २॥'

[तव न जाने हृदयं मम पुनर्मदनो दिवा च रात्रिं च।
निष्कृप तपति बलवत्त्वयि युक्तमनोरथान्यङ्गानि॥]

**तुज्झेति**। वलिअं बलवत्कृतमभिमुखम्॥

हीनपात्रप्रयोज्या मागधिका यथा—

'शद् माणशमंशभालके कुम्भशहश्श वशाहि शंचिदे।
अणिशं च पिआमि शोणिदे वलिशशदे शमले हुवीअदि॥३॥'

[शतं मानुषमांसभारकाः कुम्भसहस्रं वसाभिः संचितम्।
अनिशं च पिबामि शोणितं वर्षशतं समरो भविष्यति॥]

**शद् माणुशेति**। शतं मानुषमांसभारः कुम्भसहस्रं वसाभिः संचितम्। अनिशं च पिबामि शोणितं वर्षशतं समरो भविष्यति॥' अत्र मांसादिलाभहेतुतया समराशंसनं बीभत्समुन्मुद्रयद्धीनपात्रतां द्रढयति॥

नात्युत्तमपात्रप्रयोज्या पैशाची शुद्धा यथा—

'पनमत पनअपकुप्पितगोलीचलनग्गलग्गपडिबिम्बम् ।
दससु नहदप्पनेसु एआदसतनुधलं लुद्दम् ॥ ४ ॥'

[प्रणमत प्रणयप्रकुपितगौरीचरणाग्रलग्नप्रतिबिम्बम् ।
दशसु नखदर्पणेष्वेकादशतनुधरं रुद्रम् ॥]

**नात्युत्तमेति** । उत्तमादपकृष्टं मध्यमादुत्कृष्टं नात्युत्तमम् । 'प्रणमत प्रणयप्रकुपितगौरीचरणाग्रलग्नप्रतिबिम्बम् । दशसु नखदर्पणेष्वेकादशतनुधरं रुद्रम् ॥' एवं नाम देवीकोपे भगवतः प्रणयकातरता येन युगपदिव सर्वाभिरपि मूर्तिभिः प्रणमतीति प्रतीयमानोत्प्रेक्षा ॥

नातिमध्यमपात्रप्रयोज्या शौरसेनी शुद्धा यथा—

'तुं सि मए चूअङ्कुर दिण्णो कामस्स गहिदधणुहस्स ।
जुवइमणमोहणसहो पञ्चब्भहिओ सरो होहि ॥ ५ ॥'

[त्वमसि मया चूताङ्कुर दत्तः कामस्य गृहीतधनुषः ।
युवतिमनोमोहनसहः पञ्चाभ्यधिकः शरो भव ॥]

**नातिमध्यमेति** । हीनादुत्कृष्टं मध्यमादपकृष्टं नातिमध्यमम् । तुं सीति । कामस्य । कामायेत्यर्थः । चतुर्थ्याः 'संबन्धसामान्यविवक्षायां षष्ठी' इति सूत्रात् षष्ठी ॥

नातिहीनपात्रप्रयोज्योऽपभ्रंशः शुद्धो यथा—

'लइ वप्पुल पिअ दुद्धं कत्तो अम्हाणहुं छासि ।
पुत्तहुमत्थे हत्थो जइ दहि जम्मेवि जअ आसि ॥ ६ ॥'

[गृहाणानुकम्प्य पिब दुग्धं कुतोऽस्माकं तक्रम् ।
पुत्रकमस्तके हस्तो यदि दधि जन्मन्यपि जातमासीत् ॥]

प्रायिकं चैतत् । तेन कवेरभिप्रायशक्त्यादिभ्यः सर्वा अपि सर्वप्रयोज्या भवन्ति । ता इमाः शुद्धाः षडेव ॥

**नातिहीनेति** । हीनात्किंचिदुत्कृष्टं मध्यमादपकृष्टं नातिहीनम् । लइ वप्पुलेति । लइ गृहाण । वप्पुलेत्यनुकम्पासंबोधने । पिब दुग्धम् । कुतोऽस्माकं छासि-

पदाभिधेयं तक्रम्। पुत्तहुमत्थे इति शपथः, पुत्रस्य मस्तकेनाहं शपे यदि तक्रस्य व्यापकं दधि जन्मन्यपि जातमासीदिति व्यापकानुपलब्धिः प्रयुक्ता॥

ननु प्राकृतादिषूत्तमादिपात्रव्यतिकरदर्शनात्कथमेषा व्यवस्था घटत इत्यत आह—**प्रायिकमिति**। यत्र प्रकृतिनिर्वहणोचितविशेषाभिसंधानेन कविरन्यथा प्रवर्तते। यथा मालत्यां संस्कृतमाश्रित्य 'एषोऽस्मि भोः कार्यवशात्प्रयोगवशाच्च प्राकृतभाषी संवृत्तः' इत्यादि। यत्र वा कवेर्व्युत्पत्तिकृतो भाषाविपर्यासः शक्त्या तिरस्क्रियते। यथा मृच्छकटिके विटस्य मध्यमपात्रस्यापि संस्कृतोक्तिः। यत्र वा प्रबन्धौचितीपरवशाः संस्कृतादिजातयो विपर्यस्यन्ते। यथा सर्गबन्धादौ मध्यमादेरपि संस्कृतमेव, खण्डकथापरकथादौ उत्तमादेरपि प्राकृतमेव, बृहत्कथादौ पैशाचमेव, वस्तुबन्धादावपभ्रंश एवेति, तत्र संधिसंध्यङ्गघटनासौष्ठवेन रसः पुष्यतीति भरतमुनिप्रभृतीनामतिप्रकाश एव पन्थाः॥

**साधारण्यादयः पुनरनन्ताः। तासु मध्यमपात्रभूमिकास्थोत्तमपात्रप्रयोज्या संस्कृतप्राकृतयोः साधारणी यथा—**

**'सरले साहसरागं परिहर रम्भोरु मुञ्च संरम्भम्।**
**विरसं विरहायासं सोढुं तव चित्तमसहं मे॥ ७॥'**

**साधारण्येति**। संस्कृतस्य प्राकृतादिसाधारण्ये पञ्च प्रकाराः, प्राकृतस्य शौरसेन्यादिसाधारण्ये चत्वारः, शौरसेन्याः पैशाच्यादिसाधारण्ये त्रयः, पैशाच्या मागध्यादिसाधारण्ये द्वौ, मागध्या अपभ्रंशसाधारण्ये एक इति। द्विविकल्पे पञ्चदश प्रभेदाः, त्रिविकल्पे विंशतिः, चतुर्विकल्पे पञ्चदश, पञ्चविकल्पे षट्, षड्विकल्पे एकः, इति सर्वमिलने सप्तपञ्चाशत्प्रकारा साधारणी। एवं मिश्रादावपि लोष्टप्रस्तावक्रमेण बहवो भेदा इति तावदुदाहरणे ग्रन्थगौरवं स्यादिति दिङ्मात्रमुदाहरति—**तास्विति**। संभिन्नसंस्कारा भाषाप्रयोगे हि प्रयोक्तृप्रकृतिसंभेदे भवति। न च प्रकृतिसंभेदस्तात्त्विकः स्वभावसंकरप्रसङ्गात्। अत उक्तं मध्यमपात्रभूमिकास्थेति। भूमिका वर्णिका। मध्यमपात्रप्रकृत्युचितो रागाद्यभिनयस्तत्र तिष्ठति तत्परिग्रहेण त्रिचतुर(?)गवत्सामाजिकानां सम्यङ्मिथ्यासंशयसादृश्यप्रतीतिविलक्षणप्रतिपत्तिपदवीमवतरतीति मध्यमपात्रभूमिकास्थम्, उपलक्षणं चेदम्। उत्तमभूमिकास्थमध्यमप्रयोज्यापीयमेव। एवमुत्तरत्र। तव विरहायासं सोढुं मम चित्तमसहमिति योजना॥

नात्युत्तमभूमिकास्थोत्तमपात्रप्रयोज्या संस्कृतपैशाची साधारणी यथा—

'चम्पककलिकाकोमलकान्तिकलापाथ दीपितानङ्गी ।
इच्छति गजपतिगमना चपलायतलोचना लपितुम् ॥ ८ ॥'

एवं संस्कृतापभ्रंशादिसाधारण्यः प्राकृतादिभाषान्तरसाधारण्यश्च द्रष्टव्याः ॥

**नात्युत्तमेति** । अनङ्गस्येयमानङ्गी ॥

वक्तृविषयौचित्यादिप्रयोज्या मिश्रा यथा—

'जयति जनताभिवाञ्छितफलप्रदः कल्पपादपो गिरिशः ।
जअइ अ तमल्लिअन्ती गिरितनया पणइकप्पलआ ॥ ९ ॥'
[जयति च तमालीयमाना गिरितनया प्रणयिकल्पलता ।]

एवं भाषान्तराणामपि मिश्रीभावो द्रष्टव्यः ॥

**वक्तृविषयेति** । यदोत्तमादिषु नानावक्तृभिरेका काव्यसमस्या क्रियते, भिन्नभाषोचितवर्णनीयविषयं वा काव्यमेकमुपक्रम्यते, यदा वा शक्तिनिरूपणाय कवेरेव नानाभाषामयं काव्यमारब्धं स्यात्, तदा कथं नालंकारपदवीमध्यास्ते । अत आह—मिश्रेति । तमल्लिअन्ती तमालीयमाना ॥

दुर्विदग्धादिपात्रप्रयोज्या संकीर्णा यथा—

'अकटगुमटी चन्द्रज्योत्स्ना कलं किल कोइलो
लवइ अ मुहुर्याम्यो वायुर्निवाअर वाइ अ ।
अयि सखि अला रक्ताशोकस्तवापि मनोमुदे
न कज न कजं मानेनाद्य प्रियं प्रतिजाहुदा ॥ १० ॥'

सोऽयं संस्कृतमहाराष्ट्रापभ्रंशयोगस्तिलतण्डुलवत्संकीर्णा जातिः । एवं प्राकृतापभ्रंशसंकरोऽपि द्रष्टव्यः ॥

**दुर्विदग्धादीति** । नागरकभावमवाप्तस्तद्भूमिकामवलम्बमानो दुर्विदग्धः । आदिपदात्पूर्वोक्ताः समस्यादयः । अकटमाश्चर्यम् । गुमटी मनोज्ञा । आस्फालितखड्गस्येव स्फुरणे लवइ इति महाराष्ट्रदेशी । तथा च प्रयोगः—'लवइ अ

विज्ञूमणोहरी' इत्याराध्याः। अन्ये तु लपतीत्यर्थमाहुः। एवं च कलशब्दः पुष्यतीति। याम्यो दक्षिणः। निवाअर निर्वेश्वको वारकशून्यो वा इदावारक इति। अला आगतः। यदिह मानो न क्रियेत ज्योत्स्नादयो मनोमुदमेवाधास्यन्तीति प्ररोचना। यदा तु 'मनोनुदे' इति पाठोऽपिशब्देन नायकसाधारणमुत्कण्ठाकारित्वमुक्तं चन्द्रज्योत्स्नादीनामिति। अतो नकजनकजन्नार्थो नार्थ ईर्ष्यारोषलक्षणेन प्रतिकूलभावावलम्बिना मानेन, तस्मात्प्रियमेव प्रतिजाहुदा यामः; यदामनन्ति स्वयं वा तत्र गमनमिति॥

क्रीडागोष्ठीविनोदाद्यर्थानन्यगामिन्यसाधारणी यथा—

'भीष्मप्रोक्तानि वाक्यानि विद्वद्वक्त्रेषु शेरते।
गोसे तिविञ्छिरिञ्छोली तल्लं तूहे विवल्लिदा॥ ११॥'

अत्र पूर्वार्धपदानि संस्कृत एव, उत्तरार्धपदानि प्राकृत एव। सेयमसाधारण्यनन्यगामिनी च जातिरुच्यते। भाषान्तराणां पुनरसाधारण्यं नास्ति॥

**क्रीडेति**। काव्यसमस्या क्रीडा, उक्तपूर्वा गोष्ठी, तत्र विनोदो मनोनुकूलेन समयातिवाहनम्। आदिपदं पूर्ववत्। ननु मा भूत्प्रकृतिभावेन भाषान्तरसंभेदः संस्कारसंपाते तु भविष्यति, तथा च कथं साधारणीतो भिद्यत इत्यत आह— असाधारणी चेति। गोसे प्रभाते, तविञ्छिरिञ्छोली कमलरजःपङ्क्तिः। तल्लमल्पसरः। तूहं तीर्थम्। विवल्लिदा प्रसारिता। नात्र पूर्वोत्तरार्धयोरैकमत्यमुदाहरणत्वात्। आराध्यास्तु यथा सरस्तीरे कमलरजःपङ्क्तिः प्रसृता शोभते तथा विद्वद्वक्त्रेषु भीष्मवाक्यानीत्युपमाकल्पनया कथंचिदेकवाक्यतामाहुः। अत्र पूर्वार्धपदानीति। न भीष्मादयोऽनभिधानादिति भाषान्तरस्थानिभावस्य प्रतिषेधात्। एवं वाचस्पतिविशिष्टरसवशप्रचेतसपोतादयो द्रष्टव्याः। प्राकृत एवेति। महाराष्ट्रदेशीयत्वाद्देशीपदानां च स्थानिभावासंभवात्। भाषान्तराणां पुनरिति। सिद्धिर्महाराष्ट्रीतः, सिद्धिः शौरसेनीतः, इत्युपक्रम्यानुशासनात्तद्भवरूपतैव स्फुटा। तत्समानां तु साधारण्यमेवेति॥

अपभ्रष्टा यथा—

'मुद्धे गहणअं गेण्हउ तं धरि मुद्दं णिए हत्थे।
णिच्छउ सुन्दरि तुह उवरि मम सुरअप्पहा अत्थि॥१२॥'

[मुग्धे ग्रहणकं गृहाण त्वं धारय मुद्रां निजे हस्ते ।
निश्चयः सुन्दरि तवोपरि मम सुरतस्पृहास्ति ॥]

सेयमपशब्दप्रयोगतोऽपभ्रष्टाप्यविद्वद्भिः श्रोत्रियाद्यैः प्रयुज्यत इत्यपभ्रष्टा जातिः । अस्या अपि चानुकरणे साधुत्वमिष्यते ॥

**अपभ्रष्टेति** । अत्र तवोपरि सुरतस्पृहास्तीत्यादिकापशब्दबहुलत्वेनापभ्रष्टा स्पष्टैव । सा तु कथमलंकार इत्यत आह—सेयमिति । श्रोत्रियश्छान्दसः । आद्यपदेन बालादयः । सर्व एव हि लौकिकः पदार्थोऽभिनयकक्षामधिरूढः परित्यज्य ग्राम्यमभिमुखीभूतो विभावादिषु कथं नालंकारस्तदिदमुक्तं प्रयोगत इति । न चापशब्दानां दोषत्वमेवेति वाच्यम् । अनुकरणे तु सर्वेषामिति दोषसामान्यावलम्बिना गुणीभावेनास्य विषयीकृतत्वादिति ॥

नानावच्छिन्नजातिः काव्यशरीरे निविशत इति तदवच्छेदरूपां गतिमनन्तरं लक्षयति—

**पद्यं गद्यं च मिश्रं च काव्यं यत्सा गतिः स्मृता ।**
**अर्थौचित्यादिभिः सापि वागलंकार इष्यते ॥ १८ ॥**

**पद्यमिति** । पठितेः पदात्पदान्तरसंचारो गतिः । सा केनचिदौचित्योपनिपातिना संदर्भपरिमाणेन नियम्यते । ततस्तदप्युपचारेण गतिः । पठितिपरिमाणं च काव्यं समाश्रयत इति तदपि गतिस्तच्च पद्यादिभेदेन त्रिविधमिति संक्षेपः । अत एव गद्यबन्धे तु कैश्चिद्वृत्तमाश्रितं वृत्तं वर्तनमियत्तेति यावदिति । सर्वनामशब्दा हि कदाचिदुद्देश्यस्य लिङ्गमाश्रयन्ते कदाचित्प्रतिनिर्देश्यस्येति काव्ये यत्सा गतिरित्युक्तम् । तत्र पद्यं चतुष्पदीति न लक्षणमुल्लालमात्रादौ द्विपदपञ्चपदादिशरीरे तदभावात् । अपादः पदसंतानो गद्यमित्यपि न । अपादत्वं ह्यप्रत्यभिज्ञायमानवृत्तभागत्वं, विवक्षातश्चतुष्पदीव्यतिरिक्तत्वं वा । आद्ये वृत्तिगन्धिपद्यं न स्यात् । द्वितीये त्वतिप्रसङ्गः । तस्माच्छन्दोनियमवती काव्यम्, अतथाभूता तु गद्यमिति विभागः । गद्यपद्यात्मकं काव्यं मिश्रम् । तदस्या गतेरलंकारत्वमुपपादयति—अर्थौचित्यादिभिरिति ॥

तत्रार्थौचितीमाह—

**कश्चिद्गद्येन पद्येन कश्चिन्मिश्रेण शक्यते ।**
**कवितुं कश्चन द्वाभ्यां काव्येऽर्थः कश्चन त्रिभिः ॥१९॥**

---

१. रतमूल्यम्.

**कश्चिद्गद्येनेति**। यथा ह्यटवीवर्णनादौ गद्यं प्रगल्भते तथा न पद्यम्, यथा च काव्यशास्त्रलतानिर्वहणोचितेऽर्थे पद्यमुत्सहते न तथा गद्यमित्यादि। एवं कथाख्यायिकादौ गद्यमेव, चम्पूप्रभृतौ मिश्रमेवेत्यादिपदोपात्तबन्धौचिती द्रष्टव्या॥

आस्तां तावदर्थाद्यौचित्यगवेषणं स्वरूपेणैव पद्यादिकं परिस्फुरत्कविप्रतिभाविशेषावेदनेन सहृदयावर्जकमवसीयते। कथमन्यथा क्वचिदेव कस्यचित्सौष्ठवमित्याह—

**यादृग्गद्यविधौ बाणः पद्यबन्धेऽपि तादृशः।**
**गत्यां गत्यामियं देवी विचित्रा हि सरस्वती॥ २०॥**

**यादृगिति**। गत्यां गत्यामिति। पद्ये गद्ये मिश्रे चेत्यर्थः। विचित्रा अव्यवस्थितसिद्धिका॥

प्रयोगव्यवस्थामुपपादयति—

**यथामति यथाशक्ति यथौचित्यं यथारुचि।**
**कवेः पात्रस्य चैतस्याः प्रयोग उपपद्यते॥ २१॥**

**यथामतीति**। मतिर्व्युत्पत्तिः। युक्तायुक्तविवेक इति यावत्। शक्तिः कवित्वबीजभूतः प्राक्तनः संस्कारः। औचित्यं दर्शितमेव। रुचिर्मनोनुकूलताप्रतिसंधानम्। कवेः पात्रस्येति यथायोगम्। तथा हि शक्तिव्युत्पत्ती कवेरेव। औचित्यं पात्रस्यैव। रुचिरुभयोरपीति॥

स चायं संदर्भावच्छेदो गुरुलघुसंनिवेशेनैव शोभत इति तमाश्रित्य विभागमाह—

**द्रुता विलम्बिता मध्या साथ द्रुतविलम्बिता।**
**द्रुतमध्या च विज्ञेया तथा मध्यविलम्बिता॥ २२॥**

**द्रुतेति**। आद्यास्तिस्रः शुद्धाः। आसामेव मिथोव्यतिकरेणोत्तरास्तिस्रः संकीर्णाः॥ कथमेषां व्यवस्थेत्यत आह—

**सा लघूनां गुरूणां च बाहुल्याल्पत्वमिश्रणैः।**
**पद्ये गद्ये च मिश्रे च षट्प्रकारोपजायते॥ २३॥**

**सा लघूनामिति**। बाहुल्यमल्पत्वं मिश्रणं च तुल्यवत्प्रतिभानम्। न गद्यादिकमेव गतिः किंतु तदाधारः पठितिसंचार इति व्यनक्ति—पद्ये गद्ये च मिश्रे चेति॥

**तत्र वृत्तं च जातिं च पद्यमाहुरथो पृथक्।**
**समं चार्धसमं चैतद्विषमं च प्रचक्षते॥ २४॥**

**तत्रेति** । वर्णनियतं छन्दोवृत्तम् । मात्रानियतं जातिः । समप्रस्तावं समम् । प्रथमतृतीययोर्द्वितीयचतुर्थयोश्च तुल्यप्रस्तावमर्धसमम् । उभयबहिर्धं विषमम् ॥

**गद्यमुत्कलिकाप्रायं पद्यगन्धीति च द्विधा ।**
**द्विधैव गद्यपद्यादिभेदान्मिश्रमपीष्यते ॥ २५ ॥**

**गद्यमिति** । उत्कलिका कल्लोलस्तत्प्रायम् । उच्चावचमिव प्रतिभासमानमित्यर्थः । यथा—'सलीलकरकमलतालिकातरलवलयावलीकम्' इति । वृत्तगन्धि प्रतिभातवृत्तैकदेशम् । तदेतदल्पाख्यायामुत्पन्नेन समासान्तेन व्यञ्जितम् । तदयमर्थः—सामान्यतः पद्यादिभेदेन गतिस्त्रिधा । तत्रापि जात्यादिभेदेन षट्प्रकाराः । तेऽपि द्रुतादिभेदेन षट्त्रिंशदिति ॥

नन्तु ललितादयो गद्यभेदाः कैश्चिदलंकारकारैः परिसंख्यातास्ते कस्मान्नोच्यन्त इत्यत आह—

**ललितं निष्ठुरं चूर्णमाविद्धं चेति योऽपरः ।**
**विशेषः स तु गद्यस्य रीतिवृत्त्योर्भविष्यति ॥ २६ ॥**

**ललितमिति** । सुकुमारसंदर्भं ललितम् । यथा—'कमलिनीवनसंचरणव्यतिकरलग्ननलिननालकण्टके वने क्वचिन्निर्भरं पदमादधाति' इति । प्रस्फुटसंदर्भं निष्ठुरम् । यथा—'उत्तम्भितकुटिलकुन्तलकलापः श्मशानवाटमवतरति' इति । अनुल्लिखितसमासं चूर्णम् । यथा—'अभ्यासो हि कर्मणः कौशलमादधाति । न खलु संनिपातमात्रेणोदबिन्दुरपि ग्रावणि निम्नतामादधाति' इति । उद्भटसमासमाविद्धम् । यथा—'कुलिशशिखरखरतरखरप्रचयप्रचण्डचपेटपाटितमत्तमातङ्गमदच्छटाच्छुरितचारुकेसरभारभासुरमुखे केसरिणि' इति । रीतिवृत्त्योरिति विषयसप्तमी । तथा ललितं कैशिक्यादौ, निष्ठुरमारभट्यादौ, चूर्णं वैदर्भ्यादौ, आविद्धं गौडीयाप्रभृतौ, यथायथमन्तर्भवतीति नोक्तभेदाः परिसंख्याता इत्यर्थः ॥

उक्तप्रकारेषु किंचिदुदाहरति—

'तत्र पद्यभेदेषु समवृत्ते द्रुता गतिर्यथा—

'अयि विजहीहि दृढोपगूहनं त्यज नवसंगमभीरु वल्लभम् ।
अरुणकरोद्गम एष वर्तते वरतनु संप्रवदन्ति कुक्कुटाः ॥ १३ ॥'

सेयं समवृत्ते लघुसंयुक्ताक्षरभूयस्त्वाद्द्रुता गतिः ॥

**तत्रेति** । नवसंगमभीरिति संबोधनम् । भीरुशब्दादूङ्, तस्मात्संबोधनह्रस्वे

रूपम्। गर्भगृहस्था नालोकयति चेत्तदाह—संप्रवदन्तीति। अत्र प्रतिपादमष्टौ लघवश्चत्वारो गुरव इति लघुबाहुल्ये संयोगाक्षराणामुद्रेके च ताललयवदतिव्यक्त एव द्रुतभावः॥

समवृत्ते विलम्बिता यथा—

'प्रणम्य हेतुमीश्वरं मुनिं कणादमन्वतः।
पदार्थधर्मसंग्रहः प्रवक्ष्यते महोदयः॥ १४॥'

सेयं स्थाने स्थाने गुर्वक्षरयोगाद्विलम्बिता गतिः।

**प्रणम्येति**। अत्र यद्यपि पदचतुष्टये गुरुलघूनां समसंख्यत्वमेव, तथापि संयोगाक्षरैरन्तरान्तरा पठितिदीर्घाभावोन्मेषादारोहप्राधान्ये विलम्बिता। एवं व्युत्क्रमेण समानिकायामपि विलम्बितैव। यथा—'मीनजालघटितानि सूर्यरश्मिबोधितानि। मत्तषट्पदाकुलानि पश्य भीरु पङ्कजानि॥' इति।

तदिदमाह—**सेयमिति**। तेन विभागसूत्रे गुरुलघुमिश्रणमेवंरूपमपि बोद्धव्यमिति॥

तत्रैव मध्या यथा—

'आसीद्दैत्यो हयग्रीवः सुहृद्वेश्मसु यस्य ताः।
वदन्ति स्म बलं बाह्वोः सितच्छत्रसिताः श्रियः॥ १५॥'

सेयं नातिलघ्वक्षरत्वान्मध्या गतिः॥

**आसीदिति**। अत्र यद्यपि गुरवो बहवस्तथापि न द्रुतिर्न विलम्बनं पठितेरित्यनुभवसाक्षिकोऽयमर्थस्तदेतदाह—**नातिलघ्वक्षरेति**॥

द्रुतविलम्बिता यथा—

'अवतु वः सवितुस्तुरगावली स्फुरितमध्यगतारुणनायका।
समविलङ्घिततुङ्गपयोधरा मरकतैकलतेव नभःश्रियः॥ १६॥'

सेयं द्रुताया विलम्बितायाश्च गतेरन्तरानुप्रवेशाद्द्रुतविलम्बिता गतिः।

**अवतु व इति**। अरुणो गरुडाग्रजः शोणश्च। नायको नेता हारमध्यमणिश्च।

---

१. 'गृहस्थो नालो' इति पाठः. २. 'प्रचक्षते' क. ३. 'लघ्वक्षरप्रायत्वा' क. ४. 'समभिल' ख.

पयोधरा मेघाः स्तनौ च । तदेतस्मिन् द्रुतविलम्बिताख्ये वृत्ते समाख्यैव रूपं बोधयतीति ॥

द्रुतमध्या यथा—

'अपि तुरगसमीपादुत्पतन्तं मयूरं
न स रुचिरकलापं बाणलक्ष्यीचकार ।
सपदि गतमनस्कश्चित्रमाल्यानुकीर्णे
रतिविगलितबन्धे केशपाशे प्रियायाः ॥ १७ ॥'

सेयं द्रुताया मध्यायाश्च गतेरन्तरानुप्रवेशाद्द्रुतमध्या गतिः ॥

**अपि तुरगेति** । उत्पन्नाविर्भवद्बर्हगतोज्ज्वलविचित्रकोमलमयूरस्तत्कालमध्याजप्रेमनिर्यन्त्रणकण्ठग्रहविलुलितप्रियाकेशपाशवासनाविकासहेतुः सर्वस्वायमानः कथं बाणलक्ष्यतां सहत इति च्विप्रत्ययेन व्यज्यत इति । अत्र पादचतुष्केऽपि प्रथमं द्रुता पश्चान्मध्या च भागशः प्रत्यभिज्ञायत इत्याह—**सेयमिति** ॥

मध्यविलम्बिता यथा—

'दुन्दुभयो दिवि दध्वनुरुच्चैरुच्चकराः कपयश्च ववल्गुः ।
सिद्धनिकायकराङ्कविमुक्तं माल्यमथाङ्गदमूर्ध्नि पपात ॥ १८ ॥'

सेयं मध्याया विलम्बितायाश्च गतेरन्तरानुप्रवेशान्मध्यविलम्बिता गतिः ॥

**दुन्दुभय इति** । अत्रापि प्रतिपादं पूर्वं मध्या ततो विलम्बिता च खण्डशः प्रतिभासत इति दर्शयति—**सेयमिति** ।

एवमर्धसमविषमयोर्मात्राच्छन्दःसु गद्यमिश्रयोर्लघुगुरून्मिश्रवर्णविन्यासविशेषभूयस्त्वेन द्रुतादिगतयो गवेषणीयाः ॥

**एवमिति** ।

इमामेव व्यवस्थामर्धमध्यमादिष्वप्यतिदिश्यत इति दिङ्मात्रमुदाहरति—

तत्र विषमवृत्तच्छन्दसि द्रुता यथा—

'अथ वासवस्य वचनेन रुचिरवदनस्त्रिलोचनम् ।
क्लान्तिरहितमभिराधयितुं विधिवत्तपांसि विदधे धनंजयः ॥ १९ ॥'

अर्धसमच्छन्दसि विलम्बिता यथा—

'विहितां प्रियया मनःप्रियामथ निश्चित्य गिरं गरीयसीम् ।
उपपत्तिमदूर्जिताश्रयं नृपमूचे वचनं वृकोदरः ॥ २० ॥'

उत्कलिकाप्रायगद्ये द्रुता मध्या च यथा—

'व्यपगतघनपटलममलजलनिधिसदृशमम्बरतलं विलोक्यते ।
अञ्जनचूर्णपुञ्जश्यामं शार्वरं तमः स्त्यायते ॥ २१ ॥'

**उत्कलिकाप्रायेति** । उच्चावचभावेन प्रतिभासमानमुत्कलिका । यथा— 'सलीलकरकमलतालिकातरलयावल्लीकम्' इति । तथैव तदपि प्रकृतोदाहरणमिति व्यक्तम् । 'पाताल–' इत्यादौ वसन्ततिलकाभाग इव, 'हर इव' इत्यादावार्याभाग इव प्रतिभातीति ॥

पद्यगन्धिगद्ये वृत्तगन्धौ मध्या, जातिगन्धौ द्रुता यथा—

'पातालतालुतलवासिषु दानवेषु ।'

'हर इव जितमन्मथो गुह इवाप्रतिहतशक्तिः ॥ २२ ॥' इति ।

**वृत्तगन्धौ मध्या, जातिगन्धाविति** । 'तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य' ( ७।१।७४ ) इति पुंवद्भावेन नुम्न भवति ॥

गद्यादौ मिश्रे गद्यपद्ययोर्द्रुतमध्या यथा—

'हन्त, पुण्यवानसि, यदहमतर्कितोपनतदर्शनोल्लसितनयनयानया—
अविरलमिव दाम्ना पौण्डरीकेण नद्धः
स्नपित इव च दुग्धस्रोतसां निर्झरेण ।
कवलित इव कृत्स्नश्चक्षुषा स्फारितेन
प्रसभममृतवर्षेणैव सान्द्रेण सिक्तः ॥ २३ ॥'

**हन्तेति** । आश्चर्यस्तिमितस्य हन्तेत्येव वागनुभावस्ततोऽभिमानोन्मेषे पुण्यवानसीति अनन्तरं लोकोत्तरविभाववर्णनात्त्वरितस्य यदहमित्यागद्यपर्यवसान एवाविरलमित्यादिवृत्तमाविरासीदिति । मध्ये विच्छेदकारणमनुपपत्तौ गद्यपद्याभ्यामेकवाक्यम् ॥

पद्यादौ मिश्रे द्रुतविलम्बिता यथा—

'असौ विद्याधारः शिशुरपि विनिर्गत्य भवना-
दिहायातः संप्रत्यविकलशरच्चन्द्रमधुरः ।
यदालोकस्थाने भवति पुरमुन्मादतरलैः
कटाक्षैर्नारीणां कुवलयितवातायनमिव ॥ २४ ॥'

अत्र बालसुहृदा मकरन्देन सह विद्यामान्वीक्षिकीमधीते स एष माधवो नाम इति ॥

**असाविति** । दूतीकल्पे कयाचित्प्रच्छन्नप्रार्थनीयया 'आसंभोगमुन्नयेत्' इत्याम्नातम् । तदिहोत्प्रेक्षामनोहरमाम्यमालोकनमुक्तम् । तेनैकस्मिन्वर्णनीय-वस्तुनि वृत्तप्रपञ्चेनोक्ते प्रकृतसंगतिमात्रं गद्येन कृतवतीति युक्तेयमानुपूर्वी वाक्यै-कवाक्यता चेति ॥

**वैदर्भादिकृतः पन्था: काव्ये मार्ग इति स्मृतः ।**
***रीङ् गताविति* धातोः सा व्युत्पत्त्या रीतिरुच्यते ॥२७॥**

**वैदर्भादीति** । गुणवत्पदरचना रीतिः । गुणाः श्लेषादयः काव्याव्यभिचारिणो नव । तेषामन्योन्यमीलनक्षमतया पानकरस इव, गुडमरिचादीनां खाडव इव मधुराम्लादीनां यत्संमूर्च्छनरूपावस्थान्तरगमनं तत्संस्कारादेव हि लोकशास्त्रप-दरचनातः काव्यरूपा च रचना व्यावर्तते । अत एव मृग्यते कविभिरासंसारमिति मार्गपदेनोच्यते । वैदर्भादयो विदर्भादिदेशप्रभवास्तैः कृतमुखहेवाकगोचरतया प्रकटिता न तु तत्तद्देशैः काव्यस्य किंचिदुपक्रियते ॥ **पन्था इति** । प्रतिष्ठन्ते हि महाकविपदवीलाभार्थिन इति । ईदृशमेव रीतिलक्षणमानन्दवर्धनादीनामपि मतम् । एतदुपलक्षणतया सूत्रं व्याख्यातम् । कथं पुनरुक्तमुपमादे रीतिपदं प्रवृत्तमित्यत आह—**रीङ् गताविति** । रियन्ते परम्परया गच्छन्त्यनयेति करणसाधनोऽयं रीतिशब्दो मार्गपर्याय इत्यर्थः ॥

*एवं सिद्धे सामान्यलक्षणे विभागमाह—*

**वैदर्भी साथ पाञ्चाली गौडीयावन्तिका तथा ।**
**लाटीया मागधी चेति षोढा रीतिर्निगद्यते ॥ २८ ॥**

**वैदर्भीति ।**

वक्ष्यमाणरीत्या वैदर्भीप्राधान्यमभिप्रेत्याह—

**तत्रासमासा निःशेषश्लेषादिगुणगुम्फिता ।**
**विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यते ॥ २९ ॥**

**तत्रेति** । असमासा अनुल्लिखितसमासा । **निःशेषश्लेषादीति** । श्लेषादयो नव गुणास्तैर्गुम्फिता । मिथोमिलनेन संमूर्च्छितैरनुपलभ्यमानान्यतममात्रकैरपि परस्परविभक्तस्वरूपभावेन सहृदयहृदयसंवादगोचरैरारब्धा । एवं विपञ्चीस्वरसौभाग्या । विपञ्ची वाग्रूपा सरस्वती बिम्बप्रतिबिम्बभावेन द्विविधा । प्रतिबिम्बाधिष्ठानतया दार्वादियन्त्रमपि विपञ्चीत्युच्यते । तदीयाः स्वरास्तन्त्रीकण्ठोत्थिताः स्थानक्रमवैपरीत्यानुमेयशारीराः प्रतिबिम्बभावाः षड्जादयस्तेषु श्रुतसंमूर्च्छनरूपेष्वपि मिथोविभक्ताः श्रुतयः श्रोत्ररञ्जकस्वरावस्थामापन्नाः समस्तगान्धर्ववित्साक्षिकाः प्रकाशन्ते । अत एव वीणैव प्रधानं समस्तस्य स्वरजातस्य तत्रैव श्रुतिमण्डलोन्मेषादिति ॥

यदा तु पानकादिन्यायेन कश्चिदंश उदितो भवति तदा रीत्यन्तरमुत्तिष्ठतीत्याह—

**समस्तपञ्चषपदामोजःकान्तिविवर्जिताम् ।**
**मधुरां सुकुमारां च पाञ्चालीं कवयो विदुः ॥ ३० ॥**

**समस्तेति** । ओजःकान्तिविवर्जिताम् ओजःकान्त्योर्विशेषेण वर्जिताम् । न्यग्भूतौजःकान्तिगुणामिति यावत् । यतस्तत्प्रतिद्वन्द्विनोर्माधुर्यसौकुमार्ययोस्तत्रोद्भवस्तदेतदाह—**मधुरां सुकुमारां चेति** । अत एवौजःप्रकाशकः षडभिकेषु पदेषु समासो न क्रियते ॥

**समस्तात्युद्भटपदामोजःकान्तिगुणान्विताम् ।**
**गौडीयेति विजानन्ति रीतिं रीतिविचक्षणाः ॥ ३१ ॥**

**समस्तेति** । अत्युद्भटानि सोल्लेखसमासानि यस्मादोजःकान्त्योरुद्भवे न्यग्भूतगुणसप्तकेयं रीतिः ॥

**अन्तराले तु पाञ्चालीवैदर्भ्योर्यावतिष्ठते ।**
**सावन्तिका समस्तैः स्याद्द्वित्रैस्त्रिचतुरैः पदैः ॥ ३२ ॥**

**अन्तराल इति** । माधुर्यसौकुमार्ययोः किंचिदुद्भवेन निमीलनाङ्गप्राधान्येन वान्तरालकल्पना तां व्यनक्ति— **द्वित्रैरिति** । द्वे त्रीणि वा त्रीणि चत्वारि वेति वार्थे बहुव्रीहिः ॥

समस्तरीतिव्यामिश्रा लाटीया रीतिरुच्यते ।
पूर्वरीतेरनिर्वाहे खण्डरीतिस्तु मागधी ॥ २३ ॥

समस्तेति । यद्यप्युपक्रान्तरीत्यनिर्वाहोऽत्राप्यस्ति तथापि तिलतण्डुलवद्याविद्भक्तरीतिसंवलनस्य कविसंरम्भगोचरस्योत्तररीतेः पृथग्भावः । पूर्वरीतेरिति । एकां रीतिमुपक्रम्य यदन्यया संदर्भनिर्वहणमसावन्य एव प्रकारः । न चानिर्वाहो दोषश्छायावैरूप्याभावात् । रीतिखण्डनेऽपि हि संदर्भसौभाग्यसंपत्तिः शक्तिमेवाविष्करोति ॥

तासु वैदर्भी यथा—

'मनीषिताः सन्ति गृहेषु देवतास्तपः क वत्से क च तावकं वपुः ।
पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः ॥ २५ ॥'

सेयमसमस्तपदा[1] समग्रश्लेषादिगुणवती वैदर्भी रीतिः ॥

मनीषिता इति । अत्र दीर्घसमासाभावे कथमोज इति कस्यचित्कुदेश्यमपरीतिमत्प्रकरण एवेत्यपास्तम् । एतेन गुणनवकस्य समकक्षतया संभेदः क्षुण इति । असमस्तपदेत्यनुल्लेखसमासपदेत्यर्थः । समग्रा नव । गुणवतीति नित्ययोगे मतुप् ॥

पाञ्चाली यथा—

'गात्राविघातदलिताङ्गदजर्जराणां
गण्डस्थलीलुलितकुण्डलताडितानाम् ।
क्षोभस्फुटन्मुकुटकोटिविघट्टितानां
नादोऽभवज्झणझणामुखरो मणीनाम् ॥ २६ ॥'

सेयमोजःकान्त्यभावादाश्लिष्टश्लथपुराणच्छायामाधुर्यसौकुमार्यवती[2] समस्तपञ्चषपदा पाञ्चाली रीतिः ॥

गात्राविघातेति । अत्राद्यतृतीययोः षड् द्वितीये च पञ्च पदानि समस्तानि । ओजःकान्त्यभावादिति । ईषदर्थे नञ् । अत एव माधुर्यसौकुमार्ययोरुन्मेषः । श्लिष्टा प्राप्ता यथासंख्यमोजःकान्तिनिमीलनलब्धप्रादुर्भावा श्लथा पुराणी च च्छाया ययेति विग्रहः ॥

---

१. 'समस्त' ख. २. 'श्लथभाव' ख.

गौडीया यथा—

'यस्यावस्कन्दलीलावलितबलपरिस्पन्दखर्वीकृतोर्वी-
संरम्भोत्तम्भनायोन्नमितभरनमत्कन्धरासंधिरासीत् ।
शेषो विस्फारफुल्लस्फुटपृथुलफणाफूत्कृताग्निस्फुलिङ्ग-
स्फूर्जत्संदोहसंदेहितविकटशिखामण्डलीरत्नखण्डः ॥२७॥'

सेयमोजःकान्तिमती समस्तोद्भटभूरिपदा च गौडीया रीतिः ॥

**यस्येति**। अवस्कन्दो धाटकः ॥ **समस्तोद्भटभूरिपदेति** । उद्भटता प्रौढिप्रकर्षः ॥

आवन्तिका यथा—

'एतानि निःसहतनोरसमञ्जसानि
शून्यं मनः पिशुनयन्ति पदानि तस्याः ।
एते च मार्गतरवः[1] प्रथयन्ति ताप-
मालम्बितोज्झितपरिग्लपितैः[2] प्रवालैः ॥ २८ ॥'

सेयं समस्तद्वित्रिचतुरपदा वैदर्भीपाञ्चाल्योरन्तरालवर्तिन्यावन्तिका नाम रीतिः ॥

**एतानीति**। 'निःसहतनोरसमञ्जसानि' 'मार्गतरवः' इति द्वे द्वे पदे, 'आलम्बित-' इत्यादौ त्रीणि पदानि समस्तानि । माधुर्यसौकुमार्ययोर्मनागुन्मेषः पाञ्चालीभागः । इतरेषां समकक्षता वैदर्भीभागः । अनयोः संभेदेनान्तरालकल्पना व्यक्तैव ॥

लाटीया यथा—

'अयमुदयति मुद्राभञ्जनः पद्मिनीना-
मुदयगिरिवनालीबालमन्दारपुष्पम् ।
विरहविधुरकोकद्वन्द्वबन्धुर्विभिन्द-
न्कुपितकपिकपोलक्रोडताम्रस्तमांसि ॥ २९ ॥'

---

१. 'वर्त्मतरवः' ख. 'तीरतरवः' क. २. 'मालिङ्गितो' ख.

सेयं समस्तरीतिमिश्रा लाटीया नाम रीतिः ॥

**अयमिति** । मुद्राभञ्जन इति द्वाभ्यां समस्ताभ्यामावन्ती । उदयगिरीत्यादिना पञ्चकेन पाञ्चाली । प्रौढिप्रकर्षेण गौडीया । अयमुदयतीत्याद्यसमासेन वैदर्भी च प्रत्यभिज्ञायत इति पूर्वोक्तसमस्तरीतिसंभेद इति ॥

मागधी यथा—

'करिकवलनशिष्टैः शाकशाखाग्रपत्रै-

रुरुणसरणयोऽमी सर्वतो भीषयन्ते ।

चलितशबरसेनादत्तगोशृङ्गचण्ड-

ध्वनिचकितवराहव्याकुला विन्ध्यपादाः ॥ ३० ॥'

सेयमारब्धरीतेरनिर्वाहात्खण्डरीतिर्मागधी ।

**करिकवलनेति** । अत्र पूर्वार्धे यथोक्तामावन्तीमुपक्रम्य चरमार्धे गौडीयापरिग्रहादुपक्रान्तरीतेरनिर्वाहः खण्डनम्, तथापि च न च्छायावैरूप्यमिति कविशक्तिव्यञ्जकत्वादलंकारभाव इति । शाको वृक्षविशेषः ॥

**या विकासेऽथ विक्षेपे संकोचे विस्तरे तथा ।**

**चेतसो वर्तयित्री स्यात्सा वृत्तिः सापि षड्विधा ॥ ३४ ॥**

**या विकास इति** । वृत्तिर्वर्तनं रसविषयो व्यापारः काव्यस्य रसप्रवणत्वात् । स च व्यापारः सत्त्वाद्युद्रेकलक्षणो जन्मान्तरानुभवभावितवासनासमुत्थः परिपूर्णीभविष्यद्रसास्वादसर्वस्वायमानचित्तावस्थानिदानभूतोऽर्थगतः पञ्चमेऽभिधास्यते । शब्दगतः पुनरत्र संगतः संदर्भस्य रसप्रकाशकारणेषु प्रधानत्वात् । यदाह—

'कविवागभिनेयश्च तदुपायो द्विधेष्यते ।

वस्तुशक्तिमहिम्ना तु प्रथमोऽत्र विशिष्यते ॥'

वर्ततेऽनया चित्तमिति करणसाधनोऽयं वृत्तिशब्द इति वर्तयित्रीत्यनेन प्रयोजकव्यापारप्रधानेन दर्शितम् । तत्र विषयवैचित्र्याद्विकासाद्याश्चतस्रश्चित्तावस्थाः । विषयो हि दीप्तमसृणमध्यमभेदेन त्रिविधः । विभावाद्युपधानमहिम्ना तन्मयीभवनयोग्यं हि चेतः कदाचिद्विकसति । सत्त्वाविर्भावो विकासः । न्यग्भूतरजस्तमोगुणं हि चेतः सत्त्वोद्रेकप्रकाशानन्दमयसंविद्विश्रान्तिमासादयति । ततः सत्त्वभागप्रतिष्ठितः

---

१. 'शाखि' ख.

शृङ्गारस्तदाभासोऽपि तामेव भूमिकामालम्बते । अत एव शुक्तिरजतवद्भावोदयेऽपि दोषमहिम्नैव काव्यमहिम्ना तद्व्यञ्जनात् । तत्समानभूमिकया हास्यो रसः प्रादुर्भवतीत्यभिसंधायाह—'शृङ्गाराद्धि भवेद्धास्यम्' इति भरतमुनिः । तेन विकासभूमिकौ शृङ्गारहास्यौ । विकासात्प्रच्युतमप्राप्तगुणान्तरप्रादुर्भावं विक्षिप्तं चित्तमुच्यते । तत्रोचितविभावादिवैचित्र्यादाविर्भवद्रजोगुणस्य चेतसो विक्षेपप्रच्युतिदशायां रौद्ररसोन्मेषः । अत एव समानभूमिकया 'रौद्राच्च करुणो रसः' इत्याह । यदा तु सत्त्वतमोनिमीलनेन केवलरजःप्रतिष्ठं चेतस्तदा बहुसुखव्यापारोन्मेषाद्विस्तराख्यामवस्थामासादयति । तद्भूमिको वीररसस्तदवस्थामेवास्थायाद्भुतोऽपि प्रथत इति 'वीराच्चैवाद्भुतोत्पत्तिः' इत्युक्तम् । न्यग्भूतरजोगुणस्य प्रबुद्धतमसश्चेतसोऽवस्थाविशेषः ससंकोचस्तमालम्ब्य बीभत्सः प्रादुरास्ते तदेकभूमिकश्च भयानक इति 'बीभत्साच्च भयानकः' इत्याह ॥

तेऽमी चत्वारश्चित्तावस्थाविशेषाः कथमविशेषणादेव संदर्भाद्भवन्तीत्याशङ्क्य विभागेनोत्तरमाह—

**कैशिक्यारभटी चैव भारती सात्वती परा ।**
**मध्यमारभटी चैव तथा मध्यमकैशिकी ॥ ३५ ॥**

**कैशिक्येति** । शुद्धिसंकराभ्यां रीतिवदत्रापि षट् प्रकाराः ॥

**सुकुमारार्थसंदर्भा कैशिकी तासु कथ्यते ।**
**या तु प्रौढार्थसंदर्भा वृत्तिरारभटीति सा ॥ ३६ ॥**
**कोमलप्रौढसंदर्भा कोमलार्थाथ भारती ।**
**प्रौढार्था कोमलप्रौढसंदर्भां सात्वतीं विदुः ॥ ३७ ॥**
**कोमले प्रौढसंदर्भा त्वर्थे मध्यमकैशिकी ।**
**प्रौढार्था कोमले बन्धे मध्यमारभटीष्यते ॥ ३८ ॥**

**सुकुमारेति** । चित्तद्रुतिकारित्वं सौकुमार्यं सुकुमारावर्थसंदर्भौ यस्यामिति विग्रहः । एवं प्रौढार्थसंदर्भेत्यपि । चित्तदीप्तिविधायिता प्रौढिः । अर्थसौकुमार्यादिना विशेष्यमाणसंदर्भः सुकुमारत्वादिः शब्दालंकारतां प्रयोजयति । कोमलप्रौढो मध्यमः । प्रकारान्तरविरहाच्च मध्यमभारत्यादयो न संभवन्ति ॥

---

१. 'सात्वती भारती तथा' क.

तत्र कैशिकी यथा—

'शशिरुचिषु दलेषु नागवल्ल्या विचकिलदामनि चन्दने च हृद्ये ।
कुवलयिनि पुराणसीधुपात्रे तरलदृशामपतन्दृशः प्रिये च ॥ २१ ॥'

सेयमर्थस्य च संदर्भस्य च सौकुमार्यात्कैशिकी नाम वृत्तिः ॥

**शशिरुचिष्विति** । नियमितादिषु मुग्धाङ्गनाचुम्बनरसोत्सुकानामतिमनोज्ञाधररागसमर्पकेषु नागलतादलेषु, ततो मानपरिग्रहे वलितकादिचुम्बनविशेषार्थिनीनां कचग्रहसौभाग्यसुन्दरे मल्लिकादाम्नि, ततः सर्वाङ्गीणाश्लेषसौभाग्यार्थकचन्दनरसेऽनन्तरमीर्ष्यारोपवासनानिःशेषकेलियन्त्रणरतोत्कण्ठितानां सीधुपात्रे, ततः सर्वोपकरणजीवितसर्वस्वे प्रियतमे समकक्षतयैव दृश्यः पेतुरिति । 'कुवलयिनि' इति युक्तः पाठः । 'कुवलयित–' इति पाठे विशेषणाङ्गप्राधान्यविवक्षायां समासे गुणीभावस्यानुचितत्वात् । सेयं कैशिकी मसृणे शृङ्गारादौ विनियुज्यत इति ॥

आरभटी यथा—

'यो यः शस्त्रं बिभर्ति स्वभुजगुरुमदः पाण्डवीनां चमूनां
यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा ।
यो यस्तत्कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः
क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तकस्यान्तकोऽहम् ॥२२॥'

सेयं प्रौढार्थसंदर्भारभटी नाम वृत्तिः ॥

**यो य इति** । ओजःप्रधानतया प्रौढः संदर्भः । यस्मादियमारभटी दीप्ते रौद्रादौ विनियुक्ता, तेन युक्तं शब्दार्थयोः प्रौढत्वमिति ॥

भारती यथा—

'उत्तिष्ठन्त्या रतान्ते भरमुरगपतौ पाणिनैकेन कृत्वा
धृत्वा चान्येन वासो विगलितकबरीभारमंसे वहन्त्याः ।
भूयस्तत्कालकान्तिद्विगुणितसुरतप्रीतिना शौरिणा वः
शय्यामालिङ्ग्य नीतं वपुरलसलसद्बाहु लक्ष्म्याः पुनातु ॥२३॥'

सेयमतिसुकुमारार्थे नातिसुकुमारसंदर्भा भारती नाम वृत्तिः ॥

---

१. 'मदात् पा' इति पाठः.

**उत्तिष्ठन्त्या इति** । सर्वाङ्गीणाश्लेषसमुत्सुके प्रियतमे बहिर्व्यावर्तनमन्तरनुवर्तनं च मुग्धाङ्गनाजातिरिति न्यायेन नीवीबन्धकेशपाशसंयमार्थिन्या निर्भरकेलिखेदेन भुजलतालसं लसत्येव न तु व्यापारयितुमपि शक्येति तत्कालिकोऽतिपोषः । अत्र मसृणेऽपि रसे वृत्त्यौचित्येन संदर्भस्य प्रौढिरुचितैव । दीर्घसमासो हि शृङ्गारादौ निषिद्धो न तु प्रौढिः । रेफहकारादिवर्णनिवेशात्तु कोमलता संदर्भस्येति । एवमुत्तरोदाहरणेष्वपि विशेषः स्वयमूहनीय इति ॥

सात्त्वती यथा—

'वन्द्यौ द्वावपि तावनार्यचरितप्राप्तप्रतापोदयौ
भीमो भीमपराक्रमः स च मुनिर्भास्वत्कुठारायुधः ।
एकेनामृतवद्विदार्य करजैः पीतान्यसृञ्जि द्विषा-
मन्येनापि हताहितास्रसरसि स्नातं क्रुधः शान्तये ॥ ३४ ॥'

सेयं प्रौढार्था नातिप्रौढसंदर्भा सात्त्वती नाम वृत्तिः ॥

मध्यमकैशिकी यथा—

'किं द्वारि दैवहतके सहकारकेण
संवर्धितेन विषपादप एष पापः ।
अस्मिन्मनागपि विकासविकारभाजि
भीमा भवन्ति मदनज्वरसंनिपाताः ॥ ३५ ॥'

सेयं सुकुमारेऽर्थे प्रौढसंदर्भा मध्यमकैशिकी नाम वृत्तिः ॥

मध्यमारभटी यथा—

'त्वं नागराज बहुमस्य नितम्बभागं
भोगेन गाढमुपवेष्टय मन्दराद्रेः ।
सोढाऽविषह्यवृषवाहनयोगलीला-
पर्यङ्कबन्धनविधेस्तव कोऽतिभारः ॥ ३६ ॥'

सेयं प्रौढेऽर्थे सुकुमारसंदर्भा मध्यमारभटी नाम वृत्तिः ॥

---

१. 'आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः' इत्यमरः.

अन्योक्तीनामनुकृतिश्छाया सापीह षड्विधा ।
लोकच्छेकार्भकोन्मत्तपोटामत्तोक्तिभेदतः ॥ ३९ ॥

**अन्योक्तीनामिति** । लोके बिम्बप्रतिबिम्बयोः प्रतिबिम्बं चमत्कारितया प्रसिद्धम् । अत एव 'श्रव्यात्प्रेक्ष्यं ज्यायः' इत्याह । शब्दालंकारकाण्डे वाक्यानुकरणमेव प्रतिबिम्बवाचिना छायापदेन गुणवृत्तेनाख्यायते । तदेतदनुकरणमनुकार्यभेदादेव षोढा व्यवतिष्ठत इत्याह—**छेकेति** । छेकादीनां लोकविशेषाणामेव शोभाकारित्वेन पृथगुपादानेऽर्थात्तदितरानेकविचित्रतत्तदनुकार्यपरो लोकशब्दः । छेका विदग्धाः । 'पोटा स्त्रीपुंसलक्षणा' । सहजकेलिरिति प्रसिद्धा पोटा । भुजिष्या दासीत्यन्ये । अत्र केचिदन्यच्छायायोनिजमपि काव्यं छायालंकारव्यवहारभूमिमाहुः ॥

प्रकृतिपरिणामः, परपुरप्रवेशः, खण्डसंघात्यम्, चूलिका, परिमल इति पञ्च योनिजकाव्यभेदाः । तत्र किंचिद्विकृतार्थः **प्रकृतिपरिणामः** । यथा—

'धुअमेहं महुअरानुव्वणसमअहियओ णअविमुक्काओ ।
णहया अवसाहाओ णिअ अव्वाण वयडि गआओ दिसाओ ॥'

*यथा च*—

'सिसिरपडिरोहमुक्कपरिहुत्तम्पअ अवलिअकम् ।
इहरइ अरया अलिअं वित्थरदि दिसाहिं कड्ढिअं वणहअलम् ॥'

अत्राकाशादिशां विस्तारभणनं मनाग्विकृतमुपलक्ष्यत इति प्रकृतिपरिणामनामायं योनिजकाव्यभेदः ॥

*भाषामात्रभिन्नः* **परपुरप्रवेशः** । *यथा*—

'देवाधिपो वा भुजगाधिपो वा धराधिपो वा यदि हैहयः स्याम् ।
संदर्शनं ते गुणकीर्तनं ते सेवाञ्जलिं ते तदहं विदध्याम् ॥'

*यथा च*—

'सविमो अणज्जुणमिअं अमहिन्दमवामुइअ अप्पाणम् ।
सेउं जालदंसण गुणकहासुत इजणूपज्जत्तम् ॥'

अत्र भाषामात्रं भिन्नमिति परपुरप्रवेशनामायं योनिजकाव्यभेदः ॥

विकीर्णसमाहारः **खण्डसंघात्यम्** । *यथा*—

'छिन्नाण्यम्बुजिनीदलानि सरसामुत्सङ्गमध्यासते
मौलौ किंशुकशाखिनाञ्चिचतुरानाबिभ्रते कोरकान् ।

गर्भग्रन्थिषु पक्षषाः सुमनसो बध्नन्ति चूतद्रुमाः
संप्राप्ताः प्रकटीभवन्ति कुररीकण्ठेषु कूजोर्मयः ॥'

अत्र काव्यचतुष्कादुच्छिद्य पादचतुष्टयं ग्रथितमिति खण्डसंघात्यनामायं योनिजकाव्यभेदः ॥

तावन्तमर्थमुपादायाधिको वापश्चूलिका। यथा—

'कमलमनम्भसि तत्र च कुवलयमेतानि कनकलतिकायाम्।
सा च सुकुमारसुभगेत्युत्पातपरम्परा केयम् ॥'

यथा च—

'उभौ रम्भास्तम्भावुपरि विपरीतौ कमलयो-
स्तदूर्ध्वं रत्नाश्मस्थलमपि दुरूहं किमपि यत्।
ततः कुम्भौ पश्चाद्बिसकिसलये कन्दलमथो
तदन्विन्दाविन्दीवरमधुकराः किं पुनरिदम् ॥'

अत्र स्थाने स्थानेऽधिकावापस्य प्रत्यभिज्ञानाच्चूलिकानामायं योनिजकाव्यभेदः ॥

बन्धच्छायामात्रसंवादी परिमलः। यथा—

'अनेन यूना सह पार्थिवेन रम्भोरु कच्चिन्मनसो रुचिस्ते।
सिप्रातरङ्गानिलकम्पितासु विहर्तुमुद्यानपरम्परासु ॥'

यथा च—

'यात्राप्रसङ्गादुपवीणयन्ती तस्यां महाकालमविप्रतिष्ठम्।
कृशाङ्गि वीणागुणसारणासु चिरात्कलाभ्यासफलं लभेथाः ॥'

अत्र संदर्भच्छायामात्रमनुकृतमिति परिमलनामायं योनिजकाव्यभेदः ॥

तासु लोकोक्तिच्छाया यथा—

'शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ
मासानेतान्गमय चतुरो लोचने मीलयित्वा।
पश्चादावां विरहगुणितं तं तमात्माभिलाषं
निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ॥ ३७ ॥'

सेयं लोचने मीलयित्वेति लोकोक्तेरनुकृतिर्लोकोक्तिच्छाया ॥

**शापान्त इति**। लोचने मीलयित्वेत्यनेन लोकोक्त्यनुकारेण नयननिमीलनवदाशुभाविता समागमसमयस्य प्रतिपाद्यते। तथा च—सुकुमारतरकान्ताजी-

वितर्ध्यवसायाभिप्रायः प्रवासविप्रलम्भाविष्टचेतसः प्रकाशितो भवतीति । उपलक्षणं चैतत् । वर्षाकाले चतुरो मासानित्यपि लोकोक्तिरेव ॥

छेकोक्तिच्छाया यथा—

'यो हि दीर्घासिताक्षस्य विलासललितभ्रुणः ।
कान्तामुखस्यावशगस्तस्मै नृपशवे नमः ॥ ३८ ॥'

सेयं तस्मै नृपशवे नम इति विदग्धोक्तेरनुकृतिश्छेकोक्तिच्छाया ॥

**यो हीति ।** कान्तामुखमेव जीवितसर्वस्वमभिमन्यमानस्तत्रालंप्रत्ययशालिनः पशूनिव प्रति शृङ्गारी विदग्धः ॥

अर्भकोक्तिच्छाया यथा—

'किं स स्वर्गतरुः कोऽपि यस्य पुष्पं निशाकरः ।
ते वृक्षाः कीदृशा मातर्येषां मुक्ताफलं फलम् ॥ ३९ ॥'

सेयमभ्युत्पन्नशिशुजनोक्तेरनुकृतिरर्भकोक्तिच्छाया ॥

**किं स इति ।** नूनं त्रिजगद्वर्तिसकलार्थिसार्थकीकरणविख्यातकीर्तेः पारिजातप्रमुखस्य कस्यचिदेकः स्तबकः सुधाभिराह्लादयन्नयमवलोके दृश्यत इत्यादि ॥

उन्मत्तोक्तिच्छाया यथा—

'दृष्टः कथं सुतनु किं कुरुते किमस्य-
द्वार्तां स पृच्छति शृणोति निवेद्यमानाम् ।
आस्तां किमस्य कथया कथयाशु ताव-
दत्रागमिष्यति न वा खलु सोऽभिमानी ॥ ४० ॥'

सेयमसमञ्जसाया उन्मत्तोक्तेरनुकृतिरुन्मत्तोक्तिच्छाया ॥

**दृष्ट इति ।** कथमित्यादिना तदेकतानतामाविष्कृत्य सहसैवास्तामित्यादिना संप्रहाणम्, कथय तावदित्यादिना च पुनरादानमसमञ्जसम् ॥

पोटोक्तिच्छाया यथा—

'तिलकमसहास्मि सोढुं घनसारेणातिसारदोषो मे ।
लम्भयति च दौर्बल्यं कुङ्कुमरागो ममाङ्गानि ॥ ४१ ॥'

---

१. 'मासां' ख. २. 'सारो' ख.

**सेयमुत्तमपदारोपितनीचयुवत्युक्तेरनुकृतिः पोटोक्तिच्छाया ॥**

उत्तमपदस्थानीययुवतिमनुकुर्वाणा उत्तमपदारोपितनीचयुवतिः ॥

मत्तोक्तिच्छाया यथा—

'पि पि प्रिय स स स्वयं मु मु मुखासवं देहि मे
त त त्यज दु दु द्रुतं भ भ भ भाजनं काञ्चनम् ।
इति स्खलितजल्पितं मदवशात्कुरङ्गीदृशः
प्रगे हसितहेतवे सहचरीभिरध्यैयत ॥ ४२ ॥'

सेयं स्खलन्त्या मत्तोक्तेरनुकृतिर्मत्तोक्तिच्छाया ॥

**पि पि प्रियेति** । अव्यक्तवृत्तिरूपं स्खलितजल्पितम् ॥

**साभिप्रायस्य वाक्ये यद्वचसो विनिवेशनम् ।**
**मुद्रां तां मुत्प्रदायित्वात्काव्यमुद्राविदो विदुः ॥ ४० ॥**

**साभिप्रायेति** । यद्यपि संपूर्णमेव काव्यं वक्त्रभिप्रायप्रतिच्छन्दकभूतम्, उक्तं च—'वक्त्रभिप्रायं सूचयेयुः' इति, तथापि नास्मिन्नितरसाधारणतया वाक्यार्थगोचरमभिप्रायमावेदयत्येव काव्यसनाथीकरणक्षमवक्त्रभिप्रायविशेषप्रतिरूपक एकदेशनिवेशो दृश्यते । अत एवाङ्गुलीयादिमुद्रेव मुद्रेत्युच्यते । निरुक्तिमाह—**मुत्प्रदायित्वादिति** । मुदुपपदे रातेर्दानकर्मणः के रूपम् । मुद्रैव पदादिप्रकाश्यध्वनिव्यवहारभूमिरन्येषाम् ॥

**सास्मिन्पदस्य वाक्यस्य विभक्तेर्वचनस्य च ।**
**समुच्चयस्य संवृत्या षोढा न्यासेन जायते ॥ ४१ ॥**

**सास्मिन्निति** । पदं प्रातिपदिकं कृत्तद्धितसमासरूपम् । विभक्तिवचनयोः सामान्यविशेषभावेऽपि पृथक्पृथगभिप्रायव्यञ्जकतया निर्देशः । आस्तामित्यादिवचनसंकोचः संवृतिः ॥

तासु पदमुद्रा यथा—

'निर्माल्यं नयनश्रियः कुवलयं वक्त्रस्य दासः शशी
भ्रूयुग्मस्य सनाभि मन्मथधनुर्ज्योत्स्ना सितस्याञ्चलः ।

संगीतस्य च मत्तकोकिलरुतान्युच्छिष्टमेणीदृशः

सर्वाङ्गीणमहो विधेः परिणतं विज्ञानचित्रं चिरात् ॥४३॥'

अत्र निर्माल्यं, दासः, सनाभि, अञ्चलः, उच्छिष्टमिति पदानां गौणवृत्तिव्यपाश्रयेण मुख्यदायिनां साभिप्रायनिवेशादियं पदमुद्रा ॥

**गौणवृत्तिव्यपाश्रयेणेति** । निर्माल्यादिपदानामत्यन्ततिरस्कृतवाच्यानामतिविच्छायत्वादिलक्षणाद्वारेण लावण्यविशेषध्वननात्सहृदयहृदयावर्जकानां निवेशो दृश्यते ।

एवम्—

'ताला जाअन्ति गुणा जाला ते सहिअएहिँ घेप्पन्ति ।

रविकिरणाणुग्गहिआइँ होन्ति कमलाइँ कमलाइँ ॥'

तथा—

'अमृतममृतं चन्द्रश्चन्द्रस्तथाम्बुजमम्बुजं

रतिरपि रतिः कामः कामो मधूनि मधून्यपि ।'

इत्यादावर्थान्तरसंक्रमणादिना तत्प्रकाश्यो ध्वनिरनुसंधेयः ॥

**वाक्यमुद्रा यथा—**

'यत्स्वच्छे सलिलात्मनि प्रतिफलद्देवे त्रियामापतौ

पीयूषाकृति पर्यवस्यति किल ज्योत्स्नेति तत्त्वान्तरम् ।

तिग्मं धाम चिरं चकास्ति दिवि यत्तत्रास्ति दिव्यः पुमा-

न्यं विज्ञातवतां त्रुटन्ति निखिला भूयो भवग्रन्थयः ॥ ४४ ॥'

अत्र 'तत्रास्ति दिव्यः पुमान्' इत्यादेर्वाक्यान्तरस्य पूर्ववाक्योपकारित्वेन मुख्यदायकस्याभिप्रायपूर्वनिवेशादियं वाक्यमुद्रा ॥

**यत्स्वच्छ इति** । आदित्यकला एव प्रति फलिताश्चन्द्रव्यपदेशं लभन्त इत्यागमः ।

तदाह—

'सलिलमये शशिनि रवेर्दीधितयो मूर्च्छितास्तमो नैशम् ।

दलयन्ति दर्पणोदरविहता इव मन्दिरस्यान्तः ॥' इति ।

**पूर्ववाक्योपकारित्वेनेति** । देवे पीयूषाकृति तत्त्वान्तरं तिग्मं धाम चकास्तीति च यदगाधतया तर्कितमिति किलशब्दकटाक्षितमभिधानम् । तत्र किं संबन्धमित्याकाङ्क्षाविपूरकं तत्रास्तीत्यादि वाक्यम् । तथा हि—'य एष आदित्यपथं व्याप्य पुरुषो दीप्यते' इत्याद्युपनिषदर्थनिवेशनमभिप्रायपूर्वकमाभासते । एतेनान्येऽपि वाक्यप्रकाश्यप्रकाराः परिगृहीता बोद्धव्याः । पूर्वं वाक्येऽन्तर्भावितद्वित्वमवसेयमिति ॥

विभक्तिमुद्रा यथा—

'श्रियः प्रदुग्धे विपदो रुणद्धि यशांसि सूते मलिनं प्रमार्ष्टि ।
संस्कारशौचेन परं पुनीते शुद्धा हि बुद्धिः किल कामधेनुः ॥४५॥'

अत्र प्रदुग्धे, रुणद्धि, सूते, प्रमार्ष्टि, पुनीते, इति तिङ्विभक्तीनां 'दुहिपच्योर्बहुलं सकर्मकयोरुपसंख्यानम्' (३।१।८७ वा०), 'रुधादिभ्यः श्नम्' (३।१।७८) इत्यादिभिर्विशेषलक्षणयोगैः[1] परस्मैपदात्मनेपदपर्यायेण निवेशो दृश्यते । श्रियः, विपदः, यशांसि, मलिनं संस्कारशौचेन, इति च सुब्विभक्तीनाम् 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' (६।४।७७) इत्यादिविशेषलक्षणवतीनाम[2]विकृतविकृतानां मङ्गलामङ्गलार्थपरत्वेन[3] मङ्गलाद्यर्थानाम[4]भिप्रायतः प्रयोगो लक्ष्यते । तेनेयं विभक्तिमुद्रा भवति ॥

**श्रिय इति** । बुद्धिरूपा कामधेनुः श्रियः प्रथयतीत्युक्ते न तथा प्रकर्षः, यथोक्ते तु विशिष्टः कवेरभिप्राय उन्नीयते । तथा हि—यथोदुम्बरः स लोहितं फलं पच्यत इति कर्मकर्तरि फलोदुम्बरयोरैकात्म्यमवसीयते तथेहापि श्रीरूपमात्मानं बुद्धिः प्रकाशयतीति । अत एव हि 'दुहिपच्योर्बहुलं सकर्मकयोः' (वा ३।१।८७) इति बाह्यकर्मविशिष्टस्यैव कर्तुः कर्मवद्भावः शिष्यते । 'न दुहस्नुनमां यक्चिणौ' (३।१।८९) इति यगभावोऽपि विशेषाभिप्रायनियत एव रुणद्धीत्यागमरूपः । सूते इति लुप्तः । प्रमार्ष्टीति वृद्धियोजकः । पुनीते इति स्वरूपेण विकृतश्च

१. 'लक्षणवतीनां योगैः' क. २. 'लक्षणवतीनां योगैः' क. ३. 'पदपरत्वेन' इति टीकासंमतः पाठः. ४. 'मङ्गलार्थानाम्' क.

**विकरणः** । आत्मनेपदपरस्मैपदयोरेकान्तरितो निवेशः । श्रिय इति प्रकृतिभागे इयङादेशो विकारो विभक्तावपि विकारः । विपद इति प्रकृतिरविकृता । विभक्तिस्तु रुत्वेन विकृता । यशांसीति द्वे अपि विकृते । मलिनमिति वैकल्पिकपरसवर्णविधौ द्वयमविकृतम् । संस्कारशौचेनेति प्रकृतिरविकृता । प्रत्ययस्त्विनादेशेन विकृतः । तथा श्रिय इति माङ्गल्यम्, विपद इति विपरीतमिति क्रमेण शुद्धा बुद्धिः कामधेनुरिति । मङ्गलपरम्परानिवेशनेनोपसंहारश्चित्रांशुकोज्ज्वल इव प्रतिभासमानो नु बिम्बमिव कामपि कान्तिमभिव्यञ्जयन्नुपलक्ष्यते । **मङ्गलामङ्गलार्थपदपरत्वेनेति** । मङ्गल्यामङ्गलेभ्यः पदेभ्यः परवर्तित्वेनेत्यर्थः ॥

वचनमुद्रा यथा—

'विश्वंभरा भगवती भवतीमसूत
　राजा प्रजापतिसमो जनकः पिता ते ।
तेषां वधूस्त्वमसि नन्दिनि पार्थिवानां
　येषां कुलेषु सविता च गुरुर्वयं च ॥ ४६ ॥'

अत्र वयमित्यात्मनि बहुवचनेन सविता चेति सवितर्येकवचनेन सवितुरप्यहं बहुमत इत्यभिप्रायो वक्तुरितीयं वचनमुद्रा ॥

**विश्वंभरेति** । अहंकारप्ररोहस्य पूर्वं गुणप्रयोजकत्वमुक्तम् । इह तु कवेरभिप्रायविशेषस्यालंकारघटकतेति विभागः ॥

समुच्चयमुद्रा यथा—

'जातश्चायं मुखेन्दुस्ते भ्रुकुटिप्रणयी पुरः ।
　गतं च वसुदेवस्य कुलं नामावशेषताम् ॥ ४७ ॥'

अत्र 'आशंसायां भूतवच्च' (३।३।१३२) इति भूतवद्भावस्य हयग्रीवप्रभावातिशयशंसिनः समुच्चयद्वारेण निवेशादियं समुच्चयमुद्रा ॥

**अत्राशंसायामिति** । गतमिति निष्ठाप्रत्ययेन भूतताद्योतनादाशंसाप्रतीतावपि कथं प्रकृतपोष इत्यत उक्तम्—**समुच्चयद्वारेणेति** । तेन हि तुल्यकक्षताप्रतीतौ त्वं चेदङ्गीकृतरोषस्तदा सिद्धमेव समीहितमिति वक्तुरध्यवसायविशेषप्रतीतौ समुच्चय एव मुद्रापदवीमारोहतीति । शेषं सुबोधम् ॥

संवृतिमुद्रा यथा—

'मणिरत्नं प्रसेनस्य तच्चानार्येण विष्णुना ।
लब्धं येनाद्ययोगेन तेन किं कीर्तितेन वः ॥ ४८ ॥'

अत्र 'कथापि खलु पापानामलमश्रेयसे यतः', ततः 'किं तेन वः कीर्तितेन' इति साभिप्रायसंवृतिकरणादियं संवृतिमुद्रा ॥

**विधिद्वारेण वा यत्र निषेधेनाथ वा पुनः ।
प्रतीयते विशिष्टोऽर्थः सोक्तिरत्राभिधीयते ॥ ४२ ॥**

**विधीति** । उक्तिरभिधा । सा द्वयी भावाभावविषयत्वात् । तर्हि गोरपत्यमयं गौरित्यतः को भेद इत्याशङ्क्य विधिद्वारेण वेत्यादि । भावज्ञानं विधिरभावज्ञानं निषेधः । लोके गृहीतव्युत्पत्तिबलेन भावाभावान्यतरसंवित्सरणिमारुह्य काव्यैकगोचरे रसाद्यात्मनि पर्यवस्यन्ती भवत्युक्तिरलंकार इति भावः ॥

सोऽयं भावादिप्रपञ्चेन षोढा विधिः प्रथत इत्याह—

**विधेरथ निषेधात्स्यादधिकाराद्विकल्पतः ।
नियमात्परिसंख्याया उपाधेः सेह षड्विधा ॥ ४३ ॥**

**विधेरिति** । उपाधिर्विशेषणम् । विध्यधिकारौ शुद्धभावभेदौ । निषेधनियमौ शुद्धप्रतिषेधभेदौ । विकल्पपरिसंख्ये संकीर्णभेदाविति । तत्राप्राप्तप्रापणो **विधिः** । प्रसक्तप्रतिषेधो **निषेधः** । क्रियाफलसंबन्धोऽ**धिकारः** । तुल्यकक्ष्ययोरेकबाधेनान्यसंबन्धो **विकल्पः** । व्यावृत्तिफलको विधि**र्नियमः** । शेषविधिनिषेधनान्तरीयकौ विशेषनिषेधविधी **परिसंख्या** ॥

तासु विध्युक्तिर्यथा—

'शुश्रूषस्व गुरून्कुरु प्रियसखीवृत्तिं सपत्नीजने'

अत्राप्राप्तौ प्रापणवचनं विधिः ॥

**अप्राप्तौ प्रापणवचनमिति** । अप्रवृत्तप्रवर्तनात्मको हि विधिः कथमितरापेक्षत्वे संगच्छते । अत एवोच्यते—'विधिरत्यन्तमप्राप्तौ' इति ॥

निषेधोक्तिर्यथा—

'भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः ।'

**अत्र** प्राप्तौ निवारणं निषेधः ॥

**प्राप्तौ निवारणमिति** । रोषेण प्रसजत्प्रतीपाचरणान्निवार्यते ॥

अधिकारोक्तिर्यथा—

'भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी
　　यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥ ४९ ॥'

**अत्र** विधिनिषेधज्ञानाद्विधिनिषेधयोग्यताधिकारः ॥

**विधिनिषेधज्ञानादिति** । विहितनिषिद्धक्रियाज्ञानेन तत्फलसंबन्धयोग्यत्व**मधिकारः**। शुश्रूषस्वेति, भूयिष्ठं भव दक्षिणेति द्वे विहिते। मा स्म प्रतीपं गम इति, **भोगेष्वनु**त्सेकिनीति द्वे निषिद्धे। विधिनिषेधयोग्यता विधिनिषेधफलसंबन्धयोग्य**त्वम्**। गृहिणीपदप्राप्तिर्विहितक्रियाफलम्। कुलाधीभवनं तु निषिद्धक्रियाफलमिति ॥

विकल्पोक्तिर्यथा—

'एको नेता क्षत्रियो वा द्विजो वा एका विद्याध्यात्मिकी वा त्रयी वा।
एका भार्या वंशजा वा प्रिया वा एकं मित्रं भूपतिर्वा यतिर्वा ॥५०॥'

सोऽयं जातिक्रियागुणद्रव्यावलम्बी चतुर्विधो विकल्पः ॥

**सोऽयमिति** । जात्यादय एव पदार्थास्ते च विकल्पन्ते । कुतो जात्यादिना **तद्व्यवस्था** । [illegible] काल्पिकभावमाहेति भावाभावसंकरः ॥

नियमोक्तिर्यथा—

'निषादोऽपार्थ एवायं पार्थ एव धनुर्धरः ।
　यो न केवलमात्मीयैः परैरप्यभिनन्द्यते ॥ ५१ ॥'

सोऽयमयोगान्ययोगात्यन्तायोगव्यवच्छेदलक्षणस्त्रिप्रकारो नियमः ॥

**अपार्थ एवेति** । विशेषणसंगत एवकारः केवलविशेषणयोगस्यासंभवे व्युत्पत्तिवशेन तदभावं व्यवच्छिन्दन्योगव्यावृत्ताववतिष्ठते । पार्थ एवेति विशेष्यसंगत एवशब्दस्तदन्यस्य धनुर्धरतारूपं विशेषणं व्यावर्तयन्नन्ययोगव्यवच्छेदद्योतको भवति । केवलमिति अभिनन्दनस्य नायोगं नत्रान्ययोगं व्यवच्छिनत्ति, किं तु तत्संबन्धं बोधयन्नात्यन्तिकमयोगमत्यन्तायोगव्यवच्छेदोऽभिधीयते ॥

परिसंख्योक्तिर्यथा—

'पञ्च पञ्चनखा भक्ष्या वामेनाक्ष्णा न पश्यति ।
काठिन्यमस्याः कुचयोः किमसद्यन्न रोचते ॥ ५२ ॥'

तदिदं विधिनिषेधाभ्यां शेषाभ्यनुज्ञानं परिसंख्येत्युच्यते ॥

**पञ्च पञ्चेति** । पञ्चनखेषु पञ्च भक्ष्या नान्ये । कुचयोरस्याः काठिन्यं न वचनादाविति विशेषविधी शेषनिषेधमनुजानीतः । वामेन न पश्यति दक्षिणेन तु पश्यत्येव । किमसत्किमशोभनम्? यद्यस्मै न रोचते इतरत्तु सदैवेति विशेषनिषेधौ शेषविध्यभ्यनुज्ञाविषयाविति ॥

**अयुज्यमानस्य मिथःशब्दस्यार्थस्य वा पुनः ।**
**योजना क्रियते यासौ युक्तिरित्युच्यते बुधैः ॥ ४४ ॥**

**अयुज्यमानस्येति** । पूर्वं पदैकवाक्यता ततो वाक्यैकवाक्यत्वमनन्तरं प्रकरणैकवाक्यत्वमिति प्रबन्धनिर्वहणं यावत्कविव्यापारः । तत्र 'गामभ्याज शुक्लां दण्डेन' इत्यादीनां लोके गृहीतव्युत्पत्तीनामेव यद्यपि काव्यानुप्रवेशस्तथापि भङ्गीभणितिसनाथान्येव काव्यपद्धतिमध्यासत इत्यप्रहतानामुपादेयत्वे यत्रापाततः परस्परमन्वयो न प्रतिभासते तत्रावश्यं कविना स्वाभिप्रायप्रतिच्छन्दकभूतविशेषनिवेशनेन विवक्षितवाक्यार्थप्रतीत्यस्खलनं विधेयम्, अत एव वैचित्र्यादलंकारता । तदिदमुक्तम्—अयुज्यमानस्येति । आपातत इति शेषः । योजना अन्वयोपयिकरञ्जकविशेषनिवेशनं तस्य विषयः । शब्दार्थौ शब्दः पदं वाक्यं प्रकरणं प्रबन्धः । अर्थः पदार्थो वाक्यार्थश्च ॥

विषयभेदात् षोढा युक्तिरित्याह—

**पदं चैव पदार्थश्च वाक्यं वाक्यार्थ एव च ।**
**विषयोऽस्याः प्रकरणं प्रबन्धश्चाभिधीयते ॥ ४५ ॥**

**पदं चैवेति** ॥

तत्र—

**योगकारणपर्यायाङ्गाङ्गिभावपरम्पराः ।**
**पदयुक्तेर्निमित्तं स्युर्निरूढाः पदसिद्धये ॥ ४६ ॥**

**योगेति**। योगेत्यादौ द्वन्द्वपरवर्ती परम्पराशब्दः प्रत्येकमन्वीयते । योगो **योगरूढिः** । कारणं कार्यकारणभावः । निरूढाः प्रमिताः । पदसिद्धये पदसमुदायात्मकवाक्यैकदेशतासिद्धये ॥

यद्यपि पदानामर्थद्वारक एव संबन्धः, तथापि तदौपयिकविशेषः क्वचित्पदेष्वेव साक्षादवसीयते क्वचित्पदार्थेष्वित्यभिप्रेत्याह—

**विरुद्धानां पदार्थानां जात्यादीनां परस्परम् ।**
**योजना येह तां युक्तिं पदार्थविषयां विदुः ॥ ४७ ॥**

**विरुद्धानामिति**। एवं वाक्यवाक्यार्थयोरपि वाक्यमध्यवर्तिप्रकृतरसानुगुणरससमर्पकं वाक्यान्तरम् ॥

**गर्भः सह निगर्भेण संवृत्तिः ससमुच्चया ।**
**हेतवो वाक्ययुक्तीनां क्रियतामेवमादयः ॥ ४८ ॥**

**गर्भ इति** । गर्भस्तस्यैकदेशभूतस्तथाभूतो **निगर्भः** । उक्तेरुपसंहारवचनं **संवृत्तिः** । तुल्यप्रधानभावानां युगपदेकार्थसंबन्धः **समुच्चयः** । आदिपदादन्वाचयादयः ॥

**यत्तदादेरुपादानं क्रियाभ्याससमुच्चयौ ।**
**क्रियासमभिहारश्च वाक्यार्थान्युज्यते मिथः ॥ ४९ ॥**

**यत्तदादेरिति** । यत्तदोरुद्देश्यविधेयगामिनोरादिग्रहणादिदमेतदादीनां क्रियाणामावृत्तिरभ्यासः । विजातीयानामेकदैकत्र संबन्धः **समुच्चयः** । **समभिहारो** भृशत्वं प्रकर्ष इति यावत् ॥

**यदश्रद्धेयशैलादिवर्णनाभ्युपपत्तये ।**
**वाक्यं सेह प्रकरणविषया युक्तिरिष्यते ॥ ५० ॥**

**यदिति** । अतिमात्रतया प्रतिभासमानत्वमश्रद्धेयता ॥

**प्रबन्धविषयाप्येवं युक्तिरुक्ता मनीषिभिः ।**
**उदाहरणमालासां रूपव्यक्त्यै निदर्श्यते ॥ ५१ ॥**

तदेतासां युक्तीनामतिदुरूहत्वादाह—**उदाहरणमेवेति** ॥

---

१. 'उदाहरणमेवासाम्' इति पाठष्टीकासंमतः.

तत्र योगरूढिपरम्परादिनिमित्ता पदयुक्तिर्यथा—

'प्राच्यां निर्जितजम्भजिद्द्विपशिरःसिन्दूरशोभं दिशि
प्रत्याख्यातहयाङ्गनास्यहुतभुग्ज्योतिः प्रतीच्यर्णवे।
प्रातर्जातमदोन्मिषत्कमलिनीकिञ्जल्ककल्कोद्भटं
भानोः पूर्णनभःकटाहकुहरक्रोडं महः पातु वः॥ ५३॥'

अत्र जम्भजिद्द्विप इति योगरूढिपरम्परा, हयाङ्गनास्यहुतभुगिति पर्यायपरम्परा, प्रातर्जातमदोन्मिषत्कमलिनीकिञ्जल्ककल्कोद्भटमिति हेतुपरम्परा, नभःकटाहकुहरक्रोडमित्यङ्गाङ्गिभावपरम्परा च परिस्फुरन्ती दृश्यते॥

**प्राच्यामिति**। जम्भजित्पदं कृदन्तत्वाद्यौगिकम्। तथा जम्भजिद् द्विप इत्यपि समासत्वात्। तदेतदुभयं योगेनातिप्रयुज्यमानं निरूढिद्वयेन विवक्षितैरावतरूपे वस्तुनि नियम्यते। हयाङ्गनेति वडवापर्यायः। आस्यमिति मुखपर्यायः। हुतभुगित्यनलपर्यायः। सेयं पदपरम्परापर्यायताप्रतिसंधानेनाभिमतवडवामुखानलप्रतीतिं करोति। मदस्य किञ्जल्कोन्मेषे तस्य कल्के तस्याप्युद्भटतायां हेतुभाव इति कार्यकारणपरम्परा। नभःकटाहोऽङ्गी। तस्याङ्गमेकदेशः कुहरं तस्यापि क्रोड इत्यङ्गाङ्गिपरम्परा च यथाभिमतपदैकवाक्यतानिदानमिति तदेतद् व्याचष्टे—**अत्रेति**। परिस्फुरन्ती कविशक्तिव्यञ्जकतया सहृदयहृदयेषु प्रतिफलति॥

विरुद्धजात्यादियोगनिमित्ता पदार्थयुक्तिर्यथा—

'तन्नागेन्द्रकरोरुदोःकरिशिरःपीनस्तनांसं वपुः
स्त्रीपुंसाकृति यत्पितुस्तव मुखे रम्योग्रमीक्षामहे।
वाराह्या इति नर्मणीभवदनः पश्यन्यदास्या मुखं
नाभिष्टौति हसन्न निन्दति तदा श्लिष्टोऽम्बया पातु वः॥५४॥'

अत्र स्त्रीपुंसाकृतीति विरुद्धजातियोजना, नाभिष्टौति न निन्दतीति विरुद्धक्रियायोजना, रम्योग्रमिति विरुद्धगुणयोजना, मुखे वपुरीक्षामहे इति विरुद्धद्रव्ययोजना च लक्ष्यते॥

**तन्नागेति**। नागेन्द्रकरवदूरुः पार्वतीभागे, दोर्बाहुश्च देवभागे, करिकुम्भवत्पीनः स्तनो देवीभागे, अंसः स्कन्धश्च देवभागे, एवंविधत्वत्पितुरीश्वरस्य वपुस्त्वन्मुखे। एकविषाणतया करिकरिणीसमाहारात्मनि वीक्षामह इति वाराह्याः परिहासोक्तिः। वाराही वराहप्रकृतिभूतो मातृविशेषः। इभवदनो विनायकः। स्त्रीत्वपुंस्त्वयोः परस्परपरिहारेणोपलम्भाद्विरुद्धयोरपि त्वत्पितुरित्यनेन स्तुतिनिन्दयोः प्रतिषेधेन रम्यताभीषणतयोर्भागव्यवस्थया मुखवपुषोः सादृश्येनाभितोऽभिप्रायप्रतिबिम्बितेन योजना विहितेति तत्प्रतिपादकानां पदानामेकवाक्यतासिद्धिः। तदिदमाह—**अत्रेति**॥

वाक्यगर्भादिविषया वाक्ययुक्तिर्यथा—

'दिङ्मातङ्गघटाविभक्तचतुराघाटा मही साध्यते
सिद्धा सा च वदन्त एव हि वयं रोमाञ्चिताः पश्यत।
विप्राय प्रतिपाद्यते किमपरं रामाय तस्मै नमो
यस्मादाविरभूत्कथाद्भुतमिदं यत्रैव चास्तं गतम्॥ ५५॥'

अत्र वदन्त एव हि वयं रोमाञ्चिताः पश्यतेति वाक्यगर्भः। तत्रैव पश्यतेति वाक्यान्तरे भावाविष्कारवाचा निगर्भः। किमपरं रामाय तस्मै नम इति वाक्यसंवृत्तिः। यस्मादाविरभूत्कथाद्भुतमिदं यत्रैव चास्तं गतमिति वाक्यसमुच्चयः। सेयमेतेषां योजनाद्वाक्यविषया युक्तिर्भवति॥

**दिङ्मातेति**। जातिक्रियेत्यादिना क्रमेण विरोधप्रसिद्धेर्गुणविरोधमुल्लङ्घ्य क्रियाविरोधो व्याख्या[illegible]। आघाटः सीमा। गर्भो विवृतपूर्वस्तत्रैवाश्चर्यरसाविष्टस्य वक्तुः पश्यतेति वाक्यान्तरं निगर्भः। गर्भवाक्येन समर्थ्यमाणप्रकृतरसान्वयिनि रसे प्रकर्षाधायको निगूढो गर्भो निगर्भ इत्युच्यते। तदिदं भावाविष्कारवाचीत्युक्तम्। विप्राय प्रतिपाद्यते संपन्ना तैरभुज्यत इत्यादि वक्तव्ये किमपरमित्यस्य संवृत्तित्वेन योजना। एवं हि कियदस्य महानुभावस्य तादृशाचरितं प्राप्यते तदिह मौनमेवोचितमिति भूयान्प्रकर्षोऽवसीयते। 'यस्मादाविरभूत्कथाद्भुतमिदं यत्रैव चास्तं गतम्' इति वाक्यद्वयस्य पूर्ववाक्यगततत्कार्थसमुच्चयवाचिना चकारेण योजना व्यक्तैव। **एवमादय इति**। तद्यथा—वीथ्यङ्गानि त्रयोदशप्रस्तावनापरिच्छेद्यानि। संध्यङ्गानि विलासाद्यानि चतुःषष्टिसंधयश्च रूपकावयवभूता मुखप्रतिमुख-

गर्भविमर्शनिर्वहणाख्याः पञ्च । प्रकृतरसावस्थारूपाणि च पञ्चैव । बीजबिन्दुपताकाप्रकरीकार्याणि तत्तत्प्रकरणप्रबन्धरूपवाक्यैकदेशयोजनान्यवगन्तव्यानि ॥

यत्तदाद्युपादाननिमित्ता वाक्यार्थयुक्तिर्यथा—

'तिष्ठ द्वारि भवाङ्गणे व्रज बहिः सञ्चेति वर्त्मेक्षते
शालामञ्च तमङ्गमञ्च वलभीमञ्चेति वेश्माञ्चति ।
दूतिं संदिश संदिशेति बहुशः संदिश्य सास्ते तथा
तल्पे कल्पमयीव निर्घृण यथा नान्तं निशा गच्छति ॥५६॥'

अत्र प्रथमपादे क्रियासमुच्चयः, द्वितीये क्रियाभ्यासः, तृतीये दूतीं संदिश संदिशेति यावत्क्रियासमभिहारः । शेषे तु तथा सास्ते यथा निशान्तं न गच्छतीति यत्तदोरुपादानं वाक्यार्थयुक्तेर्हेतुः प्रतीयते । सेयमुक्तलक्षणा वाक्यार्थयुक्तिर्भवति ॥

अश्रद्धेयपर्वतादिवर्णनोपपत्तिहेतुः प्रकरणविषया यथा—

'मुदे मुरारेरमरैः सुमेरोरानीय यस्योपचितस्य शृङ्गैः ।
भवन्ति नोद्दामगिरां कवीनामुच्छ्रायसौन्दर्यगुणा मृषोद्याः ॥ ५७ ॥'

प्रबन्धव्यापिवस्तूपपत्तेर्हेतुस्तु प्रबन्धविषया युक्तिर्भवति । सा यथा—

'धूमज्योतिःसलिलमरुतां संनिपातः क्व मेघः
संदेशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।
इत्यौत्सुक्यादपरिगणयन्गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥ ५८ ॥'

**तिष्ठेति** । उपस्थितिसमयसीमामतिक्रामति प्रियतमे तत्कालद्विगुणितोत्कण्ठातरलितान्तःकरणः कदाचित्प्रागिव गर्भगृहद्वारि तिष्ठति । ततस्तत्रानवलोकमाना गृहाङ्गणे भवति । तदनन्तरं वेश्मनो बहिर्व्रजति । सोऽयं विजातीयक्रियार्थनानाधातुगोचरः सर्वकालेषु 'समुच्चयेऽन्यतरस्याम्' ( ३।४।३ ) इति लोटो हिरनुशिष्यते । अत एव दर्शनावच्छेदभूतद्वारावस्थानादिसामान्यवचनः 'समुच्चये सामान्यवचनस्य' (३।४।५) इत्यनुशासनान्नियमितप्रयुक्तिरीक्षतिरनुप्रयुज्यते । नायकस्य सर्वथा हृदय-

वैशसं सर्वथैवाश्रद्दधाना दूरदूरतरदूरतमरथ्याभागावलोकनार्थिनी शालागृहमारोहति, ततस्तस्मादुच्चैस्तमङ्गणम् अट्टालकम्, अनन्तरं तस्मादुच्चतरां वलभीमुपरितनकुटीमिति। अत एवाधनक्रियैवात्रावृत्तेति 'क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः' (३।४।२) इत्यनुशिष्यते। अत एव च 'यथाविध्यनुप्रयोगः पूर्वस्मिन्' (३।४।४) इति तस्यैव धातोरनुप्रयोगोऽपि। एवमप्यनागच्छति नायके दूतीव्यापारः शरणं यत्कुण्ठनायां स्वयं वा तत्र गमनमित्युपदिश्यते तेन तत्तदभिप्रायसंवर्धकसंदेशप्रकर्षः सोऽयमाभीक्ष्ण्यद्विरुक्त्या व्यज्यते। अत एव लोटः समभिव्याहारो विषयो न तु घञादिवदभिधेय इति पूर्वाचार्याः। इतिशब्दादधिकं चतुर्थवाक्यानुप्रविष्टमिति यावच्छब्देनावच्छिनत्ति संदिश संदिशेति यावदिति दिक्॥

**उक्तिप्रकारो भणितिः संभवेऽसंभवे च सा।**
**विशेषसंवृत्त्याश्चर्यकल्पनासु च कल्प्यते॥ ५२॥**

**उक्तीति**। उक्तिरभिधानमुच्चारणक्रिया लक्षणक्रिया सा सर्ववाक्यसाधारणी कथमलंकार इत्याशङ्क्य प्रकारपदम्। प्रकारो भङ्गीरूपता। लौकिकशास्त्रीयवचनातिगामी विशेषः। स एव कैश्चिदव्याप्तिमननुसंदधानैरलंकारसामान्ये उक्तः। उक्तिरूपत्वाविशेषे कथमयमेव संगच्छतामित्यतो विभागप्रदर्शनव्याजेन विषयविशेषादेव तद्रूपतामुपपादयति—**संभव इत्यादि**। तत्र बहिरसंभाव्यमानस्यापि प्रतिभानिर्मितचित्रतुरगवत्प्रतीतिः संभवस्तामर्पयन्ती संभावनात्मिका भणितिः। सैव हि 'किंत्वस्ति काचिदपरापि पदानुपूर्वी यस्यां न किंचिदपि किंचिदिवावभाति' इति न्यायेन तनदर्थनिर्माणप्रवीणा 'यथास्मै रोचते विश्वं तथेदं परिवर्तते' इति व्यवहारकारणं भवतीति तथाविध एव विषये 'शास्त्रप्रसिद्धप्रकारवैपरीत्येन वाधवर्णनमसंभावना। उदाह्रियते—

'इह ते जअंति कइणो जअमिण मोजाणसअलपरिणामम्।
वाआसु ठिअं दीसइ आमोअ घणं व तुच्छं व॥'

अतएवेयं निषेधरूपा तज्जातीयव्यावृत्तो धर्मो विशेषस्तं क्वचिद्विदधाना कवेरभिप्रायविशेषमर्पयन्ती 'निषेधप्रसङ्गे विशेषभणितिर्विधिरूपा भवति' इति तामवलम्बमाना चमत्कारकारिणी विशेषे पर्यवस्यन्ती वर्णना पल्लवप्रसङ्गे संकोचमवगाहमाना विधौ निषेधरूपा पर्यवस्यति। अतर्कितोपनतं विस्मयजनकमाश्चर्यं तस्य निषेधे विधातव्ये यत्किंचिद्विधानं तदाश्चर्यरूपतामन्तरेण काव्यकक्षामारोढुं न क्षमत इति नूतनया विस्मयार्पणमेव सर्वस्वभूतमवलम्बनीयमिति निषेधविधि-

प्रसङ्गे निषेधरूपा भणितिर्बहिरसंभाविनः क्वचिदसतो विशेषस्योत्प्रेक्षाकल्पना । तामाश्रयन्ती विधाननिषेधमात्रेण चरितार्था किंचिद्विशेषं विदधातीति विधि-निषेधप्रसङ्गे सामान्यतः प्रतिषेधति विशेषतश्च विधत्त इति निषेधविधिरूपा कल्पना भणितिः ॥

अत्र संभवभणितिर्यथा—

'सद्योद्रावितकेतकोदरदलस्रोतःश्रियं बिभ्रती
येयं मौक्तिकदामगुम्फनविधेर्योग्यच्छविः प्रागभूत् ।
उत्सेक्या कलशीभिरञ्जलिपुटैः पेया मृणालाङ्कुरै-
र्मातव्या च शशिन्यमुग्धविभवे सा वर्तते चन्द्रिका ॥ ५९ ॥'

अत्र ज्योत्स्नायाः सद्योद्रावितकेतकोदरदलस्रोतःसादृश्यादिसंभवा-दियं संभवभणितिर्द्विरूपा ॥

**सद्य इति ।** केतकोदरदलानां द्रावणम्, ततः स्रोतोरूपता, ततस्तेनोपमितायाः बहलतरबहिर्भागस्य कलशीभिरुत्सेचनम्, अनन्तरं किंचिदल्पीभूतमध्यभागस्य करतलाञ्जलिपुटैर्मानम्, ततः शेषीभवतः सारभागस्य मृणालाङ्कुरैः पानमिति बहिरसंभाविन एव श्रियं बिभ्रतीति निदर्शनया योग्यपदेनोत्सेक्यत्वादिभिश्चम-त्कारिणी संभावना जायते ॥

असंभवभणितिर्यथा—

'क्व पेयं ज्योत्स्नाम्भो वदनबिसवल्लीसरणिभि-
र्मृणालीतन्तुभ्यः सिचयरचना कुत्र भवति ।
क्व वा पारीमेयो बत बकुलदाम्नां परिमलः
कथं स्वप्नः साक्षात्कुवलयदृशं कल्पयतु ताम् ॥ ६० ॥'

अत्र ज्योत्स्नादीनां मृणालादिभिः पेयत्वादेरसंभवादियमसंभवभणि-तिर्निषेधरूपा ॥

**क्व पेयमिति ।** स्वप्नस्य साक्षात्कल्पने सामर्थ्यमसंभावितं तदेवमेवोच्यमानं तथा शोभामुन्मीलयतीति क्व पेयमित्यादि प्रतिवस्तुना- निर्देशव्यङ्ग्यारक्तिसुष-माविस्तारं कुर्वाणा भवत्यसंभवभणितिः । पारी भाण्डभेदः ॥

विशेषभणितिर्यथा—

'रेवतीदशनोच्छिष्टपरिपूतपुटे दृशौ ।
वहन्हली मदक्षीबः पानगोष्ठ्यां पुनातु वः ॥ ६१ ॥

अत्र रेवतीदशनोच्छिष्टयोरपि हलिदृशोर्यत्पूतत्वं, मदक्षीबस्यापि हलिनो यत्पावनत्वमसौ विशेष इतीयं विशेषभणितिर्निषेधे विधिरूपा ॥'

**रेवतीति** । दशनोच्छिष्टं चुम्बितम् । उच्छिष्टक्षीबयोर्न कचित्पूतत्वं पावनत्वं वा दृष्टचरमिति हलिनेत्रपुटहलिनोर्विधीयमानं देवताचरितस्य लोकोत्तरतां गमयतीति निषेधप्रसङ्गे विधिरूपेयं भणितिः ॥

संवृत्तिभणितिर्यथा—

'आभरणस्याभरणं प्रसाधनविधेः प्रसाधनविशेषः ।
उपमानस्यापि सखे प्रत्युपमानं वपुस्तस्याः ॥ ६२ ॥'

अत्र प्रसिद्धवर्णनाप्रपञ्चविधेराभरणस्याभरणं वपुरित्यादिवाक्यैः संवरणादियं संवृत्तिभणितिर्विधौ निषेधरूपा ॥

**आभरणस्येति** । अत्र चन्द्रमुखी दुग्धधवलनयना बिम्बोष्ठी करिकुम्भस्तनीत्यादिकविसमयप्रसिद्धवर्णनाप्रपञ्चप्रसङ्गे यथोक्तरूपेण तस्य संकोचो निषेधस्तत्प्रतिष्ठाभणितिरलंकरणमेवानया क्रियत इति कान्तिविशेषं व्यञ्जयन्ती विधौ प्रसक्ते निषेधरूपा भवति ॥

आश्चर्यभणितिर्यथा—

'ज्योतिर्भ्यस्तदिदं तमः समुदितं जातोऽयमब्धः शिखी
पीयूषादिदमुच्छ्रितं विषमयं च्छायाप्रजन्मातपः ।
को नामास्य विधिः प्रशान्तिषु भवेद्गाढं द्रढीयानयं
ग्रन्थिर्यत्प्रियतोऽपि विप्रियमिदं सख्यः कृतं सान्त्वनैः ॥ ६३ ॥'

अत्र ज्योतिःप्रभृतिभ्यस्तमःप्रभृतीनामुत्पत्तेराश्चर्यरूपत्वादियमाश्चर्यभणितिर्निषेधविधौ विधिनिषेधरूपा ॥

**ज्योतिर्भ्य इति** । प्रियो हि नाप्रियमाचरतीत्युत्सर्गसिद्धाप्रियानाचरणं दैव-

गत्वा शठे संभाव्यमानमाश्चर्यमुन्मुद्रयत्सामान्यपरम्परया प्रेमाविष्टमन्तःकरणमावेदयति । यदि ज्योतिरादेस्तमःप्रभृतीनामुद्गमः स्यादपि प्रियादप्रियमिति सर्वथैव निषेधे विधातव्ये प्रत्यक्षपरिकल्पितस्यान्यथाकर्तुमशक्यत्वात्प्रमेयविरोधमसहमाना विधत्ते च निषेधति चेति निषेधविधिप्रसङ्गे विधिनिषेधरूपा भणितिर्भवति ॥

कल्पनाभणितिर्यथा—

'दृश्यं दृशां सहस्रैर्मनसामयुतैर्विभावनीयं च ।
सुकृतशतकोटिभोग्यं किमपि वयः सुभ्रुवः स्वदते ॥ ६४ ॥'

अत्र वयोरामणीयकातिशयस्य दृक्सहस्रादिभिरेवावलोकनीयत्वादियोग्यताकल्पनादियं कल्पनाभणितिर्विधिनिषेधे निषेधविधिरूपा ॥

**दृश्यमिति** । यद्यपि द्वाभ्यामेकेनाल्पीयसा च नेत्राभ्यां मनसा सुकृतेन च वयसो यौवनस्य दृश्यत्वविभावनीयत्वभोग्यत्वानि प्रतीतिमुखमवतीर्णानि, तथापि जीवितसर्वस्वभूतायामितरकामिनीसाधारण्यामितरसाधारण्यमसहमानो दृगादिसामान्ये सहस्रत्वादिकं कल्पयन्साधारणधर्मनिषेधसरणिमारुह्य विशेषं विधत्ते । सेयं भणितिर्विधिनिषेधप्रसङ्गे निषेधघटकद्वारा विधिरूपा भवतीत्यास्तां विस्तरः ॥

**वाक्ये शब्दार्थयोः सम्यग्रचना गुम्फना स्मृता ।**
**शब्दार्थक्रमपर्यायपदवाक्यकृता च सा ॥ ५३ ॥**

**वाक्य इति** । एकार्थप्रतिपादनावच्छिन्नः शब्दसमुदायो वाक्यम्, तस्मिन्विषयभूते आनुपूर्व्येण ग्रन्थनं रचना, सा कथमतिप्रसक्ताप्यलंकार इत्यत आह—**सम्यगिति** । प्रकृतपरिपोषाधानलक्षणमौचित्यमापन्नेत्यर्थः । वाक्यत्वमर्थशब्दाभ्यां विशेषणविशेष्याभ्यां व्यवतिष्ठते । तेन द्वयोरेव गुम्फना समाप्यत इत्याशयेन शब्दार्थयोरित्युक्तम् । तत्र शब्दो द्विविधः—वाच्यः, उपाधिश्च । प्रतिपादकशब्दो द्विरूपः पदवाक्यभेदात् । पदं द्विधा—पर्यायभूतरूपम्, अतथारूपं च । तदेतद्विवक्षावैचित्र्यमङ्गीकृत्य विभजते—**शब्द इति** । अप्रतिपादकः शब्दः शब्दपदेनोक्तः । अर्थो वाच्यः । क्रमग्रहणमुपाध्युपलक्षणम् ॥

तासु शब्दकृता यथा—

'रामाभिषेके मदविह्वलायाः कराच्च्युतो हेमघटस्तरुण्याः ।
सोपानमासाद्य चकार शब्दं ठंठंठठंठंठठठंठठंठः ॥ ६५ ॥'

सेयं ठंठमित्यादेर्निरर्थकस्य श्लोकपादस्यार्थानुगुण्येन वाक्ये रहितत्वाच्छब्दरचना ॥

**रामेति** । राज्याभिषेकोत्सवजातहर्षायाः करात्प्रच्युतस्य सोपानपरम्परासु स्खलतः काञ्चनकलशस्य भूभागप्राप्तिर्यावत्क्रमेणोच्चरन्ती शब्दमालानुकृतेति प्रकृतार्थानुगुण्यम् । एवं हि करच्युतमपि न संभावयतीति कोऽपि मदप्रकर्षो व्यज्यते ॥

अर्थकृता यथा—

'दिक्कालात्मसमैव यस्य विभुता यस्तत्र विद्योतते
यत्रामुष्य सुधीभवन्ति किरणा राशेः स यासामभूत् ।
यस्तत्पित्तमुषः स यस्य हविषे यस्तस्य जीवातवे
वोढा यद्गुणमेष मन्मथरिपोस्ताः पान्तु वो मूर्तयः ॥६६॥'

सेयं व्योमादीनामष्टानामपि महेशमूर्तिलक्षणानामर्थानामुत्तरोत्तरसंकलनया रचितत्वादर्थरचना ॥

**दिक्कालेति** । दिक्कालात्मतुल्यं सर्वमूर्तसंयोगाश्रयतालक्षणं विभुत्वमाकाशस्यैव तस्मिन्नर्थाक्षिप्ते यच्छब्दोऽयमुद्देश्यगामी निविशते तमुपजीव्य तच्छब्देन प्रतिनिर्देशो युक्तः । आकाशे विशेषेण चन्द्रतारादितेजोभिभवसामर्थ्यलक्षणेन द्योतते भगवानादित्य इति यच्छब्देन तमुद्दिश्योत्तरवाक्येऽदसा प्रतिनिर्दिष्टवान् । कर्णगत्या प्रतिफलिताः सूर्यकिरणाः सलिलमय्येंऽप्राशिन्येव सुधाव्यपदेशं लभन्ते, तत्रैव यच्छब्दो निविष्टस्तदुपनीतमर्थमुत्तरस्तच्छब्दो विषयीकरोतीत्यादि—अपामेव राशेश्चन्द्रो जातस्तासां पित्तं वह्निस्तस्य सायंप्रातराहुतये यजमानः स वायुना जीवति । न च पृथिवीगुणं गन्धं वहतीति पूर्वपूर्वसंकलनेनोत्तरवाक्यार्थरचना विहितेति । यद्यपि चार्थगुम्फे शब्दगुम्फो ध्रुवभावी, तथापि प्रथमानुसंधेयमर्थगुम्फनमेवात्र प्रधानमिति तेनैव व्यपदेशो युक्त इत्याशयवान्व्याचष्टे—**अत्रेति**। यदीयं शृङ्खला न प्रतिसंधीयते कथं परमेश्वरमूर्तयोऽष्टौ लभ्यन्त इति भावः ॥

क्रमकृता यथा—

'नीलाब्जानां नयनयुगलद्राघिमा दत्तपत्रः
कुम्भावैभौ कुचपरिकरः पूर्वपक्षीचकार ।

भ्रूविश्रान्तिर्मदनधनुषो विभ्रमानन्ववादी-
दृङ्कञ्ज्योत्स्नाशशधररुचं दूषयामास यस्याः ॥ ६७ ॥'

अत्र पत्रप्रदानपूर्वपक्षोपन्यासानुवाददूषणोद्भावनानां बुधजनप्रसिद्ध-क्रमेण रचितत्वादियं क्रमरचना ॥

**नीलाब्जेति**। पत्रदाने स्पर्धा व्यज्यते। सा च सादृश्यपर्यवसायिनीति प्रतीयमानोपमा। इभकुम्भापूर्वपक्षीकरणेन कुचाभोगस्य सिद्धान्तभावोऽवगम्यते। तथा च व्यतिरेको ध्वनितः। अनुवादेनाप्युपमा प्रतीयते दूषणेन व्यतिरेक इति प्रकृतपर्यवसाने समासोक्त्या यत्र दानादीनां विद्वद्वादिप्रसिद्धानां समरचनमिर्मथ एव क्रम उपाधिभूतो ग्रथित इत्युदाहरणव्याख्यानग्रन्थार्थः ॥

पर्यायकृता यथा—

'कणइल्लि च्चिअ जाणइ कुन्तपलस्साइ कीरसंलवई।
पूसअभासं मुञ्चसु ण हु रे हं घत्रवाआडी ॥ ६८ ॥'
[शुक्येव जानाति शुकप्रलपितानि कीरसंलापिनी।
कीरभाषां मुञ्च न खलु रेऽहं धृष्टशुकी ॥]

सेयं शुकनामपर्यायाणामर्थानुगुण्येन रचितत्वात्पर्यायरचना ॥

**कणइल्लि च्चिअ इति**। केनचिद्विटेन शुकभाषामनुकुर्वता प्रियायाः परिहास आरब्धः। सा तस्य दुर्विदग्धत्वमाकलयन्ती तदुचितमुत्तरमदात्, शुकप्रलपितानि किल शुकी जानाति नान्या। न चाहं शुकी। ततो विफलस्तवायं प्रयास इत्यर्थः। अत्र कुन्त-कीर-पूस-शब्दाः शुकपर्यायाः। कणइल्ली-वाआडी-शब्दौ शुकीपर्यायौ। तत्रापि कीरशब्दस्तत्समः। अन्ये देशीरूपाः। तदेतेषां पर्यायाणां यथोक्तरूपा-नुगुणानामेकत्रवाक्ये गुम्फनमेव कविसंरम्भगोचर इति ॥

पदकृता यथा—

'लोलल्लाङ्गूलवल्लीवलयितबकुलानोकहस्कन्धलोलै-
र्गोलाङ्गूलैर्नदद्भिः प्रतिरसितजरत्कन्दरामन्दिरेषु।
खण्डेषूद्दण्डपिण्डीतगरतरलनाः प्रापिरे येन वेला-
मालम्ब्योत्तालतालस्फुटितपुटकिनीबन्धवो गन्धवाहाः ॥ ६९ ॥'

अत्र लाङ्गूलवल्लीवलयितवकुलैर्नदद्भिर्गोलाङ्गूलैः प्रतिरसितजरत्कन्दरामन्दिरेषु खण्डेषु उद्दण्डपिण्डीतगरतरलसाः पुटकिनीबन्धवो गन्धवाहा वेलामालम्ब्य येन प्रापिरे इत्यतोऽधिकानामपुष्टार्थानामपि पदानामनुप्रासाय च्छन्दःपूरणाय चार्थानुगुण्येन रचितत्वादियं पदरचना ॥

**लोलल्लाङ्गूलवल्लीति** । लाङ्गूलवल्लीवलयितेत्यादि यथोक्तवाक्यविरचनमात्रेणैव प्रयोजनपरिग्रहे सिद्धे यदधिकानां लोलद्वल्लीप्रभृतिपदानामावापस्तेन विना नोचितानुप्रासनिद्धिर्न च तया विना वृत्तौचिती समाप्यते । न वा तामन्तरेण लाङ्गूलादीनामभिमतास्ते विशेषाः प्रतीयन्त इति पल्लवप्रतिष्ठैव हि सरस्वती सहृदयानावर्जयतीति—'वाक्यप्रतीतिमात्रार्थमुपात्तेषु पदेषु यः । उपस्कारः पदैरन्यैः पल्लवं तं प्रचक्षते ॥ अपल्लवं तु यद्वाक्यं कविभ्यस्तन्न रोचते । प्रयुज्यते तथाभूतमुदीच्यैः कविगर्हितम् ॥' तदिदमाह—**अत्रेत्यादि** ॥

वाक्यकृता यथा—

'पतिश्वशुरता ज्येष्ठे पतिदेवरतानुजे ।
मध्यमेषु च पाञ्चाल्यास्त्रितयं त्रितयं त्रिषु ॥ ७० ॥'

इह महतोऽर्थस्याल्पीयसा ग्रन्थेनाभिधानमिति व्युत्क्रमेणापि ग्रन्थलाघवाय वाक्यार्थो रचित इतीयं वाक्यरचना ॥

**वाक्येति** । वाक्यरचना तु महावाक्य एव भवतीति । तथाहि । पतिश्वशुरतेत्यादिकमल्पाक्षरमेव वाक्यं महतोऽर्थराशेः समर्पकमिति भावयतां सहृदयानां कवित्वशक्तिप्रकर्षमिव प्रकाशते । अत एव शक्तितिरस्कारादाद्यन्तावभिधाय मध्यमाभिधाने क्रमभ्रंशोऽपि तिरस्क्रियत इत्याह—**अत्रेति** ॥

**शय्येत्याहुः पदार्थानां घटनायां परस्परम् ।**
**सा प्रक्रान्तेन कस्मिंश्चिदप्रक्रान्तेन कुत्रचित् ॥ ५४ ॥**

**शय्येति** । किंचिदेकं वस्तु बुद्धौ समाधाय तदधिकारप्रबन्धरचनायामधिकस्यान्तरान्तरा प्रकृते योजना शय्या । पदार्थानां प्रस्तुताप्रस्तुतवस्तूनाम् । तच्च योजनीयं शब्दार्थभेदेन द्विविधम् । तत्र वस्तुवाक्ययोरेव योजना महाकविप्रबन्धेषु दृश्यते । अर्थस्तु प्राकरणिकार्थोपयोगी तदनुयोगी चेति द्विविधः । द्वितीयोऽप्यतिक्रान्तोऽतथाभूतश्चेति पूर्ववद्विभागवाक्यं व्याख्येयम् ॥

अतिक्रान्तेन कुत्रापि पदार्थे वर्णयोः क्वचित्।
वाक्यार्थे वाक्ययोः क्वापि प्रकीर्णानां च दृश्यते ॥५५॥

अतीति। पदार्थे पदसिद्ध्यर्थम्, एवं वाक्यार्थमिति॥

तासु प्रक्रान्तघटना यथा—

'स तथेति प्रतिज्ञाय विसृज्य कथमप्युमाम्।
ऋषीञ्ज्योतिर्मयान्सप्त सस्मार स्मरशासनः॥ ७१॥'

सेयं सप्तर्षीणामागमनस्य प्रक्रान्तस्यैव घटना॥

सेयं सप्तर्षीणामिति। गौरीपरिणयप्रापकतया प्रकरणसंगतसप्तर्षिवृत्तान्तः॥

अप्रक्रान्तघटना यथा—

'अत्राप्युदाहरन्तीममितिहासं पुरातनम्।
निषादस्य च संवादमृषेः संवरणस्य च॥ ७२॥'

सेयमप्रक्रान्तस्य निषादसंवरणसंवादस्य घटनादप्रक्रान्तघटना॥

इयमप्रक्रान्तस्येति। संवरणनिषादसंवादस्य पूर्वापरप्रकरणानुपयोगेऽपीतिहासरूपेण संगतिः॥

अतिक्रान्तघटना यथा—

'तस्य चक्रुश्चमत्कारं व्यतीतसमया अपि।
सितार्द्रमुकुलोद्भेदाः कदम्बवनराजयः॥ ७३॥'

इयमतिक्रान्तस्यापि कदम्बवनराजीनामार्द्रमुकुलोद्भेदस्य विरहिमनश्चमत्कारकारिणो रामस्य स्मृतिद्वारेण घटनादतिक्रान्तघटना॥

इयमतिक्रान्तस्यापीति। कदम्बकुसुमोद्भेदस्य प्रत्यक्षस्यैव विरहिजनतातङ्कदायित्वं संभवतीति कथमतीतस्य तद्भयस्येत्युक्तं 'स्मृतिद्वारेण' इति। संकल्पवशेन प्रत्यक्षायमाणस्येत्यर्थः। एवमनागतयोजनापि गुणादिना बोद्धव्या॥

पदघटना यथा—

'छिन्नेन पतता वह्नौ यन्मुखेन हठात्कृते।
स्वेतिहेति हरेणोक्तेः स्वाहासीत्सैष रावणः॥ ७४॥'

इयं स्वेतिहेतिवर्णाभ्यां स्वाहेति पदस्य घटितत्वात्पदघटना ॥

**इयं स्वेति** । स्वाहाकारप्रदानो होमस्तत्र सद्यश्छिन्नेन शिरसा प्राणशेषयोगात् पदार्धमात्रे निष्पादिते तदैव भूतकरुणासंतानशान्तात्मना परमेश्वरेण खेदाविष्कारवाची हाशब्दः प्रयुक्तस्तेनैव निरन्तरमुच्चरता स्वाहापदं सिद्धमिति ॥

वाक्यघटना यथा—

'हंस प्रयच्छ मे कान्तां गतिस्तस्यास्त्वया हृता ।
विभावितैकदेशेन स्वेयं यदभियुज्यते ॥ ७५ ॥'

इयं पूर्वशास्त्रनिबद्धस्योत्तरार्धस्य तदर्थाननुयायिनापि प्रस्तुतार्थाविरुद्धेन पूर्वार्धेनैकवाक्यतयैव घटितत्वाद्वाक्यघटना ॥

**इयं पूर्वशास्त्रेत्यादि** । सुगमम् ॥

प्रकीर्णघटना यथा—

'एक्कहिँ अच्छिहिँ सावणु अण्णहिँ भद्दवउ
माहउ महिअलसत्थरि गण्डत्थल सरउ ।
अङ्गहिँ गिम्ह सुहच्छिइ तिलवण मग्गसिरु
मुद्धिहिँ मुहपङ्कअसरि आवासिउ सिसिरु ॥ ७६ ॥'

[एकस्मिन्नक्षिण श्रावणोऽन्यस्मिन्भाद्रपदः
माधवो महीतलस्रस्तरे गण्डस्थले शरत् ।
अङ्गे ग्रीष्मः सुखासिका तिलवने मार्गशीर्षः
मुग्धाया मुखपङ्कजसरसि आवासितः शिशिरः ॥]

अत्र श्रावणादीनामयुगपद्भावित्वेन विप्रकीर्णानां घटनादियं प्रकीर्णघटना । प्रकीर्णशब्दश्चायं शेषवाची । तेनान्यासामपि प्रकीर्णघटनानामिहावकाशो भवति, तेन या इमा महाकविप्रबन्धेषु मुख्यगौणीलक्षणास्तद्भावापत्तिरुपचरिता लक्षितलक्षणेति शब्दवृत्तयस्ता अपीह श्रूयन्ते । यत्रादितः षट्स्वाधारवचनेषु मुग्धाया इति संबन्धिपदे च

मुख्या । शेषयोर्द्वयोराधारवचनयोर्गौणी । श्रावणादिषु चतुर्षु मासवच-नेषु लक्षणा । षट्स्वपि चाधेयवचनेषु वर्षादिषु लक्षिताभिहितेष्वपि यु-गपदसंभवत्सु श्रुतार्थापत्तिलभ्या तावद्भावापत्तिः। आवासित इति क्रिया-पदं चोपचरिताव्यक्तमेव प्रतीयते । लक्षितलक्षणापि चैतास्वेव व्याख्या-नत उन्मिषति । तथाह्यावासितशब्दोऽयमभिमतप्रदेशनिवेशितमहापरि-च्छदे महाराजादौ निरूढाभिधानशक्तिः । स उपचारेण श्रावणादिषु प्रयुज्यमानस्तेषामपि महत्त्वमभिलक्ष्य महापरिच्छदतां महासंभवत्वं च लक्षयन् प्रस्तुताया अपि प्रवृत्तेर्महान्तमनुबन्धं लक्षयति । ते च युगप-ल्लोचनादौ चानुपपद्यमानस्थितयः स्वशब्दशक्तितस्तत्र तत्र च निवेश्य-मानाः स्वधर्मसंपदः प्रत्यासन्नायां तद्धर्मसंपदमुपलक्षयन्ति । असावसौ विरहवत्या अपि वियोगवेदनातिशयं लक्षयन्ती कमितरि स्नेहातिशयं लक्षयति । तत्र श्रावणो भाद्रपद इत्येताभ्यामवयवाभ्यां वर्षर्तुर्लक्ष्यते । स च लोचनयोरनुपपद्यमानस्थितिरपि विभक्तिश्रुत्या निवेशितः पयःपृ-षत्प्रवाहलक्षणायाः स्वधर्मसंपदः प्रत्यासन्नामविच्छिन्नाश्रुसंपदमुपलक्षय-न्समागमोत्काया उत्कण्ठातिशयं लक्षयति । माधव इत्युत्तरावयवेन व-सन्तो लक्ष्यते । सोऽपि महीतलस्रस्तरेऽनुपपद्यमानस्थितिः प्राग्वदेव शब्दशक्त्या निवेशितः कुसुमकिसलयमृणालकमलिनीदलादिकायाः स्वधर्मसंपदः समासन्नां शिशिरोपकरणसामग्रीमुपलक्षयन्कामवत्याः शरी-रान्तस्तापं लक्षयति । शरदित्यनेन ऋतुविशेषोऽभिधीयते । सा गण्ड-योरनुपपद्यमानस्थितिः प्रशंसावचनस्यापि स्थलशब्दस्यानुस्मरणशक्त्या समाकृष्यमाणकाशकुसुमहंसागमनकुमुदसरःप्रसादचन्द्रातपादिकायाः स्व-धर्मसंपदः समासन्नं गण्डयोः पाण्डुभावं लक्षयन्मृगेक्षणाया विरह-कार्श्यमुपलक्षयति । ग्रीष्म इत्यनेनापि ऋतुविशेष एवोच्यते । सोऽप्यङ्ग-

नाङ्केऽनुपपद्यमानः सूर्यांशुकार्कश्यप्रतप्तपांसुतापपरुषोष्मानिलत्वदावाग्नि-कालुष्यादेः स्वधर्मसंपदः समानानीकभूताभूतपूर्वानङ्गज्वरलिङ्गसंपद-मुपयन्नष्टमीं कामावस्थामुपलक्षयति । मार्गशीर्ष इत्यनेन तु पूर्वावयवेन हेमन्तो लक्ष्यते। तेन च यथा हेमन्ते तिलवनं लूयते तथा तस्याः सुखा-सिका सांप्रतं लूयत इति लक्षितेनातिशयिनी मनःपीडोपलक्षिता भवति । का पुनः सुखासिका तिलवनयोः समानधर्मता येयं स्नेहनिर्भरता नाम । अभिसारिकाणां च प्रायेण तिलवनाब्जिनीखण्डयोरेव बहुमानप्रसिद्धिः । यदित्थमाहुः—

'अत्तन्तहरमणिज्जं अम्हं गामस्स मण्डणीहूअम् ।
लुअतिलवाडिसरिच्छं सिसिरेण कअं भिसिणिसण्डम् ॥ ७७ ॥'

[अत्यन्तरमणीयमस्माकं ग्रामस्य मण्डनीभूतम् ।
लूनतिलवाटीसदृशं शिशिरेण कृतमब्जिनीखण्डम् ॥]

अत एवायमुत्तरवाक्ये कमलसरःशब्देनाब्जिनीखण्डमपि निर्दि-शति । तद्यथा—

'मुद्धिहि मुहपङ्कअसरि आवासिउ सिसिरु' ।
[मुग्धाया मुखपङ्कजसरसि आवासितः शिशिरः ।]

तत्र शिशिर इत्यनेन ऋतुविशेषेण मुग्धामुखेऽपि पद्मसरसीव शब्दशक्त्या निवेशितेन कमलवनोपप्लवादेः स्वधर्मसंपदो लोकप्रतीतायाः प्रत्यासत्त्या मुग्धामुखाम्भोरुहलोचनोत्पलस्मितकुसुमदशनकेसरा-देश्छायापरिम्लानिर्लक्ष्यमाणा विप्रलम्भानुभावप्रकर्षमुपलक्षयति । शि-शिरलक्ष्मीवर्णनप्रस्तावाच्च 'मुखमर्धं शरीरस्य सर्वं वा मुखमुच्यते' इति प्रस्थानप्राधान्यलक्षणया सर्वर्तुभ्यः शिशिर एव प्रधानमित्यपि लक्षितं भवति ॥

**अत्र श्रावणादीनामिति।** प्रकीर्णं विकीर्णमनेकत्र प्रतीतमिति यावत्। तद्द्विविधम्—कालतः, देशतश्च। अत्र हि श्रावणादिमासर्तुषट्कस्य युगपदसंभवत एकत्र विरहिणीशरीरे युगपद्भावो निबद्धः, सगुणवृत्तिव्यपाश्रयेण श्रावणादिपदे प्रतिपाद्यमानः प्रवासविप्रलम्भप्रकर्षमावेदयतीति। एवं देशविकीर्णघटनाप्युदाहार्या। यथा—'अमृतममृतं चन्द्रश्चन्द्रस्तथाम्बुजमम्बुजं रतिरपि रतिः कामः कामो मधूनि मधून्यपि। इति न भजते वस्तुप्रायः परस्परसंकरं तदियमबला धत्ते भावान्कथं सकलात्मकान्॥' यस्त्वत्र सिद्धादिभेदः कश्चिदुपवर्णितः स तथा न चमत्कारकारीति ग्रन्थगौरवभयादुपेक्षितोऽस्माभिः। तत्तदनेकासाधारणरूपाण्यपि प्रकीर्णानि प्रकीर्णपदेन ग्राह्याणि। तेषामनुक्तान्य (?) तया वोपग्रहोऽपि प्रयुज्यत इत्याह—**प्रकीर्णशब्दश्चायमिति।** व्याख्यानान्तरप्रयोजनमाह—**तेनेति।** शब्दस्यार्थप्रतिपादनशक्तिरभिधा। सा त्रिधा—मुख्या, गौणी, लक्षणा च। तासु मुखमिव प्रथमं यस्यामर्थः प्रतीयते सा मुख्या, तथाभूतार्था तद्भावापत्तिश्च। तत्रा- वान्तरार्थसंबन्धविषया तथाभूतार्था। यथा—'स्वात्मेन्दुवह्निपवनार्कमहीपयोभिरष्टा- भिरेव तनुभिर्भवता समस्ते। व्याप्ते जगत्यपरमिच्छति योऽत्र वक्तुं कोऽन्यो गतत्र- पतया सदृशोऽस्ति तेन॥' सैवार्थान्तरस्वार्थसंबन्धविषया तद्भावापत्तिः। अतथाभू- तस्य तथात्वापादनं हि सा। अत एव स्वतोऽन्यतो वा स्वार्थावच्छिन्नस्य साक्षादभि- धानशक्तिरेव मुख्येत्याचार्याः। यथा—'कमला अण्णसणीआ हंसा उड्डाविआण अपि उच्छा। केण वि गामतडाए अब्भं उत्ताणअं वूढम्॥' गुणव्यवहितार्था गौणी। [सा द्विधा] गुणनिमित्ता उपचारनिमित्ता च। तत्र द्वयोर्द्रव्यवचनयोर्यत्र सामानाधि- करण्येन वैयधिकरण्येन वा प्रयोगे विशेषणविशेष्यभावान्यथानुपपत्त्या प्रतीयमाना- भिधीयमानगुणद्वारकसंबन्धो भवति सा गुणनिमित्ता। यथा—'पडिवक्खमण्णुपुञ्जे लावण्णकुडे अणङ्गगअकुम्भे। पुरिससअहिअअभरिए कीस खलन्ती थणे वहसि॥' मुख्यया गौण्या वान्यविशेषणस्यान्यत्र प्रयोग उपचरिता सापि गुणयोगमुपजीवन्ती गुणवृत्तिरेव। एतावांस्तु विशेषो यद्गुणनिमित्तायामभिधेयगुणयोगः, इह तु स्वाभिधेयविशेष्यगुणयोग इति। यथा—'परार्थे यः पीडामनुभवति निर्व्याजमधुरो यदीयः सर्वेषामिह खलु विकारोऽप्यभिमतः। न संप्राप्तो वृद्धिं सपदि भृशमक्षे- त्रपतितः किमिक्षोर्दोषो यन्न पुनरगुणाया मरुभुवः॥' स्वार्थसंबन्धव्यवहिता

१. 'प्रतिपक्षमन्युपुञ्जौ लावण्यकुटावनङ्गगजकुम्भौ।
पुरुषशतहृदयधृतौ किमिति स्खलन्ती स्तनौ वहसि॥' [इति च्छाया।]

लक्षणा । तदुक्तम्—'अभिधेयाविनाभूतप्रतीतिर्लक्षणेति या । सैषा विदग्धवक्रोक्तिजीवितं वृत्तिरिष्यते ॥' सा द्विधा—शुद्धा, लक्षितलक्षणा च । तत्र साक्षात्स्वार्थसंबन्धाविनाभूतविषया शुद्धा । यथा—'यत्तालीदलपाकपाण्डुवदनम्', 'अभिनवकरिदन्तच्छेदपाण्डुः कपोलः' इति । यया पूर्वपूर्वलक्षितमेव लक्ष्यते सा लक्षितलक्षणेति केचित् । यथा—'मधु द्विरेफः कुसुमैकपात्रे', 'भीमो भीमपराक्रमः' इति । अत्र हि द्विरेफादिना शब्देन लक्षित एव भ्रमरप्रभृतिर्लक्ष्यते न तु कुररादिः । अन्ये तु लक्षणाव्यवहिता लक्षणा लक्षितलक्षणेत्याहुः । यथा—'सुवर्णपुष्पां पृथिवीं चिन्वते पुरुषास्त्रयः । शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ॥' तद्भावापत्त्यादिविशेषसमभिव्याहारेण मुख्यादिशब्दास्तदितरतथाभूतत्वागोचरा इति पूर्ववद्व्याख्येयम् । क पुनः पदैकावृत्तिरित्यत आह—**अत्रेति ।** 'एक्कहि अच्छिहिं अण्णहिं महिअलसत्थरे गण्डत्थले अङ्गहिं' इत्यादि षडाधारवचनाः । अत्र यद्यपि गण्डस्थलपदं गौणमेव, तथाप्यनादिप्रयोगयोगितया मुख्यकल्पमिति षट्स्वाधारवचनेष्वित्युक्तम् । अङ्गादिपदानि च स्वार्थविशिष्टान्यपराण्येव प्रयुक्तानीति मुख्यैव वृत्तिः । एवं मुग्धाया इति संबन्धिपदेऽपि । 'मुहच्छिहतिलवणे मुहपङ्कअसरि' इति द्वावाधारवचनौ शेषौ । अत्र तिलवनसरःपदयोः स्नेहनिर्भरत्वसरसत्वलक्षणगुणद्वारकैव मुखासिकामुखपङ्कजयोर्वृत्तिः । मुखपङ्कजसरसीत्यत्र यद्यपि पदद्वयं गौणं तथापि पङ्कजपदस्य वृत्तिरभिधातुल्येति न कविसंरम्भगोचरत्वेन व्यवहारोऽयुक्तः । 'सावण-भद्दवअ-माहव-मग्गसिरु' इति चत्वारो मासवचनाः । ते च स्वार्थसंबन्धव्यवहितं वर्षाप्रभृतिसमुदायं लक्षयन्तीति वक्ष्यमाणरीत्या वर्षादयः षडाधेयवचनास्ते च विरहवतीशरीरे युगपच्चासंभवदवस्थितयो जलादिसंपदादिस्वस्वप्रवृत्तिनिमित्ताध्यासेन प्रयुज्यमानास्तद्भावापत्तिरूपां वृत्तिमासादयन्ति । अस्याश्च विवर्तपरिणामाध्यासादयः षट्प्रकारा गौरवभिया न दर्शिताः । श्रुतार्थानुपपत्तिमूला कल्पना श्रुतार्थापत्तिः । राजादेरासिते आवासितशब्दो मुख्यवृत्त्यैव विशेषणतया रूढः । स स्वविशेषगुणव्यवहितेऽर्थान्तरे प्रयुक्तो गौणीवृत्तिमनुभवन् वसन्तादेरपि विशेषणतामासादयति । लक्षणाव्यवहिता लक्षणा लक्षितलक्षणा । सा कथमावासितेतिशब्दे संपद्यत इत्यत आह—**स उपचारेणेति ।** कथंचित्सारूप्येण श्रावणादिषु प्रयोगादुपचारस्तमुपजीव्य प्रयुक्तः स्वार्थाविनाभूतं महत्त्वादिकं प्रकृतेषु लक्षणया संक्रामयतीति । आद्या लक्षणा तद्व्यवहितां द्वितीयामाह—**प्रस्तुताया अपीति ।** आवासितस्यापि हि यथोक्तविशेषणस्य

परदुर्गग्रहणादौ सहानुबन्धो दृष्टः। स इह प्रस्तुतायां विरहवतीसंतापलक्षणायां प्रवृत्तौ लक्ष्यत इत्येकलक्षणाव्यवधानेनेयं लक्षणा। एवं लक्षणाद्वयव्यवधानेनापि भवतीत्याह—**ते चेति**। श्रावणादयः स्वधर्मसंपदो निरन्तरवर्षणादेः स्वार्थाविनाभावेन लक्षितायाः प्रत्यासन्ना सदृशी तेषां लोचनादीनां धर्मसंपदश्रुप्रभावादिलक्षणा लक्ष्यत इति द्वितीया लक्षणा। तत्पुरःसरां तृतीयामाह—**असावसाविति**। एवं लक्षणात्रयपूर्वापि लक्षणा बोद्धव्येत्याह—**कमितरीति**। स्नेहप्रतीत्या तु विभावादिसंवलितया रसो व्यज्यते, न तु लक्ष्यत इत्यन्यत्र विस्तरः। कस्याः पुनः स्वधर्मसंपदः प्रत्यासन्ना का तद्धर्मसंपदित्यतो विवेचयति—**तत्रेति**। यदि श्रावणादिपदेषु समुदायलक्षणा न स्यात्तदा मासानुपक्रम्य ऋतूनामभिधाने प्रक्रमभेदो भवेत्! न भवेच्च तत्तदृतुप्रतीत ऋतुसंपत्प्रतीतिः क्वचिदिति युक्तैव समुदायलक्षणा। **एताभ्यामिति**। प्रत्येकं न तु पदद्वये लक्षणा संभवति। **विभक्तिश्रुत्येति**। सप्तमीप्रथमाविभक्तिभ्यामाधाराधेयभावः स्वशक्त्या प्रतिपाद्यते तदनुपपत्त्यार्थान्तरलक्षणा प्रादुर्भवति। एवं चैत्रवैशाखसमुदायात्मनो वसन्तस्योत्तरावयवो वैशाखस्तद्वाचकेऽपि माधवपदे समुदायलक्षणाद्वारेण लक्षणा भवति। **प्रशंसावचनस्यापीति**। गर्भीकृतसारूप्या हि व्याघ्रादय उपमेयवाचिभिः समस्यन्ते। तच्च सारूप्यं प्रकर्षलक्षणमेवेति प्रशंसापरत्वे स्थितेनाभिधेयमप्रतीत्यसारूप्यं वा रूपान्तरं वा प्रत्येतुं न शक्यत इत्यभिधेयप्रतीत्यनुनिष्पादिनी घण्टानुस्वानसोदरा स्वधर्मसंपद्यथोक्ता प्रतीयते। स्वने किल शरदाकाशकुसुमहंसादिका स्वसंपद्भिस्तार्यते। न मुखचन्द्रादिवन्मुखानिकातिलवनयोः सादृश्यप्रतीतिर्न च तदभिधीयमानं किंचिदत्रास्तीति पृच्छति—**का पुनरिति**। मा भूत्तथा प्रसिद्धिः कवेरभिप्रायारूढा तु प्रतीयत इत्युत्तरमाह—**येयमिति**। न स्नेहो नाम द्वयोरेकः कश्चिदस्ति न चानभिधीयमानमपि सादृश्यं शब्दसामान्यमाश्रयत इत्यतः प्रकारान्तरमाह—**अभिसारिकाणां चेति**। कथमेतदवगतमित्यत आह—**यदित्थमिति**। ननु कमलिनीशब्दस्यात्र बहुमानगोचरता प्रतिपादिता, न तु तिलवनस्येत्यत आह—**अत एवेति**। उपमानोपमेययोर्द्वयोरपि कामिनीबहुमानगोचरतां वितरन्ती शिशिरेण सांप्रतं तिलवाटिकालवनमपि वर्तत इत्यभिप्रैतीति भावः। 'मुखमर्धं शरीरस्य' इत्यादिन्यायेन मुखशब्दः प्राधान्यं लक्षयति, ततो मुखपङ्कजसरसि शिशिर इति तद्भावापत्त्या हेमन्तस्यापि ऋतुषु प्रथमतया प्राधान्यमेव द्योतितमिति। तदुक्तम्—'पडिकम्मदइपेसणमाणग्गहणेसुभासुरपहुप्पन्तो। हेमन्तिओ सुहाअइ मलिणमिअङ्को वि कामिणीणयओसो॥'

**काकुस्वरपदच्छेदभेदाभिनयकान्तिभिः ।**
**पाठो योऽर्थविशेषाय पठितिः सेह षड्विधा ॥ ५६ ॥**

सा काक्वा यथा—

'यदि मे वल्लभा दूती तदाहमपि वल्लभा ।
यदि तस्याः प्रिया वाचस्तन्ममापि प्रिय प्रिया ॥ ७८ ॥'

अत्रैकया काक्वा विधिरन्यया निषेधः प्रतीयते ॥

**काकुस्वरेति** । किंचिदेकपरतया प्रवृत्तमुच्चारणमर्थान्तरविवक्षया यदन्यथा क्रियते सा पठितिः । अन्यथाकरणं च काकुप्रभृतिभिः षड्भिरिति । तत्र 'भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते ।' सा द्विधा—विधिकाकुः, निषेधकाकुश्च । तत्रोर्निषेधे परोच्चारणान्यथाकरणेन विधिपर्यवसायिनी विधिकाकुः । यथा—'शल्यमपि स्खलदन्तः सोढुं शक्येत हालहलदिग्धम् । धीरैर्न पुनरकारणकुपितखलालीककटुवचनम् ॥' एवं विधिपरोच्चारणान्यथाकरणेन निषेधव्यञ्जिका निषेधकाकुः । तामुदाहरति—**यदीति** । यदि दूती प्रिया तदाहमपि प्रियेत्यादि ऋजूक्त्या शठनायकविषया कृत्रिमा प्रीतिः प्रतीयते, काक्वा तु तवैव नाहं प्रियेतीर्ष्यारोपः ॥

स्वरेण यथा—

'सुभ्रूस्त्वं कुपितेत्यपास्तमशनं त्यक्ता कथा योषितां
दूरादेव मयोज्झिताः सुरभयः स्रग्गन्धधूपादयः ।
रागं रागिणि मुञ्च मय्यवनते दृष्टे प्रसीदाधुना
सत्यं त्वद्विरहाद्भवन्ति दयिते सर्वा ममान्धा दिशः ॥ ७९ ॥'

अत्र दृष्टे इत्यत्र प्लुतस्वरकरणात्कुपितकान्ताप्रसादनपरमपीदं वाक्यमुत्कुपितदृष्टिप्रसादनतां प्रतिपद्यते ॥

स्वराः प्लुतादय उदात्तादयश्च । नामीषां वेद इव काव्ये भूयान्प्रयोग इति किंचिदुदाहरति—**सुभ्रूस्त्वमिति** । चरणतलाग्रपतिते मयि दृष्टे सति त्वं प्रसीदेति दीर्घमात्रोच्चारणे कुपितकान्ताप्रसादपरत्वं, यथोक्तप्लुतकरणे तु दूराह्वानादौ तदनुशासनात्कुपितदृष्टिसंबोधनबुद्धिरुपजायते । अशनादयो हि द्वयोः साधारणा

एवेति श्लेषोपादानमेवेति । एवं ह्रस्वस्य दीर्घकरणेन दीर्घस्य ह्रस्वकरणेनार्थान्तरप्रतीतिरवसेया । यथा—'विश्वामित्रो विश्वानरः' इति ऋषिराजर्षिविशेषौ प्रतीयेते तथा युवतीति संबोधनप्रतीतिः । एवमुदात्तादयोऽपि यथादर्शनमुत्प्रेक्षणीयाः ॥

पदच्छेदेन यथा—

'सर्वक्षितिभृतां नाथ दृष्टा सर्वाङ्गसुन्दरी ।
रामा रम्ये वनान्तेऽस्मिन्मया विरहिता त्वया ॥ ८० ॥'

अत्र मया विरहितेत्येतावति पदच्छेदे पुरूरवसस्त्वयेत्येतावति तु पर्वतस्य वाक्यभेदो भवति ॥

शृङ्खला भङ्गः परिवर्तकः चूर्णमिति चत्वारश्छेदाः । तत्र पूर्वापरवर्णानामन्योन्यसंकलनया स्थितिः शृङ्खला । यथा—'कान्तारतरुतलासितमृगयुवरचितान्तरा—' इति पठितिः, तदा प्रियासंभोगमणितहर्षितलुब्धकप्रचुरच्छद्मभध्येति प्रतीयते । सेयमन्योन्यं वर्णसंकलनया शृङ्खलेत्युच्यते । एकस्य शब्दस्य मध्ये विच्छेदेन द्वैधीकरणमात्रं भङ्गः । तमुदाहरति—**सर्वेति** । मया विरहितेत्येतावति समुदाये मद्वियोगवती त्वया दृष्टेत्यष्टमकामावस्थाविष्टस्य पुरूरवसः पर्वतविषयं प्रश्नवाक्यं भवति । यदा तु मयेति विच्छिद्य पूर्ववाक्यसंबन्धि क्रियते तदा त्वया विरहिता सती मया दृष्टेति पर्वतस्योत्तरवाक्यं संपद्यते । वर्णान्तरकल्पना परिवर्तः । यथा—'कलिकामधुगर्हणा' इति । अत्र यथाश्रुतवर्णपरिग्रहे—'कलिकामधुनो गर्हणा निन्दा' इति प्रतीयते, यदा तु 'कलिकामधुग् अर्हणा' इति वर्णान्तरकल्पनया छेदः, तदा पूजैव 'कलौ कामधेनुः' इति । पिण्डाक्षरविभागश्चूर्णम् । यथा—'पश्य सलिलं पयोधेर्दूरसमुन्मुक्तशुक्तिमीनाक्रान्तम्' इति । अत्र यथाश्रुते दुःखेन रसनीयमुद्भ्रान्तशुक्तिकोषं मत्स्याङ्कितपर्यन्तमिति प्रतीयते, यदा तु दूरसमुन्मुक्तशुक्तिमीनाक्रान्तमिति पिण्डचूर्णनेन च्छेदः, तदात्यन्तहर्षयुक्तेति त्यक्तशोकेति च संबोधनद्वयं कृष्णस्य प्रतीयते ॥

पदभेदेन यथा—

'येन ध्वस्तमनोभवेन बलिजित्कायः पुराऽस्त्रीकृतो
यो गङ्गां च दधेऽन्धकक्षयकरो यो बर्हिपत्रप्रियः ।
यस्याहुः शशिमच्छिरोहर इति स्तुत्यं च नामामराः
सोऽव्यादिष्टभुजङ्गहारवलयस्त्वां सर्वदोमाधवः ॥ ८१ ॥'

अत्र येन ध्वस्तमनोभवेनेत्यादेर्येन ध्वस्तमनोऽभवेनेत्यादेश्च पदभेदादुमाधवो माधव इत्यर्थद्वयं प्रतीयते । तयोश्च द्वयोरपि प्राधान्येनोपपादनादङ्गाङ्गिभावेन प्रकृताप्रकृतरूपतया चानवस्थानात्परस्परमसंबन्धेनायं श्लेषः । पदभेदेन तु पाठे पर्यायतोऽर्थद्वयप्रतीतेरियं श्लेषोपसर्जना पदभेदपठितिः ॥

**येनेति** । ध्वस्तमनोभवेन दग्धकामेन बलिजितो नारायणस्य कायः **पुरा** त्रिपुरदाहव्यतिकरेऽस्त्रीकृतः शरतां नीतः, गङ्गां भागीरथीं दधे, अन्धको दैत्यविशेषस्तस्य क्षयो विनाशः, बर्हिपत्रो मयूरवाहनः कार्तिकेयः, शशिमच्चन्द्रकलङ्कितं शिरो विश्वमोहच्छिदुरस्य हर इति स्तुत्यं च नाम, भुजङ्गा एव हारकङ्कणानि यस्य, सर्वदा सर्वकालमिति उमाधवपक्षे । माधवपक्षे तु—येन ध्वस्तं विनाशितमनः शकटम्, अभवेन संसारबन्धरहितेन, बलिं जितवान्यः कायः स पूर्वं समुद्रमथनावसरेऽमृतगृहयालुदैत्यव्यामोहनाय स्त्रीरूपतां नीतः, अगं गोवर्धनाख्यं गां पृथिवीमेकार्णवमग्नामुद्धृतवान् । अन्धका यदुविशेषास्तेषां क्षयो निवासः । बर्हिणो मयूरस्य पत्रं पिच्छं तत्प्रियः 'बर्हिपत्रकृतापीडम्' इति गोपालध्याने गौतमेनाभिधानात् । शशिनं मथ्नातीति क्विप् । शशिमद्राहुस्तस्य शिरोहर इति स्तुत्यं च नाम । भुजङ्गहा गरुडः स इष्टो यस्य । रवे शब्दब्रह्मणि लयो यस्य सः, तथा सर्वदो यावदभिमतप्रद इति । ननु विभिन्नरूपाणां शब्दानामुच्चारणे तन्त्रतया श्लेष एवायं न पठितिरित्यत आह—**तयोश्चेति** । श्लेषो हि श्लिष्यमाणयोः परस्परसंबन्धे भवति । स च संबन्धो रूपतात्पर्यसंबन्धलक्षणो वा अङ्गाङ्गिभावो वा उपमानोपमेयभावो वा यथाग्रे वक्ष्यते । न चायमेकोऽत्राभिमतः किंत्वेकपरमेवोच्चारणे पदभेदेनार्थान्तरं गमयतीति पठितिरेवेयम् । एतेन समाध्युक्तिसमासोक्तिभ्यामपि भेद उक्तः । तत्किमुच्चारणतन्त्रता नास्त्येवेत्यत आह—**श्लेषोपसर्जनेति** । यत्र हि यस्य प्राधान्येन विवक्षा तत्र तेन व्यपदेशो युक्तः, अत एव विवक्षान्तरेण श्लेषव्यवहारोऽप्यत्र समर्थनीय एव ॥

अभिनयेन यथा—

'एद्दहमेत्तत्थणिआ एद्दहमेत्तेहिं अच्छिवत्तेहिम् ।
एद्दहमेत्तावत्था एद्दहमेत्तेहिं दिअहेहिम् ॥ ८२ ॥'

[एतावन्मात्रस्तनी एतावन्मात्राभ्यामक्षिपत्राभ्याम् ।
एतावन्मात्रावस्था एतावन्मात्रैर्दिवसैः ॥]

अत्र इयन्मात्रस्तनादीनां तथाभूतहस्ताभिनयैः सह पठनात्तथाविधार्थविशेषो गम्यते ॥

अपदेशोऽप्यभिनयविशेष एव । यथा—

'इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम् ।'

इत्यात्मानमपदिश्य ब्रूते ॥

**एद्दहमेत्तेति** । अत्र सर्वपदानामर्थान्तरसाधारणतया न तावदभिमतपरिमाणविशेषप्रतीतिरुपजायते, यावदुच्चारणसहकारिभूतप्रसारितकरद्वयकोषप्रसृतिभिदङ्गुलिप्रसारिताङ्गुलीगणनारूपाभिनयप्रतिसंधानं न भवति । तेनाभिनयपठितिरियम्, साक्षादिव वस्तुस्वरूपबोधिका क्रियाभिमुख्यनयनादभिनय इत्युच्यते । तदिदमाह—**तथाभूतेत्यादि । अपदेशोऽपीति** । आत्मनिर्देशिका क्रियापदेशः । अस्याभिनयविशेषत्वेऽपि कान्तिकरतया पृथगुपादानम् । यावच्च स्वरूपसमुच्चारणविशेषणं नानुसंधीयते न तावच्छ्रीप्राप्तिक्षमयोः कारणविशेषः प्रतीयत इति ॥

कान्त्या यथा—

'यस्यारिजातं नृपतेरपश्यदवलम्बनम् ।
ययौ निर्झरसंभोगैरपश्यदबलं वनम् ॥ ८३ ॥'

अत्रावलम्बनमबलं वनमिति पदे पदद्वये वा द्वितीयचतुर्थस्थानयोर्वौ वकारबकारौ तयोरन्तःस्थपवर्गाभ्यां पवर्गान्तःस्थाभ्यां च कान्तिमति पाठेऽर्थभेदो जायते ॥

**यस्यारिजातमिति** । कान्तिश्छाया सा अप्रतिहतरूपा पदवर्णेषु न संभवतीति श्रुतिरूपा गृह्यते । तथाहि । अवलम्बनमित्यत्र द्वितीयचतुर्थस्थानस्थयोर्वकारबकारयोः क्रमेणान्तःस्थपवर्गभावानुसंधानेऽवलम्बनमित्येकपदतायां त्राणहेतुमपश्यदित्यर्थः प्रतीयते । यदा तु द्वितीयेऽबलं वनमित्यत्र तयोरेव पवर्गान्तःस्थभावानुसंधानं भवति तदा बलं वनमिति च्छेदेन पदद्वयसंपत्तौ बलरहितं सद्वनमरण्यं ययावित्यर्थान्तरप्रतीतिरुपजायते । तदिदमुक्तम्—**पदे पदद्वये**

**वेति** । अपश्यत् शयनभोजनशून्यम् । शयनं शीः, अदनं अत्, निर्झरसंभोगैः निर्झरजलमात्रोपभोगैरप्यपगतं अत एव बलरहितम् । अत्र च यमकेन संसृष्टिरस्य बोद्धव्या । आवृत्तिमादाय यमकमन्यथा भविष्यति ॥

अपरे पुनः पठितिमन्यथा कथयन्ति—

**पदपादार्धभाषाणामन्यथाकरणेन यः ।**
**पाठः पूर्वोक्तसूक्तस्य पठितिं तां प्रचक्षते ॥ ५७ ॥**

**अपरे पुनरिति** । अन्यथेत्यतः परमपि शब्दोऽध्याहार्यः । पादाद्यन्यथाकरणेनापि हि प्रकृतमुच्चारणमेव विशिष्यते । यदाह—**पूर्वोक्तसूक्तस्येति** । अत एव श्लोकान्यथाकरणेन पठितिर्न संभवति । तेन प्रागुक्तभेदैः सह द्वादशप्रकारा पठितिरिति तात्पर्यम् । यद्यपि च पादाद्यन्यथाकरणमपि पदभेदप्रकार एव तथापि न तत्र पूर्वोक्तत्यागः, इह तु तत्परित्यागेन पदान्तरकल्पनमित्येतावान्विशेषः ॥

तत्र पदान्यथाकरणं द्विधा—प्रकृतितः, विभक्तितश्च ।

तत्र प्रकृतितो यथा—

'असकलहसितत्वात्क्षालितानीव कान्त्या
मुकुलितनयनत्वाज्ज्ञातकर्णोत्पलानि ।
पिबतु मधुसुगन्धीन्याननानि प्रियाणां
त्वयि विनिहितभारः कुन्तलानामधीशः ॥ ८४ ॥'

अत्र त्वयीत्यस्य स्थाने मयीति यदा पठ्यते, तदैतत्प्रार्थनावाक्यमप्यनुमतिवाक्यं भवति ॥

विभक्तितो यथा—

'सहभृत्यगणं सबान्धवं सहमित्रं ससुतं सहानुजम् ।
स्वबलेन निहन्ति संयुगे नचिरात्पाण्डुसुतः सुयोधनम् ॥ ८५ ॥'

अत्र यदा पाण्डुसुतः सुयोधनमित्यस्य स्थाने 'पाण्डुसुतं सुयोधनम्' इति पठ्यते, तदैतदमङ्गलार्थमपि सुयोधने मङ्गलार्थं भवति ॥

तत्र पदं विभक्त्यन्तं विशेषणविशेष्यभेदेन द्विधा क्रियते इत्याह—**पदान्यथाकरणं द्विधेति** ॥

पादान्यथाकरणेन यथा—

'एकान्ते विजने रात्रावन्तर्वेश्मनि साहसे।
न्यासापह्नवने चैव दिव्या संभवति क्रिया॥ ८६॥'

अत्र तृतीयपादस्थाने 'तन्वङ्गी यदि लभ्येत' इति पाठो भवति, तदैतत्परीक्षौपयिकमपि कामौपयिकं भवति॥

एकान्त इति। साहसे प्रच्छन्नाभिसारलक्षणे प्रकाशात्प्रच्छन्नो गरीयानिति न्यायात्। दिव्या स्वभोगसोदरा क्रियावल्लक्षणा॥

अर्धान्यथाकरणेन यथा—

'तत्तावदेव शशिनः स्फुरितं महीयो
यावन्न तिग्मरुचिमण्डलमभ्युदेति।
अभ्युद्यते सकलधामनिधौ तु तस्मि-
न्निन्दोः सिताभ्रशकलस्य च को विशेषः॥ ८७॥'

अत्र यदा मध्यमपादयोः स्थाने 'यावन्न ताः किमपि गौरितरा हसन्ति। ताभिः पुनर्विहसिताननपङ्कजाभिः' इति पठ्यते, तदैतद्वीरार्थोक्तिरूपमपि शृङ्गारोक्तिरूपं संपद्यते॥

गौरितरेति। 'घरूप–'इत्यादिना पूर्वपदह्रस्वः॥

पादत्रयस्य चान्यथाकरणेन यथा—

'त्यागेन युक्ता दिवमुत्पतन्ति त्यागेन हीना नरकं व्रजन्ति।
न त्यागिनां दुष्करमस्ति किंचित्त्यागो हि सर्वव्यसनानि हन्ति॥८८॥'

अत्र तुरीयपादमेवोपादाय पादत्रयस्य चान्यथाकरणेन वक्ष्यमाणः पाठो भवति। तदैतत्त्यागप्रशंसार्थमपि त्यागनिन्दार्थं जायते। यथा—

'त्यागो हि सर्वव्यसनानि हन्तीत्यलीकमेतद्भुवि संप्रतीदम्।
जातानि सर्वव्यसनानि तस्यास्त्यागेन मे मुग्धविलोचनायाः॥८९॥'

एतेषां च पदाद्यन्यथाकरणानां परस्परसंकरोऽपि भवतीत्यावेदयति॥

भाषान्यथाकरणेन यथा—

'किं तादेण णरेन्दसेहरसिहालीढग्गपादेण मे
किं वा मे ससुरेण वासवसहासीहासणद्धासिणा ।
ते देसा गिरिणो अ ते वणमही स ज्जेअ मे वल्लहा
कोसल्लातणअस्स जत्थ चलने वन्दामि णन्दामि अ ॥९०॥'

अत्र यदि भाषान्तरेण पठ्यते तदैतच्छौरसेनीभाषया सीतावाक्यं संस्कृतभाषायां सुमन्त्रेण दशरथाय निवेदितम् । तद्यथा—

'किं तातेन नरेन्द्रशेखरशिखालीढाग्रपादेन मे
किं वा मे श्वशुरेण वासवसभासिंहासनाध्यासिना ।
ते देशा गिरयश्च ते वनमही सा चैव मे वल्लभा
कौसल्यातनयस्य यत्र चरणौ वन्दामि नन्दामि च ॥९१॥'

सेयमेवंप्रकारा पठितिः ॥

भाषाभेदेन कथं स्त्रीपुंसवचनता गम्यत इत्यत आह—**तदैतच्छौरसेनीति**। विभागन्यूनतामाशङ्क्य यथोक्तप्रकारेण समाधानमभिसंधायाह—**सेयमेवंप्रकारा पठितिरिति** ॥

**विभिन्नार्थैकरूपाया या वृत्तिर्वर्णसंहतेः ।**
**अव्यपेतव्यपेतात्मा यमकं तन्निगद्यते ॥ ५८ ॥**

अथावृत्त्युपजीविनोऽलंकारा लक्षयितव्याः । तेषां समग्रकाव्यपर्यन्तावृत्तिसमाश्रयणाद्यमकं प्रधानमित्याशयेनाह—**विभिन्नेति** । विभिन्नार्थेत्यर्थाभेदव्यतिरेकपरम्। तेन द्वयोरेकस्य वा निरर्थकत्वेऽपि यमकमुपगृहीतं भवति । एवमपि 'सरो रसः' इत्यादावतिप्रसङ्ग इत्यत उक्तम्—**एकरूपेति** । रूपमानुपूर्वी, विभिन्नार्था चासावेकरूपा चेति विग्रहः । विविधधवेत्यादावेकवर्णावृत्तावप्यावृत्तिसमुदाय एव यमकक्रममुल्लिखतीत्यभिसंधाय संहतेरित्युक्तम् । विभिन्नार्थैकरूपाया वर्णसंहतेर्या आवृत्तिः सा यमकमिति व्यवहितेनान्वयः ॥

आवृत्तिर्द्विधा—अनावृत्ता व्यवहिताव्यवहिता चेति ।

**तदव्यपेतयमकं व्यपेतयमकं तथा ।**
**स्थानास्थानविभागाभ्यां पादभेदाच्च भिद्यते ॥ ५९ ॥**
**यत्र पादादिमध्यान्ताः स्थानं तेषूपकल्प्यते ।**
**यदव्यपेतमन्यद्वा तत्स्थानयमकं विदुः ॥ ६० ॥**

सामान्यतो विभजते—**अव्यपेतेति** । व्यवायो व्यवधानम् । तदेतदुभयमपि स्थानादिभेदेन त्रिधा भवतीति पूर्वोक्तानुवादपूर्वकमवान्तरविभागमाह—**तदिति** । पाद आदिमध्यान्ता अर्थादेतेषु विशेषतोऽनुल्लिखनादस्थानयमकमुक्तं भवति । एतदपि द्विधा ॥

**चतुस्त्रिद्व्येकपादेषु यमकानां विकल्पनाः ।**
**आदिमध्यान्तमध्यान्तमध्याद्यन्ताश्च सर्वतः ॥ ६१ ॥**

चतुरादिपादविकल्पेन विषयतो भिद्यत इत्याह—**चतुस्त्रीति** । आदिश्च मध्यश्चान्तश्चेति आदिमध्यान्तास्त्रयः शुद्धाः । मध्यान्तौ मध्यादी आद्यन्तौ आदिमध्यान्ताश्चेति मिलित्वा चत्वारः संकीर्णाः । सर्वत इति सार्वविभक्तिकस्तसिः ॥

**अत्यन्तबहवस्तेषां भेदाः संभेदयोनयः ।**
**सुकरा दुष्कराश्चैव दर्श्यन्ते तत्र केचन ॥ ६२ ॥**

एवं पादविकल्पानामाद्यादिविकल्पानां च परस्परयोजनेऽन्येऽपि बहवः प्रकारा ग्रन्थगौरवकारिणो भवन्तीत्याह—**अत्यन्तेति** । न च कठोरनीरसत्वादवश्यवक्तव्या इत्याह—**दुष्करा इति** । शिष्यव्युत्पत्तये तु कतिपये दर्शनीया इत्याह—**तत्र केचनेति** ॥

तत्र चतुष्पादयमकेषु अव्यपेतमादियमकं यथा—

'राजीवराजीवशलोलभृङ्गं मुष्णन्तमुष्णं ततिभिस्तरूणाम् ।
कान्तालकान्ता ललनाः सुराणां रक्षोभिरक्षोभितमुद्वहन्तम् ॥ ९२ ॥'

राजीवराजी पद्मपङ्क्तिस्तद्वशा लोलाः सस्पृहा भृङ्गा यत्र तम् । यतस्ततिभिस्तरूणां पङ्क्तिभिरुष्णं घर्मं मुष्णन्तमपहरन्तम् । कान्तो मनोज्ञोऽलकान्तश्चूर्णकुन्तलच्छटा यासां ताः । यस्माद्रक्षोभी राक्षसैरक्षोभितमधर्षितम् । अत्र प्रथमे पादे पूर्वं सार्थकमपरमनर्थकम् । द्वितीयादिषु द्वयमप्यनर्थकम् । एवमन्यत्रापि यथायथमवगन्तव्यम् ॥

तदेव मध्ययमकं यथा—

'दधतमाकरिभिः करिभिः क्षतैः समवतारसमैरसमैस्तटैः ।
विविधकामहिता महिताम्भसः स्फुटसरोजवना जवना नदीः ॥९३॥'

आकरिभिः प्रशस्ताकरयुक्तैः करिभिः परिणतिक्रीडासक्तैः । विविधेभ्यः कामेभ्यो हिताः । महितं पूजितम् । जवना वेगवतीः ॥

तदेवमन्त्ययमकं यथा—

'व्यथितसिन्धुमनीरशनैः शनैरमरलोकवधूजघनैर्घनैः ।
फणवतामभितो विततं ततं दयितरम्यलताबकुलैः कुलैः ॥ ९४ ॥'

अनीरशनैर्न निर्गता दूरीभूता रशनाः क्षुद्रघण्टिका येभ्यस्तैः काञ्चीगुणयुक्तैः । तेन स्थपुटकर्कशरत्नादिरचनया सिन्धुव्यथापोषः । शनैर्मन्दम् । घनैर्मांसलैः । अभितो विततं सर्वतो विस्तीर्णम् । फणवतां कुलैस्ततं व्याप्तम् । लवङ्गबकुलमालतीसुरभिशीतलतया फणभृत्प्रियत्वम् ॥

आदिमध्ययमकं यथा—

'घनाघनाभस्य महीमहीयसः सुरासुराणां दयितस्य तस्य सा ।
धराधराकारगृहा गृहार्थिनो बभूव भूमेर्नगरी गरीयसी ॥ ९५ ॥'

घनाघनो मेघस्तदाभः श्यामः । मही पृथिवी तस्यां महीयान् पूज्यः । धराधरः पर्वतस्तदाकारगृहाः ॥

आद्यन्तयमकं यथा—

'द्रुतं द्रुतं वह्निसमागतं गतं महीमहीनद्युतिरोचितं चितम् ।
समं समन्तादपगोपुरं पुरं परैः परैरप्यनिराकृतं कृतम् ॥ ९६ ॥'

वह्निसमागतं सद् द्रुतं विलीनमत एव द्रुतं शीघ्रं महीं गतं पृथिव्यां विस्तीर्य पतितमहीनया द्युत्या रोचितं शोभितम् । चितं निबिडेन संनिवेशेन स्थापितम् । समन्तात्सर्वतः समं सलक्ष्मीकमस्थपुटं वा । परैः शत्रुभिः परैः श्रेष्ठैरनिराकृतं यदासीत्तदेव वह्निना हेममयं पुरमपगोपुरमपगतद्वारं महीं गतं च कृतमिति संबन्धः ॥

मध्यान्तयमकं यथा—

'उदयि ते दयिते जघनं घनं स्तनवती नवतीर्थतनुस्तनुः ।
सुमनसामनसा सदृशौ दृशौ द्युकुरुमे कुरु मेऽभिमुखं मुखम् ॥९७॥'

उदय उद्भवो विस्तारवत्त्वरूपस्तद्युक्तमुदयि । घनं मांसलम् । नवेन तीर्थेन रजसा तनूकृता । 'स्त्रीरजःशास्त्रयोस्तीर्थम्' । सुमनसां कुसुमानामनः शकटं तेन सदृशौ । 'सुमनसां मनसाम्' इति पाठे सुमनसः सहृदयास्तन्मनसां सदृशौ संवादिन्यौ । द्यौश्च कुश्च द्युकू द्यावापृथिव्यौ तयोरुमा लवणाकरो लावण्यविश्रान्तिस्थानत्वात् ॥

आदिमध्यान्तयमकं यथा—

'सीमासी मानभूमिः फणिबलवलनोद्भाविराजीविराजी
हारी हारीतवद्भिः परिसरसरणावस्तमालैस्तमालैः ।
देवादेवासुरक्षःकृतभव भवतोऽग्रे न दीनो नदीनो
मुक्तामुक्ताच्छरत्नः सितरुचिरुचिरोल्लासमुद्रः समुद्रः ॥९८॥'

सीमा मर्यादा तस्यामासनशीलः । मानं परिमाणातिशयः मानः पूजा वा, तद्भूमिः । फणिबलं भुजङ्गसमुदायस्तस्य यद्वलनं तेनोद्भाविनी या राजी रेखा तया विराजनशीलः । हारीताः पक्षिविशेषास्तद्युक्तैः । परिसरसरणिस्तीरमार्गस्तत्रास्तमालैः क्षिप्तमालसन्निवेशैः । खण्डरूपतामापन्नैरिति यावत् । ईदृशैस्तमालैः हारी मनोहर इति संबन्धः । देवादेवाः देवासुरास्तैरमृतलाभेनान्तरवस्थानेन चासा रक्षा यस्मात्स तथा कृतभवः संपादितोद्भवः । नदीनामिनः स्वामी समुद्रो भवतोऽग्रे न दीनः ? काका दीन एव । मुक्ताभिरमुक्तान्यच्छानि रत्नानि यत्र स तथा । सितरुचिश्चन्द्रस्तेन रुचिरा मनोहरा उल्लासमुद्रा वृद्धिकाष्ठा यस्य । तदेतेषामुदाहरणानां चतुर्ष्वपि पादेषु यथोक्तं यमकमस्तीति चतुष्पादयमकप्रपञ्चोऽयम् ॥

त्रिपादयमकेष्वव्यपेतमादियमकं यथा—

'विशदा विशदामत्तसारसे सारसे जले ।
कुरुते कुरुते नेयं हंसी मामन्तकामिषम् ॥ ९९ ॥'

नास्य चतुरः प्रयोग इति शेषभेदा नोदाह्रियन्ते ॥

एवं त्रिपादयमकप्रपञ्चोऽपि भवतीत्याह—**त्रिपादयमकेष्विति** । विशदा धवला । विशन्त आमत्ताः सारसा यत्र तस्मिन् । सारसं सरःसंबन्धि । मन्मथोन्माथदायितया कुत्सितं रुतं कुरुतम् । मध्यान्तादीनि त्रिपादयमकानि किमिति नोदाहृतानीत्यत आह—**नास्येति** ॥

द्विपादयमकेष्वव्यपेतमादियमकं यथा—

'करोति सहकारस्य कलिकोत्कलिकोत्तरम् ।
मन्मनो मन्मनोऽप्येष मत्तकोकिलनिःस्वनः ॥ १०० ॥'

उत्कलिका उत्कण्ठा तदुत्तरं तटं कूलम् । मन्मनोऽव्यक्तमधुरः । मन्मनो मदीयं मनः ॥

तदेव मध्ययमकं यथा—

'तुलयति स्म विलोचनतारकाः कुरवकस्तवकव्यतिषङ्गिणि ।
गुणवदाश्रयलब्धगुणोदये मलिनिमालिनि माधवयोषिताम् ॥१०१॥'

अलिनि यो मलिनिमा कज्जलाभत्वं स माधवयोषितां यादवस्त्रीणां विलोचनतारकास्तुलयति स्मेति संबन्धः ॥

अन्तयमकं यथा—

'खण्डिताशंसया तेषां पराङ्मुखतया तया ।
आविवेश कृपा केतूकृतोच्चैर्वानरं नरम् ॥ १०२ ॥'

एवमादिमध्यान्यपि द्रष्टव्यानि । एकपादयमकेष्वव्यपेतमाद्यन्तयोरनुल्लेखीति नोदाह्रियते ॥

**खण्डितेति** । केतूकृतो ध्वजतां नीतः । उच्चैर्वानरो हनूमान् । नरोऽर्जुनः ॥ **आद्यन्तयोरनुल्लेखीति** । महाकविप्रयोगेषु विशेषशोभाकरतया प्रसिद्धेरभावोऽनुल्लेखो न त्वसंभव एव । एवं मध्ययमकं त्वित्यादौ बोद्धव्यम् ॥

मध्ययमकं तु चतुर्थपाद एवोल्लिखति । यथा—

'विलुलितालकसंहतिरामृशन्मृगदृशां श्रमवारि ललाटजम् ।
तनुतरङ्गततीः सरसां दलत्कुवलयं वलयं मरुदाववौ ॥ १०३ ॥'

आमर्शनं प्रोञ्छनम् । दलत्कुवलयमिति क्रियाविशेषणम् । तरङ्गाणामितस्ततो वलनेन प्रौढतरकुवलयकलिकास्फुटनजातिः ॥

एवमावृत्त्याधिक्येऽप्यव्यपेतमुदाहार्यम् । यथा—

'वियद्वियद्वृष्टिपरंपरं परं घनाघनाली रसितासिता सिता ।
सरःसरस्यः स्वरसारसारसा सभा सभा रात्रिरतारतारता ॥ १०४ ॥'

आवृत्तिः सकृदावर्तनेनैव निर्वहति तत्किमसकृदावृत्तौ यमकं न भवतीत्यत आह—**एवमिति** । आवृत्तिसामान्यमधिकमनधिकं वा द्वयमप्यावृत्तिपदेनाभिमतमित्यर्थः । वियदाकाशम् । वियती अपगच्छन्ती वृष्टिपरंपरा यस्मात्तत्तथा । परमुत्कृष्टरमणीयम् । घनाघनाली, मेघपङ्क्तिः । रसिते स्तनिते आसितावलम्बिता । सिता शुभ्रा । सरांसि च सरस्यश्च सरःसरस्यः । स्वरसारास्तत्कालोन्मिषितकूजितकान्तिप्रधानाः सारसाः पक्षिणो यत्र तास्तथाभूताः । सभा गृहरूपा जलसमुदायो वा । सभाः सद्दीप्तिः । ताराणां तारता निर्मलताप्रकर्षः किंचिद्घनरोधसद्भावादीषत्तारता यस्यां सा तथा ॥

आवृत्त्येकरूपतायामपि । तत्रादियमकं यथा—

'याम यामत्रयाधीनायामया मरणं निशा ।
यामयाम धियास्वर्त्यायामया मथितैव सा ॥ १०५ ॥'

**आवृत्तीति** । यज्जातीयमाद्यपादे पदमावृत्तं तज्जातीयमेव द्वितीयादिपादेष्वपि यथास्थानमावर्तेत इति प्रकारान्तरमप्यावृत्तिपदेनैव संगृहीतमित्यर्थः । यामत्रयाधीनायामया प्रहरत्रयविश्रान्तियावद्दीर्घताप्रकारया निशा रात्र्या मरणं यामेति वियोगखिन्नस्य प्रार्थना । किमित्येवममङ्गलमाशास्यत इत्याह—**यामेति** । धिया बुद्ध्या यामयां जीवितसर्वस्वाभिमानगोचरतामनैषं सा अनया कल्पकोटिशतायमानयामया रजन्या असूनां प्राणानामार्तिः पीडा तया द्वारभूतया प्रायेण मथितैव भविष्यतीति सुकुमारतरकान्ताजीवितानध्यवसायोक्तिरियम् । अत्र यामेत्येव पदं पादचतुष्टयेऽप्यावृत्तम् । एवमुत्तरत्र ॥

तथैव मध्ययमकं यथा—

'स्थिरायते यतेन्द्रियो न हीयते यतेर्भवान् ।
[१]अमायतेयतेऽप्यभूत्सुखाय तेऽयते क्षयम् ॥ १०६ ॥'

---

१. 'नमायते' क.

आयतिरुत्तरकालविशुद्धिः । यतेन्द्रियो विजितेन्द्रियग्रामः । एवंभूतो भवान्यतेर्न हीयते । यतितुल्य एव भवतीत्यर्थः । अपिशब्दो भिन्नक्रमः । अमायता मायाशून्यत्वं सापि तव इयते परिच्छेत्तुमशक्याय क्षयं विनाशमयतेऽगच्छते सुखायाभूत् ॥

तदेवान्तयमकं यथा—

'भवादृशा नाथ न जानते नते रसं विरुद्धे खलु सन्नतेनते ।
य एव दीनाः शिरसा नतेन ते चरन्त्यलं दैन्यरसेन तेन ते ॥१०७॥'

तदेतत्सर्वमप्यवहितावृत्तेरव्यपेतयमकं भवति ॥

नतेः कुपितकामिनीप्रसादरूपाया रसो विप्रलम्भपृष्ठभावी मधुरतरः संभोगः किमिति तादृशा रसं न जानते । यस्मात् सन्नता अवसादयोगित्वमिनता प्रभुता, एते द्वे विरुद्धे नैकत्र संभवतः । नहि प्रभवो नमन्ति । एतदेव व्यतिरेकेण द्रढयति—**य एवेति** । ये दीनास्त एव नतेन शिरसा लक्षितास्तेन हेतुना दैन्यरसेनालमत्यन्तं चरन्ति व्यवहरन्तीति । अव्यपेतपदार्थं व्याचष्टे—**तदेतत्सर्वमिति** ॥

अथ चतुर्षु पादेषु व्यपेतमादियमकं यथा—

'काञ्चिप्रतोलीमनु कामिनीं तां काञ्चिस्रवन्तीवनमातरिश्वा ।
काञ्चिप्रभृत्याभरणोज्झितानां कांचिद्धुनीते सुरतश्रमार्तिम् ॥१०८॥'

क्रमप्राप्तं व्यपेतमुदाहर्तव्यमित्याह—**अथेति** । काञ्चिर्नगरी तस्याः प्रतोली राजरथ्या तामनु लक्षीकृत्य । केन पानीयेनाञ्चनशीला या स्रवन्ती नदी तद्वनमातरिश्वा वायुः । काञ्चिप्रभृतीनि मेखलाप्रमुखानि । कांचित्सर्वाङ्गीणालसभावसमर्पिकामत एव मेखलाप्रभृतिभूषणत्यागः । अत्र प्रतिपादं काञ्चीकाञ्चीत्यादि नैरन्तर्येणावर्तनेन व्यपेतम्, सान्तरत्वेन पुनरादिमध्ययमकमेव स्यादिति पादभेदेनैवास्य संभवः ॥

तदेव मध्ययमकं यथा—

'मदनदारुण उत्थित उच्छिखो मधुमदारुणहूणमुखच्छविः ।
तरुणिदारुण एष दिशः समं मम हृदारुणदाश्रवणानलः ॥ १०९॥'

मदन एव दारु काष्ठं तत उत्थितः। शिखा मञ्जरीच्छटा ज्वाला च। स्वभावताम्रमेव मधुमदेन यद्द्विगुणमरुणं हूणमुखं तच्छविर्दारुणो भयंकरो मम हृदा समं दिशोऽरुणद्रुद्धवान्। आम्रवणमेव तापकारितयानलो वह्निः। अत्र यद्यपि प्रतिपादमपि व्यवायेन मध्ययमकं संभवति, तथापि न तथोल्लेखीति पूर्वापरसदृशमेवोदाहृतम्॥

अन्तयमकं यथा—

'तव प्रिया सच्चरिताप्रमत्त या विभूषणं धार्यमिहांशुमत्तया।
रतोत्सवामोदविशेषमत्तया न मे फलं किंचन कान्तिमत्तया॥११०॥'

सच्चरिताप्रमत्तेति। सोत्प्रासं संबोधनद्वयम्। या तव प्रिया रतोत्सवामोदविशेषेण रतिकेलिहर्षप्रकर्षेण मत्ता तयेदमंशुमन्मणिकिरणकरम्बितं विभूषणं धार्यम्। अर्हे कृत्यः। त्वया किमिति न धार्यमित्यत आह—न मे भूषणसंपाद्यया कान्त्या किंचन फलम्। 'कामिनां मण्डनश्रीर्व्रजति हि सफलत्वं वल्लभालोकनेन' इति न्यायात्॥

आदिमध्ययमकं यथा—

'घनगिरीन्द्रविलङ्घनशालिना वनगता वनजद्युतिलोचना।
जनमता ददृशे जनकात्मजा तरुमृगेण तरुस्थलशायिनी॥१११॥'

अत्रापि सान्तरनिरन्तरप्रसङ्गे पादभेद एव संकरः। संकीर्णव्यपेतानि तु प्रतिपादमेव संभवन्तीत्युदाहरति—आदिमध्येति। घना गिरीन्द्रा माल्यवन्तमारभ्य सुवेलं यावद्गिरिपरम्परा। वनजं पद्मम्। जनानां मता संमता। तरुमृगः शाखामृगो हनूमान्। अत्र घनेत्यादिशब्दभागः पादचतुष्टयेऽपि गिरीन्द्रेत्याद्यनावृत्तव्यवहित एवादिमध्ययोरावर्तत इति॥

आद्यन्तयमकं यथा—

'विहगाः कदम्बसुरभाविह गाः कलयन्त्यनुक्षणमनेकलयम्।
भ्रमयन्नुपैति मुहुरभ्रमयं पवनश्च धूतनवनीपवनः॥ ११२॥'

गाः कूजितानि कदम्बसौरभानीतवर्षर्तुपयोदाः कलयन्ति कलरूपतां नयन्ति। कूजितक्रियान्तरालकालो द्रुतमध्यविलम्बितात्मानेको लयः। अभ्रं मेघः। नीपः

कदम्बः । कदम्बवनधूननेन सर्वतः सौरभसंचारोपपत्तिः । अत्र विहगा इत्यादिकं प्रतिपादमाद्यन्तयोरनावृत्तवर्णषट्कव्यवहितमेवावर्तते ॥

मध्यान्तयमकं यथा—

'मितमवददुदारं तां हनूमान्मुदारं
रघुवृषभसकाशं देवि यामि प्रकाशम् ।
तव विदितविषादो दृष्टकृत्स्नामिषादः
श्रियमनिशमवन्तं पर्वतं माल्यवन्तम् ॥ ११३ ॥'

मितमल्पाक्षरमरमत्यर्थमुदारमल्पाक्षरव्यञ्जकं मुदा हर्षेण रघुवृषभो रामस्तस्य सकाशो वासभूमिस्तया पुरस्कृतः । आमिषादा राक्षसाः । अत्र दारमित्यादि प्रतिपादं मध्यान्तयोरेवानावृत्तवर्णपञ्चकव्यपेतमावर्तते ॥

आदिमध्यान्तयमकं यथा—

'समं स सैन्येन समन्ततः समं पुरंदरश्रीः पुरमुच्चगोपुरम् ।
मदालसां तां प्रमदां सुसंमदां ययौ निधायाक्षययौवना ययौ ॥११४॥'

समं सह । समं सश्रीकम् । संमदो हर्षः । ययुरश्वमेधीयोऽश्वः । अत्र प्रतिपादं सममित्यादिकमादिमध्यान्तेषु यथोक्तानावृत्तवर्णव्यवहितमावर्तन्ते ॥

त्रिपादयमकेषु व्यपेतमादियमकं यथा—

'करेण ते रणे[1]ष्वन्तकरेण द्विषतां हताः ।
करेणवः क्षरद्रक्ता भान्ति संध्याघना इव ॥ ११५ ॥'

अस्यापि नातिप्रचुरः प्रयोग इति विशेषभेदा नोदाह्रियन्ते ॥

द्विषतां शत्रूणामन्तकरेण विनाशकारिणा । करेण हस्तेन । करेणवो हस्तिनः । एवं द्वितीयादिपादगोचरं मध्यादियमकं च किमिति नोदाह्रियत इत्यत आह— अस्यापीति ॥

द्विपादयमकेषु व्यपेतमादियमकं यथा—

'मुदा रमणमन्वीतमुदारमणिभूषणाः ।
मदभ्रमद्दृशः कर्तुमदभ्रजघनाः क्षमाः ॥ ११६ ॥'

---

१. 'ष्वान्त' ख.

मध्ययमकं पुनरनुल्लेखीति परिह्रियते ॥

रमणं वल्लभं मुदा हर्षेणान्वीतं संगतं कर्तुं क्षमा इत्यन्वयः। उदारमुत्कृष्टम्। मदेन भ्रमन्ती श्यामान्ता। अदभ्रं विपुलम्। अत्र यद्यपि चतुर्षु पादेषु यमकमस्ति, तथापि द्वयोर्द्वयोरेवावृत्तिः पर्यवस्यतीत्युदाहरणद्वयमिदं द्रष्टव्यम्। एवं प्रथमतृतीययोः प्रथमचतुर्थयोर्द्वितीयतृतीययोर्द्वितीयचतुर्थयोश्च व्यपेतमादियमकमवसेयम्। अनुल्लेखो व्याख्यात एव ॥

अन्तयमकं यथा—

'इह मुहुर्मुदितैः कलभै रवः प्रतिदिशं क्रियते कलभैरवः।
स्फुरति चानुवनं चमरीचयः कनकरत्नभुवां च मरीचयः ॥११७॥'

कलभाः करिशावकाः। रवः शब्दः। कलो मधुराव्यक्तः। भैरवो भयंकरः। अनुवनमिति वीप्सायामव्ययीभावः। चमरी चमरगवी। चयः समूहः। मरीचयः किरणाः। अत्रापि पूर्ववदेव द्विपादयमकं व्याख्येयमिति ॥

एकपादयमकमिह शुद्धं न संभवति, तस्य स्थाने द्विपादयमकमेवोदाह्रियते। तदादियमकं यथा—

'मधुरेणदृशां मानं मधुरेण सुगन्धिना।
सहकारोद्गमेनैव शब्दशेषं करिष्यति ॥ ११८ ॥'

इहापि मध्ययमकमनुल्लेखीति परिह्रियते।

**एकपादयमकमिति**। नैरन्तर्येणावृत्तावव्यपेतत्वम्। सान्तरत्वे त्वादिमध्यादिभावप्रसङ्ग इति शुद्धं न भवति तत्किमनुदाहरणीयमेवैतदित आह—**तस्येति**। आवृत्तिरेकत्रैव संभवतीत्येकपादगोचरता। सा तु प्रतियोगितया द्वितीयमपेक्षत इति पादान्तरस्वीकार इति कथंचित्प्रकृतिगणनासमाधानमेतत्। मधुश्चैत्रः। अनेन पूर्वावयवेन वसन्तो लक्ष्यते। एणदृशां हरिणलोचनानाम्। मधुरेण मधुरास्वादेन। सहकारोद्गमेनैवेत्येवकारेणासतामतीव तावद्विख्यातप्रभावातिशयाः पिकपञ्चमादयः। सहकारप्रथमोद्भेदमात्रेणैव तु मानिनीमानग्रहवार्ता निरवशेषितेत्युद्दीपनताप्रकर्षो ध्वन्यते ॥

अन्तयमकं यथा—

'यस्याहुरतिगम्भीरगलदप्रतिमङ्गलम् ।
स वः करोतु निःसङ्गमुदयं प्रति मङ्गलम् ॥ ११९ ॥'

गम्भीरो मांसलः । गलः कण्ठः । मङ्गलं कल्याणम् । निःसङ्गमप्रत्यूहम् । उदयः संपत्तं प्रति ॥

एवमावृत्त्याधिक्येऽपि यथा—

'अवसितं हसितं प्रसितं मुदा विलसितं ह्रसितं स्मरभासितम् ।
न समदाः प्रमदा हतसंमदाः पुरहितं विहितं न समीहितम् १२०'

अवसितं समाप्तम् । मुदा प्रसितमनुबद्धम् । विलसितं ह्रसितं भ्रष्टम् । स्मरेण भासितं शोभितम् । संमदो हर्षः । अत्र प्रतिपादं सितं सितमित्यादि द्वाभ्यामेव यमकं निर्व्यूढम् । तृतीयं तु सितमित्यादिकमाधिक्यमेव प्रयोजयति, तच्च सर्वमनावृत्ति व्यवहितमिति व्यपेतयमकमेव भवति ॥

आवृत्त्येकरूपतायामपि । तत्रादिमध्ययमकं यथा—

'सारयन्तमुरसा रमयन्ती सारभूतमुरुसारधरातम् ।
सारसानुकृतसारसकाञ्चि सा रसायनमसारमवैति ॥ १२१ ॥'

सारयन्तमात्मसमीपमानयन्तम् । उरसा घनतरस्तनाढ्येन । सारभूतं जीवितसर्वस्वतामापन्नम् । उरुर्महान् । सार उत्कर्षः । अनुकृतसारसा सारसकूजितसंवादिनी । सारसा सशब्दा काञ्चिर्मेखला यस्याः सा तथा । सारसानुकृतेति 'जातिकालसुखादिभ्यः परा निष्ठा वक्तव्या' इति निष्ठायाः परनिपातः । रसायनं सर्वोपद्रवहरं भेषजम् ॥

मध्यान्तयमकं यथा—

'लीलास्मितेन शुचिना मृदुनोदितेन
व्यालोकितेन लघुना गुरुणा गतेन ।
व्याजृम्भितेन जघनेन च दर्शितेन
सा हन्ति तेन गलितं मम जीवितेन ॥ १२२ ॥'

आद्यन्तयमकमादिमध्यान्तयमकं चेहास्थानयमकत्वप्रसङ्गान्न संगच्छते। आदिमध्यान्तयमकानि तु प्रथममेवोदाहृतानि॥

शुचिना कान्तेन। मृदुना कोमलेन। उदितं भाषितम्। लघुना तरलेन। गुरुणा स्तनजघनभारालसेन। व्याजृम्भितेन प्रकटीभूतविस्तारप्रकर्षेण। अत्र तेन तेनेति मध्यान्तयोरावृत्तम्। इहेत्यावृत्त्येकरूपतायामेकस्यादावितरस्यान्ते वर्तमानमेकरूपसंधिपातित्वादस्थानयमकमेव भवति। एवमादिमध्यान्तयमकमपि नात्र संगच्छते तर्हि संधिविनाकृतमुदाह्रियतामित्यत आह—**आदिमध्यान्तेति**॥

आवृत्त्येकरूपतायामावृत्त्याधिक्ये च मध्ययमकं यथा—

'सभासु राजन्नसुराहतैर्मुखैर्महीसुराणां वसुराजितैः स्तुताः।
न भासुरा यान्ति सुरान्न ते गुणाः प्रजासु रागात्मसु राशितां गताः १२३'

तदेतत्सर्वमपि व्यवहितावृत्तेर्व्यपेतयमकं भवति॥

**आवृत्त्याधिक्य इति**। एकैकस्मिन्पादे तृतीयाद्यावृत्त्या पूर्वमाधिक्यं पादान्तरावृत्तिसरूपतया सारूप्यं चोक्तम्। इह तु सरूपावृत्त्यैवाधिक्यं निरूप्यत इति संकरप्रकारोपलक्षणमिदम्। सभासु जनसमवायेषु। असुराहतैर्मदिरापानपराभूतैः। महीसुराणां ब्राह्मणानाम्। वसुना तेजसा राजितैः शोभितैः। भासुरा दीप्ताः। सुरान् देवान्। न न यान्ति निषेधद्वयेन यान्त्येवेत्यर्थः। रागोऽनुरागस्तत्प्रधान आत्मा यासां तासु प्रजासु राशितां पुञ्जतां गताः। व्यपेतमुपसंहरति—**तदेतदिति**॥

**नादौ न मध्ये नान्ते यत्संधौ वा यत्प्रकाशते।**
**अव्यपेतव्यपेतं तदस्थानयमकं विदुः॥ ६३॥**
**पादे श्लोके च तत्प्रायः पादसंधौ च बध्यते।**
**स्वभेदे चान्यभेदे च स्थूलं सूक्ष्मं च सूरिभिः॥ ६४॥**

क्रमप्राप्तमस्थानयमकं लक्षयति—**नादाविति**। आदावेवेत्यादिनियमेन स्थानयमकमुक्तं तदभावे त्वस्थानयमकं भवति। तत्किमाद्यादिस्थानमिदं नाश्रयत एव। नेत्याह—**संधौ वेति**। संधौ पादसंदंशे एकस्यादिपरस्यान्त इति। नेदं स्थानयमकं तद्धि प्रतिपादं स्थाननियमेन निरूप्यत इत्युक्तप्रायम्। **अव्यपेत-**

**व्यपेतमिति** । द्वाभ्यामुपन्वीयते । तत्प्रथमं पादश्लोकतया द्विविधमित्याह— **पादे श्लोके चेति** । पादसंधौ च यद्बध्यते तत्स्वभेदे चान्यभेदे च स्थूलं सूक्ष्मं च भवतीत्यर्थः । एतद्यथास्थानं विवरिष्यते—स्थूलं सूक्ष्मं चेति पूर्वेणापि संबध्यते । बहुवर्णावृत्ति स्थूलम्, अबहुवर्णावृत्ति सूक्ष्मम् ॥

अत्र पादे स्थूलाव्यपेतं यथा—

'वीनां वृन्दं चैतत्कूटे समरुति सुतरुणि समरुति सुतरुणि ।
चित्तं वा तेन क्रोडेऽस्मिन्सुरमणिगुणरुचि सुरमणि गुणरुचि १२४॥'

अत्र स्थूलेनैवावृत्तिद्वयेन श्लोकपादयोर्व्याप्तत्वादादिमध्यान्तता न संभवतीत्यस्थानयमकमिदं स्थूलाव्यपेतमुच्यते ॥

वीनां पक्षिणां वृन्दम् । कूटे शृङ्गे । समरुति मारुतसंहिते । सुतरुणि शोभनवृक्षे । कूटविशेषणद्वयमिदम् । समरुति समानकूजिते । सुतरुणीति प्रियासंबोधनम् । वाशब्द इवार्थे । सुरमणीनां देवमणीनां गुणेन दाम्ना रोचते शोभत इति क्विप् । तस्मिन्क्रोडे । सुरमणीति संबोधनम् । गुणेषु रुचिर्यस्य तद्गुणरुचि चित्तम् । अत्र समरुति सुतरुणि सुरमणि गुणरुचीति द्वितीयचतुर्थपादयोर्वर्णाष्टकावृत्तिद्वयमिति पादव्यापकमव्यपेतमुच्यते ॥

पाद एव सूक्ष्माव्यपेतं यथा—

'स्वस्थः शैले पश्यास्तेऽसौ रुरुरुरुरतिरतितनुतनु मतिमति ।
लोको यद्वद्दैत्यानीके गुरु गुरुमयि मयि तरितरि सतिसति ॥१२५॥'

अत्र पुनः सूक्ष्मेणावृत्त्यष्टकेन श्लोकपादौ व्याप्ताविति अस्थानयमकमिदं सूक्ष्माव्यपेतमुच्यते ॥

रुरुर्बहुशृङ्गो मृगः । उरुरतिरुपचितप्रीतिः अतिलघुरतिकृशा तनुर्यस्याः इति संबोधनहस्वः । मतिमति मतिरुचितज्ञानं तद्वतीत्यपि संबोधनम् । पश्येति वाक्यार्थकमेकम् । गुरु विपुलम् । गुरुः शुक्रः । मयो दैत्यविशेषः । तद्युक्तं तरितरि विजयमाने मयि सति । सतीति संबोधनम् । सती शोभना । यथा मयदैत्यानीकविजये लोकोऽयं सुखमास्ते तथासौ रुरुरिति वाक्यार्थोऽभिमतः । तदिदं वर्णद्वयावृत्त्या सूक्ष्मं न चान्योन्यव्यवहितमव्यवहितमित्यव्यपेतं च भवति । तदेतदेकस्मिन्नपि पादेऽनुक्तद्वयादिपादविकल्पेन च बोद्धव्यम् ॥

श्लोके स्थूलाव्यपेतं यथा—

'नगजा न गजा दयिता दयिता विगतं विगतं ललितं ललितम् ।
प्रमदाप्रमदामहता महतामरणं मरणं समयात्समयात् ॥ १२६ ॥'

अत्रावृत्त्यष्टकेन श्लोकोऽपि व्याप्त इत्यस्थानयमकमिदं श्लोके स्थूलाव्यपेतमुच्यते ॥

नगजाः पर्वतजाः । दयिता वल्लभाः । एवंविधा अपि गजा हस्तिनो न दयिता न रक्षिताः । वीनां हंसप्रभृतीनां पक्षिणां गतं चङ्क्रमणं विगतमपगतम् । ललितं विलसितम् । ललितं भ्रष्टम् । प्रमदा कान्ता । अप्रमदा हर्षशून्या । आमश्चित्त-व्यथारूपो रोगस्तेन हता । महतां प्रकर्षशालिनाम् । अरणं सङ्ग्रामवर्जितम् । मरणं विनाशः । समयाद्दैवात् । समयात्संगतमासीत् ॥

श्लोक एव सूक्ष्माव्यपेतं यथा—

'विविधधववना नागगर्धर्द्धनाना-
विविततगगनानानाममज्जज्जनाना ।
रुरुशशललनाना नावबन्धुन्धुनाना
मम हि हिततनानानानन स्वस्वनाना ॥ १२७ ॥'

अत्र सूक्ष्मतराभिरष्टाविंशत्यावृत्तिभिः श्लोको व्याप्त इत्यस्थानयमकमिदं श्लोके सूक्ष्माव्यपेतमुच्यते ॥

[१बलभद्रं प्रति कृष्णवाक्यं समुद्रतीरभूवर्णनपरम् । विविधानि धवानां तरुभेदानां वनानि यस्यां सा । नागेषु सर्पेषु गर्धेनाभिलाषेण बुभुक्षया ऋद्धैः समृद्धैर्नानाविधैर्विभिः पक्षिभिर्विततं व्याप्तं गगनं यस्यां सा । अनामेन अनमनेन मज्जन्तो जना यस्यां सा । बहूदकेत्यर्थः । यद्वा अस्य विष्णोर्नाम निमज्जन्तः । तत्परा इति यावत् । तादृशा जना यस्यां सा । अविद्यमाना नरोऽर्वाचीना मनुष्या यस्यां सा । समासान्तविधेरनित्यत्वात् 'नद्यृतश्च' इति न कप् । यद्वा । अविद्यमान ओ विष्णुर्यस्यां सा । यद्वा । अनामनि विष्णुनामनि मज्जद्भ्यस्तत्परेभ्यो जातं नानं यस्यां सा । नं ज्ञानम् । तत्त्वज्ञानमिति यावत् । न नं अनं न अनं नानम् । रुरूणां

१. एतत्कोष्टकान्तर्गतपाठः काशीमुद्रितपुस्तके प्रकाशकप्रमादान्मूले पतित उपलभ्यते.

शशानां च ललनं क्रीडनं यत्र सा । नौ आवयोरबन्धुं वैरिणं धुनाना नाशयन्ती हि निश्चितं मम हितं तनोति सा । अविद्यमानमाननं मुखं यस्य सः । मुखं विनैव जायमान इत्यर्थः । ईदृशो यः स्वस्वनः शब्दस्तत्र अनाः प्राणा यस्यां सा । उदकशब्दवतीत्यर्थः ॥]

**विविधेति** । विविधानि धववनानि यस्यां सा तथा । धवो विट्खदिरः । नागान् सर्पान् हस्तिनो वा गृध्यन्त्यभिलषन्तीति नागगर्धाः । अर्द्धा उपचिता नानावयो विचित्राः पक्षिणस्तैर्विततं व्याप्तं गगनं यस्यां सा तथा । कल्लोलपरम्पराभिरनामं नमनशून्यम् । मज्जन्तः स्नान्तो जना यस्यां सा । अना स्त्रीरूपा । रुरूणां शशानां च ललनमुत्फालो यस्यां सा तथाभूता । नौ आवयोरबन्धुं शत्रुं धुनाना क्षिपन्ती । हरिप्रबोधे बलभद्रस्य कृष्णं प्रत्युक्तिः । यस्मान्मम हिततना हितं तनोति । अनाननो मुखशून्यः यः स्व आत्मा तेन स्वनाना शब्दायमाना । शीले चानश् । 'अनित्यमागमशासनम्' इति मुगभावः । यदि वा अनाननो मुखं विना कृतः स्वकीयः स्वनो यस्याः सा । अनितीत्यना प्राणयुक्ता । अन्तर्णीतेवार्थं चैतत् । वर्णद्वयपर्यन्तमावृत्तिः सूक्ष्मता । सैवैकवर्णगोचरा सूक्ष्मतरा ॥

पादसंधावन्यभेदोच्छेदेन स्थूलं यथा—

'उपोढरागाप्यबला मदेन सा मदेनसा मन्युरसेन योजिता ।
न योजितात्मानमनङ्गतापितां गतापि तापाय ममास्र नेयते ॥१२८॥'

अत्रान्नादिसंदंशादव्यपेतं प्रवर्तते । व्यपेतं तु पादसंधिषु निवर्तत इत्यस्यानयमकाभेदः स्थूलावृत्तेः, संधिस्थूलाव्यपेतमुच्यते ॥

**पादसंधाविति** । 'स्वभेदे चान्यभेदे च' इत्यत्र व्यपेताव्यपेतयोः स्वत्वमन्यत्वं च व्याख्येयं प्रकरणात् । तत्त्वे प्रसङ्गे च यथासंभवं सप्तमी योजनीया । मदेन प्राप्तरागापि तत एव मन्मथोन्मादेन तापिता उत्तापं गतापि यदात्मानमबला न योजितवती तन्नूनं मदेनसा मदीयदुरितेन भूयोऽपि मानरसं प्रापिता स्यात् । अत एवेयते वक्तुमशक्याय संतापाय नास्रेति काक्वा तापप्रकर्षभणनम् । **योजितेति** । योजयतेर्गत्यर्थत्वमाश्रित्य कर्तरि क्तः । 'गत्यर्थाकर्मक-' इत्यादौ चकारस्यानुक्तसमुच्चयार्थत्वाद्वा । अत्र प्रथमद्वितीययोस्तृतीयचतुर्थयोश्चान्तरतो विच्छिद्य पाठे क्रियमाणे संधिषु व्यपेतप्रसङ्गः स्यात् । निरन्तरपठितौ तु स निवर्तते ।

यथैव च वृत्तौचितीवशात्सौभाग्यमुन्मिषति, तेन व्यपेतबाधादव्यपेतपुरस्कारस्त-दिदमाह—**अत्रेत्यादि**। संदंशः संधानम्॥

अन्यभेदानुच्छेदेन सूक्ष्मं यथा—

'मतां धुनानारमतामकामतामतापलब्धाग्रिमतानुलोमता।
मतावयत्युत्तमताविलोमतामताम्यतस्ते समता न वामता॥ १२९॥'

अत्र व्यपेतानुच्छेदेनैव पादसंधिष्वव्यपेतमुत्पद्यते इत्यस्थानयमक-मिदं सूक्ष्म.वृत्तेः संधिसूक्ष्माव्यपेतमुच्यते॥

मतां संमतामारमतां योगिनामकामतां वीतरागतां धुनानाधःकुर्वाणा। अतापोऽनायासस्तेन लब्धेऽग्रिमतानुलोमते श्रेष्ठतानुकूल्ये यया सा। अतएवोत्तमताया विलोमतामतिरेकमयती न गच्छन्ती ईदृशी तवाताम्यतः संसारखेदेनाबाध्यमानस्य मतौ समता न तु वामता वैषम्यमिति। अत्र प्रतिपादमादिमध्यान्तेषु व्यपेतयमकमुपलभ्यते। संधिषु च संदंशपाठादस्थानयमकव्यपेतं च। न च पूर्वोपलब्धं बाध्यते। न वा संधौ विरतिरिति प्रसङ्गः संगच्छते। तेन व्यपेतानुच्छेदकमेतदव्यपेतम्। अत्रापि वृत्तौचिती सर्वस्वायते॥

स्वभेदे पूर्वभेदानुच्छेदेन स्थूलं यथा—

'सतमाः सतमालो यः पारापारायतः स दावोऽदावः।
लोकालोकानुकृतिः सह्यः सह्ययमनभ्रकूटैः कूटैः॥ १३०॥'

अत्र विषमपादयोः समपादावन्तेऽवतिष्ठमानावादियमकाद्यन्तयमकयोरादिमध्यान्तयमकतामापादयन्तः पारापारेति सह्यः सह्य इत्यावृत्ती स्थूले एवादिमध्ययमकव्यपदेशं च लभेते इत्यस्थानयमकमिदम्। स्वभेदे पूर्वभेदानुच्छेदि स्थूलाव्यपेतमुच्यते॥

**सतमेति**। तमोऽत्र गहनता तया सतमाः सान्धकारम्। पारा नाम नदी तस्याः पारे आयतो विस्तीर्णो दावो वनं तद्बहुलत्वाददावो वनवह्निप्रभावरहितो लोकालोकश्चक्रवालाख्यः पर्वतस्तदनुकृतिस्तत्सदृशो यः सोऽयं सह्यनामा गिरिरभ्रकूटशून्यैः कूटैः शृङ्गैर्लक्षितः। हिशब्दो वाक्यालंकारे। अत्र प्रथमतृतीययोरादौ द्वितीयचतुर्थयोराद्यन्तयोर्व्यपेतयमकमेव वर्तते। तदनुच्छेदेनैव संदंश-

फठादियमकयोराद्यन्तयमकयोश्चाव्यपेतादिमध्यान्तयमकता प्रकाशते । यतो द्वितीयचतुर्थपादयोरादिमध्यान्तयमकमेव मध्ययमकभूमिकामवगाहते । अत्रापि वृत्तौचिती मवेषणीया । तदेतद्विवरणे व्यक्तमेवेति ॥

तदेव स्वान्यभेदोच्छेदि सूक्ष्मं यथा—

'सनाकवनितं नितम्बरुचिरं चिरं सुनिनदैर्नदैर्वृतममुम् ।
महाफणवतोऽवतो रसपरा परास्तवसुधा सुधाधिवसति ॥ १३१ ॥'

अत्र पादान्तादिषु व्यपेतं यदा मध्येष्वव्यपेतं तदुभयमपि पादान्तादिसंहितायामव्यपेतमभिन्नजातीयं जायते । न च प्राचीनां मध्ययमकतां जहातीत्यस्थानयमकमिदं सूक्ष्मावृत्तेरन्यतो भेदेन स्वभेदानुच्छेदि सूक्ष्माव्यपेतमुच्यते । उभयमपि चैतदेवंविधेष्वेव छन्दःसु द्रष्टव्यम् ॥

**सनाकेति** । नाकवनिताः स्वर्गस्त्रियस्ताभिः सहितम्, यतो नितम्बे स्वच्छन्दविहरणोचिते रुचिरं मनोज्ञम्, सुनिनदैः शोभनशब्दैर्महाफणवान् वासुकिरवतो रक्षतो रसपरा रसनीयेषु श्रेष्ठा । परास्तवसुधा त्यक्तभूभागा। सुधा पीयूषम् । अत्र प्रतिपादं नितं नितमित्यादिकमव्यपेतम् । संधिषु च विरतिपाठे चिरं चिरमित्यादि व्यपेतं प्रतीयते । तत्र संदंशे क्रियमाणे व्यपेतं निवर्तते । अव्यपेतं तु मध्ययमकमवतिष्ठत एव । तत्सर्वमिदमव्यपेतमेव जायते । अत्रापि वृत्तौचिती पूर्ववदेव शरणमित्युपसंहारे दर्शयति—**उभयमपि चैतदिति** । स्थूलसूक्ष्मभावेन संधियमकमुभयम् ॥

पादे स्थूलव्यपेतं यथा—

'अखिद्यतासन्नमुदग्रतापं रविं दधानेऽप्यरविन्दधाने ।
भृङ्गावलिर्यस्य तटे निपीतरसा नमत्तामरसा न मत्ता ॥ १३२ ॥'

अत्र मा भूदव्यपेतप्रसङ्ग इत्येकमेवाक्षरं विहाय स्थूलावृत्तिद्वयेन श्लोकपादयोर्व्याप्तत्वादादिमध्यान्तता न संभवतीत्यस्थानयमकमिदं स्थूलव्यपेतमुच्यते ॥

**अखिद्यतेति** । यस्य गिरेस्तटे रविमादित्यमुदग्रतापं दधानेऽपि भृङ्गावलिर्भ्रमरमाला नाखिद्यत । यतोऽरविन्दधाने पद्मानां निधानभूते निपीतरसा आस्वादित-

मकरन्दा । अत एव मत्ता नमन्ति तामरसानि यस्याः सकाशात्सा तथा । भरनमितपद्मकुहरप्रवेशान्मधुरससेवया च भ्रमरमालया खेदो नाधिगतः । अत्र द्वितीयचतुर्थपादयोः 'रविं दधाने रविन्दधाने' इति, 'रसा नमत्ता रसा न मत्ता' इति द्वाभ्यामेव वृत्तिभ्यां व्याप्तत्वादाद्यादिविभागासंभवे अस्थानयमकमेवेदम् । व्यपेतं तु कथं भवतीत्यत आह—**मा भूदिति** ॥

पाद एव सूक्ष्मव्यपेतं यथा—

'करेणुः प्रस्थितोऽनेको रेणुर्घण्टाः सहस्रशः ।
करेऽणुः शीकरो जज्ञे रेणुस्तेन शमं ययौ ॥ १३३ ॥'

अत्र विषमपादयोः करेणुः करेऽणुरित्यादावावृत्तम् । समपादयोस्तु रेणुरेणुरिति । तत्तु स्वापेक्षया न मध्यमन्यापेक्षया नादिरित्यस्थानयमकमिदं सूक्ष्मव्यपेतमुच्यते ॥

**करेति** । करेणुर्हस्ती प्रस्थितश्चलितस्तेन घण्टा रेणुरशब्दायन्त । सहस्रश इति क्रियाविशेषणम् । स्थूलहस्तेऽणुः सीत्कारविकीर्णतया परमाणुसाद्भूतः । तेन शीकरेण । ननु विषमपादयोराद्यक्षरेण विनाकरणेन मध्ये समपादयोः पुनरादावेव रेणुरित्यावृत्तिरस्ति तत्कथमस्थानयमकमिदमित्यत आह—**तत्त्विति** । अन्तो वृत्तेरसंभावितत्वादादौ मध्ये वा सा वाच्या । न चेयमपि संभवति । रेणुरेणुरिति शब्दभागमपेक्ष्य प्रवृत्तायामावृत्तौ तद्विरहात् ॥

श्लोके स्थूलव्यपेतं यथा—

'जयन्ति ते सदा देहं नमस्यन्ति जयन्ति ते ।
भवान्यतो नमस्यन्ति सदादेहं भवान्यतः ॥ १३४ ॥'

अत्र स्थूलव्यपेतावृत्तिचतुष्टयेन श्लोकोऽपि व्याप्त इत्यादिमध्यान्ताभावादस्थानयमकमिदं स्थूलव्यपेतमुच्यते ॥

हे जयन्ति, ये तव देहं दुर्गातारादिरूपेण प्रपञ्चमानां मूर्तिं सदा नमस्यन्ति ते जयन्ति सर्वोत्कर्षेण वर्तन्ते । यतस्त एव भवान्संसारसरणिमस्यन्ति क्षिपन्ति । भवात्परमेश्वरात् अन्यता भेदस्तेनोनमतः श्रेयस आदानं ग्रहणं यत्र तादृशी ईहा चेष्टा यत्रेति द्वयमसनक्रियाविशेषणम् । अत्र जयन्ति ते इति प्रथमद्वितीययोराद्यन्तौ

सदादेहमिति प्रथमचतुर्थयोरन्तादी नमस्यन्तीति द्वितीयतृतीययोर्भवान्यत इति च तृतीयचतुर्थयोराद्यन्तौ च स्थूलावृत्त्या व्याप्ताविति अनावृत्तभागाभावाच्छ्लोके स्थूलव्यपेतमस्थानयमकमिदम् ॥

श्लोक एव सूक्ष्ममव्यपेतं यथा—

'यामानीतानीतायामा लोकाधीराधीरालोका ।
सेनासन्नासन्ना सेनासारं हत्वाह त्वा सारम् ॥ १२५ ॥'

अत्र यद्यपि यामायामेत्यादौ व्यपेतमाद्यन्तयमकं नीतानीतेत्यादौ च मध्ययमकमव्यपेतं विद्यते, तथापि मण्डूकप्लुत्या गतप्रत्यागतैर्यतेश्च नैतदुल्लिखति अपि तु श्लोकोऽपि द्वाभ्यां द्वाभ्यामक्षराभ्यां सूक्ष्मवृत्त्या व्याप्त इव लक्ष्यते । तेनास्थानयमकमिदमादिमध्यान्तानामभावात्सूक्ष्मावृत्तेः सूक्ष्मव्यपेतमुच्यते ॥

**यामेति** । मानिभिरिता संगता । यद्वा यामेन प्रहरमात्रेणानीता प्रापिता । शत्रूञ्जित्वेत्यर्थः । आनीतः प्रापित आयामो वृद्धिर्यस्याः सा तथा । पालनेन लोकानामाधिमीरयति क्षिपतीति लोकाधीराधीरैरप्राप्तसमरसंभ्रमैरालोक्यत इति धीरालोका । सह इना सेनान्या वर्तत इति सेना, असन्ना अवसादरहिता एवंभूता या सेना सा आसन्ना निकटवर्तिनी सती आरमरिसमूहं हत्वा त्वा त्वां सारं कार्यसिद्धिं आह ब्रवीति । ननु यामा यामा, लोकालोकेत्यादिकमाद्यन्तयोर्नीतानीतेत्यादिकं तु पदचतुष्टयस्यादि मध्य इति व्यपेतम्, आद्यन्तव्यपेतयमकं तु मध्ययमकमिति स्थानयमकमेवेदम् । संकरोऽपि न पृथग् यमकतां प्रयोजयतीत्यत आह—**अत्र यद्यपीति** । यामेत्यादिकमादावनुसंधाय वर्णचतुष्कव्यवधिना पादान्तेऽनुसंधीयमानं मण्डूकप्लुतिं प्रयोजयतीति न तथा सोल्लेखम् । यामानीतेत्यादिस्थूलचतुष्कप्रत्यागतेन नीतायामेत्यादिनात्यन्तमुद्भटेन यमकच्छाया तिरोधीयत इति च न सोल्लेखम् । मध्यादिकमव्यपेतं सोल्लेखमित्यपि न वाच्यम् । यामानीतेत्यादिबन्धच्छायार्थव्यतिकरणेनानुल्लेखत्वात् । श्लोकस्तु द्वाभ्यां द्वाभ्यामावृत्तिभ्यां व्याप्त इति समुदायसोल्लेखतैव । तदिदमुक्तं मण्डूकप्लुत्या गतप्रत्यागतैर्यतेश्चेति मध्ये यतिकृतो व्यवायो बोद्धव्यः । अत्रापि वृत्तौचित्यमनुसरणीयम् ॥

पादसंधौ स्थूलव्यपेतं यथा—

'हठपीतमहाराष्ट्रीदशनच्छदपाटला ।
पाटलाकलिकानेकैरेकैका लिलिहेऽलिभिः ॥ १३६ ॥'

अत्रापि प्राग्वदेव यतिविच्छेदात्पूर्वोत्तरार्धयोरसंहितायां पाटला पाटलेत्यावृत्तेर्नाव्यपेतयमकत्वम् । न चैतत्पादयोरादावन्ते वा शक्यते वक्तुम् । अपि त्वेकस्यादावन्यस्य वान्त्यस्थाने यमकमिदं स्थूलावृत्तेः स्थूलव्यपेतमुच्यते । न चैतद्वाच्यमुपोढरागेत्यादौ काञ्चीयमकेऽप्ययं न्याय इति । तस्यैव तथाभूतलक्षणत्वात् ॥

**हठेति** । हठपानेन ताम्बूलरागो निःशेषितस्तेन प्राक्परभागसहजरागोन्मेषः । व्यवधायकशब्दाभावे कथमिदं व्यपेतमित्यत आह—**अत्रापि प्राग्वदिति** । ननूपोढरागेत्यादौ पूर्वोदाहृतेऽपि यतिविच्छेदादस्ति व्यवधानात्कोऽस्य विशेष इत्याशङ्क्याह—**न चेति** ।

काञ्चीयमक एवाव्यपेतास्थानयमकभेदे सूक्ष्मव्यपेतं यथा—

'धराधराकारधरा धराभुजां भुजा महीं पातुमहीनविक्रमाः ।
क्रमात्सहन्ते सहसा हतारयो रयोद्धुरा यानधुरावलम्बिनः ॥१३७॥'

अत्रान्त्यपादे धुरा धुरेति सूक्ष्मव्यपेतं वर्तते ।

धराधरः शेषो महीं पातुं सहत इत्यन्वयः ॥

स्वभेदान्यभेदयोः स्थूलं सूक्ष्मं च यथा—

'सालं वहन्ती सुरतापनीयं सालं तडिद्भासुरतापनीयम् ।
रक्षोभरक्षोभरसत्रिकूटा लङ्काकलङ्काकलिकाद्रिकूटा ॥१३८॥'

अत्र सालं सालमिति स्वभेदे सुरतापनीयं सुरतापनीयमिति स्थूलः । रक्षोभरक्षोभ लङ्काकलङ्केति अन्यभेदे कूटा कूटेति सूक्ष्मव्यपेते भेदो वर्तते । तदिदमस्थानयमकं स्थूलसूक्ष्ममुच्यते ॥

**सालमिति** । सालः प्राकारः । सुराणां तापनं संतापजननं तस्मै हितमल-

मत्यर्थं सा लङ्का। तपनीयं सुवर्णम्। तापनीयं च तद्भासुरं चेति कर्मधारयः। रक्षसां भरः समूहस्तस्य क्षोभः प्रकर्षजः कोलाहलः। त्रिकूटः सुवेलः। अकलङ्का दोषरहिता। अकलिकानि कलिरहितान्यद्रिकूटानि सुवेलशिखराणि यस्यां सा तथा॥

यत्सूक्ष्मं भागं बह्वावृत्ति तदपि स्थूलसूक्ष्ममेव। यथा—

'मधुरया मधुबोधितमाधवी मधुसमृद्धिसमेधितमेधया।
मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे॥ १३९॥'

**यत्सूक्ष्मं भागमिति**। भागशो विविच्यमानं सूक्ष्ममेव, वृत्तिभूयस्तया तु स्थूलमिव प्रथत इति सूक्ष्मेक्षिकयाभिधानम्॥

**स्थानास्थानविभागोऽयमव्यपेतव्यपेतयोः।**
**क्रमेणोक्तस्तयोरेव पादभेदोऽथ कथ्यते॥ ६५॥**

क्रमप्राप्तमिदानीं पादयमकमुदाह्रियत इत्याह—**स्थानास्थानेति**॥

तत्र व्यपेतभेदेषु प्रथमपादयोरावृत्तिर्यथा—

'न मन्दयावर्जितमानसात्मया नमन्दयावर्जितमानसात्मया।
उरस्युपास्तीर्णपयोधरद्वयं मया समालिङ्ग्यत जीवितेश्वरः॥१४०॥'

**न मन्देति**। मन्दया तत्कालोचितप्रतिपत्तिविधुरया आवर्जितो मान ईर्ष्यारोषलक्षणो यया सा तथा। सात्मा आत्मवती। अनयोः कर्मधारयः। नमन्पादान्ते लुठन्नपि न आवर्जितो मानसात्मानौ यस्या इति बहुव्रीहेर्डाप्॥

तत्रैव द्वितीयतृतीययोर्यथा—

'द्दश्यस्त्वया[illegible] पुरतः पयस्यानानाकलाली रुचिरेण नेत्रा।
नानाकलाली रुचिरेणनेत्रा देवी यदस्मादजनि स्वयं श्रीः॥१४१॥'

आनाकं स्वर्गावधि ललनमुल्लासस्तच्छीलः रुचिरेण मनोहरेण नेत्रा नायकेन नानाकलानां चातुःषष्टिकीनामाली परम्परा। एणनेत्रा हरिणलोचना। द्वयमपि श्रीविशेषणम्॥

एवं तृतीयचतुर्थयोरपि यथा—

'स्मरानलो मानविवर्धितो यः स निर्वृतिं ते किमपाकरोति।
समं ततस्तामरसे क्षणेन समन्ततस्तामरसेक्षणे न॥ १४२॥'

समं समकालं क्षणेन ततो विस्तीर्णस्तामनुभवैकसाक्षिचिन्तानुवृत्तिलक्षणां निर्वृतिमरसे इति सोपालम्भसंबोधनम् । समन्ततः सर्वतस्तामरसेक्षणे कमलनेत्रे न किमपाकरोतीति पूर्वेण संबन्धः ॥

व्यपेतभेदेषु प्रथमतृतीययोर्यथा—

'सभा सुराणामबला विभूषिता गुणैस्तवारोहि मृणालनिर्मलैः ।
स भासुराणामबला विभूषिता विहारयन्निर्विश संपदः पुराम् ॥ १४३ ॥'

अबला बलाख्येन दानवेन रहिता विभुना शक्रेणाध्यासिता सुराणां देवानां सभा मृणालनिर्मलैस्तव गुणैरारोहि, यतः, अतः स त्वं पुरामबला विभूषिताः स्त्रियोऽलंकृता विहारयन् भासुराणां सतां संपदो निर्विशेत्याशंसा ॥

तत्रैव प्रथमचतुर्थयोर्यथा—

'कलं कमुक्तं तनुमध्यनामिकास्तनद्वयीं च त्वदृते न हन्त्यतः ।
न याति भूतं गणने भवन्मुखे कलङ्कमुक्तं तनुमध्यनामिका ॥ १४४ ॥'

कलं मधुराव्यक्तं उक्तं भाषितं तनोर्मध्यस्य भरेण नामिकास्तनद्वयीं च त्वां विहाय कं नायकं हन्ति वशीकरोति । अतो जितेन्द्रियेषु प्रथमगणनीये त्वयि सति कलङ्कमुक्तं निर्दोषं तनुमधि शरीरमधिकृत्य भूतमनामिकाऽनामिकाङ्गुलिः न याति परस्य त्वत्सदृशस्याभावात् । निर्दोषो हि लोके ऊर्ध्वाङ्गुल्या निर्दिश्यते ॥

एवं द्वितीयचतुर्थयोरपि यथा—

'या बिभर्ति कलवल्लकीगुणस्वानमानमतिकालिमालया ।
नात्र कान्तमुपगीतया तयास्वानमा नमति कालिमालया ॥ १४५ ॥'

वल्लकीगुणस्वानो वीणाशब्दस्तस्य मानं या बिभर्ति । कालिम्नः श्यामताया आलया कज्जलप्रभृतीनतीत्य वर्णप्रकर्षेण या स्थिता, तया गातुमुपक्रान्तया भ्रमरैरमालया हेतुभूतया का नामात्र पर्वतं कान्तं न नमति न प्रणमतीति न, न सुखेन आनम्यते इति अस्वानमा या प्रागासीत् साप्युद्दीपनप्रकर्षे निःशेषितमाना नमतीत्यर्थः ॥

**अर्धाभ्यासः समुद्गः स्यात्तस्य भेदास्त्रयो मताः ।
व्यपेतश्चाव्यपेतश्च उभयात्मा च सूरिभिः ॥ ६६ ॥**

तेषु व्यपेतो यथा—

'अनेकपादभ्रमदभ्रसालं मान्ये दृशाभीरुपतत्रिकूटम् ।
अनेकपादभ्रमदभ्रसालं मान्ये दृशा भीरु पतत्रिकूटम् ॥ १४६ ॥'

अनेकेषु पादेषु प्रत्यन्तपर्वतेषु भ्रमन्त्यभ्राणि मेघा एव सालो वरणः प्राकारः, मान्याः पूजार्हा ईदृशा यथादृश्यं तथैव मनोहारिणोऽभीरवो भयरहिताः पतत्रिकूटाः पक्षिसङ्घा यत्र, अनेकपा हस्तिनस्तेषामदभ्र उत्कटो मदस्तं भरन्ति धारयन्तीति मूलविभुजादित्वात्कप्रत्यये अनेकपादभ्रमदभ्राः साला वृक्षा यत्र । मान्ये भीर्विति संबोधनद्वयम् । मानः शृङ्गारभावस्तदर्हा दृशा त्रिकूटं पर्वतमालोकयेति ॥

अव्यपेतो यथा—

'घनं विदार्यार्जुनबाणपूगं घनं विदार्यार्जुनबाणपूगम् ।
ससार बाणोऽयुगलोचनस्य ससारबाणोऽयुगलोचनस्य ॥ १४७ ॥'

विदारी कन्दभेदः, अर्जुनः ककुभः, बाणो गुल्मविशेषः, पूगो गुवाकः । वृक्षद्वन्द्वत्वात्पाक्षिक एकवद्भावः । अर्जुनः पार्थस्तस्य बाणपूगं शरसमूहस्तं विदार्य भित्त्वा । अयुगलोचनस्त्रिनेत्रः किरातस्वरूपधरस्तस्य ससार गतः सारबाण उत्कृष्टशब्दस्तेन सहितोऽयुगद्वितीयः, अलोचनस्य दुर्ज्ञानस्य ॥

व्यपेताव्यपेतो यथा—

'कलापिनां चारुतयोपयान्ति वृन्दानि लापोढघनागमानाम् ।
वृन्दानिलापोढघनागमानां कलापिनां चारुतयोऽपयान्ति ॥१४८॥'

पादत्रयाभ्यासस्तु नातिसुन्दर इति तद्भेदा नोदाह्रियन्ते ॥

के पानीये लपनशीला हंसास्तेषां वृन्दानि चारुतया मनोज्ञभावेनोपयान्ति संगच्छन्ते । लापेन परस्परसंलापमात्रेणोढः प्राप्तो घनो निरन्तर आगम आगमनं येषाम् । वृन्दानिलो वात्या तेनापोढो निराकृतो घनागमो मेघदुर्दिनं कलापिनो मयूरा आरुतयः समन्ततः केकायितानि अपयान्ति तिरोभवन्ति । एकश्लोके पादत्रयाभ्यासस्यासंभवाच्छ्लोकान्तरे च तथा सौन्दर्याभावात्पादत्रयाभ्यासो न चिन्तनीय इत्यत आह— **पादत्रयेति** ॥

**एकाकारचतुष्पादं महायमकमुच्यते ।**
**श्लोकाभ्यासश्च तत्राद्यं पुनरभ्यासमर्हति ॥ ६७ ॥**

इदानीं क्रमप्राप्तं महायमकं लक्षयन्नाह—**एकाकारेति**। द्विविधमेकाकारं भवति। एकमावृत्तिचतुष्केण, अपरमावृत्त्यष्टकेन। तदिदमुक्तमाद्यं पुनरनावृत्तमिति। प्रतिपादमवान्तरावृत्तिभेदेनैवाष्टकनिर्वाहात्॥

तत्राव्यपेतभेदे महायमकं यथा—

'सभासमानासहसापरागात्सभासमाना सहसा परागात्।
सभासमाना सहसापरागात्सभासमाना सहसापरागात्॥ १४९॥'

भासः कान्तिः, मानश्चित्तसमुन्नतिः पूजा वा, आसः शत्रुविधूननम्, हसः स्मेरता, एतैः सह वर्तते इति सभासमानासहसा यतोऽपरागं चित्तकालुष्यमस्ति। भासमानैः शोभमानैः सह वर्तते सभासमाना। सहसा मार्गशीर्षेण हेतुना प्रावृड्विच्छेदप्रादुर्भूतान् परागान् रजःकणानतति प्राप्नोतीति परागात्। भा कान्तिस्तया समाना सरूपास्तैः सह वर्तत इति सभासमाना। षोऽन्तकर्मणि। स्यन्ति परानिति साः, तैः सह वर्तत इति सहसा। एवंभूता असमाभा अनुपमा सभा जनसमवायोऽपरागादपरस्मात्पर्वतात् सहसा शीघ्रं परागात्परागतेति॥

व्यपेतभेदे द्वितीयं महायमकं यथा—

'प्रवणमदभ्रमदचलद्विपराजितमूढविमलमहिततरङ्गं
विरसं सदातिमिश्रितमच्युतधाम प्रतीतशिखिचरितवनम्।
प्रवणमदभ्रमदचलद्विपराजितमूढविमलमहिततरङ्गं
विरसं सदातिमिश्रितमच्युतधामप्रतीतशिखिचरितवनम्॥१५०॥'

प्रवणं प्रकृष्टतरवनम्। 'प्रनिरन्तःशर—' इत्यादिना णत्वम्। अदभ्रेण महता मदेन दर्पेण चलन्तो ये वयः पक्षिणस्तैः पराजिता मूढवयोबालाः पक्षिणो यत्र तम्, अलमत्यर्थं पूर्वोक्तरूपानमूढान् वीन् पक्षिणो मलते धारयतीति वा। अहिततरङ्गं भुजङ्गव्याप्तावर्तस्थानम्। विरसमतलस्पर्शतया भूभागरहितम्। सदा सर्वकालं तिमिभिर्महामत्स्यैः श्रितमाश्रितम्। अच्युतस्य भगवतो नारायणस्य धाम विश्रान्तिस्थानम्। प्रतीतः प्रख्यातः शिखी वडवानलस्तेन चरितवनं भक्षितजलोत्पीडमिति प्रथमः श्लोकार्थः। प्रवणमदाः मदायत्तदर्पाः सततनिस्यन्दमानमदजलाश्च भ्रमन्तो ये मैनाकप्रभृतयोऽचला द्विपाः करिमकराश्च तैः शोभितम्। ऊढा विमला स्वभावनिर्मला महिताः पूजितास्तरङ्गा येन तम्। विरसं क्षारम्। सतीभिः शोभ-

नाभिरातिभिः पक्षिविशेषैर्मिश्रितं करम्बितम् । न च्युतं धाम तेजो यस्य तम् । प्रतीताः प्रत्यागताः शिखिनो मयूरास्तैश्चरितवनं भ्रान्ततीरकाननं समुद्रं पश्येति वाक्यान्तरवर्तिक्रियया संबन्ध इति द्वितीयः श्लोकार्थः ॥

अव्यपेतभेदे आद्यस्य पुनरभ्यासो यथा—

'समान यासमानया स मानया समानया ।
समानयासमानया समानयासमानया ॥ १५१ ॥'

**समानेति** । हे समान सखे, यासमानया अविनयवतीनां धुरि गणनीयया अनया समानया समानो यासः प्रयत्नो मान ईर्ष्यारोषस्तौ समानौ यस्यास्तया, तथा समानया चित्तानुस्मृतिसारूप्यं भजमानया पूजासहितया असमानया अनुपमया स त्वं मा मां समानय संगमयेति मन्मथोन्मादाविष्टस्य कस्यचिद्वयस्यस्य प्रार्थना ॥

**एकरूपेण वाक्येन द्वयोर्भणनमर्थयोः ।**
**तन्त्रेण यत्स शब्दज्ञैः श्लेष इत्यभिशब्दितः ॥ ६८ ॥**

बन्धावृत्तिसामान्याद्यमकानन्तरं श्लेषं लक्षयति—**एकरूपेणेति** । अर्थभेदेन शब्दा भिद्यन्त इति नये कथमेकेन वाक्येन द्वयोरुक्तिरित्यत आह—**तन्त्रेणेति** । श्लेषो हि संभेदलक्षणः । स चात्र भिन्नानामपि शब्दानामुच्चारणसाम्येन प्रवर्तते । अनेकसंबन्धानामैकरूप्येण वर्तनं तन्त्रमित्युच्यते ॥

**प्रकृतिप्रत्ययोत्थौ द्वौ विभक्तिवचनाश्रयौ ।**
**पदभाषोद्भवौ चेति शब्दश्लेषा भवन्ति षट् ॥ ६९ ॥**

द्वयोरिति संख्या न विवक्षिता, त्रिप्रभृतीनामपि श्लेषसंभवात् । विभागवाक्ये विभक्तीनां साक्षादुपादानात्प्रत्ययपदं तदन्यपरं, विशेषशोभाकरत्वं च विशेषोपादान-प्रयोजनम् ॥

तेषु प्रकृतिश्लेषो यथा—

'आत्मनश्च परेषां च प्रतापस्तव कीर्तिनुत् ।
भयकृद्भूपते बाहुर्द्विषां च सुहृदां च ते ॥ १५ ॥'

अत्र कीर्तिनुदित्यत्र नौति-नुदत्योर्भयकृदित्यत्र करोति-कृन्तत्योः प्रकृत्योः क्विपि तुल्यं रूपमिति प्रकृतिश्लेषोऽयम् ॥

आत्मनः कीर्तिं नौति स्तौति। परेषां शत्रूणां च नुदति क्षिपति। द्विषां भयं करोति जनयति। सुहृदां च भिनत्तीति धातुरूपप्रकृतिभेदादेवार्थभेदः क्विप्प्रत्ययस्य साधारण्यात्॥

लिङ्गश्लेषोऽपि प्रकृतिश्लेष एव। स यथा—

'कुवलयदलद्युतासौ दृशा च वपुषा च कं न दर्शयते।
अधरीकृतप्रवालश्रियाङ्घ्रिणास्येन च नतभ्रूः॥ १५३॥'

अत्र दृग्वपुषोरास्यचरणयोश्च कुवलयदलद्युतेत्यधरीकृतप्रवालश्रियेति च लिङ्गभेदेऽपि तुल्यरूपे विशेषणे इति लिङ्गश्लेषोऽयम्॥

ननु 'वर्णपदलिङ्गभाषाप्रकृतिप्रत्ययविभक्तिवचनानाम्' इति कैश्चित्परिसंख्यातम्, ततश्चाष्टधा श्लेषो भविष्यतीत्यत आह—**लिङ्गश्लेषोऽपीति**। तदिदमुदाहरणीयमित्याह—**स यथेति**। दर्शयत इत्यात्मनेपदेन तटस्थमपि कं न हठाद्दर्शनाय प्रेरयतीति व्यज्यते। अधरीकृता जिताधरत्वमापादिता च। ननु च कुवलयदलद्युतेति अधरीकृतप्रवालश्रियेति च प्रकृतिभागो न भिद्यते, तत्कथमयं प्रकृतिश्लेष इति। नैतत्। आविष्टलिङ्गद्वयविशेष्यलिङ्गद्वयसंनिधानादनाविष्टलिङ्गं विशेषणमवश्यमुभयलिङ्गग्राहि वाच्यम्। पञ्चकप्रातिपदिकार्थपक्षे विभक्तिर्द्योतिकैव तथा च लिङ्गभेद इति विभिन्ने विशेषणप्रकृती मिथःसंश्लिष्टे इति। **अत्रेत्यादि**॥

प्रत्ययश्लेषः सोद्भेदो निरुद्भेदश्च। तयोराद्यो यथा—

'तस्या विनापि हारेण निसर्गादेव हारिणौ।
जनयामासतुः कस्य विस्मयं न पयोधरौ॥ १५४॥'

अत्र हारिणाविति इनिणिनिप्रत्यययोरेकरूपत्वाद्विनापि हारेणेति च मत्वर्थीयोद्भेदात्सोद्भेदप्रत्ययश्लेषोऽयम्॥

तद्वाक्यस्थशब्दान्तरप्रकाशितः सोद्भेदः, अतथाभूतो निरुद्भेदः। मत्वर्थीयेनिप्रत्यये हारवन्तौ हारिणौ। आवश्यकार्थणिनिप्रत्यये सहृदयानां मनो हरत इति हारिणौ। आनन्दघनरसचर्वणारूपो विस्मयोऽद्भुतं च। अपिशब्देन विरोधद्योतकेन हारहीनयोरपि हारसंबन्धो विस्मयरसार्पक इति मत्वर्थीयोन्मुद्रणात्सोद्भेदः। प्रत्ययश्लेषस्तु कथं भवतीत्यत आह—**इनिणिनिप्रत्यययोरिति**॥

द्वितीयो यथा—

'त्वदुद्धृतामयस्थानरूढव्रणकिणाकृतिः ।
विभाति हरिणीभूता शशिनो लाञ्छनच्छविः ॥ १५५ ॥'

अत्र हरिणीभूतेति च्वेर्ङीपश्च तुल्यरूपतायां तदुद्भेदो नास्तीत्यनुद्भेदः प्रत्ययश्लेषोऽयम् ॥

व्रणरूढिस्थानं श्यामं भवतीति लाञ्छनच्छायाभूता कीदृशी हरिणी हरिता । 'वर्णादनुदात्तात्तोपधात्तो नः' इति ङीपि नादेशे च रूपम् । सेयं प्रतीयमानगुणनोत्प्रेक्षा । अहरिणरूपापि व्यवहारारूढहरिणतामापन्नेति च्विप्रत्यये च हरिणीभूते रूपम् । अत्र ङीपश्च्वेर्वा न किंचिद्भेदकं निबद्धमिति निरुद्भेदः प्रत्ययश्लेषोऽयम् । हरितहरिणरूपे प्रकृती अपि संभिन्ने एव । संकरस्यादूषणत्वात् । एवं पूर्वोदाहरणेऽपि ॥

विभक्तिश्लेषो द्विधा—भिन्नजातीययोः, अभिन्नजातीययोश्च । तयोराद्यो यथा—

'विषं निजगले येन बभ्रे च भुजगप्रभुः ।
देहे येनाङ्गजो दध्रे जाया च स जयत्यजः ॥ १५६ ॥'

अत्र येन विषं निजगले, भुजगराजश्च निजगले बभ्रे, अङ्गजो देहे, जाया च दध्रे इति तिङ्सुब्विभक्त्योः लिडात्मनेपदप्रथमपुरुषैकवचनसप्तम्येकवचनान्तयोरेकरूपत्वाद्विभिन्नार्थकत्वाद्भिन्नजातीयसुप्तिङ्विभक्तिश्लेषोऽयम् ॥

निजगल इति गिरतेः कर्मणि लिटि रूपम् । येन विषं कालकूटाख्यं निगीर्णम्, निजे च गले कण्ठे भुजगराजो धृतः । देह इति दहतेस्तत्रैव [ कर्मणि लिटि ] रूपम् । अङ्गजः कामो येन दग्धः, निजे च देहे शरीरे जाया पार्वती धृता स जयतीति । विवरणग्रन्थः सुबोध एव ॥

द्वितीयो यथा—

'त्वमेव धातुः पूर्वोऽसि त्वमेव प्रत्ययः परः ।
अनाख्यातं न ते किंचिन्नाथ केनोपमीयसे ॥ १५७ ॥'

अत्र धातुरिति प्रथमान्तस्य षष्ठ्यन्तस्य चैकरूपत्वाद्भिन्नार्थकत्वाच्चाभिन्नजातीयसुब्विभक्तिश्लेषोऽयम् ॥

धातुर्जगन्निर्मातुरपि पूर्व इत्यनेनानादित्वमुक्तम् । परः प्रत्ययः कारणत्रयरूपं न किंचिदनाख्यातम् । श्रुतिस्मृतीतिहासपुराणेषु प्रसिद्धावदानत्वात् । द्वितीयस्याभावान्न केनचिदुपमानम् । अर्थान्तरे तु धातुः क्रियावचनशब्दरूपः पूर्व एव प्रकृतित्वात्ततः परः प्रत्ययः तिङादिः । अतः सर्वमाख्यातमेव पदं निष्पद्यते । तेन च कथं तिङन्तेनोपमानमस्ति भिन्नार्थत्वाच्चेति 'शब्दभेददृढीकरणार्थमुक्तम् । एवं तिङामपि संभेद उदाहरणीयः । यथा—

'मायन्तु नाम कवयस्तथापि विदितश्रमाः ।
वेद विद्या पतिर्वाचामहं वाचोरिवान्तरम् ॥'

अत्र वेदेति प्रथमोत्तमयोः पुरुषयोरेकवचने श्लिष्येते ॥

वचनश्लेषो द्विधा—सोद्भेदः, निरुद्भेदश्च । तयोः सोद्भेदो यथा—

'प्राज्यप्रभावः प्रभवो धर्मस्यास्तरजस्तमाः ।
मुक्तात्मा नः शिवं नेमिरन्येऽपि ददतां जिनाः ॥ १५८ ॥'

अत्र नेमिरित्यन्येऽपीति एकवचनबहुवचनाभ्यां ददतामित्यत्र तिङन्ते प्राज्यप्रभावः प्रभव इत्यादिषु च सुबन्तेष्वेकवचनबहुवचनयोरुद्भेद इत्ययं सोद्भेदो नाम वचनश्लेषः ॥

निरुद्भेदो यथा—

'तनुत्वरमणी यस्य मध्यस्य च भुजस्य च ।
अभवन्नितरां तस्या वलयः कान्तिवृद्धये ॥ १५९ ॥'

अत्राभवन्निति वलय इति पदयोस्तिङन्तसुबन्तयोरेकवचनबहुवचने अनुद्भिन्ने एव श्लिष्येते इत्ययं निरुद्भेदो नाम वचनश्लेषः ॥

एकवचनबहुवचनाभ्यां विशेषणेषु संबन्धयोग्यताक्षेपातिश्ववचनेषु सुब्वचनेषु च यथायथमर्थद्वयोन्मीलनाच्छब्दरूपद्वयोद्भेदः । एकवचनेन वलयः कङ्कणं बहुवचनेन च मध्यरेखा इति सुबन्तपदे। एतदौचित्ये तिङन्तपदे चाभवन्निति वचनद्वयलाभः । न चानयोः किंचिदुद्भेदकं निबद्धमिति निरुद्भेदोऽयम् । तदेतदाह—**अत्रेत्यादि** ॥

पदश्लेषो यथा—

'अरिमेदः पलाशश्च बाहुः कल्पद्रुमश्च ते ।
बालेवोद्यानमालेयं सालकाननशोभिनी ॥ १६० ॥'

अत्र प्रकृतिप्रत्ययविभक्तिवचनानां पृथगभिधानादभिधानमालोक्तानि प्रातिपदिकान्येव पदशब्देनोच्यन्ते । तेन पूर्वार्धे शत्रुमेदोमांसादस्ते बाहुरित्यर्थेनारिमेदपलाशाख्यवृक्षनाम्नी श्लिष्येते । उत्तरार्धे च सालानां काननेन शोभत इत्येवंशीलेयमुद्यानमालेव इत्यर्थेन सालकेनाननेन शोभत इत्येवंशीला बालेत्युपमानार्थः श्लिष्यते । स एष पदश्लेषो नाम शब्दश्लेषः ॥

अरीणां मेदः शरीरधातुभेदः, पलं मांसमश्नाति यः स तथा, चकार उत्तरवाक्यापेक्षया । अरिमेदो विट्खदिरः, पलाशः किंशुकः, सालास्तरुविशेषास्तेषां काननम्, अलकाश्चूर्णकुन्तलास्तत्सहितमाननं च । पूर्वोत्तरार्धयोर्नैकवाक्यत्वमुदाहरणत्वात् । ननु विभक्त्यन्तान्नान्यत्पदं तत्र पूर्वभागेन प्रकृतिश्लेष उत्तरभागेन च प्रत्ययश्लेष उद्दिष्ट एव, तत्कोऽन्यः पदश्लेष इत्यत आह—**अत्रेति** । प्रकृतिप्रत्ययभावविवक्षाविरहे नाममालोक्तानि प्रातिपदिकान्येवावशिष्यन्त इत्यर्थः ॥

वर्णश्लेषोऽपि पदश्लेष एव । स यथा—

'त्वमेव देव पातालमाशानां त्वं निबन्धनम् ।
त्वं चामरमरुद्भूमिरेको लोकत्रयात्मकः ॥ १६१ ॥'

अत्र त्वमेव पातालमित्यकारः पाश्चात्ये, त्वं च अमरमरुद्भूमिरिति चकारः पौरस्त्येऽक्षरे श्लिष्टः पातालं चामरे इति च पदं रचयति । सोऽयं पदश्लेष एव वर्णश्लेष इत्युच्यते ॥

'अलंकारः शङ्काकरनरकपालं परिजनो
विशीर्णाङ्गो भृङ्गी वसु च वृष एको बहुवयाः।
अवस्थेयं स्थाणोरपि भवति सर्वामरगुरो-
र्विधौ वक्रे मूर्ध्नि स्थितवति वयं के पुनरमी॥'

इति वर्णश्लेषः काश्मीरकैः पृथगुदाहृतः। अत आह—**वर्णश्लेषोऽपीति**। अवयवाभेदे समुदायसंभवादवयवभेदे च समुदायभेदध्रौव्यात्पदश्लेषव्यवस्थितौ तत्रैवास्यान्तर्भावो युक्त इति भावः। अल्पमल्पर्थं पाता रक्षिता, आशानां निबन्धनं मनोरथसफलीकरणबीजं, आशानां दिशां संश्लेषस्थानम्, चामरमरुद्भूमिः स्वर्लोकोऽमराणामिन्द्रादीनां भूमिरमरावत्यादिर्मरुतां च विवहादीनां भूमिर्वैमानिकपथश्चामरमरुद्भूमिश्चामरमरुतामाश्रयश्च। कथमत्र वर्णश्लेष इत्यत आह—**अत्रेत्यादि**। 'पतिचण्डिभ्यामालञ्' इति पतेरालञ्प्रत्यये पातालमिति रूपसिद्धावाकार एव मध्यवर्तिवर्णः, तत्रैव पुनरेकदेशप्रतिसंधाने पातालमित्याकारश्च प्रतीयते। अत्र च 'एकः पूर्वपरयोः' इति वचनादाकार एव श्रूयते तेनोत्तरः पौरस्त्येन संभिन्नः। एवं चकारस्योत्तरसंभेदो व्याख्येयः॥

भाषाश्लेषो यथा—

'कुरु लालसभूलेहे महिमोहहरे तुहारिविच्छिन्ने।
हरिणारिसारदेहे वरे वरं हर उमे भावम्॥ १६२॥'

अत्र—

'ध्यानानीतां च रुद्राणीं कान्तां च पुरतः स्थिताम्।
रणेच्छुः कश्चिदानर्च दिव्यप्राकृतया गिरा॥ १६३॥'

तत्र रुद्राणीपक्षे—हे उमे, हरे भवे वरं श्रेष्ठं भावं कुरु। किंभूते। लालसभूलेहे लालसभूः कामस्तं लेढि यस्तस्मिन्। तथा महिम्ना प्रभावेणोहं वितर्कमपहरति यस्तस्मिन्महिमोहहरे। महेश्वरसंनिधौ हि सर्वज्ञानाभिभव इति श्रूयते। अतएव तोहन्ति अर्दयन्ति तुहा अरयस्तैर्विच्छिन्ने विरहिते। अपरमप्यरीणां विच्छेदकारणमाह—हरिणारिसारदेहे हरिणारिः सिंहस्तस्य सारो बलं स देहे यस्य तस्मिन्। वरे परि-

शेतरीति । उमाया एव वा इमानि संबोधनविशेषणानि । कान्तापक्षे तु—हे कान्ते, तव योऽयं हरिनार्याः श्रियाः सार उत्कृष्टो देहस्तत्र यद्वरं श्रेष्ठं विलोचनाननस्तनजघनादि तन्मे भावमभिलाषं हरतु । कामान्पूरयत्वित्यर्थः । किंभूते देहे । कुटिलालसभ्रूलेखे महिमोहहरे गृहे हारिणि विच्छिन्ने च तनुमध्यत्वादिभिरिति ॥

दिव्या संस्कृता । प्राकृता महाराष्ट्री । भावश्चेतसो लयः । लालस इच्छा तस्माद्भवतीति लालसभूः संकल्पयोनित्वात्कामस्तं लेढीति कर्मण्यण् । ऊहस्तर्कः संशयपृष्ठभावी विपरीतप्रत्ययविशेषः । कथं तं हरतीत्यत आह—**महेश्वरसंनिधाविति** । संनिधिः साक्षात्काररूपः । सर्वज्ञानानि संस्कारप्रवर्तकानि । 'तुहिर् अर्दने' तोहतीति इगुपधत्वात्कप्रत्यये तुहा अरयः । ते द्विधा—आन्तराः, बाह्याश्च । आन्तरा मदमानादयः षट्, बाह्याः क्षेत्रापहारकादयः । तत्र पूर्वविच्छेदे त्व हरिणारिसारदेहत्वं हेतुरुक्तः । हरिणारिसार इव सारो यस्येत्युत्तरपदलोपे हरिणारिसारो देहो यस्येति विग्रहवाक्यमवसेयम् । यथाश्रुत्यर्थकथनमात्रमुमाया एवेत्यत्र लालसभूलेह इलच्प्रत्यये व्याख्येयम् । तुशब्दस्तवार्थे । 'तुतुवतुह्यतुब्भतुज्झा ङसः' इति सूत्रात् । हरिनारी लक्ष्मीस्तस्याः सकाशात् सारः प्रकर्षशाली देहः । 'पञ्चमी' इति योगविभागात्समासः । कुरुलाश्चूर्णकुन्तलाः । महीशब्देन भूगोलवर्तिनः [illegible]ऽभिमतास्तेषां मोहगृह इति व्याख्येयम् । विच्छिन्नो विभक्तावयवः ॥

यथा वा—

'रुचिरञ्जितारिहेतिं जननमितं सामकायमकलङ्कम् ।
सन्तममितं च मानय कमलासनमभिविराजन्तम् ॥ १६४ ॥'

'भूतसंस्कृतभाषाभ्यां द्विर्नमस्कृत्य माधवम् ।
जगाम समरं कोऽपि कस्य श्रेयसि तृप्तयः ॥ १६५ ॥'

तत्र भूतभाषायां यथा—

रुचिरं मनोहरं जितारिहेतिं भग्नसपत्नायुधं जनैर्नमितं श्यामकाय-

मकलङ्कं शान्तं शान्तरूपं अमितमनन्तम् । चः समुच्चये । कमलासनं ब्रह्माणमभिलक्षीकृत्य विराजन्तं शोभमानं मानय पूजयेति ॥

संस्कृतभाषायां यथा—

रुचिभी रञ्जिता अरिहेतयश्चक्रदीप्तयो येन तम्, जननैर्दशभिरवतारैर्मितं परिच्छिन्नम्, सामानि कायति गायति यः स सामकायस्तम्, न विद्यते कला यस्य सोऽकलस्तम्, कं सन्तं ब्रह्माणं अं विष्णुमितं गतम्, अभिविराजं गरुत्मन्तमभि तं प्रसिद्धं कमलासनं श्रिया संसक्तं मा मां नय प्रापयेति ॥

एवं पैशाचादिभिरपि संस्कृतस्य प्राकृतादेश्च परस्परसंभेदनाच्छ्लेषो गवेषणीय इत्याशयवानाह—**यथा वेति**। अकलङ्कं दोषरहितं मानयेति धात्वर्थस्य भाव्यत्वेनान्वयात्पूजां कुर्वित्यर्थः । **ब्रह्माणमभिलक्षीकृत्येति**। रुचय आत्मीयाः । अरा विद्यन्ते यस्य तदरि चक्रम् । हेतयः किरणाः । जननं जन्म । सामानि कायति कीर्तयतीति 'अपवादविषये क्वचिदुत्सर्गः प्रवर्तते' इति कर्मण्यण् । कला अवयवाः प्रसिद्धाः । वीनां पक्षिणां राजा गरुडस्तमभि इतं गतम् । कमला लक्ष्मीस्तस्या आसनमधिष्ठानं मा मां नयेति ॥

**आवृत्तिर्या तु वर्णानां नातिदूरान्तरस्थिता ।**
**अलंकारः स विद्वद्भिरनुप्रासः प्रदर्श्यते ॥ ७० ॥**

अनुद्भटावृत्तेश्चित्रादुद्भटावृत्तिमनुप्रासं पूर्वं लक्षयति—**आवृत्तिरिति**। वर्णानामिति वचनमतन्त्रम् । 'सारः सारस्वती मूर्तिः' इत्यादावेकवर्णावृत्तेरप्यनुप्रासत्वात् । तेन यमकव्यतिरिक्ता वर्णावृत्तिरनुप्रास इति लक्षणमुक्तं भवति । न च श्लेषेऽतिप्रसङ्गः । तस्माभ्यां विशेषात् । पूर्वजातिप्रतिबिम्बनेन बन्धच्छायार्थकतयानुप्रासोऽलंकारपदवीमध्यास्ते । नच निर्निमित्तमेव प्रतिबिम्बनमत आह—**नातिदूरेति**। अस्ति कश्चिदुच्चारणस्य ज्ञानस्य वा विशेषो यः शीघ्रमेव संस्कारमुद्बोधयतीति तद्वती वर्णावृत्तिरभिप्रेता । अत एव प्राचीनवर्णजात्यनुगतः सहृदयावर्जकतया प्रकृष्टश्च वर्णानामनुप्रास इति काश्मीरिका निरुक्तिः ॥

**श्रुतिभिर्वृत्तिभिर्वर्णैः पदैर्नामद्भिरुक्तिभिः ।**
**लाटानामुक्तिभिश्चायं षट्प्रकारः प्रकाशते ॥ ७१ ॥**

एवं स्थिते सामान्यलक्षणविभागमाह—**श्रुतिभिरिति** । आवृत्तिर्द्विधा—वर्णमात्रावलम्बिनी, समुदायगोचरा च । आद्यापि द्विधा—सामान्यतः, रूपतश्च । सामान्यमपि द्विधा—स्थानतः, व्यापारतश्च । तत्र स्थानं कण्ठादिलक्षणं सैव श्रुतिः । श्रूयते हि तयाभिव्यक्तो वर्णव्यापारोऽभिव्यञ्जनरूपः, स एव रसविषये वर्तनं वृत्तिरुच्यते । श्रुतिभिरित्यादौ इत्थंभूतलक्षणे तृतीया ॥

**प्रायेण श्रुत्यनुप्रासस्तेष्वनुप्रासनायकः ।**
**सनाथैव हि वैदर्भी भाति तेन विचित्रिता ॥ ७२ ॥**

**प्रायेणेति** । श्रुत्यनुप्रासो हि श्लेषघटकः । श्लेषश्च गुणान्तरसमकक्षतयावतिष्ठमानो वैदर्भीं प्रयोजयति । अनुप्रासान्तरं तु प्रौढिं वा माधुर्यं वा प्रकर्षयतीति न तथानुकूल्यम् । कविशक्तिवशात्तु क्वचित्तदपि प्रयोजयतीति प्रायपदेन सूचितम् । स्थितिप्रयोजको लोके नाथ इत्युच्यते, तेषु नायक इत्येव वक्तव्ये पुनरनुप्रासपदमनुप्रासान्तरसाधारण्येनैव शब्दालंकारत्वं दर्शयितुमिति समाधेयम् । विचित्रिता आलेख्यमिव लेखया चमत्कारकारित्वमानीता ॥

**निवेशयति वाग्देवी प्रतिभानवतः कवेः ।**
**पुण्यैरमुमनुप्रासं ससमाधिनि चेतसि ॥ ७३ ॥**

कथं पुनरस्यानुप्रासस्य पृथक्प्रयत्नानुसंधेयस्यापि रसप्रकाशसामग्र्यामन्तर्भाव इत्यत आह—**निवेशयतीति** । अक्लिष्टपदवाक्यार्थस्फुरणं प्रतिभानम् । तदेव कथमित्यत आह—**ससमाधिनीति** । **पुण्यैरिति** । तेन रसवत्त्वव्यवस्थितस्य कवेरहंपूर्विकाकृष्टोऽनुप्रासो न पृथक्प्रयत्ननिर्वर्त्य इति तात्पर्यम् । ग्राम्यादिभेदोऽग्रे विवरिष्यते ॥

स त्रिधा—ग्राम्यः, नागरः, उपनागरश्च । तेषु ग्राम्यश्चतुर्धा—मसृणः, वर्णमसृणः, वर्णोत्कटः, वर्णानुत्कटश्च ।

तेषां मसृणो यथा—

'एष राजा दयालक्ष्मीं प्राप्तवान्ब्राह्मणप्रियः ।
तदा प्रभृति धर्मस्य लोकेऽस्मिन्नुत्सवोऽभवत् ॥ १६६ ॥'

अत्र स्थानतः समानश्रुतीनां मूर्धन्यतालव्यदन्त्यौष्ठ्यकण्ठ्यवर्णानां प्रथमतृतीयपादयोर्निरन्तरा द्वितीयचतुर्थयोश्च सान्तरा पट इव स्रग्दाम्नीव वा वर्णप्रदानान्मसृणैवावृत्तिः । सोऽयं श्रुत्यनुप्रासो मसृण इत्युच्यते ॥

एकपदप्रतिभासमात्रानुमेयो मसृणः । रूपसाजात्येऽपि मसृणतान्यग्भूतो वर्णमसृणः । उद्भटरूपसाजात्यानुविद्धो वर्णोत्कटः । अनुद्भटसाजात्यानुरोधेन किंचिदभिभूतमसृणभावो वर्णानुत्कटः । एष राजेत्यादावुदाहरणे षकाररेफौ मूर्धन्यौ, जकारयकारौ तालव्यौ, दकारलकारौ दन्त्याविति प्रथमपादे । तकारदकारौ दन्त्यौ, पकारभकारावोष्ठ्यौ, तकारधकारौ दन्त्याविति तृतीयपादे च । निरन्तरं द्वितीयपादे रेफणकारौ मूर्धन्यौ । चतुर्थपादे लकारसकारौ दन्त्यावित्यादि । विना क्रमेण सान्तरमावर्तनं नवरूपसाजात्यं क्वचिदुल्लिखतीति मसृण एवायम् ॥

वर्णमसृणो यथा—

'स्थिताः क्षणं पक्ष्मसु ताडिताधराः पयोधरोत्सेधनिपातचूर्णिताः ।
वलीषु तस्याः स्खलिताः प्रपेदिरे चिरेण नाभिं प्रथमोदबिन्दवः १६७'

अत्र दन्त्यौ मूर्धन्यावोष्ठ्यौ डलयोरैक्येन दन्त्यपञ्चकं मूर्धन्य इत्यादिना क्रमेण यद्यपि पूर्ववत्स्थानतः समानश्रुतितया मसृणैवावृत्तिः, तथापि चित्रपट इव माल्यग्रथन इव वा योऽयं क्षणं पक्ष्मसु ताडिताधराः, पयोधरः, वलीः, स्खलिताः प्रपेदिरे चिरेण नाभिं प्रथमोदबिन्दवः, इति नानावर्णात्मकः सूत्रान्तरस्येव पुष्पान्तरस्येव वा स्थानभेदेन मसृण एव निवेशस्तेनैष श्रुत्यनुप्रासो वर्णमसृण इत्युच्यते ॥

अत्र चित्रतन्तुमयः पटः । एकजातीयकुसुमग्रथनात्प्राक् स्थिता इत्यादि । अत्र थकारतकारौ दन्त्यौ, षकारणकारौ मूर्धन्यौ, पकारमकारावोष्ठ्यौ । ताडितेत्यत्र डकारे लकारकल्पनया सनलतधाः पञ्च दन्त्याश्च रेफो मूर्धन्य इति प्रथमपादे । द्वितीयपादे च धकारसकारौ नकारतकारौ दन्त्यावित्यादिना क्रमेण सान्तरा निरन्तरा च श्रुतित एव वर्णावृत्तिः पूर्ववदुपलभ्यते । किंतु तकारादीनां रूपतोऽपि स्थाने स्थाने पूर्वमसृणतान्यग्भूतैवावृत्तिस्तेनायं वर्णमसृणः । श्रुतिसाजात्यं च न क्वचिद्विघटते । अत्रैव निदर्शनद्वयम् ॥

वर्णोत्कटो यथा—

'विमुच्य सा हारमहार्यनिश्चया विलोलदृष्टिः प्रविलुप्तचन्दना ।
बबन्ध बालारुणबभ्रुवल्कलं पयोधरोत्सेधविशीर्णसंहति: ॥१६८॥'

अत्र सर्वं पूर्ववत् । किंतु तृतीयपादे बबन्ध बालारुणबभ्रुवल्कलमिति वर्णाधिक्ययोगः । सोऽयं वर्णोत्कटो नाम श्रुत्यनुप्रासः ॥

**विमुच्येति** । हारोचितसंनिवेशयोरपि स्तनयोरनुचितवल्कलबन्धसंभावने हेतुरहार्यनिश्चयेति । अत एव सा मां कोऽपि वारयेदिति कातरताप्रादुर्भावादितस्ततो विलोलदृष्टिः । अत्र हकारमकारावोष्ठ्यौ, चकारयकारौ तालव्यावित्यादिना क्रमेण मसृणा हकारादीनां रूपसाजात्येऽपि मसृणताप्राधान्याद्वर्णमसृणा चावृत्तिरित्याह—**अत्र सर्वमिति** । वर्णोत्कटत्वं व्याचष्टे—**वर्णाधिक्ययोग इति** । उद्भटं हि रूपसाजात्यं वर्णोत्कटत्वम् । तच्च सरूपवर्णावृत्त्याधिक्येनेत्यर्थः ॥

वर्णानुत्कटो यथा—

'ततः प्रभृत्युन्मदना पितुर्गृहे ललाटिकाचन्दनधूसरालका ।
न जातु बाला लभते स्म निर्वृतिं तुषारसंघातशिलातलेष्वपि ॥१६९॥'

अत्र दन्त्यवर्णप्रायतयातिमसृणत्वे शिलातलेष्विति दन्त्यवर्णाभ्यामेव वर्णस्तोमो दत्तः । सोऽयं वर्णानुत्कटो नाम श्रुत्यनुप्रासः । तेऽमी चत्वारोऽप्यतिप्रसिद्धतया ग्राम्या उच्यन्ते ॥

**ततः प्रभृतीति** । तापोद्रेकाद्दत्तं दत्तमेव चन्दनमाश्यानभावेन रेणुभिरलकच्छटासु विशीर्यत इति द्वितीयकामावेशो ध्वनितः । अत्र तकारनकारौ दकारनकारावित्यादिना क्रमेण श्लोकसमाप्तिं यावद्बहवो दन्त्याः । तेनैकश्रुतिव्याप्तस्य संदर्भस्य मसृणतायामतिशयः । शिलातलेति रूपसाजात्येन लकारावुद्भूतश्रुतिकौ । न चाधिकावृत्तिरत्रास्तीत्यनुत्कटता । न च श्रुतेरुद्भवेऽपि मसृणता न प्रकृष्यत इति वर्णानुत्कटोऽयम् । ग्राम्यत्वं व्याचष्टे—**तेऽमी चत्वारोऽपीति** । श्रुतिसाजात्यस्य शब्दानुशासनेऽपि प्रसिद्धेरतिप्रसिद्धत्वम् ॥

ग्राम्यवैपरीत्येन नातिप्रसिद्धो नागरः । यथोच्यते—

**एकत्वबुद्धिर्भेदेऽपि तत्त्वेऽप्येकत्वनिह्नवः ।**
**यस्य वर्णस्य तं प्राहुरनुप्रासस्य जीवितम् ॥ ७४ ॥**

तत्र भेदेऽप्येकत्वबुद्ध्या समानस्थानयोर्यथा—

'हरेलङ्घितघर्मांशुर्व्योम्नि दीर्घेण रंहसा।
बलिबन्धनघोरोऽङ्घ्रिरंहःसङ्घं निहन्तु वः॥ १७०॥'

अत्र हकारस्य तुल्यस्यातुल्यस्थानेन घकारेण सह भेदेऽप्येकत्वबुद्धेस्तुल्यश्रुतित्वमिति भेदेऽप्येकत्वबुद्ध्या नागरानुप्रासोऽयम्॥

**ग्राम्यवैपरीत्येनेति**। ग्राम्यविरुद्धस्वभावो हि लोके नागर इत्युच्यते। अतिप्रसिद्धेरभावो विरोधस्तेनालंकारसमयोपजीविपश्चिषप्रसिद्धिरनतिप्रसिद्धिरित्युक्तं भवति। एतदेव पूर्वाचार्यमतेन विशदयति—**यथोच्यत इति**। एकश्रुतिकृतया भानं हि श्रुतिसाजात्यमभिमनम्। श्रुतिश्च वास्तवी प्रतिपादनमात्रारूढा वेति न कश्चिद्विशेषः। ततो भेदेऽप्येकत्वबुद्ध्यानुप्राससिद्धिः। तत्त्वे एकत्वे। आपाततः साजात्यानवभासेऽपि सहृदयप्रणिधानेनावभासनं श्रुत्यनुप्रासप्रयोजकमेव। अनुप्रासस्य। अनुप्रासवतः संदर्भस्येत्यर्थः। विजातीययोरेकजात्यप्रतिबिम्बनं द्विधा भवति स्थानसाम्ये तदसाम्ये च। तयोराद्यमुदाहरति—**तत्रेति**। दीर्घेण रंहसेति, घोरोऽङ्घ्रिरिति, रंहःसङ्घमिति, घकारहकाराणां स्थानसाम्येऽपि वैजात्यमस्त्येव। तथा पठितौ तुल्यवच्छ्रुतिः प्रतिभातीति सहृदयहृदयसाक्षिकोऽयमर्थः॥

तथैवासमानस्थानयोर्यथा—

'उच्छलन्मत्स्यपुच्छाग्रदण्डपाताहताम्भसि।
जगदुद्यानमम्भोधावुन्ममज्ज ममज्ज च॥ १७१॥'

अत्रोच्छलन्मत्स्यपुच्छाग्रेत्यत्र त्स्यच्छकारयोरिव त्स्यकारस्यापि तुल्यश्रुतित्वमित्यसमानस्थानत्वेन भेदेऽप्येकत्वबुद्ध्या नागरानुप्रासोऽयम्॥

**अत्र त्स्यच्छकारयोरिति**। चछौ तालव्यौ, तसौ दन्त्याविति स्थानभेदः प्रकाश एव। तथापि पिण्डीभूताभ्यां च स्तम्बीभूतमध्यपतितौ तसा समानश्रुतिकाविति पठितौ साभाग्यमर्पयतः। तेनायमसमानस्थानयोरेकत्वबुद्ध्या नागरानुप्रास इति॥

तत्त्वेऽप्येकनिह्नवेन डकारवकारयकाराणां यथा—

'क्रोडे मा डिम्भमादाय चण्डि पीडय वक्षसा।
कर्णे ब्रूहि वयस्याया युवा यदयमुच्यते॥ १७२॥'

अत्र डकारादीनामीषत्स्पृष्टतादिभिरेकत्वेऽपि भेदावभास इति तत्त्वेऽप्येकत्वनिह्नवेन नागरानुप्रासोऽयम् ॥

**तत्त्वेऽपीति** । द्रुतादौ वृत्तिमात्रं भिद्यते, न तु रूपमिति महाभाष्यकारोक्तदिशा येषामेकस्थानत्वेऽपीषत्स्पृष्टतरत्वादिकृता भेदप्रथा ते डकारादयः । कतिपयेऽस्य विषयास्तानुद्दिश्य क्रमेणोदाहरति—**क्रोड इत्यादि** । अङ्कगतस्य बालकस्य वक्षसा पीडनं संक्रान्तकमालिङ्गनमामनन्ति । अनेन किल प्रच्छन्नप्रियगोचरो गाढालिङ्गनमनोरथः प्रकटितो भवति । कर्णयोरुपांशु यदभिधीयते तेन तुल्यमिदमिति विदग्धसहचरीपरिहासोक्तिरियम् । अत्र च क्रोडडिम्भेत्यादौ डकारवकारयकाराणामीषत्स्पृष्टतरत्वादिभेदः श्रुतिसाजात्यं च सुप्रसिद्धमेवेति ॥

तथैव ढकारवकारलकाराणां यथा—

> 'नवोढे त्वं कुचाढ्यापि नोपगूढाय ढौकसे ।
> वहन्बाहुलते ह्रीणो वरः पुलकलाञ्छिते ॥ १७३ ॥'

अत्र ढकारादीनामीषत्स्पृष्टतादिभिरेकत्वेऽपि भेदावभास इति तत्त्वेऽप्येकत्वनिह्नवेन नागरानुप्रासोऽयम् ॥

**ढकारवकारलकाराणामिति** । वकारोदाहरणं दत्तमपि वर्णान्तरसरलतया पुनर्दीयते । उपगूढमालिङ्गनम् । अपिशब्दो भिन्नक्रमः । उपगूढायापि न ढौकसे । दूरे पततः कचग्रहादिकेलिषु प्रवृत्तिर्लङ्घनेन सर्वाङ्गीणः पुलकोद्भेदो बहिर्व्यावर्तनमन्तरनुवर्तनं च मुग्धाङ्गनाजातिः । अत्रापि ढकारादीनामीषत्स्पृष्टतादिभेदः सुबोध एव ॥

उभयगुणयोगान्नात्यप्रसिद्ध उपनागरः । यथोच्यते—

> **डलयोरैक्यमित्यादिवाक्यैर्यस्यानुमीयते ।**
> **समानश्रुतितान्योन्यं सोऽनुप्रासः प्रशस्यते ॥ ७५ ॥**

स डलयोरैक्येन यथा—

> 'शयने यस्य शेषाहिः सनीडे वडवानलः ।
> महासाहसिनामग्र्यं तमीडे जडशायिनम् ॥ १७४ ॥'

सोऽयमुपनागरः श्रुत्यनुप्रासः ॥

**उभयगुणयोगादिति**। प्रसिद्ध्यप्रसिद्धी द्वौ गुणौ। अत्र प्रत्यक्षानुमानरूपोपायभेदादविरोधः। तदेतदन्यमतेन विवृणोति—**डलयोरैक्यमिति**। सनीडः समीपं जलमज्जनशेषाहिवडवानलनामनर्थनिदानतया प्रख्यातानामपि सेवया महासाहसिकानामम्यता। अत्र डकारलकारयोर्भिन्नश्रुतिता प्रत्यक्षत एव। श्रुतिसाम्यं पुनरनुमानात्प्रतीयते। एवमुत्तरोदाहरणेष्वपि बोद्धव्यम्॥

नणयोरैक्येन यथा—

'बाणैः क्षुण्णेषु सैन्येषु त्वया देव रणाङ्गणे।
हतशेषाः श्रयन्तीमे शून्यारण्यानि विद्विषः॥ १७५॥'

अत्र क्षुण्णेषु सैन्येषु शून्यारण्यानीति नकारणकारयोः स्वल्पश्रुतित्वमेकत्वं वा भासत इति उपनागरोऽयं श्रुत्यनुप्रासः॥

**क्षुण्णेषु सैन्येष्विति**। ग्रन्थिमहिम्ना नकारणकारयोः साम्यप्रतिभासः। **रणाङ्गण इति**। मध्यवर्तिनां संयोगेन साम्योन्मुद्रणम्। अङ्गणशब्दोऽधिकरणल्युडन्तः। पृषोदरादित्वाण्णत्वव्युत्पादनमनार्षम्। एवं शून्यारण्यानीत्यत्र व्याख्येयम्। आद्यन्तव्याख्यानमुपलक्षणमवसेयम्॥

रलयोरैक्येन यथा—

'विभिन्नवर्णा गरुडाग्रजेन सूर्यस्य रथ्याः परितः स्फुरन्त्या।
रत्नैः पुनर्यत्र रुचा रुचं स्वामानिन्यिरे वंशकरीरनीलैः॥ १७६॥'

अत्र करीरनीलैरिति रेफलकारयोरैक्येन तुल्यश्रुत्या चतुर्ष्वपि पादेष्वनुप्रासनिर्वहणमित्युपनागरोऽयं श्रुत्यनुप्रासः॥

निरन्तररेफप्रथनालीढस्यैव लकारस्य श्रुतिसाजात्यमुल्लिखतीति तदिदमाह—**अत्र करीरनीलैरिति**। एतदनुप्राससिद्ध्या चतुर्ष्वपि पादेषु रेफानुप्रासनिर्वहणमपि कविशक्तिव्युत्पत्तिव्यञ्जकमुपपन्नं भवतीत्याह—**चतुर्ष्वपीति**॥

दन्त्यतालव्यानामैक्येन यथा—

'विद्यास्यन्दो वाग्विदां यः प्रसन्नः पुण्यां वाचं देवतां तां नमामः।
यां ब्रह्माणश्चिन्तयन्ते विशोकाः सा नो देयात्सूनृता सूनृतानि॥ १७७॥'

अत्र दन्त्यतालव्यानामैक्येन तुल्यश्रुतिनेत्युपनागरोऽयं श्रुत्यनुप्रासः । सर्वेऽपि चानुप्रासाः प्रायेण विसदृशवर्णान्तरिता एव स्वदन्ते इत्यौष्ठ्यकण्ठ्यादीनामिहानुप्रवेशो भवति ॥

विद्यास्यन्दः सारस्वतप्रवाहः सैव वाग्देवता शब्दब्रह्मरूपा तच्चिन्तया परब्रह्माधिगमनिःश्रेणीभूतया शोकस्य इष्टहानिजखेदस्य विच्छेदः । अत्र स्यन्दः प्रसन्न इति दन्त्यौ सकारौ, ब्रह्माणश्चेतयन्तो विशोका इत्यादेशानादेशौ शकारौ तालव्यौ, पुनरन्ते सा सूनृतानीति त्रयो दन्त्याः, सर्वेषां संभूय पाठे तुल्यश्रुतितैव प्रतिभासत इति । ननु सजातीयानां निरन्तरमावापे कर्तव्ये किमिति विजातीयव्यवहितैरावृत्तिरुदाह्रियत इत्यत आह—**सर्वेऽपीति** ॥

**यथा ज्योत्स्ना चन्द्रमसं यथा लावण्यमङ्गनाम् ।**
**अनुप्रासस्तथा काव्यमलंकर्तुमयं क्षमः ॥ ७६ ॥**

श्लेषनिर्वाहकतया श्रुत्यनुप्रासोऽलंकार इत्युक्तम्, तच्च संदर्भव्यापकतयैव निर्वहतीत्याह—**यथेति** । ज्योत्स्नालावण्ययोः सर्वाङ्गीणा श्लेषसुभगयोरेवालंकारताप्रसिद्धिः ॥

**अनुप्रासः कविगिरां पदवर्णमयोऽपि यः ।**
**सोऽप्यनेन स्तबकितः श्रियं कामपि पुष्यति ॥ ७७ ॥**

नन्वेवमनुप्रासान्तरविषयेऽपि श्रुत्यनुप्रासः प्रसक्तस्तत्र च किमनेन करिष्यत इत्यत आह—**अनुप्रासः कविगिरामिति** । उक्तं हि—'न घटनामन्तरेण काव्यभावः । न च काव्यमपहाय वर्णानुप्रासादीनामात्मलाभः' इति ॥

**मुहुरावर्त्यमानेषु यः स्ववर्ग्येषु वर्तते ।**
**काव्यव्यापी स संदर्भो वृत्तिरित्यभिधीयते ॥ ७८ ॥**

**स्ववर्ग्येष्विति** । स्वशब्द आत्मीयवचनः । स्ववर्गे भवाः स्ववर्ग्याः कचटतपान्तःस्थोष्मोपलक्षिताः सप्तवर्गाः । स्ववर्ग्येषु वर्तेत इत्यर्थकथनम् । माणिक्यस्तबकितहारलतावदन्योन्यालम्बनेन परभागलाभ इत्यभिप्रायतया च काव्यव्यापकेनैव संदर्भेण निरूप्यमाणा वर्ग्या वृत्तिर्वृत्त्यनुप्रास इति पर्यवसितोऽर्थः ॥

**कार्णाटी कौन्तली कौङ्की कौङ्कणी बाणवासिका ।**
**द्राविडी माथुरी मात्सी मागधी ताम्रलिप्तिका ॥ ७९ ॥**

**औण्ड्री पौण्ड्रीति विद्वद्भिः सा द्वादशविधेष्यते ।**
**अथ लक्षणमेतासां सोदाहरणमुच्यते ॥ ८० ॥**

वर्णानुप्रासाद्भेदो वक्ष्यते—कर्णाटादिप्रभवकविहेवाकगोचराः कार्णाटीप्रभृतयो न तु वृत्तीनां देशैः कश्चिदुपकारः । वणवासनामा दक्षिणापथे रत्नाभगवतीचिह्नितो देशः । [भ्रम धातोरिति । विधिमिति इति परायणम् ॥]

तासु वर्णानुप्रासवती कार्णाटी यथा—

'कान्ते कुटिलमालोक्य कर्णकण्डूयनेन किम् ।
कामं कथय कल्याणि किंकरः करवाणि किम् ॥१७८॥'

चवर्गानुप्रासवती कौन्तली यथा—

'ज्वलज्जटिलदीप्तार्चिरञ्जनोच्चयचारवः ।
चम्पकेषु चकोराक्षि चञ्चरीकाश्चकासति ॥ १७९ ॥'

अवहित्थप्रस्तावे कर्णकण्डूयितमोट्टायिताख्यः शृङ्गारभावजो विकारः ॥

टवर्गानुप्रासवती कौङ्की यथा—

'कुम्भकूटाट्टकुट्टाककुटिलोत्कटपाणिरुट् ।
हरिः करटिपेटेन न द्रष्टुमपि चेष्ट्यते ॥ १८० ॥'

कुम्भकूटं कुम्भाग्रं तदेव अट्टोऽट्टालकः । 'रुष हिंसायाम्' । यथोक्तेन पाणिना रुषतीति क्विप् । पेटः समूहः ॥

तवर्गानुप्रासवती कौङ्कणी यथा—

'मधुर्मधूनि गान्धर्वमन्दिरं मदिरेक्षणा ।
इन्दुरैन्दीवरं दाम काममानन्दयन्ति नः ॥ १८१ ॥'

मधुर्वसन्तः । गान्धर्वं गीतम् । अत्र धकारदकारानुप्रासैरासमाप्ति निर्वहणम् ॥

पवर्गानुप्रासवती बाणवासिका यथा—

'प्रिया प्रगल्भा ताम्बूलं परिस्रुत्फुल्लमुत्पलम् ।
पृषत्काः पञ्चबाणस्य पञ्चमः पञ्चमध्वनिः ॥ १८२ ॥'

---

१. कुण्डलान्तरगतोऽयं भागोऽनन्वितः प्रतीयते ।

परिस्रुत् मदिरा। पृषत्का बाणाः। पञ्चमः स्वरविशेषस्तद्भूयिष्ठो ध्वनिः पञ्चमध्वनिः ॥

अन्तःस्थानुप्रासवती द्राविडी यथा—

'प्रियालललवलीतालतमालैलावनावली ।
भाति पत्रलहिन्तालकृतपुण्ड्रा वधूरिव ॥ १८३ ॥'

पत्रलाः सान्द्रपत्राः । सिध्मादेराकृतिगणत्वाल्लच् । पुण्ड्रं तिलकः । अत्र लकारवकारानुप्रासाभ्यां संदर्भनिर्वाहः ॥

ऊष्मानुप्रासवती माथुरी यथा—

'पुष्णती पुष्पधनुषं मुष्णती प्लोषविप्रुषः ।
मिषन्ती निर्निमेषेण चक्षुषा मानुषी न सा ॥ १८४ ॥'

प्लोषो विरहदाहस्तस्य विप्रुषस्तीक्ष्णा भागाः। तेऽमी सप्त शुद्धा एव वृत्त्यनुप्रासाः ॥

द्वित्रिवर्गानुप्रासवती मात्सी यथा—

'कोकिलालापवाचालो मामेति मलयानिलः ।
उच्छलच्छीकराच्छाच्छनिर्झराम्भःकणोक्षितः ॥ १८५ ॥'

संकीर्णाः पुनरन्ये पञ्च भवन्ति । तत्र संकरो द्विधा—विजातीयसंवलनम्, मिथः संभेदेन संयोगरूपता च । कोकिलालपेत्यादौ कवर्गान्तःस्थचवर्गानुप्रासाः स्फुटा एव । संयोगस्तु विद्यमानोऽपि न विवक्षितः ॥

द्वाभ्यां विदर्भितैकवर्ग्या मागधी यथा—

'अघौघं नो नृसिंहस्य घनाघनघनध्वनिः ।
हन्याद्घुरुघुराघोरः सुदीर्घो घोरघर्घरः ॥ १८६ ॥'

विदर्भितः स्वान्तरायेण वैदर्भीप्रपञ्चशोभामानीतः । घुरुघुरेत्यव्यक्तानुकरणम् । अत्रासमाप्ति कवर्गानुप्रासस्तवर्गान्तःस्थानुप्रासाभ्यां विदर्भितः । एवमन्यत्रापि वैदर्भी गवेषणीया ॥

स्वान्त्यसंयोगिवर्ग्या ताम्रलिप्तिका यथा—

'शिञ्जानमञ्जुमञ्जीराश्चारुकाञ्चनकाञ्चयः ।
कङ्कणाङ्कभुजा भान्ति जितानङ्ग तवाङ्गनाः ॥ १८७ ॥'

संयोगो द्विविधः—सजातीयेन, अन्येन च । आद्यस्त्रिविधः—स्वर्यान्तस्वरूपतदन्यसंयोगभेदात् । एते यथाक्रमं वृत्तित्रयं प्रयोजयन्तीत्याह—**स्वान्त्येत्यादि** । शिञ्जाना मधुरं शब्दायमानाः । मञ्जीरा नूपुराः । अत्र पूर्वार्धे स्वान्त्यसंयोगिनौ चवर्गौ, उत्तरार्धे तु कवर्गाविति ॥

सरूपसंयोगिग्रथितौण्ड्री यथा—

'सल्लतापल्लवोल्लासी चित्तवि(वृ)त्तहरो नृणाम् ।
मज्जतीज्जलसज्जासु नदीषु मलयानिलः ॥ १८८ ॥'

सन्तः कमनीया लतानां पल्लवास्तदुल्लासनमात्रप्रवीणतया तीव्रताव्यतिरेकः । अत एव नृणां विदग्धमिथुनानां चित्तमेव सर्वस्वभूतं वित्तं हरतीति । इज्जला निचुलास्तैः सज्जाः सन्नद्धाः । निचुलनिकुञ्जसन्नद्धनदीमज्जनेन शीतलत्वमुन्मीलितम् ॥

असरूपसंयोगग्रथिता पौण्ड्री यथा—

'अस्तमस्तकपर्यस्तसमस्तार्कांशुसंस्तरा ।
पीनस्तनस्थिता ताम्रकम्रवस्त्रेव वारुणी ॥ १८९ ॥'

अस्तोऽस्ताचलः । कम्रं कमनीयम् ॥

**अकठोराक्षरादानं नातिनिर्वहणैषिणः ।**
**अशैथिल्यं च सत्कर्तुं वृत्त्यनुप्रासमीशते ॥ ८१ ॥**

वृत्त्यनुप्रासरसिकस्य कवेः प्रसजमानं दोषमपाकर्तुं शिक्षामाह—**अकठोरेति** । तदुक्तम्—'परुषाभिधायिवचनादनुकरणाच्चापरत्र नो परुषम् । रचयेद्यथागतिः स्यात्तत्रापि ह्यादयो हेषाः ॥' अतिनिर्वाहे व्यक्तमेव वैरस्यम् । तदुक्तम्—'सर्व एवानुप्रासाः प्रायेणे'त्यादि । कोमलमात्रवर्ण्यनिर्वहणे तु शैथिल्यसंभावनमिति ॥

**क्वचिदस्ति क्वचिन्नास्ति क्वचिदस्ति न चास्ति च ।**
**वर्णानुप्रास एषा तु सर्वतोऽस्तीति भिद्यते ॥ ८२ ॥**

नन्वनुप्रासाद् वृत्तीनां को विशेष इत्यत आह—**क्वचिदिति** । क्वचिद्वृत्तिभागे चरणाद्यात्मके भवत्येव । क्वचित्पुनरंशभेदेन भवति न भवति च । तावतैव तस्यालंकारत्वम् । वृत्तिशरीरव्यापकतया निरूप्यमाणस्तु वर्ण्योन्तोऽन्य एव । अयं वर्णानुप्रासाद्वृत्त्यनुप्रास इत्यर्थः ॥

अन्ये पुनरन्यथा वृत्तिं व्याचक्षते—

**स्पर्शादीनामसंबन्धः संबन्धो वापि यो मिथः ।**
**स्फुटादिबन्धसंसिद्धौ सेह वृत्तिर्निगद्यते ॥ ८३ ॥**

**अन्ये पुनरिति ।** वर्णानां वर्तनं वर्तनाधिष्ठानं च वर्तिपदेनाभिमतम् । आद्ये संघटनविघटनाभ्यां द्विधा । समस्तव्यस्तभेदेन संघटनविघटने द्विधा । कादयो मावसानाः स्पर्शाः । आदिग्रहणादन्तःस्थोष्मणोः संघटनबहुलः संदर्भः प्रस्फुटः । विघटनबहुलः कोमलः । उभयबहुल उन्मिश्रः ॥

**काव्यव्यापी च संदर्भो वृत्तिरित्यभिधीयते ।**
**सौकुमार्यमथ प्रौढिर्मध्यमत्वं च तद्गुणाः ॥ ८४ ॥**
**गम्भीरौजस्विनी प्रौढा मधुरा निष्ठुरा श्लथा ।**
**कठोरा कोमला मिश्रा परुषा ललितामिता ॥ ८५ ॥**

द्वितीयं वृत्तिशब्दार्थमाह—**काव्यव्यापी चेति** । अत्रापि दोषप्रसङ्गापाकरणार्थमाह—**सौकुमार्यमिति** । अत एव [ सौकुमार्यप्रौढिमध्यमत्वानि ] गुणाः । शैथिल्यपरुषत्वे तु दोषावित्यर्थः ॥

**इति द्वादशधा भिन्ना कविभिः परिपठ्यते ।**
**कारणं पुनरुत्पत्तेस्त एवासां विजानते ॥ ८६ ॥**

योगासंयोगयोः प्रतियोगिव्यवस्थाविरहात्कथं द्वादशप्रकारता व्यवस्थितिरित्याशयवानाह—**कारणं पुनरिति** ॥

तासु गम्भीरा यथा—

'अप्फुन्दन्तेण णहं महिं च तडि उद्धमाइअदिसेण ।
दुन्दुभिगम्भीररवं दुण्डुहिअं अम्बुवाहेण ॥ १९० ॥'
[आस्पन्दता नभो महीं च तडिदुध्मापितदिशा ।
दुन्दुभिगम्भीररवं दुन्दुभितमम्बुवाहेन ॥]

सैषा प्रायस्तवर्गपवर्गयोस्तृतीयचतुर्थानां पकारफकारयोश्च स्वसंयोगबिन्दुयोगाभ्यां जायते ॥

दूषणप्रतिपत्तिसौकर्यात्तत्प्रसिद्ध्यैव पृथगुदाहियत इत्याह—**तास्विति**। अप्फुन्दन्तेण व्याप्तवता । उद्धमाइअं व्याप्तम् । दुन्दुभिरन्तर्गतकांस्यभाजनो निःस्वानविशेषः । दुण्डुहिअं शब्दायितम् । दकारधकारौ तवर्गस्य बकारभकारौ पवर्गस्य तृतीयचतुर्थौ ॥

ओजस्विनी यथा—

'पत्ता अ सीभराहअधाउशिलाअलणिसण्णराइअजलअम् ।
सज्झं ओज्झुरपहसिददरिमुहणिम्महिअवउलमइरामोदम् ॥१९१॥'
[प्राप्ताश्च शीकराहतधातुशिलाजलनिषण्णराजितजलजम् ।
सह्यं निर्झरप्रहसितदरीमुखनिर्मथितबकुलमदिरामोदम् ॥]

सेयं मूर्धन्यानां प्रथमचतुर्थपञ्चमद्वित्रैस्तद्वावृत्त्या च प्रायो जायते ॥

सततशीकरसिच्यमानगैरिकशिलातलुण्ठनेन जलदानां रञ्जनम् । विशीर्य पतनेनात्यन्तधवला निर्झरा एव हासो यस्य तादृशेन दरीमुखेनान्तःप्ररूढबकुलकुसुमामोदनिःसरणरञ्जितजलधरप्रतिबिम्बभूतताम्रनयनोन्मुद्रणात् । हासबकुलामोदाभ्यां च क्षीबतारोपरूपा समासोक्तिर्ध्वन्यत इत्याराध्याः । ओज्झुरो निर्झरः । णिम्महिअं निःसृतम् ॥

प्रौढा यथा—

'कृत्वा पुंवत्पातमुच्चैर्भृगुभ्यां मूर्ध्नि ग्राव्णां जर्जरा निर्झरौघाः ।
कुर्वन्ति द्यामुत्पतन्तः स्मरार्तं स्वर्लोकस्त्रीगात्रनिर्वाणमत्र ॥१९२॥'

सैषा प्रायेण मूर्धन्यानामन्तःस्थानां संयोगात्पूर्वगुरुत्वेन जायते ॥

भृगवस्तटाः । भृगुपातस्य सुरस्त्रीसंगमः फलम् । अत्र कुर्वन्स्वर्लोकनिर्वर्त्येतेषु मूर्धन्यानामन्तःस्थसंयोगा उच्चैःशब्द इत्यादौ स्वभावगुरूणामपि पूर्वरूपसंयोगसंनिधौ छायाविशेषो भवतीत्याहुः केचित् ॥

मधुरा यथा—

'किञ्जल्कसङ्गिशिञ्जानभृङ्गलाञ्छितचम्पकः ।
अयं मधुरुपैति त्वां चण्डि पङ्कजदन्तुरः ॥ १९३ ॥'

सैषा प्रायोऽनुस्वारपुरोवर्तिस्पर्शतया जायते ॥

अनुस्वारपुरोवर्तीति । अनुस्वारस्वरूपतदादेशावनुस्वारपदेन गृह्येते । तेन शमितहासेत्यादावनुस्वाराभावेऽपि न लक्षणमुदाहरणम् ॥

निष्ठुरा यथा—

'स्वाङ्गश्लिष्टाद्रिजन्मानं नेत्रार्चिःप्लुष्टमन्मथम् ।
स्तौमि त्र्यक्षं द्युषज्ज्येष्ठं दैत्यश्रेण्यर्चिताङ्घ्रिकम् ॥१९४॥'

सैषा प्रायः संयोगभूयस्त्वेनोत्पद्यते ॥

स्वाङ्गेति । दिवि सीदन्तीति द्युषदो देवाः । सुषामादित्वात्षत्वम् । अत्रैकान्तरिताः संयोगाः संदर्भव्यापकाः प्रतीयन्ते । सोऽयमस्याः संयुज्यमानाविशेषेऽपि वृत्त्यन्तराद्विशेषो निष्ठुराद्वैपरीत्येन श्लेषोदाहरणं सुगमम् ॥

श्लथा यथा—

'दयितजनविरहविगलितनयनोदकपीतहरिणमदतिलकम् ।
वदनमपगतमृगमदशशिकरणिं वहति लोलदृशः ॥१९५॥'

सेयं प्रायो व्यञ्जना नाम संयोगेन जन्यते ॥

करणिः सादृश्यम् ॥

कठोरा यथा—

'निसर्गनिर्गतानर्घघर्घरध्वनिहास्तिकम् ।
चक्रे चक्रं युधि क्रामन्नर्कः' कर्कशार्करुक् ॥ १९६ ॥'

*सैषा प्रायः कण्ठ्यरेफादिसंयोगादुत्पद्यते ॥*

सैषा प्रायः कण्ठ्येति । कण्ठ्यरेफयोः क्वचिदन्यस्याप्यादिपदोपात्तस्य संयोगोऽवसेयः ॥

कोमला यथा—

'दारुणरणे रणन्तं करिदारणकारणं कृपाणं ते ।
रमणकृते रणरणकी पश्यति तरुणीजनो दिव्यः ॥ १९७ ॥'

सेयं रेफणकाराद्यसंयुक्तकोमलवर्णविरचनया निष्पद्यते ॥

मिश्रा यथा—

'पिनष्टीव तरङ्गाग्रैरुदधिः फेनचन्दनम्।
तदादाय करैरिन्दुर्लिम्पतीव दिगङ्गनाः ॥ १९८ ॥'

सैषा प्रायः कठोराणामोष्ठ्यकण्ठ्यमूर्धन्यानां बाहुल्यादिभिरुपलभ्यते॥

बाहुल्यादिभिरिति। बाहुल्याल्पत्वमिश्रणैः प्रादेशिकैरित्यर्थः॥

परुषा यथा—

'जह्रे निह्रादिह्रादोऽसौ कह्लाराह्लादितह्रदः।
प्रसह्य मह्या गर्ह्यस्त्वमर्हणाहः शरन्मरुत् ॥ १९९ ॥'

सैषा प्रायेणोष्मणामन्तःस्थादिसंयोगैरवस्थाप्यते॥

ललिता यथा—

'द्राविडीनां ध्रुवं लीलारेचितभ्रूलते मुखे।
आसज्य राज्यभारं स्वं सुखं स्वपिति मन्मथः ॥ २०० ॥'

सैषा प्रायेण दन्त्यौष्ठ्यतालव्यानां मध्येऽन्तःस्थादिसंयोगैः स्थाप्यते॥

द्राविडीनामिति। किंचिदुन्नमनं रेचितम्। तेनाधिज्यकोदण्डक्रियाकारिभ्रूलतासनाथे दुःखराज्यभारारोपः। सुगममुदाहरणम्॥

अमिता यथा—

'बकुलकलिकाललामनि कलकण्ठीकलकलाकुले काले।
कलया कलावतोऽपि हि कलयति कलितास्त्रतां मदनः ॥२०१॥'

सेयममितयोरेव ककारलकारबन्धयोरनुप्रासेन प्रसूयते॥

**इति द्वादशधा वृत्तिः कैश्चिद्या कथितेह सा।**
**न गुणेभ्यो न वृत्तिभ्यः पृथक्त्वेनावभासते ॥ ८७ ॥**

तदेतत्सर्वेषां मतं दूषयति—**न गुणेभ्य इति**। समतासौकुमार्यादिगुणेषु भारतीप्रभृतिषु च वृत्तिषु यथायथमन्तर्भावोऽवगन्तव्यः॥

**श्रुत्यनुप्रासवर्णानुप्रासयोरपि दुष्कराः ।**
**कश्चिद्भेदाः पृथक्कर्तुमस्यास्तेनेह नेष्यते ॥ ८८ ॥**

**श्रुत्यनुप्रासवर्णानुप्रासयोरिति** । विषयसप्तमी । वर्णावृत्तेर्वृत्त्यनुप्राससाधारणत्वात् ॥

**यथाम्रातकपुष्पादिस्रगादेर्वर्ण उच्यते ।**
**वर्णावृत्तिस्तथा वाचां वर्णानुप्रास उच्यते ॥ ८९ ॥**

ततो वर्णानुप्रासं विशेषयन्नाह—**यथाम्रातकेति** । स्रगादेर्वर्णस्थानीया वर्णावृत्तिर्वर्णानुप्रासः । तत्रोपमानभूतवर्णविवरणं समानजातीयकुसुमादिविरचितमालापटप्रभृतिषु यदन्तरान्तरा विजातीयाम्रातककुसुमादिसंनिवेशनं तद्वर्ण इत्युच्यते । तद्वत्या वाचा वर्णावृत्तिः । सैव वर्णानुप्रास इति सूत्रार्थः । स द्विधा—संयुक्तासंयुक्तवर्णनिरूप्यत्वात् । यथायथमेतदुभयप्रपञ्चनम् ॥

**स तु स्तबकवान्स्थानी गर्भो विवृतसंवृतः ।**
**गृहीतमुक्तः क्रमवान्विपर्यस्तोऽथ संपुटः ॥ ९० ॥**

स्तबकवदादयो द्वादश प्रकारास्तेषु क्वचित्क्वचित्संयोगावृत्तिः स्तबकवान् । अनुप्रासविन्यासादिति संयोगानुप्रासविन्यासतः ॥

**मिथुनं वेणिका चित्रो विचित्रश्चेति वर्ण्यते ।**
**वर्णावृत्तिप्रयोगेभ्यस्तेभ्यस्तेभ्यो मनीषिभिः ॥ ९१ ॥**

तेषु स्थाने स्थानेऽनुप्रासविन्यासतः स्तबकवान्यथा—

'यस्यावासीकृतहिमगिरेर्गुञ्जतां कुञ्जराणा-
मविश्वङ्के वनगजमदाघ्राणघोरायितानि ।
दर्पोत्फुल्लस्फुरणविकटाकाण्डकण्डूलगण्ड-
स्वेच्छाकाषक्षणितसरलानोकहस्कन्धगन्धः ॥ २०२ ॥'

अत्र गुञ्जतां कुञ्जराणामित्यादेर्वर्णस्तबकस्य स्थाने स्थाने विन्यासादयं वर्णानुप्रासस्तबकवानित्युच्यते ॥

गुञ्जतां कुञ्जराणामकाण्डकण्डूलगण्डस्कन्धगन्ध इत्यत्रावृत्तिचतुष्केण स्तबकनिर्वाहः ॥

नियतविवक्षितस्थानविशेषः स्थानी यथा—

'बाले मालेयमुच्चैर्न भवति गगनव्यापिनी नीरदानां
किं त्वं पक्ष्मान्तरालैर्मलिनयसि सुधावक्ष्मश्रुप्रवाहैः ।
एषा प्रोद्वृत्तमत्तद्विपकटकषणक्षुण्णविन्ध्योपलाभा
दावाग्नेर्व्योमलग्ना मलिनयति दिशां मण्डलं धूमरेखा ॥२०३॥'

अत्र प्रथमत्रिभागस्थानेषु बाले मालेयमित्यादिनियमेन वृत्तिः । सोऽयं वर्णानुप्रासः स्थानीत्युच्यते ॥

**स्थानीति** । श्लोकपादेऽपि प्रथमादिभागकल्पनया स्थाननियमविवक्षा । तथाहि—**बाले मालेयमिति** । प्रथमो भागो नीनी इति प्रतिभागाहृडस्तृतीयादि प्रथमपादे । एवं पक्ष्मान्तरालमलिनसुधाश्रुप्रभृतीनां द्वितीयादिपादेषु प्रथमादिभागकल्पनावसेया ॥

आवृत्तेर्वर्णान्तरायेण गर्भो यथा—

'कालं कपालमालाङ्कमेकमन्धकसूदनम् ।
वन्दे वरदमीशानं शासनं पुष्पधन्वनः ॥ २०४ ॥'

अत्र कालं कपालमालेति, अङ्कमेकमिति, वन्दे वरदमीशानं शासनमित्यादिषु पकाररेफककारगर्भाधानादयं वर्णानुप्रासो गर्भ इत्युच्यते ॥

कालं कालस्वरूपम् । एकमद्वितीयम् । कालं कपालेत्यत्र लकारावृत्तिः ककारेण व्यवधाने प्रकृते कपालेऽन्यत्र पकारो वर्णान्तरगर्भायमाण उपलक्ष्यते । एवं मालाङ्कमित्यादौ लकारादिगर्भीकरणमवसेयम् । विवृतसंवृतौ निगदेनैव व्याख्यातौ ॥

स्थाने स्थाने विकाससंकोचाभ्यां विवृतसंवृतो यथा—

'न मालतीदाम विमर्दयोग्यं न प्रेम नव्यं सहतेऽपराधान् ।
म्लानापि न म्लायति केसरस्रग्देवी न खण्डप्रणया कथंचित् ॥२०५॥'

अत्र प्रथमपादे न मालतीदामेत्यादिभिर्विकासः, द्वितीयपादे प्रेमेत्याकारावृत्त्या संकोचः, तृतीयपादे म्लानापि न म्लायतीत्येताभ्यां च विकासः, चतुर्थे नेति संकोचः । सोऽयं वर्णानुप्रासो विवृतसंवृत इत्युच्यते ॥

न मालतीदामेत्यादौ प्रथमपादे मकारावृत्तिर्द्वयेन विवरणम्, द्वितीयपादे सकृत्प्रयोगेण तस्यैव संवृतिः, तृतीयपादे नकारसकारयोरावृत्त्या विवृतिः, चतुर्थे नेति संवरणम्। तदिह भूयोविकास-किंचित्संकोच-किंचिद्विकास-सर्वथासंकोच-परिपाट्या संदर्भनिर्वहणं शोभाकरमिति व्याचष्टे—**अत्रेति** ॥

चक्रवालवद्धानोपादानाभ्यां गृहीतमुक्तो यथा—

'लोलल्लवङ्गलवलीवलया निकुञ्ज-
　कूजत्कपिञ्जलकुला मुकुलावनद्धाः ।
अध्यूषिरे कनकचम्पकराजिकान्ता
　येनापरान्तविजये जलधेरुपान्ताः ॥ २०६ ॥'

अत्र चक्रवालक्रमः सुव्यक्त एव। सोऽयं वर्णानुप्रासो गृहीतमुक्त इत्युच्यते ॥

**लोलदिति**। कपिञ्जलो गौरतित्तिरिः। अपरान्तो देशविशेषः। पूर्ववलनेनोत्तरग्रहणं चक्रवालं व्यञ्जनमात्रवलनमभिप्रेतम्, तेन वली वलेत्यत्रापि चक्रवालसिद्धिः। एवमुत्तरत्र ॥

क्रमेण द्वित्राणां त्रिचतुराणां वर्णानामसंयोगस्वरवर्णानामावृत्तिः क्रमवान्यथा—

'नितम्बगुर्वी गुरुणा प्रयुक्ता वधूर्विधातृप्रतिमेव तेन ।
चकार सा मत्तचकोरनेत्रा लज्जावती लाजविमोकमग्नौ ॥ २०७ ॥'

अत्र गुर्वी गुरुणा प्रयुक्तेति, वधूर्विधातृ इति, चकार चकोरेति, लज्जावती लाजविमोकमिति द्वयोस्त्रयाणां च स्वरसंयोगवर्णानां क्रमेणावृत्तिः, सोऽयं वर्णानुप्रासः क्रमवानित्युच्यते ॥

**क्रमेणेति**। द्वावारभ्यैव क्रमसंभव ऊर्ध्वं चतुर्भ्यो विरसायते। तेन पञ्चषाणामित्यादिनोक्तमसंयोगस्वराणामित्यविवक्षितसंयोगस्वराणाम्। गुरुणेत्यनुल्लङ्घनीयाज्ञता। तथा चलत्प्रयुक्त्या दुर्वहनितम्बभारालसायां अपि कथंचित्पदविन्यासेन कान्तिविशेषो ध्वन्यते। स्वभावचलयोरपि नेत्रयोस्तत्काले धूमाश्लेषाद्

द्विगुणो राग इति उपमाने मत्तपदपोषः पूर्वार्धे द्वयोर्द्वयोरुत्तरार्धे त्रयाणामनुल्लङ्घितक्रमाणामेव व्यञ्जनानामावृत्तिरिति स्फुटं विवरणम् ॥

क्रमवतां विपर्ययेणोपन्यासाद्विपर्ययो यथा—

'प्रणवः प्रवणे यत्र प्रथमः प्रमथेषु यः ।
रणवान्वारणमुखः स वः पातु विनायकः ॥ २०८ ॥'

अत्र व्युत्क्रमो व्यक्त एव। सोऽयं वर्णानुप्रासो विपर्यय इत्युच्यते ॥

क्रमवतामुपक्रान्तकिंचित्क्रमाणामावृत्तौ तत्क्रमविपर्यासो व्युत्क्रमः ॥

स्वाद्यवर्णवर्तिना स्वरेण सह पादमध्यान्तयोरनुप्रासः संपुटं यथा—

'स्थिरापायः कायः प्रणयिषु सुखं स्थैर्यविमुखं
महारोगाभोगः कुवलयदृशः सर्पसदृशः ।
गृहावेशः क्लेशः प्रकृतिचपला श्रीरपि खला
यमः स्वैरी वैरी तदपि न हितं कर्म विहितम् ॥२०९॥'

तदेतल्लक्षणेनैव व्याख्यातम् । सोऽयं वर्णानुप्रासः संपुट इत्युच्यते ॥

**स्वाद्येति** । आवर्तनीयो वर्णः स्वपदेनाभिमतस्तस्य पूर्वो यो वर्णस्तद्वर्तिना स्वरेण सह तस्यावृत्तिः । **पादमध्यान्तयोरिति** । मध्यसंश्लिष्टोपरितनभागघटितसमुद्गकतुल्यतया संपुटोऽनुप्रासः ॥

अन्तपादमुपसंहारोपक्रमयोर्विवक्षितः सस्वरानुप्रासो मिथुनं यथा—

'त्यज मनसि सदाहे हे स्मर स्थानमस्मि-
न्ननु किरसि शरीरे रे किमिन्दो मयूखान् ।
अपि परिहर वायो योगमङ्गैर्मदीयैः
प्रणयिनि समवेते ते भवन्तः सखायः ॥ २१० ॥'

तदेतन्निगदेनैव व्याख्यातम्। सोऽयं वर्णानुप्रासो मिथुनमित्युच्यते ॥

**अन्तपादमिति** । वृत्तौचितीवशाच्च द्विखण्डलब्धशोभाविशेषेषु पादेषु मिथुनसिद्धिरवसेया । तदिदमुक्तमुपक्रमोपसंहारयोरिति । मिथुनं द्वन्द्वम् ॥

आवाक्यपरिसमाप्तेर्वर्णानुप्रासनिर्वाहो वेणिका यथा—

'विद्राणे रुद्रवृन्दे सवितरि तरले वज्रिणि ध्वस्तवज्रे
जाताशङ्के शशाङ्के विरमति मरुति त्यक्तवैरे कुबेरे ।
वैकुण्ठे कुण्ठितास्त्रे महिषमतिरुषं पौरुषोपघ्ननिघ्नं
निर्विघ्नं निघ्नती वः शमयतु दुरितं भूरिभावा भवानी ॥२११॥'

तदेतन्नातिदुर्बोधम् । सोऽयं वर्णानुप्रासो वेणिकेत्युच्यते ॥

**विद्राण इति** । उपघ्न आश्रयः । निघ्नः परवशः । अनुप्रासजातेरासमाप्ति निर्वाहोऽभिमतः । व्यक्तयः पुनरन्या अन्या एवाभिमतास्तेन वृत्त्यनुप्रासाद्भेदः । अत एव वेणीतुल्यता । तत्र हि किल केशग्रथना निर्व्यूढैव भक्तिः पुनरन्यान्येति ॥

उक्तलक्षणेभ्योऽन्यश्चित्रो यथा—

'नीते निर्व्याजदीर्घां मघवति मघवद्वज्रनिद्रानिदाने
निद्रां द्रागेव देवद्विषि मुषितरुषः संस्मरन्त्याः स्वभावम् ।
देव्या दृग्भ्यस्तिसृभ्यस्त्रय इव गलिता राशयो रक्तताया
रक्षन्तु त्वां त्रिशूलक्षतिकुहरभुवो लोहिताम्भःसमुद्राः ॥२१२॥'

एवमन्येऽपि द्रष्टव्याः ॥

**उक्तलक्षणेभ्य इति** । पूर्वोक्तवर्णानुप्रासेभ्य इति । तथाहि प्रकृतोदाहरणे स्थाने स्थाने स्तबकाविवक्षायां न स्तबकवान्, विभागपरिहारेण न स्थानी, वर्णान्तरायानुपपत्तौ न गर्भः, संकोचविकासाभावेन न विवृतसंवृतः, चक्रवालक्रमाभावेन न गृहीतमुक्तः । एवं क्रमविपर्यस्तमिथुनबहिर्भावोऽवगन्तव्यः । आसमाप्तिनिर्वहणाभावे वेणीभेदः स्फुट एव ॥

एकवर्णावृत्तेर्वृत्त्यनुप्रासस्य वर्णान्तरवैचित्र्येण विचित्रो यथा—

'चञ्चत्काञ्चनकाञ्चयो लयवलच्चोलाञ्चलैर्वञ्चिता-
श्चारीसंचरणैकचारुचरणाः सिञ्चन्ति चित्तं मम ।
लीलाचञ्चुरचञ्चरीकरुचिभिश्चूलालकैश्चर्चिताः
किंचिच्चन्दनचन्द्रचम्पकरुचां चौर्यो मृगीलोचनाः ॥२१३॥'

**एकवर्णावृत्तेरिति** । वर्ग्यावृत्तौ हि कदाचिदेकवर्णावृत्तिरपि संदर्भव्यापिनी संभाव्यते । तस्यां प्रतीयमानायामेवान्तरान्तरा नानाजातीये वर्णावृत्तिश्चित्रशोभादायिनी विचित्रानुप्रास इत्युच्यते । तथा हि । प्रकृतोदाहरणे संदर्भसमाप्तिं यावदावर्तमाने एव चकारे काञ्चन काञ्चेति लयवलदित्यादिषु ककारलकाराद्यनुप्रासोद्भटभावेनेव वर्णावृत्तेर्न्यग्भाव इव प्रकाशते । चारी संचरणप्रकारः । सा भौमी आकाशी च । चञ्चुरो मनोहरः । चञ्चरीको भ्रमरः ॥

अन्ये पुनरन्यथा चित्रविचित्रयोर्लक्षणं व्याचक्षते । तत्र यमकच्छायानुकारी चित्रः । स एव वर्णानुप्रासवान्विचित्र इति । तत्र चित्रो यथा—

'सर्वाशारुधि दग्धवीरुधि सदा सारङ्गबद्धक्रुधि
क्षामक्ष्मारुहि मन्दमुन्मधुलिहि स्वच्छन्दकन्दद्रुहि ।
शुष्यत्स्रोतसि तप्तभूरिरजसि ज्वालायमानाम्भसि
ज्येष्ठे मासि खरार्कतेजसि कथं पान्थ व्रजञ्जीवसि ॥ २१४ ॥'

**अन्ये पुनरिति** । विभिन्नार्थैकरूपत्वं स्थानविभागालम्बनं व्यपेताव्यपेतभावश्च यमकच्छायावर्णानुप्रासवानिति अतिशायने मतुप् । सर्वाशारुधीत्यादौ धिप्रभृतीनां विभिन्नार्थैकरूपाणां व्यपेतानामेव पादमध्यान्तयोरवस्थितिः । एवमव्यपेतमप्युन्नेयम् । नात्र वर्णानुप्रास उत्कट इति विचित्राद्भेदः ॥

विचित्रो यथा—

'उद्यद्बर्हिषि दर्दुरारवपुषि प्रक्षीणपान्थायुषि
च्योतद्विप्लुषि चन्द्ररुङ्मुषि सखे हंसद्विषि प्रावृषि ।
मा मुञ्चोच्चकुचान्तसंनतगलद्बाष्पाकुलां बालिकां
काले कालकरालनीलजलदव्यालुप्तभास्वत्त्विषि ॥ २१५ ॥'

अत एवोत्तरत्र स्फुटवर्णानुप्रासमुदाहरति ॥

**वर्णावृत्तिरनुप्रास इति यः कृतलक्षणः ।**
**सोऽयं द्वादशधा भेदैः प्रविभज्य प्रदर्शितः ॥ ९२ ॥**

तेऽमी शुद्धवर्णावृत्तिप्रकाराः षट्त्रिंशल्लक्षिताः, सांप्रतं द्वादशतापन्नवर्णावृत्तयो लक्ष्यन्त इत्याह—**वर्णावृत्तिरनुप्रास इति** । द्वादशधेति वीप्सा द्रष्टव्या ॥

**समग्रमसमग्रं वा यस्मिन्नावर्तते पदम् ।**
**पदाश्रयेण स प्रायः पदानुप्रास उच्यते ॥ ९३ ॥**

**समग्रमिति** । पदालम्बनोऽनुप्रासः पदानुप्रासस्तेन पदावयवमात्रालम्बनोऽपि पदालम्बन एव । तदिदमाह—**पदाश्रयेणेति** ॥

**विसर्गबिन्दुसंयोगस्वरस्थानाविवक्षया ।**
**अनिर्वाहाच्च स प्रायो यमकेभ्यो विभिद्यते ॥ ९४ ॥**
**मसृणो दन्तुरः श्लक्ष्णः संपुटं संपुटावली ।**
**खिन्नः स्तबकवान्स्थानी मिथुनं मिथुनावली ॥ ९५ ॥**
**गृहीतमुक्तनामान्यस्ततोऽन्यः पुनरुक्तिमान् ।**
**इति द्वादशभेदोऽयं मनीषिभिरिहेष्यते ॥ ९६ ॥**

ननु यदि पदावृत्तिरभिन्नार्था तदा पुनरुक्तिरेव, भिन्नार्था चेद्यमकान्न भिद्यत इत्यत आह—**विसर्गेति** । बिन्दुरनुस्वारः । स्थानं कण्ठादिकम् । वृत्तेः पादादियमकताभावो निर्वाहः प्रायोनिर्वाह इति योजना ॥

तेषु मसृणो यथा—

'सरणे वारणास्यस्य दशनेऽशनिसंनिभे ।
चकार वलयाकारं भुजं भुजगभीषणम् ॥ २१६ ॥'

सोऽयमसंयुक्तवर्णावृत्तेः पदानुप्रासो मसृण इत्युच्यते ॥

वारणास्यो विनायकः । अत्र रणेरणेति शनेशनीति कारकारमिति भुजंभुजेति पदं तदेकदेशावृत्तिः स्फुटमुपलभ्यते । मसृणस्तु कथमित्यत आह—**सोऽयमिति** ॥

दन्तुरो यथा—

'स नैषधस्याधिपतेः सुतायामुत्पादयामास निषिद्धशत्रुः ।
अनूनसारं निषधान्नगेन्द्रात्पुत्रं यमाहुर्निषधाख्यमेव ॥२१७॥'

अत्र निषिद्धशत्रुरिति पदे संयोगाधिक्येन दन्तुरता । सोऽयं पदानुप्रासो दन्तुर इत्युच्यते ॥

स नैषधेत्यादौ निषधरूपो वर्णसमुदायः पदैकदेशतामापन्नः साधारण एव। तदत्र दन्तुरता कीदृशीत्यत आह—**अत्र निषिद्धेति।**

श्लक्ष्णो यथा—

'अप्येहि कान्ते वैदेहि देहि प्रतिवचो मम ।
अरविन्दाक्षि दाक्षिण्यमलंकारो हि योषिताम् ॥ २१८ ॥'

अत्र स्वरेण सहावृत्तेः श्लक्ष्णता । सोऽयं पदानुप्रासः श्लक्ष्ण इत्युच्यते ॥

संपुटं यथा—

'सदर्प इव कंदर्पस्तरला मादृशां मतिः ।
असार इव संसारः कुरुष्व मदनुग्रहम् ॥ २१९ ॥'

अत्रेवशब्दस्यापवादत्वेनाव्यवधायकत्वादनुप्रासोऽयं संपुट इत्युच्यते॥

संपुटवदेकरूपस्यैव खण्डस्य निरन्तरमावर्तनं संपुटम् । तत्कथमिव कंसंशब्दैरन्तराये संपद्यत इत्यत आह—**अत्रेवशब्दस्येति॥**

संपुटावली यथा—

'करोति किं किरातोऽयं समाकृष्य शिलीमुखान् ।
शिलीमुखान्समाकृष्य किङ्किरातः करोति यत् ॥ २२० ॥'

अत्र करोति करोतीत्येकं संपुटम्, किं किरातः किङ्किरात इति द्वितीयम्, समाकृष्य समाकृष्येति तृतीयम्, शिलीमुखाञ्छिलीमुखानिति चतुर्थम् । सोऽयं पदानुप्रासः संपुटावलीत्युच्यते ॥

करोति किं किरातोऽयमित्यादौ मध्ये शिलीमुखाञ्छिलीमुखानिति प्रथमं संपुटम् । तस्य बहिरावरणभूतं समाकृष्य समाकृष्येति द्वितीयम् । तस्यापि किं किरातः किङ्किरात इति तृतीयम् । तस्यापि करोतीति चतुर्थम् । तदेतद्विपरीतव्याख्यया व्यञ्जयन्नाह—**अत्र करोतीत्यादि॥**

खिन्नो यथा—

'कुलजातिसमाकुलीकृतानां सुखदसुखाशयमूढचेतनानाम् ।
अभवविभवलाभलोलुभानां भव भवबन्धविभेदनाय भूयः ॥२२१॥'

अत्र रीतेरनिर्वाहात्खिन्नता। सोऽयं पदानुप्रासः खिन्न इत्युच्यते ॥

**कुलेति**। अत्र प्रथमपादे कुलेति अविवक्षितस्वरादिवर्णयुग्ममक्षरचतुष्टयव्यवधानेन कुलीत्यावृत्तम् । द्वितीयतृतीयपादयोस्तु सुखदसुखेति अभवविभवेति चैकवर्णव्यवधानेनावृत्तिः । चतुर्थपादे तु भवभवेति रीतिभङ्गो न च दोषः । प्रतीत्यव्यवधानात् ॥

स्तबकवान्यथा—

'भासयत्यपि भाषादौ कविवर्गे जगत्त्रयीम् ।
के न यान्ति निबन्धारः कालिदासस्य दासताम् ॥ २२२ ॥'

सोऽयं वर्णानुप्रासवत्पदानुप्रासोऽपि स्थाने स्थाने विनिवेशात्स्तबकवानित्युच्यते ॥

वैचित्रीविशेषेणालंकारभावो भासयतीत्यादावाद्यन्तयोर्दूरान्तरितैवावृत्तिः । स्थाननियमस्तु न विवक्षितः । तदिदमुक्तम्—**स्थाने स्थाने इति** ॥

स्थानी यथा—

'परं जोण्हा उण्हा गरलसरिसो चन्दणरसो
खदक्खारो हारो मलअपवणा देहतवणा ।
मुणाली बाणाली जलदि अ जलद्दा तणुलदा
वरिट्ठा जं दिट्ठा कमलणअणा सा सुवअणा ॥ २२३ ॥'

[परं ज्योत्स्ना उष्णा गरलसदृशश्चन्दनरसः
क्षतक्षारो हारो मलयपवना देहतपनाः ।
मृणाली बाणाली ज्वलति च जलार्द्रा तनुलता
वरिष्ठा यद्दृष्टा कमलनयना सा सुवदना ॥]

सोऽयं पदानुप्रासः स्थाननियमात्स्थानीत्युच्यते ॥

जोण्हा उण्हा रिसो रसो इत्यादिका प्रतिपादं मध्यान्तस्थाननियमेनावृत्तिः । क्षतोऽर्पितः क्षारः । जलार्द्रा जलार्द्रे वस्त्रे ॥

मिथुनं यथा—

'पुरः पाराऽपारातटभुवि विहारः पुरवरं
ततः सिन्धुः सिन्धुः फणिपतिवनं पावनमतः ।
तदग्रे तूदग्रो गिरिरिति गिरिस्तस्य पुरतो
विशाला शालाभिर्ललितललनाभिर्विजयते ॥ २२४ ॥'

तदेतत्प्रतिपादं द्वयोर्द्वयोः पदानुप्रासयोर्विन्यासान्मिथुनम् ॥

पाराभिधाना नदी । अपारा पाररहिता । सिन्धुर्नदी सिन्धुनामा । विशाला उज्जयिनी । शालाभिरितीत्थंभूतलक्षणे तृतीया । अत्र पारापारेति सिन्धुः सिन्धुरिति दग्रे दग्र इति शालाशालेति क्रमेण प्रथमादिपादेषु द्वयोरेवानुप्रासयोर्विन्यासः । यद्यपि तृतीयपादे गिरिगिरीति द्वितीयमपि मिथुनं संभवति तथापि वर्णद्वयव्यवधानादनुल्लेखीत्युपेक्षितवान् ॥

मिथुनावली यथा—

'शिरसि शरभः क्रोडे क्रोडः करी करटे रट-
न्नुरसि च रुरुर्मर्मण्येणः शिखी मुखरो मुखे ।
कविरपि हृदि ह्रादी दूराद्धरिर्द्विपजिद्धतो
धनुषि लघुता लक्ष्येऽपूर्वो जयोऽस्य यशस्विनः ॥ २२५॥'

सेयं द्वयोः पादयोर्निरन्तरमावृत्तिर्मिथुनावलीत्युच्यते ॥

**शिरसीति** । शरभोऽष्टापदः । क्रोडो वराहः । रुरुर्बहुशृङ्गो मृगः । हरिः सिंहः । स्वरभागविवक्षायां व्यञ्जनयुगलावृत्तिर्मिथुनम् । तदेवावृत्तिभूम्ना मिथुनावली शरशरेति क्रोडक्रोडेति करकरेति ववरवेत्यादिना क्रमेण सुप्रत्यभिज्ञानैव ॥

गृहीतमुक्तो यथा—

'पुंनागनागकेसरकेसरपरिवासवासनासुरभिः ।
सुरभिर्मधुरमधुप्रियषट्चरणाचरणवान्प्राप्तः ॥ २२६ ॥'

सोऽयं चक्रवालवदनुप्रासो गृहीतमुक्त इत्युच्यते ॥

**गृहीतमुक्तो यथेति** । पुंनागः पुंगज इति प्रसिद्धः । केसरो बकुलः । भावना वासना । सुरभिर्वसन्तः । नानामधुपानलालसानामितस्ततः षट्चरणानां चरणं भ्रमणम् । अत्र चक्रवालक्रमो व्यक्त एव । आवृत्त्याधिक्याभावाच्च गृहीतमात्रस्यैव मोचनम् ॥

पुनरुक्तिमान्यथा—

'धूमाइ धूमकलुसे जलइ जलन्ता बुहत्थजीआबन्धे ।
पडिरअपडिउण्णदिसे रसइ रसन्तिसिहरे धणुम्मि णहअलम् ॥२२७॥'

[धूमायते धूमकलुषे ज्वलति ज्वलदात्तहस्तजीवाबन्धे ।
प्रतिरवप्रतिपूर्णदिशि रसति रसच्छिखरे धनुषि नभस्तलम् ॥]

अत्र धूमादीनां पुनर्वचनात्पदानुप्रासोऽयं पुनरुक्तिमानुच्यते ॥

**पुनरुक्तिमानिति** । वाच्याभेदात्पुनरुक्तिः सा यस्मिन्नावृत्तिलक्षणेनानुप्रासे स पुनरुक्तिमान् । तात्पर्यभेदाच्च न दोषः । धूमज्वलनरसनानामाकाशदेशव्यापितया धनुःप्रकर्षद्वारेण रामभद्रगतोत्साहशक्तिध्वननात्प्रकृतवीररसपोषः । अत्र धूम-धूमेत्यादिना वाच्यभेदः ॥

ननु वर्णावृत्तिरनुप्राससामान्यलक्षणयुक्ता न चासौ पदाद्यावृत्तावस्तीत्यत आह—

**वर्णावृत्तिरनुप्रासः पादेषु च पदेषु च ।
पूर्वानुभवसंस्कारबोधिनी यद्यदूरता ॥ ९७ ॥**

**वर्णावृत्तिरिति** । समुदायावृत्तिरपि वर्णावृत्तिरेव । नहि वर्णातिरिक्तः समुदायो नाम । इयांस्तु विशेषो यत्पूर्वजातीयवृत्तानुसंधानमलंकारतां प्रयोजयति । तत्र च कार्यानुमेयः समयसंनिकर्षविशेष एव प्रयोजक इति । तदिदं दिङ्मात्रमुक्तम् ॥

**लाटानुप्रासवर्गस्य यावद्वा लक्ष्यते गतिः ।
पदानुप्रासवर्गेऽपि तावदेव प्रपञ्च्यते ॥ ९८ ॥**

अन्येऽपि पदानुप्रासप्रकाराः स्वयमुत्प्रेक्षितव्या इत्याह—**लाटेति** । गतिः प्रकारः ॥

**स्वभावतश्च गौण्या च वीप्साभीक्ष्ण्यादिभिश्च सा ।
नाम्ना द्विरुक्तिभिर्वाक्ये तदनुप्रास उच्यते ॥ ९९ ॥**

क्रमप्राप्तं नामद्विरुक्त्यनुप्रासं विभजते—**स्वभावत इति** । यद्यपि पदानु-

प्रासादौ नामद्विरुक्तिरतिव्यापिका तथाप्यर्थोपक्षेपोपनिपातिनी सह विवक्षिता। अर्थो द्विविधः—आभिधानिकः, उपाधिश्च। आद्यो गौणमुख्यभेदेन द्विप्रकारः, द्वितीयोऽपि वीप्साभीक्ष्ण्यादिरनेकविधः। द्विरुक्तिरपि नाम शरीरसंपादिका नाम्नः सतश्चेति द्वयी बोद्धव्या। अत एव द्विरुक्तस्यैवाभिधाशक्तियोगात्स्वभावत इत्युक्तम्॥

सा स्वभावतो यथा—

'कुर्वन्तोऽमी कलकलं मारुतेन चलाचलाः।
प्रातर्गुलुगुलायन्ते गजा इव घनाघनाः॥ २२८॥'

अत्र कलकलमित्यादिषु स्वाभाविकी पुनरुक्तिरुपदिश्यते॥

**कुर्वन्त इति।** चलाचलाश्चञ्चलाः। चलतेरच्प्रत्ययेऽभ्यासस्याकि रूपम्। गुलु इत्यव्यक्तानुकरणस्य डाचि द्विर्वचने च गुलुगुलेति नामसिद्धिः। अत्र कलकलादिपदानामर्थवशायातद्विरुक्तिशरीराणां स्वभावत एव यथोक्तरूपव्यवस्थितिः॥

गौण्या यथा—

'अमृतममृतं चन्द्रश्चन्द्रस्तथाम्बुजमम्बुजं
रतिरपि रतिः कामः कामो मधूनि मधून्यपि।
इति न भजते वस्तु प्रायः परस्परसंकरं
तदियमबला कान्तिं धत्ते कुतः सकलात्मिकाम्॥२२९॥'

अत्रामृतममृतमित्यादिष्वभेदेऽपि भेदोपचारेण विशेषणविशेष्यभावः सामान्यविशेषभावाद्भवन्पुनरुक्तिवद्भासते॥

**अमृतमिति।** अत्र द्वितीयान्तानामसृतादिपदानां द्विरुक्तिदोषेण तात्पर्यापर्यवसानादमृतादिगुणपरत्वे कल्पनीयेऽपि निकृष्टगुणपराणां सामानाधिकरण्यानुपपत्तेस्तत्तदसाधारणगुणोपबृंहितामृतादिनिष्ठानामाद्यपदोपात्तसामान्यापेक्षो विशेष्यभावश्च विशेषणत्वं च निर्वहति। न च पर्यायनिवेशेऽर्थान्तरसंक्रमितवाच्यता संभवतीति पूर्वाचार्याः। सेयं गौणार्थपरवशा नाम द्विरुक्तिः॥

वीप्सा यथा—

'शैले शैले न माणिक्यं मौक्तिकं न गजे गजे।
देशे देशे न विद्वांसश्चन्दनं न वने वने॥ २३०॥'

सेयं द्रव्यवीप्सा नाम द्विरुक्तिः । एवं गुणजातिक्रियावीप्सायामपि द्रष्टव्यम् ॥

**वीप्सेति** । नानार्थानां युगपदेकैकेन पदेन केनचिद्व्याप्तुमिच्छा वीप्सा । स प्रयोक्तृधर्मो द्विरुक्त्या व्यज्यते । अत एव या काचिदर्थसामर्थ्याकृष्टा द्विरुक्तिः सा सप्तवर्णादिवन्नामद्विरुक्तिसमाख्यया प्रतिपाद्यते । **शैले शैल इति**। अत्र किंचिदेकमसाधारणगुणाश्रयं विवक्षन् तदितरस्य तज्जातीयस्य गुणसंस्पर्शमसहमानोऽप्रस्तुतमेव शैलादिकं प्रस्तुतवान् । रोहणादिव्यतिरिक्तासु व्यक्तिषु माणिक्याद्यभावगुणव्याप्तिर्युगपदेव विवक्षिता । शब्दादुपसर्जनतया प्रतीयमानः सिद्धस्वभावः पदार्थो गुण इत्युच्यते । एवं क्रिययापि व्याप्तिरवसेया । **सेयं द्रव्यवीप्सेति** । शैलादीनां द्रव्याणामेकेन गुणादिना व्याप्तुमिच्छेत्यर्थः ॥

'प्रकारे गुणवचनस्य ८।१।१२' इत्यादिरपि वीप्साप्रकार एव । यथा—

मानिनीजनविलोचनपातानुष्णबाष्पकलुषान्प्रतिगृह्णन् ।
मन्दमन्दमुदितः प्रययौ खं भीतभीत इव शीतमयूखः ॥२३१॥'

**प्रकारे गुणवचनस्येति** । प्रकारः सादृश्यं तत्पूर्णगुणेन न्यूनगुणस्य साधारणगुणान्वये भवति । एवं चास्ति समानशब्दाभिधेयत्वं च व्याप्तिः । इयांस्तु विशेषो यदेकत्र सिद्धस्यान्यत्र प्रतिबिम्बनं सादृश्यं, शुद्धवीप्सायां तु युगपदेकस्य नानापदार्थसंबन्ध इति । सोऽयं वीप्साप्रकारशब्दार्थः । अत एव 'प्रकारे गुणवचनस्य ८।१।१२' इति पृथक्सूत्रितम् । इह तु वीप्सापदेनैवायमर्थ उपग्राह्य इत्यभिप्रायः । मन्दं मन्दमिवोदित इति क्रियाविशेषणमुपमितम् । एवं भीत भीत इति कर्तृविशेषणमपि । सादृश्यलक्षणगुणोत्प्रेक्षायामिवशब्दः ॥

आभीक्ष्ण्येन यथा—

'श्लेषं श्लेषं मृगदृशा दत्तमाननपङ्कजम् ।
मया मुकुलिताक्षेण पायं पायमरम्यत ॥ २३२ ॥'

सोऽयमाभीक्ष्ण्ये णमुल् । स चानुप्रयुज्यत इति पुनरुक्तिः ॥

**आभीक्ष्ण्येनेति** । 'नित्यवीप्सयोः ८।१।४' इत्यनेन नित्यत्वमाभीक्ष्ण्यमुक्तम् । यां किल क्रियां कर्ता प्राधान्येनानुपरत्या च कर्तुमिच्छति तद्रूपमाभीक्ष्ण्यम् । अत एव तिङव्ययकृतां च द्विरुक्तिरियमसाधारणी । उभयत्रैव क्रियाप्राधान्यप्रतीतेः ।

सिद्धे हि वस्तुनि पौनःपुन्यप्रतीतिः क्रियोपाधित एव न स्वरूपेण । ननु णमुलैवाभीक्ष्ण्याभिधानात्किं द्विरुक्तिः करिष्यत इत्यत आह—**सोऽयमिति** । न चाभीक्ष्ण्यं णमुलो वाच्यम् । क्त्वार्थे तस्याभिधानात् । द्विरुक्तिसहितस्यैव तस्यानुपरतिव्यञ्जकत्वात् । स्वरूपार्थाभ्यामन्तरतमशब्दद्वयरूप आदेशो वा द्विरुच्चारणं वा द्विरुक्तिशब्दार्थः ॥

क्रियापदाभीक्ष्ण्याद्द्विरुक्तौ तु पुनरुक्तेरपि पुनरुक्तिः । यथा—

'जयति जयति देवः श्यामकण्ठः पिनाकी
जयति जयति देवी लोकमाता भवानी ।
जयति जयति धन्यः सोऽपि भक्तस्तयोर्यः
किमपरमिह धन्यं वर्ण्यते तावदेव ॥ २३३ ॥'

न चावश्यं द्वावेव शब्दौ प्रयोक्तव्यौ किंतु यावद्भिरभिमतोऽर्थः प्रतीयते तावन्तोऽभीक्ष्ण्यशब्दाः प्रयोक्तव्यास्ते नाव्ययकृत्सु दृश्यन्ते किंतु तिङ्पदेष्वेवेत्याह—**क्रियापदेति** । यद्यप्येकवाक्यार्थसंगत्या क्रियापदस्य द्वयमेवोच्चारणं तथापि काव्यापेक्षया बाहुल्यमवसेयम् ॥

आदिग्रहणेन निमूलसंभ्रमादयः परिगृह्यन्ते । तेषु निमूलादिर्यथा—

'निमूलकाषं कषति स्वान्तमन्तःस्मरज्वरे ।
लाजस्फोटं स्फुटन्त्याशु हृदये हारयष्टयः ॥ २३४ ॥'

**आदिग्रहणेनेति** । तत्तदितरप्रकरणप्रापितानां द्विरुक्तिप्रकाराणामादिपदेनोपग्रहो विधेयः । तद्यथा—'अर्वागर्वाग्बलवदुपलग्रन्थयः क्षेत्रशैला दूरे दूरे मणिमयदृषन्मेखलो रत्नसानुः । आरादाराज्जिधिरयमपां यद्वीयो दवीयान्दुग्धाम्भोधिस्तदयमसदृक्छिल्प एवादिशिल्पी ॥' अत्रानुपूर्व्ये द्वे भवत इति द्विरुक्तिः । एवं स्वार्थेऽवधार्यमाणे इत्यादयोऽपि द्विरुक्तिप्रकाराः स्वयमवसेया इत्याशयवानुपलक्षणतया किंचिदुदाहरति—**निमूलकाषमिति** । 'कषादिषु यथाविध्यनुप्रयोगः' इति तस्मिन्नेव प्रयुक्ते द्विरुक्तिसिद्धिः ॥

संभ्रमेण यथा—

'अस्थीन्यस्थीन्यजिनमजिनं भस्म भस्मेन्दुरिन्दुर्गङ्गा गङ्गोरग उरग इत्याकुलाः संभ्रमेण ।

भूषावेषोपकरणगणप्रापणव्यापृतानां
नृत्यारम्भप्रणयिनि शिवे पान्तु वाचो गणानाम् ॥ २३५ ॥'

**संभ्रमेणेति** । भयसंवेगादरात्मकः संभ्रमः संवेगस्त्वरा । सैव प्रकृतोदाहरणे द्विरुक्तिं प्रयोजयति ॥

हर्षावेगविस्मयादयोऽपि संभ्रमस्योपाधयो भवन्ति । तेषु हर्षसंभ्रमेण यथा—

'रुरुधुः कौतुकोत्तालास्ततस्ताममरावतीम् ।
कार्जुनः कार्जुन इति ब्रुवन्त्यो नाकयोषितः ॥ २३६ ॥'

ननु हर्षादीनां महाकविप्रबन्धेषु द्विरुक्तिरुपलभ्यते । सा कथमुपपाद्येत्यत आह—**हर्षेति** । हर्षादयोऽपि संभ्रमप्रयोजकास्तैरसाधारणतामापन्नैरवच्छिद्यमानः संभ्रमोऽन्योन्यो भवति न च संभ्रमतां जहातीति संभ्रमद्विरुक्तिप्रकार एवायमित्यर्थः ॥

आवेगसंभ्रमेण यथा—

'कञ्चुकं कञ्चुकं मुञ्च हारं हारं परित्यज ।
हा हा दहति दावाग्निर्वस्त्रं वस्त्रमपाकुरु ॥ २३७ ॥'

अत्र मुञ्च परित्यज दहति अपाकुरु इति क्रियापदेष्वावेगसंभ्रमान्न द्विरुक्तिः । तथाहि—अरण्यानीप्रवेशे विजिगीषुद्विषां योषिद्दावाग्निसंभ्रमावेगात्कयाप्येवमुच्यते, तत्र प्रथमं कञ्चुक एवावेगसंभ्रमः । स ह्यागते दावाग्नावुत्तारयितुमशक्यः । ततस्तद्व्यासङ्गहेतौ हारे, अनन्तरं परापतितदावाग्निदीप्ते वाससीति ॥

निगूढगम्भीर उद्वेग आवेगः । ननु कञ्चुकं कञ्चुकमितिवन्मुञ्चेत्यादिकमावेगसंभ्रमप्रभवमेव तत्कथं न द्विरुच्यत इत्यत आह—**अत्रेति** । कञ्चुकस्य हारेण हारस्योत्तरीयवाससा व्यासङ्गसंभावना संभ्रमहेतुः ॥

विस्मयसंभ्रमेण यथा—

'अहो रूपमहो रूपमहो मुखमहो मुखम्।
अहो मध्यमहो मध्यमस्याः सारङ्गचक्षुषः ॥ २३८ ॥'

एतेषु समस्तेष्वपि संभ्रमेषु यावद्बोधमिति द्विरुक्तिः॥

एवं त्रिरुक्तिरपि द्रष्टव्या यथा—

'जय जय जय श्रीमन्भोज प्रभाति विभावरी
वद वद वद श्रव्यं विद्वन्निदं ह्यवधीयते।
शृणु शृणु शृणु त्वद्वत्सूर्योऽनुरज्यति मण्डलं
नहि नहि नहि क्षम मार्तण्डः क्षणेन विरज्यते ॥२३९॥'

संभ्रमेषु यावद्बोधमिति यावच्छब्दार्थमाविष्कुर्वाणः पूर्वोक्तमभिप्रेत्याह—**एवं त्रिरुक्तिरपीति**। उपलक्षणं चेदम्। चतुरादिद्विरुक्तिरदण्डवारितैव ॥

**क्रियासमभिहारश्च क्रियाभ्यासश्च यः पुरा।
युक्तावुदाहृतः सोऽपि नामानुप्रास इष्यते ॥ १०० ॥**

समभिहारो भृशत्वम् ॥

**जायते न च दोषाय काव्येऽलंकारसंकरः।
विभूषयति हारोऽपि स्तनौ ग्रीवां मृगीदृशाम् ॥१०१॥**

ननु वाक्यार्थप्रयुक्त्यैव काव्यस्य सनाथीकरणात्किमनुप्रासेनेत्यत आह—**जायते न चेति**। उदाहरणेनालंकार्यसंकरवदलंकारसंकरोऽपि लोकप्रसिद्ध एव शोभाहेतुरित्यभिमतमिति ॥

**अर्थाभेदे पदावृत्तिः प्रवृत्त्या भिन्नयेह या।
स सूरिभिरनुप्रासो लाटीय इति गीयते ॥ १०२ ॥**

क्रमप्राप्तं लाटानुप्रासं लक्षयति—**अर्थाभेदे इति**। लाटजनवल्लभोऽनुप्रासो लाटानुप्रासः। अर्थभेदे कथं न पुनरुक्तिदोष इत्यत उक्तम्—**प्रवृत्त्या भिन्नयेति**। तात्पर्यभेदेनेत्यर्थः। अत एव यमकाद्भेदः ॥

**स चान्यत्र द्विधो व्यस्तः समस्त उभयः पुनः ।**
**उभयं चक्रवालं च गर्भश्चैत्राभिधीयते ॥ १०३ ॥**

स चेत्यनुक्तव्यवहितसमुच्चये चकारः । लाटानुप्रासः सामान्यतो द्विधा—अव्यवहितः, व्यवहितश्च । अनावृत्तशब्दानन्तरितोऽव्यवहितः, तदन्तरितश्च व्यवहितः । तयोरव्यवहितः षोढा भवति । व्यस्तः समस्तो द्वावुभयाविति तावच्चत्वारः । तत्रोभयद्वयं द्विप्रकारकमिति सामान्यविशेषभावाभ्यां षड्भेदा व्याख्येयाः । **उभयः पुनरिति** । पुनःशब्दो व्यावृत्तौ । पूर्वस्मादन्य एवायमेकशब्दाभिलप्य इत्यर्थः । आद्योभयद्वयमग्रे वक्ष्यते ॥

**यस्तु व्यवहितो नाम नेयत्ता तस्य शक्यते ।**
**कर्तुमेकादिगणना पदवृत्त्यादिभङ्गिभिः ॥ १०४ ॥**

द्वितीयं तु चक्रवालं गर्भश्चेत्युक्तं व्यवहितस्य तर्हि कियन्तो भेदा अत आह—**यस्त्विति** । तेन बहुभावावान्तरविशेषतया नायं समशीर्षिकया गणित इत्यर्थः ॥

तेष्वव्यवहितभेदेषु व्यस्तो यथा—

'उअहिस्स जसेण जसं धीरं धीरेण गरुइआइ वि गरुअम् ।
रामो ठिएअ वि ठिइं भणइ रवेण अ रवं समुप्फुन्दन्तो ॥ २४० ॥'

[उदधेर्यशसा यशो धैर्यं धैर्येण गुरुतयापि गुरुताम् ।
*रामः स्थित्यापि स्थितिं* भणति रवेण च रवं समभिक्रामन् ॥]

अत्राव्ययानां द्योतकादित्वादिवादिभिर्व्यवधानं नाश्रीयते । न हीवादेः प्रकृतेऽपि पृथक्पदत्वमस्ति । यद्येवमिदमिहोदाहरणं युज्यते—

'त्वन्मुखं त्वन्मुखमिव त्वद्दृशौ त्वद्दृशाविव ।
त्वन्मूर्तिरिव मूर्तिस्ते त्वमिव त्वं कृशोदरि ॥ २४१ ॥' इति ।

अस्त्येवैतत् । किं तु यथा—'अमृतममृतं चन्द्रश्चन्द्रः—' इत्यादिकमभेदेऽपि भेदोपचारान्नामद्विरुक्तिस्तथेयमित्युत्प्रेक्षते ॥

**तेष्विति** । द्विरुक्तशब्दरूपेषु पूर्वपरयोर्नैकमपि समासान्तर्गतमिति व्यस्तः । एतेन समस्तादयो व्याख्याताः । धैर्यगुरुतास्थितिगाम्भीर्यानुनिष्पादी वागनुभावो रसपूर्णकुम्भोच्छलनन्यायेन साक्षादिव तत्तत्प्रकर्षमर्पयन् शोभाविकासहेतुः ।

समुप्फुन्दन्तो समभिक्रामन्। ननु जसेण धीरेण गरुइआइ वि इ रवेण अ इति यदपभ्रंके विभक्त्या तदुत्तरयोश्चकारद्वयेन च व्यवधानात्कथमव्यवहितभेद उदाह्रियत इत्याह—**अत्रेति**। अव्ययानामित्युपलक्षणम्। द्योतकत्वादिति विभक्तिसाधारणो हेतुः। पञ्चकप्रातिपदिकार्थत्वपक्षे विभक्तिर्द्योतिकैव। शाकल्योऽपि अव्ययवाचकत्ववादी। सोऽप्यसत्त्वार्थानामिवादीनां स्वातन्त्र्येण वाचकत्वं न मन्यते। यतो न पृथक्पदत्वमनुशिष्टवान्। तथा च द्योतकानां परशक्तिसहकारित्वेन तदनुप्रवेशात्स्वाङ्गमव्यवधायकमिति न्यायात्। ननु किमत्र क्लिष्टकल्पनया। अस्त्यव्यवहितोदाहरणमप्यन्यदपीति शङ्कते—**यद्येवमिति**। अत्र पूर्वार्धवर्तिद्वयमुदाहरणमुत्तरार्धवर्तिनो द्वयस्य पूर्वतुल्यत्वात्। परिहरति—**अस्तीति**। अनन्वयमात्रमत्रोदाहरणम्। तत्र चावश्यभेदकल्पनया विशेषणविशेष्यभावो वाच्यस्तथा च गौणी नाम द्विरुक्तिः स्यादिति संकरशङ्कनायोदाहृतमिति सिद्धान्ततात्पर्यसंक्षेपः॥

समस्तो यथा—

'अपहस्तितान्यकिसलय किसलयशोभं विलोकयाशोकम्।
सखि विजिता परसुमनःसुमनः सुभगं च मधुतिलकम्॥ २४२॥'

अत्र 'किसलय किसलय' इति, 'सुमनः सुमनः' इति च समस्तानामेवाव्यधानादयं लाटीयोऽनुप्रासोऽव्यवहितसमस्तः पूर्वः पुनरव्यवहितव्यस्त इत्युच्यते॥

**पूर्वः पुनरिति**। समस्तानन्तरं व्यस्तविवरणं प्रतिपत्तिसौकर्यार्थम्॥

उभयस्तु द्विधा— प्रथमः समस्तोऽपरो व्यस्तः। द्वितीयो व्यस्तोऽपरः समस्त इति च। तयोः प्रथमो यथा—

'जितलाटाङ्गनावक्त्रं वक्त्रं तस्या मृगीदृशः।
कस्य न क्षोभजनकं जनकं पुष्पधन्वनः॥ २४३॥'

तदिदं लक्षणेनैव व्याख्यातम्॥

द्वितीयो यथा—

'नलिनी नलिनीनाथकरसंनतिसंगमात्।
विकचा विकचास्यानां कान्तानां हरति श्रियम्॥ २४४॥'

अस्यापि लक्षणेनैवोक्तोऽर्थः ॥

स्वापेक्षया व्यस्तोऽन्यापेक्षया च समस्तः, द्वितीयो व्यस्तोऽपरः समस्त इति स द्वितीयोभयशब्दवाच्यः । सोऽपि द्विधा—प्रतिपादमन्ताद्योर्गर्भ इवानुप्रासविन्यासात् । तयोः प्रथमश्चक्रवालं यथा—

'जयति क्षुण्णतिमिरस्तिमिरान्धैकवल्लभः ।
वल्लभीकृतपूर्वाशः पूर्वाशातिलको रविः ॥ २४५ ॥'

अत्र तिमिरवल्लभपूर्वाशेतिशब्दास्तिमिरादिशब्दापेक्षया व्यस्ताः यथा—स्वपूर्वोत्तरपदापेक्षया च समस्ताः पदान्ताद्योर्विनिवेशिता इति यथोक्तलक्षणानुगमाल्लाटीयानुप्रासोऽयमव्यवहितो व्यस्तसमस्तश्चक्रवालमित्युच्यते ॥

द्वितीयमुभयं विवेचयति—**स्वापेक्षयेति** । तिमिरान्धाश्चक्रवाकाः । यथ श्रुतिद्विरुक्ताः पूर्वः पूर्वेणोत्तरश्चोत्तरेण समस्त इति पूर्वस्माद्विशेषः ॥

एतेन पादमध्येऽनुप्रासविन्यासाद्गर्भोऽपि व्याख्यातः । यथा—

'समाधवा माधवदत्तदृष्टिः सकौतुका कौतुकमन्दिरे स्तात् ।
सविभ्रमा विभ्रमदायिनी वः सपङ्कजा पङ्कजलोचना श्रीः ॥२४६॥'

सकौतुका कृतकङ्कणबन्धादिपरिणयमङ्गला ॥

व्यवहितभेदेषु व्यस्तो यथा—

'प्रकाशो यशसा देवः प्रकाशो महसा रविः ।
दुःसहो विद्विषां स्वामी दुःसहस्तमसां च सः ॥ २४७ ॥'

तदेतन्नातिदुर्बोधमिति न व्याक्रियते ॥

सोऽयमेकगुणो व्यस्तश्च लाटीयानुप्रासो व्यवहित इत्युच्यते । व्यस्तश्चानेकगुणो यथा—

'किंचिद्वच्मि न वच्मि वच्मि यदि वा किं वच्मि वच्मीदृशं
दृश्यन्ते न भवादृशेषु पतिषु स्वेषमदोषे दमाः ।

ते किं सन्ति न सन्ति सन्ति यदि वा के सन्ति सन्तीदृशाः
सर्वस्तेषु गुणैर्गृहीतहृदयो लोकः कुतो वर्तते ॥ २४८ ॥'

अत्र वच्मीति सन्तीत्येतयोरनेकगुणावृत्तिः ॥

**अनेकगुणा इति** । आवृत्तिद्वैगुण्यादिनानेकगुणत्वम्, न च गुणनाथामियत्तानवधारणकारणमस्तीत्यभिसंधाय तस्येयत्ता न शक्यते कर्तुमिति पूर्वमुक्तम् । स्वेषामात्मीयानां मध्ये यः कश्चिद्दोषस्तत्र दमा दण्डप्रकारा न दृश्यन्त इति ॥

समस्त एकगुणो यथा—

'चन्द्रानन चन्द्रदिनं मृगलोचन मृगशिरश्च नक्षत्रम् ।
तिथिरतिथिप्रियदशमी परतस्त्वेकादशी प्रहरात् ॥ २४९ ॥'

नन्विह तिथिरित्यसमस्तम् । न केवलमसमस्तं भिन्नार्थतया लाटीयानुप्रासेऽपि न संगच्छते । संगते च केनचित्पदानुप्रासेन । न च लाटीयानुप्रासो वा नामानुप्रासो वा पदानुप्रासाद्भिद्यत इति ॥

यद्यप्येकपरिहाराकारोदाहरणद्वयमुचितमेव तथापि किंचिद्विशेषं विवक्षन्नाक्षिप्य समाधत्ते—**नन्विति** । मा भूदत्रासमासोऽन्यथापि नेदमुदाहरणमिह संगतमित्याह—**न केवलमिति** । तत्किमनुप्रास एवायं न भवतीति पृच्छति—केन तर्हीति । उत्तरम्—पदानुप्रासेनेति । पदानुप्रासेनार्थभेदाभेदौ विवक्षितौ । किंतु पदाश्रयेणावृत्तिमात्रं पदानुप्रासावृत्तिश्च लाटानुप्रासेऽप्यस्तीति संगत्यान्नेदमुदाहृतमित्यर्थः ॥

समस्तोऽनेकगुणो यथा—

'ब्रह्माण्डच्छत्रदण्डः शतधृतिभुवनाम्भोरुहो नालदण्डः
क्षोणीनौकूपदण्डः क्षरदमरसरित्पट्टिकाकेतुदण्डः ।
ज्योतिश्चक्राक्षदण्डस्त्रिभुवनविजयस्तम्भदण्डोऽङ्घ्रिदण्डः
श्रेयस्त्रैविक्रमस्ते वितरतु विबुधद्वेषिणां कालदण्डः ॥ २५० ॥'

अत्रानेकशो दण्ड इत्यस्यावृत्तिः । आभ्यां व्यस्तसमस्तभेदोऽपि व्याख्यातः । यथा—

'दशरश्मिशतोपमद्युतिं यशसा दिक्षु दशस्वपि श्रुतम् ।
दशपूर्वरथं यमाख्यया दशकण्ठारिगुरु विदुर्बुधाः ॥ २५१ ॥'

अत्रानेकधा दशशब्द आवर्तते ॥

शतधृतिर्ब्रह्मा तस्य भुवनभूतमम्भोरुह पद्मं तस्य, क्षोणी पृथ्वी तद्रूपा या नौस्तरिस्तस्याः कूपदण्डः गुणवृक्षः । दशस्विति । एको दशशब्दो व्यस्तः, अन्ये त्रयः समस्ताः ॥

अव्यवहितेऽपि द्वैगुण्यादेर्न विरोधः । यथा—

'वल्लायन्ते नदीनां सितकुसुमधराः शक्रसंकाशकाशाः
काशाभा भान्ति तासां नवपुलिनचराः श्रीनदीहंसहंसाः ।
हंसाभाम्भोदमुक्तक्षरदमृतरुचिर्मेदिनीचन्द्रचन्द्र-
श्चन्द्राङ्कः शारदस्ते जयकृदुपनतो विद्विषां कालकालः ॥ २५२ ॥'

ननु व्यवहित एव किं गुणनादिभेदो नेत्याह—अव्यवहितेऽपीति । वल्लायन्त इत्यादौ काशपदपरिहारेणोदाहरणम् । तत्र हि प्रथमः काशशब्दो भिन्नार्थ एव ॥

व्यवहिताव्यवहितभेदेऽपि दृश्यते । यथा—

'धनैर्दुष्कुलीनाः कुलीनाः क्रियन्ते धनैरेव पापान्नरा निस्तरन्ति ।
धनेभ्यो हि कश्चित्सुहृन्नास्ति लोके धनान्यर्जयध्वं धनान्यर्जयध्वम् २५३'

यत्र व्यवहिताव्यवहितयोरेकवाक्यानुप्रवेशोऽस्ति तत्रापि गुणनाभेद उदाहरणीयः । दृश्यत इत्यनेन यद्वद्व्यवहिते भूयसी गुणना महाकविप्रबन्धेषु प्रतीयते न तद्वदव्यवहितेऽपीति पूर्वं व्यवहितमात्रे गुणनादिकमुपन्यस्तमिति तात्पर्यम् । धनैरिति । अत्र धनपदव्यवधानेन बह्वीं गुणनामवलम्बमानमेव चतुर्थपादे त्वव्यवहिता त्वनुप्रासेऽपि प्रविष्टमिति भवति व्यवहिताव्यवहितभेदता । सोऽयं पदाभ्यासो दर्शितः ॥

योऽपि चार्थाभ्यासः सोऽपि व्यवहिताव्यवहितभेद एव । यथा—

'यैस्त्वं साक्षात्कृतो नाथ तेषां कामेषु को ग्रहः ।
यैस्त्वं साक्षात्कृतो नाथ तेषां कामेषु को ग्रहः ॥ २५४ ॥'

अत्र पादापेक्षया व्यवहितत्वमर्थापेक्षया पुनरव्यवहितत्वं भवति ॥

एवं श्लोकार्धाभ्यासो व्यवहिताव्यवहितभेद एव भवतीत्याह—**योऽपीति** ॥

द्विभागाभ्यासस्तु व्यवहित एव स्वदते । यथा—

'श्रद्धायत्नौ यदि स्यातां मेधया किं प्रयोजनम् ।
तावुभौ यदि न स्यातां मेधया किं प्रयोजनम् ॥ २५५ ॥'

**श्रद्धायत्नाविति** । अत्र यदि स्यातामिति पादभागेन सह पदावृत्तिस्त्रिभागावृत्तिर्भवति ॥

पदाभ्यासः पुनरव्यवहितो व्यवहितश्च दृश्यते । तयोरव्यवहितो यथा—

'सन्तः शृणुध्वं हृदये निधद्ध्वमुत्क्षिप्य बाहुं परिरारटीमि ।
न सुभ्रुवां तुल्यमिहास्ति रम्यं न सुभ्रुवां तुल्यमिहास्ति रम्यम् २५६'

व्यवहितो यथा—

'मुखेन लक्ष्मीर्जयति फुल्लपङ्कजचारुणा ।
दक्षिणेन करेणापि फुल्लपङ्कजचारुणा ॥ २५७ ॥'

**मुखेनेति** । फुल्लपङ्कजमिव चारु फुल्लेन पङ्कजेन चारुरिति यद्यपि वृत्त्यर्थौ भिद्येते, तथापि पदानामभिन्नार्थत्वादुदाहरणता ॥

इवाद्यावृत्तयोऽपि चात्रैव द्रष्टव्याः । यथा—

'लीनेव प्रतिबिम्बितेव लिखितेवोत्कीर्णरूपेव च
प्रत्युप्तेव च वज्रलेपघटितेवान्तर्निखातेव च ।
सा नश्चेतसि कीलितेव विशिखैश्चेतोभुवः पञ्चभि-
श्चिन्तासंततितन्तुजालनिबिडस्यूतेव लग्ना प्रिया ॥२५८॥'

अर्थभेद इति नार्थशब्दोऽभिधेयवचनः किंतु शब्दप्रतिपाद्यमात्रवचन इत्याशयवानाह—**इवादीति** ॥

**यमकानां हि यावन्त्यो वर्ण्यन्ते भेदभक्तयः ।**
**अनुप्रासस्य लाटानां भिदास्तावन्त्य एव हि ॥ १०५ ॥**

नन्वन्येऽपि पदावृत्तिप्रकाराः किमिति नोदाहृता इत्यत आह—**यमकानां हीति** । भेदभक्तयोऽवान्तरप्रकारविच्छित्तयः स्थानास्थानपादभेदलक्षणा श्लोकावृत्तिः परमत्र नास्तीति यमकादपकर्षः ॥

**उपमादिवियुक्तापि राजते काव्यपद्धतिः ।**
**यद्यनुप्रासलेशोऽपि हन्त तत्र निवेश्यते ॥ १०६ ॥**

प्रकरणान्तेऽनुप्रासव्युत्पादनप्रयोजनमाह—**उपमादीति** । **अनुप्रासलेशोऽपीति** । वर्णाद्यनुप्रासः ॥

**कुण्डलादिवियुक्तापि कान्ता किमपि शोभते ।**
**कुङ्कुमेनाङ्गरागश्चेत्सर्वाङ्गीणः प्रयुज्यते ॥ १०७ ॥**

श्रुतिवृत्त्यनुप्रासौ तु संदर्भव्यापकावेव प्रशस्तावित्युदाहरणव्याजेनाह—**कुण्डलादीति** ॥

**श्रुतिवर्णानुप्रासावेकविधौ कुन्तलेषु गौडेषु ।**
**पदयोर्निरनुप्रासो द्वेधा त्रेधा च लाटेषु ॥ १०८ ॥**

एतदेव खण्डसरस्वतीषु कविषु न तथा काव्यसिद्धिरिति दर्शयन्द्रढयति—**श्रुतिवर्णानुप्रासाविति** ॥

**'वर्णस्थानस्वराकारगतिबन्धान्प्रतीहयः ।**
**नियमस्तद्बुधैः षोढा चित्रमित्यभिधीयते ॥ १०९ ॥'**

क्रमप्राप्तं चित्रलक्षणमवतारयति—**वर्णेति** । चित्रमालेख्यं तदिव जीवितस्थानीयध्वनिरहितं चित्रमिति काश्मीरकाः । तदसत् । ध्वनेः प्राधान्यानङ्गीकारात्प्रतीयमानमात्राभावस्य क्वचिदप्यसंभवात् । यद्वा आकृतिविशेषयुक्तं चित्रमिति तदपि न । अव्यापकत्वात् । अतो वर्णादिनियमेन प्रवृत्तमाश्चर्यकारितया चित्रमित्येव युक्तम् । वर्णा व्यञ्जनानि । स्थानं कण्ठादि । स्वरा अकारादयः । आकारः पद्माद्याकृत्युन्मुद्रणम् । गतिः पठितिभङ्गविशेषः । बन्धो विविडितिप्रभृतिः ॥

वर्णशब्देन चात्र स्वराणां पृथङ्निर्देशाद्व्यञ्जनान्येव प्रगृह्यन्ते । तत्र वर्णचित्रेषु चतुर्व्यञ्जनं यथा—

'जजौजोजाजिजिज्जाजी तं ततोऽतितताततुत् ।
भाभोऽभीभाभिभूभाभूरारारिररिरीररः ॥ २५९ ॥'

पञ्चप्रभृतिनियमेन तथाशक्तिव्युत्पत्त्योरुत्कर्ष इति चतुरादि गृह्णाति—**तत्रेति**। अवश्यं योद्धा जाजी । जजेर्युद्धार्थादावश्यके णिनिः । जजा युद्धशौण्डास्तेषामोजसा जाता या आजिः सङ्ग्रामस्तं जयतीति क्विप् । तं वेणुदारिणं ततोऽनन्तरं अतिततान् चतुरङ्गबलेन प्राप्तविस्तारान् आतिनः सततगमनशीलान् तुदतीति क्विप् । भानां दीप्ततारानुरूपाणां शुक्रबृहस्पत्यादीनामाभेवाभा कान्तिर्यस्येत्युपमानपूर्वपदबहुव्रीहौ उत्तरपदलोपे च भामः । अभियो भयशून्यानिभानभिभवतीति क्विप् । अभीभाभिभूस्तादृशी या भा तेजस्तस्या भूराश्रयः । आर जगाम । अरिः शत्रुः । बलभद्र इत्यर्थः । अरीणां रीः संचरणम् । 'रीङ् गतौ' इति धात्वनुसारात् । तस्या ईरो धूननं राति ददाति अरीररः ॥

त्रिव्यञ्जनं यथा—

'देवानां नन्दनो देवो नोदनो वेदनिन्दिनाम् ।
दिवं दुदाव नादेन दाने दानवनन्दिनः ॥ २६० ॥'

देवः सृष्टिस्थितिसंहारक्रीडारतः, दानवनन्दी हिरण्यकशिपुस्तस्य दानेऽवखण्डने यो नादो वक्षःकपाटपाटनकटकटाशब्दस्तेन दिवं स्वर्गं दुदाव किमेतदित्याकस्मिकसंभ्रमेणेत्युपतापयामास । जगत्कण्टकनिराकरणाद्देवानां नन्दन आनन्दकृत् । वेदनिन्दिनां च नोदनः प्रतिक्षेपकः । सामान्याभिप्रायेणैकवचनम् ॥

द्विव्यञ्जनं यथा—

'भूरिभिर्भारिभिर्भीराभूभारैरभिरेभिरे ।
भेरीरेभिभिरभ्राभैरभीरुभिरिभैरिभाः ॥ २६१ ॥'

भूरिभिर्बहुभिर्भारिभिः प्रकृतिसारभारवाहिभिरतिप्रमाणकायतया भुवो भारभूतैरन्तःकांस्यभाजनो निःस्वानो भेरी तद्वद्रेभिभिः । 'रेभृ शब्दे' इति धात्वनुसारात् । अभ्राभैः प्रथमोन्नतमेघकान्तिभिरिभैर्हस्तिभिर्भिय रान्ति प्रयच्छन्तीति भीरा इभाः प्रतिद्विपा अभिरेभिरे अभियुक्ताः ॥

एकव्यञ्जनं यथा—

'न नोननुन्नो नुन्नेनो नाना नानानना ननु ।
नुन्नोऽनुन्नो ननुन्नेनो नानेना नुन्ननुन्ननुत् ॥ २६२ ॥'

ननु नानानना विविधाकारवदना गणा ऊनेन हीनेन नुन्नो जितो ना न न पुरुषः । तथा नुन्न इनः प्रभुर्यस्य सोऽप्यात्मनि जीवति नाना पुरुषोऽपुरुष एव । यतो ननुन्नेनेऽजितप्रभुर्नुन्नोऽप्यनुन्न एव । तथा नुन्ननुन्नः जित इव क्लीबतया पराभूत इति । 'प्रकारे गुणवचनस्य' इति द्विरुक्तिः । तमपि यो नुदति स नानेना न निष्पापः बन्धच्छायार्पकान्यवर्णगुरुत्वोन्मेषमात्रप्रयोजकस्तकारो न वृत्तिशरीरान्तर्गत इति द्विव्यञ्जनता नाशङ्कनीया ॥

क्रमस्थसर्वव्यञ्जनं यथा—

'कः खगौघाङचिच्छौजा झाञ्ज्ञोऽटौठीडडण्ढणः ।
तथोदधीन्पफर्बाभीर्मयोऽरिल्वाशिषां सहः ॥ २६३ ॥'

**क्रमस्थेति** । वर्णसमाम्नाये येन क्रमेण कादयो मावसानाः पठितास्तेन क्रमेण व्यञ्जननिवेशः । कः खगौघस्तत्तत्प्रसिद्धावदानपक्षिसमूहस्तमश्नतीति क्विनि संयोगान्तलोपे कृते च खगौघाङिति रूपम् । चितं संविदं छ्यति छिनत्तीति चिच्छं यदोजस्तन्नास्ति यस्यासावचिच्छौजाः । 'झमु अदने' अस्मात् क्विप् । 'अनुनासिकस्य क्विझलोः ६।४।१६' इत्युपधादीर्घः । 'मो नो धातोः ८।२।६४' इति नकार इति झान् परबलभक्षको ज्ञः पण्डितः । 'स्तो श्चुना श्चुः ८।४।४०' इति नकारस्य ञकारः । अटाः सङ्ग्रामाङ्गणपर्यटनशीलाः सुभटास्तानोठते बाधत इति क्विप् । 'उठ गतौ' इति धातो रूपम् । तेषामीडीश्वरः । अडण्ढणोऽचपलः । डण्ढण इत्यव्युत्पन्नं चपलवाचि प्रातिपदिकम् । तथा अभीर्भयरहितः एवंविधः को नामायमुदधीन् पफर्ब पूरयामासेति प्रश्नः । उत्तरम्—अरीन् लुनन्ति या आशिषस्तासां सहः क्षमो मयो दैत्यराज इति ॥

छन्दोक्षरव्यञ्जनं यथा—

'सरत्सुरारातिभयाय जाग्रतो जलत्यलं स्तोतृजनस्य जायताम् ।
स्मितं सरारेर्गिरिजास्यनीरजे समेतनेत्रत्रितयस्य भूतये ॥२६४॥'

**छन्दोक्षरेति** । 'म्यरस्तजभ्नगा लान्ताश्छन्दोविचितिवेदिभिः । दशैव वर्णा निर्णीताश्छन्दोरूपप्रसिद्धये ॥' तन्मात्रव्यञ्जननिबद्धछन्दोक्षरव्यञ्जनम् । सुबोधमुदाहरणम् ॥

षड्जादिस्वरव्यञ्जनं यथा—

'सा ममारिधमनी निधानिनी सामधाम धनिधामसाधिनी।
मानिनी सगरिमापपापपा सापगा समसमागमासमा॥ २६५॥'

**षड्जादीति।** 'सरिगामपधानिश्च वर्णाः सप्त स्वरादयः। षड्जादिकृतसंकेता दृष्टा गान्धर्ववेदिभिः॥' तन्मात्रव्यञ्जनमयं षड्जादिव्यञ्जनम्। सह एन विष्णुना वर्तते इति सा लक्ष्मीः। अरीन् धमति तापयति इति धमतेर्ल्युटि बहुलवचनमन्यत्रापीति धमादेशः। एवंविधा मम भूयादिति शेषः। निधानिनी पद्मादिनिधानवती। साम्नः सान्त्वस्य धाम गृहम्। धनिनां धामसाधिनी तेजःप्रसाधिका। मानिनी पूजावती। सगरिमा गौरववती। अपपापान्निष्कलुषान् पातीत्यपपापपा। सेति प्रसिद्धविभवा आपगा नदी। समः तत्तुल्यः क्षणविगमी भङ्गुरः समागमो यस्याः सा तथा। असमा अनुपमा॥

मुरजाक्षरव्यञ्जनं यथा—

'खरगरकालितकण्ठं मथितगदं मकरकेतुमरणकरम्।
तडिदिति रुरुमुण्डहरं हरमन्तरहं दधे घोरम्॥ २६६॥'

**मुरजेति।** 'पाठाक्षराणि मुरजे लहकारौ तथदधाश्छमौ रेफः। नणकखगघडाश्चेत्थं षोडश भरतादिकथितानि॥' तन्मात्रविरचितं मुरजाक्षरव्यञ्जनम्। सुबोधमुदाहरणम्॥

चतुःस्थानचित्रेषु निष्कण्ठ्यं यथा—

'भूरिभूतिं पृथुप्रीतिमुरुमूर्तिं पुरुस्थितिम्।
विरिञ्चिं सूचिरुचिधीः शुचिभिर्नुतिभिर्धिनु॥ २६७॥'

वर्णवत्स्थानेष्वपि चतुरादिनियमेन चित्रम्। यद्यपि च 'अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा। जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च' इति, तथापि जिह्वामूलीयस्य स्वरत्वादुरस्यनासिक्ययोः काव्यप्रवेशाभावादुरोनासिकाजिह्वामूलपर्युदासेन स्थानपञ्चके चतुरादिनिरूपणम्। हे सूचिरुचिधीः शुचिभिः शुद्धाभिर्नुतिभिः स्तुतिभिर्यथोक्तविशेषणं विरिञ्चिं ब्रह्माणं धिनु प्रीणयेति। अकुहविसर्जनीयाः कण्ठ्याः॥

निस्तालव्यं यथा—

'स्फुरत्कुण्डलरत्नौघमघवद्धनुकर्बुरः ।
मेघनादोऽथ सङ्ग्रामे प्रावृट्कालवदाबभौ ॥ २६८ ॥'

कुण्डलरत्नौघ एव मघवतो धनुस्तेन कर्बुरो मेघनादनामा राक्षसः । इचुयशास्तालव्याः ॥

निर्दन्त्यं यथा—

'पाप्मापहारी रणकर्मशौण्डश्चण्डीशमिश्रो मम चक्रपाणिः ।
भूयाच्छ्रियापश्रमयेक्ष्यमाणो मोक्षाय मुख्यामरपूगपूज्यः ॥ २६९॥'

चण्डीशमिश्रः परमेश्वरेणैकशरीरतामापन्नः । मुख्यामरा ब्रह्मादयः । लृतुलसा दन्त्याः ॥

निरोष्ठ्यं यथा—

'नयनानन्दजनने नक्षत्रगणशालिनि ।
अघने गगने दृष्टिरङ्गने दीयतां सकृत् ॥ २७० ॥'

**अघन इति** । शरत्कालशोभया दृश्यतमे । उपूपध्मानीया ओष्ठ्याः ॥

निर्मूर्धन्यं यथा—

'शलभा इव धावन्तः सायकास्तस्य भूभुजः ।
निपेतुः सायकच्छिन्नास्तेन संयुगसीमनि ॥ २७१ ॥'

तेन कपिलेन राज्ञा । तस्य कोसलाधिपस्य प्रसेनजितः । ऋटुरषा मूर्धन्याः ॥

त्रिस्थानचित्रेषु निरोष्ठ्यदन्त्यं यथा—

'जीयाज्जगज्ज्येष्ठगरिष्ठचारश्चक्रार्चिषा कृष्णकडारकायः ।
हरिर्हिरण्याक्षशरीरहारी खगेशगः श्रीश्रयणीयशय्यः ॥ २७२ ॥'

**निरोष्ठ्यदन्त्यमिति** । अनेनैव द्विकान्तरपरिहारेण लोष्टप्रस्तावो गवेषणीयः । तथोत्तरत्रापि ॥

निरोष्ठ्यमूर्धन्यं यथा—

'अलिनीलालकलतं कं न हन्ति घनस्तनि।
आननं नलिनच्छायं नयनं शशिकान्ति ते ॥ २७३ ॥'

द्विस्थानचित्रेषु दन्त्यकण्ठ्यं यथा—

'अनङ्गलङ्घनालग्नानातङ्का सदङ्गना।
सदानघ सदानन्द नताङ्गीसङ्गसंगत ॥ २७४ ॥'

सदानघ अनवद्य सदैव प्रियालाभेनानन्दयुक्त। नताङ्ग्याः कस्याश्चिदन्यस्याः सङ्गे संगत, तव शोभनाङ्गना कामाक्रमणप्राप्तनानारूपतया वर्तते। अतस्तामनुकम्पस्वेति सोपालम्भप्रार्थनावाक्यार्थः॥

एकस्थानचित्रेषु कण्ठ्यं यथा—

'अगा गां गाङ्गकाकाङ्गगाहकाघककाकहा।
अहाहाङ्गखगाङ्कागगकङ्कागखगाङ्कग ॥ २७५ ॥'

गाङ्गकं गङ्गासंबन्धि जलं तस्याकः कुटिला गतिः। 'अक अग कुटिलायां गतौ' इति। तस्याङ्कस्य तन्मध्यस्य गाहको विलोलकः। कुत्सितमघं पापमघकं स एव काकस्तं हतवानघककाकहा। अन्ये तु विसर्गान्तं पठन्ति। तदा जहातेर्विधिरूपम्। एवंविधस्त्वं गां स्वर्गं अगाः याया इति आशंसायां भूतप्रत्ययः। कीदृशः सन्। हानं हाः न हा अहास्ताञ्जिहीते प्राप्नोतीति अहाहं तादृशमङ्गं यस्य स खगो गरुडः सूर्यो वा सोऽङ्कश्चिह्नभूतो यस्य तादृशोऽगोऽर्थान्मेरुस्तद्वर्तिनः कङ्काख्या अगखगा वृक्षनिवासिनः पक्षिणस्तेऽपि आकाङ्क्षा गमनस्पृहयालवो यस्य स तथा। आस्तां तावदन्ये, पतत्रिभिरप्यभिनन्दितगमन इत्यर्थः॥

स्वरचित्रेषु ह्रस्वैकस्वरं यथा—

'उरगुं द्युगुरुं युत्सु चुक्रुशुस्तुष्टुवुः पुरु।
लुलुभुः पुपुषुर्मुत्सु मुमुहुर्नु मुहुर्मुहुः ॥ २७६ ॥'

स्वरचित्रेष्वेकादिक्रमेणोपन्यासो ग्रन्थवैचित्र्यार्थः। उरुगुं विस्तीर्णवाचम्। द्युगुरुं स्वर्वासिनामाचार्यम्। युत्सु युद्धार्थम्। 'निमित्तात्कर्मयोगे' इति सप्तमी। गीर्वाणभटाश्चुक्रुशुरार्ताः शरणं ययाचिरे। अत एव पुरु बहुधा तुष्टुवुः। युद्धप्रयोजन-

माह—मुत्सु हर्षेषु लुलुभुः । पुपुषुः पुष्टा बभूवुः । नु वितर्के । मुहुर्मुहुर्वारंवारं किं मुमुहुर्मोहमासादितवन्तः । अतः क्षोभनादीनामव्यवस्थेति भावः ॥

दीर्घैकस्वरं यथा—

'वैधैरैनरैशैरैन्द्रैरैजैरैलैर्जैनैः सैद्धैः ।
मैत्रैनैकैर्धैर्यैर्वैरैदैः स्वैः स्वैरैर्दैवस्तैस्तैः ॥ २७७ ॥'

विधिर्विरिञ्चिः, ई लक्ष्मीस्तस्या इनः प्रभुर्विष्णुः, ईशो महादेवः, इन्द्रो वासवः, ईजः कामो लक्ष्मीपुत्रत्वात्, इला पृथ्वी, जिनो बुद्धः, सिद्धा देवविशेषाः, मित्रः सूर्यः, रैदो धनदः कुबेरः, देवा उक्तव्यतिरिक्ता मरुदादयः, एषां संबन्धिभिर्धैर्यैर्धृतिभिः स्वैर्वित्तैश्च नैकैरनेकविधैस्तैस्तैः प्रसिद्धरूपैरहं स्वैरैः सुष्ठु आसमन्तात्समृद्धो भवानीत्याशंसा । वै वाक्यालंकारे ॥

ह्रस्वद्विस्वरं यथा—

'क्षितिस्थितिमितिक्षिप्तिविधिवित्रिधिसिद्धिलिट् ।
मम त्र्यक्ष नमद्दक्ष हर स्मरहर स्मर ॥ २७८ ॥'

क्षितिः पृथ्वी तस्याः स्थितिः पालनं मितिर्मानं क्षिप्तिः संहारस्तद्विधिं वेत्ति । निधिसिद्धी लेढीति क्विप् । नमन् भग्नतेजा दक्षो यस्मात् । स्मरहर कामदहन, त्र्यक्ष त्रिनयन, हर महादेव, मम स्मर । अधीगर्थयोगे कर्मणि षष्ठी ॥

दीर्घद्विस्वरं यथा—

'श्रीदीप्ती ह्रीकीर्ती धीनीती गीःप्रीती ।
एधेते द्वे द्वे ते ये नेमे देवेशे ॥ २७९ ॥'

श्रीदीप्ती लक्ष्मीतेजसी । ह्रीकीर्ती लज्जायशसी । धीनीती बुद्धिनयौ । गीःप्रीती वाक्प्रमोदौ । इमे ये देवेशेऽपि न स्तस्ते द्वे तव एधेते वर्धेते ॥

त्रिस्वरेषु ह्रस्वत्रिस्वरं यथा—

'क्षितिविजितिस्थितिविहितिव्रतरतयः परगतयः ।
उरु रुरुधुर्गुरु दुधुवुः स्वमरिकुलं युधि कुरवः ॥ २८० ॥'

क्षितेर्विजितिः विजयः, स्थितेर्वर्णाश्रममर्यादालक्षणाया विहितिर्विधानं तदेव व्रतं

तत्र रतिर्येषाम्। परा श्रेष्ठा गतिर्ज्ञानं येषां ते तथा। एवंविधाः कुरवः खद्विषो कुल्मुरु विस्तीर्णं रुरुधुः। तदेव गुरु महत् दुधुवुः कम्पयामासुः॥

चतुःस्वरेषु दीर्घस्वरं यथा—

'आम्नायानामाहान्त्या वाग्गीतीरीतीः प्रीतीभीतीः।
भोगो रोगो मोहो मोदो ध्येये वेच्छेत्क्षेमे देशे॥ २८१॥'

आम्नायानां वेदानामन्त्या वागुपनिषत् सा हिताहितप्रतिपादनपरा किमाह। या गीतयस्ता ईतय उपसर्गाः। याः प्रीतयस्ता भीतयो भयानि। यो भोगः स रोगः। यो मोदो हर्षः स मोहः। न परमेवमाह। किंतु यावद्ध्येये ध्यातव्ये क्षेमे क्लेशरहिते देशे विषये मोक्षलक्षणे इच्छेदिच्छां कुर्यादिति। वाशब्दः समुच्चये। अन्ये चकारमेव पठन्ति॥

प्रतिव्यञ्जनविन्यस्तस्वरं यथा—

'तापेनोग्रोऽस्तु देहे नो हेये विल्लोभिनिन्दिना।
जायाग्रे हि गुणिप्रेष्ठे हितोऽक्षेपोऽमृतोक्षिणि॥ २८२॥'

हेये हातव्ये वस्तुनि यो विल्लभः। 'विद्लृ लाभे' इति धात्वनुसारात्। तत्र ये लोभिनो लोभवन्तस्तन्निन्दनशीलेन तापेन तेजसार्थादुग्रश्चण्डरश्मिः स नः मम देहेऽस्तु। तेजस्वी भवानीति यावत्। किमित्येवमाशास्यत इत्यत आह—अमृतस्यन्दिनि कान्ताग्रे गुणिनां प्रियतमेऽक्षेपोऽविलम्ब एव हितोऽर्थनः समरस्य। 'इति दत्त्वाशिषं कोऽपि स्वस्मै कार्मुककर्मणे। जगाम समरं कर्तुमरिलक्ष्मीस्वयंवरम्॥'

तदेवापास्तसमस्तस्वरं यथा—

'तपन ग्रस्तदहन हयवल्लभनन्दन।
जयग्रह गणप्रष्ठ हतक्षप मतक्षण॥ २८३॥'

ग्रस्तदहन अभिभूतपावक। हयवल्लभो रेवन्तः स तनयो यस्य। हतक्षप अपहतरात्र। मतक्षण संमतोत्सव॥

आकारचित्रेष्वष्टदलं यथा—

'याश्रिता पावनतया यातनच्छिदनीचया।
याचनीया धिया मायायामायासं स्तुता श्रिया॥ २८४॥'

अत्र—

कर्णिकायां न्यसेदेकं द्वे द्वे दिक्षु विदिक्षु च ।
प्रवेशनिर्गमौ दिक्षु कुर्यादष्टदलाम्बुजे ॥ २८५ ॥

या श्रितेत्यादिकमुदाहरणं प्रागेव (प० १ श्लो० १७०) व्याख्यातम् । अतः परं हारिहरिव्याख्या । साप्यत्रैव लिख्यते । तद्यथा—या देवी पवित्रत्वेनाश्रिता अनीचया तुङ्गया बुद्ध्या मायायामस्याविद्याविस्तारस्यायासं ग्लानिं विच्छेदं याचनीया प्रार्थनीया यतो यातनं नरकानुभवनीयं दुःखं छिनत्ति श्रियापि स्तुतेति ॥ अस्य न्यासमाह—**कर्णिकायामिति** । आद्यो यावर्णः कर्णिकायां श्रितेति पावेति क्रमेण द्विकं द्विकमष्टपत्रेषु । याश्रिता श्रियेत्यादौ दिग्दलेषु प्रवेशनिर्गमौ ॥

द्वितीयमष्टदलं यथा—

'चरस्फारवरक्षार वरकार गरज्वर ।
चलस्फाल वलक्षालवल कालगल ज्वल ॥ २८६ ॥'

अष्टधा कर्णिकावर्णः पत्रेष्वष्टौ तथापरे ।
तेषां संधिषु चाप्यष्टावष्टपत्रसरोरुहे ॥ २८७ ॥

**चरस्फारेत्यादि** । संचरणशीलः स्फारो यो वरस्तं क्षरति ददाति इति । वराञ्छ्रेष्ठान् किरति क्षिपति कृणोति हिनस्ति वेति कर्मण्यण् । गरः कालकूटस्तस्य ज्वरो ज्वरणात् । ताण्डवारम्भे चलाः स्फाला यस्य । वलक्ष धवलदेह, अलवल प्राप्तशक्ते, कालगल नीलकण्ठ, ज्वल दीप्यमानो भव ॥ न्यासमाह—**अष्टधेति** । अथ प्रथमार्धे एक एव रेफोऽष्टधा कर्णिकायाम् । अपरार्धस्यान्येऽष्टौ लकारवर्जं दलेषु तेषां संधिष्वन्येऽष्टौ लकाराः ॥

तृतीयमष्टपत्रं यथा—

'न शशीशनवे भावे नमत्काम नतव्रत ।
नमामि माननमनं ननु त्वानुनयन्नयम् ॥ २८८ ॥'

अत्र—

प्राक्कर्णिकां पुनः पर्णं पर्णाग्रं पर्णकर्णिके ।
प्रतिपर्णं व्रजेद्धीमानिह त्वष्टदलाम्बुजे ॥ २८९ ॥

**एवं चतुष्पत्र-षोडशपत्रे अपि द्रष्टव्ये ॥**

**न शशीशेत्यादि**। शशीशे चन्द्रे नवे भावे भक्तौ। स्थित इति शेषः। त्वामहं न नमामि। काका नमाम्येव। नमन् भग्नः कामो यस्मात्। नतमुपनतं व्रतं यस्य संयमिधौरेयत्वात्। माननमनं शत्रूणामुन्नतिनाशनम्। नन्विति पूजासंबोधने। त्वा इति त्वाम्। अनुनयन् विनयं कुर्वाणोऽयम्॥ न्यासमाह—**प्राक्कर्णिकामिति**। पूर्वं कर्णिकायामाद्यो नकारो ग्राह्यः, ततः शेति पर्णमध्ये, शीति पर्णाग्रे, परावृत्य पर्णकर्णिकयोः शकारनकारौ, पुनः कर्णिकातो दलाग्रगमागमेऽपि। अयमेव क्रमश्चतुर्दलपद्मे॥

तयोश्चतुष्पत्रं यथा—

'सासवा त्वा सुमनसा सा नता पीवरोरसा।
सारधामैति सहसा साहसर्ध सुवाससा॥ २९०॥'
कर्णिकातो नयेदूर्ध्वं पत्राकाराक्षरावलीम्।
प्रवेशयेत्कर्णिकायां पद्ममेतच्चतुर्दलम्॥ २९१॥

**सासवेत्यादि**। सासवा आस्वादितमदिरा। पीवरेण स्तनाढ्येनोरसा नता सारधामा उत्कृष्टकान्तिः सहसा सहास्या अकस्माद्वा शृङ्गारोद्दीपनस्वभावेन मार्गशीर्षेण हेतुना शोभनेन वाससा च लक्षिता हे साहसर्ध सर्वनिशीथाभिसरण साहसरसिक, त्वामेति उपगच्छतीति॥ न्यासमाह—**कर्णिकेति**। सुबोधमेतदिति॥

षोडशपत्रं यथा—

'नमस्ते महिमप्रेम नमस्यामतिमद्दम।
क्षामसोम नमत्काम धामभीम समक्षम॥ २९२॥'
गोमूत्रिकाक्रमेण स्युर्वर्णाः सर्वे समाः समाः।
मध्ये मवर्णविन्यासात्पद्मोऽयं षोडशच्छदः॥ २९३॥

षोडशपत्रमाह—**नमस्त इत्यादि**। महिमनि प्रेमा यस्य तत्। नमस्य अमतिमतो दाम्यतीति अमतिमद्दम। क्षामः कलामात्रेण चूडासंगतः सोमो यस्य। नमन् भग्नः कामो यस्मात्। धाम्ना तेजसा भीम भयानक। समा सकलव्युत्थानहेतुसाधारणी क्षमा यस्य। यस्यैतानि संबोधनविशेषणानि ते तुभ्यं नमस्कुरुते

कश्चिदिति ॥ न्यासमाह—**गोमूत्रिकेति** । वर्णा मकारव्यतिरिक्ताः समाः मकारसहिताः । समाः समा इति वीप्सा प्रतिवर्णं मकारसाहित्यबोधनार्था ॥

अष्टपत्रमेव कविनामाङ्कं यथा—

'रातावद्याधिराज्या विसररसविद्व्याजवाक्क्ष्मापकारा
राका पक्ष्माभशेषा नयननयनस्वा (सा) खया स्तव्यमारा ।
रामा व्यस्तस्थिरत्वा तुहिननहितुः श्रीः करक्षारधारा
राधा रक्षास्तु मह्यं शिवममवशिव्यालविद्यावतारा ॥ २९४ ॥'

निविष्टाष्टदलन्यासमिदं पादार्धभक्तिभिः ।
अस्पृष्टकर्णिकं कोणैः कविनामाङ्कमम्बुजम् ॥ २९५ ॥

तत्राङ्कः—'राजशेखरकमल' । एतेन चक्रमपि व्याख्यातम् ॥

अष्टपत्रमेव कविनामाङ्कमाह—**रातावद्येति** । 'गीर्वाणसुभटः कश्चिद्युयुत्सुर्दैत्यसेनया । तत्कालकृतसांनिध्यां मायादेवीमपूजयत् ॥' तथाहि—व्याजो माया सैव वाग्रूपा व्याजशब्दोपपदं वागभिधानं यस्याः सा मह्यं रक्षास्त्विति संबन्धः । रातं दत्तमवद्यं दोषबहुलमाधिराज्यम्, अवद्या आधयो यत्र तादृशं वा राज्यं यया । विशिष्टं सरणं विसरस्तं राति प्रयच्छति यो रसोऽर्थाद्वीरस्तं वेत्ति विन्दति वा । या क्ष्मायां पृथिव्यामपकारः पुत्रकलत्रादिरूपो यस्याः सकाशादिति गमकत्वाद्बहुव्रीहिः । राका पूर्णिमा, द्वादशवर्षदेशीयकन्यारूपा वा । पक्ष्माभः शरीरसंलग्नः शेषः सर्पः । यस्या नयनं नीतिस्तान्नयतीति यन्नयनं दृष्टिः । ज्ञानमिति यावत् । तदेव स्वमात्मा यस्याः । खे व्योम्नि यातीति खया । स्तव्यो मारो मारणं कामो वा यस्याः । सा रामा रमणीया स्त्रीरूपा वा । व्यस्तं विनाशितं स्थिरत्वं यया । तुहिनं नयति प्रापयतीति नयतेर्डप्रत्यये तुहिननश्चन्द्रस्तस्य नहितुर्जटाजूटे बन्धयितुः परमेश्वरस्य श्रीः शक्तिरूपा । नह्यति बध्नातीति नहेर्विचि नहं स्तुतिमासादयतीति । 'सर्वप्रातिपदिकेभ्यः क्विब्वक्तव्यः' इति क्विपि तृजन्तस्य रूपम् । कं सुखं राति ददातीति करस्तस्य क्षारभूता दस्यवस्तेषां खड्गादिधारेव धारा छेत्री । राधेति देव्याः पौराणिकं नाम । ममेत्यव्ययं भावप्रधानम् । शिवे ममत्वं मान्ति परिच्छिन्दन्ति ये वशिनो योगिनस्तेषामपि व्यालविद्यां क्षुद्रविद्यामवतारयति या सा तथा ॥ न्यासमाह—**निविष्टेति** । अष्टभिः पादार्धैरष्टदलविरचना । यद्वर्णाष्टकं नाम्नो-

त्तिष्ठति तदाह—'राजशेखरकमल' । कविकाव्यनामलाभादविभक्तिकत्वमप्यदोषः । **एतेनेति** । नामाङ्कपद्मकथनेन चक्रमपि नामाङ्कमवसेयम् ॥

चक्रं यथा—

'स त्वं मानविशिष्टमाजिरभसादालम्ब्य भव्यः पुरो
लब्धाघक्षयशुद्धिरुद्धरतरश्रीवत्सभूमिर्मुदा ।
मुक्त्वा काममपास्तभीः परमृगव्याधः स नादं हरे-
रेकौघैः समकालमभ्रमुदयी रोपैस्तदातस्तरे ॥ २९६ ॥'

पुरः पुरो लिखेत्पादानत्र त्रीन्षडरीकृतान् ।
तुर्यं तु भ्रमयेन्नेमौ नामाङ्कश्चक्रसंविधिः ॥ २९७ ॥

अत्राङ्कः—'माघकाव्यमिदं शिशुपालवधः' ॥

**स त्वमित्यादि** । हरेर्नादं सिंहनादं रोपैर्बाणैराजिरभसात्सङ्ग्रामहर्षादुद्धरतरश्रीवत्सभूमिरुन्नतहृदयः स त्वमालम्ब्य मानेन तद्विशिष्टमिति विशेषणम् । प्राप्तपापविनाशो मुदा हर्षेण अपगतभीः शत्रुर्हरिणव्याधोऽभ्रमाकाशं पिदधे तदा तस्मिन्काले सिंहनादमुक्त्वेति संबन्धः ॥ न्यासमाह—**पुर इति** । पुरः पुरो लिखित्वान्यानग्रे लिखेद्यथा षडराः संपद्यन्ते ॥

एवं चतुरङ्कमपि यथा—

'शुद्धं बद्धसुरास्थिसारविषम त्वं रुग्जयातिस्थिर
भ्रष्टोद्धर्मरजःपदं गवि गवाक्षीणेन चञ्चद्भ्रुवा ।
तथ्यं चिन्तितगुप्तिरस्तविधिदिग्भेदं न चक्रं शुचा-
चारोऽप्रांशुरदभ्रमुग्र तनु मे रम्यो भवानीरुचा ॥ २९८ ॥'

अत्राङ्कः—'शुभ्रतरवाचा बद्धचितिचक्रं राजगुरुणेदं सादरमवादि' ॥

यथा वा—**शुद्धमित्यादि** । चक्रं मे मम गवि वाचि शुद्धमकलुषम्, धर्मादुत्क्रान्तमुद्धर्ममीदृशं यद्रजो राजसभावस्तस्य पदं स्थानं तद्भ्रष्टं विनष्टं यस्मात् । अस्ता विधिदिग्दैवपारतन्त्र्यं यत्र तथाविधं, शुचा शोकेन च न वक्रीकृतमनपहृतमदभ्रमुपचितं यद्भद्रं कल्याणं तत्तनु विस्तारयेति प्रार्थना । बद्धैरलंकारीकृतैः सुराणां ब्रह्मादीनां सारं शिरस्तदस्थिभिर्बद्धमुण्डमालाभिर्भयानक । रुजां रोगाणां जयेनाति-

स्थिर । अक्षीणेनोपचितेन चञ्चद्भवा साक्षादेन गवा वृषेण लक्षित । तथ्यमिति क्रियाविशेषणम् । चिन्तिता गुप्तिर्भूतानां रक्षा येन । चारो रमणीयः । उग्रो महादेवः । त्वमप्रांशुः सर्वस्मादुच्चैःपदे स्थितः । भवानीरुचा वामार्धस्थितपार्वतीकान्त्या रम्यस्तन्विति संबन्धः ॥ अत्र पूर्ववदेव न्यासः । अङ्कास्तु चत्वार इति विशेषः ॥

गतिचित्रेषु गतप्रत्यागतं यथा—

'वारणागगभीरा सा साराभीगगणारवा ।
कारितारिवधा सेना नासेधावरितारिका ॥ २९९ ॥'

अत्रायुक्पादयोर्गतिः, युक्पादयोः प्रत्यागतिः ॥

इदानीं गतिचित्रप्रस्तावः—**वारणेत्यादि** । वारणा एव अगाः पर्वतास्तैर्गभीरा दुरवगाह्या । सारा श्रेष्ठा । भियं येन यान्ति तादृशानां गणानामारवो यत्र । सारो वा भीगगणारवो यत्र । कारितः कृतोऽरीणां वधो यया । स्वार्थे णिच् । आसेधः परैः प्रतिषेधस्तेन हीना । वरिताः सुभटैर्युद्धार्थमाहूता अरयो यस्यां सा तथा । 'वर ईप्सायाम्' इति धातोः क्तप्रत्यये वरितेति रूपसिद्धिः । अत्रायुक्पादयोः प्रथम-तृतीययोरानुलोम्येन वर्णावलीं गृहीत्वा तत्प्रतिलोमरूपौ युक्पादौ द्वितीयचतुर्थौ गृह्येते । पठितेर्वर्णाद्वर्णान्तरसंचारो गतिस्तन्नियमनेन चित्रं गतिचित्रं स चात्र यथोक्तरूप एव ॥

तदक्षरगतं यथा—

'निशितासिरतोऽभीको न्येजतेऽमरणा रुचा ।
चारुणा रमते जन्ये को भीतो रसिताशिनि ॥ २०० ॥'

अत्र गतप्रत्यागताभ्यां स एव श्लोकः ॥

हे अमरणा मरणरहिताः, निशितखड्गरतो भयशून्यश्च रुचा तेजसा न्येजते न कम्पते । यो हि भीतः स कथं शब्दायमानाशनशीलरक्षःपिशाचादिसंकुले जन्ये सङ्ग्रामे चारुणा करितुरगादिना रमते । न कथंचिदित्यर्थः । अत्र संदर्भसमाप्तिपर्यन्तं या वर्णमाला गृहीता सैव समाप्तेरारभ्य प्रत्यागत्या यावदारम्भं समाप्यत इति पूर्वं त्वर्धेनैवमिति ॥

श्लोकान्तरं यथा—

'वाहनाजनि मानासे साराजावनमा ततः ।
मत्तसारगराजेभे भारीहावज्जनध्वनि ॥ २०१ ॥'

अत्र प्रातिलोम्येनापरः श्लोको भवति। यथा—

'निध्वनज्जवहारीभा भेजे रागरसात्तमः।
ततमानवजारासा सेना मानिजनाहवा॥ ३०२॥'

**वाहनेति**। ततोऽनन्तरं वाहना सेनाऽनमा नतिशून्याजनि जाता। साराजावुत्कृष्टसङ्ग्रामे मानासे परमानक्षेपके मत्ताः सारगाः सोत्कर्षगतिशालिनो राजेभा राजदन्तिनो यत्र। भारिणः स्वामिनार्पितसमरभराः अत एव यथोचितचेष्टावन्तस्तेषां जनानां ध्वनिः सिंहनादो यत्रेति क्रियाविशेषणमित्यनुलोमश्लोकार्थः। निध्वनन्तः स्तनन्तो जवेन वेगेन हारिण इभा यत्र। ततो विस्तीर्णो मानवजारासः सैनिककृत आरावः कोलाहलो यत्र। मानिजनानां साहंकाराणां वीराणामाहवो द्वन्द्वयुद्धं यत्र। ईदृशी सेना रागरसात्परलक्ष्मीहरणरसेन तमो भेजे क्रोधमवापेति प्रतिलोमश्लोकार्थः॥

भाषान्तरगतं यथा—

'इह रे बहला लसे बाला राहुमलीमसा।
सालका रसलीला सा तुङ्गालालि कलारत॥ ३०३॥'

अत्र प्रातिलोम्येनापरः प्राकृतश्लोको भवति। यथा—

'तरला कलिला गातुं सालाली सरकालसा।
सामली महुरालावा सेलाला हव रेहइ॥ ३०४॥'

**इह रे इत्यादि**। लसे नृत्ये बहला असंकुचिता राहुमलीमसा श्यामा सालका भ्रूकर्णादिपरभागार्पकचूर्णकुन्तलवती रसाच्छृङ्गाराल्लीला यस्याः सा, तथा तुङ्गा उच्चव्यवहारा एवंविधा सा बाला हे चतुःषष्टिकलारत, अलालि लालिता त्वयेति संस्कृतश्लोकार्थः। कला गीतवाद्यनृत्यानां संकरीकरणसहिता पटीयसी गातुं तरला त्वरिता सालाली नानावृक्षपङ्क्तिस्तदीयेन सरकेण मधुना अलसा। श्यामा मधुरालापा सेला उत्तमा नारी। 'सेला स्यादुत्तमा नारी' इति देशीकोशे। सह इरया मदिरया वर्तन्ते सेला वा। रलयोरेकत्वस्मरणादिति केचित्, तच्चिन्त्यम्। अला भूषयित्री। हव धवेति संबोधनम्। रेहइ राजते। प्राकृतश्लोकार्थः। एवं भाषान्तराणामपि गतप्रत्यागती बोद्धव्ये॥

तदर्थानुगतं यथा—

'विदिते दिवि केऽनीके तं यान्तं निजिताजिनि ।
विगदं गवि रोद्धारो योद्धा यो नतिमेति न ॥ ३०५ ॥'

अत्र प्रातिलोम्येन स एव पदार्थः ॥

**विदित इत्यादि** । विदिते स्वर्वासिनामपि प्रसिद्धे निजिताः परेषामाजयो युद्धानि येन तादृश्यनीके समरे प्राप्तं गवि पराह्वानरूपायां वाचि विगदं हृदयज्वररहितं के नाम भटा योद्धारः । न केऽपि सन्तीत्यर्थः । तं कम् । यो योद्धा सन्कथमपि नतिं नम्रतां नैति न याति । अत्र तदर्थक एव प्रतिलोमश्लोकः । स यथा—'नतिमेति न योद्धा यो रोद्धारो विगदं गवि । निजिताजिनितं यातङ्कनीके विदिते दिवि' ॥

तुरङ्गपदं यथा—

'बाला सुकालबाला का कान्तिलालकलालिता ।
सखा सुतवती सारा दर्पिका व्रतगर्धित ॥ ३०६ ॥'
क्रमात्पादचतुष्केऽस्य पङ्क्तिशः परिलेखिते ।
तुरङ्गपदयातेन श्लोकोऽन्य उपजायते ॥ ३०७ ॥

यथा—

'बाला ललिततीव्रस्वा सुकला रागतर्पिका ।
सुदन्तिका वर्धितावासा काला तललासका ॥ ३०८ ॥'

**बालेत्यादि** । बाला षोडशवर्षदेशीया शोभनकृष्णकेशी कान्तिप्रदचूर्णकुन्तलशोभिता सखा आत्मसंपद्युक्ता सुतवती पुत्रयुक्ता उत्कृष्टाभिमानात्मकरत्नाकरवती अभिलषितस्वविवाहादिव्रताकाङ्क्षा अतस्त्वं भजस्वेति । हृदये इति शेषः ॥ न्यासमाह—**क्रमादिति** । ललितो मनोज्ञस्तीव्रः प्रवीणः स्व आत्मा यस्याः । रागेण प्रेम्णा तर्पयति या । शोभनदन्तयुक्ता । वर्धितावासा संपूर्णीकृतसकलस्थाना । कालो मृषाव्याहारस्तेन सह वर्तते या । तले लासका नर्तका यस्याः सा तथाभूता । अधःकृतसकलनर्तकलोकेत्यर्थः । एवंभूता सा बाला त्वयोपभुक्तेति वाक्यार्थः ॥

आहुरर्धभ्रमं नाम श्लोकार्धभ्रमणं यदि।
तदिदं सर्वतोभद्रं सर्वतो भ्रमणं यदि॥ ११०॥

तयोरर्धभ्रमं यथा—

'ससत्वरतिदे नित्यं सदरामर्षनाशिनि।
त्वराधिककसन्नादे रमकत्वमकर्षति॥ ३०९॥'

**ससत्वेति**। सदराः सभयाः। त्वराधिकानां कसन्नितस्ततः संचरन्नादो यत्र। अत एव वीरान्प्रति रमकत्वमकर्षति॥

सर्वतोभद्रं यथा—

'देवाकानिनि कावादे वाहिकास्वस्वकाहि वा।
काकारेभभरेऽकाका निस्वभव्यव्यभस्वनि॥ ३१०॥'

'कनी दीप्तौ'। देवानाकनितुं शीलं यस्य। कावाद ईषद्वादो यत्र। कस्य मस्तकस्य सन्ना संगता आदा ग्रहणं यत्रेति वा। वाहिका पर्यायवहनम्। 'पर्यायार्हणोत्पत्तिषु' इति ण्वुच्। सैव स्वं वित्तभूता येषामेवंविधा ये स्वका आत्मपक्षीयास्तानाजिहीते इति विच्। कं मदजलमाकिरति इति काकारस्तादृश इभभरो हास्तिकं यत्र। हेऽकाकाः सात्त्विका इति संबोधनम्। काकाः सङ्ग्रामलोलुभा वा। क्वचित्कर्तर्यपि घञ्। निःस्वा निरात्मानो भव्या आधेयगुणास्तानपि व्ययन्ति स्वबलेनोपबृंहयन्ति ये ते निस्वभव्यव्यास्तेषां भस्वनि भर्त्सनशीले। 'भस भर्त्सने' इत्यतः क्वनिप्॥

बन्धचित्रेषु द्विचतुष्कचक्रबन्धो यथा—

'जयदेव नरेन्द्रादे लम्बोदर विनायक।
जगदेधन चन्द्राभालङ्घिदन्तविभायते॥ ३११॥'

इह शिखरसंधिमालां बिभृयादर्धं समाश्रितैर्वर्णैः।
द्विचतुष्कचक्रबन्धे नेमिविधौ चापरं भ्रमयेत्॥ ३१२॥

**जयद इत्यादि**। नता इन्द्रादयो यस्मै स तथा। जगतामेधन वर्धन। चन्द्राभालङ्घिनी चन्द्रकान्तिविजयिनी दन्तप्रभाणामायतिर्यस्य स तथा॥ न्यासमाह—**इहेति**। शिखरमालां संधिमालां च पूर्वार्धवर्णैः क्रमेण बिभृयात्पूरयेत्। नेमिविधौ चापरमुत्तरार्धं भ्रमयेत्॥

द्विशृङ्गाटकबन्धो यथा—

'करासञ्ज वशेशं खगौरव स्य कलारसम् ।
संधाय वलयां शङ्कामगौरीं मे वनात्मक ॥ २१३ ॥'

शृङ्गाद्ग्रन्थि पुनः शृङ्गं ग्रन्थिं शृङ्गं व्रजेदिति ।
द्विशृङ्गाटकबन्धेऽस्मिन्नेमिः शेषाक्षरैर्भवेत् ॥ २१४ ॥

अत्राङ्कः—'राजशेखरस्य' ॥

द्वे शृङ्गाटके मिथो वैपरीत्येन यत्र शिखरं द्विशृङ्गाटकम् । करैः किरणैरासञ्जयतीति करासञ्जः । खे व्योम्नि गौरवं यस्य स तथा । वनात्मक जलस्वरूप । चन्द्रकलासु रसमनुरागं संधाय कृत्वा अन्तःस्वच्छतया दृश्यनभोभागनेमिमद्वलयाकारोल्लेखिनीं मे ममागौरीं श्यामां शङ्कामपनय । स्य इति क्रियापदम् । पूर्णो भवेति यावत् । वशेशमायत्तशंकरमिति क्रियाविशेषणम् ॥ न्यासमाह—**शृङ्गादिति । शेषाक्षरैरिति** । आद्यात्ककारादारभ्य यावत्समाप्ति शेषाण्यक्षराणि तैर्नेमिरिति न्यासः । अत्र ग्रन्थिवर्णैरेव 'राजशेखरस्य' इति नामाङ्कवर्णावली लभ्यते ॥

विविडितबन्धो यथा—

'सा सती जयतादत्र सरन्ती यमितात्रसा ।
सारं परं स च जयी शमितास्यन्दनेनसा ॥ २१५ ॥'

शिखरादन्यतरस्मात्प्रतिपर्व भ्रमति रेखयाद्यर्धम् ।
नेमौ तदितरमर्धं विविडितचक्राभिधे बन्धे ॥ २१६ ॥

विविडितबन्धस्तु पञ्चशृङ्गचक्रम् । तद्देवताम्नाये दर्शितम् । 'कर्पूरकुन्दगौरीं तनुमत्तनुं कार्मुकभ्रूकाम् । वरदानसुन्दरकरां विविडितचक्रस्थितां वन्दे ॥' **सेति** । प्रसिद्धानुभावा सती गौरी सरन्ती निरर्गलप्रसरा न त्रस्यतीत्यत्रसा । अस्यन्दनेन स्थिरेण एनसा कल्मषेण शमिता विक्लवीभूता । रहितेति यावत् । 'शम वैक्लव्ये' । अत्र जगति परं सारं यं भगवन्तमिता संगता । स च जयी महेश्वरो जयतादिति ॥ न्यासमाह—**शिखरादिति** । 'अन्यतमाद्वा' इति पाठः । 'अन्यतमस्मात्' इति पाठे तु सर्वनामत्वं चिन्त्यम् । केचित्तु 'किंयत्तदेकान्येभ्यः' इति पठित्वा डतम-

द्वारिकां सर्वनामतामाहुः। गणे चान्यतरशब्दं न पठन्ति। अव्युत्पत्तिमात्रं चेदम्। अनिर्धारितैकाभिधायकस्त्वन्यतमशब्दः॥

शरयन्त्रबन्धो यथा—

'नमस्ते जगतां गात्र सदानवकुलक्षय।
समस्तेऽज सतां नात्र मुदामवन लक्षय॥ ३१७॥'
चतुर्ष्वपि च पादेषु पङ्क्तिशो लिखितेष्विह।
आदेरादेस्तु रङ्गस्य पादैः पादः समाप्यते॥ ३१८॥'

**नमस्त इत्यादि**। जगतां नामरूपप्रपञ्चस्य गात्रभूत दानवकुलक्षयेण सहित मुदां हर्षाणां रक्षक अज विष्णो, अत्र जगति सतां मध्ये न कोऽपि ते तव समः। ततो लक्षय दृक्पातेनानुगृहाण। मामिति शेषः॥ न्यासमाह—**चतुर्ष्वपीति**। शेषं सुबोधम्॥

व्योमबन्धो यथा—

'कमलावलिहारिविकासविशेषवहं जनकाङ्क
न नगामिकरं दिवि सारमनारमणं जरतां न।
तमसां बलहानिविलासवशेन वरं जनकान्त
न नमामि चिरं सवितारमनादिमहं जगतां न॥३१९॥'

**अष्टादशशिखरचरीं गोमूत्रिकया चतुष्पदीं पश्येत्।**
**यत्राद्यन्तैर्दृष्टां स ज्ञेयो व्योमबन्ध इति॥ १११॥**

कमलावलिषु पद्मखण्डेषु प्रशस्तेषु हारी मनोज्ञो यो विकास[विशेष]स्तस्य वोढारं जनैर्लोकैः स्तुत्यं तदीयं कं शिरस्तत्राङ्क चिह्नभूत, न नगामिकरं, किंतु विसृत्वरकिरणमेव दिवि वैमानिकपथे सारभूतं जरतां परिणतानामनारमणं न, किंतु प्रीतिकरमेव। तमसां बलहानौ यो विलासवशः संततो व्यापारस्तेन वरमुत्कृष्टं, जनकान्त लोकहृदयंगम, जगतामनादिं न, किंत्वादिमेव। एवंविधं भगवन्तं सवितारमहं न नमामि किंतु नमाम्येव॥ न्यासमाह—**अष्टादशेति**। **आद्यन्तैर्दृष्टामिति**। पादाद्यन्तवर्णयोरैक्यादिति बोध्यम्॥

मुरजबन्धो यथा—

'सा सेना गमनारम्भे रसेनासीदनारता ।
तारनादजना मत्तधीरनागमनामया ॥ ३२० ॥'

**अत्र पादचतुष्केऽपि क्रमशः परिलेखिते ।**
**श्लोकपादक्रमेण स्याद्रेखासु मुरजत्रयी ॥ ११२ ॥**

अनारता अविच्छिन्नप्रहरणव्यापारा आसीत् । मत्तधीरनागमिति क्रियाविशेषणम् । रसेन वीरेण । महाप्राणशब्दजना ॥ अत्र न्यासमाह—**अत्र पादेति** । अत्र पुटचतुष्ककल्पनया मुरजत्रयोन्मेषः ॥

एकाक्षरमुरजबन्धो यथा—

'सुरानन त्वां न न हाननष्टये पुनः स्तुवेऽनर्घघनप्लवाननम् ।
मनस्यनूनव्यसनप्रधूननं सकाननस्थाननदीननर्दनम् ॥ ३२१ ॥'

**श्लोकस्यैतस्य पादेषु लिखितेषु चतुर्ष्वपि ।**
**त्रिमृदङ्गकरीह स्याच्चतुरेकाक्षरावली ॥ ११३ ॥**

सुराणां देवानामाननं मुखं तद्भूत वह्ने । हाननष्टये हानिनाशाय त्वां न न स्तुवे, किंतु स्तौम्येव । पुनरिति देवतान्तरव्यावृत्तौ स्तुत्यावृत्तौ वा । अनर्घ्यं घनौघप्राणने यस्मात् । 'अन प्राणने' इति धात्वनुसारात् । प्रणतानां मनसि यदनूनमनादिभवपरम्परानुपाति व्यसनं तस्य प्रधूननं प्रतिक्षेपकम् । सकाननेषु वनगहनेषु स्थानेषु नदीनस्य पयोराशेरिव नर्दनं कोलाहलो यस्येति ॥ न्यासमाह—**श्लोकस्यैतस्येति** । प्रथमपादस्थादक्षरादारभ्य चतुर्थपादस्थमक्षरं यावदेकजातीयाक्षरचतुष्कावलीं गृहीत्वा परावृत्य तज्जातीयानामेव चतुष्टयी गृह्यते । तेनैकमुरजोन्मुद्रणमपरत्राप्यनेनैव प्रकारेणात्रोदाहरणे एकाक्षरमुरजत्रयी भवतीति न्यासार्थः ॥

मुरजप्रस्तारो यथा—

'तालसारप्रभा राका तारकापतिदंशिता ।
मारधाम रमाधीता वलयामास सागरम् ॥ ३२२ ॥'

**क्रमेणैवास्य पादेषु प्रस्तृतेषु चतुर्ष्वपि ।**
**तुर्यान्मुरजमार्गेण श्लोकोऽयमुपजायते ॥ ११४ ॥**

'वरकारप्रदं धीरं तारधामाऽसमासिका।
सा लतामालयाऽमाऽप ताराभाऽतिरसागता ॥ ३२३ ॥'

तालतरोर्यत्सारं खाद्यभागस्तत्प्रभेवावदाता प्रभा यस्याः। राका पूर्णिमा। तारकापतिना चन्द्रेण दंशिता कवलिता। मारस्य कामस्य धाम स्थानं यत्र। रमया लक्ष्म्या अधीताभ्यस्ता। सलक्ष्मीकेत्यर्थः। वलयामास चालितवती, बलवन्तं वा चकार। 'विन्मतोर्लुक्' इत्यनुशासनात् ॥—**क्रमेणैवेति**। तुर्याच्च पादप्रथमाक्षरादुपक्रमे येन येन मार्गेण मुरजाकृतिर्लभ्यते तेनायमपरः श्लोको भवति ॥ वरस्य ईप्सितस्य वस्तुनः कारः कारणं तत्प्रदं तारं दीप्तं धाम कान्तिर्यस्याः। असमा अनन्यसाधारणी आसिका स्थितिर्यस्याः सा नायिका लतामालया संकेतलतामण्डपेन अमा सार्धं आप प्राप्तवती। तारा रोहिणीप्रभृतिस्तदाभा, तारैर्निर्मलमौक्तिकैर्वा भाति या। अतिशयितेन रसेन पूर्णा उपगता संगता। प्रकृतोदाहरणेऽष्टाक्षरप्रस्तावान्तःपाती यः प्रकारस्तदन्तःपाती मुरजाक्षरैर्लभ्यते ॥

उदाहरणमात्रं चैतत्, तेन गतिविचित्रादिगोमूत्रिकादयोऽन्येऽपि चित्रप्रकारा भवन्ति।

**गतिरुच्चावचा यत्र मार्गे मूत्रस्य गोरिव।**
**गोमूत्रिकेति तत्प्राहुर्दुष्करं चित्रवेदिनः ॥ ११५ ॥**

तेषु पादगोमूत्रिका यथा—

'काङ्क्षन्पुलोमतनयास्तनपीडितानि
वक्षःस्थलोत्थितरयाञ्चनपीडितानि।
पायादपायभयतो नमुचिप्रहारी
मायामपास्य भवतोऽम्बुमुचां प्रसारी ॥ ३२४ ॥'

सेयमयुग्मतः पादगोमूत्रिका ॥

ननु यावदुदाहृतमेव किं गत्यादि चित्रं, तथा सति किं गोमूत्रिकादीनां पृथग्भागविभागव्याघातः स्यादित्यत आह—**उदाहरणमात्रं चैतदिति**। गतिः पठितिसंचारो वर्णानामुच्चावचं वोर्ध्वाधःपर्यायेण प्रवृत्ता। मायां संसारबन्धमपास्य दुःखभयात्पायादिति संबन्धः ॥ न्यासो यथा—अयुग्मतः प्रथमात्तृतीया-

चोपक्रम्य द्वितीयचतुर्थपादसंदंशेन गोमूत्रिकया प्रथमद्वितीययोस्तृतीयचतुर्थयोश्च परस्परमुन्मेषणमितीयमयुक्पादगोमूत्रिका ॥

युग्मतो यथा—

'देवः शशाङ्कशकलाभरणः पिनाकी
देयः शमैकविकलेभरणः सनागः ।
चित्ते महासुरजनेन शुभं विधत्तां
चित्तं महासुरजनानतभङ्गधन्वा ॥ ३२५ ॥'

महासुरजनेन ब्रह्मादिना चित्ते देयो धारणीयः । शमेनैकेन विकलीकृत इभरणो गजानामुरुयुद्धं येन । शुभं कल्मषरहितं चित्तं विधत्ताम्, अविशेषेण संसारिणामेव । अत्र पूर्ववत्समपदमुपक्रम्य विषमपादसंदंशेन समाप्तिरिति विशेषस्तेनेयं युक्पादगोमूत्रिका ॥

अर्धश्लोकगोमूत्रिका यथा—

'चूडाप्रोतेन्दुभागद्युतिदलिततमस्कन्दलीचक्रवालो
देवो देयादुदारं शममरजनतानन्दनोऽनन्यधामा ।
क्रीडाधूतेशभामा द्युसदनतनिमच्छेदनी च भ्रुवा नो
देहे देवी दुरीरन्दममरतनता नन्दिनोमान्यधामा ॥ ३२६ ॥'

इन्दोर्भागः खण्डं । शं कल्याणं । अमरजनता देवसमूहः । नास्त्यन्यद्धाम स्थानं यस्य सोऽनन्यधामा । स्वात्माराम इत्यर्थः । न परं देवो देवी च । भ्रुवा भ्रूक्षेपेण दुरीरन्दूरमपनयन् नोऽस्माकं देहे दमं देयादिति संबन्धः । धूतेशभामा प्रणयेनापहृतपरमेश्वरप्रणयरोषा । 'भाम क्रोधे' इति धात्वनुसारात् । द्युसदना देवाः । अरतमविश्रान्तं नन्दिना नता उमा गौरी । अपूर्वं धाम तेजो यस्याः ॥

श्लोकगोमूत्रिकायां प्रथमश्लोको यथा—

'पायाद्वश्चन्द्रधारी सकलसुरशिरोलीढपादारविन्दो
देव्या रुद्धाङ्गभागः पुरदनुजदवस्त्यानसंविन्निदानम् ।
कंदर्पः क्षोदपक्षः सरससुरवधूमण्डलीगीतगर्वो
दैत्याधीशान्धकेनानतचरणनखः शंकरो भव्यभाव्यः ॥ ३२७ ॥'

द्वितीयो यथा—

देयान्नश्चण्डधामा सलिलहरकरो रूढकन्दारविन्दो
देहे रुग्भङ्गरागः सुरमनुजदमं त्यागसंपन्निधानम् ।
भन्दं दिक्क्षोभदश्रीः सदसदरवधूखण्डनागीरगम्यो-
ऽदैत्यैधी बन्धहानावततरसनयः शंपरो दिव्यसेव्यः ॥३२८॥'

पुराख्यदानवस्य दवो दावाग्निः स्त्यानायाः घनायाः संविदो निदानम् । दैत्याधीशेनान्धकेनानतश्चरणः । भव्यानामुत्तमानां भाव्यो ध्येयः । रूढकन्दान्यरविन्दानि यस्मात् । प्रणतानां रुगनुरागो यस्य । सुराणां मनुजानां च दमं दमतीति वा । त्यागसंपदो निधानमाश्रयः । दिशां क्षोभदायिका श्रीर्यस्य । सदे उपवने सदरा सभया या वधूस्तदीयानां खण्डनागिरां निर्भर्त्सनवचसामविषयः । अदैत्यैधी न दैत्यवर्धनः । संसारबन्धविच्छित्तये विस्तीर्णरयो नयो यस्य । शं सुखं पिपर्ति पूरयतीति शंपरो दिव्यः सेव्यश्चेति । एवंविधश्चण्डधामा रविर्नोऽस्माकं देहे भन्दं कल्याणं देयादित्यर्थः ॥

विपरीतगोमूत्रिकायां प्रथमश्लोको यथा—

'विनायकं दानसुगन्धिवक्त्रं स्मिताननं मन्दचरं कथासु ।
नमामि विघ्नावलिहारिसारं सतीसुतं शंकरवल्लभं च ॥३२९॥'

विपरीतश्लोको यथा—

'चलल्लतारब्धशमं सुभासं संसारहारं बहुविप्रमान्यम् ।
सुधाकरं चन्द्रमसं नतोऽस्मि सवर्णगर्भं नवकम्बुनाढ्यम् ॥३३०॥'

मन्दचरं मन्दालसगमनम् । कथासु भक्तदेवानां वार्तासु महाशयतया स्मेराननम् । विघ्नपरम्पराहारिणां च सारमुत्कृष्टम् । चलन्तीनां लतानामारब्धं सान्त्वनं येन । बहुविप्रमान्यं द्विजराजशेखरत्वात् । समानवर्णमध्यगम् । नवेन कम्बुनाढ्यमुपचितम् । आद्यश्लोकस्याधस्ताद्विपरीतो द्वितीयश्लोको लेख्यः । ततः क्रमगोमूत्रिकया परस्परोल्लेखः ॥

भिन्नच्छन्दोगोमूत्रिकायां प्रथमश्लोको यथा—

'नमत चन्द्रकलामयमण्डनं नगसुताभुजसंगतकन्धरम् ।
हरमभाग्यरदं स्तवसादरं समितिरावणशासनविक्रमम् ॥३३१॥'

द्वितीयश्लोको यथा—

'कामदं चण्डकर्म्रं मदामर्दिनो नागदन्ताज्यजय्यं गदाकर्बुरम् ।
धीरशोभाभरव्यस्तकंसासुरं नौमि नारायणस्यासमं विभ्रमम् ॥२३२॥'

अभाग्यस्य रदं विलेखकम् । नाशकमिति यावत् । समितौ संग्रामे रावणस्य कैलासोद्धरणभग्नशक्तिकताशासनविक्रमावाज्ञापौरुषे येन तम् । वाञ्छितप्रदम् । चण्डमुग्रं कर्म्रं कमनीयं च । परेषां दर्पमर्दनशीलस्य नागस्य कालियाख्यस्य दंष्ट्राभिः, कुवलयापीडाख्यस्य हस्तिनो वा विषाणाभ्यां या आजिः सङ्ग्रामः तत्राजय्यं जेतुमशक्यम् । गदया नानारत्नखचितया कर्बुरम् । चित्रमिति यावत् ॥

संस्कृतप्राकृतगोमूत्रिकायां संस्कृतश्लोको यथा—

'स्कन्दो रुन्दर्द्धिमिष्टां वितरतु सरलो दारितारातिवर्गे
सस्पन्दो मन्दसज्जो भवभयकलने सङ्करे केलिकारी ।
संदोहोल्लाघलासी जन इह बलिहा चण्डताभूरखर्वो
देवौजोराजदेहे महिमनि निरतो विक्रमाडम्बरेण ॥२३३॥'

स्कन्दः कार्त्तिकेयः । रुन्दां विपुलाम् । दारिते शत्रुसमूहे सस्पन्दः स्फुरद्रूपो मन्दः स्वस्थचित्तः भवभयस्य संसारत्रासस्य कलने क्षेपणे इहजने मर्त्यलोके संदोहेन य उल्लाघः सामर्थ्यं नीरोगत्वात्तेन लसनशीलः । बलिनां हन्ता । चण्डतायास्तैक्ष्ण्यस्य भूराश्रयः । अखर्वः सर्वेषामुपरि वर्तमानः । देवौजसां राज्ञां खण्डयित्री ईहा चेष्टा यत्र तादृशे महिम्नि निरतः ॥

प्राकृतश्लोको यथा—

'चन्दो कन्दप्पमित्तं विहरणसहलो हारितारापबन्धो
सच्छन्दो वन्दणिज्जो कुवलयदलनो सङ्करे मेलिकारी ।
कन्दोदोल्लासलासी जअइ सिवसिहामण्डनीभूदखण्डो
देन्ताजोण्हाजलोहो विहिअणिअरई विब्भमाणं बलेण २३४'

[चन्द्रः कन्दर्पमित्रं विहरणसफलो हारिताराप्रबन्धः
स्वच्छन्दो वन्दनीयः कुवलयदलनः शंकरे मेलिकारी ।

कन्दोदोल्लासलासी जयति शिवशिखामण्डनीभूतखण्डो
दत्तज्योत्स्नाजलौघो विहितनिजरतिर्विभ्रमाणां बलेन ॥]

विहरणे संचरणे सफलः । उद्भूतः शुभाशुभसूचकत्वात् । मेलिकारी संगमकारी, चूडामणित्वात् । ऐक्यकारी वा, तन्मूर्तित्वात् । कन्दोदं कुमुदमिहाभिमतं तद्विकासेन लसनशीलः । ज्योत्स्नाजलौघान्ददत् । विभ्रमाणां बलेन विहिता निजे आत्मनि रतिर्येन स तथा ॥

समसंस्कृतेन पादगोमूत्रिका यथा—

'बाला विलासावलिहारिहासा लोलामला भावसहा सहावा ।
देहं हरन्ती सहसा सुरामा गेहं चरन्ती सहसाभिरामा ॥ ३३५॥'

विलासावलिषु हारी हासो विकासो यस्याः । लोला चला । अमला निर्मला । भावाननेकविधान्या सहते सा भावसहा । हावः क्रीडाविशेषः ॥

अर्धगोमूत्रिकाप्रस्तारो यथा—

'नमो दिवसपूराय सुतामरसभासिने ।
नतभव्यारिदाराय सुसारलयभाविने ॥ ३३६ ॥'

दिवसान्पूरयतीति दिवसपूरः तस्मै । सुष्ठु तामरसेषु भासनशीलाय । नता भव्या यस्मै । अरीन्दारयतीत्यरिदारः । ततः कर्मधारयः । नतानां भव्यानामरिदार इति वा, नता भव्या अरिदारा यस्मिन्निति वा । सुष्ठु सारो लयस्तत्र लयनं तं भावयति यस्तस्मै ॥

अत्र गोमूत्रिकाश्लोकोऽयमुत्तिष्ठति ।

'नतदिव्यासदाराय सुसामलसभासिने ।
नमो भवारिपूराय सुताररयभाविने ॥ ३३७ ॥'

नता दिव्या देवा यस्मै । असदविद्यमानमरि चक्रं यस्य । ततः कर्मधारयः । शोभनानां साम्नां लसनेन भासनशीलाय । भानि नक्षत्राण्यावरितुं शीलं यस्येति भवारि आकाशं पूरयति व्याप्नोति एवंभूताय । सुष्ठु तार-उच्छ्रितो यो रयो वेगो गमनं तेन भाविने ॥

गोमूत्रिकाधेनुर्यथा—

'मम स्फुरतु चिद्गतः सततचिन्त्यरक्षामतिः
समस्तरविचित्रितस्तुतरुचिः स्मरक्षेमकृत् ।
समर्द्धिरतचिन्तितः कृतविचित्ररत्यामयो
नमस्करणचिह्नितस्मितरुचिर्हरः सामरः ॥ ३३८ ॥'

**चतुर्णामपि पादानां क्रमेण व्युत्क्रमेण च ।**
**इयं गोमूत्रिकाधेनुर्वैपरीत्यवशेन च ॥ ११६ ॥**

**मम स्फुरत्विति** । मम चिद्गतो मदीयां संविदमारूढः सामरः सदेवो हरः स्फुरतु । सततं चिन्तनीये रक्षामती वा यस्य । समस्तैर्द्वादशभिरपि रविभिरादित्यैश्चित्रिता आलेख्यीकृता स्तुता प्रशस्ता रुचिः कान्तिर्यस्य । स्मरस्य क्षेमं कुशलं कृन्तति छिनत्तीति स्मरक्षेमकृत् । समशब्दः सर्वपर्यायो गणे पठ्यते । सर्वासु अणिमाद्यृद्धिषु रतैश्चिन्तितः प्रसभं ध्यातः । पतिवियोगाद्विचित्राया रतेरामयाः कृता येन । नमस्कारेण चिह्निता प्रणामपृच्छाभाविनी प्रसादजन्मा स्मितप्रभा यस्य स तथा ॥ अस्या न्यासमाह—**चतुर्णामिति** । क्रमेण पादानां नैरन्तर्येण प्रथमद्वितीयाभ्यां द्वितीयतृतीयाभ्यां प्रथमचतुर्थाभ्यां द्वितीयचतुर्थाभ्यामिति व्युत्क्रमभेदास्त्रयो वैपरीत्यवशेन चतुर्थादितः प्रथमं यावद्योजनेनात्रापि क्रमव्युत्क्रमाभ्यां षट् प्रकाराः । तेऽमी द्वादश भेदाः शुद्धाः । एषां व्यतिकरजन्मानः पुनरन्ये चतुर्विंशतिर्भवन्ति । तद्यथा—प्रथमतृतीयाभ्यां च प्रथमद्वितीयाभ्यां च प्रथमचतुर्थाभ्यां च द्वितीयतृतीयाभ्यां च प्रथमचतुर्थाभ्यां च तृतीयचतुर्थाभ्यां च प्रथमतृतीयाभ्यां चेति द्रष्टव्यम् । तदेवमेक एव गोमूत्रिकाश्लोको यथोक्तरीत्या षट्त्रिंशद्गोमूत्रिकातर्णकान्प्रसूत इतीयं गोमूत्रिकाधेनुः ॥

शतधेनुर्यथा—

'वन्द्या देवी पर्वतपुत्री नित्यं मधुमधुरकमलवदना पुरन्ध्र्यधिदेवता
दैवैः स्तुत्या किन्नरगेया भक्त्या वरचरितमहिषमथनी जगत्त्रयनायिका ।
सिद्धैर्ध्येया केसरियाना काम्या रणचतुररसिकहृदया त्रिलोचनवल्लभा
धीरैः पूज्या दर्पणपाणिर्नूनं गुणनिलयलटभललिता सतीषु धुरंधरा ॥'

यतिविच्छेदिनी ह्येषा श्लोकधेनुरनुत्तमा ।
छन्दोभेदाच्छतमियं प्रसूते श्लोकतर्णकान् ॥ ११७ ॥

**वन्द्येति** । वरेण देवताप्रसादेन चरितो निरर्गलप्रसरो गुणानामाश्रयो लटभं मनोज्ञं च ललितं विलासो यस्याः सा तथा । **यतिविच्छेदिनीति** । अत्र करणम्—'प्रतिलोमं विनिक्षेप्यमनुलोममधः क्षिपेत् । स्थितेनागन्तुकं हन्यादीप्सितेन विभाजयेत् ॥' स्थितं प्रतिलोममागन्तुकं क्रमविन्यस्तमीप्सितं हि प्रतिलोमस्य क्रमेण फलं गुणकारस्तथैवानुलोमं भागहारः । अनेन क्रमेणैकैकयतियोजने सप्त श्लोकाः । यतिद्विकयोजने चैकविंशतिः । यतित्रिकयोजने च पञ्चत्रिंशत् । यतिचतुष्कयोजनेऽपि तावन्त एव ।-यतिपञ्चकयोजने पुनरेकविंशतिः । षड्यतियोजने सप्त । सप्तयतियोजने त्वेकः । सर्वमेलनेन च सप्तविंशत्यधिकं शतम् । अत्र च क्रियाहीनत्वेन कारकविहीनत्वेन च पदावयववत्तया पदावयवमात्रत्वेन च निरर्थकान् षड्विंशतिमपास्य श्लोकधेनुरेकैव वृत्तभेदेन शतं श्लोकतर्णकान्प्रसूते । तथाहि । प्रथमद्वितीयचतुर्थीभिर्यतिभिरत्युक्ता जातिः । तृतीयपञ्चमीभ्यां सुप्रतिष्ठा । षष्ठ्या गायत्री । सप्तम्या चोष्णिगिति । एकगणनायां वृत्तभेदः । एवं द्विकादिगणनेऽपि गवेषणीयम् ॥

सहस्रधेनुर्यथा—

'नखमुखपाणिकण्ठचिकुरैर्गतिभिः सहसा स्मितेन ललितेषु दृशा
मणिशशिपद्मकम्बुचमराः करिणः सुतनोः सुधा च हसिता हरिणाः ।
फणिगणसिद्धसाध्यदयिता न समाः सकलास्त्वया च खभुवश्छलिताः
तव बलदर्परूपविजिता नितरां विबुधाधिराय चतुरैश्चरितैः ३४०'

पदविच्छेदिनी ह्येषा श्लोकधेनुरनुत्तमा ।
छन्दोभेदाद्दशशतं प्रसूते श्लोकतर्णकान् ॥ ११८ ॥

**नखेति** । हे ललिते गौरि, तव शोभनया दृशा सुतनोः शोभनस्य शरीरस्य । साध्या देवविशेषाः खभुवो ग्रहताराद्याः ( राप्यत इति राप्यम् । 'आमुवपिरपित्रपिचमश्च' इति रापतिभाषितमित्यर्थः । ) दयेति पाठेन वा योजनीयम् । **पदविच्छेदिनीति** । पदान्यत्र प्रतिपादं सुधाकलशाभिधाने छन्दसि षड् विभज्यन्ते । यद्यपि द्वितीयतृतीयपादयोश्चकाराभ्यां नकारेण चतुर्थपादे तवेति

पदाधिक्यं तथाप्यात्यपदार्थानुरोधेन समुच्चीयमाननिषिध्यमानार्थानुरञ्जकत्वेन संबोध्यमानार्थानुयायितया चकारनकारयोस्तवेति च तत्पादावयवरूपा एवेति तदसत्कल्पमेव । तथा च षड्भ्यः पदत्रय उपादीयमाने सप्तदशाक्षरायां जातौ यथासंख्यानुरोधेनाधेऽर्धे प्रस्ताररचनाक्रमेण दश विकल्पाः, तृतीयचतुर्थयोश्च पादयोस्तावन्तस्तावन्त एवेति दशभिराहतैर्दशभिः शतम् । शतेन चाहतैर्दशभिः सहस्रं तर्णकाः श्लोकाः समुत्पद्यन्त इतीयं सहस्रधेनुः ॥

अयुतधेनुर्यथा—

'क्रिये जयसि जृम्भसे सृजसि जायसे त्रायसे
स्तुषे मृषसि मृष्यसे हृषसि पीयसे प्रीयसे ।
स्तुषे मृषसि होडसे कुटसि गल्भसे क्लीबसे
हुषे हरसि रज्यसे रजसि राजसे भ्राजसे ॥ ३४१ ॥'

**एषा तु पदविच्छेदिन्येव धेनुः क्रियापदैः ।**
**संबोधनाग्रगैर्दृष्टास्माभिः श्लोकायुतप्रसूः ॥ ११९ ॥**

**क्रिये इति** । हे क्रिये कर्मन् । 'मिष स्पर्धायाम्', 'पीङ् पाने', 'मृड सुखने' तुदादौ, 'होड़ अनादरे', 'कुड़ संहारे', रज्यसे आसजसि । रजसि भत्सरयसि । राजसे शोभसे । भ्राजसे जाज्वल्यसे । **एषेति** । इह पृथ्वीनामनि छन्दसि षड्भ्यः संबोधनानुगे पदचतुष्टये उपादीयमाने एकादशाक्षरायां जातौ प्रस्तारात्वेन यदि वा छन्दोभेदस्य शब्देनाप्रतिपादितत्वात् तद्भेदोऽप्युदाहरणीय इति तस्यामेव रथोद्धताभिधाने छन्दसि दशसु विकल्पेषु प्रतिपादं भवत्सु दशभिः शतं शतेन सहस्रं सहस्रेण च दशसहस्राणि तर्णकाः श्लोकाः समुत्पद्यन्ते इतीयमयुतधेनुः ॥

लक्षधेनुर्यथा—

'दुर्गे भद्रेऽप्सुभद्रेऽदिति सुरभिदिते सैंहिके गौरि पद्मे
नित्ये हृद्ये वरेण्ये कलिकमलिकले कालिके चण्डि चण्डे ।
धन्ये पुण्ये शरण्ये शचि शबरि शिवे भैरवे राज्ञि सन्ध्ये
छाये माये मनोज्ञेऽवनि जननि जये मङ्गले धेहि शं नः ॥ ३४२ ॥'

संबोधनैरियं धेनुः सूता सैकक्रियापदैः।
लक्षत्रयं सहस्राणि षष्टिश्लोकान्प्रसूयते ॥ १२० ॥
एषान्त्यपदभेदेन संभ्रमादिद्विरुक्तिभिः।
यावद्बोधं पुनः सूते प्रयुतश्लोकतर्णकान् ॥ १२१ ॥

**दुर्गे इति। संबोधनैरिति।** अत्र हि स्रग्धराभिधाने छन्दसि पादत्रयपदानुरोधेनान्त्यपादद्वयेनैकैकमेव पदं तुर्यपादे परिकल्प्यमिति सर्वत्र नवसु पदेषु स्थितेषु पदचतुष्टये पदपञ्चके चोपादीयमाने प्रथमे आपातलिकायां पञ्चविंशतौ द्वितीये एकया प्राच्यवृत्त्या सह वैतालीयके यदि वा पञ्चभिः प्राच्यवृत्तिभिः समर्मौपच्छन्दसिके चतुर्विंशतौ तृतीयवैतालीय एव चतुर्विंशतौ चतुर्थे च पादे प्राच्यवृत्तिद्वये सममापातलिकायां षोडशभिरेकया प्राच्यवृत्त्या वैतालीयप्राच्यवृत्त्या सह वैतालीयैः षड्भिस्तथैवौपच्छन्दसिके द्वाभ्यामिति चतुर्विंशतौ विकल्पेषु प्रभवत्सु पञ्चविंशत्याहतेषु चतुर्विंशतौ शतानि षट्। षड्भिश्च शतैराहतेषु पञ्चविंशतौ सहस्राणि पञ्चदश। तैराहतेषु चतुर्विंशतौ लक्षाणि त्रीणि सहस्राणि च षष्टिः तर्णकाः श्लोकाः समुत्पद्यन्त इतीयं लक्षधेनुः। **एषेति**। तथा ह्यत्र पादत्रये नवसु तुर्यपादे च दशसु। त्रये पदचतुष्के पदपञ्चके चोपादीयमाने प्रथम औपच्छन्दसिक एकस्य पदस्य द्विरुक्त्या विंशतौ यदि वा आपातलिकायां दश। वैतालीये पञ्चदशसु औपच्छन्दसिके उदीच्यवृत्तिद्वयेन यद् वैतालीये चतसृभिरुदीच्यवृत्तिभिः सममेकोनविंशतिरिति च पञ्चविंशतौ तृतीयस्मिन्नौपच्छन्दसिके पञ्चभिः प्राच्यवृत्तिभिः सममेकादश। वैतालीये तथैव चतुर्दश औपच्छन्दसिके तिसृभिः प्राच्यवृत्तिभिः सह षडिति विंशतौ तृतीयस्मिन्नौपच्छन्दसिके तिसृभिरुदीच्यवृत्तिभिः समं पञ्चविंशतौ चतुर्थे त्वापातलिकायामेक एव। द्विरुक्त्यादिना षोडशभिः प्राच्यवृत्तिभिः सममशीतौ विकल्पेषु प्रभवत्सु विंशत्याहतपञ्चविंशतौ पञ्चविंशत्या द्वाविंशतौ पञ्चशताधिकानि द्वादशसहस्राणि तैरप्याहतेषु अशीतौ दशलक्षाणि तर्णकाः श्लोकाः समुत्पद्यन्त इतीयं प्रयुतधेनुः॥

कोटिधेनुर्यथा—

'स्थूलं दत्से सूक्ष्मं धत्से भुवि भवसि रभसि रमसे रमे दिवि मोदसे
छिन्त्से बाढं भिन्त्से गाढं रुषिमिषसि धनुषि मनुषे जये पुरि जृम्भसे।

स्वल्पं शेषे कल्पं मेषेऽचिति चरसि यशसि यतसे चले गुधि गल्भसे
भ्रूषे वामं श्रूषे कामं हृदि विशसि वचसि सचसे रुचे दृशि दीप्यसे ॥'

**संबोधनैर्द्वितीयान्तैः सप्तम्यन्तैः क्रियापदैः ।**
**श्लोककोटिरियं तिस्रः सार्धा धेनुः प्रसूयते ॥ १२२ ॥**
**यदा तु संभ्रमादिभ्यो भवन्त्यस्या द्विरुक्तयः ।**
**स्थूलादिना तदा चैषा दशकोटीः प्रसूयते ॥ १२३ ॥**

**स्थूलमिति** । भ्रेष इति इष गतावित्यस्य, चिति चैतन्ये, गृधु गार्ध्ये । सचसे वचसे रमे जये चले रुचे इति देव्याः संबोधनपदानि । **संबोधनैरिति** । अत्र भुजङ्गविजृम्भिते छन्दसि एकादशभ्यः पदेभ्यः पञ्चसु षट्सु च पदेषु उपादीयमानेषु जगतीजातौ प्रसिद्धाक्षरोज्ज्वला जलधरमाला नवमालिनी छन्दःसु सप्तसु । द्वितीये पूर्वेषु चन्द्रवर्त्मद्रुतविलम्बितमणिमालाप्रभवत्सु च शते तृतीयेऽस्मिन् प्रथमपादच्छन्दस्येव पञ्चाशति चतुर्थपादे द्वितीयपादच्छन्दस्येव शतेषु विकल्पेषु प्रभवत्सु सप्तत्याहतेषु शतेषु सप्ततिसहस्राणि शतैराहतासां सप्ततिलक्षाणि, सप्ततिसहस्रैराहतेषु पञ्चाशल्लक्षाणि त्रीणि सहस्राणि च पञ्चशतैराहते शते कोट्यस्तिस्रः सार्धास्तर्णकाः श्लोकाः संपद्यन्त इतीयं कोटिधेनुः । **यदा त्विति** । तथाहि पदत्रये पदचतुष्के पदपञ्चके चोपादीयमाने पूर्वस्यामेव जातौ प्रथमद्वितीयचतुर्थेषु पादेषु प्रत्येकं जलधरमालाप्रभाच्छन्दसोरेकस्य द्वयोर्द्विरुक्त्या शते तृतीयस्मिंश्च पूर्वस्यां मणिमालोज्ज्वलानवमालिनीतामरसेषु छन्दःसु तथैव शते विकल्पेषु प्रभवत्सु शतेनाहते शते दश सहस्राणि तैश्चाहते शते दश लक्षाणि तैरप्याहते शते कोट्यस्तर्णकाः श्लोकाः संपद्यन्त इतीयमेव दशकोटिधेनुः ॥

कामधेनुर्यथा—

'या गीः शीः श्रीर्धीः स्त्री ह्रीर्भीर्जूर्भूस्तूः सूः सूर्भूः पूर्भूः ।
स्रुक् स्रग्युग्भुग्रुक् शुक् तृट् द्विट् युत् कुत् चिद्भिन्मुग्दिग्घूः ॥३४४॥'
ऋक् दृक् वामा मृत्क्षामा मुक्क्षुत्कामा द्यावौ गौः
सामायामा वेधावेधानाधातेत्वं येनौः
यानं यातीति या, काचिच्च या । गिरणं गिरतीति वाक् च गीः । सरणं

शीः शृणातीति शीः । श्रयतीति शोभा लक्ष्मीश्च श्रीः । ध्यानं ध्यायतीति बुद्धिर्धीः । रुयेव स्तृणाति मन्त्राक्षरं स्त्री । ह्रीच्छतीति माया लज्जा च ह्रीः । बिभेतीति भयकामो भयं च भीः । ज्वरो गतिर्जरा च जूः । मूर्च्छा मोहसमुच्छ्राययोर्बन्धनं च मूः । त्वरा हिंसा त्वरते च तूः । सूयते सवनं सुष्ठु उश्च सूः । अग्रे भागे भारं धुरं वहतीति धूः । पूरी पालनं पूरणं च पूः । भूमिर्भवनं लोकश्च भूः । यज्ञपात्रं स्रवतीति स्रवणं स्रुक् । पुष्पमाला पङ्क्तिश्च सृज्यत इति स्रक् । योगः समाधिः समश्च युक् । भोजनं पालनं कौटिल्यं च भुक् रोगो दीप्तिर्भङ्गश्च रुक् । शोकः शुचित्वं दीप्तिश्च शुक् । अभिलाषः पिपासा । हिंसा च तृट् । द्वेषः शत्रुबलमभिलाषश्च द्विट् । शुद्धं मिश्रणममिश्रणं च युत् । क्रोधः क्रुध्यतीति रुद्रशक्तिश्च क्रुत् । चेतना चिनोति चयनं च चित् । ज्ञानं सत्ता विभवलाभश्च वित् । मोक्षो मोहो मुञ्चतीति मुक् । आशा अतिसर्ग उपदेशश्च दिक् । क्रीडा विजिगीषा व्यवहारश्च द्यूः । श्रुतिवाक्यं विवेचनं च हिंसा च ऋक् । दृष्टिर्ज्ञानं पश्यतीति दृक् । गतिर्गन्धनं विकल्पश्च वा । लक्ष्मीर्मानं शब्दावयवश्च मा । मृत्तिका मरणं मृद्नातीति मृत् । कृन्तति करोति करणं च कृत् । दीप्तिर्भानं भातीति भा । शब्दः शब्दावयवश्च प्रतिषेधश्च मा । हर्षो मोद आमोदश्च मुत् । बुभुक्षा क्षुत्क्षोदश्च क्षुत् । प्रश्नः सुखं काननं च का । अमतीत्यमा पीडार्थेऽलक्ष्मीशब्दावयवश्च अमा । द्वारं द्वाःस्थ उपायश्च द्वाः । स्वर्ग आकाशो देवनं च द्यौः । वाग्भूमिर्धेनुश्च गौः । सह एन अकारेण विष्णुना वर्तत इति सा लक्ष्मीः । मा मानं । मदो रूपं च सा । प्रतिदानं शब्दावयवश्च सर्वनाम च सा । इष्टा अयत इति शब्दावयवश्च या । चन्द्रकला महदर्थश्च मा । लक्ष्मीसंबोधनं चतुर्थ्यन्तं षष्ठ्यन्तं च मे । धारणं पोषणं शब्दावयवश्च वे । धात्री पोषयित्री शब्दावयवश्च धा । शब्दावयवोऽस्मदर्थो लक्ष्मीसंबोधनं च मे । प्रतिषेधः पुरुषवाची

शब्दावयवश्च ना ।- मिमीते मातेति शब्दावयवश्च मा । तदर्थो युष्मदर्थश्च लक्ष्मीसंबोधनं च ते । युष्मदर्थो भावप्रत्ययः शब्दावयवश्च त्वम् । शब्दावयवास्मदर्थौ च मे । जलयानं न विद्यते औद्विवचनं यस्यां सा अद्वितीयेत्यर्थः शब्दावयवश्च नौः ।

पदग्राहाद्यथाकामं कामधेनुरियं तु नः ।
परार्धानां परार्धानि प्रसूते श्लोकतर्णकान् ॥ १२४ ॥
एकाक्षरादिच्छन्दोभिर्गतिबन्धादिभेदतः ।
उक्तानुक्तानि चित्राणि सर्वाण्येषा प्रसूयते ॥ १२५ ॥
सकृदुच्चारणे चास्या गच्छत्येका विनाडिका ।
तत्षष्ट्या नाडिका ताभिः षष्ट्याहोरात्रमृच्छति ॥१२६॥
प्रणवादिनमोन्तानि पदान्यस्या जपन्ति ये ।
सर्वभाषासु वाक्तेषामविच्छिन्ना प्रवर्तते ॥ १२७ ॥
सिद्धैर्मन्त्रपदैः सेयं शास्त्राण्यालोच्य निर्मिता ।
जपतां जुह्वतां देवी सर्वान्कामान्प्रयच्छति ॥ १२८ ॥
स्थितेनागन्तुकं इत्यादीप्सितेन विभाजयेत् ।
तद्भेदास्ते भवन्त्येवमन्येष्वपि हि योजयेत् ॥ १२९ ॥
दुष्करत्वात्कठोरत्वाद्दुर्बोधत्वाद्विनावधेः ।
दिङ्मात्रं दर्शितं चित्रे शेषमूह्यं महात्मभिः ॥ १३० ॥

**या गीरिति । पदग्रहादिति ।** तथाहि पञ्चदशभ्यः पदेभ्यः क्रमव्युत्क्रमाभ्यां नवादिपदयोगेऽङ्गीक्रियमाणे बृहतीजातेरारभ्य प्रतिजातिपादे ये विकल्पास्तैरुत्तरोत्तरमाह्वन्यमानैः, यदि वा समस्तेऽपि श्लोके षष्टिपदेभ्यश्चतुर्विंशत्यष्टाविंशत्यादिपदयोजनायां गायत्रीजातेरारभ्य प्रतिजातिपादे ये विकल्पास्तैः परार्धेभ्यः परार्धानि तर्णकाः श्लोकाः समुत्पद्यन्ते इतीयं परार्धपरार्धधेनुः । **एकाक्षरेति ।** अर्थत्रयप्रतिपादकत्वेन प्रतिपादं पदत्रये परिकल्प्यमानेऽनेकविधच्छन्दोभिरुक्तानि चतुर्व्यञ्जनादीन्यनुक्तानि खड्गप्रभृतीनि सर्वचित्राण्येषैव यथाकामं प्रसूयत इत्यर्थः ॥

उक्तिप्रत्युक्तिमद्वाक्यं वाकोवाक्यं विदुर्बुधाः।
द्वयोर्वक्त्रोस्तदिच्छन्ति बहूनामपि संगमे ॥ १३१ ॥
ऋजूक्तिरथ वक्रोक्तिर्वैयात्योक्तिस्तथैव च।
गूढं प्रश्नोत्तरोक्ती च चित्रोक्तिश्चेति तद्विदा ॥१३२॥

तासु ऋजूक्तिर्द्विधा। ग्राम्योपनागरिका च। ग्राम्या यथा—

'जन्तीमणुरुन्धुं रुचु कुहुतुण्डउण्ण उको विहंसण होमि।
महोमि भारुञ्जुले मेल्लासतो विकिणकु उवाणउ उज्जु अक्खु कहहि २४५

वाणउ उज्जु माइगहिल्ल उअण्णवि
कोभल्लण उ वारिज्जन्तु णणट्ठाइ।
करइ वलिवं उउ च वकस मच्छलु
अहिमुहं हि तरुणिहिं अअच्छासइ दुक्कम् ॥२४६॥

सेयमुभयतोऽपि ऋजुनैव मार्गेणोक्तिप्रत्युक्त्योः समा प्रवृत्तिरितीयमृजूक्तिर्नाम वाकोवाक्यम् ॥

सैवोपनागरिका यथा—

'बाले, नाथ, विमुञ्च मानिनि रुषं, रोषान्मया किं कृतं,
खेदोऽस्मासु, न मेऽपराध्यति भवान् सर्वेऽपराधा मयि।
तत्किं रोदिषि गद्गदेन वचसा, कस्याग्रतो रुद्यते,
नन्वेतन्मम, का तवास्मि, दयिता, नास्मीत्यतो रुद्यते ॥२४७॥'

सेयमेकतः काक्वा कुटिलेऽतिविषमेयमृजूक्तिर्नाम वाकोवाक्यम् ॥

वक्रोक्तिर्द्विधा। निर्व्यूढा अनिर्व्यूढा च। तयोर्निर्व्यूढा यथा—

'किं गौरि मां प्रति रुषा ननु गौरहं किं
कुप्यामि कां प्रति मयीत्यनुमानतोऽहम्।

जानामि सत्यमनुमानत एव स त्व-

मित्थं गिरो गिरिभुवः कुटिला जयन्ति ॥ २४८ ॥'

सेयमावाक्यपरिसमाप्तेर्निर्वाहान्निर्व्यूढेति वक्रोक्तिर्वाकोवाक्यम् ॥

अनिर्व्यूढा यथा—

'केयं मूर्ध्न्यन्धकारे तिमिरमिह कुतः सुभ्रु कान्तेन्दुयुक्ते

कान्ताप्यत्रैव कामिन्ननु भवति मया पृष्टमेतावदेव ।

नाहं द्वन्द्वं करोमि व्यपनय शिरसस्तूर्णमेनामिदानी-

मेवं प्रोक्तो भवान्या प्रतिवचनजडः पातु वो मन्मथारिः ॥२४९॥'

सेयमनिर्वाहादनिर्व्यूढेति वक्रोक्तिर्नाम वाकोवाक्यम् । ते इमे उभे अपि श्लेषवक्रोक्तिर्नाम वाकोवाक्यम् ॥

वैयात्योक्तिर्द्विधा । स्वाभाविकी नैमित्तिकी चेति । तयोः स्वाभाविकी यथा—

'नादेयं किमिदं जलं घटगतं नादेयमेवोच्यते

सत्यं नाम पिबामि कत्यपतृषः पीतेन नाम्नाभवन् ।

किं वर्णा अपि सन्ति नाम्नि रहितं किं तैरलं त्वं कुतो

यस्मादेव भवान्भगिन्यसि ततस्तेनैव मां बाधसे ॥२५०॥'

अत्र स्वैरिण्याः सहजाद्वैयात्यात्स्वाभाविकीयं वैयात्योक्तिर्नाम वाकोवाक्यम् ॥

नैमित्तिकी यथा—

'कुशलं राधे, सुखितोऽसि कंस कंसः क नु सा राधा ।

इति पारीप्रतिवचनैर्विलक्षहासो हरिर्जयति ॥ २५१ ॥'

अत्र गोत्रस्खलिते विपक्षनाम्नैव वैयात्येनोत्तरं दत्तमिति नैमित्तिकीयं वैयात्योक्तिर्वाकोवाक्यम् ॥

गूढोक्तिर्द्विधा। मुख्या गौणी च। तयोर्मुख्या यथा—

'केशव यमुनातीरे व्याहृतवानुषसि हंसिकां कोऽद्य।
कान्ताविरहभयातुरहृदयः प्रायः प्रियेऽहं सः॥ ३५२॥'

अत्र प्रिये हंस इत्यत्रावर्णलोपे प्रिये अहं स इत्यर्थस्य मुख्ययैव वृत्त्या गूढत्वादियं मुख्या गूढोक्तिर्नाम वाकोवाक्यम्॥

गौणी यथा—

'निरर्थकं जन्म गतं नलिन्या यया न दृष्टं तुहिनांशुबिम्बम्।
उत्पत्तिरिन्दोरपि निष्फलैव कृता विनिद्रा नलिनी न येन॥ ३५३॥'

ताविमौ पूर्वोत्तरार्धयोरन्योन्योक्त्या गूढकामलेखावितीयं गौणी गूढोक्तिर्नाम वाकोवाक्यम्॥

प्रश्नोत्तरोक्तिर्द्विधा। अविधीयमानहृद्या प्रतीयमानहृद्या च। तयोराद्या यथा—

'क्व प्रस्थितासि करभोरु घने निशीथे
प्राणेश्वरो वसति यत्र मनःप्रियो मे।
एकाकिनी वद कथं न बिभेषि बाले
नन्वस्ति पुङ्खितशरो मदनः सहायः॥ ३५४॥'

सेयं हृद्गतप्रष्टव्यस्यैव स्पष्टमभिधायैवाभिधानादभिधीयमानहृद्या नाम प्रश्नोक्तिर्वाकोवाक्यम्॥

द्वितीया यथा—

'कियन्मात्रं जलं विप्र जानुदघ्नं नराधिप।
तथापीयमवस्था ते नहि सर्वे भवादृशाः॥ ३५५॥'

सेयं शब्दविद्यावैशारद्यस्य हृद्यस्य प्रतीयमानत्वात्प्रतीयमानहृद्यप्रश्नोत्तरोक्तिर्वाकोवाक्यम्॥

चित्रोक्तिर्द्विधा । चित्रा विचित्रा च । तयोश्चित्रा यथा—

'लभ्यन्ते यदि वाञ्छितानि यमुनाभागीरथीसंगमे
देव प्रेष्यजनस्तदेष भवतो भर्तव्यतां वाञ्छति ।
नन्वेतन्मरणेन किं नु मरणं कायान्मनोविच्युति-
र्दीर्घं जीव मनस्तवाङ्घ्रिकमले कायोऽत्र नस्तिष्ठति ॥ ३५६ ॥'

तदिदं स्वकल्पितोक्तिप्रत्युक्तिभ्यां जीवतोऽपि जन्मान्तरावाप्तिसाधनेनाश्चर्यहेतुरिति चित्रा नाम चित्रोक्तिप्रत्युक्तिर्वाकोवाक्यम् ॥

द्वितीया यथा—

'कोऽयं भामिनि भूषणं कितव ते शोणः कथं कुङ्कुमा-
त्कूर्पासान्तरितः प्रिये विनिमयः पश्यापरं क्वास्ति मे ।
पश्यामीत्यभिधाय सान्द्रपुलको मृद्नन्मृडान्याः स्तनौ
हस्तेन प्रतिनिर्जितेन्दुरवताद्द्यूते हसन्वो हरः ॥ ३५७ ॥'

अत्रोक्तिप्रत्युक्त्योरनन्तरं स्तनमर्दनवैचित्र्यादिना परिसमाप्तेर्विचित्रसंज्ञमिदं वाकोवाक्यम् ॥

**प्रहेलिका सकृत्प्रश्नः सापि षोढा च्युताक्षरा ।**
**दत्ताक्षरोभयं मुष्टिर्बिन्दुमत्यर्थवत्यपि ॥ १३३ ॥**
**क्रीडागोष्ठीविनोदेषु तज्ज्ञैराकीर्णमन्त्रणे ।**
**परव्यामोहने चापि सोपयोगा प्रहेलिका ॥ १३४ ॥**

तासु च्युताक्षरा यथा—

'पयोधरभराक्रान्ता संनमन्ती पदे पदे ।
पदमेकं न क्व यातिं यदि हारेण वर्जिता ॥ ३५८ ॥'

अत्र विहङ्गिका काहारेण वर्जिता न यातीति वक्तव्ये हारेण वर्जितेत्युक्तम् । अतः का इत्यक्षरस्य च्युतत्वाच्च्युताक्षरेयम् ॥

दत्ताक्षरा यथा—

'कान्तयानुगतः कोऽयं पीनस्कन्धो मदोद्धतः ।
मृगाणां पृष्ठतो याति शम्बरो रूढयौवनः ॥ ३५९ ॥'

अत्र शबर इति शम्बर इत्यनुस्वाराक्षरस्य दत्तत्वाद्दत्ताक्षरेयम् ॥

च्युतदत्ताक्षरा यथा—

'विदग्धः सरसो रागी नितम्बोपरि संस्थितः ।
तन्वङ्ग्यालिङ्गितः कण्ठे कलं कूजति को विटः ॥३६०॥'

अत्र विट इत्यस्मिन्पदे विकारे च्युते घकारे दत्ते घटः कूजतीति द्वितीयोऽर्थो भवतीति सेयं च्युतदत्ताक्षरा ॥

अक्षरमुष्टिका यथा—

'अतिः अतिः अन्मअलं प्रीद्य रद्य जद्य फद्य ।
मेला मेला मेलं मेलं फस फस फस फस ॥ ३६१ ॥'

सेयमक्षराणां मुष्टिरित्यक्षरमुष्टिका । अत्र पादशश्चतुःपङ्क्तिलिखितचतुर्भिर्मुरजबन्धैः श्लोक उत्तिष्ठति । तद्यथा—

'अद्य मे सफला प्रीतिरद्य मे सफला रतिः ।
अद्य मे सफलं जन्म अद्य मे सफलं फलम् ॥ ३६२ ॥'

बिन्दुमती यथा—

'तवाववादः प्रत्यब्धि पताका प्रतिसञ्चरम् ।
फलं प्रत्यद्भुतोपायं यशांसि ननु न क्वचित् ॥ ३६३ ॥'

इत्यनेन श्लोकेनोक्तार्थस्य यथास्थितस्वरानुस्वारविसर्जनीयसंयोगस्य श्लोकोत्तरस्य बिन्दुभिरेव सूचनात्मम इति बिन्दुमती। तद्यथा—

'◌ु◌◌ा◌ु◌◌ा◌ा◌ा ◌ं◌ु◌े ◌ं◌ु◌े ◌◌ः।
◌ा◌◌े ◌ा◌◌े ◌ि◌ि◌ः ◌◌र्◌ ◌◌ ◌ी◌र्◌ः॥'

निर्भेदः।

उदधावुदधावाज्ञा संयुगे संयुगे जयः।
साहसे साहसे सिद्धिः सर्वत्र तव कीर्तयः॥ ३६४॥

अर्थप्रहेलिका यथा—

'उत्तप्तकाञ्चनाभासं संदष्टदशनच्छदम्।
सरसं चुम्ब्यते हृष्टैर्वृद्धैरपि किमुज्ज्वलम्॥ ३६५॥'

सेयमपि सूचितस्यैव पक्वाम्रफलमित्यस्य व्यर्थपदप्रयोगेणावगतेरर्थप्रहेलिका॥

**क्रियाकारकसंबन्धे पदाभिप्रायवस्तुभिः।**
**गोपितैः षड्विधं प्राहुर्गूढं गूढार्थवेदिनः॥ १३५॥**

तेषु क्रियागुप्तं यथा—

'स्तनजघनभराभिराममन्दं गमनमिदं मदिरारुणेक्षणायाः।
कथमिव सहसा विलोकयन्तो मदनशरज्वरजर्जरा युवानः॥ ३६६॥'

अत्र जघनभराभिराममन्दं मदिरेक्षणाया गमनमवलोकयन्तो हे युवानः, कथमिव यूयं मदनशरज्वरजर्जरा न स्थेति क्रियापदस्य स्तनशब्देन जघनसांनिध्याद्गोपितेन क्रियागूढमिदम्॥

कारकगुप्तं यथा—

'पिबतस्ते शरावेण वारि कह्लारशीतलम्।
केनेमौ दुर्विदग्धेन हृदये विनिवेशितौ॥ ३६७॥'

अत्र शराविति कर्मकारकस्य गूढत्वात्कारकगूढमिदम्॥

संबन्धगूढं यथा—

'न मयागोरसाभिज्ञं चेतः कस्मात्प्रकुप्यसि।
अस्थानरुदितैरेभिरलमालोहितेक्षणे ॥ ३६८ ॥'

अत्र न मे आगोरसाभिज्ञं चेत इति संबन्धिपदस्य मयेति तृतीयाभ्रान्त्या गोपितत्वादिदं संबन्धगूढम् ॥

पादगूढं यथा—

'द्युवियद्गामिनी तारसंरावविहतश्रुतिः।
हैमीषु माला शुशुभे (विद्युतामिव संहतिः) ॥ ३६९ ॥'

अत्र पूर्वार्धस्थितैर्द्वितीयप्रथमसप्तमपञ्चमैकादशनवमत्रयोदशषोडशाक्षरैश्चतुर्थपादो गूढ उत्थाप्यः। यथा—'विद्युतामिव संहतिः' इति। इदं पादगूढम् ॥

अभिप्रायगूढं यथा—

'जइ देअरेण भणिआ खग्गं घेत्तूण राउलं वच्च।
ता किं सेवअवहुए हसिऊण वलोइअं सअणम् ॥ ३७० ॥'

[यदि देवरेण भणिता खड्गं गृहीत्वा राजकुलं व्रज।
तत्किं सेवकवध्वा हसित्वावलोकितं शयनम् ॥]

अत्र निरीक्षितमनेनात्र पुरुषायितलक्ष्म पादलाक्षादिकं, तेन नियुङ्क्ते मां न कर्मणीत्यभिप्रायेण वध्वाः शयनावलोकनमित्यभिप्रायगूढम् ॥

वस्तुगूढं यथा—

'पानीयं पातुमिच्छामि त्वत्तः कमललोचने।
यदि दास्यसि नेच्छामि नो दास्यसि पिबाम्यहम् ॥ ३७१ ॥'

अत्र दास्यसीति दासीलक्षणस्य वस्तुनो गूढत्वादिदं वस्तुगूढम् ॥

**यस्तु पर्यनुयोगस्य निर्भेदः क्रियते पदैः।
विदग्धगोष्ठ्यां वाक्यैर्वा तं हि प्रश्नोत्तरं विदुः ॥१३६॥**

**अन्तःप्रश्नबहिःप्रश्नबहिरन्तःसमाह्वयैः ।**
**जातिपृष्टोत्तराभिख्यैः प्रश्नैस्तदपि षड्विधम् ॥ १३७ ॥**

तेष्वन्तःप्रश्नं यथा—

'काहमस्मि गुहा वक्ति प्रश्नेऽमुष्मिन्किमुत्तरम् ।
कथमुक्तं न जानासि कदर्थयसि यत्सखे ॥ ३७२ ॥'

अत्र 'कदर्थयसि' इति पदं कथमुक्तं रेफयकारयुक्तं दर्थयसीति, अतो वाक्यान्तरे प्रश्नोत्तरस्योक्तत्वादन्तःप्रश्नमिदम् ॥

बहिःप्रश्नं यथा—

'भद्र माणवकाख्याहि कीदृशः खलु ते पिता ।
वेलान्दोलितकल्लोलः कीदृशश्च महोदधिः ॥ ३७३ ॥'

अत्र 'मज्जन्मकरः' इत्यस्योत्तरस्य प्रश्नाद्बहिरुक्तत्वाद्बहिःप्रश्नमिदम् ॥

बहिरन्तःप्रश्नं यथा—

'सुभद्रां क उपायंस्त प्रश्नेऽमुष्मिन्य उत्तरः ।
स कीदृक्कपिमाचष्टे व्योम्नि पूर्णस्थितिः कुतः ॥ ३७४ ॥'

अत्र 'वायुतः' इत्युत्तरेण प्रश्नाद्बहिरुक्तेन वायुतो नरो वानरो भवति, सुभद्रोपयन्ताप्युच्यते । तेनैतद्बहिरन्तःप्रश्नं भवति ॥

जातिप्रश्नं यथा—

'कीदृशा भूमिभागेन राजा ख्यातोऽनुमीयते ।
प्राङ्गणं कुरुतेत्युक्ताः किमाहुस्तदनिच्छवः ॥ ३७५ ॥

'हैमवार करञ्जिना' 'नाजिरं करवामहै' इत्युत्तराभ्यां गतप्रत्यागताभ्यां प्रश्नोत्तरजातिरभिधीयते । तेन जातिप्रश्नमिदम् ॥

पृष्टप्रश्नं यथा—

'को सो जोअणवाओ को दण्डाणं दुवे सहस्साइं ।
का काली का मधुरा किं शुकपृथुकाननच्छायम् ॥ ३७६ ॥'

अत्र य एव प्रश्नाः कः स योजनपादः कः स यो दण्डानां द्वे सहस्रे इत्यादयः त एव 'क्रोशो योजनपादः' 'कोदण्डानां द्वे सहस्रे' इत्यादीन्युत्तराणि भवन्ति । एवं 'का काली का मधुरा किं शुकपृथुकाननच्छायम्' इत्युत्तरं किमभिहितशेषस्य प्रष्टव्यमिति पृष्टप्रश्नम् ॥

उत्तरप्रश्नं यथा—

'किं वसन्तसमये वनभक्षः पृष्टवान्स पृथुलोमविलेखः ।
उत्तरं च किमवापतुरेतौ काननादतिमिरादपि काली ॥ ३७७ ॥'

अत्र प्रश्नस्य हे काननाद हे तिमिराद पिकालीत्येतदेवोत्तरं भवतीत्युत्तरप्रश्नमिदम् ॥

यद्विधौ च निषेधे च व्युत्पत्तेरेव कारणम् ।
तदध्येयं विदुस्तेन लोकयात्रा प्रवर्तते ॥ १३८ ॥
काव्यं शास्त्रेतिहासौ च काव्यशास्त्रं तथैव च ।
काव्येतिहासः शास्त्रेतिहासस्तदपि षड्विधम् ॥ १३९ ॥

तेषु काव्यं यथा—

'यदि स्मरामि तां तन्वीं जीविताशा कुतो मम ।
अथ विस्मृत्य जीवामि जीवितव्यसनेन किम् ॥ ३७८ ॥'

तदिदमुक्तिप्राधान्यात्काव्यमित्युच्यते ॥

शास्त्रं यथा—

'स्निग्धोन्नताग्रतनुताम्रनखौ कुमार्याः
पादौ समोपचितचारुनिगूढगुल्फौ ।
श्लिष्टाङ्गुली कमलकान्तितलौ च यस्या-
स्तामुद्वहेद्यदि भुवोऽधिपतित्वमिच्छेत् ॥ ३७९ ॥'

अत्र स्निग्धत्वादेः शब्दस्य प्राधान्यमिति शासनाच्छास्त्रमिदम् ॥

इतिहासो यथा—

'हिरण्यकशिपुर्दैत्यो यां यां स्मित्वाप्युदैक्षत ।
भयाक्रान्तैः सुरैश्चक्रे तस्यै तस्यै दिशे नमः ॥ ३८० ॥'

सोऽयमतीतार्थप्राधान्यादितिहासः ॥

काव्यशास्त्रं यथा—

'नान्दीपदानि रतनाटकविघ्नशान्ता-
वाज्ञाक्षराणि परमाण्यथवा स्मरस्य ।
दष्टेऽधरे प्रणयिना विधुताग्रपाणि
सीत्कारशुष्करुदितानि जयन्ति नार्याः ॥ ३८१ ॥'

अत्र काव्येन शास्त्रमभिहितमितीदं काव्यशास्त्रम् ॥

काव्येतिहासो यथा—

'स संचरिष्णुर्भुवनान्तरेषु यां यदृच्छयाशिश्रयदाश्रयः श्रियाम् ।
अकारि तस्यै मुकुटोपलस्खलत्करैस्त्रिसन्ध्यं त्रिदशैर्दिशे नमः ३८२'

अत्र प्रागुक्तस्यैवेतिहासार्थस्य काव्येनाभिधानात्काव्येतिहासोऽयम् ॥

शास्त्रेतिहासो यथा—

'धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित् ॥ ३८३ ॥'

अत्र धर्मार्थकाममोक्षाणामितिहासनिवेशितत्वादयं शास्त्रेतिहासः ॥

**श्रव्यं तत्काव्यमाहुर्यन्नेक्ष्यते नाभिधीयते ।**
**श्रोत्रयोरेव सुखदं भवेत्तदपि षड्विधम् ॥ १४० ॥**
**आशीर्नान्दी नमस्कारो वस्तुनिर्देश इत्यपि ।**
**आक्षिप्तिका ध्रुवा चेति शेषो ध्येयं भविष्यति ॥१४१॥**

तत्राशीर्यथा—

'भूयाद्वः श्रेयसे देवः पार्वतीदयितो हरः।
पातु वः परमं ज्योतिरवाङ्मनसगोचरः॥ ३८४॥'

अत्राशंसायां लिङ् लोट् च। तदिदं वाक्यद्वयमाशीः॥

नान्दी यथा—

'भद्दं भोदु सरस्सईअ कइणो णन्दन्तु वासाइणो
अण्णाणं पि परं पअट्टदु वरा वाणी छइल्लप्पिआ।
वच्छोभी तह माअही फुरदु णो सा किं अ पञ्चालिआ
रीदीयो विलिहन्तु कव्वकुसला जोण्हं चओरा विअ ३८५

[भद्रं भवतु सरस्वत्याः कवयो नन्दन्तु व्यासादयः,
अन्येषामपि परं प्रवर्ततां वरा वाणीविदग्धप्रिया।
वैदर्भी तथा मागधी स्फुरतु नः सा किं च पाञ्चालिका
रीतिका विलिहन्तु काव्यकुशला ज्योत्स्नां चकोरा इव॥]

सेयं रङ्गमङ्गलान्तं स्वस्त्ययनं नान्दी॥

नमस्कृतिर्यथा—

'जयति ब्रह्मभूः शंभुर्वन्देमहि महेश्वरम्।
इदं गुरुभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे॥ ३८६॥'

सेयं स्तुतिर्नमस्क्रिया च नमस्कृतिरेव भवति॥

वस्तुनिर्देशो यथा—

'अस्त्युद्दामजटाभारभ्रान्तगङ्गाम्बुशेखरः।
आदिदेवो हरो नाम सृष्टिसंहारकारणम्॥ ३८७॥'

सोऽयं कथाशरीरव्यापिनो वस्तुनो नायकस्य निर्देशो वस्तुनिर्देशः॥

आक्षिप्तिका यथा—

'पअपीडिअमहिसासुरदेहेहिं भुअणभअलुआवससिलेहिं ।
सुरसुहदेंतवलिअधवलच्छिहिं जअइ सहासं वअणु महलच्छिहिं ३८८

[पदपीडितमहिषासुरदेहैर्भुवनभयलावकशशिलेखैः ।
सुरसुखदातृवलितधवलाक्षैर्जयति सहासं वदनं महालक्ष्म्याः ॥]

सेयमभिधित्सितरागविशेषप्रयोगमात्रफलं वचनमाक्षिप्तिका ॥

ध्रुवा यथा—

'म अवहणिमित्तणिग्गअमइन्दसुण्णं गुहं णिएऊण ।
लद्धावसरो गहिउण मोत्तिआइं गओ वाहो ॥ ३८९ ॥'

[मृगवधनिमित्तनिर्गतमृगेन्द्रशून्यां गुहां निरूप्य ।
लब्धावसरो गृहीत्वा मौक्तिकानि गतो व्याधः ॥]

सेयं पात्रप्रवेशरसानुसन्धानादिप्रयोजना ध्रुवा ॥

**यदाङ्गिकैकनिर्वर्त्यमुज्झितं वाचिकादिभिः ।**
**नर्तकैरभिधीयेत प्रेक्षणाक्ष्वेडिकादि तत् ॥ १४२ ॥**
***तल्लास्यं ताण्डवं चैव छलिकं संपया सह ।***
**हल्लीसकं च रासं च षट्प्रकारं प्रचक्षते ॥ १४३ ॥**

तेषु लास्यं यथा—

'उच्चिउ वालीयिअ पन्थहिं जन्तउ ।
पेक्खमि हत्थं होइ जइ लोअणवन्तउ ॥ ३९० ॥'

[उच्चा पालिः प्रियः पथा याति ।
प्रेक्षे हस्तं भवति यदि लोचनवान् ॥]

तदिदं शृङ्गाररसप्रधानत्वाल्लास्यम् ॥

ताण्डवं यथा—

'सुअवहवइअरणिसुणिअ दारुणुरोसविसट्ठपहाररुहिरारुणु ।
जलिउ जाणइ णरु रिउसन्तावणु अणलसरिच्छ जइ होइ महारणु ३९१'

[सुतवधव्यतिकरं निशम्य दारुणरोषविसृष्टप्रहाररुधिरारुणः ।
ज्वलितो जायते नरो रिपुसंतापनोऽनलसदृशो यदि भवति महारणः ॥]

इदं वीररसप्रधानत्वात्ताण्डवम् ॥

छलिकं यथा—

'णिसुणिउ पच्छा तुरअरउ भुण्डि हिंसि हसन्ति ।
णिअकन्तं डाढजुअलेहिं पुणु पुणु ण अ बलन्ति ॥३९२॥'

[निशम्य पश्चात्तुरगरवं शूकरी हिंसार्थं हसति ।
निजकान्तं दंष्ट्रायुगलेन पुनः पुनर्न च दशति ॥]

इदं तु शृङ्गारवीररसप्रधानत्वाच्छलिकम् ॥

सम्पा यथा—

'वीहेसि हरिमुहि अवि होहि मं गले लेहि सइ ।
कन्दइ रिट्ठासुरमारिउ कण्ठवलिउ ण पइ ॥ ३९३ ॥'

[बिभेषि हरिमुखि अपि भव मां च गले गृहाण सदा ।
क्रन्दति रिष्टासुरमारितः कण्ठवलितो न पतिः ॥]

तदिदं छलिकमेव किन्नरविषयं सम्पा ॥

हल्लीसकं यथा—

'चन्दणधूसरअं आहुलिअलोअणअं हासपरम्मुहअं णीसासकिलालिअम् ।
दुम्मणदुम्मणअं सङ्कामिअमण्डणअं माणिणिआणणअं किंतुह्मकरट्ठिअअम्

[चन्दनधूसरमाकुलितलोचनं हासपराङ्मुखं निश्वसिक्लेशितम् ।
दुर्मनसां दुर्मनस्कं संक्रामितमण्डनं मानिन्याननं किं तव करस्थितम् ॥]

**मण्डलेन तु यत्स्त्रीणां नृत्यं हल्लीसकं तु तत् ।**
**तत्र नेता भवेदेको गोपस्त्रीणां हरिर्यथा ॥ १५६ ॥**

हल्लीसकमिदम् ॥

रासो यथा—

'अइ दुम्मणआ अज्ज किणो पुच्छामि तुमम् ।
जेण जिविज्जइ जेण विलासो पलिहिज्जइ कीस जणो ३९५

[अयि दुर्मनस्क अद्य किं नो पृच्छामि त्वाम् ।
येन जीव्यते येन विलासः परिह्रियते किमिति जनः ॥]

तदिदं हल्लीसकमेव तालबन्धविशेषयुक्तं रास एवेत्युच्यते ॥

**अङ्गवाक्सत्त्वजाहार्यैः सामान्यश्चित्र इत्यमी ।**
**षट् चित्राभिनयास्तद्वदभिनेयं वचो विदुः ॥ १५७ ॥**

तेष्वाङ्गिकाभिनयवद्यथा—

'दोर्दण्डाः क धृताङ्गदाः क नु शिरानद्धौ भुजौ द्वाविमौ
वक्त्राणि क नु कान्तिमन्ति बलिमत्केदं ममैकं मुखम् ।
वाचस्ताः क जितार्णवध्वनिघनाः क्वायं वचःसंयमो
हेलाकम्पितभूधरः क चरणन्यासः क मन्दा गतिः ३९६'

अत्राङ्गिकाभिनयानां प्रतिपादितत्वादिदमाङ्गिकाभिनयम् ॥

वाचिकाभिनयवद्यथा—

'दुर्वारां मदनशरव्यथां वहन्त्या
तन्वङ्ग्या यदभिहितं पुरः सखीनाम् ।
तद्भूयः शिशुशुकशारिकाभिरुक्तं
धन्यानां श्रवणपथातिथित्वमेति ॥ ३९७ ॥'

अत्र वाचिकाभिनयप्रतिपादनादिदं वाचिकाभिनयम् ॥

सात्त्विकाभिनयवद्यथा—

'वारंवारं तिरयति दृशोरुद्गमं बाष्पपूर-
स्तत्संकल्पोपहितजडिम स्तम्भमभ्येति गात्रम्।
सद्यः स्विद्यन्नयमविरतोत्कम्पलोलाङ्गुलीकः
पाणिर्लेखाविधिषु नितरां वर्तते किं करोमि॥ ३९८॥'

अत्र बाष्पजाड्यस्तम्भस्वेदकम्पानां प्रतिपादितत्वादिदं सात्त्विकाभिनयम्॥

आहार्याभिनयवद्यथा—

'चूडाचुम्बितकङ्कपत्रमभितस्तूणीद्वयं पृष्ठतो
भस्मस्तोकपवित्रलाञ्छनमुरो धत्ते त्वचं रौरवीम्।
मौर्व्या मेखलया नियन्त्रितमधो वासश्च माञ्जिष्ठकं
पाणौ कार्मुकमक्षसूत्रवलये दण्डोऽपरः पैप्पलः॥ ३९९॥'

अत्राहार्याभिनयानां प्रतिपादितत्वादिदमाहार्याभिनयम्॥

सामान्याभिनयवद्यथा—

'राहोश्चन्द्रकलामिवाननचरीं दैवात्समासाद्य मे
दस्योरस्य कृपाणपातविषयादाच्छिन्दतः प्रेयसीम्।
आतङ्काद्विकलं द्रुतं करुणया विक्षोभितं विस्मया-
त्क्रोधेन ज्वलितं मुदा विकसितं चेतः कथं वर्तताम् ४००'

अत्र चतुर्णामभिनयानां प्रयोगादिदं सामान्याभिनयम्॥

चित्राभिनयवद्यथा—

'व्यतिकर इव भीमस्तामसो वैद्युतश्च
क्षणमुपहतचक्षुर्वृत्तिरुद्भूय शान्तः।
कथमिह न वयस्यस्तत्किमेतत्किमन्य-
त्प्रभवति हि महिम्ना स्वेन योगेश्वरीयम्॥ ४०१॥'

अत्र हस्ताध्यायपदाध्याययोः कथितत्वाच्चित्राभिनयमिदम् ॥

चतस्रो विंशतिश्चैताः शब्दालंकारजातयः ।
शब्दसंदर्भमात्रेण हृदयं हर्तुमीशते ॥ १५८ ॥

इति श्रीराजाधिराजभोजदेवेनविरचिते सरस्वतीकण्ठाभरणनाम्नि अलंकारशास्त्रेऽलंकारनिरूपणं नाम द्वितीयः परिच्छेदः ।

---

तृतीयः परिच्छेदः ।

क्षोभस्फुरितचूडेन्दुखण्डप्रकरविभ्रमाः ।
ताण्डवाडम्बरे शम्भोरट्टहासाः पुनन्तु वः ॥ १ ॥
विविच्यमानगम्भीरमूलग्रन्थाकुलत्वप्रति ।
इतोऽप्यतः परं व्याख्यां संक्षेपेण निगद्यते ॥ २ ॥

क्रमप्राप्तार्थालंकारलक्षणाय तृतीयपरिच्छेदारम्भः । तत्र विभागोपयुक्तं सामान्यलक्षणमाह—

अलमर्थमलंकर्तुं यद्व्युत्पत्त्यादिवर्त्मना ।
ज्ञेया जात्यादयः प्राज्ञैस्तेऽर्थालंकारसंज्ञया ॥ १ ॥

अलमर्थमिति । विशिष्टा उत्पत्तिर्व्युत्पत्तिर्जातेरवच्छेदकः प्रकारः । आदिशब्दाद्विविधशक्तिप्रतिबन्धादयो विभावनाद्यवच्छेदास्त्रयोविंशतिः । अर्थालंकारसंज्ञयेति । अर्थशोभानिर्वृत्तिहेतुर्विच्छित्तिरर्थालंकार इति स्फुटलक्षणम् ॥

जातिर्विभावना हेतुरहेतुः सूक्ष्ममुत्तरम् ।
विरोधः संभवोऽन्योन्यं परिवृत्तिर्निदर्शना ॥ २ ॥

विभागान्दर्शयति—जातिरिति ॥

भेदः समाहितं भ्रान्तिर्वितर्को मीलितं स्मृतिः ।
भावः प्रत्यक्षपूर्वाणि प्रमाणानि च जैमिनेः ॥ ३ ॥

प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यभावाख्यानि जैमिनेः प्रमाणानि षट् । तेनैव क्रमेण लक्षणान्याख्यातुं प्रत्यक्षपूर्वाणीत्युक्तम् । साहित्यस्य सर्वपारिषदत्वान्नानादर्शनरीत्युपजीवनमुचितमेव ॥

नास्त्येवासावर्थालंकारो यः स्वरूपं नाश्रयत इति प्राथम्यं जातेरेवेत्याह—

तेषु—

**नानावस्थासु जायन्ते यानि रूपाणि वस्तुनः।**
**स्वेभ्यः स्वेभ्यो निसर्गेभ्यस्तानि जातिं प्रचक्षते ॥ ४ ॥**

**तेष्विति**। कालकृतो विशेषोऽवस्था। तामधिकृत्य जायन्ते वस्तुस्वरूपव्यभिचारिण्युत्पद्यन्ते। नन्वेवं 'य एते यज्वानः प्रथितमहसो येऽप्यवनिपा मृगाक्ष्यो याश्चैताः कृतमपरसंसारकथया। अहो ये चाप्यन्ये फलकुसुमनम्रा विटपिनो जगत्येवंरूपा विलसति मृदेषा भगवती॥' इत्यादावपि जातित्वं स्यादित्यत आह—**स्वेभ्यः स्वेभ्य इति**। स्वभावभूतानीत्यर्थः। कविप्रतिभामात्रप्रकाशनीयरूपोट्टङ्कनं जातिरिति लक्षणम्। लौकिकविकल्पविषयोऽपि प्रतिभया भासत एव। यदाह—'रसानुगुणशब्दार्थचिन्तास्तिमितचेतसः। क्षणं विशेषस्पर्शोत्था प्रज्ञैव प्रतिभा कवेः। स हि चक्षुर्भगवतस्तृतीयमिति गीयते। येन साक्षात्करोत्येष भावांस्त्रैलोक्यवर्तिनः॥' इति॥

उक्तमेव विशेषमभिसंधायाह—

**अर्थव्यक्तेरियं भेदमियता प्रतिपद्यते।**
**जायमानश्रियं वक्ति रूपं सा सार्वकालिकम् ॥ ५ ॥**

**अर्थव्यक्तेरिति**। वस्तुस्वरूपोल्लेखनरूपार्थव्यक्तिरर्थगुणेषूक्ता। तत्र सार्वकालिकं रूपमुपजनापायान्तरालव्यापकमित्यर्थः। अत्र तु जायमानमागन्तुनिमित्तसमवधानप्रभवं व्यभिचारितमित्यर्थः। विच्छित्तिप्रकारयोरसंकरात्पृथक्शोभार्पणाच्च युक्तो व्यतिरेकस्तेन स्वभावोक्तिरेवार्थव्यक्तिरिति यत्केनचिदुक्तं तदपास्तम्। अत एव जात्यन्तरप्रकाराणामपि पृथगलंकारता स्यादिति न युक्तमवान्तरवचसैव व्याघातात्। न हि सामान्यविशेषयोर्विभागो भवति॥

**स्वरूपमाश्रयो हेतुरिति तद्भेदहेतवः।**
**ते संस्थानादयस्तेषु सा विशेषेण शोभते ॥ ६ ॥**

**स्वरूपमिति**। आश्रयविशेषहेतुविशेषव्यतिरिक्तोऽवच्छेदकप्रकारः स्वरूपम्। एतदेव विभजते—**ते संस्थानादय इति**। ननु किमनेन प्रपञ्चेन पूर्वाभिहि-

तद्रूपमात्रस्यैव जातित्वादित्यत आह—**तेषु सेति** । विशेषेण शोभाहेतुरेव ह्यलंकारः । अस्ति चात्र तथाभाव इति भावः ॥

तत्र स्वरूपं द्विधा । शरीरावयवसंनिवेशलक्षणमतादृशं च । आद्यमपि बुद्धि-कारितमतथाभूतं च । तदेतदाह—

**तत्र स्वरूपं संस्थानमवस्थानं तथैव च ।**
**वेषो व्यापार इत्याद्यैः प्रभेदैर्बहुधा स्थितम् ॥ ७ ॥**

**तत्र स्वरूपमिति** । आदिपदेन वृक्षादिस्वरूपपरिग्रहः ॥

**मुग्धाङ्गनार्भकस्तिर्यङ्नीचपात्राणि चाश्रयः ।**
**देशः कालश्च शक्तिश्च साधनानि च हेतवः ॥ ८ ॥**

शक्तिः पदार्थानां सामर्थ्यम् । साधनानि कर्त्रादीनि षट् ॥

तेषु संस्थानं यथा—

'स दक्षिणापाङ्गनिविष्टमुष्टिं नतांसमाकुञ्चितसव्यपादम् ।
ददर्श चक्रीकृतचारुचापं प्रहर्तुमभ्युद्यतमात्मयोनिम् ॥ १ ॥'

अत्र धनुर्धरेणैवमङ्गानि सम्यग्बुद्धिपूर्वकं स्थापनीयानीति संस्थान-मिदं जातिभेदः ॥

**अत्र धनुर्धरेणेति** । तदुक्तम्—'अपाङ्गे दक्षिणां मुष्टिं वामां विन्यस्य मस्तके । पादमाकुञ्चयेद्वामं लक्ष्ये निश्चललोचनः ॥' इति । अत्र सर्वस्यैव धनु-र्धरस्यैवंविधशरीरावयवसंनिवेशो भवति न कामस्यैवेति नाश्रयविशेषो विवक्षितः । एवमुत्तरत्रापि ॥

अवस्थानभेदेन यथा—

'पादावष्टम्भनम्रीकृतमहिषतनोरुल्लसद्बाहुमूलं
शूलं प्रोल्लासयन्त्याः सरलितवपुषो मध्यभागस्य देव्याः ।
विश्लिष्टस्पष्टदृष्टोन्नतविरलवलिव्यक्तगौरान्तराला-
स्तिस्रो वः पान्तु लेखाः क्रमवशविकसत्कञ्चुकप्रान्तमुक्ताः २'

अत्र स्त्रियाः शूलप्रोल्लासनादौ व्यापारे बुद्धिकारितमपि शरीराव-स्थानमीदृशं जायत इतीदमवस्थानं नाम जातिभेदः ॥

**पादावष्टम्भेति**। उल्लसद्बाहुमूलमिति प्रोल्लसनक्रियाविशेषणम्। सरलितवपुष इति मध्यभागविशेषणम्। अत एव वलीनां विश्लेषो मिथो विभागः उपरिशरीरा-कर्षणात्कञ्चुकप्रान्तापसरणम्। मुसलोल्लासनादौ दृष्टमिदमबुद्धिजमेव नारीणां रूप-मिति भगवतीविषये प्रतिबिम्बनमतिस्फुटमेव। तदाह—**आदाविति**॥

वेषो यथा—

'छणपिट्ठधूसरत्थणि महुमअअम्बच्छि कुवलआहरणे।
'कस्स कअ चूअमञ्जरि पुत्ति तुए मण्डिओ गामो॥ ३॥'
[क्षणपिष्टधूसरस्तनि मधुमदताम्राक्षि कुवलयाभरणे।
कस्यकृते चूतमञ्जरि पुत्रि त्वया मण्डितो ग्रामः॥]

अत्र वसन्तोत्सवे ग्रामतरुणीनामयं वेषो जनमनःप्रमोदाय जायत इति वेषो नामायं जातिभेदः॥

**अत्र वसन्तोत्सव इति**। यद्यप्यत्र कालः पात्रं चास्ति तथापि 'संवाल-णमउलिज्झविवरउराहइअम्बिरइअउण तालङ्कम्। सिटिलाअन्तं सवणा अरम्भि-सारेह एक्कावि॥' इत्यादौ न संकरः कादाचित्कस्त्वसौ गुण एव वेषस्य कथं रञ्जकत्वमवशिष्यते। तत्राह—**जनमनःप्रमोदायेति**। रुच्यर्थित्वमुत्पत्तीनां प्रतिपक्षगतानामक्षुण्णत्वादिति भावः॥

व्यापारो यथा—

'अग्रे गतेन वसतिं परिगृह्य रम्या-
मापात्य सैनिकनिराकरणाकुलेन।
यान्तोऽन्यतः प्लुतकृतस्वरमाशु दूरा-
दुद्बाहुना जुहुविरे मुहुरात्मवर्ग्याः॥ ४॥'

अत्र तादृशि व्यापारे व्यापृतानामीदृशमेव स्वरूपं जायत इति व्या-पारनामायं जातिभेदः॥

आश्रयेषु मुग्धमुक्तिर्यथा—

'सहिआहि भम्ममाणा थणए लग्गं कुसुम्भपुप्फं ति ।
मुद्धवहुआ हसिज्जइ पप्फोडन्ती णहवआइम् ॥ ५ ॥'

[सखीभिर्भण्यमाना स्तनयोर्लग्नं कुसुम्भपुष्पं ते ।
मुग्धवधूर्हस्यते प्रोञ्छन्ती नखव्रणानि ॥]

अत्र मुग्धवध्वाश्रितक्रियास्वरूपभणनादियं मुग्धाङ्गनाश्रिता जातिः ॥

अर्भकाश्रिता यथा—

'आक्रोशन्नाह्वयन्नन्यानाधावन्मण्डलं रुदन् ।
गाः कालयति दण्डेन डिम्भः सस्यावतारिणीः ॥ ६ ॥'

अत्रार्भकाश्रितव्यापारस्वरूपोक्तेरियमर्भकाश्रिता जातिः ॥

**अग्रे गसेनेति** । अत्रोद्वाहुनेति यद्यप्यवस्थानमस्ति तथापि तत्परिहारेणोदाहरणमसंकीर्णम् । 'सहिआहि भम्ममाणा थणए लग्गं कुसुम्भपुप्फं ति । मुद्धवहुआ हसिज्जइ पप्फोडन्ती णहवआइम् ॥' इत्यत्रैकस्याः कदाचिद्वितर्कोयेदमपि वाक्यं बहूनां तु नेति बहुवचनस्वरसः । कुसुम्भकेसराण्युच्चेतुं वारंवारमसौ क्षेत्रं प्रविशतीति संभावना । मुग्धा अपरिशीलिताभिमानिकसुखा वधूः प्रथमपरिणीता । प्रस्फोट्यमानामपि त्वया नापसरतीत्यहो तव सौकुमार्यमिति चाटुगर्भं हसितम् । अत एव प्रियतया तस्यानुबन्धो वर्तमाननिर्देशेन व्यज्यते । एतदग्रिमोदाहरणव्याख्याने क्रियाव्यापारग्रहणमुपलक्षणमतो न व्यापारसंकरः । अन्ये त्वाहुः आश्रयावच्छेदेन बहिर्भावोऽत्र भेदहेतुरिति ॥

तिर्यगाश्रया यथा—

'लीढव्यस्तविपाण्डुराग्रनखयोराकर्णदीर्णं मुखं
बिभ्यत्स्वाग्रिमयोर्युगे चरणयोः सद्यो विभिन्नद्विपः ।
एतस्मिन्मदगन्धवासितवटः सावज्ञतिर्यग्वल-
त्स्कन्धाहतिधूतलोलमधुपः कुञ्जेषु शेते हरिः ॥ ७ ॥'

अत्र सिंहस्वरूपभणनादियं तिर्यगाश्रया जातिः ॥

**लीढेति**। व्यस्तं विगतरुधिरम्। सावज्ञं तिर्यक् वलन्ती ये सृक्किणी ताभ्यामाहता इति संबन्धः। यथैकत्र कुञ्जे स्वपतः स्वल्पं तथान्यत्रापीति बहुवचनरहस्यम्। अत एव न देशहेतुशङ्का। **अत्र सिंहेति**। मदवासनया विशेषितत्वादिति भावः॥

नीचाश्रया यथा—

'भद्रं ते सदृशं यदध्वगशतैः कीर्तिस्तवोद्घुष्यते
स्थाने रूपमनुत्तमं सुकृतिना दानेन कर्णो जितः।
इत्यालोच्य चिरं दृशा करुणया शीतातुरेण स्तुतः
पान्थेनैकपलालमुष्टिरुचिना गर्वायते हालिकः॥ ८॥'

अत्र हीनपात्रहालिकस्वरूपोक्तिरियं नीचाश्रया जातिः॥

**भद्रं त इति**। करुणाकार्पण्यव्यञ्जकविशेषशालिनी। गर्वायते अगर्ववानेव गर्ववान्भवति। भृशादौ लक्षत्वादेर्भत्वर्थलक्षणत्वात्॥

अथ हेतवः। तेषु देशो यथा—

'इमास्ता विन्ध्याद्रेः शुकहरितवंशीवनघना
भुवः क्रीडालोलद्विरदरदनारुग्णतरवः।
लताकुञ्जे यासामुपनदि रतक्लान्तशबरी-
कपोलस्वेदाम्भःपरिचयनुदो वान्ति मरुतः॥ ९॥'

अत्र विन्ध्याद्रेरीदृशेषु प्रदेशेष्वित्थंभूता वायवो वान्तीति हेतुत्वेनोक्तत्वाद्देशस्य देशहेतुर्जातिरियम्॥

**इमास्ता इति**। देशविशेषमुद्दिश्य मरुतां विधानमुद्देश्यस्य च विधौ हेतुभावः। वंशीवनानां दुष्प्रवेशतया मरुतां मन्दीभावो द्विरदैस्तरुभङ्गादवकाशलाभे प्रगल्भत्वमतः क्रमखेदापनयनसामर्थ्यमेतत्सर्वमाह—**अत्र विन्ध्याद्रेरिति**॥

कालहेतुर्यथा—

'कम्पन्ते कपयो भृशं जलकृशं गोजाविकं ग्लायति
श्वा चुल्लीकुहरोदरं क्षणमपि क्षिप्तोऽपि नैवोज्झति।

शीतार्तिव्यसनातुरः पुनरयं दीनो जनः कूर्मव-
त्स्वान्यङ्गानि शरीर एव हि निजे निह्नोतुमाकाङ्क्षति ॥१०॥'

अत्र हेमन्तहेतुकतिर्यगाद्याश्रयव्यापारस्वरूपोक्तेरियं कालहेतुर्नाम जातिः ॥

**गोजाविकमिति**। 'विभाषावृक्षमृग २।४।१२' इत्यादिना पाक्षिक एकवद्भावः । **अत्र हेमन्तेति**। यद्यपि तिर्यगाश्रयेयं जातिः तथापि हेतोरधिकस्य प्रवेशात्पृथग्भावः । संकरस्तु न दुष्यति ॥

शक्तिर्यथा—

'बध्नन्नङ्गेषु रोमाञ्चं कुर्वन्मनसि निर्वृतिम् ।
नेत्रे निमीलयन्नेष प्रियास्पर्शः प्रवर्तते ॥ ११ ॥'

अत्र रोमाञ्चबन्धादिषु प्रियास्पर्शप्रवृत्तेर्निमित्तस्योक्तत्वादियं शक्तिहेतुर्नाम जातिः ॥

**रोमाञ्चबन्धादिष्विति**। बध्नन्नित्यादौ शतृप्रत्ययेन कर्ताभिधीयते । स च सामानाधिकरण्यात्स्पर्श एव । स्पर्शत्वाविशेषे तु शक्तिरेव प्रयोजिका वाच्येत्यर्थः ॥

साधनहेतुर्यथा—

'उपनिहितहलीशासार्गलद्वारमारा-
त्परिचकितपुरन्ध्रीसारिताभ्यर्णभाण्डम् ।
पवनरयतिरश्चीर्वारिधाराः प्रतीच्छ-
न्विशति वलितशृङ्गः पामरागारमुक्षा ॥ १२ ॥'

अत्र जायमानक्रियाहेतुभूतयोः कर्तृकर्मणोः साधनयोः स्वरूपवर्णनादयं साधनहेतुर्नाम जातिभेदः ॥

**उपनिहितेति**। अगारद्वारस्य हलीशावरुद्धतया दुष्प्रवेशत्वमत एव बहिश्चिरं विलम्बात् प्रत्येषणवेशनयोर्वर्तमानता । उपलक्षणं चेदम् । तेन करणादयोऽप्युदाहार्याः ॥

पक्षे स्वभावपर्यवसानमस्तीति जातेः किंचिदपकृष्टां विभावनां विभावयितुमाह—

**प्रसिद्धहेतुव्यावृत्त्या यत्किंचित्कारणान्तरम् ।**
**यत्र स्वाभाविकं वापि विभाव्यं सा विभावना ॥ ९ ॥**
**शुद्धा चित्रा विचित्रा च त्रिविधा सा निगद्यते ।**
**शुद्धा यत्रैकमुद्दिश्य हेतुरेको निवर्तते ॥ १० ॥**

**प्रसिद्धेति** । प्रसिद्धस्पर्शहेतोर्विभाव्यतया प्रसिद्धग्रहणं नियमेन तद्भावापत्तिमूलत्वं चास्यास्तेन विरोधः ।, तथा हि 'णमह अवड्ढिअतुङ्गं–' इत्यादौ वर्धनजन्यमन्यदेव तुङ्गत्वमन्यच्च पारमेश्वरमाजानिकमिति तयोरभेदाध्यवसायः । एतदेवाभिसंधाय काश्मीरकैरतिशयोक्तिरस्या मूलमुक्ता । यदिति निपातो यत्रार्थे । यद्यपि कारणाभावेऽपि कार्योत्पत्तिरित्येव लक्षणं तथापि महासंज्ञाकरणप्रयोजनं किमित्याशङ्कायां द्वयं विभाव्यमाह । तदयमत्र संक्षेपः—यथोक्ता तावद्विभावना । सा द्वयी । कारणान्तरपर्यवसिता, स्वभावपर्यवसिता चेति ॥

प्रत्येकं च शुद्धादिभेदात्षोढा संपद्यत इत्येतावतैव विभावना शरीरनिष्पत्तेः । यथा वर्णो वर्णेन करम्बितं चित्रं तथा विभावनापि विभावनया तादृशी चित्रेत्याह—

**अनेको यत्र सा चित्रा विचित्रा यत्र तां प्रति ।**
**तयान्यया वा गीर्भङ्ग्या विशेषः कश्चिदुच्यते ॥ ११ ॥**

**अनेक इति** । यथा च स्वरूपसंपादकातिरिक्तविशेषप्रवेशाद्विचित्राः स्रग्दामादयस्तथेयमपीति दर्शयति—**विचित्रा यत्रेति** । तां विभावनाम् । तया विभावनया । अन्ययेति अलंकारान्तररूपया ॥

तत्र कारणान्तरविभावनायां शुद्धा यथा—

'अपीतक्षीबकादम्बमसंसृष्टामलाम्बरम् ।
अप्रसादितसूक्ष्माम्बु जगदासीन्मनोहरम् ॥ १२ ॥'

अत्रैकैकं कादम्बादिकमुद्दिश्य क्षीबतादेः पीतत्वादिरेकैकः प्रसिद्धहेतुर्व्यावर्तते । हेत्वन्तरं च शरत्प्रभावो विभाव्यते । सेयं शुद्धा नाम कारणविभावनायां विभावना ॥

पीतं पानम् । सूक्ष्मं निर्मलम् । **शरत्प्रभाव इति** । प्रस्तावौचितीभ्यामभिव्यक्तः ॥

स्वाभाविकत्वविभावनायां शुद्धा यथा—

'अनञ्जितासिता दृष्टिर्भूरनावर्जिता नता ।
अरञ्जितारुणश्चायमधरस्तव सुन्दरि ॥ १४ ॥'

अत्रैकैकं दृष्ट्यादिकमुद्दिश्यासितत्वादेरनञ्जितत्वादिरेकैको हेतुर्व्यावर्त्यते । स्वाभाविकत्वं चासितत्वादि दृष्ट्यादेर्विभाव्यते । सेयं शुद्धा नाम स्वाभाविकविभावनायां विभावना ॥

कारणान्तरविभावनायां चित्रा यथा—

'असंभृतं मण्डनमङ्गयष्टेरनासवाख्यं करणं मदस्य ।
कामस्य पुष्पव्यतिरिक्तमस्त्रं बाल्यात्परं साथ वयः प्रपेदे १५'

अत्रैकमेव वयोलक्षणं पदार्थमुद्दिश्याप्यनेको मण्डनादेः प्रसिद्धो हेतुः संभृतत्वादिर्व्यावर्त्यते । कारणान्तरं च स्तनोद्भेदधातूपचयलावण्यलक्ष्मीलाभादिर्विभाव्यते । सेयं चित्रा नाम कारणान्तरविभावना ॥

**असंभृतमिति** । ननु मण्डनस्य संभरणपूर्वकतया प्रसिद्धेरस्तु विभावना । 'अनासवाख्यं करणं मदस्य कामस्य पुष्पव्यतिरिक्तमस्त्रम्' इत्यत्र तु कथम् । तथाहि । करणमिति करणे वा ल्युट् । आद्ये मदस्य करणमासवो वयस्तु ततो भिन्नमिति कदाचिद्व्यतिरेकः स्यान्नतु विभावना । द्वितीयेऽपि वयो मदस्य क्रिया आसवनाम्नी न भवतीति न संगतम् । एवं पुष्पव्यतिरिक्तमस्त्रमित्यत्रापि विकल्प्य यथायथं दूषणं वाच्यम् । तत्कथमेतत् । उच्यते । करणं क्रिया आसवमाख्यातीत्यासवाख्यम् । कथाख्यवत्प्रत्ययविधिः । न तथाभूतमनासवाख्यम् । हेतुतया न कश्चिदासवबोधक्षमम् । तथा हेतुप्रतिषेध एव भङ्ग्या दर्शितो भवति । अस्त्रमपि क्रियारूपं तत्पुष्पव्यतिरिक्तं पुष्पच्युतं विना पुष्पेभ्य इति पूर्ववदुन्नेयम् । स्तनोद्भेदेत्यादौ नार्थसंदेहः ॥

सैव स्वाभाविकत्वविभावनायां यथा—

'णमह अवट्ठिअतुङ्गं अविसारिअ विस्थअअणोणअं गहिरम् ।
अप्पलहुअपरिसण्हं अण्णाअपरमत्थपाअडं महुमहणम् ॥ १६ ॥'

[नमत अवस्थिततुङ्गमविसारिताविस्तृतमनवनतगम्भीरम् ।
अप्रलघुमपरिश्लक्ष्णमज्ञातपरमार्थपारदं मधुमथनम् ॥]

अत्रैकमेव मधुमथनमुद्दिश्यानेकस्तुङ्गत्वादेः प्रवृद्धत्वादिः प्रसिद्धो हेतुर्व्यावर्त्यते। स्वाभाविकत्वं च तं प्रत्येषां विभाव्यते। सेयं चित्रा नाम स्वाभाविकत्वविभावनायां विभावना॥

तथैव गीर्भङ्ग्या विचित्रा यथा—

'वक्त्रं निसर्गसुरभि वपुरव्याजसुन्दरम्।
अकारणरिपुस्तस्या निर्निमित्तं सुहृच्च मे॥ १७॥'

अत्रोत्तरयोर्विरहसमागमादिकारणान्तरविभावनयोः स्वाभाविकीभ्यां प्राग्विभावनाभ्यां यथासंख्यं विशेष उक्तः। सेयं विभावनयैव विभावनायां विशेषोक्तेस्तयैव गीर्भङ्ग्या विचित्रा नाम विभावना भवति॥

**वक्त्रं निसर्गसुरभीति**। तस्या यथोक्ते वक्त्रवपुषी ममाकारणरिपुर्निर्निमित्तं सुहृच्चेत्यन्वयो विवक्षितप्रतीतिलाभाच्च नार्थान्तरैकवाचकत्वलक्षणो दोषः। **यथासंख्यमिति**। तयोरप्येकैकं प्रति संपादनलक्षणविशेषार्पणक्षमत्वात्॥

सैवान्यया गीर्भङ्ग्या यथा—

'वनेचराणां वनितासखानां दरीगृहोत्सङ्गनिषक्तभासः।
भवन्ति यत्रौषधयो रजन्यामतैलपूराः सुरतप्रदीपाः॥ १८॥'

अत्रातैलपूराः सुरतप्रदीपा इति स्वाभाविकत्वविभावनायां शेषपदार्थैरविभावनारूपैर्विशेष उक्तः। सेयमन्यया गीर्भङ्ग्या विचित्रा नाम विभावना भवति॥

**शेषपदार्थैरिति**। वनितासखत्वादिभिः सुरताद्युपपादकैः॥

**क्रियायाः कारणं हेतुः कारको ज्ञापकश्च सः।**
**अभावश्चित्रहेतुश्च चतुर्विध इहेष्यते॥ १२॥**

हेतुप्रतिषेधो विभावनायामुक्तः, अथ हेतुरेव क इत्यपेक्षायां हेतुलक्षणमाह— **क्रियायाः कारणं हेतुरिति**। उपपत्तौ क्रियायामेव सर्वस्य निमित्तभावो निरूप्यत इत्यभिसंधाय क्रियाया इत्युक्तमिति कश्चित्। तदसत्। द्रव्यगुणक्रिया-

विषये हेतुः क्रियामात्रविषयश्च कारकमिति प्रकीर्णप्रवृत्तौ विभागकरणात्क्रियाग्रहणं चेह निष्फलं स्यात् । तस्माद्यत्र क्रियां प्रत्यवधिभावो निरूप्यते तत्र द्वयीगतिर्निमित्तत्वमात्रविवक्षा अवस्तुविवक्षा वा, द्वितीयेऽपि कारकत्वविवक्षा वा। आद्येऽप्याश्रितावधिभावस्य वस्त्वन्तरपरहेतुभावविवक्षा अवस्तुत्वविवक्षा वा। द्वितीयेऽपि कारकत्वक्रियानुबन्धिव्यापारत्वम् । प्रधानक्रियानुकूलक्रियान्तरसमावेश इति यावत् । तद्विविधं शब्दाभिहितम्, अतथाभूतं च । आद्यं कारकविभक्तेर्विषयः, द्वितीयं हेतुविभक्तेः । द्वयमपि च क्रियाविषयमेव । षण्णामपि कारकाणां क्रियाघटितमूर्तित्वात् । अवस्तुभूतं तु निमित्तमभावात्मकतया न विक्रियते । विकाराभावाच्च न क्रियाविशिष्टमतथाभावे । न च कारकमिति तृतीय एव प्रकारः प्रसिद्धकार्यकारणभावविपर्यासेनोपनिबध्यमानो हेतुराश्चर्यकारितया चित्र आरोपितमपि च हेतुत्वं हेतुत्वमेवेति भवति चतुर्थः प्रकारः । बहिरसंभाव्यमानस्यापि कविप्रतिभासंरम्भोत्थाप्यतया चमत्कारविशेषार्पणादक्षुण्णैवालंकारता । यदाह—'को हि प्रतीतिमात्रकाव्ये वस्तुस्थितिं भावयेत्' इति । तदेतत्सर्वमभिसंधाय विभागमाह—**कारक इत्यादि** ॥

**यः प्रवृत्तिं निवृत्तिं च प्रयुक्तिं चान्तरा विशन् ।**
**उदासीनोऽपि वा कुर्यात्कारकं तत्प्रचक्षते ॥ १३ ॥**

असतः सत्ता प्रवृत्तिः । सतोऽपगमो निवृत्तिः । प्रवर्तमानस्य प्रवर्तना प्रयुक्तिः । अन्तरा विशन्नुपात्तयुक्तिः । उदासीनोऽतथाभूतः । तेन कारकस्य षड् प्रकाराः ॥

तेषु प्रवर्तकः क्रियाविष्टो यथा—

'अयमान्दोलितप्रौढचन्दनद्रुमपल्लवः ।
उत्पादयति सर्वस्य प्रीतिं मलयमारुतः ॥ १९ ॥'

सोऽयं यथोक्तो मलयमारुतः प्रीत्युत्पादनक्रियासमावेशात्प्रवर्तको नाम कारकहेतुभेदः ॥

स एव क्रियानाविष्टो यथा—

'तस्य राज्ञः प्रभावेण तदुद्यानानि जज्ञिरे ।
आर्द्रांशुकप्रवालानामास्पदं सुरशाखिनाम् ॥ २० ॥'

अत्र प्रभावः क्रियायामनिविशमान एव हेतौ तृतीयां प्रवर्तयति न कर्तरीति क्रियायामनाविष्टकारकहेतुभेदः ॥

तस्य राज्ञः प्रभावेनेत्यत्र सदपि कर्तृत्वमविवक्षितं, अतो हेतुमात्रविवक्षायां पाक्षिकी तृतीया भवतीत्याह—**हेतौ तृतीयायामिति**। करणभावस्त्वसंभावित एव प्रभावमात्रस्य व्यभिचारात् ॥

निवर्तकः क्रियाविष्टो यथा—

'चन्दनारण्यमाधूय स्पृष्ट्वा मलयनिर्झरान्।
पथिकानां प्रमाथाय पवनोऽयमुपस्थितः ॥ २१ ॥'

अत्रैवंविधस्य पवनस्य पथिकप्रमाथसाधनक्रियायां कर्तृत्वेनावेशान्निवर्तको नामायमाविष्टक्रियः कारकहेतुभेदः ॥

प्रमाथसाधनक्रियायां कर्तृत्वेनेति निष्ठाप्रत्ययेनोपात्तेनेति भावः ॥

स एव क्रियानाविष्टो यथा—

'प्रजागरात्खिलीभूतस्तस्याः स्वप्नसमागमः।
बाष्पस्तु न ददात्येनां द्रष्टुं चित्रगतामपि ॥ २२ ॥'

अत्र समागमनिवृत्तावनिविशमानः प्रजागरस्तृतीयार्थे पञ्चमीं प्रयोजयति। बाष्पः पुनर्दानक्रियावेशाद्दर्शनक्रियायामनाविशन्कर्मसंबन्धाचामप्रधानभावेन चोपगृह्णातीत्यनाविष्टक्रियो नाम निवर्तकोऽयं कारकहेतुभेदः ॥

खिलीभावो निवृत्तिः। **तृतीयार्थे इति**। हेताववधित्वाप्रतीतेरपादानभावेन संभावितः। **दानक्रियेति**। स्यादत्र दर्शनक्रियासमावेशो यदि दानक्रियावेशः स्यात्। स एव तु नास्ति नञा निषेधादित्यर्थः ॥

प्रयोजकः क्रियाविष्टो यथा—

'तस्मिञ्जीवति दुर्धर्षे हतमप्यहतं बलम्।
हनूमत्युज्झितप्राणे जीवन्तोऽपि मृता वयम् ॥ २३ ॥'

अत्र बलप्रयुञ्जीवनमरणक्रिययोः सप्तमीवाच्यनैमित्तिकाधिकरणकारकभावेन हनूमानाविशन्प्रयोजको भवतीति क्रियाविष्टोऽयं प्रयोजको नाम कारकहेतुभेदः ॥

**तस्मिञ्जीवतीति** । जीवनमरणयोर्बलस्यैव स्वातन्त्र्यं हनूमान्प्रयोजयति । प्रयोजकता चास्य ( ते एव ) जीवत्युज्झितप्राणे इति पदाभ्यामुपात्ता । कतमत्कारकमिदं भवतीत्याह—**सप्तमीवाच्येति** । ननु च—'अङ्गुल्यग्रे मदकलघटान्दर्शयन्तीव धूर्ता' इत्यादौ काल्पनिकादावपि सप्तमीभावात्कथं कारकतेत्यत आह—**नैमित्तिकेति** । अन्यस्यासंभवादिति भावः ॥

स एव क्रियानाविष्टो यथा—

'मानयोग्यां करोमीति प्रियस्थानस्थितां सखीम् ।
बाला भ्रूभङ्गजिह्माक्षी पश्यति स्फुरिताधरा ॥ २४ ॥'

अत्र मानाभ्यासक्रियाया भ्रूभङ्गजिह्माक्षिप्रेक्षणादिरूपाया आत्मन्येवात्मनः समावेशो न भवतीति क्रियानाविष्टोऽयमिति शब्दाभिधेयप्रयोजको नाम कारकहेतुभेदः ॥

**मानयोग्यामिति** । भ्रूभङ्गजिह्माक्षिस्फुरिताधरादिप्रेक्षणारूपायां मानाभ्यासक्रियायामपि बालायाः स्वातन्त्र्यं, तादृशीं तु तामिति शब्दनिर्देश्योऽभिप्रायविशेषः प्रयुङ्क्ते । तस्य तु न क्रियान्तरमुपात्तम् । उपात्तायास्तु मानक्रियायाः स्वात्मनि समावेशोऽनुपपन्नः । अभिप्रायोऽपि हि व्यापारप्रचयरूपक्रियान्तर्भूत एव । यदाह **महाभाष्यकारः**—'यत् किंचित्तदभिसंधिपूर्वकं प्रेषणमध्येषणं वा तत्सर्वं पच्यर्थं' इति । स्मरणादिकं चास्य व्यापारः संभवतीत्यतो नाकारकत्वं वाच्यम् । तदेतदभिसंधायाह—**आत्मन्येवात्मन इति** ॥

**द्वितीया च तृतीया च चतुर्थी सप्तमी च यम् ।**
**क्रियानाविष्टमाचष्टे लक्षणं ज्ञापकश्च सः ॥ १४ ॥**

स द्वितीयावाच्यो यथा—

'तां प्रत्यभिव्यक्तमनोरथानां महीपतीनां प्रणयाग्रदूत्यः ।
प्रवालशोभा इव पादपानां शृङ्गारचेष्टा विविधा बभूवुः ॥२५॥'

अत्र क्रियानाविष्टतयैवेन्दुमत्यां महीपतीनां शृङ्गारचेष्टा भवन्त्यो लक्ष्यन्ते । सोऽयं लक्षणहेतुः प्रतिना योगे द्वितीयामुत्पादयति ॥

इह पञ्चैव लक्षणे विभक्तयो विहिताः । तद्यथा । 'अनुर्लक्षणे १।४।८४', 'लक्षणेत्थंभूत १।४।९०' इत्यादिना कर्मसंज्ञां विधाय 'कर्मप्रवचनीययुक्ते २।३।८' इति द्वितीया । 'येनाङ्गविकारः २।३।२०', 'इत्थंभूतलक्षणे २।३।२१' इत्येताभ्यां तृतीया । 'उत्पातेन ज्ञापिते च १।४।४४ वा.' इति चतुर्थी । 'यस्य च भावेन भावलक्षणम् २।३।३७' इति सप्तमी । 'षष्ठी चानादरे २।३।३८' इति षष्ठी । तदेतदाह—**द्वितीया चेति** । षष्ठीमग्रे वक्ष्यति । 'षष्ठी चानादरे २।३।३८' इति सूत्रे चकारस्य समुच्चेयतया न प्रधाना सेति नात्र तुल्यकक्षतया गणिता । क्रियानाविष्टं स्वव्यापारशून्यं तटस्थमेव यद्याप्रियते, तेन कारकाद्भेदः । अत्र हि क्रियानाविष्टस्यैव इन्दुमत्यामितीन्दुमतीमालम्बनविभावीकृत्य ( विधीय )मानाः शृङ्गारचेष्टास्तयैवावच्छिद्यन्ते, तदवस्था एव च लक्ष्यन्ते, ततो भवति हेतुत्वं लक्षणत्वमवधित्वं चेति । ननु कथमत्र द्वितीया, यावता हेतुत्वात्तृतीयया भवितव्यमित्यत आह—**द्वितीयामिति** । नाप्राप्तायां तृतीयायामियं विधीयमाना बलवती तां बाधत इत्यर्थः ॥

तृतीयावाच्यमित्थंभूतलक्षणं यथा—

'कण्ठेकालः करस्थेन कपालेनेन्दुशेखरः ।
जटाभिः स्निग्धताम्राभिराविरासीद्वृषध्वजः ॥ २६ ॥'

अत्र कण्ठेकाल इत्यादीनि क्रियायामनिविशमानान्येव वृषध्वजं ज्ञापयन्ति यथा जटाभिस्तापस इति ॥

**कण्ठेकाल इत्यादीनीति** । यद्यपि कपालेन जटाभिरित्येवोदाहरणं तथापि प्रसङ्गादितरद्व्याख्यानं ज्ञापकत्वम् । उभयत्रापि तुल्यविभक्तिवाच्यतायां तु विशेषः । तेनान्योऽप्येवंजातीयो लक्षणप्रकारः स्वयमूहनीय इत्युक्तं भवति, यद्वक्ष्यति 'उपलक्षणं चैतत्' इत्यादिना । उक्तमेव प्रसिद्धोदाहरणेन द्रढयति—**यथा जटाभिरिति** । यथाहीत्थंभूतस्य तेनैव प्रकारेण प्रकारवतो लक्षणं जटा भवन्ति तथेहापि कपालादिकमिति भावः ॥

तृतीयावाच्य एवाङ्गविकारलक्षणं यथा—

'स बाल आसीद्वपुषा चतुर्भुजो मुखेन पूर्णेन्दुनिभस्त्रिलोचनः ।
युवा कराक्रान्तमहीभृदुच्चकैरसंशयं संप्रति तेजसा रविः ॥२७'

अत्र वपुषा चतुर्भुजो मुखेन त्रिलोचनस्तेजसा रविरित्यङ्गविकारैरङ्गिनो विकृतिर्लक्ष्यते यथाक्ष्णा काण इति ॥

**तृतीयावाच्य एवेति** । सूत्रेऽङ्गपदेनाङ्गी लक्ष्यते । तस्य च संबन्धिनियमादङ्गवाचिनस्तृतीया भवति । अङ्गं च द्विविधमाजानिकमौपचारिकं च द्वयमपीह विवक्षितं विकारादिकं चेत्थंभूतलक्षणमेवेदम् । अत एव सूत्रक्रमो नादृत इत्याशयवान्व्याचष्टे—**अत्र वपुषेति** । विकृतिरवस्थान्तरप्राप्तिः ॥

चतुर्थीवाच्यमुत्पातलक्षणं यथा—

'गोनासाय नियोजितागदरजाः सर्पाय बद्धौषधिः
कण्ठस्थाय विषाय वीर्यमहिते पाणौ मणीन्बिभ्रती ।
भर्तुर्भूतगणाय गोत्रजरतीनिर्दिष्टमन्त्राक्षरा
रक्षत्वद्रिसुता विवाहसमये प्रीता च भीता च वः ॥२८॥'

अत्र गौर्या विवाहमङ्गलानौचित्येनोत्पातरूपैरगदरजोनियोगादिभिर्भगवद्भूता गोनासादयो ज्ञाप्यन्ते, यथा वाताय कपिला विद्युदिति । ततश्चोत्पातेन ज्ञापितेचेति संबन्धस्योभयनिष्ठत्वात्तादर्थ्य इव लक्ष्यवाचिनश्चतुर्थी न लक्षणवाचिनः । तृतीयाविषयापहारादेकयैव च विभक्त्योभयगतस्यापि संबन्धस्य राज्ञः पुरुष इतिवदुक्तत्वात्तृतीयापि न भवति ॥

**गोनासायेति** । ननूत्पातेनाविष्टेन यज्ज्ञाप्यते तत्र चतुर्थीति लक्षणमेवास्या वाच्यं प्रतिभाति, नैतत् । लक्ष्यलक्षणभावोऽसावभिधीयते न तु लक्ष्ये······ । ततश्च यतो विधीयते तस्य लक्षणीयतामर्थादितरस्य लक्षणतां बोधयतीति । अगदरजःप्रभृतयस्तु कथममङ्गलरूपा इत्यवशिष्यते । तत्राह—**अत्र गौर्या इत्यादि** । ननु तथापि लक्षणवाचिन एव चतुर्थीति कथमवसितमित्यत आह—**ततश्चेति** । यथा तादर्थ्यस्योभयनिष्ठत्वेऽपि कङ्कणाय कनकमित्यत्र कार्यवाचिन एव चतुर्थी न तु कारणवाचिनः, तथेहापि संबन्धस्योभयाश्रयत्वेऽपि लक्ष्यवाचिन एव चतुर्थी नतु लक्षणवाचिन इत्यर्थः । तर्हि तृतीया कथं न भवतीत्यत आह—**एकयैव चेति** । संबन्धस्य संबन्धिनावेव विशेषस्तेन लक्षणमपि चतुर्थ्यैव प्रतिपादयत्यत आह—उक्तार्थत्वात्कथं तृतीया न भवतीति शुद्धप्रातिपदिकार्थाभिधाने प्रथमेति भावः ॥

सप्तमीवाच्यं भावलक्षणं यथा—

'इति शासति सेनान्यां गच्छतस्ताननेकधा।
निषिध्य हसता किंचित्तस्थे तत्रान्धकारिणा॥ २९॥'

अत्र सेनान्यः पलायमानगणानुशासनक्रिययान्धकारेः स्वप्रकाशनक्रिया लक्ष्यते यथा—'गोषु दुह्यमानासु गतः' इति। उपलक्षणं चैतत्। तेनान्यदपि भावलक्षणं शत्राद्यभिधेयमुपलक्ष्यते, यथात्रैव हसता तस्थे इति॥

'यस्य च भावेन भावलक्षणम् २।३।३७' इत्यस्य सूत्रस्यार्थस्तु यस्य वस्तुनो भावेन क्रियया वस्त्वन्तरस्य भावः क्रिया लक्ष्यते तद्वचनात्सप्तमीत्यत आह—**अत्र सेनान्य इति**। हसता तस्थ इति लक्षणे शतृविधिः 'लक्षणहेत्वोः क्रियायाः ३।२।१२६' इति सूत्रणात्॥

यथा वा—

'यज्वभिः संभृतं हव्यं विततेष्वध्वरेषु सः।
जातवेदोमुखान्मायी मिषतामाच्छिनत्ति नः॥ ३०॥'

इत्यनादरोपाधिके भावलक्षणे षष्ठ्यपि भवतीति॥

**अभावः प्रागभावादिभेदेनेह चतुर्विधः।**
**घटाभावादिभेदात्तु तस्य संख्या न विद्यते॥ १५॥**

अभावसामान्यमभावप्रमाणनिरूपणप्रस्तावे 'असत्तायाः पदार्थानाम्' इत्यनेन वक्ष्यति। तेनात्र सामान्यलक्षणं न कृतवान्। स द्विविधस्तादात्म्यप्रतियोगिकः, संसर्गप्रतियोगिकश्च। द्वितीयस्त्रिधा प्राक्प्रध्वंसात्यन्ताभावभेदात्। तदाह—**प्रागभावादिति**। ननु न प्रागभावादिरेकोऽस्ति प्रतियोगिभेदेन भेदादित्यत आह—**घटाभावादीति**। अनेन रूपेण संख्या नास्त्येव। सामान्यं तु प्रागभावत्वादिकमाश्रित्य चातुर्विध्यम्, सोऽयं तुशब्दस्यार्थः॥

तेषु प्रागभावो यथा—

'अनभ्यासेन विद्यानामसंसर्गेण धीमताम्।
अनिग्रहेण चाक्षाणां व्यसनं जायते नृणाम्॥ ३१॥'

अत्र विद्यानभ्यासादेः प्रागभावस्य व्यसनादिकारणत्वम् ॥

प्रध्वंसाभावो यथा—

'गतः कामकथोन्मादो गलितो यौवनज्वरः ।
गतो मोहश्च्युता तृष्णा कृतं पुण्याश्रमे मनः ॥ ३२ ॥'

अत्र कामकथोन्मादगमनादेः प्रध्वंसाभावस्य पुण्याश्रमानुसन्धान-कारणत्वम् ॥

**अनभ्यासेनेति** । यावद्विद्यां नाभ्यस्यन्ति तावन्न धीमद्भिः संसृज्यन्ते, यावच्चाक्षाणि न निगृह्णन्ति तावद्व्यसनमिति विवक्षितम् । तेन नात्यन्ताभावसंकरः । आराध्यास्त्वाहुः—'शिक्षापरस्यास्य श्लोकस्याप्यन्यप्रयोजनकतया नात्यन्ताभाव-संकरः' इति ॥

इतरेतराभावो यथा—

'वनान्यमूनि न गृहाण्येता नद्यो न योषितः ।
मृगा इमे न दायादास्तन्मे नन्दति मानसम् ॥ ३३ ॥'

अत्र वनानि अमूनि न गृहाणीत्यादेरितरेतराभावस्य मनःप्रमोद-कारणत्वम् ॥

**वनान्यमूनीति** । इदमिदं न भवतीति प्रतीतिसाक्षिक एवान्योन्याभावः । वैधर्म्यं तु भेदाख्यमलंकारान्तरं किंचिद्धर्ममन्तर्भाव्यैव स्वरूपस्यापि भेदव्यव-हारपात्रता ॥

अत्यन्ताभावो यथा—

'अत्यन्तमसदार्याणामनालोचितचेष्टितम् ।
अतस्तेषु विवर्धन्ते निर्विबन्धा विभूतयः ॥ ३४ ॥'

अत्रानालोचितचेष्टितस्यात्यन्ताभावो विभूतीनां निर्विघ्नवृद्धिहेतुः । एतेनाभावाभावोऽपि व्याख्यातः ।

अत्र प्रागभावाभावो यथा—

'उद्यानसहकाराणामनुद्भिन्ना न मञ्जरी।
देयः पथिकनारीणां सतिलः सलिलाञ्जलिः ॥ ३५ ॥'

अत्र वस्तुन उत्पादः प्रागभावाभाव उच्यते। तेनेह सहकारमञ्जरीमुद्भेदस्य पथिकनारीणां मरणे कारणत्वम् ॥

**वस्तुन उत्पाद इति**। भाव एवाभावाभावव्यवहारभूमिः। अभावव्यवहारविषयमात्रस्य च विभागः कृतोऽस्ति। प्रागभावादेः प्रध्वंसादिरूपतेति न न्यूनता विभागवाक्यस्याशङ्कनीया। **तेनेति**। भूतभव्यसमुच्चारणे भूतं भव्यायेति न्यायान्मञ्जरीणामुद्भेदस्य कारकतालाभोऽन्यथा वाक्यभेदे न किंचित्स्यात्। प्रागभावात्प्रागभावाभावभङ्ग्या च समस्तमञ्जरीसमुद्भेदेन वसन्तप्रौढिर्ध्वननात्प्रकृतविप्रलम्भः पोषः ॥

प्रध्वंसाभावाभावो यथा—

'पीनश्रोणि गभीरनाभि निभृतं मध्ये भृशोच्चस्तनं
पायाद्वः परिरब्धमब्धिदुहितुः कान्तेन कान्तं वपुः।
स्वावासानुपघातनिर्वृतमनास्तत्कालमीलद्दृशे
यस्मै सोऽच्युतनाभिपद्मवसतिर्वेधाः शिवं ध्यायति ॥३६॥'

अत्र यथोक्तेन वपुषा योऽयमालिङ्गनेऽपि विधिनिवासनाभिपङ्कजानुपघातः, स इह वस्तुनोऽवस्थानमेव प्रध्वंसाभावाभाव उच्यते। स चेहाच्युतनाभिपङ्कजनिवासिनो विधेर्मनोनिर्वाणकारणं भवति ॥

**पीनश्रोणीति**। निभृतं दुर्लक्ष्यम्। अब्धिदुहितापि सर्वाङ्गीणमाश्लेषमभिलषति भगवानपीति कान्तेन कान्तमित्येताभ्यामभिव्यज्यते। उपलक्षणं चेदम्। तादात्म्यात्यन्ताभावाभावावप्युदाहरणीयौ। यथा—'अवनिरुदकं तेजो वायुर्नभः शशिभास्करौ पुरुष इति यत्केचिद्भिन्ना वदन्ति तनूस्तव। तदनघ वचोवैचित्रीभिर्निरावरणस्य ते विदधति पयःपूरोन्मीलन्मृषा मिहिरोपमाम् ॥' अत्र भिन्न इत्यन्योन्याभावमुपन्यस्य निरावरणस्य मृषेत्येताभ्यां निषेधः। यथा च—'न विद्यते यद्यपि सर्ववासनागुणानुबन्धि प्रतिभानमद्भुतम्। श्रुतेन यत्नेन च वागु-

पासिता ध्रुवं करोत्येव कमप्यनुग्रहम् ॥' अत्र न विद्यत इत्यत्यन्ताभावमुपन्यस्य कमपीति प्रतिभासत्ताभिधानेन प्रतिषेधः ॥

**विदूरकार्यः सहजः कार्यानन्तरजस्तथा ।**
**युक्तो न युक्त इत्येवमसंख्याश्चित्रहेतवः ॥ १६ ॥**
**तेऽमी प्रयोगमार्गेषु गौणवृत्तिव्यपाश्रयाः ।**
**कार्याः काव्येषु वैचित्र्यं तथा ते कर्तुमीशते ॥ १७ ॥**

तेषु विदूरकार्यो यथा—

'अनश्नुवानेन युगोपमानमलब्धमौर्वीकिणलाञ्छनेन ।
अस्पृष्टखङ्गत्सरुणापि चासीद्रक्षावती तस्य भुजेन भूमिः ३७'

सोऽयं बाल्य एव नवयौवनकार्यकरणाद्विदूरकार्यो नाम चित्रहेतुः ॥

**विदूरकार्य इति** । कालान्तरभाव्यवस्थासंपाद्यं प्रागवस्थावत एव कार्यमुपजायमानं यत्रोच्यते स विदूरकार्यस्तच्च कार्यं शक्तिविशेषाधीनमिति बाल्येऽपि प्रभावातिशयदर्शनाद्भुजेनैव रक्षा कृतेति गौणवृत्तिव्यपाश्रयता ॥

सहजो यथा—

'सममेव समाक्रान्तं द्वयं द्विरदगामिना ।
तेन सिंहासनं पित्र्यमखिलं चारिमण्डलम् ॥ ३८ ॥'

अत्र राज्याभिषेकरिपुमण्डलाक्रमणयोर्हेतुहेतुमद्भावेन सत्यपि पौर्वापर्ये क्षिप्रकारित्वात्तुल्यमेव कार्यकारणभावो विवक्षितस्तेन सहजो नामायं चित्रहेतुः ॥

सहजः कार्ये सहोत्पत्तिकतया निबद्धः । कारणशक्तिप्रकर्षात्समकालमिव कार्यं प्रतिभासते, तेन हेतुशक्तिप्रकर्षाभिव्यक्तिरत्र मूलम् । 'यदग्रे ददाति यथा वा कर्तुमीशते' इति । एवमनन्तरजेऽपि किं कारणं पूर्वमुत कार्यमस्ति स एव व्यत्ययः । युक्तेऽपि कारणगुणानुविधायि कार्यमसदेवारोप्यते न प्रयुक्तेति तदेव विपरीतमिति गौणवृत्त्याश्रयता ॥

कार्यानन्तरजो यथा—

'पश्चात्पर्यस्य किरणानुदीर्णं चन्द्रमण्डलम् ।
प्रागेव हरिणाक्षीणामुदीर्णो रागसागरः ॥ ३९ ॥'

अत्र चन्द्रोदयलक्षणाद्धेतोः पूर्वकालमेव रागसागर उदीर्ण इति कार्यस्योदयलाभः । स इह गुणवृत्त्याश्रयणे हेतावतिशयं पुष्यतीत्ययं कार्यानन्तरजो नाम चित्रहेतुः ॥

युक्तो यथा—

'गुणानुरागमिश्रेण यशसा ते प्रसर्पता ।
दिग्वधूनां मुखे जातमकस्मादर्धकुङ्कुमम् ॥ ४० ॥'

अत्र दिग्वधूमुखेषु ते गुणानुरागः कुङ्कुमं, यशस्तु चन्दनमित्ययं युक्तो नाम गौणवृत्तिव्यपाश्रयश्चित्रहेतुः ॥

नयुक्तो यथा—

'न मीलयति पद्मानि न नभोऽप्यवगाहते ।
त्वन्मुखेन्दुर्ममासूनां हरणायैव यस्यति ॥ ४१ ॥'

अत्र मुखेन्दोः पद्मनिमीलनादि न युज्यत इति नयुक्तो नाम चित्रभेदः ॥

ननु व्यक्तिभेदेऽपि हेतोरसंख्यता चेद्विवक्षिता किमेवं शब्देनाधिकेनेत्यत आह—

एवं शब्दस्य प्रकारवाचित्वाद्व्यधिकरणादयः प्रयुज्यन्ते ॥

व्यधिकरणो यथा—

'सा बाला वयमप्रगल्भवयसः सा स्त्री वयं कातराः
सा पीनोन्नतिमत्पयोधरयुगं धत्ते सखेदा वयम् ।
साक्रान्ता जघनस्थलेन गुरुणा गन्तुं न शक्ता वयं
दोषैरन्यजनाश्रयैरपटवो जाताः स इत्यद्भुतम् ॥ ४२ ॥'

अत्राभिव्यक्तमेव व्यधिकरणत्वं कार्यकरणयोः प्रतीयत इत्ययं व्यधिकरणो नाम चित्रहेतुः ॥

**एवं शब्दस्येति** । प्रकारस्योपाधेरेव भेदो विवक्षितो न तु व्यक्तिमात्रस्येति भावः । **सा बालेति** । बाल्यादीनां सामानाधिकरण्य एव प्रागल्भ्यादिकं प्रति हेतुभावः प्रतीतः स इह गौणवृत्तिव्यपाश्रयतयोपनिबध्यमानः कान्तिमावहति । तथाहि । अन्यत्प्रागल्भ्यं बालायाः सरलालोकितवाञ्छिश्रणाद्यसामर्थ्यलक्षणम्, अन्यच्च नायकप्रकाण्डे कथमेषां नियन्त्रणा स्यादित्यनध्यवसायलक्षणम् । तयोश्च तद्भावापत्तिरत्र व्यक्तैव । एवं कातरत्वादौ बोध्यम् । आदिग्रहणेन स्वहेतुकतया कार्यहेतुकतया चोपनिबध्यमानः संकलितो भवति ॥

हेतोरनन्तरं तद्विपरीतमहेतुं लक्षयन्नाह—

**वस्तुनो वा स्वभावेन शक्तेर्वा हानिहेतुना ।**
**अकृतात्मीयकार्यः स्यादहेतुर्व्याहतस्तु यः ॥ १८ ॥**

**वस्तुन इति** । हेतुतया प्रतीतोऽपि कार्यं न करोतीत्यभिधीयमानोऽहेतुः । स द्विविधः । स्वरूपेण कार्यव्यभिचारी, व्यापारविरोधेन वा । तथाभूतोऽपि च कार्यं न करोति । तत्र द्वयं निबन्धनं यद्गतं कार्यमुपजनयितव्यं तस्य वस्तुनः स्वभावो हेतुत्वाभिमतस्य शक्तिहानिर्वा । सापि द्विधा—आत्यन्तिकोऽभावः, प्रतिबन्धमात्रं वा । तत्र वस्तुस्वभावेन शक्तेरत्यन्तासत्त्वेन च द्विरूपस्वरूपाव्यभिचारीकृतात्मीकार्य इत्यनेनोक्तम्, वस्तुस्वभावेन शक्तिप्रतिबन्धेन च द्विप्रकारोऽपि च व्यापाराव्यभिचारी व्याहतः, इत्यनेन यद्यपि शक्तिरत्यन्तासत्त्वे हेतुभाव एव न भवति, तथापि गुणवृत्त्या हेतुभावाध्यासो बोद्धव्यः । सा च गुणवृत्तिः श्लेषोपहितान्यादृशी भवति ।

ननु चात्र चेष्टाया हेतुत्वं तृतीयया प्रतीयत इति सा हेतुत्वेन वक्तुमुचितेत्यत आह—

तत्र वस्तुस्वभावेनाकृतकार्यो यथा—

'न विरचिता ललाटतटलास्यकरी भ्रुकुटि-
र्न परुषहुंकृतेन मधुरस्मितमन्तरितम् ।

न तव निशुम्भसंभ्रमवशादपि दारुणया
भगवति चेष्टया कलुषितं वदनाम्बुरुहम् ॥ ४३ ॥'

अत्र निशुम्भसंभ्रमस्य हेतोरनुत्पादितभ्रुकुट्यादिदारुणचेष्टाद्वारेण भगवतीमुखाम्बुरुहकालुष्यस्य करणे यदसामर्थ्यं तत्र तन्मुखाख्यस्य वस्तुनः स्वभावो निमित्तमिति स्वभावादनुत्पादितकार्योऽयमहेतुः ॥

अत्र निशुम्भेति ॥ भ्रुकुट्यादिदारुणचेष्टाद्वारेणेति । अन्यथा निशुम्भसंभ्रमवशादिति पञ्चमी असंगता स्यादिति भावः ॥

स एव शक्तेर्हानिहेतुना यथा—

'अनुरागवती संध्या दिवसस्तत्पुरःसरः ।
अहो दैवगतिश्चित्रा तथापि न समागमः ॥ ४४ ॥'

अत्रानुरागवत्त्वतत्पुरःसरत्वयोः समागमहेत्वोः सामर्थ्यविघाते दैवगतिः कारणमिति शक्तेर्हानिहेतुनायमकृतस्वकार्यो नामाऽहेतुः ॥

अनुरागो लौहित्यं प्रीतिश्च । पुरःसरोऽग्रे गमनशीलः संनिधौ स्थितश्च ॥

वस्तुनः स्वभावेन व्याहतो यथा—

'नीवीबन्धोच्छ्वसनशिथिलं यत्र यक्षाङ्गनानां
क्षौमं रागादनिभृतकरेष्वाक्षिपत्सु प्रियेषु ।
अर्चिस्तुङ्गानभिमुखगतान्प्राप्य रत्नप्रदीपा-
न्ह्रीमूढानां भवति विफलः प्रेरणाचूर्णमुष्टिः ॥४५॥'

अत्र रत्नप्रदीपनिर्वापणे चूर्णमुष्टेरपत्यक्तस्वरूपस्यापि विघाते रत्नप्रदीपाख्यवस्तुस्वभावः कारणमित्ययं वस्तुस्वभावेन व्याहतो नामाऽहेतुभूतः ॥

अमृतसेकजीवितकङ्कालशक्तिप्रतिबन्धे को हेतुरत आह—

स एव शक्तेर्हानिहेतुना यथा—

'शंभोरुद्धतनृत्यकर्मणि करे कङ्कालमाद्यं हरेः
संघट्टस्फुटितेन्दुमण्डलगलत्पीयूषसंजीवितम् ।

तत्कालप्रणते मुरद्विषि नवे दृष्ट्वा विलासं श्रियः
कुर्वत्कोपकषायितेन मनसा मिथ्योत्पुतीः पातु वः ॥४६॥'

अत्र कोपकषायितेन मनसस्तस्योत्पुतिकरणसमर्थस्यापीश्वरकरग्रहणान्मिथ्यापदाभिधीयमानः प्रतीतो व्याघातस्ततोऽयं शक्तेर्हानिहेतुना व्याहतो नामा हेतुभेदः ॥

**ईश्वरकरग्रहणादिति** । ननु कोपकषायितमनस्त्वमुत्पादितकार्यमेव कथमन्यथा कुर्वदित्युच्यतेऽत आह—**मिथ्यापदेति** ॥

इह केश्चित्कारणमाला पृथगलंकार इत्युक्तम्, पूर्वस्योत्तरोत्तरं प्रति हेतुभावोक्तिस्तल्लक्षणम् । स द्विविधोऽभिधीयमानः प्रतीयमानो वा । उभयथापि नाहेतोर्व्यतिरिच्यत इत्याह—

**यस्तु कारणमालेति हेतुसंतान उच्यते ।**
**पृथक्पृथगसामर्थ्यात्सोऽप्यहेतोर्न भिद्यते ॥ १९ ॥**
**एकोऽभिधीयमानेषु हेतुत्वेषु भवेत्तयोः ।**
**प्रतीयमानेष्वपरः कारणत्वेषु जायते ॥ २० ॥**

**यस्त्विति** । यद्यपि प्रथमस्य प्रथमं हेतुभावो निवृत्त एव तथाप्युत्तरस्य प्रथममुखनिरीक्षणप्रवृत्तस्योत्तरं प्रति हेतुभावोऽभिधीयते । न हि स्वतन्त्रस्यैव हेतुभावे कारणमाला भासते ॥

तदिदमेकदेशद्वारा व्यञ्जयन्नाह—

तयोराद्यो यथा—

'जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते ।
गुणाधिके पुंसि जनोऽनुरज्यते जनानुरागप्रभवाश्च संपदः ॥४७॥'

अत्र जितेन्द्रियत्वादीनामुत्तरोत्तरं प्रति हेतुभूतानामपि संपदुत्पत्तौ पूर्वपूर्वस्यव्यपेक्षायां समुदितानामेव कारणत्वं साधनादिपदैरभिधीयत इति सोऽयमभिधीयमानहेतुत्वकारणमालेत्यहेतुभेदः ॥

द्वितीयो यथा—

'पीणत्तुण दुग्गेज्जं जस्स भुरआअन्तणिट्ठुरपरिग्गहिअम् ।
रिट्ठस्स विसमवलिअं कंठं दुक्खेण जीविअं वोलीणम् ॥ ४८ ॥'

[पीनत्वेन दुर्ग्राह्यं यस्य भुजयोरन्तर्निष्ठुरपरिगृहीतम् ।
रिष्टस्य विषमवलितं कण्ठं दुःखेन जीवितमतिक्रान्तम् ॥]

अत्र जीवितदुःखातिक्रमणे कण्ठस्य वलनं, वलनस्य निष्ठुरग्रहणं, निष्ठुरग्रहणस्यापि पीनत्वेन दुर्ग्राह्यत्वं हेतुरिति प्रतीयमानकारणत्वं कारणमालेत्यहेतुभेदः ॥

**अत्र जितेन्द्रियत्वादीनामिति । अत्र जीवितदुःखातिक्रमण इति ।** यद्यत्र हेतुमाला न स्यात्तदा परस्परानपेक्षायामुपन्यासे वाक्यार्थपोषो(ऽपि) न स्यादिति ॥

लक्षणात्मकहेतुविशेषस्य साधर्म्यादनन्तरं सूक्ष्मं लक्षयति—

**इङ्गिताकारलक्ष्योऽर्थः सूक्ष्मः सूक्ष्मगुणात्तु सः ।**
**सूक्ष्मात्प्रत्यक्षतः सूक्ष्मोऽप्रत्यक्ष इति भिद्यते ॥ २१ ॥**
**वाच्यः प्रतीयमानश्च सूक्ष्मोऽत्र द्विविधो मतः ।**
**इङ्गिताकारलक्ष्यत्वं लक्ष्यसामान्यमेतयोः ॥ २२ ॥**

तत्रेङ्गितलक्ष्यमभिधीयमानसूक्ष्मं यथा—'तां प्रत्यभिव्यक्तमनोरथानाम्' इति । अत्र स्वयंवरमिलितानां राज्ञां राजपुत्रीं प्रति प्राप्तिलक्षणस्य मनोरथस्याभिधीयमानस्य शृङ्गारचेष्टात्मकेनेङ्गितेन व्यङ्ग्यत्वादयमिङ्गितलक्ष्योऽभिधीयमानः सूक्ष्मभेदः ॥

**इङ्गितेति ।** इङ्गितमाकार इङ्गिताकारौ चेत्यर्थः । शरीरावयवव्यापार इङ्गितम् । रूपादेरन्यथात्वमाकारः । सूक्ष्मार्थदर्शनं सूक्ष्ममित्यर्थगुणेषूक्तं तेन पौनरुक्त्यमाशङ्क्याह—**सूक्ष्मगुणात्तु स इति ।** हृदयसंवादभागित्रिचतुरहृदयसंवेद्यस्य । अत एवातिसूक्ष्मार्थस्य प्रलक्षायमाणत्वात्सूक्ष्मो नामार्थगुणः । यथाहि कवेः प्रतिभा सूक्ष्मविशेषोल्लेखिनी तथा तन्मूलकः शब्दोऽपीति स्फुटाभतया प्रत्यक्ष-

प्रमेयज्ञानमुत्पद्यते । तथाह्यन्योन्यसंवलितेत्यादौ दम्पत्योर्मिथोऽनुस्मृतिलक्षणस्य प्रेम्णः कतिपयसंवेद्यस्यापि शब्दबलात्प्रत्यक्षायमाणत्वमनुभवसिद्धमेव । तदेतदाह— **सूक्ष्मादप्रत्यक्षत इति** । सूक्ष्मालंकारे तु कविप्रतिभाया लिङ्गविषयत्वाच्छब्दोऽपि तद्विषय एव । लिङ्गाच्च प्रतीतिरुत्पद्यमाना सामान्यपुरस्कारेण प्रवृत्ता न प्रत्यक्षवत्तद्विशेषोल्लेखक्षमेति सूक्ष्मगुणवैधर्म्यम् । तदिदमुक्तम्—**सूक्ष्मोऽप्रत्यक्ष इति** । अत्र केचित्प्रतीयमानस्य सूक्ष्मस्य भाव इति संज्ञां विधायालंकारान्तरमुक्तं तदसत्, सूक्ष्मसामान्यलक्षणेन क्रोडीकरणादित्याह—**इङ्गिताकारलक्ष्यत्वमिति** । एतेन लक्ष्यत्वपुनरुक्त्याशङ्का परिहृता । **अत्र स्वयंवरेति** । न च शृङ्गारचेष्टाप्रत्यर्पितस्य मनोरथशब्देनाभिधीयमानमर्थं पुनरुक्तमिति वाच्यम् । नहि यथानुरागानुभावेन चित्तवृत्तयः स्फुटा उपस्थाप्यन्ते तथा स्वशब्देनेति विस्तरेण सप्रपञ्चमेव वक्ष्यामः । स्वशब्दस्तु किमर्थमित्यवशिष्यते तत्र ब्रूमः । स्वयंवरसमाजप्रवेशादिना येषां सामान्यत उत्कण्ठा प्रतीतिपथमवतीर्णासीत्तेषामिन्दुमतीसंनिधौ तदनुभावबलेनासंख्यसूक्ष्मविशेषवती सैवाभिव्यक्तेति दृढानुबन्धलक्षणस्य प्रेम्णः प्रकर्षकाष्ठां पुष्णाति । एवमन्यत्रापि ॥

तदेवाकारलक्ष्यं यथा—

'सा यूनि तस्मिन्नभिलाषबन्धं शशाक शालीनतया न वक्तुम् ।
रोमाञ्चलक्ष्येण स गात्रयष्टिं भित्त्वा निराक्रामदरालकेश्याः ॥४९॥'

अत्राभिलाषबन्धो रोमाञ्चलक्ष्येण गात्रयष्टिं भित्त्वा निराक्रामदित्यनेनाभिधीयमान आकारलक्ष्यः सूक्ष्मभेदोऽभिहितः ॥

तदेवोभयलक्ष्यं यथा—

'त्वदर्पितदृशस्तस्या गीतगोष्ठ्यामवर्धत ।
उद्दामरागपिशुना छाया कापि मुखाम्बुजे ॥ ५० ॥'

अत्र त्वदर्पितदृश इति इङ्गितच्छाया कापि मुखाम्बुज इत्याकारस्ताभ्यामुद्दामरागपिशुनेत्यनेनाभिधीयमानस्याननरागस्य सूक्ष्मरूपतया लक्ष्यमाणत्वादयमभिधीयमानोभयलक्ष्यः सूक्ष्मभेदः ॥

लक्षणात्मकहेतुविशेषस्य साधर्म्यादनन्तरं सूक्ष्मं लक्षयति—

प्रतीयमानमिङ्गितलक्ष्यं यथा—

'वाहित्ता पडिवअणं ण देइ रूसेइ एक्कमेक्कम्मि ।
अज्जा कज्जेण विणा पइप्पमाणे णईकच्छे ॥ ५१ ॥

[व्याहृता प्रतिवचनं न ददाति रुष्यत्येकैकस्मिन् ।
आर्या कार्येण विना प्रदीप्यमाने नदीकच्छे ॥]

अत्र प्रतिवचनादानं परिजनप्रकोपाभ्यां प्रदीप्यमाने नदीकच्छे इति हेतुना प्रत्याय्यमानः संकेतकुड्याङ्गदावोद्भववधूमनस्तापो वाक्यार्थत्वेन लक्षित इत्ययमिङ्गितलक्ष्यः प्रतीयमानः सूक्ष्मभेदः ॥

**अत्र प्रतिवचनादानमिति** । नहि प्रतिवचनप्रदानाभावमात्रमत्र चमत्कारकारि, तस्मादन्यथापि संभवात्, अतः प्रतिवचनप्रदानाभिप्राया विपरीतचित्तवृत्तिविशेषोन्नायिका समीपदेशापसरणादिलक्षणा क्रिया काचित्प्रतिवचनाप्रदानपदेनाभिमता । न च प्रकोपोऽप्यनुभवरूपतामनासादयन्स्वादनीयतामासादयतीति नूनं तेनापि भ्रूभङ्गादिरूपा क्रियैवाभिसंहितेत्याशयवतोक्तमिङ्गिताभ्यामिति । यद्येवं तर्हि काव्यशोभानिर्वाहात्किमन्येन लक्षिते नेति । नहि यथोक्तप्रतिवचनाद्यदानप्रकोपाभ्यां कश्चिद्विवक्षितार्थलाभ इति भावः ॥

प्रतीयमानमेवाकारलक्ष्यं यथा—

'सामाइ सामलीए अद्धच्छिप्पलोअमुहसोहा ।
जम्बूदलकअकण्णावअंसे भमिरे हलिअउत्ते ॥ ५२ ॥'

[श्यामायाः श्यामलतया अर्धाक्षिप्रलोक(न)मुखशोभा ।
जम्बूदलकृतकर्णावतंसे भ्रमति हलिकपुत्रे ॥]

अत्रार्धाक्षिप्रलोकनमुखश्यामताभ्यामाकाराभ्यां जम्बूदलकल्पितावतंस इत्यनेन प्रत्याय्यमानः संकेतगमनभ्रंशसंभवः श्यामाया मनस्तापो लक्ष्यत इत्ययमाकारलक्ष्यः प्रतीयमानः सूक्ष्मभेदः ॥

तदेवोभयलक्ष्यं यथा—

'प्रयच्छतोच्चैः कुसुमानि मानिनी विपक्षगोत्रं दयितेन लम्भिता ।
न किंचिदूचे चरणेन केवलं लिलेख बाष्पाकुललोचना भुवम् ५३'

अत्र चरणेन भूमिलेखनमिङ्गितं दृशोर्बाष्पाकुलत्वमाकारस्ताभ्यां गोत्रस्खलनोद्भवो मानिन्या मनस्तापः प्रतीयमान इतीङ्गिताकारलक्ष्यः सूक्ष्मभेदः ॥

विभज्यमानस्य सरूपतया सूक्ष्मानन्तरमुत्तरलक्षणमाह—

**पदार्थानां तु यः सारस्तदुत्तरमिहोच्यते ।**
**स धर्मधर्मिरूपाभ्यां व्यतिरेकाच्च भिद्यते ॥ २३ ॥**

**पदार्थानां त्विति** । सारः सर्वस्वायमानमुत्कर्षशालि वस्तु । पदार्थानामिति निर्धारणे षष्ठी । उत्तरमित्यन्वर्थं नाम । उत्कृष्टत्वमुदोऽर्थस्तत्रैव प्रकर्षस्तरपः । **धर्मधर्मिरूपाभ्यामिति** । व्यस्तसमस्ताभ्याम् । धर्मं उपसर्जनं परप्रवणतया प्रतीयमानं वस्तु । अतथाभूतं तु धर्मिरूपम् । तदयमर्थः—प्रसिद्धवस्तुमध्ये कस्यचिदुत्कर्षवत्तया निर्धारणमुत्तरम् । तत्रिधा । धर्मरूपं धर्मिरूपमुभयं च । आद्ययोः प्रत्येकं प्रकारद्वयम् । निर्धार्यमाणस्य शुद्धस्योपादानं, निर्धार्यानुत्तरव्यतिरेकिधर्मवत्तया वा । तदिदमाह—**व्यतिरेकाच्चेति** । अन्त्यस्यापि सामान्यविशेषरूपतया रूपत्वमिति षट्प्रकारमुत्तरमिति ॥

तेषु धर्मस्वरूपं यथा—

'दानं वित्तादृतं वाचः कीर्तिधर्मौ तथायुषः ।
परोपकरणं कायादसारात्सारमुद्धरेत् ॥ ५४ ॥'

अत्र दानसत्यकीर्त्यादीनां वित्तादिवस्तुधर्माणां सारभूतानामुद्धारादयं धर्मरूपः सारः ॥

**वित्तादिवस्तुधर्माणामिति** । पञ्चम्या विभागः प्रत्यायितः । स च संश्लेषपूर्वक एवेति दानादीनामुपसर्जनताप्रतीतिः ॥

धर्मिरूपो यथा—

'मधुविकचसितोत्पलावतंसं शशिकरपल्लवितं च हर्म्यपृष्ठम् ।
मदनजनितविभ्रमा च कान्ता सुखमिदमर्थवतां विभूतयोऽन्याः ॥'

अत्र मधुप्रभृतीनां विभूतिभ्यः सारभूतानामुद्धरणादयं धर्मिरूपः सारः ॥

**विभूतिभ्य इति** । विभूतयः प्रथमानिर्दिष्टास्तेन पूर्ववन्नामूषां धर्मिभावेन प्रतीतिभासोऽस्तीति विशिष्टमध्वादिरूपं वस्तुनाङ्गभावेन गम्यत इति ॥

अथ व्यतिरेकेण धर्मरूपो यथा—

'पोढमहिलाणं जज्जं सुसिक्खिअं तं रए सुहावेइ ।
जज्जं असिक्खिअं णववहूणं तंतं रइं देइ ॥ ५६ ॥'

[प्रौढमहिलानां यद्यत्सुशिक्षितं तद्रतौ सुखयति ।
यद्यदशिक्षितं नववधूनां तत्तद्रतिं ददाति ॥]

अत्र प्रौढानां सुशिक्षितं सुरतकर्म, अप्रौढस्त्रीणां पुनरशिक्षितं सुखयतीति कर्मान्तरलक्षणेभ्यो धर्मेभ्यः सुशिक्षिताशिक्षितरतकर्मलक्षणा धर्माः स्त्रीधर्माव्यतिरेकेण प्रतिपाद्यन्त इति धर्मव्यतिरेकरूपोऽयं सारः ॥

**अप्रौढस्त्रीणामिति** । षष्ठ्या धर्मधर्मिभावोऽभिहितः । तर्हि निर्धारणं कस्मादित्यत आह—**कर्मान्तरेति** । रत इत्यनेन सामान्यत उपादानात् प्रौढस्त्रीसंबन्धिनो ललितस्य सुशिक्षितत्वं विशेषमुपादाय मुग्धस्त्रीसंबन्धिनोऽशिक्षितत्वं व्यतिरेकी विशेष उपात्तः ॥

व्यतिरेकेण धर्मिरूपो यथा—

'राज्ये सारं वसुधा वसुधायां पत्तनं पुरे सौधम् ।
सौधे तल्पं तल्पे वराङ्गनानङ्गसर्वस्वम् ॥ ५७ ॥'

अत्र वसुधादयो धर्मिण उत्तरोत्तरक्रमेण पूर्वतः पूर्वतो व्यतिरिच्यन्त इत्ययं धर्मव्यतिरेकः सारः ॥

**अत्र वसुधादय इति** । निर्धारिताद्वसुधामात्रात्पत्तनवती वसुधा व्यतिरिच्यते । वसुधावत्पत्तनात्सौधवत्पत्तनम् । सौधात्तल्पवत्सौधात्तल्पाद्वराङ्गनावदिति तदिदमुक्तं **उत्तरोत्तरक्रमेणेति** ॥

एतेन धर्मधर्मिस्वरूपोऽपि व्याख्यातः । स द्विधा । सामान्यतो विशेषतश्च ॥

तत्र सामान्यतो यथा—

'गीतशीतांशुताम्बूलकर्पूरवनितादिभिः ।
असारोऽप्येष संसारः सारवानिव लक्ष्यते ॥ ५८ ॥'

अत्र गीतादीनां जगतः सारभूतानामविशेषेणैव सर्वेषामुपादानाद्धेतुतृतीयान्ततया च संसारसारवत्त्वेऽङ्गभावादयं सामान्यतो धर्मधर्मिरूपः सारः ॥

**अत्र गीतादीनामिति** । नहि गीतादौ कश्चिद्विशेष उक्तः । अत एवादिशब्दोऽपि सजीवस्तथापि दध्यादीनामङ्गभावः प्रतीयत इत्यत आह—**तृतीयान्ततया चेति** । तृतीयया हि कारकत्वमुक्तम्, कारकत्वं च क्रियोपसर्जनरूपमित्यर्थः ॥

विशेषतो यथा—

'अवैमि पूतमात्मानं द्वयेनैव द्विजोत्तमाः ।
मूर्ध्नि गङ्गाप्रपातेन धौतपादाम्भसा च वः ॥ ५९ ॥'

अत्र गङ्गाप्रपातसप्तर्षिपादोदकयोर्विशेषेण सारभूतयोरुपादानाद्धिमवतः पूतत्वे चाङ्गभूतत्वादयं विशेषतो धर्मधर्मिरूपः सारः ॥

**अत्र गङ्गाप्रपातेति** । प्रपातपादोदकयोर्गङ्गायाः सप्तर्षिभिश्च विशेषितत्वादङ्गतामुपपादयति—**हिमवतः पूतत्वे चेति** ॥

व्यतिरेकोत्तरे विरुद्धधर्माक्रान्तिरस्तीति सङ्गत्या विरोधलक्षणमाह—

**विरोधस्तु पदार्थानां परस्परमसङ्गतिः ।**
**असङ्गतिः प्रत्यनीकमधिकं विषमश्च सः ॥ २४ ॥**

**विरोधस्त्विति** । परस्परमसङ्गतिरसंबन्धः, सहानवस्थानमिति यावत् । तेन सहानवस्थाननियतयोः सहानवस्थानोक्तिर्विरोध इति तात्पर्यम् । संक्षेपः स च प्ररूढो दोषः । अप्ररोहस्तु द्विधा । श्लेषोपधानेनान्यथा चान्यथाभावस्त्रिधा । सहानवस्थितयोः प्रायोदर्शनमात्रेण नैयत्यारोपः । यथा—'क युवतिमार्दव'मित्यादौ विरुद्धधर्मोक्तिविषयस्याचिन्त्यप्रभावातिशयत्वेन प्रसिद्धिर्वा । यथा 'दिग्वासा यदी'त्यादौ विरोधस्यारोपमात्रेण सरूपतया प्रतिपत्तिमात्रं वा । यथा 'सा उप्पडी' त्यादौ । सर्वश्चायं विरोधोऽभिधीयमानः प्रतीयमानश्च । अथादिशब्देन योऽभिधीयते सोऽभिधीयमानः । प्रतीयमानस्तु तद्विनाकृतो यथा भट्टबाणस्य 'यत्र मातङ्गगामिन्यः शीलवत्यश्च गौर्यो विभवरताश्च श्यामाः पद्मरागिण्यश्च धवलद्विजशुचिवदना मदिरामोदिश्वसनाः प्रमदाः' इति । इहान्यैरलंकारकारैरसंगतिप्रत्यानीकाधिकाविषमाख्यमलंकारचतुष्टयं विरोधात्पृथग्लक्षितम् । तल्लक्षणानि—'विरुद्धकार्यसंप्राप्तिर्भवेत्तेनैव हेतुना । परिमाणादियोगेन व्यवस्थानमुपेयुषः ॥ अव्यवस्थाभिधानं यदधिकं तत्प्रचक्षते । कारणेन विरूपं यत्कार्यमुक्तावदुच्यते ॥ आश्चर्यकारि तत्प्राहुर्विषमं शब्दबुद्धयः ।' इति । तदेतेषां लक्षणाभेदाद्विरोध एवान्तर्भावो न ह्यवान्तरभङ्गिभेदमात्रेण सामान्यान्तर्भावो न भवतीत्याशयवानाह—**असङ्गतिः प्रत्यनीकमिति** ॥

तेषु विरोधः शुद्धो ग्रथितश्च । तयोराद्यो यथा—

'क युवतिमार्दवं क च महाहवदारुणता
क च वलयी करः क करिदन्तजमुष्टिरसिः ।
क च नवयौवनं क कुसुमायुधनिःस्पृहता
तव ललनाविचेष्टितविरुद्धमहो ललितम् ॥ ६० ॥'

अत्र युवतिमार्दवादीनां महाहवदारुणतादीनां च शुद्धानामेव परस्परमसंगतत्वादयं शुद्धविरोधः ॥

**शुद्धानामेवेति** । एकेनैव प्रतियोगिना सहानवस्थानोक्तौ विरोधनिर्वाहात् ॥

द्वितीयो यथा—

'दिग्वासा यदि तत्किमस्य धनुषा शस्त्रस्य किं भस्मना
भस्माथास्य किमङ्गना यदि च सा कामं परिद्वेष्टि किम् ।

इत्यन्योन्यविरुद्धचेष्टितमिदं पश्यन्निजस्वामिनो
भृङ्गीसान्द्रशिरावनद्धपरुषं धत्तेऽस्थिशेषं वपुः ॥ ६१ ॥'

अत्र दिग्वासस्त्वादीनामुत्तरोत्तरप्रथनादन्योन्यासंगतादयं प्रथित-नामा विरोधभेदः ॥

**उत्तरोत्तरप्रथनादिति** । यद्यप्येकेन विरोधिना सहोक्तौ विरोध्यन्तरेणापि तथा भावमासादयन्नेव प्रथितस्तथाप्युत्तरप्रथनया शोभाविशेषार्पको भवतीत्यभि-प्रायः ॥

असङ्गतिर्यथा—

'सा उप्पडी गोट्ठउहि णोक्खी कावि विसगण्ठि ।
भिडिय पचेल्लिउ सो मरइ जस्स ण लग्गइ कण्ठि ॥६२॥'

[सा उत्पन्ना गोष्ठभुवि नवीनैव कापि विषग्रन्थिः ।
भियते प्रत्युत स म्रियते यस्य न लगति कण्ठे ॥]

अत्रायं विषग्रन्थिर्यस्य कण्ठे न लगति स म्रियत इत्येतयोः परस्प-रमसङ्गतेरयमसङ्गतिर्नाम विरोधः ॥

**गोट्ठउहीति** । गोष्ठे । णोक्खी अपूर्वा । कावि विसगण्ठि कापि विषग्रन्थिः । 'रोमाञ्चादयस्त्रियाम्' इति स्त्रीलिङ्गता । पचेल्लिउ प्रत्युत । विषग्रन्थेः कण्ठसंबन्धेन मारकत्वं प्रतीतम् । वर्ण्यमानाया रूपस्य तथाभूतस्यैवेति व्यक्तो विरोधः ॥

प्रत्यनीकं यथा—

'उत्कण्ठा संतापो रणरणको जागरस्तनोस्तनुता ।
फलमिदमहो मयाप्तं सुखाय मृगलोचनां दृष्ट्वा ॥ ६३ ॥

अत्र मृगलोचनादर्शनस्यैव किल निर्वृतिः फलम् । मया तु तां दृष्ट्वा-न्संतापादिकं मयाप्तमिति प्रत्यनीकफलत्वादयं प्रत्यनीकाख्यो विरोधः ॥

**अत्र मृगलोचनादर्शनस्यैवेति** । यद्यप्येकस्य विरुद्धं कार्यकारित्वं न विरुद्धं, तथापि यथैव प्रवृत्त्या किंचित्कार्यं कर्तुमुद्यतो न तथैव तद्विरुद्धं करोति तदेतत्सुखायेति चतुर्थ्या द्योत्यते ॥

अधिको यथा—

'एको दाशरथिः कामं यातुधानाः सहस्रशः ।
ते तु यावन्त एवाजौ तावद्धा ददृशे स तैः ॥ ६४ ॥'

अत्रैकस्य दाशरथेरनेकसंख्यैर्यातुधानैर्यत्समरकर्म तत्र तैरस्य तावद्धा दृश्यमानत्वेनैकसंख्याविरुद्धमाधिक्यं गम्यत इत्ययमधिकाख्यो विरोधः॥

विषमं यथा—

'दिशामलीकालकभङ्गतां गतस्त्रयीवधूकर्णतमालपल्लवः ।
चकार यस्याध्वरधूमसंचयो मलीमसः शुक्लतरं भवद्यशः ॥६५॥'

अत्र मलीमसाध्वरधूमसंचयेन यद्यशसः शुक्लीकरणं तद्यादृशादेव जायते तादृगेव भवतीति प्रसिद्धेर्वैषम्यात्परस्परमसङ्गतेरयं विषमाख्यो विरोधः ॥

सामग्र्येकदेशसद्भावमात्रेण कार्यसद्भावे स्थिते 'विरोधच्छायामूलत्वमिति तदनन्तरं संभवः प्राप्तावसर इत्याह—

**प्रभूतकरणालोकात्स्यादेवमिति संभवः ।**
**स विधौ वा निषेधे वा द्वये वा न द्वयेऽपि वा ॥ २५॥**

**प्रभूतेति** । भूयांसि कारणानि दृष्ट्वा कार्यमुत्पत्स्यते नापि दैवात्कदाचिन्न स्यादिति ज्ञानसंभवः । न चायं संशय एव नहि स्याद्वा नवेति दोलायते । नापि वितर्को व्याप्यारोपस्याभावात् । क्व तर्ह्ययमन्तर्भवति न क्वचित्, ज्ञानान्तरस्यैवोच्यमानत्वात्, अनिश्चयरूपतामात्रेण तत्रान्तर्भावेऽतिप्रसङ्गात्, नापि भ्रान्तिर्न्यग्भूतबाधपुरःसरत्वात् । भ्रान्तौ तु सिद्धायां बाधोत्पत्तिरिति वक्ष्यते 'स विधौ वा निषेधे वा' इति । संभवो विषयनियतो विधिनिषेधोभयानुभयरूपश्चतुर्विधो विषयः । अप्रवृत्तप्रवर्तनं द्विरूपम् । प्रयोजकगतं प्रयोज्यगतं च । आद्यं प्रत्युक्तयाख्ये शब्दालंकारे विधिद्वारेणेत्यनेनोक्तम्, द्वितीयं तु भूतभवनलक्षणमिहोच्यते । संप्रसक्तस्याभावो निषेधः । एतेनोभयानुभयरूपौ व्याख्यातौ ॥

एषु विधिविषयो यथा—

'त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे
तस्याः सिन्धोः पृथुमपि तनुं दूरभावात्प्रवाहम् ।
प्रेक्षिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टी-
रेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम् ॥ ६६ ॥'

अत्र त्वयि जलमादातुमवनते सति तस्याः सरितः प्रवाहो मध्यनिविष्टेन्द्रनीलमणिर्मुक्तागुण इव गगनगतिप्रेक्षणीयो भविष्यतीति विधेः संभाव्यमानत्वादयं विधिविषयः संभवः ॥

**अत्र त्वयि जलमिति** । अप्रेक्षणीयस्य प्रेक्षणीयताभवनं विधिः ॥

निषेधविषयो यथा—

'परस्य भूयान्विवरेऽभियोगः प्रसह्य संरक्षणमात्मरन्ध्रे ।
भीष्मेऽप्यसंभाव्यमिदं गुरौ वा न संभवत्येव वनेचरेषु ॥ ६७ ॥'

अत्रेदं भीष्मद्रोणयोरसंभाव्यमानं धनुर्वेदकौशलमस्मिन्वनेचरे न संभवतीति निषेधविषयः संभवः ॥

**अस्मिन्वनेचर इति** । परविवराभियोगे स्वविवररक्षारूपबहुतरकारणालोकाभावं वनेचर इति निषेध एव संभाव्यते ॥

विधिनिषेधविषयो यथा—

'उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं यियासोः
कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते ।
मुक्तापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः
प्रत्युद्यातः कथमपि भवान्गन्तुमाशु व्यवस्येत् ॥ ६८ ॥'

अत्र द्रुतमपि यियासोः कालक्षेपं तवोत्पश्यामीति विधिरूपः कथमपि न भवान् गन्तुमाशु व्यवस्येदिति निषेधरूपस्तदेवं विधिनिषेधयोरसंभाव्यमानत्वादयमुभयविषयः संभवः ॥ ३ ॥

**कालक्षेपं तवोत्पश्यामीति** । उत्पश्यामि संभावयामि । अकालक्षेपवतः कालक्षेपभवनं विधिः । कथमपीति काकूपस्थितो गमनाभावो निषेधः । न च वाच्यं द्वावत्र संभवौ । तथा च नैकोऽप्युभयविषय इति । यतो येव कालक्षेपसामग्री सैव शुक्लापाङ्गैरित्यादि कारणसहकृता निषेधमपि विषयीकरोति । अतः संभवभेदेनं किंचित्प्रमाणमिति ॥

अनुभयविषयो यथा—

'तस्याः पातुं सुरगज इव व्योम्नि पूर्वार्धलम्बी
त्वं चेदच्छस्फटिकविशदं तर्कयेस्तिर्यगम्भः ।
संसर्पन्त्याः सदसि भवतः स्रोतसि च्छायया सा
स्यादस्थानोपगतयमुना संगमेनाभिरामा ॥ ६९ ॥'

अत्र यदि त्वमेवं कुर्यास्तदैवं स्यादिति विधिनिषेधयोरनवगतेरयमनुभयविषयः संभवः ॥

**अत्र यदि त्वमेवं कुर्या इति** । न तावदत्राभावः प्रतीयत इति न निषेधसंभवः । विधिसंभवोऽपि नास्ति । यो हि व्यवस्थितकारणदर्शनेन व्यवस्थितस्यैव भवनस्य संभवः स विधिसंभवशब्देनाभिधीयते, नचेह तथा । तदिदमुक्तं **अनवगतेरिति** ॥

एतेन विधिनिषेधयोर्विकल्पविषयोऽपि व्याख्यातः । यथा—

'यदि भवति मुखानां वाक्पटूनां सहस्रं
निरुपममवधानं जीवितं चातिदीर्घम् ।
कमलमुखि तथापि क्ष्मापतेस्तस्य कर्तुं
सकलगुणविचारः शक्यते वा नवेति ॥ ७० ॥'

तदेतन्निगदेनैव व्याख्यातम् ॥

**तदेतन्निगदेनेति** । परस्परव्यभिचारिणोरेकत्र संभाव्यमानत्वादिति व्यक्तौ विकल्प इत्यर्थः ॥

पूर्वेषां संभवलक्षणमुपन्यस्य दूषयति—

**द्रोणस्य संभवः खार्यां शते पञ्चाशतो यथा ।**
**तथान्ये संभवं प्राहुः सोऽनुमानान्न भिद्यते ॥ २६ ॥**
**भिद्यते तु यद्यनिश्चयः स्यात् ।**

**द्रोणस्येति** । समुदायज्ञानादेकदेशज्ञानसंभव इति प्राच्यानामभिप्रायः । तथा च समुदायस्य समुदायिव्याप्तत्वादियं खारी द्रोणवती खारीत्वादिति सुलभम् । अनुमान एवास्यान्तर्भाव इत्यर्थः । कथं तर्हि तवापि संभवो भिद्यते सामग्री कार्यव्याप्तेति तत्राप्यनुमानमेव भविष्यतीत्यत आह—**भिद्यत इति** । नहि सामग्री दृष्टा यतः कार्यमनुमीयते, किंतु प्रभूतकारणदर्शनेन कार्यस्य ज्ञानमन्यदेवोत्पद्यत इति वक्तव्यम् । तथा चास्माकं दर्शने युक्तः पृथग्भावः ॥

यस्तूदाहरणविशेषं न प्रतिसंधत्ते तं बोधयितुमुदाहरणान्तरमाह—

यथा—

'रुद्धापाङ्गप्रसरमलकैरञ्जनस्नेहशून्यं
　प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम् ।
त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्या
　मीनक्षोभाकुलकुवलयश्रीतुलामेष्यतीति ॥ ७१ ॥'

अत्र यथा खार्यां द्रोणः शते पञ्चाशदिति नियमो नैवं विप्रलम्भेऽलकानामकल्पनमनञ्जनमक्ष्णोर्मधुनो वा प्रत्यादेशः, सुहृदुदन्तलाभारम्भे वा नयनस्पन्दनानि, संभाव्यन्ते च प्रभूतकारणलोकादित्येषोऽपि विधिरूप एव संभव इति ॥

**रुद्धापाङ्गेत्यादि** । एवं विश्लेषदुःखेन कर्शिता यथाऽचेतनामप्यलकानां करुणोत्पन्नैव लक्ष्यते । तस्मादियं मा जलधरं द्राक्षीदिति निसर्गचपलस्यापाङ्गस्य प्रसरमवरुन्धन्ति । स्नेहपदेन नयनाञ्जनयोरनुपधिरनुबन्धो व्यज्यते । तेन मिथो मैत्रीयोग्यत्वम् । तेन तन्नयनादन्यत्र नाञ्जनं कान्तिमाप्नोतीति कोऽपि लावण्यप्रकर्षस्तथाभूतस्याप्यञ्जनस्य त्यागे यदेकताततया नात्मानमपि प्रतिसंधातुं समर्थेति व्यनक्ति । एवं संपदान्तरेष्वपि स्वरसोऽनुसंधेयः । विप्रलम्भरूपकारणालोकाच्चोपरि-

नयनस्पन्दनं संभाव्यत इति संभवद्वयमत्रेति व्याख्यानेन स्फुटयति—अत्र यथा स्वार्यामिति॥

परस्परोपकारकयोरेकस्य विशेषं दृष्ट्वापरस्य विशेषो ज्ञायत इति संभवसाम्यात्तदनन्तरमन्योन्यलक्षणमाह—

**अन्योन्यमुपकारो यस्तदन्योन्यं त्रिधा च तत्।**
**वाच्यं प्रतीयमानं च तृतीयमुभयात्मकम्॥ २७॥**
**अन्योन्यचूलिकान्योन्यभ्रान्तिरन्योन्यमेकता।**
**अन्योन्यालंकृतेरन्तस्त्रयमेतदिहेष्यते॥ २८॥**

**अन्योन्यमिति।** विशेषार्पणमुपकारो न चेयं परिवृत्तिः स्थितस्यानपनयनात् दानप्रतिदानाभावाच्च। विशेषस्तु नानारूपस्तद्वाक्यार्थीभूतरसानुगामितया तत्र तत्रोन्नीयते। विभागं दर्शयति—**त्रिधेति**। अभिधीयमानं विशेषतः शब्देनोपात्तं सामान्यतः शब्देन विषयीकृतं विशेषतस्तु प्रतीयमानमेवेत्युभयात्मकम्। द्वाभ्यामन्यतोऽप्रतीयमानम्। अन्यान्यचूलिकादिलक्षणानि ग्रन्थकार एव स्फुटीकरिष्यति॥

तेष्वभिधीयमानमन्योन्यमिह यथा—

'कण्ठस्य तस्य स्तनबन्धुरस्य मुक्ताकलापस्य च निस्तलस्य।
अन्योन्यशोभाजननाद्बभूव साधारणो भूषणभूष्यभावः॥ ७२॥'

अत्रान्योन्यशोभाजननेत्यादिनोपकार्योपकारकभावस्य द्वयोरप्यभिहितत्वादभिधीयमानमिदमन्योन्यम्॥

**कण्ठस्येति।** बन्धुरो नम्रः। निस्तलो वर्तुलः॥

प्रतीयमानं यथा—

'उद्धच्छो पिअइ जलं जह जह विरलङ्गुली चिरं पहिओ।
पाआवलिआ वि तह तह धारं तणुअम्पि तणुएई॥ ७३॥'

[उद्धूर्ध्वः पिबति जलं यथा यथा विरलाङ्गुलिश्चिरं पथिकः।
प्रपापालिकापि तथा तथा धारां तनुमपि तनूकरोति॥]

अत्र पथिकप्रपापालिकयोर्मिथोऽनुरागो यदेकस्य विरलाङ्गुलिना करेण पानीयपानमन्यस्याः सुतरां वारिधारातनूकरणं तेन परस्परमुपकार्योपकारकभावात्प्रतीयमानमिदमन्योन्यम् ॥

अत्र पथिकेति । मिथोऽनुराग इत्यनेन परस्परानुरागसंवर्धनमेवात्र विशेषार्पणमिति मतम् । तथा हि करस्य विरलाङ्गुलिकरणे कथमहमेतां चिराय पश्यामीति प्रपापालिकाभिप्राय एव वर्धितो भवति । एवमपि वारिधारातनूकरणे बोद्धव्यम् । न चायमेवंविधोऽर्थः केनापि शब्देनाभिहित इति भवति प्रतीयमानता वक्तृप्रतिपाद्यादिविशेषपर्यालोचनेनैव ध्वननमुन्मिषति ॥

प्रतीयमानाभिधीयमानं यथा—

'गोलाविसमोआरच्छलेण अप्पा उरम्मि से मुक्को ।
अणुअम्पाणिद्दोसं तेण वि सा गाढमुअऊढा ॥ ७४ ॥'

[गोदाविषमावतारच्छलेन आत्मा उरसि अस्य मुक्तः ।
अनुकम्पानिर्दोषं तेनापि सा गाढमुपगूढा ॥]

अत्र गोदावरीविषमावतारव्याजेन तया तस्योरसि आत्मा क्षिप्तस्तेनाप्यनुकम्पा निर्दोषा सा गाढमुपगूढेत्यभिधीयमानः परस्परमनुरागादुपकार्योपकारकभावः प्रतीयत इत्युभयात्मकमिदमन्योन्यम् ॥

अत्र गोदावरीति । पूर्ववत्प्रतीयमानोऽपि परस्परमुपकारस्थलेनानुकम्पानिर्दोषशब्दाभ्यामभिधया स्पृश्यत इत्युभयरूपम् । न च शब्दोपात्ते किं ध्वननेनेति वाच्यम् । भिन्नविषयत्वात् ॥

अन्योन्यचूडिका यथा—

'शशिना च निशा निशया च शशी शशिना निशया च यथा गगनम् ।
भवता च सभा सभया च भवान् सभया भवता च तथा भुवनम् ७५'

अत्र निशाशशिनोः सभाभवतोश्च परस्परमुपकार्योपकारकभावे वर्तमानयोर्यदिदं गगनं जगती च प्रसिद्धयोरुपकारकत्वचूडिकेवोपर्युपरि लभ्यते सेयमन्योन्यचूडिका ॥

**अत्र निशाशशिनोरिति** । चूडिका शिखा । सा यथा शरीरतदवयवेभ्यो भिन्नैवोपलक्ष्यते तथात्रापि निशाशशिनोः सभाभवतोः परस्परमुपकारकत्वमभिसंधाय द्वयोर्द्वयोर्गगनजगती प्रत्युपकारकत्वमन्यदेवाभिधीयते । न चैतावतैव विशेषेण पृथग्भावोऽन्योन्यालंकारकवलीकृतस्यैव तस्य संभवात् ॥

अन्योन्यभ्रान्तिर्यथा—

'जम्बूनां कुसुमोत्करे नवमधुन्यारब्धपानोत्सवाः
कीराः पक्वफलाशया मधुकरीश्चुम्बन्ति मुञ्चन्ति च ।
एतेषामपि नीलकिंशुकदलैरेभिः समानत्विषां
पुष्पभ्रान्तिभिरापतन्ति सहसा चञ्चूषु भृङ्गाङ्गनाः ॥ ७८ ॥'

अत्र जम्बूकुसुमकुञ्जस्थितमधुकरीषु शुकशकुन्तानां या पक्वजम्बूफलभ्रान्तिर्या च मधुकरीणां शुकचञ्चुषु किंशुककुसुमभ्रान्तिः सेयमन्योन्यभ्रान्तिरन्योन्यस्मादपृथगेव ॥

**अत्र जम्बूकुसुमेति** । न हि तैमिरिककेशप्रत्ययवद्भ्रान्तेरलंकारतापि तद्भूतसादृश्यमूलत्वा एव । तथा च चमत्कारिवस्त्वन्तरोपमापर्यवसायित्वमिति भ्रान्तिसंसर्ग एव विशेषार्पण उपकारः । अन्योन्यवचनेन परस्परगामिता तस्य तेनैव दर्शितेत्यन्योन्यलक्षणाश्लेषात्कथं पृथग्भवतीति । एतेनान्योन्यैकता व्याख्याता ॥

अन्योन्यात्मकता यथा—

'प्रफुल्लतापिच्छनिभैरभीषुभिः शुभैश्च सप्तच्छदपांसुपाण्डुभिः ।
परस्परेण च्छुरितामलच्छवी तदेकवर्णाविव तौ बभूवतुः ॥७७॥'

अत्र श्यामपाण्डुतयोः परस्परव्यतिरेकेणैकवर्णकरणादन्योन्यमेकता नाम भ्रान्तिभेदोऽन्योन्यात्पृथगेव ॥

परस्परनिरूप्यतासाम्यात्क्रमप्राप्तां परिवृत्तिं निरूपयति—

**व्यत्ययो वस्तुनो यस्तु यो वा विनिमयो मिथः ।**
**परिवृत्तिरिहोक्ता सा काव्यालंकारलक्षणे ॥ २९ ॥**

व्यत्यय इति । वस्तुस्थितिविपर्यासवचनं परिवृत्तिरिति स्फुटमेव लक्षणम् ॥

सा त्रिधा व्यत्ययवती तथा विनिमयात्मिका ।
तृतीया चोभयवती निर्दिष्टा काव्यसूरिभिः ॥ ३० ॥

सा त्रिधा—एकस्थानस्थितस्य वस्तुनः स्थानान्तरप्राप्तिवचनेन, दानप्रतिदानवचनेन, उभयवचनेन वा । तदाह—सा त्रिधेति ॥

सर्वत्र मुख्यवृत्त्या गौणवृत्तिव्यपाश्रयेण वा तथाभावोक्तिरिति षट्प्रकारत्वं दर्शयति—

त्रिधापि चासौ मुख्यामुख्यभेदाद्द्विधाभूय षोढा संपद्यते ।

तासु व्यत्ययवती मुख्या यथा—

'कुमुदवनमपश्रि श्रीमदम्भोजषण्डं
त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः ।
उदयमहिमरश्मिर्याति शीतांशुरस्तं
हतविधिलसितानां ह्री विचित्रो विपाकः ॥ ७८ ॥'

अत्र यत्कुमुदवनादीनामपश्रीकत्वादिकं यच्चाम्भोजखण्डादीनां श्रीमत्त्वादिकं मुख्यमेव प्रातरुपलभ्यते, सेयं व्यत्ययवती मुख्या नाम परिवृत्तिः ॥

त्रिधापि चासाविति । कुमुदवनमिति । कुमुदवनादुलूकाद्धिमरश्मेः श्रीमत्त्वं प्रीतिरुदयश्चापसृतानि प्राप्तानि पुनरम्भोजखण्डचक्रवाकीहिमांशूनामिति व्यक्तो व्यत्ययः । मुख्यत्वं ग्रन्थ एव व्यक्तम् ॥

व्यत्ययवत्यमुख्या यथा—

'जो तीअ अहरराओ रत्तिं उव्वासिओ पिअअमेण ।
सोच्चिअ दीसइ गोसे सवत्तिणअणेसु सङ्कन्तो ॥ ७९ ॥'

[यस्तस्या अधररागो रात्रावुद्वासितः प्रियतमेन ।
स एव दृश्यते प्रातः सपत्नीनयनेषु संक्रान्तः ॥]

अत्र प्रियतमेन रात्रावुद्वासितस्याधररागस्येयं सपत्नीलोचनेषु संक्रान्तिः ॥

**अत्र प्रियतमेनेति** । ताम्बूलादिहेतुकोऽन्य एवाधररागोऽन्यश्च मत्सरहेतुकः कषायतालक्षणो नयनगामीति तयोरभेदाध्यवसायो यत्तत्पदाभ्यां प्रतीत इति गौणी वृत्तिः । प्रकाशते च शब्दवृत्त्याधरस्थानस्थितस्य नयनस्थानप्राप्तिरिति तावतैवालंकारनिर्वाहः ॥

विनिमयवती मुख्या यथा—

'प्रश्च्योतन्मदसुरभीणि निम्नगायाः
क्रीडन्तो गजपतयः पयांसि कृत्वा ।
किञ्जल्कव्यवहितताम्रदानलेखै-
रुत्तेरुः सरसिजगन्धिभिः कपोलैः ॥ ८० ॥'

अत्र करिकपोलमदामोदस्याम्भोजरजःपरिमलस्य च सरित्सलिलद्विपकपोलपाल्योर्मुख्यत्वेनैव परस्परोपकरणादियं विनिमयवती मुख्या नाम परिवृत्तिः ॥

**अत्र करिकपोलेति** । गजेन्द्राणां मदयासमचन्द्रकयोः(?) स्वाश्रितयोर्नदीषु संक्रामणं नदीस्थितयोश्च किञ्जल्काम्भोजपरिमलयोर्ग्रहणं तेन दानप्रतिदानवत्तया विनिमयो भवति ॥

विनिमयवत्यमुख्या यथा—

'तस्य च प्रवयसो जटायुषः स्वर्गिणः किमिह शोच्यतेऽधुना ।
येन जर्जरकलेवरव्ययात्क्रीतमिन्दुकिरणोज्ज्वलं यशः ॥ ८१ ॥'

अत्र जर्जरकलेवरं दत्वा शशिकिरणशुभ्रं यशः क्रीतमित्यमुख्ययैव वृत्त्या विनिमयोक्तेरमुख्येयं विनिमयवती परिवृत्तिः ॥

**अत्र जर्जरेति** । मूल्यार्पणक्रयणयोरत्र बाधाद्व्यक्त एवोपचारः, शब्दवृत्तिस्तु पूर्ववदेव कुण्ठैवेति भवति विनिमयः ॥

उभयवती मुख्या यथा—

'लोचनाधरकृताहृतरागा वासिताननविशेषितगन्धा ।
वारुणी परगुणात्मगुणानां व्यत्ययं विनिमयं च वितेने ॥८२॥'

अत्र वारुण्या यदधराद्रागोऽपहृत्य चक्षुषोर्निक्षिप्तस्तेनेयं व्यत्ययवती, यच्च मुखामोदवासितया स्वामोदेन मुखामोदो विशेषितस्तेन विनिमयवती। तदियमुभयथापि मुख्यवृत्त्यैवोक्तेति मुख्येयमुभयवती परिवृत्तिः ॥

**लोचनाधरेति**। लोचनाधरयोर्यथासंख्यं कृत आहृतो रागो यया तेन लोचने कृतोऽधरादपनीत इति व्यत्ययः। वासिते आनने विशेषितो गन्धो यस्याः सा तथा। तेन तया मुखं वासितं मुखेन च सेति भवति विनिमयः। **परगुणात्मगुणानामिति**। परगुणानामिति परगुणानां व्यत्ययः, आत्मगुणानां विनिमय इति संबन्धः। कर्तृत्वमुत्प्रेक्षितं तदेतद्दर्शयति—**अत्रेति**॥

उभयवत्यमुख्या यथा—

'किं चित्रं यदि देवेन भूभृतः करदीकृताः।
देवोऽपि दापितः किं तैर्न पुनः पृष्ठतः करम् ॥ ८२ ॥'

अत्र भूभृतामकरदानां यत्करप्रदानं जिगीषोश्च यत्पृष्ठे हस्तनिक्षेपः स एव द्रव्यगुणादीनां स्थानादिपरिवृत्तौ व्यत्ययो, यच्च देवेन भूभृतः करदीकृताः देवोऽपि तैः पृष्ठतः करं दापित इति सोऽयं दानप्रतिपादनलक्षणोऽपि विनिमय इत्येतदुभयमपीह श्लिष्टपदाभिधेयत्वादमुख्यवृत्त्यैवोच्यमानमुपलभ्यत इत्युभयवतीयममुख्या परिवृत्तिः ॥

एकत्र प्रतीतस्यान्यत्र प्रत्ययः परिवृत्तौ, तथा निदर्शनेऽपीति तदनन्तरं निदर्शनं लक्षयति—

**दृष्टान्तः प्रोक्तसिद्ध्यै यः सिद्धेऽर्थे तन्निदर्शनम्।**
**पूर्वोत्तरसमत्वे तदृजु वक्रं च कथ्यते ॥ २१ ॥**

**दृष्टान्त इति**। प्रोक्तस्य प्राकरणिकस्य सिद्धिर्निश्चयः। नन्वनुमानाङ्गमपि दृष्टान्ताभिधानं पृथगलंकारः स्यादित्यत आह—**सिद्धेऽर्थ इति**। सिद्ध एवार्थे कंचिद्विशेषमावेदयितुं दृष्टान्तोक्तिर्निदर्शनम्, साध्ये त्वर्थेऽनुमानमिति विभागः। पूर्वं दार्ष्टान्तिकोक्तिं समाप्य पश्चाद्दृष्टान्तोक्तिरिति द्वितीयः। एकयैवोक्त्या दृष्टान्तदार्ष्टान्तिकयोरुक्तिरिति तृतीयः। तदाह—**पूर्वोत्तरसमत्व इति**। यत्र शब्दत

एव तुल्येतिवृत्तता दृष्टान्तदार्ष्टान्तिकयोरनुगम्यते तदृजु निदर्शनम् । यत्र तु पर्यवसितायामुक्तौ सहृदयपर्यालोचनया तद्वक्रम् । तदेतदाह—**ऋजु वक्रं चेति**। तेन निदर्शनस्य षड् भेदाः ॥

तेषु पूर्वमृजु यथा—

'उदयन्नेव सविता पद्मेष्वर्पयति श्रियम् ।
विभावयति भूतीनां फलं सुहृदनुग्रहः ॥ ८४ ॥'

अत्र ऋजूक्त्यैव पूर्वं दृष्टान्तः पश्चाद्दार्ष्टान्तिकं प्रदर्शितमितीदमृजुपूर्वं च निदर्शनं सूर्यदृष्टान्तेन विभूतीनां सुहृदनुग्रहः फलमिति ज्ञापयति ॥

**सूर्यदृष्टान्तेनेति**। ऋद्धिभिः सुहृदनुगृह्यत इति सिद्धोऽर्थः, किंतु तदेतदेव तासां फलमिति विशेषमभिधातुं सूर्यदृष्टान्तोपन्यासः । अत्र समृद्धताफलं सुहृत्त्वमनुग्रहत्वं चेति शब्दत एव सूर्यादिषु दृष्टान्तदार्ष्टान्तिकाभिमतेषु प्रतीयत इति ऋजुत्वमित्यर्थः ॥

तदेवं वक्रं यथा—

'पाणउडी अवि जलिउण हुअवहो जलइ जण्णवाडम्मी ।
णहु ते परिहरिअव्वा विसमदसासण्ठिआ पुरिसा ॥ ८५ ॥'

[पानकुटीमपि ज्वालयित्वा हुतवहो ज्वलति यज्ञवाटमपि ।
नहि ते परिहर्तव्या विषमदशासंस्थिताः पुरुषाः ॥]

अत्रापि पूर्वं दृष्टान्तः पश्चाद्दार्ष्टान्तिकम् । किंतु यथा पूर्वत्रोदयमानः सविता सुहृत्पद्मेषु श्रियमर्पयतीति तुल्येतिवृत्तता ऋजूक्त्या शब्देनैवाभिधीयते, नैवमत्र किं तर्हि ज्वलनेतिवृत्तेन तुल्यं तत्तु तत्पुरुषाणामितिवृत्तमशाब्दं युक्तिचातुर्यात्प्रतीयते तदिदं पूर्वं च वक्रं निदर्शनम् ॥

**पाणउडीति**। पाणपदं म्लेच्छदेशीयम् । पाने कुटी शौण्डिककुटी वा। **अत्रापीति**। दृष्टान्तेऽपि पानकुटीज्वलनादिकं विशेषणमुपात्तम् । न च तद्दार्ष्टा-

न्तिके संभवति शब्देन वा प्रत्याय्यते; किंतु बिम्बप्रतिबिम्बन्यायेनात्र भवति। तथा हि यथा पानकुट्यां हुतवहस्य ज्वलनं यज्ञवाटे च तथाऽव्यवस्थितचित्ततया ग्रामीणाविदग्धयुवतिप्रसक्तो भूत्वान्यत्र नागरिकासु विदग्धासु रज्यते सोऽपि न त्याज्य इत्युक्तिचातुर्यात्तुल्येतिवृत्तता गम्यतेऽतो वक्रत्वमित्याह—**किंतु यथेति** ॥

उत्तरमृजु यथा—

'हिअअ तिरच्छीयइ संमुहपच्छा गहिअकडक्खास्स ।
पहिअ एक्केज्जे गोरडी णं चउहट्ट उवच्छ ॥ ८६ ॥'

[हृदये तिरश्चीना संमुखप्राप्ता पश्चाद्गृहीतकटाक्षास्य ।
पथिकस्यैकैव गौरतरा ननु चतुष्पथे व्रजति ॥]

अत्र ऋजूक्त्या शब्द एवाभिधीयमानसाधर्म्यं दार्ष्टान्तिकमभिधायो-त्तरकालं दृष्टान्तोऽभिहितस्तदिदमुत्तरमृजु निदर्शनम् ॥

**हिअएति** । विच्छित्तिपथिकस्याभिलाषिता या योषित्सा एकैव । हृदये स्मरणारूढा सती लग्ना अतएव तिरच्छीयइ तिर्यक्शल्यायमाना पथिकसंमुखाभिमुखस्य तस्य चलितत्वात् । पश्चाच्च गृहीतकटाक्षा पश्चाद्भूतेन गृहीतश्चमत्कृतः कटाक्षो यस्याः । एक्केज्जे एकैव । जिरवधारणे । णं ननु चतुष्पथे कश्चित्संमुखतां कश्चित्तिरश्चीनतां कश्चित्पश्चाद्भावं धत्ते; गौरी तु पथिकस्यैकैव तथेति । **अत्र ऋजूक्त्या शब्दत एवेति** । तिर्यक्त्वादीनामुभयगामिनां शब्देनोपादानात्प्रतीतिमात्रेण चालंकारनिर्वाहः ॥

तदेव वक्रं यथा—

'उपरि घनं घनपटलं दूरे दयिता किमेतदापतितम् ।
हिमवति दिव्यौषधयः कोपाविष्टः फणी शिरसि ॥ ८७ ॥'

अत्रापि दार्ष्टान्तिकमभिधायोत्तरकालमेव दृष्टान्तो विहितस्तदिदमुत्तरं ऋजु निदर्शनम्; किंतु यथा पूर्वस्मिन् हृदये तिर्यगित्यादिभिः शब्द एव ऋजूक्त्या साधर्म्याभिधानम्, नैवमत्र तथा; अपि तु किमेतदापतितमित्युक्तिचातुर्येण विपर्ययेण च लिङ्गसंख्या यथासंख्यानाम् । तदेतदुत्तरं वक्रं च निदर्शनम् ।

**अपि तु किमेतदापतितमित्युक्तिचातुर्येणेति**। ननु च उपरीत्यनेन व्यवधानमुपात्तं दृष्टान्तेऽपि शब्द एव प्रतिफलति तत्कथं वक्रत्वमित्यत आह— **विपर्ययेणेति**। घनपटलं नपुंसकम्, फणी पुमान्, दयिता चैकवचनवती, ओषधयो बहुवचनालिङ्गिताः। घनपटलं पूर्वं दार्ष्टान्तिकमुपक्रम्य दृष्टान्तोक्तौ न पूर्वं फणी निर्दिष्टः। ततो लिङ्गसंख्यानां विपर्ययो भवति, तदयमर्थेन शब्दत एवोपरि पर्यवस्थानं दूरत्वं च दृष्टान्तयोः प्रतीयते; शिरसि हिमवतीत्येताभ्यामन्यथाकारं बोधितत्वात्। फलतस्तु स एवार्थ इति वक्रतैवेति।

समसृजु यथा—

'याति चन्द्रांशुभिः स्पृष्टा ध्वान्तराजी पराभवम्।
सद्यो राजविरुद्धानां दर्शयन्ती दुरन्तताम्॥ ८८॥'

अत्र राजविरुद्धानामिति श्लिष्टपदेन दर्शयन्तीति वर्तमानकाललक्षणात्सद्य इति तद्धितेन च समकालमेव दृष्टान्तदार्ष्टान्तिकयोः शब्दतो ऋजूक्त्यैवोक्तत्वादिदमृजु समं च निदर्शनम्।

**यातीति**। राजा चन्द्रो नृपतिश्च। तदनयोः श्लिष्टोक्तिविषयतया न पूर्वापरभावो विभाव्यते। चन्द्रांशुपराभूतध्वान्तराजीनृपतिविरुद्धदुरन्तयोरपि दर्शयन्तीति शत्रा, सद्य इति तद्धितेन च समत्वम्। किंतु ध्वान्तराजी पराभवं यातीति दृष्टान्तोक्तौ सत्यां मध्ये राजविरुद्धानामिति दार्ष्टान्तिकमुक्त्वा पुनरपि दृष्टान्तविशेषणं दर्शयन्तीत्युक्तम्। अतएवोक्तिकवलीकृतत्वाद्दृष्टान्तदार्ष्टान्तिकयोः समत्वमित्याशयवान्व्याचष्टे—**अत्र राजविरुद्धानामिति**।

तदेव वक्रं यथा—

'ण उण वरकोअण्डदण्डए युत्तिमाणुसेवि एमेअ।
गुणवज्जिएण जाअइ वंसुप्पण्णे वि टङ्कारो॥ ८९॥'

[न पुनर्वरकोदण्डदण्डके पुत्रि मानुषेऽप्येवमेव।
गुणवर्जितेन जायते वंशोत्पन्नेऽपि टङ्कारः॥]

अत्र न केवलं कोदण्डदण्डके मानुषेऽप्येवमेवेतीतरेतरयोगवद्वक्रतया युगपदभिधानं गुणवर्जितवंशोत्पन्नेऽपि टङ्कारो न जायत इति

श्लिष्टपदत्वेऽपि व्यतिरेकमुखेन गुणवृत्त्या चाभिधानाद्धनुषीव मानुषेऽपि गुणवत्येव महाञ्शब्दो भवतीति वक्रोक्त्या साधर्म्यावगतिः। तदिदम-शब्दत्वादिभिः पूर्वाद्भिद्यमानं समं वक्रं च निदर्शनम्।

**ण उण वरेति**। गुणो धैर्यादिस्तन्त्री च, वंशः कुलं वेणुश्च, टङ्कारोऽव्यक्तानुकरणं ख्यातिश्च। **इतरेतरयोगवदिति**। तथाहि—'त्वन्मुखं पुण्डरीकं च फुल्ले' इत्यत्र फुल्लं चेतीतरेतरयोगेनैकशेषे एकयोक्त्या फुल्लेति द्वाभ्यां संबध्यते। तथा विनाप्येकशेषं गुणवज्जिएण वंसुप्पण्णे टङ्कार इति युगपदन्वीयन्ते। ननु यथा राजविरुद्धानामित्यत्र शेषेण ऋजुत्वं तथात्रापि भविष्यतीत्यत आह—**श्लिष्टपदत्वेऽपीति**। धनुषीव मानुषेऽपि महाञ्शब्दो भवतीति विवक्षितम्। न च व्यतिरेकमुखेनोपनयेऽयमर्थः शब्दादवगम्यते, प्रतीयते चार्थ इति युक्तं वक्रत्वम्। ननु व्यतिरेकेणैव कथं न तुल्यवृत्तिता संमतेत्यत आह—**गुणवृत्त्या चेति**। सत्यमेतत्तथापि द्वयोर्वर्णनीययोर्गुणादिकयोरभेदाध्यवसायो वक्तव्यः। तथा गौणवृत्तिव्यपाश्रयेणैव वक्रत्वम्[1]। तदिदमुक्तं व्यतिरेकमुखेन गुणवृत्त्या चेति॥

व्यतिरेकं विना दृष्टान्तदार्ष्टान्तिकभावाभावाब्यतिरेकाभ्यां तल्लक्षणमाह—

**शब्दोपात्ते प्रतीते वा सादृश्ये वस्तुनोर्द्वयोः।**
**भेदाभिधानं भेदश्च व्यतिरेकश्च कथ्यते॥ ३२॥**

**शब्दोपात्त इति**। भेदाभिधानं वैधर्म्यकथनम्। एवं चेत् मेरुसर्षपयोरपि तथाभिधानमलंकारः स्यादत उक्तम्—**सादृश्ये वस्तुनोरिति**। उपमानोपमेययोरित्यर्थः। सादृश्यं द्विधा। शब्दोपात्तं प्रतीतं च। अशब्दोपात्तमपि ध्वननानुमानादिभिरवगम्यत इति न विरोधस्तदिदमुक्तम्—**प्रतीते वेति**। तदयमर्थः—उद्भूतचमत्कारिसादृश्ययोर्वैरस्योक्तिर्व्यतिरेकः, स्वरूपाख्यस्तु पृथग् भेदो नास्त्येवेत्युक्तम्॥

विभागं दर्शयति—

**स्वजातिव्यक्त्युपाधिभ्यामेकोभयभिदा च सः।**
**सादृश्याद्वैसादृश्याच्च भिन्नः षोढाभिजायते॥ ३३॥**

**स्वजातीयेति**। येन रूपेण वैयतिरेक्यमुपादीयते तद्रूपवन्तं व्यतिरेकप्रति-

---

१. द्वाभ्यामिति युक्तं प्रतिभाति।

योगिनं परिकल्प्य ततो व्यतिरेकोऽपीति स्वजातिव्यतिरेकः प्रथमः प्रकारः। द्वितीयस्तु सैव व्यक्तिर्विधर्मेति। एतत्प्रकारद्वयं यथासंख्यमभिधीयमानसादृश्ययोरिति मूलभेदद्वयं तथैवापरमेकानेकलक्षणं प्रकारद्वयं तत्रैवान्यत्सादृश्यवैसादृश्यरूपं द्वयमिति क्रमेण षोढा भेदो विवक्षितः। यथा च स्वजातिव्यतिरेकयोः प्रतीयमानाभिधीयमानसादृश्यगामिता न संभवति तथाग्रे वक्ष्यते॥

तत्र शब्दोपात्तसादृश्ये स्वजातिव्यतिरेको यथा—

'अरत्नालोकसंहार्यमवार्यं सूर्यरश्मिभिः।
दृष्टिरोधकरं यूनां यौवनप्रभवं तमः॥ ९०॥'

अत्र यौवनप्रभवस्य तमसस्तमोजात्या सह दृष्टिरोधकरमिति सादृश्यमुक्त्वा, अरत्नालोकसंहार्यमवार्यं सूर्यरश्मिभिरिति व्यतिरेको विहितः, सोऽयं स्वजातिव्यतिरेकः॥

**अत्र यौवनप्रभवस्येति।** यौवनकृतमज्ञानलक्षणमन्यदेव तमोऽन्यच्चान्धकाररूपं तयोस्तद्भावापत्तिरियमेव कल्पनास्माभिरुक्ता। अनेन तु प्रकारेण रसः पुष्यतीत्यलंकारमध्ये गणनम्॥

प्रतीयमानसादृश्ये स्वव्यक्तिव्यतिरेको यथा—

'अण्णोण्णेहिं सुचरिअसअहिं अणुदिण वड्ढिइअ माणु।
अप्पणवि ण हु महुवि अह अप्पाणेण समाणु॥ ९१॥
[अन्योन्यैः सुचरितशतैरनुदिनं वर्धते मानः।
अस्यापि न खलु महानपि अथात्मना समानः॥]

अत्र प्रतीयमानोपमानसादृश्योपचरितभेदादात्मव्यक्तेरन्यैरन्यैश्च सुचरितशतैः स्वव्यक्तित एव भेदोऽभिहितः। सोऽयं स्वव्यक्तिव्यतिरेकः॥

अण्णोण्णेहिं अन्योन्यैर्मानोऽहंकारः पूजा वा। यौ तु कल्पितभेदाधिकरणत्वेनोपात्तौ विरोधिधर्मवत्तया शब्दात्प्रतीयेते तयोर्नियन्त्रणत्वादिकमिति[1] भवति सादृश्यं प्रतीयमानम्॥

---

१. अत्र 'नियतं गत्वा–' इति पाठ आसीत्तत्र नियन्त्रणत्वादिकमिति कल्पितोऽस्ति।

शब्दोपात्तसादृश्य एकव्यतिरेको यथा—

'प्रेयानेव वृषस्तवापि सततं भूतिस्तवापि स्थिरा
दुर्गाया भवतापि भूधरभुवः सम्यग्गृहीतः करः ।
निर्व्याजं परमेश्वरत्वमियता नो यासि वक्तुं जनै-
र्हेलोल्लासितवाहिनीशमथने यन्नो विषादी भवान् ॥९२॥'

अत्र प्रियवृषत्वादिभिरभिहितसादृश्ययोरुपमानोपमेययोरुपमेयस्यैव यथोक्तसादृश्यविषये विषादित्वं युक्तमित्येकव्यतिरेकोऽयम् ॥

**प्रेयानेवेति**। वृषो गौर्धर्मश्च। भूतिः सम्पद् भस्म च। दुर्गा गौरी विषमा च। भूधरभूर्गिरिजा पर्वतभूमिश्च। करो हस्तो राजदण्डश्च। वाहिनीशः समुद्रः सेनापतिश्च। विषादी विषभक्षकोऽवसादवांश्च। यद्यप्यत्रानुरूपं सादृश्यं नास्ति तथापि शब्दसादृश्येनाप्युपमा प्रवर्तत एव। यथा—'सकलङ्कं पुरमेतज्जातं संप्रति सितांशुबिम्बमिव' इति। अत एवोभयालंकारत्वमुपमायाः ॥

स एव प्रतीयमानसादृश्यो यथा—

'सकलङ्केन जडेन च साम्यं दोषाकरेण ते कीदृक् ।
अभुजङ्गः समनयनः कथमुपमेयो हरेणासि ॥ ९३ ॥'

अत्र प्रतीयमानसादृश्यस्य पूर्वार्धे चन्द्रोपमानस्य सकलङ्कतादिरुत्तरार्धेन वर्णनीयोपमेयस्याभुजङ्गत्वादिरेकस्यैव भेदकः स्वधर्मोऽभिहितः सोऽयमप्येकव्यतिरेक एव ॥

**सकलङ्केनेति**। कलङ्कोऽपवादो लाञ्छनं च। जडो मूर्खः शीतलश्च। अभुजङ्गो न वेश्यापतिरविद्यमानसर्पश्च। समनयनो युग्मनयनः सर्वान् समं नयतीति च। आह्लादकत्वादिकं चन्द्रेणानिरुद्धैश्वर्यादिकं परमेश्वरेण सादृश्यं प्रतीयते ॥

शब्दोपात्तसादृश्ये उभयव्यतिरेको यथा—

'अभिन्नवेलौ गम्भीरावम्बुराशिर्भवानपि ।
असावञ्जनसंकाशस्त्वं च चामीकरद्युतिः ॥ ९४ ॥'

अत्र द्वयोरप्यभिधीयमानसादृश्ययोरुभयव्यतिरेकः ॥

अभिन्नेति । वेला मर्यादा तीरं च । गम्भीरोऽतलस्पर्शोऽचलितचित्तवृत्तिश्च ॥

स एव प्रतीयमानसादृश्ययोर्यथा—

'त्वन्मुखं पुण्डरीकं च द्वयोरप्यनयोर्भिदा ।
कमलं जलसंरोहि त्वन्मुखं त्वदुपाश्रयम् ॥ ९५ ॥'

तदेतन्निगदेनैव व्याख्यातम् । सोऽयं प्रतीयमानसादृश्ययोरुभयोर्व्यतिरेकः ॥

अभिधीयमानसादृश्ययोः सदृशव्यतिरेको यथा—

'त्वन्मुखं पुण्डरीकं च फुल्ले सुरभिगन्धिनी ।
भ्रमद्भ्रमरमम्भोजं लोलदृष्टि मुखं तु ते ॥ ९६ ॥'

अत्र मुखाम्भोजयोः 'फुल्ले सुरभिगन्धिनी' इति पदाभ्यामभिधीयमानसादृश्ययोः सदृशमेव भ्रमद्भ्रमरत्वं लोलदृष्टित्वं च भेदकमुपन्यस्तमिति सोऽयं शब्दोपात्तसादृश्ययोः सदृशव्यतिरेकः ॥

स एव प्रतीयमानसादृश्ययोर्यथा—

'चन्द्रोऽयमम्बरोत्तंसो हंसोऽयं तोयभूषणम् ।
नभो नक्षत्रमालीदमिदमुत्कुमुदं पयः ॥ ९७ ॥'

अत्र पूर्वार्धे चन्द्रहंसयोः प्रतीयमानसादृश्ययोरम्बरोत्तंसत्वतोयभूषणत्वे, उत्तरार्धे तु नभःपयसोर्नक्षत्रमालित्वोत्कुमुदत्वे सदृशे एव भेदके । सोऽयं प्रतीयमानसादृश्ययोः सदृशव्यतिरेकः ॥

अभिहितसादृश्ययोरसदृशव्यतिरेको यथा—

'शशाम वृष्टिर्मेघानामुत्सङ्गे तस्य भूभृतः ।
विरराम न रामस्य धारासन्ततिरश्रुणः ॥ ९८ ॥'

अत्र भूभृत इत्यनेन साक्षादुपात्तसादृश्ययो राममाल्यवतोर्योऽयमुत्सङ्गे समस्तोऽश्रुधारापातो यस्य मेघवृष्टेरभावस्तदिदमुभयोरसदृशमेव भेदकम् । सोऽयमभिधीयमानसादृश्ययोरसदृशव्यतिरेकः ॥

शशाम वृष्टिरिति । भूभृतो राज्ञश्च ॥

स एव प्रतीयमानसादृश्ययोर्यथा—

'अभ्रूविलासमस्पृष्टमदरागं मृगेक्षणम् ।
इदं तु नयनद्वन्द्वं तव तद्गुणभूषितम् ॥ ९९ ॥'

अत्र कान्तामृगेक्षणयोः प्रतीयमानसादृश्ययोर्भ्रूविलासमदरागौ तदभावौ च विसदृशौ भेदकाविति सोऽयं प्रतीयमानसादृश्ययोरसदृशव्यतिरेकः ॥

सदृशासदृशव्यतिरेकाभ्यामेव तदुभयव्यतिरेकोऽपि व्याख्यातः । यथा—

'निर्मलेन्दु नभो रेजे विकचाब्जं बभौ सरः ।
परं पर्यश्रुवदनौ मम्लतुर्भ्रातरावुभौ ॥ १०० ॥'

अत्र नभःसरसोः प्रतीयमानसादृश्ययोर्निर्मलेन्दुत्वं विकचाब्जत्वं च प्राग्वदेव सदृशे भेदके; ताभ्यां च मुखचन्द्रमुखकमलाभ्यां मनोहराह्लादकत्वाभ्यां च प्रतीयमानसादृश्ययोरेव रामलक्ष्मणयोर्येयं मुखपर्यश्रुता, तनौ च म्लानिर्निर्मलेन्दुताविराजमानयोर्विकचाब्जत्वशोभमानत्वयोश्च सा विसदृशीति सोऽयं सदृशासदृशभेदकत्वकृतभेद एव तदुभयव्यतिरेकः ॥

ताभ्यां च मुखचन्द्रेति । मुखस्य चन्द्रकमलभावोऽनादिकविकल्पनासिद्ध इति तेनापि रूपेण प्रतीयमानसादृश्यत्वमुक्तम् ॥

ननु मिथो व्यतिरेकभेदगणनमनुपपन्नं सदृशासदृशव्यतिरेकस्यापि संभवादित्यत आह—

एतेनैकव्यतिरेकादिसंभेदोऽपि व्याख्यातः । यथा—

'मिथ्या देव भुजेन तेऽल्पविभवः कल्पद्रुमः स्पर्धते
नह्येनं भुवनत्रयाभयमहासत्री कृपाणोऽश्चति ।

तुल्यस्तत्रभवान्प्रयागविटपी यस्यैतदेकार्णवे
कायान्तर्विनिवेश्य विश्वमखिलं शाखासु शेते हरिः ॥१०१॥'

अत्र वर्णनीयबाहुकल्पद्रुमयोरभिमतफलदायित्वादिभिः प्रतीतसादृश्ययोर्भुवनत्रयाभयप्रदायी वर्णनीयबाहौ कृपाणो भेदक इत्येकव्यतिरेकः । तथा वर्णनीयबाह्वोः प्रयागवटस्य च प्राग्वदेव प्रतीयमानसादृश्ययोरेकस्य भुवनत्रयाभयमहासत्त्री कृपाणः शाखासु शेते, अन्यस्य तु महाप्रलये स्वकायान्तर्निवेशिताखिलविश्वो वैकुण्ठः । ताविमौ तयोः सदृशावेव भेदकौ हरिकृपाणयोर्वा श्यामतादिभिः प्रतीयमानसादृश्ययोरिमावेव धर्मौ भेदकौ सोऽयमेवंप्रकारो व्यतिरेकसंकर उन्नेयः । स्वजातिव्यतिरेके प्रतीयमानसादृश्यम्, स्वव्यक्तिव्यतिरेके चाभिधीयमानसादृश्य यद्युदाहरणं दृश्यते संभवति वा तदा तदप्युदाहार्यम् ॥

**एतेनेति । प्राग्वदेवेति ।** अभिमतफलदायित्वादिभिः । **एवंप्रकार इति ।** न ह्येकवाक्यस्थतामात्रेण तथा चमत्करोति यथाङ्गाङ्गिभावादिभिः परस्परप्रथनयेति । सैव प्रकारपदेनाभिहिता । **यद्युदाहरणं दृश्यते संभवति वेति ।** न हि स्वजातिव्यतिरेके द्वयोरभेदाध्यवसायः सादृश्यमन्तरेण चमत्कारमर्पयतीति कल्पितमेव वाच्यम् । न च कल्पनाशब्दमन्तरेण प्रतीयमानसादृश्यसंभवः; सादृश्यस्य भेदाधिष्ठानत्वात् । स्वव्यक्तिव्यतिरेकेऽप्यसंभवस्तथाभूतमेव तु शब्देनोपादीयत इति स्यादत उक्तं यदि दृश्यत इति ॥

सहकारित्वं व्यतिरेकनिरूप्यमतो व्यतिरेकानन्तरं समाहितलक्षणमाह—

**कार्यारम्भे सहायाप्तिर्दैवादैवकृतेह या ।**
**आकस्मिकी बुद्धिपूर्वोभयी वा तत्समाहितम् ॥ ३४ ॥'**

तत्राकस्मिकी दैवकृता यथा

'मानमस्या निराकर्तुं पादयोर्मे पतिष्यतः ।
उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितम् ॥ १०२ ॥

अत्र माननिराकरणोपक्रमे कालोत्पन्नस्याकस्मिकघनगर्जितस्य मानविध्वंसे सहकारित्वादाकस्मिकीयं दैवकृता सहायसंपत्तिः ॥

**कार्यारम्भ इति**। सहायः प्रकृतकार्यकारणस्य सहकारी, तेनालंकारता आकस्मिक्यचिन्तितपूर्वा बुद्धिपूर्वाद्विपरीता। आकस्मिक्यादीनां प्रत्येकं दैवादैवकृतसंबन्धे षट्प्रकारं समाहितमित्यर्थोक्तम् ॥

आकस्मिक्येवादैवकृता यथा—

'अनुशासतमित्यनाकुलं नयवर्त्माकुलमर्जुनाग्रजम् ।
स्वयमर्थ इवाभिवाञ्छितस्तमभीयाय पराशरात्मजः ॥१०३॥'

अत्र भीमानुशासनकालोपक्रम एव व्यासागमनस्य तदुपकारित्वादाकस्मिकीयमदैवकृता सहायाप्तिः ॥

**व्यासागमनस्येति**। व्यासेन संपाद्यमानस्य। **तेनादैवकृतेति** ॥

बुद्धिपूर्वा दैवकृता यथा—

'कल्पान्ते शमितत्रिविक्रममहाकङ्कालदण्डस्फुर-
च्छेषस्यूतनृसिंहवक्त्रनखरप्रोतादिकोलामिषः ।
विश्वैकार्णवताविशेषमुदितौ तौ मत्स्यकूर्मावुभौ
कर्षन्धीवरतां गतः स्यतु जगन्मोहं महाभैरवः ॥ १०४॥'

अत्र प्रलयसमये महेश्वरेण समापयितुमुपक्रान्तानां त्रिविक्रमादीनां योऽयं तद्भुवा बडिशादिना मत्स्यकूर्मयोराकर्षणप्रकारः स भगवता भैरवेण बुद्धिपूर्वकमुपकल्प्यमानो दैवात्तथाभूतैरेव तैः संपद्यत इति बुद्धिपूर्वेयं दैवकृता सहायाप्तिः ॥

**दैवात्तथाभूतैरेवेति**। नरसिंहनखादीनां बडिशाद्युचितमूर्तिशालिनां दैवमेव निमित्तम्, बडिशादिचिन्ता च विषयीकृतेति बुद्धिपूर्वता ॥

बुद्धिपूर्वाऽदैवकृता यथा—

'मूले पञ्च ततश्चतुष्टयमिति स्वक्संनिवेशैः शिरः-
पुष्पैरन्यतमावलोकनमितैरुच्छोणितैरर्चिते ।

हस्तस्पर्शवशेन मूर्ध्नि दशमं मूर्धानमारोपयन्
शंभोरद्भुतसाहसैकरसिकः कैर्न श्रुतो रावणः ॥ १०५ ॥'

अत्र योऽयं दशवदनेन स्वयं छिन्नैः शिरोभिर्भगवतः शंभोरर्चनाप्रकार उपक्रान्तस्तत्र मूले पञ्च ततश्चतुष्टयमिति शिरोविरचनाप्रपञ्चो बुद्धिपूर्वकोऽदैवकृतः क्रियमाणोऽस्य कर्मणः समाप्तौ सहकारिकारणतामासादयतीत्ययमदैवकृतो बुद्धिपूर्वकः समाहितभेदः ॥

**मूले पञ्चेति।** अधोऽधः स्थूलपुष्पस्य संनिवेश उपर्युपरि तनुरिति दूर्वापूजाप्रकारः प्रसिद्धः। अन्यतमालोकननिमित्तैरारोपितैः। अत्र लोकप्रसिद्धपूजाप्रकारः कार्यभूतः। उपर्युपरि तनुसंनिवेशनिष्पादनं सहकारि। इदं च रावणप्रयत्ननिष्पाद्यत्वाददैवकृतं बुद्धिपूर्वं च भवतीत्यन्यतमेन मूर्ध्नान्यतमस्यारोपणं न नवमच्छेदपर्यन्तमासीत्। पूजास्वरूपेणैव भगवांस्तुष्यति न तथा विदितेनेत्यभिप्रायवतो निस्तरङ्गा भक्तिस्तेन साहसस्याद्भुतत्वम्॥

आकस्मिकी बुद्धिपूर्वा दैवकृता यथा—

'सा कौमुदी नयनयोर्भवतः सुजन्मा
तस्या भवानपि मनोरथबन्धबन्धुः।
तत्सङ्गमं प्रति सखे नहि संशयोऽस्ति
यस्मिन्विधिश्च मदनश्च कृताभियोगौ ॥ १०६ ॥'

अत्र योऽयं माधवस्य मालतीं प्रति समागमाभिलाषस्तत्रेयं मालत्या आकस्मिकी बुद्धिपूर्वा च तथा प्रवृत्तिः सोभय्यपि दैवकृता च सहायाप्तिः समाहितभेदः ॥

**अत्र योऽयं माधवस्येति।** विधिश्च मदनश्च कृताभियोगावित्यनेन मालत्याः पूर्वानुभावाः कथ्यन्ते। ते च द्विधा भवन्तीत्याकस्मिकी दैवपूर्वा सहायसंपत्तिः॥

आकस्मिकी बुद्धिपूर्वा चादैवकृता यथा—

'दृष्टिर्वन्दनमालिका स्तनयुगं लावण्यपूर्णौ घटौ
शुभ्राणां प्रकरः स्मितः सुमनसां वक्त्रप्रभा दर्पणः।

रोमाञ्चोद्गम एव सर्षपकणः पाणौ पुनः पल्लवौ
स्वाङ्गैरेव गृहं प्रियस्य विशतस्तन्व्या कृतं मङ्गलम् १०७'

अत्रागच्छतः प्रियस्येयं वन्दनमालिकादिमङ्गलक्रिया मनःपरितोष-हेतुस्तस्यास्तन्वङ्ग्या इङ्गिताकारैरेव यन्निवर्तनं सोऽयमाकस्मिकः स्वबु-द्धिपूर्वकश्च तत्सहकारिकारणत्वाद्दैवकृतश्च समाहितभेदः ॥

**अत्रागच्छतः प्रियस्येति** । मङ्गलक्रियामात्रं न चमत्कारास्पदमत उक्तं मनःपरितोषहेतुरिति । स्मितं बुद्धिपूर्वम् । रोमाञ्चो न बुद्धिपूर्वः । एवं दृष्ट्यादौ यथायथं वेदितव्यमिति ॥

बुद्धिपूर्वायां सहायासौ क्वचिद्भ्रान्तिरप्यस्ति ततस्तदनन्तरं तां लक्षयति—

**भ्रान्तिर्विपर्ययज्ञानं द्विधा सापि प्रयुज्यते ।**
**अतत्त्वे तत्त्वरूपा च तत्त्वे चातत्त्वरूपिणी ॥ ३५ ॥**
**अतत्त्वे तत्त्वरूपा या त्रिविधा सापि पठ्यते ।**
**अबाधिता बाधिता च तथा कारणबाधिता ॥ ३६ ॥**

**भ्रान्तिरिति** । अतस्मिंस्तदिति निश्चयो भ्रान्तिः । सैव विपर्ययः । न चैवं संशयादय इत्युक्तपूर्वम् । सा द्विधा—यस्य यत्रासद्भावस्तस्य तत्र सद्भावारोपः, यस्य वा यत्र सद्भावस्तस्य तत्रासद्भावारोपः । सोऽयं भावाभावकृतो नियमो भ्रान्ते-र्बाधनियमेऽपि क्वचिद्बाधोपन्यासो भवति क्वचिन्न भवति । उपन्यासो द्विरूपोऽभि-धया वृत्त्यन्तरेण च । यत्र बाधोपन्यासे बाधितानुपन्यासे वाऽबाधिता तस्मिन्नेव वाक्येऽविज्ञातबाधेत्यर्थः । उपन्यासेतरप्रकारेण ज्ञातबाधका बाधिता । बाधकारणो-क्तेर्बाधपर्यवसानाभिप्रायत्वात् तदेतद्दर्शयति—**अबाधिता बाधिता चेति** ॥

तत्रातत्त्वे तत्त्वरूपाऽबाधिता यथा—

'मोहविरमे सरोसं थोरत्थणमण्डले सुरवहूणम् ।
जेण करिकुम्भसम्भावणाइ दिट्ठी परिट्ठविआ ॥ १०८ ॥'

[मोहविरमे सरोषं स्थूलस्तनमण्डले सुरवधूनाम् ।
येन करिकुम्भसंभावनया दृष्टिः परिस्थापिता ॥]

अत्र सुरवधूस्तनमण्डले करिकुम्भत्वेन गृहीतेऽतत्त्वरूपे यन्मिथ्यैव तत्त्वारोपणं न चानन्तरं बाधकोपन्यासः कृतस्तेनेयमबाधिता अतत्त्वे तत्त्वरूपा भ्रान्तिः ॥

**मोहविरम इति** । परिट्ठविआ सपल्लवं व्यवस्थापिता । तत्रैव परिपूर्वस्य तिष्ठतेः प्रसिद्धत्वात् । सरोषमिति समवायिविशेषणम् । न च तदन्तरेण क्रियासद्भावः । तेन मोहेऽपि न प्रक्रान्तरसानुभावस्वरूपतामहासीदिति व्यज्यते । इत्थं च दृढानुबन्धोऽसौ रसो यद्बलवत्तरविरोधिसंपर्केऽपि न कार्कश्यमगादिति स्थूलमण्डलसुरवधूपदैः प्रकाश्यते संभावनया न तु पूर्वोत्पन्नज्ञानेन । करिकुम्भानां दृढनखासनत्वात् । अबाधितेत्यत्र यथार्थोऽभिमतस्तथा दर्शयति—**बाधकोपन्यास इति** ॥

अतत्त्वे तत्त्वरूपा बाधिता यथा—

'हसिअं सहत्थतालं सुक्खवडं उवगएहि पहिएहि ।
पत्तप्फलसारिच्छे उड्डीणे पूसवंदम्मि ॥ १०९ ॥'

[हसितं सहस्ततालं शुष्कवटमुपगतैः पथिकैः ।
पत्रफलसदृशे उड्डीने शुकवृन्देऽस्मिन् ॥]

अत्र पत्रफलितोऽयं न्यग्रोध इत्यतत्त्वरूपे तत्त्वबुद्धावुत्पन्नायां य उत्तरकालमपत्रतानिष्फलताप्रत्ययस्तेनेयमतत्त्वे तत्त्वरूपाख्या बाधिता भ्रान्तिः ॥

**हसिअमिति** । पूसः शुकः । वन्दं वृन्दम् । शुकचञ्चुपुच्छानां पक्वन्यग्रोधफलनवपलाशसादृश्यम् । यद्यपि नात्र बाधोऽभिहितस्तथापि उड्डीण इत्यनेनार्थाभावविषया प्रतीतिः क्रियते । कथमन्यथा हसितहस्ततालरूपकार्यस्योपन्यासः स्यात् ॥

अतत्त्वे तत्त्वरूपा कारणबाधिता यथा—

'कनककलशस्वच्छे राधापयोधरमण्डले
नवजलधरश्यामामात्मद्युतिं प्रतिबिम्बिताम् ।
असितसिचयप्रान्तभ्रान्त्या मुहुर्मुहुरुत्क्षिपञ्
जयति जनितव्रीडाहासः प्रियाहसितो हरिः ॥११०॥'

अत्र श्यामायामात्मसुतावसितसिचयप्रान्तबुद्धिरतत्त्वे तत्त्वरूपा प्रियाहसितेन च कारणेन यद्बाधिता सैषातत्त्वे तत्त्वरूपा कारणबाधिता भ्रान्तिः ॥

**अत्र श्यामायामिति** । नात्र पूर्वोदाहरणवच्छब्देन कयाचिदपि वृत्त्यार्थाभावो विषयीकृतः किंतु प्रकारान्तरेणोन्नीयते । तथाहि नायकेनांशुकापहरणलीलायितेऽपि यदिदं राधायाः सिचयावरोधाङ्गचलनभ्रूक्षेपादि मुग्धाङ्गनोचितविभ्रमविरोधि हसितं तत्कारणं बाधयेति ॥

**अतत्त्वरूपा तत्त्वे या सापि त्रैविध्यसिद्धये ।**
**हानोपादानयोर्हेतुरुपेक्षायाश्च जायते ॥ ३७ ॥**

तत्र तत्त्वेऽतत्त्वरूपा हानहेतुर्यथा—

'सो मुद्धमिओ मिअतह्णिआहिं तह दूमि तुह आसाहिम् ।
जह संभावमईई णवि णईण परंमुहो जाओ ॥ १११ ॥'

[स मुग्धमृगो मृगतृष्णिकाभिस्तथा दूनस्त्वदाशाभिः ।
यथा सद्भावमयीष्वपि नदीषु पराङ्मुखो जातः ॥]

अत्र पारमार्थिकीष्वपि नदीषु मृगतृष्णाप्रतारितः सन्यन्न मृगः पयः पातुं प्रतिपद्यते प्रत्युत त्यजति तेनेयं तत्त्वेऽप्यतत्त्वरूपा हानहेतुर्भ्रान्तिः ॥

हानं द्विविधम् । प्रवृत्त्यभावो विपरीतश्च प्रयत्नः । द्विधाप्यत्राभिमतमिति व्याख्यानेन स्फुटयति—**न प्रतिपद्यते प्रत्युत त्यजतीति** ॥

तत्त्वेऽतत्त्वरूपोपादानहेतुर्यथा—

'समर्थये यत्प्रथमं प्रियां प्रति क्षणेन तन्मे परिवर्ततेऽन्यथा ।
अतो विनिद्रे सहसा विलोचने करोमि न स्पर्शविभाविताप्रियः ॥'

अत्राङ्गीकृतलतारूपोर्वशीपरिष्वङ्गसुखनिमीलिताक्षस्य पुरूरवसः शापान्ताविर्भूतसत्यरूपायामपि तस्यां येयं पूर्वानुभूतत्वविधानेकविधविप्रलम्भसंभावनया नयनयोरनुन्मीलनबुद्धिः सेयं तत्त्वेऽप्यतत्त्वरूपोपादानहेतुर्भ्रान्तिः ॥

**समर्थये इति ।** विभावितामिय इति युक्तः पाठः, प्रियादिषु पुंवद्भावप्रतिषेधात् । नात्राभावारोपः स्फुटोऽवगम्यत इति प्रकरणमादाय व्याचष्टे—**अत्राङ्गीकृतेति ।** न च वाच्यं दोलायमानतया संशयरूपमिदं ज्ञानमिति । यतो नास्त्येवात्र प्रियतमा तथापि तदारोपेण मनस्तापातिवाहनमुचितमिति जानतः पुरूरवसोऽनुबन्धप्रकर्षः पुष्यति नान्यथेति सहृदयहृदयसाक्षिकमिदम् । तदेतन्मनाक् स्फुटयति—**पूर्वानुभूतैवंविधेति ॥**

तत्त्वेऽप्यतत्त्वरूपोपेक्षाहेतुर्यथा—

'चिक्रंसया कृत्रिमपत्रिपङ्क्तेः कपोतपालीषु निकेतनानाम् ।
मार्जारमप्यायतनिश्चलाङ्गं यस्यां जनः कृत्रिममेव मेने ॥ ११३॥'

अत्र तत्त्वरूपेऽपि मार्जारे कृत्रिमोऽयमिति बुद्धौ जातायां तस्यां प्रयोजकत्वेन यदुपेक्षणं सेयं तत्त्वेऽप्यतत्त्वरूपोपेक्षाहेतुर्भ्रान्तिः ॥

**प्रयोजकत्वेन यदुपेक्षणमिति ।** या प्रवृत्तिं निवृत्तिं वा न प्रसूतेऽपेक्षाबुद्धिं वेत्यर्थः ॥

**भ्रान्तिमान्भ्रान्तिमाला च भ्रान्तेरतिशयश्च यः ।**
**भ्रान्त्यनध्यवसायश्च भ्रान्तिरेवेति मे मतम् ॥ ३८ ॥**

**भ्रान्तिमानिति ।** भूम्नि मतुप् । भूमार्थो द्विविधो बहूनां भ्रान्तीनामेकविषयतो भिन्नविषयाणां वा समानकर्तृता । आद्यो भ्रान्तिमतो विषयो, द्वितीयो भ्रान्तिमालायाः । न हि भ्रान्तिमति मालाक्रमनियमोऽस्ति युगपदपि भिन्नकर्तृकाणां जायमानत्वात् । भ्रान्तेरतिशयः शब्दोपनीतप्रकर्षा भ्रान्तिरिति स्वकार्यभूतं वितर्कमादाय प्रतीयमानो विपर्ययहेतुर्भ्रमान्तरानुबन्धी ॥

तत्र भ्रान्तिमान् यथा—

'कपोले मार्जारः पय इति कराँल्लेढि शशिन-
स्तरुच्छिद्रप्रोतान्बिसमिति करी संकलयति ।
रतान्ते तल्पस्थान्हरति दयिताप्यंशुकमिति
प्रभामत्तश्चन्द्रो जगदिदमहो विभ्रमयति ॥ ११४ ॥'

अत्रेन्दुमरीचिषु पयःप्रभृतिभ्रान्तिभूम्नायं भ्रान्तिमान् नाम भ्रान्तेरेव भेदः॥

भ्रान्तिमाला यथा—

'नीलेन्दीवरशङ्कया नयनयोर्बन्धूकबुद्ध्याधरे
पाणौ पद्मधिया मधूककुसुमभ्रान्त्या तथा गण्डयोः।
लीयन्ते कबरीषु बान्धवजनव्यामोहजातस्पृहा
दुर्वारा मधुपाः कियन्ति तरुणि स्थानानि रक्षिष्यसि॥११५॥'

अत्र युवत्यवयवेषु नयनादिषु मधुव्रतानां येयं नीलोत्पलादिबुद्धिः सेयं मालाक्रमेणोपजायमाना भ्रान्तिमाला भ्रान्तेरेव भेदः॥

भ्रान्त्यतिशयो द्वेधा—वितर्कहेतुर्विपर्ययहेतुश्च। तयोः पूर्वमुपमाभ्रान्तिमाचक्षते, द्वितीयं तु भ्रान्त्यतिशयमेव।

तत्रोपमाभ्रान्तिर्यथा—

'हृतोष्ठरागैर्नयनोदबिन्दुभिर्निमग्ननाभेर्निपतद्भिरङ्कितम्।
च्युतं रुषा भिन्नगतेरसंशयं शुकोदरश्याममिदं स्तनांशुकम्॥११६॥'

अत्र शाद्वलेऽपि समुत्पन्नस्तनांशुकभ्रमस्य पुरूरवसो योऽयं सादृश्यातिशयितो वितर्कः सेयमुपमाभ्रान्तिः॥

**तयोः पूर्वमिति**। तत्त्वेन प्रतीयतो मध्ये मनाक्तद्व्यतिरेकमुल्लिखितो नूनं भेदाभेदतुल्यतया मनसि सादृश्यं प्रवर्तत इति भावः। असंशयमिति पदेन प्रकर्षो वितर्कश्च प्रत्यायितः॥

भ्रान्त्यतिशयो यथा—

'दिश्याद्धूर्जटिजूटकोटिसरिति ज्योत्स्नालवोद्भासिनी
शाशाङ्की कलिका जलभ्रमिवशाद्दृष्टनष्टा मुदम्।
यां चञ्चच्छफरीभ्रमेण मुकुलीकुर्वन्फणालीं मुहु-
र्मुहुँर्लक्ष्यमहिर्जिघृक्षतितमामाकुञ्चनप्राञ्चनैः॥ ११७॥'

अत्र गङ्गाम्भःप्रतिफलितां रजनिकरकलामालोकयतो वासुकेरियं शफरीभ्रमेण मुकुलीकुर्वन् फणालीं शफरीयमित्यध्यासिता विपर्ययबुद्धिः सोऽयं भ्रान्त्यतिशयो नाम भ्रान्तेरेव भेदः ॥

**जिघृक्षतितमामिति**। 'तिङश्च ५।३।५६' इति तमपि 'किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे ५।४।११' इत्याम् ॥

भ्रान्त्यनध्यवसायोऽपि द्विधा—सालम्बनो निरालम्बनश्च। तयोः सालम्बनो यथा—

'विरहिणिहिअअकअन्तेहिं णिण्णाअइ
तक्खणि छाइज्जइ अलिणिवहेहिं चैत्तेण चूअवणी।
अह तासु वि मअरन्दहिं संदाणिअइ
जह ण कलम्ब ण अम्ब ण जम्बू जाणिअइ ॥ ११८ ॥'

[विरहिणीहृदयकृतान्तैर्निर्णीयते
तत्क्षणे छाद्यतेऽलिनिवहैश्चैत्रेण चूतवनी।
अथ तास्वपि मकरन्दैर्बध्यते
यथा न कदम्बो नाम्रो न जम्बूर्ज्ञायते ॥]

न कदम्बो नाम्रो न जम्बूरिति ज्ञायत इति त्रयाणामेवावलम्बनभूतत्वात्सालम्बनो नामायं भ्रान्त्यनध्यवसायो भ्रान्तिभेदः ॥

भ्रान्तेरनध्यवसायोऽनिर्धार्यमाणविषयता। **विरहिणीजणण इति**। विरहिणीजनस्य। 'अधीगर्थ-२।३।५२।' इत्यादिना कर्मणि षष्ठी। दअन्तेण दयमानेन रक्षता। णावइ प्रतिभाति। तक्खणि तत्र क्षणे। छाइज्जइ अलिणिवहेहिं छाद्यतेऽलिनिवहैः करणभूतैः। चैत्तेण चैत्रेण कर्त्रा। चूअवणी चूतवनी। तह तथा। तासु वि तस्या अपि। संदाणिअइ बध्यते। अनिर्धारितविषयतया कथमालम्बननिरालम्बनयोर्भेद इत्यत आह—**त्रयाणामेवावलम्बनभूतत्वादिति**। उक्तिभङ्ग्या विषयोपादानादित्यर्थः ॥

---

१. अत्र श्लोके—'विरहिणीजणण' इति, 'दअन्तेण' इति, 'णावइ' इति, 'चैत्तेण' इति टीकाकारसंमतः पाठः.

निरालम्बो यथा—

'उभौ रम्भास्तम्भावुपरि विपरीतौ कमलयो-
स्तदूर्ध्वं रत्नाश्मस्थलमथ दुरूहं किमपि यत् ।
ततः कुम्भौ पश्चाद्बिसकिसलये कन्दलमये
तदन्विन्दाविन्दीवरमधुकराः किं पुनरिदम् ॥११९॥'

अत्रोर्वादिषु युवत्यवयवेषूत्पन्नो रम्भास्तम्भभ्रान्तेर्योऽयमेतत्समुदाये किमिदमित्यालम्बनं विना कृतोऽनध्यवसायः स एष निरालम्बनो नाम भ्रान्त्यनध्यवसायो भ्रान्तेरेव भेदः ॥

**आलम्बनं विनेति** । विषयानिर्धारणं व्यक्तीकृतम् ॥

**ऊहो वितर्कः संदेहनिर्णयान्तरधिष्ठितः ।**
**द्विधासौ निर्णयान्तश्चानिर्णयान्तश्च कीर्त्यते ॥ ३९ ॥**

मिथ्याप्रतीतिसामान्यादनन्तरं वितर्कलक्षणम्—**ऊह इति** । ऊह इति यस्य प्रसिद्धिः स इत्यर्थः । पर्यायशब्देनापि लक्षणं क्रियत एव । यथा—घटपदार्थतया व्यावृत्तौ संदिहानस्य कलशपदार्थतया निश्चयवतो यः कलशः स घट इति । कथमसौ संशयविपर्ययाभ्यां भिद्यत इत्यत आह—**संदेहेति** । संदेहो नानाकोटिकस्तथाभूतानेव जिज्ञासां प्रसूते, तर्कस्तु तदनन्तरभावी नियतकोटिकस्तथाभूतामिति । कारणस्वरूपकार्यभेदात् संशयतो भेद इति । एवं विपर्ययतोऽपि । स हि तर्कान्तरभाविनिश्चयात्मकः प्रवृत्त्यादिहेतुभूतश्च । तदयं तर्काभासस्य विपर्ययापर्यवसायिनो विषयविभागः कृतः, स तु तर्कस्य विषयविभागः स्फुट एव संदेहनिर्णययोर्मध्यमधिष्ठितः स तद्वर्ती । विभागमाह—**द्विधासाविति** । निर्णयान्तरोपन्यस्तः फलभूतानिश्चयोऽतथाभूतो निर्णयान्तो निश्चयः ॥

प्रमितिविपर्ययरूपतया द्विविध इत्याशयवान्निर्णयार्थं विभजते—

**तत्त्वानुपात्यतत्त्वानुपाती यश्चोभयात्मकः ।**
**स निर्णयान्त इतरो मिथ्यामिथ्योभयात्मकः ॥ ४० ॥**

**तत्त्वानुपातीति** । निगदेनैव व्याख्यातम् ॥

तेषु निर्णयान्तस्तत्त्वानुपाती यथा—

'मैनाकः किमयं रुणद्धि गगने मन्मार्गमव्याहतं
शक्तिस्तस्य कुतः स वज्रपतनाद्भीतो महेन्द्रादपि ।
तार्क्ष्यः सोऽपि समं निजेन विभुना जानाति मां रावणं
आ ज्ञातं स जटायुरेष जरसा क्लिष्टो वधं वाञ्छति ॥१२०॥'

अत्र निरूपितलक्षणे वितर्के जटायुरेष इति तत्त्वानुपाती निर्णयान्तो वितर्कः ॥

**मैनाकः किमयमिति** । किमयमिति काक्वा पूर्वं दोलायमानचित्तस्य नियतकोटिस्पर्शी ज्ञानविशेष उपनीयते स एव तर्कः । एवमन्यत्रापि ॥

स एवातत्त्वानुपाती यथा—

'अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः ।
वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ॥ १२१॥'

अत्र किमिदं रूपं निर्मातुं यथोक्तः पुराणो मुनिः प्रभवेत्, अतश्चन्द्रादिष्वन्यतमेन प्रजापतिना भवितव्यमित्यतत्त्वानुपातित्वादतत्त्वानुपात्ययं निर्णयान्तो वितर्कः ॥

स एवोभयात्मको यथा—

'चित्ते निवेश्य परिकल्पितसत्त्वयोगा-
द्रूपोच्चयेन रचिता मनसा कृता नु ।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः ॥ १२२ ॥'

सोऽयं तत्त्वानुपातित्वादतत्त्वानुपातित्वाच्चोभयात्मा निर्णयान्तो वितर्कः ॥

उभयात्मक इति । स्थिरतमधष्ठिरित्यनेन तत्त्वानुपाती, अपरेत्यनेनातत्त्वानुपाती प्रकाशितः ॥

अनिर्णयान्तो मिथ्यारूपो यथा—

'अद्रेः शृङ्गं हरति पवनः किंस्विदित्युन्मुखीभि-
दृष्टोच्छ्रायश्चकितचकितं मुग्धसिद्धाङ्गनाभिः ।
स्थानादस्मात्सरसनिचुलादुत्पतोदङ्मुखः खं
दिङ्नागानां पथि परिहरन्स्थूलहस्तावलेपान् ॥ १२३ ॥'

अत्र किमिदमद्रेः शृङ्गं पवनो हरतीति मेघं प्रति कल्पनायां मिथ्यात्वाद्वस्तुनश्चानिर्णयादनिर्णयान्तो मिथ्यारूपो वितर्कः ॥

मिथ्यामिथ्यारूपौ बाधिताबाधितविषयौ । अबाधितोऽपि तर्को भवत्येव । यथा यद्यस्य नीलं रूपं नीलोत्पलमिति ॥

स एवामिथ्यारूपो यथा—

'अयमसौ भगवानुत पाण्डवः स्थितमवाङ्मुनिना शशिमौलिना ।
समधिरूढमजेन नु जिष्णुना स्विदिति वेगवशान्मुमुहे गणैः ॥१२४॥'

अत्र भगवत्पार्थयोरमिथ्यारूपत्वेन वेगवत्त्वादेकस्यानिर्णयान्तोऽमिथ्यारूपो वितर्कः ॥

अथ भगवत्पार्थयोरिति । भगवत्पार्थयोरवस्थानयोः समधिरोहारोहयोश्च न किंचिद्बाधकमस्ति चक्षुर्ज्ञानस्य विशेषः प्रत्यक्षत इति ॥

अनिर्णयान्त उभयात्मा यथा—

'माया स्विदेषा मतिविभ्रमो वा ध्वस्तं नु मे वीर्यमुताहमन्यः ।
गाण्डीवमुक्ता हि यथापुरा मे पराक्रमन्ते न शराः किराते ॥१२५॥'

अत्र मायादीनां विकल्पानां मिथ्यारूपत्वान्मम शराः किराते न व्याप्रियन्त इत्यस्या मिथ्यारूपत्वादनिर्णयान्तत्वाच्चायमनिर्णयान्त उभयरूपो वितर्कः ॥

अत्र मायादीनामिति। न परमेश्वरस्य माया छद्म, न शक्तौ मतिभ्रमः, न ध्वंसो वीर्यस्य, नवार्जुनादेवार्जुनस्यान्यत्वमिति विषयबाधात्॥

मीलिते भ्रान्तिरस्तीति भ्रान्त्यनन्तरं मीलितलक्षणमाह—

वस्त्वन्तरतिरस्कारो वस्तुना मीलितं स्मृतम्।
पिहितापिहिते चैव तद्गुणातद्गुणौ च तत्॥ ४१॥

वस्त्वन्तरेति। वस्तूनामिति श्लिष्टषष्ठी। वस्त्वन्तरेण तिरस्कारे इति कर्मणि। वस्त्वन्तरस्य तिरस्कार इति कर्तरि। फलतः स एवार्थः। तथाचोत्कृष्टगुणेनापकृष्टगुणस्य तिरस्करणं न्यग्भावनमिति लक्षणार्थः। पृथग्रूपतिरस्कारेणैकरूपतापत्तिर्मीलितमुच्यते। तथाच कातन्त्रम्—'मीलितं युक्तमुच्यते' इति। अभिप्रायपूर्वस्तिरस्कारो द्विविधः—सिद्धाभिप्रायफलोऽसिद्धाभिप्रायफलश्च यथाक्रमं पिहितापिहिते। न चैतावता विशेषेण पृथग्भावः; सामान्यलक्षणव्याप्तत्वादवान्तरभङ्गीनामानन्त्याच्च। स रूपगुणेन तिरस्कारस्तद्गुणो विरूपगुणेनातद्गुणः। एतावपि मीलितविशेषाविति स्फुटम्॥

अत्र मीलितमभिधीयमानगुणेन प्रतीयमानगुणेन च वस्तुना संभवति। तयोराद्यो(ऽभिधीयमानगुणेन) यथा—

'एन्तोवि ण सच्चविओ गोसे पसरत्तपल्लवारुणच्छाओ।
मज्जणतंबेसु मओ तह मअतंबेसु लोअणेसु अमरिसो॥१२६॥'

[आगच्छन्नपि न दृष्टः प्रातः प्रसरत्पल्लवारुणच्छायः।
मज्जनताम्रयोर्मदस्तथा मदताम्रयोर्लोचनयोरमर्षः॥]

अत्र मज्जनताम्रयोर्लोचनयोर्मदरागो मदताम्रयोः कोपानुरागः साक्षादभिधीयमानेनैव गुणेन तिरस्क्रियमाणो निदर्शित इत्यभिधीयमानगुणेन वस्तुनैतन्मीलितम्॥

विभागमाह—अत्र मीलितमिति। एन्तोवीति। सच्चविओ दृष्टः। गोसे प्रातः। तस्याः मज्जनं स्नानम्। अत्र ताम्रपल्लवारुणरागपदाभ्यामभिधीयते गुणः॥

प्रतीयमानगुणेन यथा—

'पिअदंसणेण सुहरसमुडलिअ जइसे ण होन्ति णअणाइम् ।
ता केण कण्णरइअं लक्खिज्जइ कुवलअं तस्सा ॥ १२७ ॥'

[प्रियदर्शनेन सुखरसमुकुलिते यद्यस्या न भवेतां नयने ।
तत्केन कर्णरचितं लक्ष्येत कुवलयं तस्याः ॥]

अत्र प्रियदर्शनसुखेन मुकुलितयोरेव लोचनयोस्तस्याः कर्णकुवलयं लक्ष्यते नत्वमुकुलितयोरिति वस्तुना वस्त्वन्तरतिरस्कारः प्रतीयमानगुणतयोपपादित इति प्रतीयमानगुणेन वस्तुना मीलितमिदम् ॥

ननु पिअदंसणेणेत्यादि कथं मीलितं, न ह्यत्र तिरस्कारः केनापि शब्देन प्रत्याय्यत इत्यत आह—**नत्वमुकुलितयोरिति** । यदि मुकुलिते न स्यातां कथं कुवलयं लक्ष्यत इति तर्कस्य तिरस्कारपर्यवसानादिति भावः । मूर्तिरूपादिकः प्रतीयमानो गुणः ॥

पिहितं यथा—

'पअडिअसणेहसंभावविब्भमन्तिअ जह तुमं दिट्ठो ।
संवरणवावडाए अण्णोवि जणो तह च्चेअ ॥ १२८ ॥'

[प्रकटितस्नेहसद्भावविभ्रमतया यथा त्वं दृष्टः ।
संवरणव्यापृतया अन्योऽपि जनस्तथा चैव ॥]

अत्र प्रकटितस्नेहविभ्रमतया त्वामवलोक्य नैतदन्यो जनो जानात्विति सर्वत्र स्निग्धदृष्टिपातेन पिहितमप्येतन्मीलितभेद एव ॥

अपिहितं यथा—

'दिट्ठाइवि जण्ण दिट्ठो आलविआएवि जण्ण आलविओ ।
उवआरो जण्ण कओ तेण अ कलिअं छइल्लेहिम् ॥ १२९ ॥'

[दृष्टयापि यन्न दृष्ट आलपितयापि यन्नालपितः ।
उपचारो यन्न कृतस्तेन च कलितं छेकैः ॥]

अत्र दृष्टया यन्न दृष्टः संभाषितया यन्न संभाषितो न चाभ्यागतोपचारो विहितस्तेन तदनुरागः परं न पिहितः प्रत्युत छादनेन छेकानां प्रकटित इत्यपिहिताख्योऽयं मीलितभेदः ॥

ननु दृष्टयापि न दृष्ट इत्यपि कथमलंकारः । न ह्यत्र शक्तिरस्तीत्यत आह—**प्रत्युतेति** । छेका विदग्धास्तैरास्वाद्यमानत्वादावर्जकत्वं काव्यस्येत्यर्थः ॥

तद्गुणो यथा—

'गोरङ्गउ तरुणिअणो जोह्णाइं अहिसरइ
सिअणेवच्छपडिच्छेओ वल्लहवद्धरइ ।
तच्छाआहिं पुण चलिअउ सामल-
गत्तो तह मअणु मन्ति अहिम् ॥ १३० ॥'

[गौराङ्गस्तरुणीजनो ज्योत्स्नायामभिसरति सितनेपथ्यपरिच्छन्नो वल्लभबद्धरतिः ।
तच्छायासु पुनश्चलितः श्यामलाङ्गस्तत्र मदनो मन्त्रभूत् ॥]

अत्र गौराङ्गस्तरुणीजनः सितनेपथ्यो ज्योत्स्नायां श्यामस्तु नीलनेपथ्यस्तस्याश्छायासु गच्छतीति तद्गुणाश्रयमीलनात्तद्गुणाख्यं मीलितमिदम् ।

**गोरङ्गउ इति** । गौराङ्गः । जोह्णाइं ज्योत्स्नायाम् । णेवच्छं नेपथ्यं वस्त्राङ्गरागादिपरिग्रहः । पडिच्छेओ प्रतीक्ष्य गृहीत्वा । वल्लहवद्धरइ वल्लभबद्धरतिः । तच्छाआहिं तासां गौराङ्गीणां छायायाम् । चलिअउ चलितम् ॥

अतद्गुणो यथा—

'कर्कन्धूफलमुच्चिनोति शबरी मुक्ताफलाकाङ्क्षिणी
क्रुद्धोलूककदम्बकस्य पुरतः काकोऽपि हंसायते ।
कीर्त्या ते धवलीकृते त्रिभुवने क्ष्मापाल लक्ष्मीः पुरः
कृष्णं वीक्ष्य बलोऽयमित्युपहितव्रीडं शनैर्जल्पति १३१॥'

अत्र कर्कन्धूफलानामपगतनिजगुणत्वादतद्गुणत्वादतद्गुणाख्यं मीलितमिदम् ॥

**अत्र कर्कन्धूफलानामिति** । विरूपगुणानामित्यर्थः ॥

**सदृशादृष्टचिन्तादेरनुभूतार्थवेदनम् ।**
**स्मरणं प्रत्यभिज्ञानस्वप्नाद्यपि न तद्बहिः ॥ ४२ ॥**

मीलिते ज्ञानमस्तीति साजात्यादनन्तरं स्मृतिं लक्षयति—**सदृशेति** । सदृशा ज्ञायमानसादृश्यात् प्रयत्नजा स्मृतिश्चिन्तादिर्यस्यार्थमग्रे कथयिष्यति—अनुभूतार्थवेदनं समानविषयानुभवनियतज्ञानविशेषरूपं स्मरणम् । प्रत्यभिज्ञानमपि पूर्वानुभूतविषयमेव । एवं स्वप्नोऽपि ॥

तत्र सदृशाद्यथा—

'अदृश्यन्त पुरस्तेन खेलत्खञ्जनपङ्क्तयः ।
असमर्यन्त विनिःश्वस्य प्रियानयनविभ्रमाः ॥ १३२ ॥'

अत्र खञ्जनपङ्क्तिदर्शनात्तत्सदृशप्रियानयनविभ्रमस्मरणात्तत्सदृशदर्शनजं स्मरणमिदम् ॥

**अत्र खञ्जनेति** । अत्रशब्देनखञ्जनपङ्क्तिश्चेदवलोकितानन्तरमेव प्रियास्मरणमासीदिति कार्यकारणभावोऽवगम्यते । स च कारणतासादृश्यमनन्तर्भाव्य खञ्जनज्ञानस्यास्तीति च प्रतीतं सादृश्यमिति भावः ॥

अदृष्टाद्यथा—

'मुनिसुताप्रणयस्मृतिरोधिना मम वियुक्तमिदं तमसा मनः ।
मनसिजेन सखे प्रहरिष्यता धनुषि चूतशरश्च निवेशितः १३३॥'

अत्र मुनिसुताप्रणयस्मृतिरोधिना तमसा मे मनो वियुक्तमित्यदृष्टकृतं स्मरणमिदम् ॥

अत्र **मुनिसुतेति** । तमोलक्षणस्य प्रतिबन्धकस्यापगमे स्मरणरूपं कार्यमावश्यकमित्यर्थः ॥

चिन्ताया यथा—

'पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां
विपर्यासं यातो घनविरलभावः क्षितिरुहाम् ।
बहोर्दृष्टं कालादपरमिव जातं वनमिदं
निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति ॥ १३४ ॥'

अत्र प्रत्यक्षेष्वपि स्रोतस्तरुविपिनादिषु स्मरणस्य चिन्ताजन्यत्वादिदं चिन्तोद्भूतं स्मरणम् ॥

आदिग्रहणात्परप्रयत्नाद्यथा—

'दर्शनपथमायाता साक्षादिव तन्मयेन हृदयेन ।
स्मृतिकारिणा त्वया मे पुनरपि चित्रीकृता कान्ता ॥१३५॥'

अत्र परकृतात्प्रयत्नविशेषाच्चिन्तायाः प्रवृत्तत्वादिदमपि स्मरणमेव ॥

स्वप्नाद्यथा—

'जाने स्वप्नविधौ ममाद्य चुलुकोत्सेकयं पुरस्तादभू-
त्प्रत्यूषे परिवेषमण्डलमिव ज्योत्स्नासपत्नं महः ।
तस्यान्तर्नखनिस्तुषीकृतशरच्चन्द्रप्रभैरङ्गकै-
र्दृष्टा काप्यबला बलात्कृतवती सा मन्मथं मन्मथम् १३६'

अत्र स्वप्नस्य चिन्तादिजन्यत्वात्स्वप्नस्मृतिरपि स्मरणमेव ॥

यदि स्वप्नस्मृतिरपि स्मरणमेव तदा कतमदत्र सादृश्यादिषु कारणमत उक्तम्—**चिन्तादीति** ॥

प्रत्यभिज्ञानं यथा—

'गृहीतो यः पूर्वं परिणयविधौ कंकणधरः
सुधामूर्तेः पादैरमृतशिशिरैर्यः परिचितः ।
स एवायं तस्यास्तदितरकरौपम्यसुभगो
मया लब्धः पाणिर्ललितलवलीकन्दलनिभः ॥ १३७ ॥'

अत्र गृहीतो यः पूर्वं स एवायं तस्याः पाणिरिति प्रत्यभिज्ञानमपि स्मरणमेव ॥

प्रत्यभिज्ञानस्वरूपं दर्शयति—**यः पूर्वं स एवायमिति** । ननु सूत्रे स्वप्नात्पूर्वं प्रत्यभिज्ञानमुद्दिष्टं पश्चादुदाह्रियत इति कथमेतत् । अत्रोदाहरणक्रमेऽपि लिपिप्रमादोऽयमित्याराध्यपादाः ॥

**अभिप्रायानुकूल्येन प्रवृत्तिर्भाव उच्यते।**
**सोद्भेदोऽथ निरुद्भेदश्चैकतश्चाभितश्च सः ॥ ४३ ॥**

अभिमतमुक्तादिवस्तुचिन्तननियमादनन्तरं भावलक्षणम् । तदाह—**अभिप्रायेति** । अभिमतवस्तुचिन्ता अभिप्रायः । तदनुकूलतया प्रवृत्तिः क्रियालक्षणा भावः । अत एव सूक्ष्माद्भेदः । प्रवृत्तिप्रतिपादकेन स्वार्थप्रकाशनद्वारा प्रकाश्यमानोऽभिप्रायः क्वचित्पदान्तरवृत्तिसहकृतेन प्रकाश्यते, क्वचित्केवलेन । ताविमौ सोद्भेदनिरुद्भेदौ । मिथोऽनुबन्धविषयश्चायं चमत्करोति । तत्र प्रवृत्तिरुच्यमानानेन तस्योच्यते तयोर्वा । तदिदमाह—**एकतश्चाभितश्चेति** । अभिप्रायोद्भावनादशायां रूढः स्वादपदवीमासाद्य चमत्कारमावहति । अत एव तत्कार्ययोः प्रवृत्तेरनुभावरूपतया तथावानकुण्ठ इति हृदयम् (?) ॥

तत्रैकतः सोद्भेदो यथा—

'गेह्ण पलोएह इमं विअसिअणअणा पिअस्स अप्पेइ ।
घरिणी सुअस्स पढमुब्भिण्णदन्तजुअलंकिअं बोरम् ॥१२८'

[गृहाण पर्यालोकयेमं विकसितनयना प्रियायार्पयति ।
गृहिणी सुतस्य प्रथमोद्भिन्नदन्तयुगलाङ्कितं बदरम् ॥]

अत्र सुतस्य दन्तोद्गमादहमुपभोगयोग्यास्मीति गृहिण्या एवमभिप्रायः प्रकर्षविकासितनयनतयोद्भिद्यते; न पुनः पत्युरित्येकतः सोद्भेदोऽयं भावः ॥

अभितः सोद्भेदो यथा—

'सालोए च्चिअ सूरे घरिणी घरसामिअस्स घेत्तूण ।
णेच्छन्तस्सवि पाए धुअइ हसन्ती हसन्तस्स ॥ १२९ ॥'

[सालोक एव सूर्ये गृहिणी गृहस्वामिनो गृहीत्वा ।
अनिच्छतोऽपि पादौ धावयति हसन्ती हसतः ॥]

अत्र सालोक एव सूर्ये गृहपतेर्गृहागमनं गृहिण्याश्च यत्पादधावनं तदावाभ्यामद्य वेश्मनो न निर्गन्तव्यमिति भावः । स च द्वयोरपि हासेनाभित उद्भिद्यत इत्यभितः सोद्भेदोऽयं भावः ॥

एकतो निरुद्भेदो यथा—

'सालिवणगोविआए उड्डीयन्तीअ पूसविन्दाइम्।
सव्वङ्गसुन्दरी एवि पहिआ अच्छीइ पेच्छन्ति॥ १४०॥'

[शालिवनगोपिकाया उड्डाययन्त्याः शुकवृन्दानि।
सर्वाङ्गसुन्दर्या अपि पथिका अक्षिणी एव प्रेक्षन्ते॥]

अत्रातिसौन्दर्येण देवीभ्रान्त्या शालिवनगोपिकामालोकयतां पथिकानां तदक्षिनिरीक्षणेऽयमभिप्रायः—'शालिवनतिरस्कारेण देवमानुषयोर्विशेषभूतः पश्यामेव भूमिस्पर्शो भूम्यस्पर्शो वा न लक्ष्यत इति तदक्षिणी एव पश्यामो यदियं निमिषति तदा मानुषीयं यदि न निमिषति तदा देवीयम्।' इति सर्वाङ्गसुन्दर्या अपि पथिकानामेव जायमानो भावो नेह केनचित्कर्मणोद्भिद्यत इत्येकतो निरुद्भेदश्चायं भावः॥

नेह केनचिदिति। तथा चात्र शब्दान्तरस्य व्यापारो नास्तीत्यर्थः॥

अभितो निरुद्भेदो यथा—

'गोलाअडट्ठिअं पेच्छिऊण गहवइसुअं हलिअसोह्वा।
आढत्ता उत्तरिउं दुक्खुत्ताराइ पअवीए॥ १४१॥'

[गोदातटस्थितं प्रेक्ष्य गृहपतिसुतं हालिकस्नुषा।
आरब्धा उत्तर्तुं दुःखोत्तरया पदव्या॥]

अत्रागच्छन्तीं हालिकस्नुषां दृष्ट्वा गृहपतिसूनोर्गोदावरीतटे यदवस्थानम्, यश्च तमवलोक्य तस्या दुरुत्तरमार्गेणावतरणारम्भस्तत्रायं तयोरभिप्रायो हस्तावलम्बदानेनावयोरङ्गसङ्गमः संपद्यतामिति। स चाभितो द्वयोरपि जायमानो नेह केनचित्कर्मणोद्भिद्यत इत्यभितो निरुद्भेदश्चायं भावः।

हृद्यं सूक्ष्मं च भिद्येत न हि भावात्कथंचन।
हृद्योदाहरणं तत्र तैरिदं प्रतिपाद्यते॥ ४४॥

'हिअए रोसुग्घुण्णं पाअप्पहरं सिरेण पत्थन्तो ।
णह उदओ(?) माणंसिणीए अ थोरं सुअं रुण्णम् ॥१४२॥'

अत्र हृदये रोषोद्घूर्णपादप्रहारं यदयं शिरसा प्रार्थितवान्, यच्च तयासौ न ताडितस्तत्र हृदये वल्लभा वसतीति भावः। स च प्रार्थनारोदनाभ्यामुद्भिद्यमानः सोद्भेदो भावो हृद्य इत्युच्यते ॥

**हृद्यमिति**। अभिमतस्य वस्तुनो हृदयावच्छेदेन वृत्तिमतिसंधाय प्रवृत्तिः। तत्र यद्यपि विशेषोऽस्ति तथापि भावसामान्यलक्षणाक्रान्तस्तत्रैवान्तर्भविष्यति ॥

**निरुद्भेदस्तु यो भावः स सूक्ष्मस्तैर्निगद्यते ।**
**इङ्गिताकारलक्ष्यात्स सूक्ष्मात्स्याद्भूमिकान्तरम् ॥ ४५ ॥**

**यथा—**

'कदा नौ संगमो भावीत्याकीर्णे वक्तुमक्षमम् ।
अवेत्य कान्तमबला लीलापद्मं न्यमीमिलत् ॥ १४३ ॥'

अत्र वक्तुमक्षमतायामिङ्गिताकारयोरप्रतीयमानत्वाद् भावगतेर्भूमिकान्तरमिदं भवति ।

**ननु च** सूक्ष्मः कथं पूर्वोक्तात्सूक्ष्माद्भिद्यत इत्यत आह—**इङ्गिताकारलक्ष्यादिति**। कदा नौ संगमो भावीत्यभिप्रायस्य व्यञ्जकं नेङ्गितं न विकारो वा कान्तस्य कश्चिदुपात्तः, अवेत्येत्यादिप्रकाशिताभिप्रायानुगुणा काचिदस्ति क्रिया वा। कथमन्यथा तमुद्दिश्य लीलापद्मनिमीलनं संगच्छते। तस्मादन्यमेवेदं सूक्ष्मं भावलक्षणाक्रान्तम् ॥

'पद्मसंमीलनाच्चात्र सूचितो निशि सङ्गमः ।
आश्वासयितुमिच्छन्त्या प्रियमङ्गजपीडितम् ॥ १४४ ॥'

अत्रानुकार्यानुकरणेऽपि भूमिकान्तरिते एव भवत इति सोऽयं निरुद्भेदो भाव एव सूक्ष्म इत्युच्यते ।

उत्तरार्धस्योदाहरणं व्युत्पादयति—**अत्र पद्मसंमीलनाच्चेति**। एवं चेत् प्राप्तमिङ्गितलक्ष्यत्वमत आह—**तत्र चेति**। आजानिकं पद्ममीलनमनुकार्यं

कान्ताहस्ताङ्गुलीजनितमनुकरणं रात्रौ समागमो भविष्यतीति कान्तागतोऽभिप्रायः। न तु निमीलनमनुकार्याद्व्यभिचरितमेतमर्थमवबोधयतीत्यर्थः॥

**प्रत्यक्षमक्षजं ज्ञानं मानसं चाभिधीयते।**
**स्वानुभूतिभवं चैवमुपचारेण कथ्यते॥ ४६॥**

ज्ञानसंगत्यनन्तरं प्रमाणरूपालंकारप्रस्तावस्तत्रान्येषां प्रमाणानां प्रत्यक्षमूलकत्वात् प्रथमं प्रत्यक्षलक्षणमाह—**प्रत्यक्षमिति**। साक्षात्कारः प्रत्यक्षमिति प्रसिद्धं तस्य विभागमाह—**अक्षजमिति**। अक्षं बहिरिन्द्रियं तस्माज्जातम्, मानसं बाह्येन्द्रियानपेक्षेण मनसा जनितम्। स्वानुभूतिः सहजा चिच्छक्तिस्तस्या उत्पन्नम्। शरीराभिघाताद्यभिभूते प्रत्याहारतिरस्कृते वा मनसि यत् कदाचिदतिस्फुटाभं ज्ञानमुत्पद्यते न तस्य मनोनिबन्धनता शक्यतेऽभिधातुमिति चिच्छक्तिमेवाश्रयते। ननु इन्द्रियजन्य एव लोके साक्षात्कारिताप्रसिद्धेः कथमनुभूतिभवं तथेत्यत आह—**उपचारेणेति**। यदीन्द्रियजन्ये साक्षात्कारितानियमस्तदोपचारेण परिगणनम्। अथ भावनादिबलेन विनापीन्द्रियं भवतीति पक्षस्तदा मुख्यत एवेति भावः॥

तत्राक्षजं द्विधा। युगपदेकशश्च। तयोर्युगपद्यथा—

'कान्तकान्तवदनप्रतिबिम्बे मग्नबालसहकारसुगन्धौ।
स्वादुनि प्रणदितालिनि शीते निर्ववार मधुनीन्द्रियवर्गः॥१४५'

अत्र मदिराश्रयाणां मुखप्रतिबिम्बसौगन्ध्यस्वादुताश्रव्यत्वशैत्यानां दृग्घ्राणरसनश्रवणत्वगिन्द्रियप्रत्यक्षता प्रतीयते॥

**युगपदिति**। एकस्मिन्वाक्ये घ्राणरसनचक्षुस्त्वक्श्रोत्राणां पञ्चानामपि युगपत्प्रवृत्त्यभिधानायौगपद्यं रसानुगुणतया यौगपद्याच्चमत्कारितामावहतीति द्विधाप्यलंकारकाण्डे परिसंख्यानमुचितम्॥

एकशो यथा—

'मन्दमन्दविगलत्त्रपमीषच्चक्षुरुल्लसितपक्ष्म दधत्या।
वीक्ष्यते स्म शनकैर्नववध्वा कामिनो मुखमधोमुखयैव १४६'

तदेतच्चाक्षुषम्। एवं श्रावणादीन्यप्युदाहरणीयानि॥

मानसमपि द्विधा । सुखादिविषयमनुभूतार्थविषयं च । तयोः सुखादिविषयं यथा—

'अस्तोकविस्मयमविस्मृतपूर्ववृत्त-
मुद्भूतनूतनभयज्वरजर्जरं नः ।
एकक्षणत्रुटितसंघटितप्रमोद-
मानन्दशोकशबलत्वमुपैति चेतः ॥ १४७ ॥'

एतन्निगदेनैव व्याख्यातम् ॥

**मानसमपि द्विधेति** । संयुक्तसमवायनियमितमेकमपरं तु संस्कारनियमितम् । संस्कारलक्षणया हि प्रत्यासत्त्या यथा स्मरणातिरिक्तं प्रत्यभिज्ञानं तथेदमपीति न किंचिदनुपपन्नम् ॥ **निगदेनैवेति** । यदि विस्मयादीनयं न साक्षात्कर्तास्तर्हि कथमुद्वेलतामाचक्षीतेत्यर्थः ॥

अनुभूतार्थविषयं यथा—

'पिहिते वासागारे तमसि च सूचीमुखाग्रसंभेद्ये ।
मयि च निमीलितनयने तथापि कान्तामुखं व्यक्तम् ॥१४८॥'

इदमपि नातिदुर्बोधमिति न व्याख्यातम् ॥

**इदमिति** । व्यक्तमित्यनेन साक्षात्कारो दर्शितः । नहि स्मरणेन व्यक्तता भवति किंतु आत्मन्येनावतिष्ठते । स्वानुभूतिमाश्रयत इत्यर्थः ॥

स्वानुभूतिभवं द्विधा । मिथ्यात्मकममिथ्यात्मकं च । तयोर्मिथ्यात्मकं यथा—

'अथ दीर्घतरं तमः प्रवेक्ष्यन्सहसा रुग्णरयः ससंभ्रमेण ।
निपतन्तमिवोष्णरश्मिमुर्व्यां वलयीभूततरुं धरां च मेने ॥१४९॥'

तदिदमिन्द्रियेषु मनसि चानवतिष्ठमानमात्मन्येवावतिष्ठते ॥

अमिथ्यात्मकं यथा—

'मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः
प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः ।

यदालोक्याह्लादं ह्रद इव निमज्ज्यामृतमये
दधत्यन्तस्तत्त्वं किमपि यमिनस्तत्किल भवान् ॥१५०॥'

अस्यात्मविषयता व्यक्तैव योगिभिरुद्गीयते ॥

**योगिभिरिति**। निदिध्यासनबललब्धात्मनो ज्ञानस्य योगिमात्रे प्रसिद्धविषयत्वान्न ह्यस्मदादयस्तथा तं परिचिन्वन्ति यथा योगिन इत्यर्थः ॥

अनुमानलक्षणमाह—

**लिङ्गाद्यल्लिङ्गिनो ज्ञानमनुमानं तदुच्यते ।**
**पूर्ववच्छेषवच्चैव दृष्टं सामान्यतश्च यत् ॥ ४७ ॥**

**लिङ्गादिति**। यस्य येन सहाविनाभावलक्षणा व्याप्तिः संदिग्धसाध्यधर्मधर्मिरूपपक्षवृत्तितारूपा पक्षधर्मता च गृह्यते तस्मात्तस्य प्रतीतिरनुमानं यथा धूमाद्वह्नेः। स हि यथाविधे सिद्धस्तथाविधसंनिधानं सूचयति । तत्र यस्मात्प्रतीतिरुत्पद्यते तत् लिङ्गं चिह्नम्। व्याप्तिविशिष्टपक्षे धर्मतासंज्ञापकमित्यर्थः । इतरल्लिङ्गं ज्ञापकमस्यास्तीति कृत्वा। पूर्ववच्छेषवत्सामान्यतोदृष्टभेदात्त्रिविधमनुमानमग्रे ग्रन्थकृतैव व्याख्यातमिति न वितन्यते ॥

**फलसामग्र्यभेदेन द्विधैतद्भिद्यते पृथक् ।**
**उदाहरणमेवैषां रूपव्यक्त्यै भविष्यति ॥ ४८ ॥**

**फलसामग्र्येति**। यद्यपि ज्ञानमनुमानमित्युक्तं तथापि तस्य साधारणमेव क्वचिदनुपन्यासप्रधानं वाच्यम्, क्वचित्करणीभूतलिङ्गपरामर्शोपन्यासप्रधानमिति भवति यथोक्तो विशेषः। अनुमानशब्दो हि भावल्युडन्तः करणे ल्युडन्तो वा। आद्ये फलं द्वितीये सामग्र्यकरणमित्यर्थः। उपन्यासप्रधानता दुरूहेत्यत आह—**उदाहरणमेवेति** ॥

तेषु यत्र कारणं दृष्ट्वा कार्यमनुमीयते तत्पूर्ववद्यथा—

'प्रविरलविलोलजलदः कुटजार्जुननीपसुरभिवनवातः।
अयमायातः कालो हन्त हताः पथिकगेहिन्यः ॥ १५१ ॥'

अत्र वर्षर्तोः कारणभूतात् कार्यभूतविरहिणीनां मरणमनुमीयते। तेनैतत्पूर्वं कारणमिहास्तीति पूर्ववदुच्यते ॥

**कार्यभूतविरहिणीनामिति** । पथिकगेहिनीनां दशम्यवस्था ज्ञायमाना वाक्यार्थः । अतः फलोपन्यासदत्तभरमेवेदं काव्यमित्यभिप्रायः । आयातश्चेज्जलदागमस्तदा पूर्वप्रवृत्त इव पथिकनारीविनाशो लक्ष्यत इति निष्ठाप्रत्ययेन द्योत्यते ॥

यत्र कार्यं दृष्ट्वा कारणमनुमीयते तच्छेषवद्यथा—

'सावज्ञमागमिष्यन्नूनं पतितोऽसि पादयोस्तस्याः ।
कथमन्यथा ललाटे यावकरसतिलकपङ्क्तिरियम् ॥ १५२ ॥'

अत्र यावकरसतिलकपङ्क्तेः कार्यभूतायाः कारणभूतं पादपतनमनुमीयते । तेनैतच्छेषः कार्यमिहास्तीति शेषवदुच्यते ॥

**कथमन्यथेति** । नेयमर्थापत्तिः; किंतु तथाभूता नायकस्य ललाटेऽलक्तकबिन्दुविशेषपङ्क्तिः प्रमदापदावपातप्रतिबद्धेति । न चालक्तकबिन्दुपङ्क्तिज्ञानं तथा स्वदते यथा विपक्षचरणावनमनानुमेयस्य ज्ञानं फलभूतम्, तत्किल विपक्षगोचरामीर्ष्यां व्यञ्जयद्विप्रलम्भप्रकर्षं पुष्णाति ॥

यत्र न कार्यं न कारणं केवलमविनाभावमात्रं प्रतीयते तत्सामान्यतो दृष्टं यथा—

'गज्जन्ते खे मेहा फुल्ला णीवा पणच्चिआ मोरा ।
णट्ठो चन्दुज्जोओ वासीरत्तो हला पत्तो ॥ १५३ ॥'

[गर्जन्ति खे मेघाः फुल्ला नीपाः प्रनर्तिता मयूराः ।
नष्टश्चन्द्रोद्योतो वर्षर्तुः सखि प्राप्तः ॥]

अत्र वर्षर्तुरविनाभूतैर्मेघगर्जितादिभिः सामान्येनैवानुमीयत इति सामान्यतो दृष्टमिदम् । तान्येतानि भावसाधनेऽनुमानशब्दे फलपक्षे उदाहरणानि भवन्ति ॥

**गज्जन्त इति** । अत्र समसमये मेघगर्जितादिभिः कालोपाधिभिरनुमानं तेन कार्यकारणभावः । अत्र हि न पृथङ्मेघगर्जितादिज्ञानं तथा चमत्कारमावहति यथा वर्षारात्रिज्ञानप्रतिबद्धम् । स हि ज्ञातः केतककर्णपूरादिविदग्धनेपथ्यपरिग्रहौत्सुक्यं प्रवासिनायकागमनौत्सुक्यं वा जनयतीति फल एव भरः ॥

यदा पुनः करणसाधनोऽनुमानशब्दस्तदानुमीयतेऽनेनेत्यनुमानशब्देन यथोक्तं लिङ्गमुच्यते । यदाह—

'अनुमेयेन संबद्धं प्रसिद्धं च तदन्विते ।
तदभावे च यन्नास्ति तल्लिङ्गमनुमापकम् ॥ १५४ ॥'

**अनुमेयेनेति** । अनुमेयेन पक्षेण तस्यैव साध्यवत्तयानुमेयत्वात् । यदाह—'स एव चोभयात्मायं गम्यो गमक इष्यते । प्रसिद्धेनैकदेशेन गम्यः सिद्धेन बोधकः ॥' इति । तदन्विते साध्यान्विते । प्रसिद्धं प्रकर्षेण सिद्धम् । व्याप्यतयाधिगतम् । तदभावे साध्याभावे । यतोऽनुमापकं ततो लिङ्गम् ॥

तत्पूर्ववति यथा—

'अइ सहि वक्कुलाविरि च्छुहिहिसि गोत्तस्स मत्थए छारम् ।
अच्चंतदत्तदिट्ठेण सामि वलिएण हसिएण ॥ १५५ ॥'

[अयि सखि वक्रालापैश्छादयिष्यसि गोत्रस मस्तके भस्म ।
अत्यन्तदत्तदृष्टेन सामि वलितेन हसितेन ॥]

अत्रैवंप्रकारया वक्रोक्त्या एवंविधेन हसितेनोपलक्षितत्वमग्रतो गोत्रं दूषयसीति कारणतो यत्र कार्यानुमानं तदिदं सामग्रीपक्षे पूर्ववदित्युच्यते ॥

**पूर्ववतीति** । पूर्वं कारणमनुमापकं यस्यास्ति तत्पूर्ववल्लिङ्गं तस्मिन् । ननु मापयितव्ये लिङ्गज्ञानविषयतया पूर्वं कारणमाश्रयतीति पूर्ववत् । सोऽयमर्थः सप्तम्या द्योतितः । **कारणत इति** । यथाहि वक्र आलापो मुग्धाङ्गनाप्रकृत्यौचित्यागतं हसितं ध्वननशक्त्या विषयतया कान्तिमर्पयति न तथा शब्दाभिलपितं चारित्र्यखण्डनमिति साहित्यमुद्राविदामतिप्रकाशमेव ॥

शेषवति यथा—

'दीसइ ण चूअमउलं अत्ता ण अ वाइ मलअगन्धवहो ।
एत्तं वसन्तमासो सहि जं उक्कण्ठिअं चेअम् ॥ १५६ ॥'

[दृश्यते न चूतमुकुलमद्य न च वाति मलयगन्धवहः ।
एति वसन्तमासः सखि यदुत्कण्ठितं चेतः ॥]

अत्रोत्कण्ठालक्षणेन कार्येण वसन्तः कारणभूतोऽनुमीयत इति सामग्रीपक्षे इदं शेषवदित्युच्यते ॥

**एतमिति**। चूतमञ्जरीमलयपवनयोरग्रे समुत्कण्ठितमत्र चमत्कारास्पदम् । तथाहि । यथा प्रियस्य संनिधास्यतः संभावना लोकोत्तराभिमानप्रतिष्ठिता भवति न तथा संनिधानमिति सहृदयसाक्षिकोऽयमर्थः । एवं सामान्यतो दृष्टोदाहरणे बोध्यम् ॥

सामान्यतो दृष्टं यथा—

'आविर्भवन्ती प्रथमं प्रियायाः सोच्छ्वासमन्तःकरणं करोति ।
निदाघसंतप्तशिखण्डियूनो वृष्टेः पुरस्तादचिरप्रभेव ॥१५७॥'

सेयं विद्युदिव दृष्टिं कामन्दक्यपि प्रथमत उपलभ्यमाना अविनाभावेन मालत्यागमनं गमयतीति सामग्रीपक्षे सामान्यतो दृष्टमेतत् ॥

**यदाप्तवचनं तद्धि ज्ञेयमागमसंज्ञया ।**
**उत्तमं मध्यमं चाथ जघन्यं चेति तत्रिधा ॥ ४९ ॥**

**यदाप्तवचनमिति**। आप्तो यथार्थशब्दवक्ता । उत्तमं श्रुतिमूलम् । अत एव तस्यावश्यानुष्ठेयत्वाभिधानम् । मध्यममनादिलोकव्यवहारमूलं तदेव नावश्यानुष्ठेयमित्यनेन प्रकाशयिष्यते । उभयविधाबहिःफलसंवादि जघन्यम् ॥

तत्रोत्तमं द्विधा । विधिरूपं निषेधरूपं च । तयोर्विधिरूपं यथा—

'दमं दानं दयां शिक्षेः स्तनयित्नुर्वदत्यसौ ।
ददध्व इति वाग्दैवी दयध्वं दत्त दाम्यत ॥ १५८ ॥'

अत्र चैषा दैवी वागनुवदति, यत् स्तनयित्नुर्ददध्व इति दयध्वं दत्त दाम्यतेति 'तदेतत्त्रयं शिक्षेत दमं दानं दयाम्' इति श्रुतेस्तदेतद्विधिरूपमाप्तवचनम् ॥

**ददध्व इति** । जलदध्वनितनानानादस्यानुकरणं तत्रितयव्याजेन जलधरो वदति । दयध्वं दत्त दाम्यतेति दैवी वागतो दमदानदयाः कर्तव्या इति विधिः पर्यवस्यति । बुद्धीन्द्रियनियमो दमः । दानदये प्रसिद्धे । मूलभूतां श्रुतिं दर्शयति—**अत्र चैषेति** ।

निषेधरूपं यथा—

'निवार्यतामालि किमप्ययं बटुः पुनर्विवक्षुः स्फुरितोत्तराधरः ।
न केवलं यो महतोऽपभाषते शृणोति तस्मादपि यः स पापभाक् १५९'

अत्रोत्तरार्धोक्तनिषेधानुवादवर्धितव्युत्पत्तेर्वयस्याया योऽयमपवदमानबटुनिवारणोपदेशस्तस्य महान्तो नापभाषितव्या इति वाक्यार्थे तात्पर्यादयं निषेधरूप आगमः । तदेतदुभयमप्यवश्यानुष्ठेयत्वादुत्तमम् ॥

ननु 'न केवलं यो महतोऽपभाषते' इत्यादि वर्तमानापदेशात्कथं विधित्वमत आह—**अत्रोत्तरार्धेति** । अपभाषणस्य निन्दार्थवादेन निषेधविधिः कल्प्यते, तेन महान्तो नापभाषितव्या इति वचनव्यक्तिरुन्नीयत इति ॥

मध्यमं द्विधा । निर्दिष्टवक्तृकमनिर्दिष्टवक्तृकं च । तयोराद्यं यथा—

'कल्याणी बत गाथेयं लौकिकी प्रतिभाति मा ।
एति जीवन्तमानन्दो नरं वर्षशतादपि ॥ १६० ॥'

अत्र जीवन्नरः पश्यति भद्रमित्ययमेवार्थो निर्दिष्टवक्तृकस्तदेतत्सर्ववाक्यानां विधिनिषेधयोः पर्यवसानात् प्राणेषणायां यतितव्यमिति विधिरूपमाप्तवचनम् ॥

**अत्र जीवन्नर इति** । एषा चिरंतनी लोकगाथा । तन्मूलत्वं 'एति जीवन्तम्–' इत्यादेरागमस्य । अत्रापि प्राग्वदेव स्तुत्यर्थवादेन जीवनाय यतितव्यमिति विधिः कल्प्यते । तदिदमुक्तं सर्ववाक्यानामिति ॥

द्वितीयं यथा—

'अक्षे वसति पिशाचः पिचुमन्दे दिनपतिर्वटे यक्षः ।
विश्राम्यति पद्मे श्रीस्तिष्ठति गौरी मधूकतरौ ॥ १६१ ॥'

तदिदमनिर्दिष्टवक्तृकमनादिलोकप्रसिद्धिपरम्परायातमैतिह्यम् । अत्रापि सर्ववाक्यानां विधिनिषेधयोः पर्यवसानात्—'तस्मादक्षं न सेवेत, पिचुमन्दं न कृन्तेत, वटं न छिन्द्यात्, पद्मं न मूर्ध्नि बिभृयात्, मधूकं

न पदा स्पृशेत्' इत्यध्याहारो भवति । सोऽयं निषेधरूप आगमः । उभयमप्येतन्नावश्यानुष्ठेयमिति मध्यमम् ॥

**तदिदमनिर्दिष्टवक्तृकमिति** । एतेनैतिह्यमागम एवान्तर्भूतमिति दर्शितम्; अज्ञातवक्तृकस्यागमस्यैव तथा प्रसिद्धेरिति । **अत्रापीति** । पिशाचवासादिभिरनुवादैः पूर्ववद्विधयः कल्प्यन्ते ॥

जघन्यं द्विधा । काम्यं निषिद्धं च । तयोः काम्यं यथा—

'मुण्डइआचुण्णकसाअसाहिअं पाणणावणविईणम् ।
तेलं पलिअत्थणीणंवि कुणेइ पीणुण्णए थणए ॥ १६२ ॥'

[मुण्डितिकाचूर्णकषायसाधितं पाननावनवितीर्णम् ।
तैलं पतितस्तनीनामपि करोति पीनोन्नतौ स्तनौ ॥]

तदेतत्पूर्ववद्विधिरूपं काम्यमाप्तवचनम् ॥

**मुण्डइआ इति** । मुण्डितिका अलम्बुसा । कषायः क्वाथो जलम् । नावनं नस्यम् । **काम्यमिति** । पीनोन्नतस्तनकामनावतीभिरेव क्रियमाणत्वात् ॥

निषिद्धं यथा—

'वयं बाल्ये बालांस्तरुणिमनि यूनः परिणता-
वपीच्छामो वृद्धान्परिणयविधौ नः स्थितिरियम् ।
त्वयारब्धं जन्म क्षपयितुमकाण्डेन विधिना
न नो गोत्रे पुत्रि क्वचिदपि सतीलाञ्छनमभूत् ॥१६३॥'

तदेतन्निषेधरूपं निषिद्धमेवाप्तवचनम् । उभयमपि चैतन्मूलकारिभिः संसृज्येतेत्यादिदोषान्नानुष्ठेयमिति जघन्यम् ॥

त्वयारब्धमित्यादौ गणिकया सतीचारित्र्यवत्या न भवितव्यमिति स्फुटो निषेधविधिर्जघन्यत्वं व्याचष्टे—**उभयमपि चैतन्मूलकारिभिरिति** ॥

**सदृशात्सदृशज्ञानमुपमानं द्विधेह तत् ।**
**स्यादेकमनुभूतेऽर्थेऽननुभूते द्वितीयकम् ॥ ५० ॥**

१. 'मनेनैकपतिना' इति पाठः पुस्तकान्तरे.

**सदृशादिति**। इह मीमांसका वर्णयन्ति। उपमानमपि सादृश्यमसंनिकृष्टेऽर्थे बुद्धिमुत्पादयति। अस्यार्थः। सादृश्यं सादृश्यज्ञानम्। ज्ञायमानसादृश्यमिति यावत्। तदेवोपमानं कुत इत्यत आह। असंनिकृष्टे सदृशान्तररूपेऽर्थे यतो बुद्धिमुत्पादयति तेन भवति सदृशात्सदृशप्रतिपत्तिरुपमानम्। न सदृशादननुभूतज्ञानमुत्पद्यते; अतिप्रसङ्गात्। तेनेदमनुभूतविषयमेव। नैयायिकानां तु अननुभूतविषयमेवोपमानम्। तथाहि—नागरिकेण यदा आरण्यकः पृष्ट आचष्टे 'यथा गौस्तथा गवयः' इति। तदा खलु नागरिकस्यातिदेशवाक्यार्थमनुस्मरतो गां च सादृश्यप्रतियोगिनं जानतो यद्गवये गोसादृश्यज्ञानं तदुपमानं प्रमाणं; तेनायं गवयशब्दवाच्य इति संज्ञासंज्ञिसंबन्धज्ञानं पश्चादुपजन्यते, सोपमितिरिति। तत्र सदृशाद्बुद्धौ विपरिवर्तमानाद्यत्सदृशज्ञानं सदृशे गवये संज्ञासंज्ञिसंबन्धज्ञानमित्यर्थः। उदाहरणादिकं निगदव्याख्यातम्॥

तयोरनुभूतविषयं यथा—

'सर्वप्राणप्रवणमघवन्मुक्तमाहत्य वक्ष-
स्तत्संघट्टाद्विघटितबृहत्खण्डमुच्चण्डरोचिः।
एवं वेगात्कुलिशमकरोद्व्योम विद्युत्सहस्रै-
र्भर्तुर्वज्रज्वलनकपिशास्ते च रोषाट्टहासाः॥ १६४॥'

अत्र रामकराकृष्यमाणभग्नधूर्जटिधनुर्विमुक्तज्योतिश्छटासहस्रसंकुलमाकाशं पश्यतो रावणदूतस्येयं स्वयं दृष्टेषु प्रभुवक्षःस्थलविदीर्णवज्रशकलविस्फूर्जथुषु तद्रोषाट्टहासेषु वियद्व्यापिषु तत्सादृश्यबुद्धिस्तदिदमनुभूतविषयं नामोपमानं मीमांसका वर्णयन्ति॥

अननुभूतविषयं यथा—

'तां रोहिणीं विजानीहि ज्योतिषामत्र मण्डले।
समूहस्तारकाणां यः शकटाकारमाश्रितः॥ १६५॥'

अत्र यथाविधः शकटाकारस्तथाविधो रोहिणीतारकासमूहाकार इत्येवमवधारितासोपदेशस्य तदाकारतारकाचक्रदर्शनादिदं तद्रोहिणीश-

कटमिति येयं संज्ञासंज्ञिसंबन्धप्रतिपत्तिस्तदिदमननुभूतविषयमुपमानं नैयायिकाः समुन्नयन्ति ॥

तदाभूतार्थविज्ञानजनकत्वेन हेतुना ।
नास्मादभिनयालेख्यमुद्राबिम्बादयः पृथक् ॥ ५१ ॥

तेष्वभिनयो यथा—

'वइविवरणिग्गअदलो एरण्डो साहइ व तरुणाणम् ।
एत्थ घरे हलिअवहू एद्दहमेत्तत्थणी वसइ ॥ १६६ ॥'

[वृतिविवरनिर्गतदल एरण्डः साधयतीव तरुणेभ्यः ।
अत्र गृहे हलिकवधूरेतावन्मात्रस्तनी वसति ॥]

अत्र पयोधरातिपरिणाहसूचकोत्तानप्रसारिताङ्गुलिहस्ताभिनयसंनिभैरण्डदलसंनिवेशनात्स्वयमुद्दिष्टेऽपि हालिकवधूस्तनपरिणाहे पूर्वानुभूतैवंविधस्तनपरिणाहसंबन्धप्रतिपत्तिस्तदिदमनुभूतार्थविषयमुपमानमेवाभिनय इत्युत्प्रेक्ष्यते ॥

**वइविवरेति** । ग्रामतरुणैरनन्यबद्धान्तःकरणैर्हालिकवधूस्तनाभोगो मुसलोल्लासनादौ वारंवारमनुभूतः स तुल्याकारवृतविवरप्रसूनैरण्डदलदर्शनादेव बुद्धिमारोहतीति सा बुद्धिर्मांसमांसकोपमितिमध्यमध्यास्ते । कथमेरण्डदलसंनिवेशस्याभिनेयता । अनुकारो ह्यभिनयः । न चासौ तत्र संभवति । अत आह—**हस्ताभिनयसंनिभेति** । उत्तानप्रसारिताङ्गुलिहस्तसंनिवेशेन वस्त्वन्तरपरिणाहप्रतिबिम्बनं लोकप्रसिद्धं तदिहाप्येरण्डदलविस्तारदर्शनात्तदन्तरितमेव जायत इत्यर्थः ॥

आलेख्यं यथा—

'तवालेख्ये कौतूहलतरलतन्वीविरचिते
विधायैका चक्रं रचयति सुपर्णासुतमधः ।
अथ स्विद्यत्पाणिस्त्वरितमपमृज्यैतदपरा
करे पौष्पं चापं मकरमुपरिष्टाच्च लिखति ॥ १६७ ॥'

अत्र यदानुभूतनायकसंदर्शनायास्तद्रूपालेख्यप्रदर्शनादेवंभूतः स इति विज्ञानमुत्पद्यते, गोपनार्थं च तथाभूतयोरेव देवकुलादिदृष्टविष्णुकामयोः प्रतीतिर्भवति, तदेतदनुभूतार्थविषयं भवति । यदा पुनरननुभूतनायकादिसंदर्शनाया इत्थमाप्तोपदेशः । एवंभूतः सुपर्णकेतुश्चक्रपाणिर्विष्णुर्भवति, एवंभूतो मकरध्वजः पुष्पचापः कामो भवति, यादृशाविमौ तादृशश्च ते मनोरथभूमिः; केवलमस्य गरुत्मदादयो न विद्यन्ते । तदा तदुत्तरकालमालेख्यगततदाकारदर्शनात् सोऽयं मम प्रेयानिति मद्विधया कयापि लिखितो भविष्यतीति तद्गोपायाम्येनं विष्णुचिह्नाभ्यामिति गरुत्मच्चक्रे अधःप्रदेशहस्तयोः केतुहस्तयोर्निवेशयति । अथापरा प्रतिविधित्सुर्गोपायन्ती प्रकाशयन्ती च प्रत्यासन्नोपमानं मन्मथाकारमाचिख्यासुः करे पौष्पं चापं मकरमुपरिष्टाच्च लिखति । अत्राकृतौ पदार्थे या इमास्तयोर्लोकानां सोऽयमिति विष्णुरिति काम इति च संज्ञासंज्ञिसंबन्धप्रतिपत्तयस्तदिदमनुभूतार्थविषयमुपमानमालेख्यमाख्यायते ॥

**तवालेख्य इति** । तदप्राप्तिकर्शिता चित्रप्रतिमादिना परिनोदनेन कथंचिदात्मानं धारयतीति तन्वीपदेन ध्वन्यते । न च जीवितमात्रार्थिनी सा किंतु त्वदाकृतिदर्शनकुतूहलेनोद्विग्ना सती निगूढमप्यभिप्रायमालेख्यनिर्माणेन व्यनक्तीति कौतूहलतरलपदाभ्यां व्यज्यते । **एकेति** । या राधादिप्रणयपात्रं वशीकृतत्रिभुवनमाजानसुकुमारं देवकीनन्दनमागमेषु बहुधाश्रौषीत् । **अथेति** । सा नियन्त्रणप्रार्थनीयताविरोधिनं देवताभावमनुसंधत्ते, तया त्रैलोक्यातिशायिसौभाग्यप्रकर्षस्य पुष्पेषोश्चिह्नभूतौ चापमकरौ लिखिताविति, अथ स्विद्यत्पाणिस्त्वरितमित्येतैर्व्यज्यते । अत्रोदाहरणे द्विविधमप्युपमानं दर्शयति । तत्र मीमांसकपक्षे तावत्तन्व्यालेख्यमुन्मृदितं दृष्ट्वा काचिदनुभूतपूर्वं नायकं जानाति । सादृश्याविशेषाच्च कृष्णकामावपि प्रत्येति तदा सदृशात्प्रतिपत्तिरुपमानं भवति । नैयायिकपक्षे यदा सामान्यतो नायकागमे उत्पन्नपूर्वानुरागाया विशेषतश्च प्रत्यङ्गलावण्यमजानन्त्या इत्थंभूताकारौ कृष्णकामौ यादृशौ तादृशस्तव प्रेयानित्याप्तोपदेशश्रवणानन्तरं गृहीत-

चित्राकारायास्तत्तच्छब्दाभिधेयताप्रतिपत्तिरुपमानमिति । कथं चित्रे कामादिपदप्रयोग इत्यत आह—**आकृताविति** । रेखोपरेखादिसंनिवेशे चित्रतुरगन्यायेनेति भावः ॥

मुद्रा यथा—

'सचकितमिव विस्मयाकुलाभिः शुचिसिकतास्वतिमानुषाणि ताभिः ।
क्षितिषु ददृशिरे पदानि जिष्णोरुपहितकेतुरथाङ्गलाञ्छनानि १६८'

अत्र चक्रध्वजाङ्कितजिष्णुपादमुद्रादर्शनात्सेयममानुषी पादमुद्रा भवतीति संज्ञासंज्ञिसंबन्धप्रतिपत्तिस्तदिदमननुभूतार्थविषयमुपमानमेव मुद्रेत्युच्यते । यदपि चादृष्टेऽपि जिष्णुपदे मृगीदृशामीदृशः स इत्यनुमानज्ञानं तदप्युपमानार्थनिबन्धनमेव । यदाह—

'अपि चास्त्यनुमानेऽपि सादृश्यं लिङ्गलिङ्गिनोः ।
पदेन यत्र कुब्जेन कुब्जपादोऽनुमीयते ॥ १६९ ॥'

**सचकितेति** । ननु चरणमुद्रया जिष्णुचरणानुमानमत्र प्रतिभाति तत्कथमुपमानेऽन्तर्भाव इत्यत आह—**यदपि चेति** । अत्राविशेषस्य चरणविशेषप्रतिबन्धे सत्यपि सदृशात्सदृशज्ञानमुत्पन्नं [ स्फुटं ] तादृशेन च व्यपदेशो भवतीत्यर्थः । एतदेव दार्वाचार्यसंमत्या द्रढयति—**अपि चेति** ।

प्रतिबिम्बं यथा—

'दर्पणे च परिभोगदर्शिनी पृष्ठतः प्रणयिनो निषेदुषः ।
वीक्ष्य बिम्बमनुबिम्बमात्मनः कानि कान्यपि चकार लज्जया १७०'

अत्र यदा तावदेवं संबन्धग्रहः कीदृशं स्वं मुखं यादृशमादर्शे प्रतिबिम्बं तदालोकनाददृष्टेऽपि स्वमुखे येयमीदृशं मे मुखमिति प्रतिपत्तिस्तदिदमनुभूतार्थविषयम् । यदा पुनरित्थमाप्तोपदेशाद्यादृशं वस्तु तादृशमादर्शादौ प्रतिबिम्बं तदापि प्रियप्रतिबिम्बालोकनादिदं तन्मम प्रियप्रतिबिम्बमितीयं संज्ञासंज्ञिसंबन्धप्रतिपत्तिस्तदप्यननुभूतार्थविष-

यम्। यदा तु चित्रादिष्वनुभूतस्वमुखदर्शनायाः प्रतिबिम्बदर्शनादनेन सदृशं मे मुखमिति प्रतिपत्तिर्दृष्टप्रियतमाकारायाश्च प्रतिबिम्बाकारदर्शनादेतदाकारो मम प्रेयानिति प्रतिपत्तिः प्रतिबिम्बसंनिधौ प्रतिबिम्बोदयो दृष्टस्तदिह संनिहितेन तेन भवितव्यमिति यो व्रीडाविकारभूतस्तदानुभूतविषयमेतदुपमानं प्रतिबिम्बमित्याचक्षते॥

**प्रतिबिम्बसंनिधाविति।** प्रसङ्गाद्यदर्थमनुमानं व्याख्यातं तद्दर्शयति—**व्रीडाविकार इति।** अतएव प्रधानमात्रस्योपसंहारः॥

'प्रत्यक्षादिप्रतीतोऽर्थो यस्तथा नोपपद्यते।
अर्थान्तरं च गमयत्यर्थापत्तिं वदन्ति ताम्॥ ५२॥

अर्थापत्तिं लक्षयति—**प्रत्यक्षादीति।** प्रमाणप्रतीतस्यार्थस्यान्यथाकरणानुपपत्तिज्ञानेन प्रसूतं ज्ञानमर्थापत्तिः। अनुपपद्यमानार्थप्रत्यायकं च प्रमाणं प्रत्यक्षादिभेदात् षट्प्रकारम्। ततस्तत्पूर्वार्थापत्तिरपि षोढा संपद्यते, यदर्थान्तरं गमयति तामर्थापत्तिं वदन्तीति। अर्थान्तरगतिरेवार्थापत्तिरिति व्यक्तम्॥

सर्वप्रमाणपूर्वत्वादेकशोऽनेकशश्च सा।
प्रत्यक्षपूर्विकेत्यादिभेदैः षोढा निगद्यते॥ ५३॥

**एकश इति।** एकश एकप्रमाणपूर्वा। अनेकशोऽनेकप्रमाणपूर्वा। कथं तर्हि षोढा। अत उक्तम्—**प्रत्यक्षपूर्विकेत्यादिभेदैरिति।** व्याख्यातमेतत्॥

तास्वेकशः प्रत्यक्षपूर्विका यथा—

'निर्णेतुं शक्यमस्तीति मध्यं तव नितम्बिनि।
अन्यथानुपपत्त्यैव पयोधरभरस्थितेः॥ १७१॥'

अत्र स्तनभरनितम्बयोर्मध्यं नोपलभ्यते, स्तनभरावस्थानं च दृश्यते, तत्र येयं पयोधरभरस्थितिः सान्यथानुपपद्यमाना धारकं मध्यमनुपलभ्यमानं बोधयति। सेयं प्रत्यक्षपूर्विकार्थापत्तिरेकश एवेह विवक्षिता। इयमपि ह्येवं बहुशो भवति यत्तदर्थापत्तिलब्धं मध्यं तदपि

धारणशक्तिमन्तरेण तत्कर्मासमर्थमिति तस्यापि शक्तिः कल्प्यते । सेयमर्थापत्तिपूर्विकार्थापत्तिः। यश्चायमर्थापत्तिविकल्पस्य मध्यस्योपलम्भाभावः सोऽपि प्रकारान्तरेणासंभवन् कान्तिकार्श्ययोरुत्कर्षं ब्रूते । सा चेयमभावपूर्विकानुपपत्तिर्भवति । न चैतदिह शाब्दमपि तु वाक्यार्थसामर्थ्याद्गम्यते ॥

**अत्र स्तनभरेति**। स्तनभरस्थितिः प्रत्यक्षगृहीता सा चाधारमन्तरेणानुपपद्यमाना मध्यं कल्पयति । सा च कल्पनार्थापत्तिः । **अनुपलभ्यमानमिति** । अन्यथा प्रत्यक्षगृहीतेऽर्थे किमर्थापत्त्या । अत्रैवोदाहरणेऽनेकशो व्याख्यातुं शक्यत इत्याह—**इयमपीति** । शक्तिर्मीमांसकनये नित्यातीन्द्रिया, अभावोऽभावेनैव गृह्यत इति मध्यानुपलम्भोऽभावप्रमाणपूर्वकः । **कान्तीति** । अद्भुतप्रभावतिरस्कृतं हि नयनमासन्नमपि न मध्यग्रहणसमर्थमिति भावः ॥

प्रत्यक्षादिपूर्विका अनेकशः यथा—

'एतदालोक्य लोलाक्षि रूपमप्रतिमं तव ।
कल्पयामः कलातत्त्वगुरुतामादिवेधसः ॥ १७२ ॥

तत्रेदं रूपमप्रतिमं तवेति प्रत्यक्षपूर्वता अभावपूर्वता च व्यक्तमेव प्रतीयते । तेनेयमनेकशः । अत्रापि येयं रूपस्याप्रतिमतान्यथानुपपद्यमाना कलातत्त्वगुरुविनिर्मितत्वमात्मनोऽवस्थापयति सोर्वश्यहल्यादिरूपोपमानज्ञानपूर्विका, या तत्कर्तुरर्थाप्रत्तिकल्पिता कलातत्त्वगुरुता सापि तथाविधशक्तिकल्पनापूर्विकेत्युपमानपूर्विकार्थापत्तिपूर्विका चेयमर्थापत्तिः। सापि तत्कर्तुर्वेधसः कलातत्त्वगुरुता तथाभूतशक्त्याधारता वा, साप्यनुमानत आगमतो वाऽस्य कल्प्यत इत्यनुमानपूर्विका चेयमर्थापत्तिः । न चैतच्चतुष्टयमिहापि शाब्दमपि तु वाक्यार्थसामर्थ्याद्गम्यते ॥

**अप्रतिममिति**। प्रतिमाशून्यं रूपं विशिष्टमेव तत्र विशेषणांशेऽभावस्य व्यापारः, विशेष्यांशे प्रत्यक्षस्य । पूर्ववदिहापि व्याख्यानमाह—**अत्रापीति** । प्रतिमाभावज्ञानं प्रतिमाज्ञानपूर्वकम्, प्रतिमा च सादृश्यं, तच्च सहशब्दद्वयदर्शनवेद्यमित्यस्ति पूर्वमुपमानम् ॥

एकशोऽनुमानपूर्विका यथा—

'कपोलपुलकेनास्याः सूचितो मदनज्वरः ।
मनो निरन्तरासक्तं सख्यः कथयति प्रिये ॥ १७३ ॥'

अत्र योऽयं कपोलपुलकानुमीयमानो मनोभवज्वरः स मनसः प्रिये निरन्तरासक्तिमन्तरेणानुपपन्न इत्यनुमानपूर्विकेयमर्थापत्तिः ॥

अनेकश उपमानादिपूर्विका यथा—

'त्वदास्येन्दू समौ दृष्ट्वा तदिदं कल्पयामहे ।
अन्योन्यगामिलावण्यमनयोरेव केवलम् ॥ १७४ ॥'

अत्र त्वदास्येन्दू समौ दृष्ट्वेत्युपमानपूर्वकता अर्थापत्तेः प्रत्यक्षपूर्वता च शब्दत एव प्रतीयते । या च मिथः सादृश्यानुपपत्तिलभ्या लावण्यान्योन्यगामिता सापि तथाविधं विधातारमन्तरेण न संगच्छत इत्यादीहापि पूर्ववद्वाक्यार्थसामर्थ्यतोऽवगन्तव्यम् ॥

एकशोऽभावपूर्वा यथा—

'एतदास्यं विना हास्यं निवेदयति सुभ्रुवः ।
प्रियापराधदण्डानां मनो भाजनतां गतम् ॥ १७५ ॥'

अत्र सुभ्रुव इत्यनेन विलासवत्याः समस्तप्रशस्तलक्षणयोगो लक्ष्यते । तथाविधायाश्च वक्त्रविलासहासस्याभावोऽनुपपद्यमानः शोकव्यतिरिक्तमात्मकारणं कल्पयतीत्यभावपूर्विकेयमर्थापत्तिः ॥

हास्यभावस्यान्यथाप्युपपत्तेः कथमर्थापत्तिरित्यत आह—**अत्र सुभ्रुव इति** ॥

अनेकशोऽर्थापत्त्यादिपूर्विका यथा—

'दृष्ट्वा विभ्रमिणीमेतां विद्मो लीलागुरुं स्मरम् ।
स्मरं च मृगशावाक्ष्या मनस्यस्याः कृतास्पदम् ॥ १७६ ॥'

अत्र विभ्रमिणीमिति प्रशंसायां मत्वर्थीयस्तेन विभ्रमाणामुत्कर्षो

लक्ष्यते । ते चान्योपदेशादसंभवन्तो मन्मथमुपाध्यायं बोधयन्ति । तस्याग्रतः पार्श्वतो वानुपलभ्यमानस्य तन्मनस्यवस्थानं लक्ष्यते । सेयमाद्या प्रत्यक्षपूर्विका द्वितीया चार्थापत्तिपूर्विकार्थापत्तिर्भवति । इयमेव च मनोभूर्मनसि कामिनीनां संभवतीत्याप्तोपदेशादागमपूर्विकापि भवति ॥

इत्थमेवान्यथोपपत्तिमाशङ्क्याग्रे व्याचष्टे—**अत्र विभ्रमिणीमिति** । मत्वर्थीयार्थमाह—**प्रशंसायामिति** ॥

**असत्ता या पदार्थानामभावः सोऽभिधीयते ।**
**प्रागभावादिभेदेन स षड्विध इहेष्यते ॥ ५४ ॥**

अभावं लक्षयति—**असत्तेति** । प्रागसत्त्वमुत्तरासत्त्वमित्यसत्तारूपेणैव प्रागभावादयो व्यवतिष्ठन्ते इतरेतराभावेऽप्यन्यरूपतयान्यस्याभाव इत्यसत्तात्मकत्वम् । प्रागभावादयः पूर्वोदिताश्चत्वारः । अत्यन्ताभावविशेषसामान्याभावाभ्यां सह षडभावाः । तयोर्विशेषमग्रे वक्ष्यामः ॥

तेषु प्रागभावो यथा—

'सग्गं अपारिजाअं कोत्थुहलच्छीविरहिअं महुमहअस्स उरम् ।
सुमरामि महणपुरओ अमुद्धचन्दं च हरअडापब्भारम् ॥१७७॥'

[स्वर्गमपारिजातं कौस्तुभलक्ष्मीविरहितं मधुमथनस्योरः ।
स्मरामि मथनपुरतोऽमुग्धचन्द्रं च हरजटाप्राग्भारम् ॥]

**सग्गं अपारिजाअमिति** । निगदव्याख्यातः प्रागभावः । यथा अभावपूर्विकायामर्थापत्तौ करणं भेदानुमानमुक्तं तथात्रापि बोद्धव्यम् । पारिजातप्रागभावस्य प्रमेयरूपता व्यक्तैव । अभावोऽभावेनैव प्रतीयत इति । दर्शने तत्करणतया शब्दानुपात्तोऽपि योग्यप्रमाणभावोऽवगम्यते । एवमुत्तरेष्वपि स्वयमूहनीयम् ॥

प्रध्वंसाभावो यथा—

'धृतिरस्तमिता गतिश्च्युता विगतं गेयमृतुर्निरुत्सवः ।
गतमाभरणप्रयोजनं परिशून्यं शयनीयमद्य मे ॥ १७८ ॥'

इतरेतराभावो यथा—

'कर्णोत्पलं न चक्षुस्ते न चक्षुः श्रवणोत्पलम् ।
इति जानन्नपि जनो मन्यते नेत्रदीर्घताम् ॥ १७९ ॥'

अत्यन्ताभावो यथा—

'जं जस्स होइ सारं तं सो देइत्ति किमत्थ अच्छेरम् ।
अणहोत्तं वि हु दिण्णं तइ दोहग्गं सवत्तीणम् ॥ १८० ॥'

[यद्यस्य भवति सारं तं स ददाति किमत्राश्चर्यम् ।
अभवदपि खलु दत्तं तया दौर्भाग्यं सपत्नीनाम् ॥]

अन्ये पुनरन्यथा अत्यन्ताभावमाचक्षते । यथा—

'प्रसीद सद्यो मुञ्चेमं चण्डि मानं मनोगतम् ।
दृष्टमात्रेऽपि ते तत्र रोषः खकुसुमायते ॥ १८१ ॥'

स्थानान्तरप्रमितस्य स्थानान्तरे त्रैकालिकोऽभावविशेषोऽत्यन्ताभाव इति दर्शनमाश्रित्य चतुष्टयमध्यपाती तावदत्यन्ताभाव उदाहृतः । इदानीं पञ्चमाभावोचिततविशेषमत्यन्ताभावं दर्शयति—**अन्ये पुनरिति**। अन्ये सौगतादयः। अत्यन्तासत्प्रतियोगिकोऽभावोऽत्यन्ताभावः । यथा खपुष्पस्याभाव इत्युदाहरणं स्फुटम् ॥

सामर्थ्याभावो यथा—

'मानुषीषु कथं वा स्यादस्य रूपस्य संभवः ।
न प्रभातरलं ज्योतिरुदेति वसुधातले ॥ १८२ ॥'

त एते षडपि निगदैरेव व्याख्याताः ॥

सामर्थ्याभावो योग्यताभावः । अनेनैव रूपेण स रसतामासादयन्नुपात्तः ॥

अभावाभावोऽप्यभाव एव । तत्र प्रागभावप्रध्वंसो यथा—

'उद्यानसहकाराणामनुद्भिन्ना न मञ्जरी ।
देयः पथिकनारीणां सतिलः सलिलाञ्जलिः ॥ १८३ ॥'

**अभाव एवेति**। अभावव्यवहारपात्रमेव तथाभूतस्यैव लक्षणमित्युक्तं पुरस्तात् ॥

प्रध्वंसप्रागभावो यथा—

'न मर्त्यलोकस्त्रिदिवात्महीयते म्रियेत नाग्रे यदि वल्लभो जनः।

प्रध्वंसध्वंसो यथा—

निवृत्तमेव त्रिदिवप्रयोजनं मृतः स चेज्जीवित एव जीवति ॥१८४॥'

वल्लभजनमरणं प्रध्वंसः स नञा निषिध्यते स तु निषेधः प्रागसत्त्वरूप एव। मृतः स चेदिति मरणोत्तरमभावो भवत्प्रध्वंसो भवति स चासंभवन्नपिशब्देन संभाव्यमानः कान्तिकारणं भवतीत्यलंकारकक्षामारोहति ॥

प्रध्वंसप्रागभावप्रध्वंसो यथा—

'नामिलितमस्ति किंचित्काञ्चीदेशस्य सर्वथा नाथ।
प्रसरतु करस्तवायं प्रकृतिकृशे मध्यदेशेऽपि ॥ १८५ ॥'

**प्रध्वंसप्रागभावप्रध्वंस इति।** मरणेन प्रध्वंसनं तस्याभावः समस्तेन न जातस्याप्यभावो भिन्नेन प्रतिपादितः ॥

प्रध्वंसस्य प्रध्वंसाभावो यथा—

'एषा प्रवासं कथमप्यतीत्य याता पुनः संशयमन्यथैव।
को नाम पाकाभिमुखस्य जन्तोर्द्वाराणि दैवान्यपिधातुमीष्टे ॥१८६॥'

**प्रध्वंसस्य प्रध्वंसाभाव इति।** कथमपीत्यनेन प्रवासे दशम्यवस्था कटाक्षिता तस्यात्ययः प्रध्वंसप्रध्वंसः। पुनः संगममित्यनेन तस्यापि प्रध्वंसः। सुबोधमन्यत् ॥

इतरेतराभावाभावो यथा—

'शासनेऽपि गुरुणि व्यवस्थितं कृत्यवस्तुनि नियुङ्क्ष्व कामतः।
स्वप्रयोजनधनं धनंजयादन्य एष इति मां च मावगाः ॥१८७॥'

अत्यन्ताभावस्य सामर्थ्याभावस्य च प्रध्वंसाभावो यथा—

'अनाप्तपुण्योपचयैर्दुरापा फलस्य निर्धूतरजाः सवित्री।
तुल्या भवद्दर्शनसंपदेषा वृष्टेर्दिवो वीतबलाहकायाः ॥ १८८ ॥'

एते नातिदुर्बोधा इति न व्याकृताः ॥

उक्तार्थालंकाराणां संख्यामाह—

**अर्थालंकृतयोऽप्येताश्चतुर्विंशतिसंख्यया ।**
**कथिता काव्यविज्ञानां चित्तप्रह्लाददहेतवे ॥ ५५ ॥**

**अर्थालंकृतय इति** । स्पष्टम् ॥

**इति श्रीमहाराजाधिराजश्रीमद्भोजराजविरचिते सरस्वतीकण्ठाभरणनाम्न्यलंकारशास्त्रेऽर्थालंकारस्तृतीयः परिच्छेदः ।**

श्रीरामसिंहदेवाज्ञामादाय रचितो मया ।
दर्पणाख्यः सदा तेन तुष्यतां श्रीसरस्वती ॥
रत्नेश्वरो नाम कवीश्वरोऽसौ विराजते काव्यसुधाभिषेकैः ।
दुस्तर्कवज्राहतदुर्विदग्धां वसुंधरां पल्लवयन्नजस्रम् ॥
अद्य स्फुरतु वाग्देव्याः कण्ठाभरणकौतुकम् ।
मयि ब्रह्ममनोवृत्तौ कुर्वाणे रत्नदर्पणम् ॥

इति श्रीमन्महाराजश्रीरामसिंहेन महामहोपाध्यायमनीषिरत्नेश्वरेण विरचय्य प्रकाशिते दर्पणाख्ये सरस्वतीकण्ठाभरणविवरणेऽर्थालंकारस्तृतीयः परिच्छेदः समाप्तः ॥

---

## चतुर्थः परिच्छेदः ।

इदानीमुभयालंकारविवेचनाय परिच्छेदमारभते—

**शब्देभ्यो यः पदार्थेभ्य उपमादिः प्रतीयते ।**
**विशिष्टोऽर्थः कवीनां ता उभयालंक्रियाः प्रियाः[1] ॥१॥**
**उपमा रूपकं साम्यं संशयोक्तिरपह्नुतिः ।**
**समाध्युक्तिः समासोक्तिरुत्प्रेक्षाप्रस्तुतस्तुतिः ॥ २ ॥**
**सतुल्ययोगितोल्लेखः ससहोक्तिः समुच्चयः ।**
**साक्षेपोऽर्थान्तरन्यासः सविशेषा परिष्कृतिः ॥ ३ ॥**

---

१. 'मताः' इति ख पुस्तकस्थः पाठः.

**दीपकक्रमपर्यायातिशयश्लेषभाविकाः ।**
**संसृष्टिरिति निर्दिष्टास्ताश्चतुर्विंशतिर्बुधैः ॥ ४ ॥**

**शब्देभ्य इति** । यासूभयालंक्रियासु इवादिभ्यः शब्देभ्यो विशिष्ट उपमादिरूपोऽर्थो ज्ञायते ता उभयालंक्रियाः स्युः । कीदृश्यः । कवीनां प्रियाः प्रीतिविषयाः, उपमादीनां कविसर्वस्वायमानत्वात् । शब्दश्चार्थश्चेत्युभयम् । सह तुल्ययोगितया वर्तते इति सतुल्ययोगिता । एवमितरेष्वपि । परिष्कृतिः परिकरः । भाविकैरिति सहार्थे तृतीया ॥

अथोपमालंकारनिरूपणम् ।

**प्रसिद्धेरनुरोधेन यः परस्परमर्थयोः ।**
**भूयोऽवयवसामान्ययोगः सेहोपमा मता ॥ ५ ॥**

उपमालक्षणमाह—**प्रसिद्धेरिति** । अर्थयोरुपमानोपमेययोर्मिथो यो भूयसां प्रचुराणामवयवसामान्यानामेकदेशसाधर्म्याणां योगः संबन्धः, सा इह ग्रन्थे [ शास्त्रे ] उपमा मता । तर्हि मुखं कमलमिवेतिवत् कुमुदमिवेत्यपि स्यादत आह—**प्रसिद्धेरिति** । प्रसिद्धेर्लोकप्रसिद्धेरनुरोधेन पुरस्कारेण । तथा च कुमुदमुखयोरुपमा न लोकप्रसिद्धेति दोषः ॥

**एकाभिधीयमाने स्यात्तुल्ये धर्मे पदार्थयोः ।**
**प्रतीयमानेऽप्यपरा द्विविधापि च सा त्रिधा ॥ ६ ॥**
**पदवाक्यप्रपञ्चाख्यैर्विशेषैरुपपद्यते ।**
**पृथगष्टविधत्वेन ताश्चतुर्विंशतिः पुनः ॥ ७ ॥**

इहाभिधीयमानार्थप्रतीयमानार्थविषयत्वेनोपमा द्विधा । सापि पदवाक्यप्रपञ्चभेदात्त्रिधा । तासां त्रिधाभूतानां प्रत्येकमष्टविधत्वेन चतुर्विंशतिप्रकारोपमेत्याह—**पदेत्यादि** ॥

पदोपमाया अष्टविधत्वमाह—

**समासात्प्रत्ययाच्चैव द्विविधा स्यात्पदोपमा ।**
**या समासोपमा तत्र चतुर्धा साभिपद्यते ॥ ८ ॥**

इवार्थान्तर्गतेरेका सामान्यान्तर्गतेः परा ।
अन्तर्भूतोभयार्थान्या सान्या सर्वसमासभाक् ॥ ९ ॥

**समासादिति** । समासोपमा इवार्थेत्यादिना चतुर्विधा ॥

तास्वन्तर्भूतेवार्था यथा—

'मुखमिन्दुसुन्दरं ते बिसकिसलयकोमले भुजालतिके ।
जघनस्थली च सुन्दरि तव शैलशिलाविशालेयम् ॥ १ ॥'

अत्र इन्दुरिव सुन्दरमिन्दुसुन्दरमितीवार्थः 'उपमानानि सामान्यवचनैः २।१।५५।' इति समासेनैवोक्तः । एवं बिसकिसलये इव कोमले शैलशिलेव विशालेति । सेयमन्तर्गतेवार्था नाम समासोपमासु पदोपमाभक्तिः ॥

**मुखमित्यादि** । हे सुन्दरि, तव मुखं चन्द्रवत्सुन्दरम्, तव भुजालतिके बिसकिसलयकोमले मृणालपल्लववत्कोमले, तव जघनस्थली शैलपाषाणवद्दीर्घा चेति पूर्वापेक्षया, वाक्यसमाप्तौ वा । इवार्थस्तुल्यता । भक्तिर्विभागः । 'भक्तिर्विभागे सेवायाम्' इति मेदिनीकारः ॥

अन्तर्भूतसामान्या यथा—

'चन्दसरिसं मुहं से अमअसरिच्छो अ मुहरसो तिस्सा ।
सकअग्गहरहसुज्जल चुम्बणअं कस्स सरिसं से ॥ २ ॥'

[चन्द्रसदृशं मुखमस्या अमृतसदृक्षश्च मुखरसस्तस्याः ।
सकचग्रहरभसोज्वलचुम्बनकं कस्य सदृशं तस्याः ॥]

अत्र चन्द्रेण सदृशं चन्द्रसदृशं मुखम्, अमृतेन सदृक्षोऽमृतसदृक्षो मुखरस इति समासे सुन्दरमधुरादिसामान्यशब्दप्रयोगो न श्रूयते प्रतीयते च, सदृशादेर्द्योतकादिति सामान्यधर्मस्य सौन्दर्यमाधुर्यादेरुपमान-

१. गाथासप्तशत्यां तु 'सरिसो अमअस्स' इति पाठः. २. 'सदृशोऽमृतस्य' इति छाया च समुपलभ्यते.

प्रसिद्धस्योपमेये समासेनैव प्रतिपादितत्वादियमन्तर्भूतसामान्या नाम समासोपमासु पदोपमाभक्तिः ॥

**चन्द्र इति**। 'चन्द्रसदृशं मुखमस्या अमृतसदृक्षश्च मुखरसस्तस्याः । सकचग्रहरभसोज्ज्वलचुम्बनं कस्य सदृशं तस्याः ॥' कश्चिन्मनोविनोदार्थं वयस्याय कान्ताप्रकर्षं कथयति—**चन्द्रेति**। कचग्रहे केशपाशग्रहणे यो रभस आवेशस्तेन सहितमुज्ज्वलं मनोज्ञं चुम्बनम् । इहान्तर्भूतं समासेन बोधितं सामान्यसाधर्म्यं सौकुमार्यादिकमित्यन्तर्भूतसामान्या । न श्रूयते चेन्नास्त्येवेत्यत आह—**प्रतीयत इति**। **द्योतकादितीति**। सादृश्यस्य सप्रतियोगिकतया तत्प्रत्यायकत्वमेव द्योतकत्वमित्यर्थः । **उपमानेति**। उपमीयते सादृश्यमानीयतेऽनेनोत्कृष्टगुणेनान्यदित्युपमानमित्यर्थः । **उपमेय इति**। उपमीयते न्यूनगुणं यत्तदुपमेयमित्यर्थः ॥

अन्तर्भूतोभयार्था यथा—

'कमलकरा रम्भोरू कुवलअणअणा मिअङ्कवअणा सा ।
कहं णु णवचम्पअङ्गी मुणालबाहू पिआ तवइ ॥ २ ॥'

[कमलकरा रम्भोरूः कुवलयनयना मृगाङ्कवदना सा ।
कथं नु नवचम्पकाङ्गी मृणालबाहुः प्रिया तपति ॥]

अत्र कमलमिव ताम्रौ, रम्भे इव पीवरौ, कुवलयमिव श्यामे, मृगाङ्क इव प्रेक्षणीयं, नवचम्पकमिव गौरम्, मृणालमिव कोमलौ करौ, ऊरू, नयने, वदनम्, अङ्गम्, बाहू यस्याः सा तथोक्तेत्यन्यपदार्थेन समासेनैव द्योतकसामान्ययोरुक्तत्वादियमन्तर्भूतेव सामान्या नाम समासोपमासु पदोपमाभक्तिः ॥

**कमलेत्यादि**। 'कमलकरा रम्भोरूः कुवलयनयना मृगाङ्कवदना सा । कथं नु नवचम्पकाङ्गी मृणालबाहुः प्रिया दहति ॥' इति । ईदृशी कान्ता कथं नु (न) दहति तापयति किंतु तापयत्येव । रम्भे कदल्याविवोरू यस्याः सा । नवचम्पकं चम्पककलिका । इह कमलमिव ताम्रौ करौ यस्याः सेत्यादाविवशब्दो द्योतकः सामान्यं ताम्रत्वादिकं तयोश्च समासेनैवोक्ततयान्तर्भूतोभयार्थेयम् ॥

---

१. 'दहति' इति टीकासंमतः पाठः.

सर्वसमासा यथा—

'शरदिन्दुसुन्दरमुखी कुवलयदलदीर्घलोचना सा मे ।
दहति मनः कथमनिशं रम्भागर्भाभिरामोरूः ॥ ४ ॥'

अत्रोपमानोपमेयधर्माणामिन्दुसुन्दरादिपदैरिवार्थस्य समासेनैवाभिधानम्, सर्वं समासेऽस्यामिति सर्वसमासोपमानामेयं समासोपमासु पदोपमाभक्तिः ॥

**शरदित्यादि** । ईदृशी सा स्त्री मम मनः कथमनिशं दहति । कीदृशी । शरच्चन्द्ररम्यमुखी नीलनलिनपत्रदीर्घनेत्रा कदलीमध्यसुन्दरोरुश्च । इहोपमानमिन्दुः, उपमेयं मुखम्, तुल्यधर्मः सुन्दरत्वम् । एवमन्यत्रापि । शरदिन्दुरिव सुन्दरं मुखं यस्याः सा इतीवार्थस्यापि समासाभिधेयता । सर्वः समासो यस्यामित्यादिविग्रहे विवक्षितार्थालाभ इत्यत आह—**सर्वमिति** ॥

प्रत्ययोपमापि पदोपमाभेद एव न त्वधिकेत्याह—

**या प्रत्ययोपमेत्युक्ता काव्यविद्भिः पदोपमा ।
चतुर्धा भिद्यते सापि प्रत्ययार्थप्रभेदतः ॥ १० ॥**

**येति** । पदप्रत्ययरनुबोधनेऽन्योन्यापेक्षिततयोपमायामपि तथेति न भिन्नता ॥

**प्रत्ययो ह्युपमेये स्यादुपमानेऽपि कश्चन ।
तत्सामान्ये भवेत्कश्चिदिवार्थे कश्चिदिष्यते ॥ ११ ॥
तेषां वशात्तदुपमा भवेत्तद्व्यपदेशभाक् ।
उदाहरणमेवास्या रूपव्यक्त्यै निदर्श्यते ॥ १२ ॥**

तत्र प्रत्ययस्योपमेयस्यार्थे यथा—

'हंसो ध्वाङ्क्षविरावी स्यादुष्ट्रक्रोशी च कोकिलः ।
खरनादी मयूरोऽपि त्वं चेद्वदसि वाग्मिनि ॥ ५ ॥'

अत्र 'कर्तर्युपमाने ३।२।७९' इत्यनेन यदोपमाने उपपदे ध्वाङ्क्ष इव विरौतीति सामानाधिकरण्येन कर्तर्येव प्रत्ययस्तदोपमेयस्यार्थे भ-

वति । एवमुष्ट्रक्रोशीखरनादीत्येतयोरपि द्रष्टव्यम् । सेयमुपमेयार्थप्रत्ययानाम प्रत्ययोपमासु पदोपमाभक्तिः ॥

**प्रत्यय इति** । प्रत्ययार्थानां भेदादित्यर्थः । अस्फुटत्वेनाह—**उदाहरणमिति** । रूपव्यक्त्यै स्वरूपज्ञानाय । **हंस इत्यादि** । हे वाग्मिनि, प्रशस्तं वचनं यस्याः । यदि त्वं वदसि तदा हंसो ध्वाङ्क्षविरावी काक इव विरौति, कोकिल उष्ट्रक्रोशी उष्ट्र इव क्रुश्यति शब्दायते, मयूरः खरनादी गर्दभ इव नदति । 'ध्वाङ्क्षात्मघोषपरभृद्बलिभुग्वायसा अपि ।' इत्यमरः । 'रासभो गर्दभः खरः' इति च । इह ध्वाङ्क्ष इव विरौतीत्यादौ 'कर्तर्युपमाने ३।२।७९' इति णिनिप्रत्ययः उपमान उपपदे कर्तरि विहित उपमेयस्यार्थे भवति सामानाधिकरण्यानुरोधात् ॥

प्रत्ययस्योपमानार्थे यथा—

'पूर्णेन्दुकल्पवदना मृणालीदेश्यदोर्लता ।
चक्रदेशीयजघना सा स्वर्गेऽपि न दृश्यते ॥ ६ ॥'

अत्र पूर्णेन्दुरिव पूर्णेन्दुरित्यादिकयोपचारवृत्त्या यद्यपि पूर्णेन्दुप्रभृतय उपमानशब्दा अप्युपमेयेषु वदनादिषु वर्तन्ते, तेभ्यश्च यद्यपि स्वार्थ एव स्वार्थिकाः कल्पबादयो भवन्ति, तथापि ते शब्दशक्तिस्वाभाव्याद्गुणभूतमुपमानार्थमात्रं ब्रुवते यथा शुक्लादिभ्यस्तरबादयः । तथा ह्ययं च शुक्लोऽयमनयोः शुक्लतर इत्युक्ते शौक्ल्यस्यैव प्रकर्षो गम्यते न शौक्ल्यवतः । सेयमुपमानार्थप्रत्ययानाम प्रत्ययोपमासु पदोपमाभक्तिः ॥

**पूर्णेत्यादि** । सा स्वप्नेऽपि न दृश्यते । कीदृशी । पूर्णेन्दोरीषदसमाप्तं वदनं यस्याः सा । मृणाल्या ईषदसमाप्ता दोर्लता यस्याः सा । चक्रादीषदसमाप्तं जघनं यस्याः सा । इह कल्पेत्यादावीषदसमाप्तौ 'ईषदसमाप्तौ कल्पब्देश्यदेशीयरः ५।३। ६७' इति कल्पबादयः । इह पूर्णेन्द्वादय उपचारेणोपमेयवृत्तयस्तत्समभिव्याहारकल्पबादिना स्वार्थिकप्रत्ययेन चोपमानार्थातिशय एवाभिधीयत इति प्रत्ययस्योपमानार्थता । इदमेवाह—**शब्देति** । **गुणभूतमिति** । अतिशयस्य प्रत्ययार्थत्वेन तन्निरूपकत्वमेव गुणत्वमित्यर्थः ॥

सामान्यार्थप्रत्ययेन यथा—

'सूर्यीयति सुधारश्मिर्मन्मथोऽतिमृतायते ।
मृतस्य कान्ताविरहे स्वर्गोऽपि नरकीयति ॥ ७ ॥'

अत्रोपमानादाचारादिभिः सूर्यादिभ्यः क्यजादय आचारलक्षणक्रियाविशेष उत्पद्यमाना उपमानोपमेययोः सामान्य एवोत्पद्यन्त इति सेयं सामान्यार्थप्रत्ययानाम प्रत्ययोपमासु पदोपमाभक्तिः ॥

इवार्थप्रत्ययेन यथा—

'एक एव हि भूतात्मा भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥ ८ ॥'

अत्र 'तेन तुल्यं क्रिया चेद्वतिः ५।१।११५' इत्यनेन चन्द्रशब्दाच्चन्द्रेण तुल्यं दृश्यत इतीवार्थ एव प्रत्ययो न तु तुल्यक्रियार्थः, अन्यथा दृश्यत इति इवार्थ इव तुल्यक्रियाप्रयोगोऽपि न स्यात् । तदप्रयोगेऽपि च गौरिव गवय इत्यादौ वतिः प्रसज्येत । सेयमिवार्थप्रत्ययानाम प्रत्ययोपमासु पदोपमाभक्तिः ॥

**सूर्यीयतीत्यादि** । चन्द्रः सूर्यीयति सूर्य इवाचरति कामोऽतिमृतायतेऽतिमृतवद्भवति । प्रियावियोगे मृतस्य पुनः स्वर्गोऽपि नरकीयति नरक इवाचरति । सूर्यीयतीत्यत्र 'उपमानादाचारे ३।१।१०' इति क्यच् । अतिमृतायत इत्यत्राचारार्थे 'कर्तुः क्यङ् सलोपश्च ३।१।११' इति क्यङ् । नरकीयति इत्यत्र 'अधिकरणाच्च २६६४ सू. वा.' इति क्यच् । इहाचार आचरणक्रिया साचोपमानोपमेयसाधारणीति सामान्यप्रत्यया । **एक इत्यादि** । एक एव भूतात्मा परमात्मा प्रतिदेहमवस्थितः सन् एकधा बहुधा चैकानेकप्रकारेण जलचन्द्रवद्दृश्यते । इह जलचन्द्रवद्दृश्यत इत्यत्रैवार्थे सादृश्ये वतिर्न तु तुल्यः क्रियते तदा दृश्यत इति पदेन वतिना च समर्थतया पौनरुक्त्यं स्यात् । न भवतु तुल्यक्रियाप्रयोगः, ततः किमनिष्टमत आह—**तदिति** । गौरिव गवय इत्यादौ क्रियाया अप्रयोगात्तुल्यक्रियाप्रयोगाभाव इति भावः ॥

१–२. प्रकृते सूर्यनरकयोः कर्माधिकरणत्वभावेन चिन्त्यमेतत् । पद्ये क्यङ्प्रयोगस्तु सर्वत्र न्याय्यः.

वाक्योपमाया अष्टविधत्वमाह—

**वाक्योपमा तु या तत्र द्वैविध्यं सापि गच्छति ।**
**एका पदार्थयोः साम्ये परा वाक्यार्थयोर्मिथः ॥ १३ ॥**
**आद्या पूर्णा च लुप्ता च लुप्तवर्णा तथैव च ।**
**पूर्णलुप्तेति चाख्याता कविमुख्यैश्चतुर्विधा ॥ १४ ॥**
**पूर्णा सामान्यधर्मस्य प्रयोगे द्योतकस्य च ।**
**उपमानस्य च भवेदुपमेयस्य चैव हि ॥ १५ ॥**

**वाक्येति** । तत्रोपमायां मिथोऽन्योन्ये साम्य इति यावत् । 'मिथोऽन्योन्ये रहोर्थे च मिथोऽन्योन्यसमुच्चये ।' इति मेदिनीकारः । आद्या पदार्थोपमा पूर्णा सामान्यधर्मादिसाकल्यवती । प्रयोग इति सर्वत्रान्वीयते ॥

यथा—

'कमलमिव चारु वदनं मृणालमिव कोमलं भुजायुगलम् ।
अलिमालेव सुनीला तथैव मदिरेक्षणे कबरी ॥ ९ ॥'

अत्र कमलमृणालालिमालादीनामुपमानद्योतकतुल्यधर्मोपमेयवाचकानां चतुर्णामपि पदानां पृथक् पृथक् प्रयोगे पदार्थयोः सादृश्यस्याभिधीयमानत्वादियं पूर्णानाम पदार्थोपमासु वाक्योपमाभक्तिः ॥

**लोपे सामान्यधर्मस्य द्योतकस्य च योपमा ।**
**प्रतीयमानसादृश्ये द्वयोर्लुप्तेति तां विदुः ॥ १६ ॥**

**कमलमित्यादि** । हे मदिरेक्षणे रक्तनेत्रे, तव वदनं पद्ममिव चारु । बाहुद्वयं बिसमिव मृदु । कबरी केशवेशो भ्रमरपङ्क्तिरिव नीलोऽस्ति । मदिरावद्रक्तमीक्षणं नेत्रं यस्याः सा । 'कबरी केशवेशोऽथ' इत्यमरः । इह कमलमुपमानम्, इवपदं द्योतकम्, चारुपदं तुल्यधर्मोपस्थापकम्, वदनमुपमेयमिति पूर्णता, पदार्थयोः सादृश्यं वाक्यार्थः, सामान्यधर्मादीनां विरहे लोपे लुप्ता तर्हि सर्वलोपे उपमैव न स्यादत आह—**प्रतीयमान इति** । तथात्वेऽपि प्रसिद्धैव कान्त्यादितुल्यधर्मप्रतीतिरिति भावः ॥

यथा—

'न पद्मं मुखमेवेदं न भृङ्गौ चक्षुषी इमे।
न केसराणि कान्ताया इमास्ता दन्तपङ्क्तयः॥ १०॥'

अत्र कान्तामुखादावुपमेये पद्मादिविपर्ययज्ञानप्रत्याख्यानेनेवादीनामभावेऽपि कान्त्यादिलुप्तधर्मप्रतीतेर्लुप्तानामेयं पदार्थोपमासु वाक्योपमाभक्तिः॥

## लोपे सामान्यधर्मस्य लुप्तपूर्णेति गद्यते।

नेत्यादि। इदं न पद्मं किंतु कान्ताया मुखमेव। न भ्रमरौ किंतु इमे नेत्रे। न केसराणि किंतु इमास्ताः प्रसिद्धा दन्तपङ्क्तय एव। चक्षुषी इमे 'ईदूदेद्द्विवचनं प्रगृह्यम् १।१।११' इति प्रगृह्यत्वम्। पद्ममिदं कान्तास्यमिति मिथ्याज्ञानं तस्य प्रत्याख्यानं निषेधो न पद्ममिति। एवंचेवाद्यभावेऽपि कान्त्यादेः प्रसिद्ध्यैव प्रतीतेरियं लुप्ता॥

यथा—

'राजीवमिव ते वक्रं नेत्रे नीलोत्पले इव।
रम्भास्तम्भाविवोरू च करिकुम्भाविव स्तनौ॥ ११॥'

अत्र सामान्यधर्मे लुप्ते प्रतीयमानसादृश्यत्वेन पदार्थयोरुपमानोपमेयभावस्य परिपूर्णत्वे लुप्तपूर्णानामेयं पदार्थोपमासु वाक्योपमाभक्तिः॥

**राजीवमित्यादि**। हे प्रिये, तव मुखं पद्ममिव, नेत्रे नीलनलिने इव, ऊरू कदलीस्तम्भाविव, स्तनौ हस्तिकुम्भाविव स्तः। उत्पले इवेति 'ईदूदेद् १।१।११' इति प्रगृह्यसंज्ञा। इह सामान्यधर्मस्य कान्त्यादेर्लोपः, इतरेषां पूर्णतेति लुप्तपूर्णा॥ ११॥

## द्योतकस्य तु लोपे या पूर्णलुप्तेति सा स्मृता॥ १७॥

यथा—

'त्वन्मुखं पुण्डरीकं च फुल्ले सुरभिगन्धिनी।
कोमलापाटलौ तन्वि पल्लवश्चाधरश्च ते॥ १२॥'

अत्र तन्त्रेण सदृशयोरनभिधानात्सादृश्यस्य पुनरुपमानोपमेयभावविवक्षितेन श्लेषतोऽन्यत्वे सतीतरेतरयोगेनोपमानोपमेययोरेकशेषेण च तद्विशेषणयोः समुदायेनाभिधानादिवादिमन्तरेणाप्युपमानादीनां चतुर्णामपि पूर्णत्वे सत्युक्तार्थत्वादिवादिर्लुप्यत इति पूर्णलुप्तानामेयं पदार्थोपमासु वाक्योपमाभक्तिः ॥

त्वदित्यादि । इदं विवृतं सदृशव्यतिरेकस्थले । तन्त्रेण प्राधान्येन । 'तन्त्रं प्रधाने सिद्धान्ते' इति मेदिनीकारः । यद्वा तन्त्रेण एकार्थप्रयोजकेनेह सदृशयोर्मुखपद्मयोः प्रधानाङ्गभावेनाभिधानं तुल्यता च पदार्थः । एवं च मिथोऽन्वयेनोपमानोपमेयत्वाभिधानम् । फुल्ले इति विशेषणद्वयम् । एकशेषेण हेतूपमानोपमेयतुल्यधर्मद्योतकपूर्णता । इवादिलोपस्तूक्तार्थत्वादतः पूर्णलुप्तेयम् । यत्र समकक्षतया द्वयोरभिधानं तत्र श्लेष एवेत्यतिव्याप्तिरत आह—**श्लेषत इति** । वाक्यार्थस्य वाक्यसापेक्षतया तद्भेदता ॥

**या तु वाक्यार्थयोः सापि चतुर्धैकेवशब्दिका ।**
**नैकेवशब्दिकेवादिशून्या वैधर्म्यवत्यपि ॥ १८ ॥**

तास्वेकेवशब्दा यथा—

'पाण्ड्योऽयमंसार्पितलम्बहारः क्लृप्ताङ्गरागो हरिचन्दनेन ।
आभाति बालातपरक्तसानुः सनिर्झरोद्गार इवाद्रिराजः ॥ १३ ॥'

अत्र हिमवत्पाण्ड्ययोर्निर्झरहारयोर्बालातपहरिचन्दनयोश्च परस्परमुपमानोपमेयविवक्षायां विशेषणविशेष्यभावपरिकल्पनेन वाक्यार्थयोर्द्वयोरपि कल्पितत्वादेकेनैवेवशब्देन तयोः परस्परमुपमानोपमेयभावोऽभिहितः इतीयमेकेवशब्दानाम वाक्यार्थोपमासु वाक्योपमाभक्तिः ॥

एक एवशब्दो यस्यां सा ॥ **पाण्ड्य इति** । अयं पाण्ड्यो राजभेदः शोभते । कीदृशः । अंसे स्कन्धेऽर्पितो दत्तो लम्बहारो येन सः । हरिचन्दनेन चन्दनभेदेन कृताङ्गानुलेपनश्च, अभिनवकिरणलोहितशृङ्गः प्रवहन्निर्झरश्च हिमवानिवाभाति । इह द्वयोर्वाक्यार्थयोरुपमानोपमेयभाव एकेनैवेवपदेनोक्त इत्येकेवोपमेयम् ॥

अनेकेवशब्दा यथा—

'दिने दिने सा परिवर्धमाना लब्धोदया चान्द्रमसीव लेखा।

पुपोष लावण्यमयान्विशेषाञ्ज्योत्स्नान्तराणीव कलान्तराणि॥ १४॥'

अत्र क्रियापदस्य वाक्यार्थद्वयैकतापत्तिहेतोः सकर्मकत्वात्कर्तुः कर्मणश्चोपमानात् पृथगिवशब्दप्रयोग इति सेयमभिधीयमानसादृश्या अनेकेवशब्दानाम वाक्यार्थोपमासु वाक्योपमाभक्तिः॥

**दिन इति।** सा गौरी दिने दिने प्रत्यहं परिवर्धमाना सती लावण्यमयान्कान्तिप्रधानान् विशेषानुत्कर्षान् पुपोष पुष्णाति स्म। कीदृशी। लब्धः प्राप्त उदय उपचयो यया सा। यथा चान्द्री लेखा कला प्राप्तोद्गमा प्रत्यहं वर्धमाना च सती कलान्तराणि अन्यान्या कला धत्ते ज्योत्स्नान्तराणि च धत्ते तथेत्यर्थः। लावण्यं ज्योत्स्नास्थानीयम्, विशेषः कलास्थानीयः। यद्वा कलान्तराणि कीदृशानि। ज्योत्स्ना अन्तरा गर्भे येषु तानि। यद्वा ज्योत्स्नाया अन्तरोऽवकाशो येषु तानि। 'लेखा स्याल्लिपिकलयोः' इति विश्वः। चन्द्रमस इयं चान्द्रमसी। 'तस्येदम् ४।३।१२०' इत्यण्। 'लावण्यं चारुता मता' इति शाश्वतः। 'गर्भावकाशभेदेष्वन्तरं वाच्यलिङ्गवत्।' इति मेदिनीकारः। इह पोषणरूपक्रियया वाक्यार्थयोरेकवाक्यता, सा च सकर्मकेति कर्तृकर्मणोः पृथगिवपदप्रयोगादनेकेवोपमेयम्॥

अनिवादिशब्दा यथा—

'दिवो जागर्ति रक्षायै पुलोमारिर्भुवो भवान्।

अपुरास्तेन हन्यन्ते सावलेपा नृपास्त्वया॥ १५॥'

अत्र पुलोमारिवर्णनीययोर्द्यावाभूम्योरसुराणामवलिप्तपार्थिवानां च तुल्यक्रियासमावेशादिवादिमन्तरेणापि वाक्यार्थानां परस्परमुपमानोपमेयभावोऽवगम्यत इतीयमनिवादिशब्दानाम वाक्यार्थोपमासु वाक्योपमाभक्तिः।

**दिव इति।** भवान् भूमे रक्षायै पुलोमारिरिन्द्रो दिवः स्वर्गस्य रक्षायै जागर्ति। तेनेन्द्रेणासुरा हन्यन्ते, त्वया नृपा हन्यन्ते। सावलेपाः सगर्वा इति नृपविशेषणम्। पुलोमनामा दैत्यभेदः स चेन्द्रेण हतस्तत्सुता पुलोमजेन्द्राणी च गृहीतेति पुराणम्। इह तुल्या समैकक्रिया जागरणरूपा हननरूपा च तद्द्वयघटित एवोपमानोपमेयभावः॥

वैधर्म्यवती यथा—

'प्रहितः प्रधनाय माधवानहमाकारयितुं महीभृता ।
न परेषु महौजसश्छलादपकुर्वन्ति मलिम्लुचा इव ॥ १६ ॥'

अत्र सत्युपमाने सत्युपमेये सत्यपि चेवशब्दे महौजसां मलिम्लुचानां च योऽयं छलापकरणं नाम वस्तुधर्मः स उपमान एव नकारेण नियम्यत इति वैधर्म्यवतीनामेयं वाक्यार्थोपमासु वाक्योपमाभक्तिः ॥

प्रहित इत्यादि । अयं विविध उच्यतासदृशोपमविशेषगुणे (?) इहान्यरूपैः साम्येऽपि वाच्यधर्मे उपमान एव निषेधेन नियमित इति वैधर्म्यम् । तद्वतीयमुपमा ।

प्रपञ्चोपमाया अष्टविधत्वमाह—

यत्रोक्तिभङ्ग्या वाक्यार्थे सादृश्यमवगम्यते ।
वाक्यार्थयोर्विस्तरतः सा प्रपञ्चोपमेष्यते ॥ १९ ॥

यत्रेति । वाक्यार्थे वचनभङ्ग्या यत्र वाक्यार्थयोर्विस्तरेण सादृश्यं ज्ञायते सा प्रपञ्चोपमा ॥

तस्या विभागमाह—

सा तु प्रकृतरूपा स्याद्रूपेण विकृता तथा ।
तयोः प्रकृतरूपा सा विज्ञेया च चतुर्विधा ॥ २० ॥
स्यात्समस्तोपमा तद्वदेकदेशोपमा परा ।
मालोपमा तृतीया स्याच्चतुर्थी रसनोपमा ॥ २१ ॥

सेति । प्रकृतरूपं साहजिकं विकृतं रूपमौपाधिकम् ॥

तासु समस्तोपमा यथा—

'अलिवलयैरलकैरिव कुसुमस्तबकैः स्तनैरिव वसन्ते ।
भान्ति लता ललना इव पाणिभिरिव किसलयैरधिकम् ॥ १७ ॥'

अत्र वसन्तलक्ष्मीपरिष्कृतलतानां ललनानां च प्रतीयमानसादृश्यानामुपमानोपमेयभावविवक्षायां येयमलिवलयादिभिरलकादीनां प्रतीयमानसादृश्यानामेव पृथक्पृथगिवशब्दप्रयोगवतीति विस्तरेणावयविनोऽवयवानां चेति सामस्त्येन वाक्यार्थयोरौपम्योक्तिभङ्गिः। सेयं समस्तोपमानाम प्रकृतरूपोपमासु प्रपञ्चोपमाभक्तिः॥

**अलीत्यादि**। लता वसन्ते ललना इव स्त्रिय इवाधिकं शोभन्ते। कैः। अलकैरिव भृङ्गवृन्दैः, पुष्पगुच्छैः कुचैरिव, पल्लवैः पाणिभिरिव। इहावयविनोर्लतास्त्रीरूपयोरवयवानामेकदेशानामलिवलयालकादीनां सामग्र्येणोपमानोपमेयभावात् समस्तोपमेयम्। तेषां च प्रकृतत्वं प्रसिद्धमेव॥

एकदेशोपमा यथा—

'कमलदलैरधरैरिव दशनैरिव केसरैर्विराजन्ते।
अलिवलयैरलकैरिव कमलैर्वदनैरिव नलिन्यः॥ १८॥'

अत्र नलिनीनां विलासिनीनां च परस्परमुपमानोपमेयभावे वक्तव्ये विलासिनीलक्षणमुपमानार्थम्, एवमवयवान्तराणि च यानि स्तनाद्युपमेयानि, तानि परित्यज्य कमलमेवैकं तदवयवैर्दलादिभिः सहाधरादिभिरुपमानैः पृथक्पृथगिवप्रयोगाद्विस्तरेणोपमितम्। तेनेयमेकदेशोपमा नाम प्रकृतरूपोपमासु प्रपञ्चोपमाभक्तिः॥

**कमलेति**। पद्मिन्यः शोभन्ते। कैः। अधरैरिव पद्मपत्रैः, दन्तैरिव किंजल्कैः, अलकैरिव भृङ्गसंघैः, मुखैरिव पद्मैः। इह विस्तरोपमया प्रपञ्चोपमा, हंसस्तनादित्यागात्कमलदलादिना सहाधरादेरेकदेशस्योपमया चैकदेशोपमेयम्॥

मालोपमा यथा—

'सोहव्व लक्खणमुहं वणमालव्व विअडं हरिवइस्स उरम्।
कित्तिव्व पवणतणअं आणव्व बलाइं से विलग्गइ दिट्ठी॥ १९॥'

[शोभेव लक्ष्मणमुखं वनमालेव विकटं हरिपतेरुरः।
कीर्तिरिव पवनतनयमाज्ञेव बलान्यस्य विलगति दृष्टिः॥]

अत्र रामदृष्टेर्लक्ष्मणमुखादिविनिवेशिन्याः शोभाद्युपमानमालया प्रतीयमानसादृश्यया विस्तरेणोपमितेर्मालोपमा नामेयं प्रकृतरूपोपमासु प्रपञ्चोपमाभक्तिः ॥

**सोढेति** । 'शोभेव लक्ष्मणमुखं वनमालेव विकटं हरिपतेरुरः । कीर्तिरिव पवनतनयमाज्ञेव बलान्यस्य विलगति दृष्टिः ॥' अस्य रामस्य दृष्टिर्लक्ष्मणमुखं विलगति संबध्नाति । शोभेव दर्शनानन्तरमेव मुखप्रसादात् । हरिपतेः सुग्रीवस्य विस्तीर्णमुरः सा विलगति वनमालेव पौरुषाध्यवसायनिमित्तम्, समस्तवक्षःस्थलविलोकनाद्धवलश्यामलया दृष्ट्या वनमालेव प्रमाणावसरे प्रभुणा सुग्रीवाय प्रसादीकृतेति भावः । पवनतनयं हनूमन्तं विलगति कीर्तिरिव, तस्य ज्ञातपौरुषस्य विकसितया धवलितगगनया दृष्ट्या निरीक्षणं कृतमिति भावः । बलानि विलगति आज्ञेव, तदनन्तरमेवातिबलानां तेषां गमनोद्योगात् । 'आपादप्रवणां मालां वनमालेति तां विदुः ।' इति शाश्वतः । मुखादेराधारस्यैव कर्मता । यद्वा 'उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।' इति व्युत्पत्त्या विलगतेः सकर्मकता । इह रामदृष्टेः शोभाद्युपमानमालया सूत्रेण ग्रथनमेव, विस्तरेणोपमितेर्मालोपमेयम् । न चेयं बहूपमा; एकस्य धर्मस्य बहुभिरनुपस्थितत्वात् ॥

रसनोपमा यथा—

'चन्द्रायते शुक्लरुचापि हंसो हंसायते चारुगतेन कान्ता ।
कान्तायते स्पर्शसुखेन वारि वारीयते स्वच्छतया विहायः ॥ २० ॥'

अत्र चन्द्रादीनां शौक्ल्यादिभिरभिधीयमानसादृश्यैर्हंसादिभिर्येयं रसनान्यायेन पश्चाद्वलनया विस्तरवती हेतुमती च प्रत्ययोपमापङ्क्तिस्तथेहैकवाक्यताकरणेन शरद्रमणीयतोयवर्णनमिति सेयं रसनोपमा नाम प्रकृतरूपोपमासु प्रपञ्चोपमाभक्तिः ॥

**चन्द्रेति** । अथ हंसः श्वेतदीप्त्या चन्द्रायते चन्द्र इवाचरति । प्रिया मनोज्ञगमनेन हंस इवाचरति । वारि जलं स्पर्शसुखेन कान्तेवाचरति । विहायो गगनं निर्मलतया वारीयते जलमिवाचरति । 'वार्वारि जलम्' इत्यमरः । 'पुंस्याकाशविहायसी' इति च । इह पश्चाद्वलना पूर्वापेक्षतया क्षुद्रघण्टिकाक्रमः प्रपञ्चवत्त्वं रुचेत्यादिहेतुमत्त्वं प्रतीत्युपमाबाहुल्यं च स्फुटमेव । तर्हि प्रकृतरूपता कथं स्यादत्र

आह—**तथेति** । उपमापङ्क्त्या चैकवाक्यताविधानेन शरदृतुवर्णनेन प्रकृतरूपेति भावः । ( तुरीया चतुर्थी च, 'तुरणमत्तावाद्यक्षरलोपश्च' इति ( ? ) छः ॥

**इतीमास्ताश्चतस्रोऽपि रूपेण प्रकृतेन याः ।**
**उपमानां चतस्रोऽन्या विकृतेन प्रचक्ष्महे ॥ २२ ॥**
**विपर्यासोपमा तासु प्रथमाथोभयोपमा ।**
**अथोत्पाद्योपमा नाम तुरीयानन्वयोपमा ॥ २३ ॥**

तासु विपर्यासोपमा यथा—

'यत्त्वन्नेत्रसमानकान्ति सलिले मग्नं तदिन्दीवरं
मेघैरन्तरितः प्रिये तव मुखच्छायानुकारी शशी ।
येऽपि त्वद्गमनानुसारिगतयस्ते राजहंसा गता-
स्त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते ॥ २१ ॥'

अत्र नेत्रादीनामुपमेयत्वमिन्दीवरादीनामुपमानत्वमिति प्रसिद्धौ येयमत्यनुरागान्नेत्रादिष्वाधिक्यबुद्धिर्नात्यनुरागादिन्दीवरादिषु तदनुकारिबुद्धिस्तयेह रामेण विरहिणाभिधीयमानसादृश्यानाममीषां परस्परमुपमानोपमेयभावः प्रसिद्धेर्विपर्यासेन कल्पित इति सेयं विपर्यासोपमा नाम विकृतरूपोपमासु प्रपञ्चोपमाभक्तिः ॥

**यदिति** । हे प्रिये, मम त्वत्सादृश्यहर्षमात्रमपि न दैवेन क्षम्यते । यस्मात्तदिन्दीवरं जले मग्नम् । कीदृशम् । त्वन्नेत्रसमशोभम् । चन्द्रो मेघैरन्तरितश्छन्नः । कीदृशः । त्वन्मुखप्रतिबिम्बसदृशः । तेऽपि राजहंसा गताः । ये त्वद्गतितुल्यगमनाः इह प्रसिद्धिविपर्ययेणोपमितेर्विपर्यासोपमा ॥

उभयोपमा यथा—

'तवाननमिवाम्भोजमम्भोजमिव ते मुखम् ।
निलीनां नलिनीखण्डे कथं नु त्वां लभेमहि ॥ २२ ॥'

अत्राप्यत्यन्तसादृश्यादेकस्मिन्पक्षे प्रसिद्धेर्विपर्यास इति सेयं प्रतीयमानसादृश्योभयोपमा नाम विकृतरूपोपमासु प्रपञ्चोपमाभक्तिः ।

**तवेति** । हे प्रिये, त्वां कथं नु लभेमहि । कीदृशीम् । पद्मिनीकदम्बे निलीनां स्थिताम् । मुखेनापि न लाभ इत्याह—तव मुखमिव पद्मम् पद्ममिव मुखम् । इह प्रथमपक्षे विपर्यासोऽथोभयोपमानोपमेयभावादुभयोपमेयम् ॥

उत्पाद्योपमा यथा—

'उभौ यदि व्योम्नि पृथक्प्रवाहावाकाशगङ्गापयसः पतेताम् ।
तदोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य वक्षः ॥ २३ ॥'

अत्रोपमानार्थमुत्पाद्योपमेयेन प्रतीयमानमभिधीयमानं च सादृश्यमभिहितमिति सेयमुत्पाद्योपमानाम विकृतरूपोपमासु प्रपञ्चोपमाभक्तिः ॥

**उभाविति** । उभावित्यादिविवृतोऽयं श्लेषगुणे । इह यद्येते पतेतामित्युपमानता तस्योत्पाद्यत इतीयमुत्पाद्योपमा । अनेकेषामुपमितेः प्रपञ्चोपमात्वम् ॥

अनन्वयोपमा यथा—

'त्वन्मुखं त्वन्मुखमिव त्वद्दृशौ त्वद्दृशाविव ।
त्वन्मूर्तिरिव मूर्तिस्ते त्वमिव त्वं कृशोदरि ॥ २४ ॥'

अत्र त्वमेवेदृशी नान्या त्वत्सदृशीत्यनन्वये सति उपमानोपमेयभावविवक्षयैकस्यापि वस्तुनो भेदमुपकल्प्य प्रतीयमानसादृश्यमौपम्येनाभिहितमिति सेयमनन्वयोपमानाम विकृतरूपोपमासु प्रपञ्चोपमाभक्तिः ॥

**त्वदित्यादि** । विवृतोऽयं लाटानुप्रासे । इहान्या त्वत्सदृशी नेत्युपमानान्तरसंबन्धाभावोऽनन्वयः । तदुपमितिः कथं तस्या भेदगर्भत्वादत आह—**एकस्यापीति** । तथा चाभेदेऽपि भेदकल्पनाददोषः । औपम्येनोपमायाः, स्वार्थे कः ष्यञ् । इत्युपमालंकारनिरूपणम् ॥

## रूपकालंकारनिरूपणम् ।

रूपकलक्षणमाह—

**यदोपमानशब्दानां गौणवृत्तिव्यपाश्रयात् ।**
**उपमेये भवेद्वृत्तिस्तदा तद्रूपकं विदुः ॥ २४ ॥**

**यदेति** । यदोपमानपदानां पद्मादीनामुपमेयेषु मुखादिषु वृत्तिर्बोधकता भवे-

तदा रूपकम्। कथमन्यस्यान्यबोधकतातिप्रसङ्गात्। तत्राह—**गौणेति**। गौणवृत्तिर्गौणी तदाश्रयणात्। तथा च गौणान्यस्यान्यबोधकता। एवं च यत्रोपमानोपमेयपदाभ्याममेदो गुणादिपुरस्कारेण बोध्यते तत्र रूपकं, यत्र सादृश्यमात्रं तत्रोपमेति तयोर्भेदः॥

विभागमाह—

**शब्दार्थोभयभूयिष्ठभेदात्रेधा तदुच्यते।**
**शब्दभूयिष्ठमेतेषु प्रकृतं विकृतं तथा॥ २५॥**
**अर्थभूयिष्ठमप्याहुः प्राधान्येऽङ्गाङ्गयोर्द्विधा।**
**द्विधैवोभयभूयिष्ठं शुद्धसंकीर्णभेदतः॥ २६॥**

**शब्देति**। प्रथमं यावद्रूपकं त्रिधा—शब्दभूयिष्ठार्थभूयिष्ठतदुभयभूयिष्ठभेदात्। तत्र शब्दभूयिष्ठं प्रकृतविकृतमेदाद्द्विधा, अर्थभूयिष्ठमङ्गिप्रधानाङ्गप्रधानभेदाद्द्विधा, उभयभूयिष्ठमपि शुद्धसंकीर्णभेदाद्द्विधेति विभागः॥

तत्र प्रकृतशब्दभूयिष्ठविभागमाह—

**चतुर्धा प्रकृतं तेषु शब्दभूयिष्ठमुच्यते।**
**समस्तं व्यस्तमुभयं सविशेषणमित्यपि॥ २७॥**

तेषु समस्तं यथा—

'पाणिपद्मानि भूपानां संकोचयितुमीशते।
त्वत्पादनखचन्द्राणामर्चिषः कुन्दनिर्मलाः॥ २५॥'

अत्र 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे २।१।५६' इति से पद्मानीव पद्मानि चन्द्रा इव चन्द्रा इत्यभेदोपचारेणोत्पन्नसात्पाणीनां नखानां च पद्मचन्द्रादिभिरभिधाने सामान्येवादिशब्दाप्रयोगादुपमानार्थस्तिरोभूत इति सोऽयं गौणशब्दव्यपाश्रयः समासहेतुकः समस्तरूपं नाम प्रकृतरूपकेषु शब्दभूयिष्ठरूपकभेदः॥

**चतुर्धेति**। **पाणीति**। त्वत्पादनखचन्द्राणामर्चिषस्तेजांसि भूपानां करकमलानि संकोचयितुं निमीलयितुमीशते समर्था भवन्ति। अर्चिषः कीदृश्यः।

कुन्दपुष्पवदमलः । 'अर्चिर्हेतिः शिखा स्त्रियाम्' इत्यमरः । पाणिः पद्ममिव नखश्चन्द्र इवेत्यत्र 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे २।१।५६' इति समासः । इह सामान्यस्येवादेरप्रयोगेणाभेदोपचारादुपमानार्थस्तिरोभूत इति गौणीपुरस्कारः । तिरोभूतत्वं च परमार्थतः सन्नपि भेदो न भासत इति, तत्तु समासेनैव कृतम्, अत एव शब्दप्राचुर्याच्छब्दभूयिष्ठता ॥

व्यस्तं यथा—

'अङ्गुल्यः पल्लवान्यासन्कुसुमानि नखार्चिषः ।
बाहू लते वसन्तश्रीस्त्वं नः प्रत्यक्षचारिणी ॥ २६ ॥'

अत्रापि पूर्ववत्पल्लवकुसुमलतावसन्तश्रीशब्दानां गुणवृत्त्याश्रयेणाङ्गुलीनखार्चिर्बाहुवर्णनीयनायिकाभिः सह सामानाधिकरण्यात्सामान्येवादिशब्दाप्रयोगाच्च तिरोभूतेऽप्युपमानार्थे समासो न कृत इत्यसमस्तरूपं नाम प्रकृतरूपकेषु शब्दभूयिष्ठरूपकभेदः ॥

**अङ्गुल्य इत्यादि** । हे सुन्दरि, त्वं नोऽस्माकं प्रत्यक्षचारिणी दृष्टिविषया पादविहारिणी वा वसन्तस्य श्रीरसि । अभेदोपचारे बीजमाह—तवाङ्गुल्यः पल्लवान्यासन् । नखदीप्तयः पुष्पाण्यासन् । बाहू लते बाहुद्वयं च लताद्वयम् । 'पल्लवोऽस्त्री किसलयम्' इत्यमरः । उपमानोपमेयभेदमाह—**सामान्येति** । इह समासाभावाद्व्यस्तरूपता ॥

समस्तव्यस्तं यथा—

'स्मितं मुखेन्दौ ज्योत्स्ना ते प्रभाम्बु कुचकुम्भयोः ।
दोर्लतापल्लवे पाणौ पुष्पं सखि नखार्चिषः ॥ २७ ॥'

अत्र मुखेन्दोः स्मितमेव ज्योत्स्ना, कुचकुम्भयोः प्रभैवाम्बु, दोर्लतयोः पल्लवभूते पाणौ नखार्चिष एव पुष्पमिति समस्तानामसमस्तानां च गौणशब्दानामुपमातिरस्कारेण दर्शितत्वादिदं समस्तव्यस्तरूपं नाम प्रकृतरूपकेषु शब्दभूयिष्ठरूपकभेदः ॥

**स्मितमित्यादि** । हे सखि, तव मुखेन्दौ स्मितमीषद्धासो ज्योत्स्नास्ति । कुचकुम्भयोः प्रभा दीप्तिरम्बु जलम् । बाहुलतायाः पल्लवभूते मणौ नखदीप्तयः

पुष्पम्। 'नीरक्षीराम्बुशम्बरम्' इत्यमरः। वादिव्यतिरेकादुपमातिरस्कारः। इह प्रथमं समस्तं ततोऽसमस्तमिति समस्तव्यस्तता॥

सविशेषणं यथा—

'हरिपादः शिरोलग्नजह्नुकन्याजलांशुकः।
जयत्यसुरनिःशङ्कसुरानन्दोत्सवध्वजः॥ २८॥'

अत्र यथोक्तविशेषणविशिष्टो यो हरिपादो यश्च हरिहतासुरेभ्यो निःशङ्कानां सुराणामानन्दोत्सवे ध्वजस्तयोः सविशेषणयोरेव प्रतीयमानसादृश्ययोः परस्परमुपमानोपमेयभाव इति सविशेषणं नाम प्रकृतरूपकेषु शब्दभूयिष्ठरूपकभेदः। तदेतच्चतुष्टयमपि प्रकृतसमासादिशब्दैर्निबद्धमिति प्रकृतमुच्यते॥

हरीत्यादि। शिरसि अग्रं लग्नं बलिवञ्चने त्रिविक्रमदशायां ब्रह्माण्डाग्रौ ब्रह्मणा पाद्यार्थमावर्जितं यज्जह्नुकन्याया गङ्गाया जलं तदेवांशुकं वस्त्रमिव यत्र तादृशो हरेर्वामनरूपस्य पादो बलिविजयादसुरेभ्यो निःशङ्कानां देवानां हर्षोत्सवे ध्वज एव जयति। अत एव जाह्नवीजलमंशुकत्वेन रूपितम्, तेन विना ध्वजानुपपत्तेः 'शिरोऽग्रे मस्तकेऽपि च' इति मेदिनीकारः। इह पादध्वजयोर्विशेषणवतोरेव रूपणात् सविशेषणरूपकता। प्रकृतत्वं प्रस्तुतत्वम्। तच्च समासादिभिरेवेति प्रकृतरूपकता॥

विकृतशब्दभूयिष्ठं विभजते—

**चतुरो विकृतस्यापि प्रभेदान्प्रतिजानते।**
**परम्पराथ रशनामालारूपकरूपकम्॥ २८॥**

**चतुर इति।** विकृतस्यापि चतुरो भेदान् प्रतिजानते स्वीकुर्वन्ति। धीरा इति शेषः॥

तेषु परम्परा यथा—

'ववसाअरइप्पओसो रोसगइन्ददिढसिङ्खलापडिबन्धो।
कह कह वि दासरहिणो जअकेसरिपञ्जरो गओ घणसमओ २९'

[व्यवसायरविप्रदोषो रोषगजेन्द्रदृढशृङ्खलाप्रतिबन्धः।
कथं कथमपि दाशरथेर्जयकेसरिपञ्जरो गतो घनसमयः॥

अत्र दाशरथिसंबन्धिनो व्यवसायस्य रविणा, रोषस्य गजेन्द्रेण, जयस्य केसरिणा सहोपमानोपमेयभावकल्पनया यदेकं रूपणमथैतत्संबन्धितया प्रदोषशृङ्खलाप्रतिबन्धपञ्जराणां द्वितीयं तत्र त्रयाणामपि घनसमयेन तृतीयं तेनेदं रूपकं परम्परानाम विकृतरूपकेषु शब्दभूयिष्ठरूपकभेदः ॥

**ववसाअ इत्यादि** । 'व्यवसायरविप्रदोषो रोषगजेन्द्रदृढशृङ्खलाप्रतिबन्धः । कथं कथमपि दाशरथेर्जयकेसरिपञ्जरो गतो घनसमयः ॥' अत्र दाशरथे रामस्य कथं कथमपि कष्टसृष्ट्या घनसमयो वर्षर्तुरतीतः । कीदृशः । व्यवसायः कार्योद्योगः स एव रविस्तेजोमयत्वात्तस्य प्रदोषोऽस्तगमनकालः । दोष एव गजेन्द्रो दुर्निवारत्वात्तस्य दृढशृङ्खलाप्रतिबन्धः प्रतिबन्धकत्वात् । जय एव केसरी तस्य पञ्जरो गृहभेदो नियामकत्वात् । 'शृङ्खला निगडे त्रिषु' इति मेदिनीकारः । इह रामसंबन्धिसंबन्धिरूपणात्परम्परारूपकम् । संबन्धिसंबन्धित्वादेव विकृतत्वम् ॥

रशना यथा—

'किसलयकरैर्लतानां करकमलैर्मृगदृशां जगज्जयति ।
नलिनीनां कमलमुखैर्मुखेन्दुभिर्योषितां मदनः ॥ ३० ॥'

अत्र किसलयकरैः, करकमलैः, कमलमुखैः, मुखेन्दुभिरिति रशनाक्रमेण शब्दानां संदर्भे उपलभ्यमानस्तदर्थानां मनोभुवो जगद्विजये लतादिसंबन्धात्करणभावमनुमापयतीति रशनानामैतद्विकृतरूपकेषु शब्दभूयिष्ठरूपकभेदः ॥

**किसलयेत्यादि** । मदनः कामो हरिणाक्षीणां हस्तपद्मैर्लतानां किसलयकरैर्जगज्जयति । योषितां मुखचन्द्रैः पद्मिनीनां पद्ममुखैश्च जगज्जयति । इह रशना क्षुद्रघण्टिका तस्याः क्रमः पश्चाद्वलनयैकैकप्रथना शब्दगता प्रतीयत इति रशनारूपकमिदम् ॥

माला यथा—

'स्वामी दुर्नयवारणव्यतिकरे शौर्योपदेशे गुरु-
विस्रम्भे हृदयं नियोगसमये दासो भये चाश्रयः ।

दाता सप्तसमुद्रसीमरशनादामाङ्किताया: क्षितेः
सर्वाकारमहो स्वयंवरसुहृत्को वा न कर्णो मम ॥ ३१ ॥'

अत्र स्वाम्यादीनां मालोपमादिक्रमेण निरूपितत्वान्मालारूपकं नाम विकृतरूपकेषु शब्दभूयिष्ठरूपकभेदः ॥

**स्वामीत्यादि**। को वा न, अपि तु सर्व एव। तदेवाह—दुर्नयस्य वारणे निवारणे व्यतिकर आसङ्गस्तत्र स्वामी प्रभुः। दुर्नयनिवारक इत्यर्थः। शौर्यस्योपदेशे गुरुरुपदेष्टा। विस्रम्भे हृदयं विश्वासपात्रम्। नियोग आज्ञा तत्काले दासः। भये आश्रयश्च। सप्तसमुद्रसीमान एव रशनादाम तच्चिह्निताया भूमेर्दाता। अहो आश्चर्यं सर्वाकारं यथा स्यादेवं स्वयंवरसुहृत् सहजमित्रं च, निरुपधित्वं स्वयंवरशब्दार्थः। हृदयमित्यजहल्लिङ्गतयान्वयः। 'आज्ञा नियोग आदेशः' इत्यमरः। इह विस्तरेण रूपितत्वान्मालारूपकम् ॥

रूपकरूपकं यथा—

'मुखपङ्कजरङ्गेऽस्मिन्भ्रूलता नर्तकी तव।
लीलानाट्यामृतं दृष्टौ सखि यूनां निषिञ्चति ॥ ३२ ॥'

अत्र मुखमेव पङ्कजं तदेव रङ्गः, भ्रूरेव लता सैव नर्तकी, लीलैव नाट्यं तदेवामृतमिति रूपितानामपि रूपणेन समासेन रूपकरूपकं नामायं विकृतरूपकेषु शब्दभूयिष्ठरूपकभेदः। तदेतच्चतुष्टयमपि परम्परादिभिर्विकृतसमासादिशब्दैर्निबद्धमिति विकृतमुच्यते ॥

**मुखेत्यादि**। हे सखि, तव भ्रूलतास्मिन्मुखपद्मरङ्गे नर्तकी यूनां दृष्टौ नेत्रे लीलानाट्यामृतं निषिञ्चति। लीलाविलास एव नाट्यं नृत्यं तदेवामृतम्। इह मुखं पङ्कजेन रूपयित्वा रङ्गत्वेन रूपितम्, एवं भ्रुवौ लतात्वेन रूपयित्वा नर्तकीत्वेन रूपिते। लीलैव नाट्यं तदेवामृतमिति रूपितरूपणाद्रूपकरूपकम् ॥

अर्थभूयिष्ठरूपकेऽङ्गिप्रधानं विभजते—

**समस्तं चासमस्तं च युक्तं चायुक्तमेव च।**
**चतुर्धाङ्गि प्रधानं स्यादर्थभूयिष्ठरूपकम् ॥ २९ ॥**

तेषु समस्तं यथा—

'ताम्राङ्गुलिदलश्रेणिनखदीधितिकेसरम् ।
ध्रियते मूर्ध्नि भूपालैर्भवच्चरणपङ्कजम् ॥ ३३ ॥'

अत्र समस्तोपमायामिव पादाख्यः पङ्कजाख्यश्चावयवी परस्परमुपमानोपमेयभूतः प्रतीयमानाभिधीयमानसादृश्यैरङ्गुलिश्रेणिनखदीधितिभिर्दलश्रेणिकेसरैश्च सह सामस्त्येन रूपितस्तद्योग्यस्थानविन्यासेन चार्थस्य प्राधान्यमभिहितमिति समस्तं नाम रूपकमिदमङ्गिप्रधानरूपकेष्वर्थभूयिष्ठरूपकभेदः । न चैतद्वाच्यम्—'पाणिपद्मानि भूपाना'मित्यादेरुदाहरणादिदं न भिद्यत इति । तत्र हि नखार्चिषां क्रियासमावेशेन प्राधान्यमवगम्यते, न नखचन्द्राणां ततश्च न रूपकम् । पाणिपद्मेत्यस्य तु यद्यपि संकोचक्रियायामस्ति समावेशस्तथापि न तानि वर्णनीयत्वेनोपन्यस्तानि, अपि तु जिगीषुभाववर्णनाङ्गतया । अतः समावेशमात्रभणनान्न तत्र पाणिपद्मानां नापि नखचन्द्राणामर्थप्राधान्यमपि तु शब्दप्राधान्यमेव । इह तु चरणपङ्कजताम्राङ्गुलिदलश्रेण्यादिविशेषणविशिष्टस्य भूपालमौलिविनिवेशनेन प्राधान्यं प्रतीयत इत्युभयमपि निरवद्यम् ॥

**समस्तमिति** । **ताम्रेत्यादि** । भवच्चरणपद्मं नृपैर्मस्तके ध्रियते । कीदृशम् । ताम्राङ्गुलयो दलश्रेणिः पत्रपङ्क्तिर्यत्र तत् । नखदीधितयः केसराणि यत्र तत् । **समस्तेति** । यथा समस्तोपमायामवयविनोः सामस्त्येनोपमा, तथात्राप्यवयविनोरेव प्राधान्येन सामस्त्येन रूपकमित्यर्थः । अङ्गुल्यादौ प्रतीयमानता दलादावभिधीयमानता । तर्हि शब्दभूयिष्ठत्वमेव स्यादत आह—**तद्योग्येति** । शब्दोपस्थापितानामर्थानामिह यथास्थानं विनिवेशादर्थप्राधान्यमित्यर्थभूयिष्ठत्वमुक्तमित्यर्थः । शब्दभूयिष्ठरूपकभेदे समस्तेऽतिव्याप्तिमाशङ्कते—**न चेति** । तत्रापि नानाशब्दोपस्थापितानामर्थानामवयविनोरेव प्राधान्यमतो नानयोर्भेद इत्याशयः । परिहरति—**तत्र हीति** । तत्रार्चिषां प्राधान्यं साक्षात्क्रियान्वयात्, समर्थानामवयविनोरेव प्राधान्यमतोऽनयोर्भेद इत्याशयः । नखचन्द्राणां तदङ्गतयान्वयः ।

तर्ह्यर्चिषामेव रूपकत्वमस्तु, तथापि स दोषस्तदवस्थ एवेत्यत आह—**ताश्चेति**। ता अर्चिषः । पाणिपद्मानीत्यत्र रूपकत्वे दोषतादवस्थ्यादाह—**पाणीति**। जिगीषुभाववर्णनायां मुख्यत्वेनाङ्गतया पाणिपद्माद्यन्वय इति शब्दप्राधान्यमेव। प्रकृते तु चरणादेरवयविनः प्रधानक्रियान्वय इत्यर्थप्राधान्यमिति भेदः ॥

असमस्तं यथा—

'अकस्मादेव ते चण्डि स्फुरिताधरपल्लवम् ।
मुखं मुक्तारुचो धत्ते घर्माम्भःकणमञ्जरीः ॥ ३४ ॥'

अत्राप्येकदेशोपक्रमेणाधरपल्लवस्वेदाम्बुकणमञ्जरीणां सहजाहार्यावयवानामभिधानादुपमानावयविनश्चानभिधानादिदमसमस्तं नाम रूपकमङ्गिप्रधानेष्वर्थभूयिष्ठरूपकभेदः । अत्रापि च स्फुरिताधरपल्लवमिति विशेषणविशिष्टस्य मुख्यवस्तुनः घर्माम्भःकणमञ्जरीधारणक्रियासमावेशः प्राधान्यं स्थापयति ॥

**अकस्मादित्यादि**। हे चण्डि कोपने, तव स्फुरिताधरपल्लवं मुखं कर्तृ, अकस्मादेव कारणं विनैव मौक्तिकच्छाया घर्माम्बुकणमञ्जरीर्धत्ते बिभर्ति। **अत्रापीति**। यथैकदेशोपमायामवयवानां प्राधान्यं तथात्राप्यवयवानामेव प्राधान्यादसमस्तरूपकत्वम्। एवं चावयविनो मुखस्य रूपकाभावादवयवरूपकमिदमिति भावः। सहजावयवताधरे आहार्यावयवतौपचारिक्यवयवता घर्माम्भःकणस्यावयवाश्रयत्वात्। उपमानावयविनो लताख्यस्य । शब्दभूयिष्ठरूपकभेदासमस्तरूपकादस्य भेदमाह—**अत्रापीति**। इहोक्तयुक्त्यार्थप्राधान्यमिति भेदः ॥

युक्तं यथा—

'सितपुष्पोज्ज्वलं लोलनेत्रभृङ्गमिदं मुखम् ।
न कस्य नन्दनं सुभ्रु सुरभिश्वसितानिलम् ॥ ३५ ॥'

अत्र सितपुष्पोज्ज्वलं लोलनेत्रभृङ्गं सुरभिश्वसितानिलं ते मुखं न कस्य नन्दनमिति पुष्पभृङ्गादीनां परस्परं युक्त्युपपत्तेर्युक्तं नामायमङ्गाङ्गिप्रधानरूपकेष्वर्थभूयिष्ठो रूपकभेदः । अत्र यद्यपि नन्दनमिव नन्दन-

मिति गौणवृत्तिव्यपाश्रयः शब्द एव समस्तविशेषणैः परिष्क्रियते तथापि नन्दयतीति नन्दनमिति कृदभिहितक्रियासमावेशे मुखाख्यस्यैव वस्तुनः प्राधान्यमवगम्यते तस्य त्वपह्नियत इत्यर्थप्रधानमेवैतत् ॥

**स्मितेत्यादि**। हे सुभ्रु, तवेदं मुखं कस्य न नन्दनं हर्षजनकमपि तु सर्वस्यैव । नः शिरश्चालने । कीदृशम् । स्मितमेव पुष्पं तेनोज्ज्वलं दीप्तिमत् । लोलनेत्रे एव भृङ्गौ यत्र तत् । सुरभिः श्वासानिलो यत्र तत् । युक्तिर्योगः उपपत्तिश्चोभयमपि विवक्षितमिह । तथा हि पुष्पभ्रमरयोर्युक्तिर्योगः पुष्पैः सह भ्रमराणां मकरन्दपानकृतः संबन्धः । अत एवोपपद्यते पुष्पभ्रमरयोरेकत्रावस्थानम्, न हि पुष्पाणि भ्रमरैर्विना शोभन्त इति युक्तरूपकतेत्याशयवानाह—**परस्परमिति**। नन्दनमिव नन्दनमिति शब्दप्राधान्येऽपि नन्दयतीति नन्दनमिति कृदभिहितो भावो द्रव्यवत्प्रकाशत इति वचनादन्यप्राधान्यमेव विवक्षितमिति शङ्कोत्तराभ्याम् ॥

अयुक्तं यथा—–

'इदमार्द्रस्मितज्योत्स्नं स्निग्धनेत्रोत्पलं मुखम् ।
जगन्नेत्रेन्दुरस्माकं कथं तापाय कल्पते ॥ २६ ॥'

अत्र ज्योत्स्नोत्पलयोरयोगाज्जगन्नेत्रेन्दोश्च मुखस्य संतापकारणमिदमयुक्तं नामाङ्गिप्रधानरूपकभेदेष्वर्थभूयिष्ठरूपकभेदः । अत्रापि पूर्ववन्मुखाख्यवस्तुनो विशेषणैः परिष्करणमिति तस्यैव प्राधान्यमवगम्यते ॥

**इदमित्यादि**। हे कान्ते, तवेदं मुखं जगन्नेत्राणामिन्दुरस्माकं तापाय कथं कल्पते शक्तं भवति । कीदृशम् । आर्द्रस्मितं सरसेषद्धास एव ज्योत्स्ना यत्र तत् । स्निग्धं नेत्रोत्पलं यत्र तत् । स्मितस्यार्द्रत्वेन स्नेहजनितता लक्ष्यते, कोपस्मितस्य सूक्ष्मत्वात् । इह ज्योत्स्नाया उत्पलस्य च सहानवस्थानं तच्च मिथोऽनुपकार्योपकारकभावादित्ययुक्तरूपकता । अर्थप्राधान्यं पूर्वोक्तयुक्त्यात्रापीत्याह—**अत्रापीति** ॥

अर्थभूयिष्ठरूपकेऽङ्गप्रधानं विभजते—–

**भेदानङ्गप्रधानस्य चतुरोऽवयवाश्रयान् ।**
**सहजाहार्यतद्योगतद्वैषम्यैः प्रचक्षते ॥ ३० ॥**

तेषु सहजावयवं यथा—

'पप्फुरिअउट्ठदलअं तक्खणविगलिअरुहिरमहुविच्छड्डम् ।
उक्खडिदअण्ठणालं पडिअं फुडदसणकेसरं मुहकमलम् ॥ ३७ ॥'

[प्रस्फुरितोष्ठदलं तत्क्षणविगलितरुधिरमधुविच्छर्दम् ।
उत्खण्डितकण्ठनालं पतितं स्फुटदशनकेसरं मुखकमलम् ॥]

अत्रौष्ठादीनां दलादीनां च मुखाम्भोजावयवानां स्फुरितविगलितोत्खण्डितस्फुटविशेषणविशिष्टानां परस्परमुपमानोपमेयभावरूपितानां मुखपक्षे कमलपक्षे च सहजत्वं गम्यत इति सहजावयवो नामायमङ्गप्रधानरूपकेष्वर्थभूयिष्ठरूपकभेदः । नैतद्वाच्यम्—ताम्राङ्गुलिदलश्रेणीत्यादेरर्थप्रधानभेदादिदं न भिद्यत इति तत्र हि भूपालमौलिधारणक्रियासमावेशेनावयविनः प्राधान्यं विवक्षितम्, इह तु पतनक्रियायामवयवानामत एव ते स्फुरितादिविशेषणैर्विशिष्यन्ते ॥

**भेदानिति** । तयोः सहजाहार्ययोर्योगस्तद्योगः, तयोर्वैषम्यं विषमावयवता । पप्फुरिअ इति । इह मुखमेव कमलं तत्पतितम् । कीदृशम् । प्रस्फुरितमोष्ठपुटमेव दलं पत्रं यत्र तत् । तत्कालविगलितरुधिरमेव मधुप्रवाहो यत्र तत् । विच्छर्दः प्रवाहः । उत्खण्डितकण्ठ एव नालो यत्र तत् । स्फुटदशना एव केसराणि यत्र तत् । इह मुखस्यौष्ठादीनि पद्मस्य पत्रादीन्यवयवास्ते च सहजा इति तत्प्राधान्यादिदं सहजावयवरूपकम् । न च ताम्राङ्गुलीत्यनेनावयविप्रधानेनास्याभेद इति वाच्यम्, तत्राङ्गिप्राधान्यस्य विवक्षितत्वादिहाङ्गप्राधान्यस्य तत्त्वादित्याह—**न चेति** ॥

आहार्यावयवं यथा—

'तो कुंभअण्णपडिवअणदण्डपडिघट्टिआमरिसघोरविसो ।
गलिअंसुअणिम्मोओ जाओ भीसणणरो दसाणणभुअओ॥ ३८॥'

[ततः कुम्भकर्णप्रतिवचनदण्डपरिघट्टितामर्षघोरविषः ।
गलितांशुकनिर्मोको जातो भीषणनरो दशाननभुजगः ॥]

अत्र कुम्भकर्णप्रतिवचनममर्षोऽशुकमिति दशाननपक्षे दण्डो घोर-

विषं निर्मोक इति भुजगपक्षे येऽवयवास्तेषामाहार्यत्वादिदमाहार्यावयवं नाम रूपकमङ्गप्रधानरूपकेष्वर्थभूयिष्ठरूपकभेदः । अत्रापि कुम्भकर्णसंबन्धपरिघट्टितगलितविशिष्टानामवयवानामेव दशाननभुजगभीषणतरीकरणक्रियायां प्राधान्यमवगम्यते ॥

**तो इत्यादि** । 'ततः कुम्भकर्णप्रतिवचनदण्डपरिघट्टितामर्षघोरविषः । गलितांशुकनिर्मोको जातो भीषणतरो दशाननभुजगः ॥' ततोऽनन्तरं दशानन एव भुजगः सर्पः सोऽतिभयानको जातः । कीदृशः । कुम्भकर्णप्रतिवचनमेव दण्डस्तेन परिघट्टित उत्थापितोऽमर्ष एव घोरविषं यस्य सः । गलितश्च्युतोंऽशुकं वस्त्रमेव निर्मोकः कञ्चुको यस्य सः । 'समौ कञ्चुकनिर्मोकौ' इत्यमरः । इह प्रतिवचनादीनामवयवत्वाभावादाहार्यावयवता, तेषामेव प्राधान्यादाहार्यावयवरूपकमिदम् ॥

उभयावयवं यथा—

'यस्या बीजमहंकृतिर्गुरुतरो मूलं ममेतिग्रहो
　　नित्यत्वस्मृतिरङ्कुरः सुतसुहृद्भृत्यादयः पल्लवाः ।
स्कन्धो दारपरिग्रहः परिभवः पुष्पं फलं दुर्गतिः
　　सा मे त्वच्चरणार्हणापरशुना तृष्णालता लूयताम् ॥२९॥'

अत्र बीजं मूलमङ्कुरः पुष्पं फलमिति लतापक्षे सहजाः, तृष्णापक्षे पुनरहंकृत्यादय आहार्यावयवा इति तदिदं सहजाहार्याणामवयवानां परस्परमुपमानोपमेयभावरूपणेनोभयावयवं नाम रूपकमिदमङ्गप्रधानरूपकेष्वर्थभूयिष्ठरूपकभेदः । अत्रापि चाहंकारममताध्रौव्यस्मरणसुतादिदारपरिग्रहपराभवदुर्गतीनामवयवानामेव बीजादिरूपेण रूपितानां भगवदाराधनकुठारेण तृष्णालता लूयतामिति प्रार्थनक्रियया समावेशेन प्राधान्यमवगम्यते ॥

**यस्या इत्यादि** । सा मम तृष्णैव लता हे कृष्ण, त्वत्पादपूजापरशुना लूयतां छिद्यताम्, त्वच्चरणार्हणैव परशुः कुठारः । यस्यास्तृष्णालताया अहंकृतिरहंकार एव बीजमादिकारणम्, गुरुतरो ममेतिग्रहो ममत्वनिश्चयो मूलम्, नित्यमिदमिति

स्मृतिरङ्कुरः, पुत्रमित्रभृत्यादयः किसलयाः, दाराणां पत्नीनां परिग्रहोऽनुरागः स्कन्धः, परिभवः पराभवः कुसुमम्, दुर्गतिर्नरकः फलम् । सर्वत्र यस्या इत्यन्वयः । 'तरुप्रकाण्डे स्कन्धो ना' इति विश्वः । 'नरको निरयो दुर्गतिः स्त्रियाम्' इत्यमरः । इह बीजादीनां सहजावयवता, अहंकृत्यादीनामाहार्यावयवता, तेषामेव च प्राधान्यं विवक्षितमित्युभयावयवप्रधानमिदम् । ध्रौव्यं नित्यता ॥

विषमावयवं यथा—

'मदरक्तकपोलेन मन्मथस्त्वन्मुखेन्दुना ।
नर्तितभ्रूलतेनालं मर्दितुं भुवनत्रयम् ॥ ४० ॥'

अत्रेन्दुना मुखावयवी रूपितः, भ्रुवौ च तदवयवौ लतावयविभ्याम्, मदरक्तौ तु कपोलौ न केनापीति सर्वतो वैषम्याद्विषमावयवं नाम रूपकमिदमङ्गप्रधानरूपकेष्वर्थभूयिष्ठरूपकभेदः । अत्रापि मदरक्तनर्तितयोः कपोलभ्रुवोरेव मन्मथस्य जगत्त्रितयमर्दनक्रियायां प्राधान्यं साधकतमत्वमवगम्यते ॥

**मदेत्यादि** । हे प्रिये, त्वन्मुखेन्दुना मन्मथो भुवनत्रयं मर्दितुं जेतुमलं समर्थोऽस्ति । कीदृशेन । मदरक्तौ कपोलौ यत्र तेन । नर्तिते भ्रूलते येन तेन । इह मुखमवयवि चन्द्रत्वेन रूपितम्, भ्रुवौ चावयवौ लतात्वेन, गण्डस्तु न केनापीति वैषम्यम्, प्राधान्यं चावयवानामेवेति विषमावयवरूपकता ॥

शब्दार्थभूयिष्ठरूपके शुद्धरूपकं विभजते—

**आधारवन्निराधारं केवलं व्यतिरेकि च ।**
**इति शब्दार्थभूयिष्ठं शुद्धमाहुश्चतुर्विधम् ॥ २१ ॥**

तेष्वाधारवद्यथा—

'सोहइ विसुद्धकिरणो गअणसमुद्दम्मि रअणिवेलालग्गो ।
तारामुत्तावअरो फुडविहडिअमेहसिप्पिसम्पुडविमुक्को ॥४१॥'

[शोभते विशुद्धकिरणो गगनसमुद्रे रजनीवेलालग्नः ।
तारामुक्ताप्रकरः स्फुटविघटितमेघशुक्तिसंपुटविमुक्तः ॥]

अत्र समुद्रत्वेन रूपितं गगनमाधारं परिकल्प्य रजनीमेघतारकौ-

घानां वेलाशुक्तिमुक्ताफलप्रकराणां च प्रतीयमानाभिधीयमानसादृश्यानां शब्दप्राधान्यतोऽर्थप्राधान्यतश्च रूपकं कृतमित्याधारवन्नाम रूपकमिदं शुद्धरूपकेषु शब्दार्थभूयिष्ठरूपकभेदः ॥

**आधारवदिति। सोहइ इत्यादि**। इह गगनमेव समुद्रस्तत्र तारा एव मुक्तास्तासां प्रकरः समूहः शोभते। कीदृशः। विशेषेणातिशयेन शुद्धकिरणः। रजन्येव वेला तीरभूमिस्तत्र लग्नः संबद्धः। स्फुटविघटिता व्यक्तीभूय विदीर्णा मेघा एव शुक्तिसंपुटास्तैर्विमुक्तश्च। इह सादृश्ये रजन्यादीनां प्रतीयमानता वेलादीनामभिधीयमानता, शुद्धरूपकता उपमाद्यसंभेदात्। गगनस्याधारतयेदमाधारवद्रूपकम् ॥

निराधारं यथा—

'वणराइकेसहत्था कुसुमाउहसुरहिसंचरन्तधअवडा ।
ससिअरमुहुत्तमेहा तमपडिहत्था विणेत्ति धूमुप्पीडा ॥४२॥'
[वनराजिकेशहस्ताः कुसुमायुधसुरभिसंचरद्ध्वजपटाः ।
शशिकरमुहूर्तमेघास्तमःप्रतिहस्ता विज्ञायन्ते धूमोत्पीडाः ॥]

अत्र धूमोत्पीडानां वनराजिकेशहस्तत्वेन कुसुमायुधसुरभिसंचरद्ध्वजपटत्वेन शशिकरमुहूर्तमेघत्वेन च तमःप्रतिहस्तत्वेन च रूपितानां निराधाराणामेव शब्दप्राधान्यमर्थप्राधान्यं चावधार्यत इति निराधारं नाम रूपकमिदं शुद्धरूपकेषु शब्दार्थभूयिष्ठरूपकभेदः ॥

**वणेत्यादि**। इह धूमसमूहा एतादृशा विज्ञायन्ते। कीदृशाः। वनराज्या वनपङ्क्तेः केशहस्ताः केशकलापा एव, 'पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे।' इत्यमरः। कुसुमायुधस्य कामस्य सुगन्धि चलद्ध्वजपटा एव चन्द्रकिरणानां मुहूर्तमेघा एव तमसामन्धकाराणां प्रतिहस्ताः प्रतिनिधयः। 'प्रतिहस्तः प्रतिनिधौ' इति विश्वः। इह धूमोत्पीडस्य वनराजिकेशकलापादेराधारत्वानुपपत्तेर्निराधाररूपकमिदम् ॥

केवलं यथा—

'वेल्लितभ्रु गलद्धर्मजलमालोहितेक्षणम् ।
विवृणोति मदावस्थामिदं वदनपङ्कजम् ॥ ४३ ॥'

अत्रावयविन एव केवलस्य वदनं पङ्कजमिवेति रूपणादस्य शब्दप्राधान्यं वेल्लितभ्रुप्रभृतिविशेषणोपादानाच्चार्थप्राधान्यमेव लक्ष्यते तेन केवलं नाम रूपकमिदं शुद्धरूपकेषूभयभूयिष्ठरूपकभेदः ॥

**वेल्लितेति** । तवेदं वदनपङ्कजं कर्तृ मदावस्थां मद्यपानजां दशां विवृणोति प्रकाशयति । कीदृशम् । वेल्लिते नर्तिते भ्रुवौ यत्र यत् । आलोहिते अतिरक्ते ईक्षणे यत्र तत् । इह मुखपद्मरूपस्यावयविनः केवलस्य रूपणात्केवलरूपकमिदम् ॥

व्यतिरेकवद्यथा—

'अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-
रनाविद्धं रत्नं मधु नवमनास्वादितरसम् ।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः ॥ ४४ ॥'

अत्र पुष्पकिसलयरत्नमधुपुण्यफलानामनाघ्रातमित्यादिविशेषणापादितव्यतिरेकाणां प्रतीयमानसादृश्येन शकुन्तलारूपेण रूपणादर्थतः शब्दतश्च प्राधान्यमवधार्यत इति व्यतिरेकवन्नाम रूपकमिदं शुद्धरूपकेषूभयभूयिष्ठरूपकभेदः ॥

**अनाघ्रातमित्यादि** । अनघमनवद्यं तस्या रूपमिह भुवि कं भोक्तारं समुपस्थितं करिष्यति तदहं न जाने । कीदृशम् । अनाघ्रातमगृहीतगन्धं पुष्पमेव । कररुहैर्नखैरलूनमखण्डितं किसलयम् । अनामुक्तमपरिहितम्, अनास्वादितरसमगृहीतास्वादं नूतनं मधु,पुण्यानां चाखण्डं सकलं फलमपि। 'आमुक्तः परिहिते शुभ्रे' इति विश्वः । इह पुष्पादीनामनाघ्रातादिना व्यतिरेकवतां रूपणाद्व्यतिरेकवद्रूपकमिदम् ॥

शब्दार्थभूयिष्ठरूपके संकीर्णरूपकं विभजते—

**अथ संकीर्णभेदानां चतुष्टयमिहोच्यते ।**
**स्यात्सावयवसंकीर्णं तथानवयवाह्वयम् ॥ ३२ ॥**
**तथैवोभयसंकीर्णं श्लेषोपहितमित्यपि ।**
**सैषा रूपकभेदानां विंशतिश्चतुरुत्तरा ॥ ३३ ॥**

---

१. 'अनामुक्तं' इति टीकाकारसंमतः पाठः.

तेषु सावयवसंकीर्णं यथा—

'रइअरकेसरणिवहं सोहइ धवलब्भदलसहस्सपरिगअम् ।
महुमहदंसणजोग्गं पिआमहुप्पत्तिपङ्कअं व णहअलम् ॥ ४५॥'

[रविकरकेसरनिवहं शोभते धवलाभ्रदलसहस्रपरिगतम् ।
मधुमथदंशनयोग्यं पितामहोत्पत्तिपङ्कजमिव नभस्तलम् ॥]

अत्र पितामहोत्पत्तिपङ्कजमिव नभस्तलं शोभत इत्युपमानोपमेयभावेनावयवावयविनोरभेदस्याविवक्षायामुपमैव न रूपकम् । रविकरधवलाभ्रदलसहस्रयोः केसरनिकरदलसहस्रयोश्च प्रतीयमानाभिधीयमानसादृश्ययोश्च सहजाहार्यावयवभूतयोरभेदोपचारेण रूपणमिति सावयवरूपेणोपमायाः संकीर्णत्वादिदं सावयवसंकीर्णं नाम संकीर्णरूपकेषूभयभूयिष्ठरूपकभेदः ॥

**अथेति** । आह्वयो नाम । सर्वमेकीकृत्य गणयति—**सैषेति** । चतुर्विंशतिरित्यर्थः ॥ **रइअरेत्यादि** । इह नभस्तलं शोभते पितामहस्य ब्रह्मण उत्पत्तिपद्ममिव तस्य पद्मयोनित्वात् । कीदृशम् । रविकराः सूर्यकिरणा एव केसरनिकरा यत्र तत् । धवलाभ्राणि श्वेतमेघा एव दलसहस्राणि तैः परिगतमन्वितम् । मधुमथस्य विष्णोर्दर्शनयोग्यम्, शरदि तस्य जागरणादस्य च रम्यत्वात्, पद्मपक्षेऽपि नाभिकमलतया मधुरिपुदर्शनयोग्यता । यद्वा मधुमथस्य भृङ्गस्य दंशनं कवलनं तद्योग्यम् । मधु मथ्नातीति मधुमथः मूलविभुजादित्वात्कः । 'मधुमथो हरिभृङ्गयोः' इति शाश्वतः । अत्र रविकरधवलाभ्रसहस्रयोः सहजाहार्यावयवयोः केसरनिवहत्वेन दलसहस्रत्वेन च रूपणात् पङ्कजनभस्तलयोरवयविनोरुपमानोपमेयत्वाच्च सावयवसंकीर्णरूपकमिदम् ॥

निरवयवसंकीर्णं यथा—

'दीहो दिअहभुअंगो रइबिम्बफणामणिप्पहं विअसन्तो ।
अवरसमुद्दमुवगओ मुञ्चन्तो कंचुअंव घम्मअणिवहम् ॥४६॥'

[दीर्घो दिवसभुजङ्गो रविबिम्बफणामणिप्रभां विकसमानः ।
अपरसमुद्रमुपगतो मुञ्चन्कञ्चुकमिव घर्मनिवहम् ॥]

अत्र दिवसावयविनो भुजङ्गावयविनश्चाभिधीयमानप्रतीयमानदैर्घ्य-

दारुणादिधर्मयोरभेदोपचारेण रूपणमवयवानां चतुर्णां रविबिम्बातपफणामणिनिर्मोकाणां सत्यामप्यभेदोपचारयोग्यतायां द्वयोरिवशब्दप्रयोगेनोपमायां द्वयोस्तुल्यरूपणेऽप्यसामानाधिकरण्यान्नावयवावयविभावो विभाव्यत इति निरवयवस्योपमायां संकीर्णत्वान्निरवयवसंकीर्णं नाम संकीर्णरूपकेषूभयभूयिष्ठरूपकभेदः ॥

**दीहो इत्यादि** । इह दिवस एव भुजङ्गः सर्पोऽपरसमुद्रं पश्चिमसमुद्रं गत इव । कीदृशः । दीर्घो महापरिमाणः । सूर्यबिम्बमेव फणामणिप्रभां विकासयन् आतपसमूहं कञ्चुकमिव त्यजन् । अत्रासामानाधिकरण्येनावयवावयविभावो न ज्ञायते, इवप्रयोगेण चोपमा ज्ञायत इति निरवयवसंकीर्णरूपकमिदम् ॥

उभयसंकीर्णं यथा—

'धुअमेहमहुअराओ घणसमआअड्ढिओणअविमुक्काओ ।
णहपाअवसाहाओ णिअअट्ठाणं व पडिगआओ दिसाओ ४७'

[धुतमेघमधुकरा घनसमयाकृष्टावनतविमुक्ताः ।
नभःपादपशाखा निजकस्थानमिव प्रतिगता दिशः ॥]

अत्र पादपरूपेण रूपितस्य नभसो यदेतद्दिशां शाखारूपेण रूपणं मेघानां च मधुकरप्रकरेण तदुभयमप्यन्यपदार्थषष्ठीसमासयोरभिधीयमानेन सावयवं निरवयवं चेत्युत्प्रेक्षया च संकीर्यमाणमुभयसंकीर्णरूपकव्यपदेशं लभते । सोऽयं संकीर्णरूपकेषूभयभूयिष्ठरूपकभेदः ॥

**धुअ इत्यादि** । इह दिशो निजस्थानं स्वकीयस्थानं प्रतिगता इव । इवपदमुत्प्रेक्षायाम् । कीदृश्यः । धुता मेघा एव मधुकरा भ्रमरा यासु ताः । घनसमयेन वर्षाकालेन घनावरणादाकृष्टाः संनिहितीकृता अवनता भूमिलग्नाः पश्चाद्विमुक्तास्त्यक्ताः । नभ एव पादपो वृक्षस्तस्य शाखाभूताः । अत्र धुतमेघपदे बहुव्रीहिः । नभःपादपपदे षष्ठीसमासस्ताभ्यां सावयवत्वं निरवयवत्वं च यथाक्रममुक्तम् । अत एवोभयसंकीर्णरूपकमिदं । स्कन्धके[1], ध्वनिस्तु दिशन्तीति दिशः प्रौढनायिकाः । अन्या अपि दिशो निजस्थानमिव गच्छन्ति । कीदृश्यः धुतमेधं( ध्यं ) यन्मधु मद्यं

१. 'स्कन्धकं नाम छन्दः'.

तत्करे यासां ताः । यद्वा धुता मेधा बुद्धिर्येन तादृशं मधु करे यासां ताः, यद्वा धुता मेधा यस्मादेवंविधो मधुकरो विदग्धो यासां ताः । घनेन दृढेन समयेन शपथेन समदेन पुंसा वा आकृष्टा आहृता अवनता वशीकृताः । उपभुक्ता इति यावत् । पश्चाद्विमुक्तास्त्यक्ताः, यद्वा विमुक्ता विगतमुक्ताहाराः पश्चात्कर्मधारयः । 'समयः शपथे काले' इति विश्वः । नखस्य पातः क्षतं तदेव प्रसाधः प्रसाधनं यासां ताः ॥

श्लेषोपहितं यथा—

'पीणपओहरलग्गं दिसाणं पवसन्तजलअसमअविइण्णम् ।
सोहग्गपढमइण्हं धम्माअइ सरसणहवअं इन्दधणुम् ॥ ४८ ॥'
[पीनपयोधरलग्नं दिशां प्रवसज्जलदसमयवितीर्णम् ।
सौभाग्यप्रथमचिह्नं प्रम्लायति सरसनखपदमिन्द्रधनुः ॥]

अत्र सरसनखपदाकारस्येन्द्रधनुष उत्पन्नसादृश्यादभेदोपचारेण रूपेण योऽयं सरसे नभसि पदमस्येति व्युत्पत्त्या श्लिष्टरूपेण तद्विशेषणप्रकारो यश्च शोभायाः प्रथममग्र्यं चिह्नं सौभाग्यस्य च प्रथमं चिह्नं पीनपयोधरे मेघे स्तने वा लग्नमित्यादिविशेषणविशेष्यभावस्तेनेदं श्लेषेणोपधीयत इति श्लेषोपहितं नाम संकीर्णरूपकेषूभयभूयिष्ठरूपकभेदः ॥

**पीणेत्यादि** । इहेन्द्रधनुः प्रसाधयति⋯⋯ श्लिष्यति वा । कीदृशम् । पीने पयोधरे मेघे लग्नम् । प्रवसता गच्छता जलदसमयेन वर्षाकालेन दिशां वितीर्णं दत्तम् । सौभाग्यस्य श्रेष्ठं प्रथममाद्यं चिह्नम् । सरसे स्निग्धे नभसि गगने पदं स्थानं यस्य तत् । पक्षे सरसं नखपदं क्रमेण प्रमीयते ( प्रम्लायति ) । कीदृशम् । दिशां प्रौढाङ्गनानां सुन्दरीणां वा पीने मांसले पयोधरे स्तने लग्नम् । प्रवसता जलदसमयेन नायकेन वितीर्णं दत्तम् । जलान् मूर्खान् द्यति खण्डयति जलद ईदृशः समय आचारो यस्य सः । सौभाग्यस्य प्रथमचिह्नमिन्द्रधनुराकारं च । 'समयः स्यात्काल आचारे' इति शाश्वतः । प्रवासगमने स्मरणार्थं विदग्धेन नखक्षतं देयम् । तदुक्तं मद्रसिकसर्वस्वे—'प्रवासगमने देयाः स्नेहसंस्कारका नखाः ।

---

१. पक्षे 'नखपातप्रसाधाः' इति. २. 'शोभाग्रप्रथमचिह्नं' इति वा छाया.

च्चिरोत्सृष्टेषु रागेषु प्रीतिर्गच्छेत्पराभवम् ॥ रागायतनसंस्मारि यदि न स्यान्नखक्षतम्। रेखास्तिस्रश्चतस्रश्च वक्रा वक्राकृतिर्नखः ॥' इति। अत्र श्लेषालंकारेणोपहितत्वादेव संकीर्णरूपकता ॥ इति रूपकालंकारनिरूपणम्।

## साम्यालंकारनिरूपणम्।

साम्यलक्षणमाह—

द्वयोर्यत्रोक्तिचातुर्यादौपम्यार्थोऽवगम्यते।
उपमारूपकान्यत्वे साम्यमित्यामनन्ति तत् ॥ ३४ ॥
तदानन्त्येन भेदानामसंख्यं तस्य तूक्तयः।
दृष्टान्तोक्तिः प्रपञ्चोक्तिः प्रतिवस्तूक्तिरेव च ॥ ३५ ॥
तत्रेवादेः प्रयोगेण दृष्टान्तोक्तिं प्रचक्षते।
इवादेरप्रयोगेण प्रपञ्चोक्तिं मनीषिणः ॥ ३६ ॥
वस्तु किंचिदुपन्यस्य न्यसनात्तत्सधर्मणः।
साम्यप्रतीतिरस्तीति प्रतिवस्तूक्तिरुच्यते ॥ ३७ ॥
तत्र क्रियाजातिगुणद्रव्ययोगादिहेतुके।
साम्ये पूर्वादिभेदेन दृष्टान्तोक्तिर्विधीयते ॥ ३८ ॥

सा क्रियायोगनिमित्तसाम्या दृष्टान्तोक्तिः सामान्यतः पूर्वा यथा—

'स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः।
जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत् ॥४९॥'

अत्र दृष्टान्तदार्ष्टान्तिकयोरनाविष्टलिङ्गत्वादवश्याभिधेयत्वाच्च स्थित इत्यादिषु न लिङ्गभेददोषः। अभिधीयमानस्थानादिक्रियायोगजनितं साम्यं समस्तमूर्तिमत्साधारणश्च पूर्वमेव छायादृष्टान्तः। सेयं क्रियायोगनिमित्तसाम्या सामान्यतः पूर्वा नाम दृष्टान्तोक्तिः साम्यभेदः॥

**द्वयोरिति** । द्वयोरुपमानोपमेययोर्वचनरचनाभेदाद्यत्रौपम्यार्थतुल्यता ज्ञायते तत्साम्यमामनन्ति कथयन्ति । तद्युपमारूपकयोरतिव्याप्तिः । अत उक्तम्— **उपमेति** । यद्यपि त्रिषु सादृश्यमस्ति तथापि प्रकारकृतो भेद इति भावः । तद्विभजते—**तस्य त्विति** । यद्यपि भेदानामानन्त्यादसंख्यं तत्साम्यं तथापि तिस्र उक्तयः प्रकारानुगमकास्तत्रेत्यर्थः ॥ **वस्त्विति** । वस्तु वाच्यं किमप्युपन्यस्य तत्सधर्मणस्तेन तुल्यगुणस्य न्यसनादुदाहरणात्साम्यज्ञानं प्रतिवस्तूक्तिरित्यर्थः ॥ पूर्वादीत्यादिपदेनोत्तरग्रहणं क्रियायोग एव निमित्तं तत्कृतसाम्यात् । **स्थितेत्यादि** । स भूपतिर्दिलीपस्तां सुरभिमन्वगच्छदनुगच्छति स्म । अनुगमनमेवाह—स कीदृशः । स्थितोऽवस्थितः, उच्चलितः प्रस्थितः, आसनवानुपविष्टः, जलाभिलाषी जलेच्छायुतश्च । जलाभिलायीतिपाठे 'ला दाने' ताच्छीलिके णिनि 'आतो युक्–७।३।३३' इति युकि जलपानशील इत्यर्थः । तां कीदृशीम् । स्थिताम्, प्रयातां कृतगमनाम्, निषेदुषीमुपविष्टाम्, जलमाददानां गृह्णन्तीं च । छायेव यथा छाया कमप्यनुगच्छति तथेत्यर्थः । एतासां क्रियाणामेकचित्ततयानुगमार्थं धीर इत्युक्तम् । ननु छायेव स इति लिङ्गभेददोषदुष्टमेवेदम् । अतः कुतोऽलंकारतेत्यत उक्तम्— **अनाविष्टेति** । अविवक्षितलिङ्गत्वात् । नहि लिङ्गविवक्षायामिह किंचित्प्रयोजनम् । इयं चोपमा लौकिकी । लोके च छायाया आवरकानुगमनैयत्यं नत्वन्यस्येति तावन्मात्रमेवोद्देश्यमिहेति न दोषः । तदिदमुक्तम्—**अवश्येति** । सर्वक्रियायाः प्रथमत एव साम्यात्पूर्वेयम् । उपमायामेक एव वाक्यार्थः, इह तु वाक्यार्थयोर्भेद इति भिन्नालंकारता ॥

सैव क्रियागुणयोगनिमित्ता विशेषतः पूर्वा यथा—

'सअलुज्जोइअवसुहे समत्थजिअलोअवित्थरन्तपआवे ।
ठाइ ण चिरं रविम्मि व विहाणपडिआ वि मइलदा सप्पुरिसे ५०'

[सकलोद्द्योतितवसुधे समस्तजीवलोकविस्तीर्यमाणप्रतापे ।
तिष्ठति न चिरं रवाविव विधानपतितापि मलिनता सत्पुरुषे ॥]

अत्र जगदुद्द्योतनक्रिया प्रतापगुणयोगहेतुसाम्यमसाधारणश्च सूर्यदृष्टान्त इति विशेषतः क्रियागुणयोगनिमित्तेयं पूर्वा नाम दृष्टान्तोक्तिः साम्यभेदः ॥

**सअलु इत्यादि**। इह सत्पुरुषे मलिनता चिरं न तिष्ठति। कीदृशे। सकलोद्द्योतिता वसुधा येन तस्मिन्, समस्ते जीवलोके मर्त्यलोके विस्तीर्यमाणः प्रतापो यस्य तस्मिन्। मलिनता कीदृशी। विधानेन इतिकर्तव्यतया विधिना 'वापादितोत्पादिता। रवाविव यथा सूर्ये मलिनता चिरं न तिष्ठति तथेत्यर्थः। कीदृशे। सकलोज्ज्वलीकृतवसुधे समस्तजीवलोके विस्तीर्यमाणः प्रतापः प्रतपनं यस्य तस्मिन्। मलिनता कीदृशी। विहाणं प्रातः तस्मात्पतितापि। इहासाधारण्यमेत्र विशेषः, पूर्वत्रापि समस्तक्रियया प्रथमतः साम्येन॥

गुणयोगनिमित्तसाम्या सामान्यत उत्तरा यथा—

'रूपं तदोजस्वि तदेव वीर्यं तदेव नैसर्गिकमुन्नतत्वम्।
न कारणात्स्वाद्बिभिदे कुमारः प्रवर्तितो दीप इव प्रदीपात्॥५१॥'

अत्र रूपादिगुणयोगजन्मजनितं साम्यं सामान्यरूपश्च पश्चात्प्रदीपदृष्टान्त इति सामान्यतो गुणयोगनिमित्तेयमुत्तरा नाम दृष्टान्तोक्तिः साम्यभेदः॥

**रूपमिति**। कुमारो बालकोऽजः, स्वान्निजात्कारणात्पितुर्न विभिदे न भेदं जगाम। अभेदे हेतुमाह—ओजस्वि दीप्तं तद्रूपं, सौकुमार्यं तदेव, वीर्यं तेजस्तदेव, नैसर्गिकं स्वाभाविकमुन्नतत्वमुच्छ्रितत्वं च। यथा दीपात्प्रवर्तित उत्पादितो दीपः स्वात्कारणाद्दीपान्न भिन्नो भवति। अत्रापि रूपादिकं तुल्यमेव। दृष्टान्तस्य प्रकृतवाक्यार्थपर्यवसाने सति पश्चादन्वय इत्युत्तरता॥

सैव क्रियागुणद्रव्ययोगनिमित्ता विशेषतो यथा—

'अव्वोच्छिण्णपसरिओ अहिअं उद्धाइ फुरिअसूरच्छाओ।
उच्छाहो सुभडाणं विसमक्खलिओ महाणईण व सोत्तो॥५२॥'

[अव्यवच्छिन्नप्रसृतोऽधिकमुद्धावति स्फुरितशूर(शौर्य)च्छायः।
उत्साहः सुभटानां विषमस्खलितो महानदीनामिव स्रोतः॥]

अत्राव्यवच्छिन्नप्रसृत इति क्रियायोगनिमित्तं स्फुरितशौर्यच्छाय इति गुणयोगनिमित्तं स्फुरितसूर्यच्छाय इति द्रव्ययोगनिमित्तं च साम्यं सामान्यविशेषरूपश्च विषमस्खलितमहानदीस्रोतोदृष्टान्त इति विशेषतः क्रियादियोगनिमित्तेयमुत्तरा नाम दृष्टान्तोक्तिः साम्यभेदः॥

**अव्वोच्छिण्णेति** । इह सुभटानामुत्साहो विषमे दुष्करे स्खलितः सन्नधिकं यथा स्यादेवमुद्धावति प्रकाशते । कीदृशः । अव्यवच्छिन्नो निरन्तरः सन् प्रसृतः, स्फुरिता शूरस्य सुभटस्य शौर्यस्य वा छाया ख्यातिः कान्तिर्वा यत्र सः । अथा महानदीनां स्रोतः प्रवाहो विषमे देशे स्खलितः सन्नधिकमुद्धावति उद्गच्छति सोऽपि निरन्तरं प्रसृतः, स्फुरिता सूरस्य छाया कान्तिः प्रतिबिम्बो वा यत्र सः । 'प्रतिबिम्बे च कान्तौ च ख्यातौ छायार्कयोषिति ।' इति मेदिनीकारः । ('कार्यारम्भेषु संरम्भः स्थेयानुत्साह उच्यते ।' इति भरतः ।) अत्र तादृशनदीस्रोतसो विशेषरूपता ॥

द्रव्यजातिनिमित्तसाम्या सामान्यतः पूर्वा दृष्टन्तोक्तिर्यथा—

'विसवेओ व्व पसरिओ जं जं अहिलेइ बहलधूमुप्पीडो ।
सामलइज्जइ तं तं रुहिरं व महोअहिस्स विद्दुमवेण्टम् (ढम्)५३'

[विषवेग इव प्रसृतो यं यमभिलेढि( लीयते ) बहलधूमोत्पीडः ।
श्यामलयति(लायते) तं तं (तत्तद्) रुधिरमिव महोदधेर्विद्रुमवेष्टम् (पीठम्) ॥]

अत्र धूमविषयोर्विद्रुमरुधिरयोश्च द्रव्यजातियोगकृतं प्रतीयमानं श्यामलायत इति धूमविषद्रव्ययोगजनितमभिधीयमानं सामान्यरूपं च साम्यम् । सेयं दृष्टान्तस्य पूर्वमेवोपन्यासाद्द्रव्यजातियोगनिमित्तसाम्या सामान्यतः पूर्वा नाम दृष्टान्तोक्तिः साम्यभेदः ॥

**बिसेति** । इह बहलधूमोत्पीडो महाधूमसमूहो विषवेग इव प्रसृतो यद्विद्रुमपीठमभिलीयतेऽभिलाति गृह्णाति वा तत्तन्महोदधेर्विद्रुमपीठं श्यामलायते कज्जलीभवति । कीदृशम् । रुधिरमिव, इयं पूर्वदिशा । अभिलीयत इति अभिपूर्वात् लीङ् आश्लेषे दैवादिकः... । 'स्यादुत्पीडः समूहेऽपि' इति रत्नकोषः । अत्र जातेर्द्रव्यस्य सामान्यत एव साम्यमिति सामान्यरूपता दृष्टान्तस्य पूर्वमुपन्यासात्पूर्वता च ॥

सैव द्रव्ययोगनिमित्तसाम्या विशेषतो यथा—

'संचारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा ।
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः ॥ ५४ ॥'

अत्र दीपशिखादिद्रव्ययोगकृतं साम्यं सामान्यविशेषरूपौ संचारिणी दीपशिखेति च राजमार्गाट्ट इति च दृष्टान्तौ पूर्वमेवोपन्यस्तौ । सेयं विशेषतो द्रव्ययोगनिमित्तसाम्या पूर्वा नाम दृष्टान्तोक्तिः साम्यभेदः ॥

**संचारिणीत्यादि** । सा पतिंवरा इन्दुमती यं यं भूमिपालं व्यतीयाय तत्राज स स भूमिपालो विवर्णभावं विवर्णत्वं अपेदे लेभे । यथा रात्रौ संचरिणी दीपशिखा यं यं राजमार्गाट्टं व्यतिक्रामति स स राजमार्गाट्टो वैवर्ण्यं प्राप्नोति तथेत्यर्थः । व्यतीयायेति व्यतिपूर्वात् 'इण् गतौ' इति धातोर्लिटि रूपम् । अट्टो अटारीति प्रसिद्धः । 'स्यादट्टः क्षौममस्त्रियाम्' इत्यमरः । इह संचरणत्वसामान्ययोगात्सामान्यरूपता, राजमार्गाट्ट इति विशेषरूपता ॥

द्रव्ययोगनिमित्तसाम्यैव सामान्यत उत्तरा यथा—

'उज्ज्वलालोकया स्निग्धा त्वया त्यक्ता न राजते ।
मलीमसमुखा वर्तिः प्रदीपशिखया यथा ॥ ५५ ॥'

अत्र द्रव्ययोगकृतं साम्यं सामान्यरूपश्च प्रदीपः पश्चात्प्रदीपशिखावर्तिर्दृष्टान्तः । सेयं यथोक्तरूपोत्तरा नाम दृष्टान्तोक्तिः साम्यभेदः ॥

**उज्ज्वलेत्यादि** । त्वया त्यक्ता स्निग्धा स्नेहवती सखी न राजते इति प्रियायाः सखीं प्रति पत्युर्वचनम् । त्वया कीदृश्या । उज्ज्वलो निर्मल आलोको दर्शनं यस्यास्तया । स्निग्धा कीदृशी । मलीमसं म्लानं मुखं यस्याः सा । यथा प्रदीपशिखया त्यक्ता वर्तिर्न शोभते तथेत्यर्थः । प्रदीपशिखया कीदृश्या । उज्ज्वल आलोक उद्योतो यस्यास्तया । वर्तिः कीदृशी । स्निग्धा स्नेहवती, स्नेहस्तैलम् । म्लानमुखी च । 'मलीमसं तु मलिनम्' इत्यमरः । इह नायिकाशिखयोर्द्रव्ययोर्योगः । दृष्टान्तस्य सामान्यरूपता पश्चादुपादीयमानता च व्यक्तैव ॥

सैव क्रियागुणयोगनिमित्तसाम्या विशेषतो यथा—

'तो ताण हअच्छाअं णिच्चललोअणसिहं पउत्थपआवम् ।
आलेक्खपईवाणं व णिअअं पइइचडुलत्तणं पि विअलिअम् ५६'

[ततस्तेषां हतच्छायं निश्चललोचनशिखं प्रोषितप्रतापम् ।
आलेख्यप्रदीपानामिव निजकं प्रकृतिचटुलत्वमपि विगलितम् ॥]

अत्र हतच्छायमित्यादीनामन्तर्गतगुणत्वेन क्रियाविशेषणत्वात् क्रियागुणयोगनिमित्तं निजं प्रकृतिचटुलत्वमपि विगलितमिति गुणयोगनिमित्तं च साम्यं सामान्यविशेषरूपश्चालेख्यप्रदीपदृष्टान्त इति क्रियागुणयोगनिमित्तेयं विशेषत उत्तरा नाम दृष्टान्तोक्तिः साम्यभेदः । अथ दृष्टान्तोक्तेर्दृष्टान्तालंकारस्य च को विशेषः । उच्यते । 'लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः' इत्यर्थं प्रति तु न कश्चिद्विशेषः । उक्तिं प्रति पुनरनेको विद्यते । तद्यथा—दृष्टान्तदार्ष्टान्तिकयोर्भिन्ने वाक्ये निर्देशो दृष्टान्तालंकारः । एकवाक्ये निर्देशो दृष्टान्तोक्तिः । साध्यधर्मसिद्धये दृष्टान्तालंकारः, साधर्म्य[निमित्त]सिद्धये दृष्टान्तोक्तिः । इवाद्यप्रयोगे दृष्टान्तालंकारः, इवादिप्रयोगे तु दृष्टान्तोक्तिः । अत एवेयमुभयालंकारः स पुनरर्थालंकार इति ॥

**तो ताणेत्यादि** । इह ततस्तेषां वानराणामालेख्यप्रदीपानामिव निजकमात्मीयं प्रकृतिचञ्चलत्वमपि विगलितमपगतम् । हता छाया प्रतिष्ठा कान्तिर्वा यत्र तत् । पक्षे हता छाया आतपाभावरूपा यत्र तत् । निश्चलं लोचनमेव शिखा यत्र तत् । प्रोषितोऽन्तर्गतः प्रतापः पौरुषं प्रतपनं च यत्र तत् । क्रियाविशेषणत्रयमिदम् । 'निजमात्मीयनित्ययोः' इति विश्वः । स्वार्थिकः कन् । अत्र छायादेर्गुणस्य क्रियाविशेषणतया क्रियाया गुणायोगः । प्रदीपस्य दृष्टान्त इति विशेषः । उत्तरा च व्यक्तैव । **अथेति** । उभयत्र साम्यमात्रस्योपजीवनादिति भावः । लौकिका लोकविदिताः, परीक्षकाः प्रमाणेन व्यवहारिणः । बुद्धिसाम्यस्योभयत्र तुल्यत्वादाह—**न कश्चिदिति** । अभेद एवेत्यर्थः । तर्ह्यभेद एव, नेत्याह—**उक्तिमिति** । वचनरचनयानेके भेदास्तयोरित्यर्थः । साध्येति साध्यो धर्मः सिसाधयिषितः । **साधर्म्येति** । साधर्म्यं समानधर्मता तस्या निमित्तं गुणादि तयोः सिद्धिरित्यर्थः । इवादिप्रयोगपुरस्कारेण शब्दालंकारता, साम्यादिपुरस्कारेण चार्थालंकारतेत्युभयालंकारतेत्याह—**अत इति** ।

प्रपञ्चोक्तिं लक्षयति—

**साम्योत्कर्षापकर्षोक्तिरुपमानोपमेययोः ।**
**प्रकृता विकृता चेति प्रपञ्चोक्तिः प्रदर्श्यते ॥ २९ ॥**

सोपमानोपमेययोः साम्येन प्रकृता यथा—

'अरण्यबीजाञ्जलिदानलालिता-
स्तथा च तस्यां हरिणा विशश्वसुः ।
यथा तदीयैर्नयनैः कुतूहला-
त्पुरः सखीनाममिमीत लोचने ॥ ५७ ॥'

अत्र मृगलोचनोपमानानां तल्लोचनोपमेययोश्च साम्यमविकृतानामेव प्रतीयते । सेयं सामान्येन प्रकृता नाम प्रपञ्चोक्तिः साम्यभेदः ॥

**साम्येति** । उपमानोपमेययोः साम्येनोत्कर्षेणापकर्षेण च प्रपञ्चोक्तिः । सा च क्वचित्प्रकृता स्वभावसिद्धा, क्वचिद्विकृतौपाधिकी ॥ **अरण्येत्यादि** । तस्यां गौर्यां च तथा तेन प्रकारेण हरिणा विशश्वसुः विश्वासं जग्मुः । कीदृशाः । अरण्यबीजस्य अंडोरीति ख्यातस्याञ्जलिदानेन लालिता विलासिताः । तदञ्जलिस्थनीवारधान्यभक्षका इत्यर्थः । यथा सा गौरी तदीयैर्मृगसंबन्धिभिर्नेत्रैरग्रे सखीनां लोचनेऽमिमीत समीचकार कौतुकात् । अरण्ये बीजानि यस्य तदरण्यबीजम् । विशश्वसुरिति विपूर्वात् 'श्वस प्राणने' इत्यस्माल्लिट्युसि रूपम् । अमिमीतेति 'माङ् माने' णिचि लुङि चङि रूपम् । इहाविकृतता मृगलोचनानां सहजसौकर्यात् । अत एव प्रकृतता प्रपञ्चोक्तिरिवादेरप्रयोगात् ॥

प्रकृतैवोपमानोत्कर्षेण यथा—

'गर्वमसंवाह्यमिमं लोचनयुगलेन वहसि किं मुग्धे ।
सन्तीदृशानि दिशि दिशि सरःसु ननु नीलनलिनानि ॥५८॥'

अत्र तव द्वे लोचनोत्पले एव, सरसां पुनर्बहूनि नीलोत्पलानीत्युपमानोत्कर्षः प्रकृत एव प्रतीयते । सेयमुपमानोत्कर्षेण प्रकृता नाम प्रपञ्चोक्तिः साम्यभेदः ॥

**गर्वमित्यादि** । ननु हे नायिके, लोचनद्वयेनासंवाह्यं गर्वं त्वं किं वहसि । न वोढुमर्हसीत्यर्थः । दिशि दिशि प्रतिदिशं सरःसु तडागेषु ईदृशानि त्वन्नेत्रतुल्यानि नीलोत्पलानि सन्ति । अत एव गर्वभङ्गः । 'स्यान्मर्दनं संवाहनम्' इत्यमरः । इह नीलोत्पलानामुत्कर्षः साहजिक एव । नेत्रद्वयापेक्षया तेषां बहुत्वात् ॥

---

१. प्रमादोक्तिरेषा । जौहोत्यादेर्माधातोरिति तु न्याय्यम्.

सैवोपमानापकर्षेण यथा—

'अन्यतो नय मुहूर्तमाननं चन्द्र एष सरले कलामयः ।
मा कदाचन कपोलयोर्मलं संक्रमय्य समतां नयिष्यति ॥५९॥'

अत्रोपमानस्य मलिनताकृतोऽपकर्षः प्रकृत एव प्रतीयते । सेयमुपमानापकर्षेण प्रकृता नाम प्रपञ्चोक्तिः साम्यभेदः ।

**अन्यत इत्यादि** । हे सरले ऋजुप्रकृतिके, आननं मुखं मुहूर्तमन्यतोऽन्यत्र नय प्रापय । अत्र हेतुः । एष चन्द्रः कलामयः कदाचन कपोलयोर्मलं संक्रमय्य मेलयित्वा मा समतां साम्यं नयिष्यति प्रापयिष्यति । अन्यस्यान्यत्र संक्रमणे कलामयत्वं हेतुः । अन्यत इति सप्तम्यां तसिः । इह चन्द्रस्योपमानस्य कलङ्करूपमलसंबन्धकृतोऽपकर्षः साहजिक एव ज्ञायते ॥

सैवोपमानस्य किंचिदुत्कर्षेण यथा—

'आपातमात्ररसिके सरसीरुहस्य
किं बीजमर्पयितुमिच्छसि वापिकायाम् ।
कालः कलिर्जगदिदं नकृतज्ञमङ्गे
स्थित्वा हरिष्यति तवैव मुखस्य शोभाम् ॥ ६० ॥'

अत्रोपमानस्योपमेयादीषदुत्कर्षः प्रकृत एव प्रतीयते । सेयमीषदुत्कर्षेण प्रकृता नाम प्रपञ्चोक्तिः साम्यभेदः ॥

**आपातेत्यादि** । हे आपातमात्ररसिके एतत्क्षणमात्ररसवशे हे नायिके, सरसीरुहस्य पद्मस्य बीजं वापिकायामर्पयितुं क्षेप्तुं किमिच्छसि । किं तु नेदमर्हमित्यर्थः । अत्र हेतुः । अयं कालः कलियुगाख्यः, अत एवेदं जगन्नकृतज्ञमर्यादम् । ततो हे अङ्गे, स्थित्वा कालान्तरं इदं सरसीरुहं तवैव मुखस्य शोभामथ च संपदं हरिष्यति ग्रहीष्यति । जेष्यतीति यावत् । 'आपातः पुंसि तत्काले' इति मेदिनीकारः । 'मर्यादावान्कृतज्ञः' इति च । इह पद्मस्योपमानस्य मुखादुपमेयात्किंचिदुत्कर्षः साहजिक एव विवक्षितः ॥

---

१. सुभाषितावल्यां तु 'स नेष्यति' इति पाठः ।

उपमानोपमेययोः साम्यापत्त्या विकृता यथा—

'घरिणीए महाणसकम्मलग्गमसिमलिइएण हत्थेण ।
छित्तं मुहं हसिज्जइ चन्दावत्थं गअं पइणा ॥ ६१ ॥'

[गृहिण्या महानसकर्मलग्नमसीमलिनितेन हस्तेन ।
स्पृष्टं मुखं हस्यते चन्द्रावस्थां गतं पत्या ॥]

अत्रोत्कृष्टोपमेयस्य मसीमालिन्यवैकृतेनोपमानसाम्यमापद्यमानं प्रतीयते । सेयमुपमानोपमेययोः साम्यापत्त्या विकृता नाम प्रपञ्चोक्तिः साम्यभेदः ॥

**घरिणीत्यादि** । 'गृहिण्या महानसकर्मलग्नमसीमलिनितेन हस्तेन । स्पृष्टं मुखं हस्यते चन्द्रावस्थां गतं पत्या ॥' इह कयाचिन्नायिकया चन्द्रेण स्पर्धमानया पाकासक्तया श्यामितहस्तेन मुखे स्पृष्टे सति नायकस्तन्मुखस्य चन्द्रसमत्वं सूचयन्नुपहसतीत्येकापरस्यै कथयति—**गृहिण्या इति** । गृहिण्याः पाकक्रियालग्नश्यामभागश्यामितेन करेण स्पृष्टं मुखमत एव चन्द्रावस्थां गतं पत्या हस्यते । 'पाकस्थानमहानसे' इत्यमरः । अत्र मसीमालिन्यं वैकृतं तत एव मुखचन्द्रयोः साम्यापत्तिः ॥

विकृतैवोपमेयस्योत्कर्षापत्त्या यथा—

'रत्तुप्पलदलसोहा तीअ वि चसअम्मि सुरहिवारुणीभरिए ।
मअतम्बेहि मणहरा पडिमापडिएहि लोअणेहि लहुइआ ॥ ६२ ॥'

[रक्तोत्पलदलशोभा तस्या अपि चषके सुरभिवारुणीभरिते ।
मदताम्राभ्यां मनोहरा प्रतिमापतिताभ्यां लोचनाभ्यां लघ्वीकृता ॥]

अत्रोपमेयस्य मधुमदताम्रत्ववैकृत उत्कर्षः प्रतीयते । सेयमुपमेयोत्कर्षेण विकृता नाम प्रपञ्चोक्तिः साम्यभेदः ॥

**रत्तुप्पलेत्यादि** । इह कयापि नायिकया लोचनाभ्यां चषके सुगन्धिमद्यभृते प्रतिमया प्रतिबिम्बेन पतिताभ्याम् । अत एव मदेनाताम्राभ्यामतिलोहिताभ्यां मनोज्ञा रक्तोत्पलदलस्य शोभा लघ्वीकृतात्यल्पा कृता । जितेति यावत् । 'चषकं पानपात्रं स्यात्' इति हारावली । 'सुरा···वरुणात्मजा' इत्यमरः । भरित इत्यत्र

बाहुलकात्पाक्षिक इडागमः । यद्वा भरितः संजातभरः । तारकादित्वादितच् । 'प्रतिबिम्बं प्रतिमा' इत्यमरः । अत्र नेत्रयोरुपमेययोर्मंदताभ्रत्वं वैकृत उत्कर्षः स्फुट एव ॥

सैवोपमेयापकर्षापत्त्या यथा—

'मृगं मृगाङ्कः सकलं सदाङ्के बिभर्ति तस्यास्तु मुखं कदाचित् ।
कपोलदेशे मृगनाभिपत्रमियान्सखे तस्य ततोऽपकर्षः ॥ ६३ ॥'

अत्र मृगाङ्कः सकलं मृगं सदाङ्के बिभर्ति, तन्मुखं च कदाचिन्मृगनाभिमात्रजपत्रमेवेत्युपमेयस्य वाचनिक्यपकर्षोपपत्तिः प्रतीयते । सेयमुपमेयापकर्षापत्त्या विकृता नाम प्रपञ्चोक्तिः साम्यभेदः ॥

**मृगमित्यादि** । हे सखे, तस्य मुखस्य ततश्चन्द्रादियानेतावानपकर्षः । तमेवाह । मृगाङ्कश्चन्द्रोऽङ्के क्रोडे सदा सकलं मृगं बिभर्ति । तस्याः पुनर्मुखं (कर्तृ), कपोलदेशे मृगनाभेः कस्तूरिकायाः पत्रं पत्रावलीं कदाचिद्वहति । इह मुखस्योपमेयस्य वाचनिकी वचनतात्पर्यपर्यवसन्नापकर्षोपपत्तिः । कलङ्किना सममनयोरल्प एवोत्कर्ष इति हि वचनमपकर्षबोधकमेव । विकृतता च कस्तूरीपत्राधानात् ॥

सैवोपमेयस्य साम्यापत्त्योपमानोत्कर्षेण च यथा—

'न मर्त्यलोकस्त्रिदिवात्प्रतीयते म्रियेत नाग्रे यदि वल्लभो जनः ।
निवृत्तमेव त्रिदिवप्रयोजनं मृतः स चेज्जीवित एव जीवति ॥६४॥'

अत्रोपमेयस्य यथोक्तधर्मयोगे सत्युपमानेन पूर्वार्धे साम्यमुत्तरार्धे तु किंचिदुत्कर्षो भवति । सेयं यथोक्ता विकृता नाम प्रपञ्चोक्तिः साम्यभेदः ॥

**न मर्त्येत्यादि** । विवृतोऽयमभावालंकारे । इहोपमेयस्य मर्त्यलोकस्य यथोक्तधर्मस्याग्रे वल्लभमरणाभावरूपस्य योगे सत्युपमानेन त्रिदिवेन तौल्यमग्रे त्रिदिवप्रयोजननिवृत्त्युक्तेरुत्कर्ष एव ज्ञायते । वल्लभस्याग्रे मरणाभावाशंसनया विकृतता ॥

प्रतिवस्तूक्तेर्भेदप्रकारानाह—

**प्रतिवस्तूक्तिरप्यस्मिन्नृज्वी वक्रा च कथ्यते ।**
**दृष्टान्तोक्तेश्च सा छायां प्रपञ्चोक्तेश्च गाहते ॥ ४० ॥**

सा दृष्टान्तोक्तिच्छायया विधावृजुः पूर्वा च यथा—

'तन्मन्ये हिमभासस्तारानिकरेण कान्तिरुच्छेद्या।
यत्तस्या(एतस्या) मुखमेतद्यदि युवतिमुखानि विजयन्ते ॥६५॥'

अत्र तदिन्दोस्तारकौघेन कान्तिरुच्छेद्या इति पूर्वमृजूक्त्या दृष्टान्तरूपं पश्चाद्यदेतन्मुखं युवतिमुखानि विजयन्त इति ऋजूक्त्यैव दार्ष्टान्तिकरूपं प्रतिवस्तूपन्यस्तमिति सेयं दृष्टान्तोक्तिच्छायया विधावृज्वी पूर्वा च प्रतिवस्तूक्तिः साम्यभेदः ॥

**प्रतीति**। सा प्रतिवस्तूक्तिर्दृष्टान्तोक्तिप्रपञ्चोक्त्योश्छायां धर्मं गाहते बिभर्ति तयोश्छायावाहिनीत्यर्थः ॥ **तन्मन्ये इत्यादि**। एतस्या एतन्मुखं यदि युवतिमुखानि (कर्तृणि) विजयन्ते तत्तदा हिमभासश्चन्द्रस्य कान्तिस्तारानिकरेणोच्छेद्येत्यहं मन्ये। इह कर्मानुमितिरध्याहार्या। विजयन्त इत्यत्र 'विपराभ्यां जेः १।३।१९।' इति तङ्। अत्र प्रथममृजूक्त्या दृष्टान्तः, पश्चाद्दार्ष्टान्तिकमृजूक्त्यैव प्रतिवस्तूपन्यासः। तथा च दृष्टान्तोक्तिच्छाया व्यक्तैव, विधिमुखतापि व्यक्तैव ॥

सैवोत्तरा वक्रा च यथा—

'शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य।
दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः ॥ ६६ ॥'

अत्र शुद्धान्तदुर्लभमिति वक्रोक्त्या पूर्वं दार्ष्टान्तिकरूपं वस्तूपन्यस्य पश्चाद्दूरीकृताः खलु गुणैरिति वक्रोक्त्यैव दृष्टान्तरूपं प्रतिवस्तूपन्यस्तमिति सेयं दृष्टान्तोक्तिच्छायया विधौ वक्रोत्तरा च प्रतिवस्तूक्तिः साम्यभेदः ॥

**शुद्धेत्यादि**। यद्याश्रमवासिनो जनस्य वपुरिदं शुद्धान्तेऽन्तःपुरे दुर्लभमस्ति तदा खलु निश्चयेन वनलताभिरुद्यानलता गुणैर्दूरीकृताः सन्ति। 'शुद्धान्तश्चावरोधश्च' इत्यमरः। अत्र शुद्धान्तदुर्लभपदेनेदृशं रूपमन्तःपुरेऽपि नास्तीति वक्रोक्त्या प्रतिपादितपूर्वं दार्ष्टान्तिके, उत्तरार्धेऽपि वक्रोक्त्यैव दृष्टान्तकथनमिति दृष्टान्तोक्तिच्छायत्वविधिता तु स्फुटैव ॥

दृष्टान्तोक्तिच्छायया निषेधे ऋजुः पूर्वा यथा—

'न मालतीदाम विमर्दयोग्यं न प्रेम नव्यं सहतेऽपराधान् ।
म्लानापि न म्लायति केसरस्रग्देवी न खण्डप्रणया कथंचित् ६७'

अत्र न मालतीदाम विमर्दयोग्यमिति, म्लानापि न म्लायति केसरस्रगिति च ऋजूक्तिभ्यामेव पूर्वं दृष्टान्तरूपे वस्तुनी प्रतिषिध्योत्तरकालं न प्रेम नव्यं सहतेऽपराधानिति, देवी न खण्डप्रणया कथंचिदिति च दार्ष्टान्तिकरूपे प्रतिवस्तुनी ऋजूक्त्यैव प्रतिषिद्धे । सेयं निषेधे ऋज्वी पूर्वा च दृष्टान्तोक्तिच्छायया प्रतिवस्तूक्तिः साम्यभेदः ।

**न मालतीत्यादि** । मालतीमाला विमर्दयोग्या नास्ति । अतिमृदुत्वात् । तद्वन्नव्यं नवीनं प्रेम अपराधान्न सहते । केसरस्रक् बकुलमाला म्लानापि सती न म्लायति अलिमलिना न भवति तद्वद्देवी कथंचिन्न खण्डप्रणया न खण्डितप्रश्रया भवति। 'नव्यो नवीनो नूतनो नवः' इत्यमरः । अत्र दृष्टान्तोक्तिच्छायया निषेधः । पूर्वत्वमृजुत्वं च स्फुटमेव ॥

सैवोत्तरा च वक्रा च यथा—

'मानुषीषु कथं वा स्यादस्य रूपस्य संभवः ।
न प्रभातरलं ज्योतिरुदेति वसुधातलात् ॥ ६८ ॥'

अत्र कथं वा स्यादिति वक्रया निषेधोक्त्या दार्ष्टान्तिकमभिधाय पश्चान्न वसुधातलात्प्रभातरलं ज्योतिरुदेतीति वैयधिकरण्यवक्रयैव निषेधोक्त्या दृष्टान्तोऽभिहितः । सेयं निषेधे वक्रोत्तरा च दृष्टान्तोक्तिच्छायया प्रतिवस्तूक्तिः साम्यभेदः ॥

**मानुषीष्वित्यादि** । विक्रतोऽयमसमभावालंकारे । अत्र कथं वा स्यादिति वितर्कोत्थतया वक्रोक्तिर्निषेधरूपा, उत्तरार्धे तादृशज्योतिषो भूमावसंभवेऽतिरूपवत्या भूमावसंभव उक्त इति वैयधिकरण्यं वक्रता च ॥

प्रपञ्चोक्तिच्छायया विधावृञ्वी यथा—

'तरङ्गय दृशोऽङ्गने पततु चित्रमिन्दीवरं
स्फुटीकुरु रदच्छदं व्रजतु विद्रुमः श्वेतताम्।
क्षणं वपुरपावृणु स्पृशतु काञ्चनं कालिका-
मुदञ्चय मुखं मनाग्भवतु च द्विचन्द्रं नभः॥ ६९॥'

अत्र प्रथमचतुर्थपादयोरुपमानोपमेयसाम्यं वैकृतम्, द्वितीयतृतीयपादयोरुपमानापकर्षः प्रकृत इति। सेयं प्रपञ्चोक्तिच्छायया विधावृञ्वी नाम प्रतिवस्तूक्तिः साम्यभेदः॥

तरङ्गयेत्यादि। हे अङ्गने रूपवति, दृशो नेत्राणि तरङ्गय चञ्चलानि कुरु। ततो नीलमिन्दीवरं पद्मं पततु भङ्गवद्भवतु। रदच्छदं दशनाच्छादकमधरं स्फुटीकुरु व्यक्तीकुरु। ततो विद्रुमः प्रवालवृक्षः श्वेततां व्रजतु यातु। क्षणं मुहूर्तमात्रं वपुः शरीरमपावृणु निरावरणं कुरु। ततः काञ्चनं कनकं (कर्तृ) कालिकां श्यामिकां स्पृशतु। मनाक् अल्पं यथा स्यादेवं मुखमुदञ्चयोत्तोलय च। ततो नभ आकाशं द्विचन्द्रं चन्द्रद्वयान्वितं भवतु। तरङ्गयेति तरङ्गशब्दात् 'तत्करोति–' इति णिचि लोटि रूपम्। 'ओष्ठाधरौ तु रदनच्छदौ' इत्यमरः। 'विद्रुमो ना प्रवालेऽपि' इति मेदिनीकारः। 'कालिका श्यामिका चण्ड्याः'(?) इति शाश्वतः। द्वौ चन्द्रौ यत्र तद्द्विचन्द्रम्। अत्र विकृततया प्रकृततया च प्रपञ्चोक्तिच्छाया वैकृतमसाहजिकम्। प्रकृतः सहजः। विधिता तु व्यक्तैव॥

सैव विधौ वक्रा यथा—

'एक्कोण्णमिअभुअभङ्गे विमलकवोले
वअणम्मि तुइ मिअच्छि तिरिच्छणअणे।
एहु ससिबिम्बउ कलङ्कगारउ पण्डरउ खित्तउ
उप्परेण भमाइअ णिमञ्छणखप्परउ॥ ७०॥'

[एकोन्नामितभ्रूभङ्गे विमलकपोले
वदने तव मृगाक्षि तिर्यङ्नयने।
एतच्छशिबिम्बं कलङ्कागारं पाण्डरमुत्क्षिप्त-
मुपरि भ्रामयित्वा निर्मञ्छनकर्परम्॥]

अत्रोपमेयोत्कर्षो वैकृतः, उपमानापकर्षः प्राकृतः प्रकाशत एव । या पुनरियमुत्तरार्धेन रूपकेणोपमानापकर्षस्योक्तिभङ्गिस्तयेयं प्रपञ्चोक्तिच्छायया विधौ वक्रा नाम प्रतिवस्तूक्तिः साम्यभेदः ॥

**एक्को इत्यादि ।** 'एकोन्नामित भ्रूभङ्गे विमलकपोले वदने तव मृगाक्षि तिर्यङ्नयने । एतच्छशिबिम्बं कलङ्कागारं पाण्डरमुत्क्षिप्तमुपरि भ्रमयित्वा निर्मञ्छनकर्परम् ॥' इह हे मृगाक्षि, तव वदन एतच्छशिबिम्बं निर्मञ्छनकर्परमुपरि भ्रामयित्वोत्क्षिप्तम् । कीदृशे वदने । एक उन्नामित उत्तोलितो भ्रूभङ्गो यत्र तस्मिन् । विमलौ कपोलौ यत्र तस्मिन् । तिर्यग्नयने यत्र तस्मिन् । एतादृशस्य निर्मञ्छनमुचितमेव । शशिबिम्बे निर्मञ्छनकर्परधर्ममाह—कलङ्क एवाङ्गारो यत्र तत्पाण्डरं श्वेतं च । 'अङ्गारोऽलातमुल्मुकम्' इत्यमरः । 'कर्परोऽस्त्री कपालेऽपि' इति मेदिनीकारः । अत्रोपमेये वदने भ्रूभङ्गादेर्विकृतत्वप्रकाशः स्फुटः । उत्तमस्य निर्मञ्छनं क्रियत इत्युक्तिभङ्गी ॥

सैव निषेधे ऋज्वी यथा—

'दातारो यदि कल्पशाखिभिरलं यद्यर्थिनः किं तृणैः
 सन्तश्चेदमृतेन किं यदि खलास्तत्कालकूटेन किम् ।
किं कर्पूरशलाकया यदि दृशोः पन्थानमेति प्रिया
 संसारेऽपि सतीन्द्रजालमपरं यद्यस्ति तेनापि किम् ॥ ७१ ॥'

अत्रोपमेयोत्कर्ष ऋजूक्त्यैव च निबद्ध इति सेयं प्रपञ्चोक्तिच्छायया निषेधे ऋजुर्नाम प्रतिवस्तूक्तिः साम्यभेदः ॥

**दातार इत्यादि ।** यदि दातारः सन्ति तदा कल्पशाखिभिः कल्पवृक्षपञ्चकैरलं निष्फलम् । दानस्य दातृभिरेव निष्पादनात् । यद्यर्थिनो याचकाः सन्ति तर्हि तृणैः किम् । याचकानामेव तृणकार्यकरत्वात् । एवमन्यत्रापि । चेद्यदि सन्तः सज्जनास्तदा अमृतेन किम् । खला दुर्जना यदि तदा कालकूटेन विषेण किम् । दृशोर्नेत्रयोः । पन्थानं मार्गं यदि प्रिया एति आयाति तदा कर्पूरशलाकया किं कर्पूरघटितकाष्ठिकया किम् । कर्पूराञ्जन्या वा किम् । संसारेऽपि सति विद्यमाने तस्मादपरमिन्द्रजालमस्ति तेनापि किम् । सकलेन्द्रजालात्संसारस्य महत्त्वात् । 'चन्द्रादिकाष्ठयञ्जनयोः शलाका' इति मेदिनीकारः । अत्र दातृप्रभृतेरुत्कर्ष उपमाने च निषेध ऋजूक्त्यैव ॥

सैव निषेधे वक्रा यथा—

'तद्वक्त्रं यदि मुद्रिता शशिकथा तच्चेत्स्मितं का सुधा
तच्चक्षुर्यदि हारितं कुवलयैस्ताश्चेद्गिरो धिङ्मधु।
धिक् कंदर्पधनुर्भ्रुवौ च यदि ते किं वा बहु ब्रूमहे
यत्सत्यं पुनरुक्तवस्तुविरसः सर्गक्रमो वेधसः॥ ७२॥'

अत्रोपमानापकर्षो वक्रोक्त्या च निषेधः। शेषं पूर्ववत्। ते इमे द्वे अपि मालोपमाच्छायया प्रपञ्चोक्तिपूर्वे, पुनः उपमाच्छाययेति मन्तव्यम्॥

**तद्वक्त्रमित्यादि**। तस्यास्तत्प्रसिद्धं मुखं यद्यस्ति तदा शशिकथा मुद्रिता लुप्ता। तन्मुखस्यैव चन्द्रत्वात्। एवमन्यत्रापि। सर्वत्र तच्छब्दः प्रसिद्धौ। चेद्यदि तत्स्मितमीषद्धासस्तदा का सुधा किममृतम्। यदि तन्नेत्रं तदा हारितं नीलनलिनैः। यदि ता गिरो वाण्यस्तदा धिङ्मधु। यदि ते भ्रुवौ च तदा कंदर्पधनुर्धिक्। यद्वा किं बहु ब्रूमहे वदामो यत्सत्यं निश्चितं वेधसो धातुः सृष्टिक्रमः पुनरुक्तवस्तुषु द्विरुक्तपदार्थेषु विमुख एव। तथा च तद्वक्त्रादौ सति तच्चन्द्रादिसर्गो न स्यादिति भावः। 'ऊर्ध्वे दृग्भ्यां भ्रुवौ स्त्रियाम्' इत्यमरः। अत्र कथामुद्रणादिना चन्द्रादेरेव निषेध इति वक्रोक्तिः। शेषं प्रपञ्चोक्तिच्छायत्वादिकं पूर्ववत् ऋजुप्रतिवस्तूक्तिवत्। अनयोः प्रपञ्चोक्तिच्छाया कथमित्यत आह—**मालेति**। यथा मालोपमायां विस्तरेणोपमितिस्तथात्र प्रपञ्चोक्तिरपि विस्तरेणेत्यर्थः॥ **उत्पाद्येति** यथोत्पाद्योपमायामुपमानार्थमुत्पाद्योपमेयेन प्रतीयमानमभिधीयमानं च सादृश्यमुक्तं तथा पूर्वयोरपीति प्रपञ्चोक्तिच्छायत्वमित्यर्थः॥ इति सामान्यालंकारनिरूपणम्॥

## संशयोक्त्यलंकारनिरूपणम्।

संशयलक्षणमाह—

**अर्थयोरतिसादृश्याद्यत्र दोलायते मनः।**
**तमेकानेकविषयं कवयः संशयं विदुः॥ ४१॥**
**तत्रैकविषयोऽनेको यस्मिन्नेकत्र शङ्क्यते।**
**यस्मिन्नेकमनेकत्र सोऽनेकविषयः स्मृतः॥ ४२॥**

---

१. 'द्या हेम सा चेद्द्युतिः' इति पाठः. २. 'स्तच्चेत्स्मितं का सुधा' इति पाठः. ३. 'वस्तुविमुखः सर्ग°' इति पाठः.

**अर्थयोरिति** । अर्थयोर्वाच्ययोरतिसाम्याद्यत्र मनो दोलायते नैकत्र स्थिरं भवति इदं वेदं वेति कृत्वा तं संशयमाहुः । स चैकविषयोऽनेकविषयश्च । यत्रैकस्मिन्धर्मिण्यनेकः शङ्क्यते स एकविषयः । यस्मिन्नानाधर्मिण्येकः शङ्क्यते सोऽनेकविषयः ॥

तयोराद्योऽभिधीयमानसादृश्यो यथा—

'आहारे विरतिः समस्तविषयग्रामे निवृत्तिः परा
　　नासाग्रे नयनं यदेतदपरं यच्चैकतानं मनः ।
मौनं चेदमिदं च शून्यमखिलं यद्विश्वमाभाति ते
　　तद्ब्रूयाः सखि योगिनी किमसि भोः किं वा वियोगिन्यसि ७३'

अत्रैकस्मिन्वस्तुनि वस्तुद्वयस्याभिधीयमानसामान्यप्रत्यक्षं तद्विशेषप्रत्यक्षादुभयविशेषस्मरणाच्च यो विमर्शः सोऽयमेकविषयः संशयः ॥

**आहार इत्यादि** । हे सखि, तद्ब्रूयास्त्वं वद । किं योगिन्यसि योगवत्यसि किं वा वियोगिन्यसि वियोगवत्यसि । उभयसाधर्म्यमाह—आहारे भक्ष्ये विरतिर्विरागः समस्ते विषयग्रामे स्रगादौ परास्यर्थं निवृत्तिः । नासाया अग्रे नयनं नासिकाग्रनिरीक्षणमित्यर्थः । एतद्यदपरं यच्च मन एकतानमचञ्चलं ध्येये पत्यौ च । इदं च मौनमवचनम् । इदमखिलं विश्वं यच्छून्यमाभाति । सर्वत्र तवेति योज्यम् । 'आहारलाघवं मौनं नासाग्रस्य च वीक्षणम् । मनःस्थैर्यं वशित्वं च योगिनां विश्वशून्यता ॥' इति योगशास्त्रम् । 'भक्ष्ये विरागो नयनाग्रवीक्षा मौनं मनोनिश्चलता वशित्वम् । विश्वस्य शून्यत्वविभावनं च वियोगिकृत्यं मुनयो वदन्ति ॥' इति भरतः । अत्रैकस्मिन्वस्तुनि सखीविषये वस्तुद्वयस्य योगवियोगरूपस्याभिधीयमानं यत्साम्यं तस्य प्रत्यक्षाद्दर्शनात् । समानधर्मदर्शनादिति यावत् । विशेषाप्रत्यक्षाद्विशेषादर्शनादुभयविशेषयोगवियोगयोः स्मरणाद्विमर्शः संशयः । इह साधारणधर्मदर्शनं विशेषादर्शनमारोप्य कोटिद्वयस्मरणकारणमिति संशयकारणमुक्तम् ॥

स एव प्रतीयमानसादृश्यो यथा—

'किं पद्ममन्तर्भ्रान्तालि किं ते लोलेक्षणं मुखम् ।
　मम दोलायते चित्तं पश्यतस्त्वां घनस्तनि ॥ ७४ ॥'

अत्र मुखलक्षणे लोचनलक्षणे चैकस्मिन्नेव पद्मलक्षणं भ्रमरलक्षणं चापरमपि वस्तु प्रतीयमानसादृश्यमाशङ्क्यते सोऽयमप्येकविषय एव संशयः ॥

**किमित्यादि**। हे घनस्तनि कठिनकुचे, त्वां पश्यतो मम चित्तं दोलयते संशयारूढं भवति। तदेवाह—अन्तर्मध्ये भ्रान्तः कृतभ्रमणोऽलिर्भ्रमरो यत्र तत्किं पद्मम्। लोलमीक्षणं चक्षुर्यत्र तादृशं तव मुखं किमिति दोलायते दोलेवाचरति। क्यङ् क्यष् वा। दोलाचित्तयोरुभयकोटियोगित्वेन साम्यम्। अत्र सादृश्यं प्रतीयमानं प्रत्यक्षेण। सुगममितरत् ॥

अनेकवस्तुविषयो द्विधा शुद्धो मिश्रश्च। तयोः प्रतीयमानसादृश्यः शुद्धो यथा—

'बाली भंभुरभोली(भम्भलभेली)[1] उल्लसिअणिअंसिणी
गहणं सुणिअ विनिक्कन्ता णिद्दाए भे(भे)म्भली[2]।
राहुवि तीअ मुहु जोहई पुण जोहई
गअणु भुल्लेओ ण हु आणई दोण्हवि चन्दु(न्द)कं वणुं(णे)[3]७५'

[बाला मूर्खचेटशुल्लसितनिवसना
ग्रहणं श्रुत्वा विनिष्क्रान्ता निद्रया जडा।
राहुरपि तस्या मुखं पश्यति पुनः पश्यति
गगने भ्रान्तिमान् न खलु जानाति द्वयोश्चन्द्रः कः ॥]

अत्र द्वयोः प्रतीयमानसादृश्ययोर्बालिकामुखचन्द्रयोरेकश्चन्द्र एव विशङ्क्यत इति सोऽयमनेकविषयः शुद्धः संशयः ॥

**वालीत्यादि**। 'बाली(ला) भुम्भुरभोली(?) स्खलितनिवसना ग्रहणकं श्रुत्वा विनिष्क्रान्ता निद्रया भेम्भली(जडा)। राहुरपि तस्या मुखं विलोकते पुनर्विलोकते गगने भ्रान्तो न खलु जानाति द्वयोश्चन्द्रः कः ॥' इह बालिका भुम्भुरभोली अज्ञा।

---

१–२. 'आणतरिचेडिआ भेली' इति, 'भम्भलसद्दो अप्पिअजडेसु' इति च देशीनाममाला. ३. 'वणे' इति विकल्पार्थे निपातः.

*उल्लसितं स्खलितं नितम्बोपरि निवसनं यस्याः सा।* उपरीति योग्यतया वक्तव्यम् । निद्रया झेम्भली विह्वला ग्रहणं चन्द्रोपरागं श्रुत्वा विनिष्क्रान्ता। अर्थात् गृहात्। राहुरपि तस्या मुखं विलोकते पुनर्विलोकते। गगने भ्रान्तः संशयानः सन् नैव जानाति कान्तामुखचन्द्रयोर्द्वयोर्मध्ये कश्चन्द्र इति । खलु एवार्थे । अत्र संशयशुद्धतान्यामिश्रणेन ॥

अभिधीयमानसादृश्यो मिश्रो यथा—

'द्वावप्येतावभिनवजपापुष्पभासां निवासौ
तिष्ठत्यन्ते द्वयमपि वियन्मण्डलस्योपसंध्यम् ।
अस्तं को यात्युदयति च कः को रविः कः शशाङ्कः
का च प्राची तदिह न वयं का प्रतीचीति विद्मः ॥७६॥'

अत्र द्वयोरभिधीयमानसादृश्ययोः सूर्याचन्द्रमसोः प्राचीप्रतीच्योर्वा तदन्यतममेकमेव वस्तु पर्यायतो विशङ्क्यत इत्यनेकविषयोऽयं मिश्रः संशयः । उपलक्षणं चैतत् । तेन वितर्कोक्त्यादयोऽपि संशयोक्तावेव द्रष्टव्याः ॥

**द्वावित्यादि**। द्वावप्येतौ रविशशाङ्कौ नवीनजपाकुसुमदीप्तीनामाश्रयौ स्तः । उपसंध्यं संध्यासमीपे द्वयमपि रविचन्द्ररूपं वियन्मण्डलस्याकाशमण्डलस्यान्तेऽवसाने तिष्ठति । तदिह कोऽस्तं याति, को वोदयति । कः सूर्यः, कश्चन्द्रः, का प्राची पूर्वा दिक्, का प्रतीची पश्चिमा दिगिति न वयं विद्मः । अत्र रक्तरूपतया गगनान्तगमनेन चाभिधीयमानं सादृश्यम् । अनेकविषयतयैव मिश्रता । तर्हि वितर्कोक्तिः पृथक् कथं नोक्तेत्यत आह—**उपलक्षणमिति**। संशयोक्तावेवान्तर्भावान्न पृथगुक्ता सेत्यर्थः ॥

तद् यथा—

'सरोजपत्रे परि[1]लीनषट्पदे विशाल[2]दृष्टेः स्विदमू विलोचने ।
शिरोरुहाः स्विन्नतपक्ष्मसंततेर्द्विरेफवृन्दं नु निशब्दनिश्चलम् ॥७७॥'
'अगूढहासस्फुटदन्तकेशरं मुखं स्विदेतद्वि[3]कचं नु पङ्कजम् ।
इति प्रलीनां नलिनीवने सखीं विदाम्बभूवुः सुचिरेण योषितः ॥'
(युग्मम्)

१. 'नु विलीन'. २. 'विलोलदृष्टेः'. ३. 'विकसन्नु' इति च पाठान्तराणि.

**सरोजेत्यादि**। निलीनाः संबद्धाः षट्पदा भ्रमरा यस्योक्तं पद्मपत्रे नु। इमे विशालदृष्टेर्नायिकाया अमू नेत्रे। स्वित्। वितर्के। शिरोरुहाः केशाः स्वित्। नता पक्ष्मसंततिर्यस्य तत्। निशब्दं शब्दशून्यं निश्चलं स्थिरं च भ्रमरवृन्दं नु॥ **अगूढेत्यादि**। एतन्मुखं स्वित्। कीदृशम्। अगूढेन प्रकाशेन हासेन स्फुटो व्यक्तो दन्त एव केसरो यत्र तत्। एतद्विकचं प्रफुल्लं पङ्कजं नु। इत्यनेन प्रकारेण नलिनीवने पद्मिनीमध्ये प्रलीनामवस्थितां सखीं योषितः स्त्रियो बहुकालेन विदाम्बभूवुर्ज्ञातवत्यः। विदाम्बभूवुरित्यत्र 'उषविद ३।१।३८' इति लिट्याम्॥

यथा च—

'मुहे मअखलिउल्लावे ण्हाणोल्लए चिउरे
वेणीअंसणसारे समोत्तिअहारे उरे।
कालन्तरे तरलच्छिहुमअण समुल्लसइ
माहउ पुण त्थणगुडरे ण मुणइ कहिं वसइ॥ ७९॥'

[मुखे मदस्खलितोल्लापे स्नानोत्प्लुते चिकुरे
वेणीनिवसनसारे समौक्तिकहारे उरसि।
कालान्तरे तरलाक्ष्णोर्मदनः समुल्लसति
माघे पुनः स्तनगृहे न ज्ञायते कुत्र वसति॥]

कः पुनर्वितर्कसंशययोर्विशेषः। उच्यते। निर्णयासन्नो वितर्कः, वितर्कासन्नश्च संशयः। संशयानो हि वितर्कस्य कोटिमारुह्य ततो विभ्रष्टस्तत्त्वमभिनिविशते। यथा पूर्ववाक्ये विदाम्बभूवुरिति। संशयमेव वा विगाहते यथा—'माहउ पुण त्थणगुडरे ण मुणइ कहिं वसइ।' इति। शब्दाश्च किंस्विदादयस्तुल्यरूपा एव संशयविपर्यययोरिति दुरवबोधस्तद्विशेषः। नन्वेवं वितर्कादयोऽप्युभयालंकाराः स्युः। सत्यम्। किंतूक्तिपक्षे परार्थानुमानवत्, स्वरूपपक्षे स्वार्थानुमानवदिति। अयमेव चोक्तिशब्दस्यार्थः, तेन स्वरूपमात्रोक्तौ संशयवितर्कादयोऽप्यर्थालंकाराः। उक्तिप्राधान्ये तूभयालंकाराः॥

**मुहे इत्यादि** । 'मुखे मदस्खलितोल्लापे स्नानार्द्रे चिकुरे वेणीनिवसनसारे समुक्ताहारे उरसि । कालान्तरे तरलाक्षि मदनः समुल्लसति माघे पुनः स्तनगृहे न ज्ञायते कुत्र वसति ॥' इह कालान्तरे माघातिरिक्तकाले मदस्खलितोल्लापे मुखे स्नानार्द्रे केशे वेणीनिवसनेन कञ्चुकवस्त्रेण सारे मुक्ताहारसहिते वक्षसि तरलनेत्रे च मदनः कामः समुल्लसति दीप्यते । माघे पुनः स्तन एव गृहं तत्र न ज्ञायते कुत्र वसतीति । उभयत्र विरुद्धकोटिद्वयविषयतयैकामाशङ्क्य पृच्छति—**क इति** । निर्णयासन्नो निर्णयाव्यवहितपूर्वः, वितर्कानन्तरं निर्णयात् । वितर्कासन्नो वितर्काव्यवहितपूर्वः । संशयानन्तरं वितर्कात् । एतदेवाह—**संशयेति** । संशयान्तो वितर्ककोट्यवलम्बी वितर्कानन्तरमुक्तमेव जानाति । अत एव विदाम्बभूवुरिति संशय उक्तः । तथा माहह्रु इत्यादावपि शब्दकारितोऽनयोर्भेद इत्याह—**शब्दाश्रेति** । तर्ह्युभयालंकारता वितर्कादीनामित्याशङ्क्य समाधत्ते—**उक्तीति**। यथा परार्थानुमाने शब्दप्रयोगकारितो विशेषस्तथा शब्दपक्षे स्वरूपमर्थस्तत्पक्षे स्वार्थानुमानवत्प्रवृत्तिः । साम्योक्तादावुक्तिशब्दस्यायमेवार्थो यदुक्तिनिबन्धनं नाम । तथा च स्वरूपमात्रस्योक्तौ निर्वचनेऽर्थालंकारता संशयतर्कादेरुक्तिप्राधान्ये पुनरुभयालंकारतेति ॥ इति संशयोक्त्यलंकारनिरूपणम् ॥

## अपह्नुत्यलंकारनिरूपणम् ।

अपह्नुतिलक्षणमाह—

> **अपह्नुतिरपह्नुत्य किंचिदन्यार्थदर्शनम् ।**
> **औपम्यवत्यनौपम्या चेति सा द्विविधोच्यते ॥ ४१ ॥**
> **वाच्ये प्रतीयमाने च सादृश्ये प्रथमा तयोः ।**
> **तथाभूते द्वितीया स्यादपह्नोतव्यवस्तुनि ॥ ४२ ॥**
> **अनौपम्यवती भूयः पूर्वापूर्वा च कथ्यते ।**
> **तासामुदाहृतिष्वेव रूपमाविर्भविष्यति ॥ ४३ ॥**

**अपह्नुतिरिति** । किंचित्प्रसिद्धं धर्मिणं धर्मं वापह्नुत्यापलप्यान्यस्यार्थस्य प्रसिद्धस्य धर्मादेर्दर्शनं प्रकटनमपह्नुतिः । न चास्या आक्षेपादभेद इति वाच्यम् । तत्र हि प्रतिषेधमात्रमर्थोऽत्र तु प्रतिषेधपूर्वकमन्यार्थकथनमिति भेदः । औपम्यमुपमा सद्वतीति वाच्येऽभिधीयमाने । अपह्नोतव्यवस्तुन्यपह्नुतिविषयपदार्थे ॥

तत्राभिधीयमानौपम्यवती यथा—

'गिम्हे दवग्गिमसिमइलिआइं दीसन्ति विज्झसिहराइं ।
आससु पउत्थवइए ण होन्ति णवपाउसब्भाइं ॥ ८० ॥'

[ग्रीष्मे दावाग्निमसीमलिनानि दृश्यन्ते विन्ध्यशिखराणि ।
आश्वसिहि प्रोषितपतिके न भवन्ति नवप्रावृडभ्राणि ॥]

अत्र नवप्रावृडभ्राणां विन्ध्यशिखरैरभिधीयमानसादृश्यैरपह्नुतत्वादभिधीयमानौपम्यवत्यपह्नुतिः ॥

**गिम्हे इत्यादि** । 'ग्रीष्मे दावाग्निमसीमलिनितानि दृश्यन्ते विन्ध्यशिखराणि । आश्वसिहि प्रोषितपतिके न भवन्ति नवप्रावृडभ्राणि ॥' इह विरहिणी दावाग्निना दिग्धे विन्ध्ये मेघभ्रान्त्या आर्ता सख्या समाश्वास्यते—**ग्रीष्म इति** । हे विरहिणि, विन्ध्यशिखराणि ग्रीष्मे वनाग्निना श्यामितानि दृश्यन्ते । ननु नूतनवर्षाकालीन(लिक)मेघा अमी भवन्तीति समाश्वासं कुरु । अत्र श्यामिकया विन्ध्यशिखरनवमेघयोः साम्यमभिहितमत औपम्यवतीयम् ॥

प्रतीयमानौपम्यवती यथा—

'न केतकीनां विलसन्ति सूचयः प्रवासिनो हन्त हसत्ययं विधिः ।
तडिल्लतेयं न चकास्ति चञ्चला पुरः स्मरज्योतिरिदं विजृम्भते ८१'

अत्र केतकीसूचीनां विधिविहसितैः प्रतीयमानसादृश्यैस्तडिल्लतायाश्च स्मरज्योतिषापह्नुतत्वादियं प्रतीयमानौपम्यवत्यपह्नुतिः ॥

**नेत्यादि** । केतकीनां सूचयोऽग्राणि न विलसन्ति शोभन्ते । हन्त विषादे । अयं विधिः स्रष्टा प्रवासिनः पान्थान् हसत्युपहसति । केतकीसूचीरूपेण । इयं चञ्चला चपला तडिल्लता न शोभते । पुरोऽग्रे इयं स्मरदीप्तिर्विजृम्भते प्रकाशते । 'सूच्यग्रे सीमनद्रव्ये' इति विश्वः । अत्र किंचित्प्रकाशेन केतकीसूचीविधिहसितयोः साम्यप्रतीतिरेवमितरत्र । औपम्यमप्युभयत्र व्यक्तमेव ॥

अनौपम्याभिधीयमानापह्नोतव्यवस्तुः पूर्वा यथा—

'राजकन्यानुरक्तं मां रोमोद्भेदेन रक्षकाः ।
अवगच्छेयुरां ज्ञातमहो शीतानीलं वनम् ॥ ८२ ॥'

अत्र राजकन्यानुरागलक्षणस्य रोमाञ्चकारणस्य रक्षकावगतिहेतोः

पूर्वमेवाभिहितस्य च वनानिलशैत्यलक्षणेन कारणान्तरेणापह्नवः । न चैतयोः सादृश्यमस्ति सेयमनौपम्याभिधीयमानापह्नोतव्यवस्तुः । कार्यात्पूर्वं कारणोपन्यासेन पूर्वेत्युच्यते ।

**राजेत्यादि** । रोमोद्भेदेन रोमाञ्चेन राजकन्यानुरक्तं भूपकन्यानुरागिणं मां रक्षकास्तदन्वेषका अवगच्छेयुर्ज्ञायेरन् । आं स्मरणे, ज्ञातम् । अहो वनं शीतलानिलम् । अतो रोमाञ्चः । 'आं ज्ञाननिश्चयस्मृत्योः' इति मेदिनीकारः । अत्र पूर्वाभिधानेन पूर्वत्वमुभयोरसादृश्यादनौपम्यता ॥

सैवापूर्वा यथा—

'आनन्दाश्रु प्रवृत्तं मे कथं दृष्ट्वैव कन्यकाम् ।
अक्षि मे पुष्परजसा वातोद्धूतेन पूरितम् ॥ ८३ ॥'

अत्रानन्दाश्रुप्रवृत्तमिति पूर्वं कार्यस्य, पश्चात् दृष्ट्वैव कन्यकामिति कारणस्योपन्यासः । शेषं पूर्ववत् । सेयमभिधीयमानापह्नोतव्यवस्तुरनौपम्यापह्नुतिरपूर्वेत्युच्यते ।

**आनन्देत्यादि** । कन्यकामेव दृष्ट्वा कथं ममानन्दाश्रु प्रवृत्तमस्ति । वातोद्धूतेन रजसा वायुचालितधूल्या ममाक्षि पूरितम् । शेषमपह्नवादिकं पूर्ववत्पूर्वापह्नुतिवत् । अभिधानमनौपम्यमपि पूर्ववदेव पूर्वं कारणानुपन्यासेनापूर्वत्वम् ॥

अनौपम्यैव प्रतीयमानापह्नोतव्यवस्तुः पूर्वा यथा—

'उरपेल्लिअवइकारिलआइं उच्चेसि दइअवच्छलिए ।
कण्टअविलिहिअपीणुण्णअत्थणि उत्तम्मसु एत्ताहे ॥ ८४ ॥'

[उरःप्रेरितवृतिकारवेल्लीफलान्युच्चिनोषि दयितवत्सले ।
कण्टकविलिखितपीनोन्नतस्तनि उत्ताम्येदानीम् ॥]

अत्र नैतस्याः स्तनयोरुपपतिना नखक्षतं कृतमपि तु कण्टकैरिति प्रतीयमानापह्नोतव्यं वस्तु प्रकाशते । पूर्ववदेव च पूर्वार्धे कारणस्योपन्यासः, पश्चिमार्धे तु कार्योपदेशो दृश्यते । सेयमनौपम्या प्रतीयमानापह्नोतव्यवस्तुः पूर्वा नाम—'अपह्नुतिरपह्नुत्य किंचिदन्यार्थदर्शनम्' इति लक्षणयोगाज्ज्ञायते ।

**उर इत्यादि**। 'उरःप्रेरितवृतिकारवेल्लीफलान्युच्चिनोषि दयितवत्सले। कण्टकविलिखितपीनोन्नतस्तनि ताम्य इदानीम् ॥' इह हे दयितवत्सले प्रियप्रेमवति कण्टकलिखितपीनोन्नतस्तनि, इदानीं ताम्योद्विग्ना भव। किं कृत्वा? उरसा वक्षसा प्रेरिता या वृतिर्वेष्टनं तत्र कारवेल्लीफलानि उच्चिनोषि त्रोटयसि। कारवेल्ली करवेल्ली। अत्र पूर्वार्धे कारणकथनात्पूर्वता। उक्तयोरनौपम्यं व्यक्तमेव। ननु नात्र साहजिकोऽपह्नवस्तत्कथमपह्नुतिरित आह—**अपह्नुत्येति**। आरोपेणापह्नवलक्षणयोगादपह्नुतिरित्यर्थः॥

सैवापूर्वा यथा—

'कस्स व ण होइ रोसो दट्ठूण पिआइ सव्वणं अहरम्।
सभमरपउमग्घाइणि वारिअवामे सहसु एण्हिम्॥ ८५॥'
[कस्य वा न भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम्।
सभ्रमरपद्माघ्रायिणि वारितवाम्ये सहस्वेदानीम्॥]

अत्रापि नास्या उपपतिनाधरो व्रणितः किं तर्हि भ्रमरेणेति प्रतीयमानापह्नोतव्यं वस्तु। पूर्वार्धे तु सव्रणमधरमिति कार्यमुपन्यस्य, पश्चिमार्धे सभ्रमरकमलाघ्रायिणीति कारणमुपन्यस्तम्। सेयमनौपम्या प्रतीयमानापह्नोतव्यवस्तुरपूर्वा च यथोक्तलक्षणयोगाज्जायते।

**कस्स व इत्यादि**। 'कस्य वा न भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम्। सभ्रमरपद्माघ्रायिणि वारितवाम्ये सहस्वेदानीम्॥' इह प्रियाया अधरं गक्षतं दृष्ट्वा कस्य रोषो न भवति। ततो हेतोर्भ्रमरसहितपद्मस्याघ्राणकारिके, हे वारितवाम्ये दाक्षिण्यवति, संप्रति त्वं सहस्व सहिष्णुर्भव। अत्रोत्तरार्धे कारणोपन्यासादपूर्वता। पूर्ववदाशङ्कासमाधाने इत्याह—**यथोक्तेति**। इत्यपह्नुत्यलंकारनिरूपणम्॥

## समाध्युक्त्यलंकारनिरूपणम्॥

समाधिलक्षणमाह—

**समाधिमन्यधर्माणामन्यत्रारोपणं विदुः।**
**निरुद्भेदोऽथ सोद्भेदः स द्विधा परिपठ्यते॥ ४४॥**

१. 'वारिता अधरदर्शनपर्यवसायिसभ्रमरपद्माघ्राणं निधुवनं च मा कृथा इति निवारितापि वामा निवारिताचरणा प्रतिकूला' इत्युदाहरणचन्द्रिका.

**समाधिरिति** । अन्यधर्मस्यान्यत्र विशेषे य आरोपः स समाधिः । निरुद्भेदोऽव्यक्तः, सोद्भेदः स्फुटः ॥

तयोर्निरुद्भेदो यथा—

'दूरपडिबद्धराए अवऊहन्तम्मि दिणअरे अवरदिसम् ।
असहन्तिव्व किलिम्मइ पिअअमपच्चक्खदूसणं दिणलच्छी ८६'

[दूरप्रतिबद्धरागेऽवगूहमाने दिनकरेऽपरदिशम् ।
असहमानेव क्लाम्यति प्रियतमप्रत्यक्षदूषणं दिनलक्ष्मीः ॥]

अत्र दिनकरदिनलक्ष्मीप्रतीचीनां समारोपितनायकनायिकाप्रतिनायिकाधर्माणां दूरप्रतिबद्धराग इत्यादिभिः श्लिष्टपदैरनुद्भेदः । एवमन्यधर्माध्यारोपादयं निरुद्भेदः समाधिभेदः ॥

**दूर इत्यादि** । 'दूरप्रतिबद्धरागेऽवगूहमान एव दिनकरेऽपरदिशम् । असहमानेव क्लाम्यति प्रियतमप्रत्यक्षदूषणं दिनलक्ष्मीः ॥' इहात्यर्थधृतलौहित्येऽत्यर्थकृतानुरागे च दिनकरे सूर्ये वल्लभे चापरदिशं प्रतीचीमपरनायिकां चावगूहमाने संबध्नात्याश्लिष्यति च सति दिनशोभा वल्लभस्फुटदूषणमसहमानेव क्लाम्यति म्लाना भवति । अत्र च नायकत्वाद्यारोपणं रागादिपदैः श्लिष्टैः क्रियत इति निरुद्भेदता ॥

सोद्भेदो यथा—

'वल्लहे लहु वोलन्तइ एत्तइ पुणु बहु बलि
किज्जमि तामरसिणि तुज्झ रोसहु थिरहु ।
जेण णिरग्गलु जम्पइ किम्पि ण जाव जणु(ण)
ताव हिमेण विसिसित्ति झत्थि(त्ति) पुलुट्ठतणु ॥ ८७ ॥'

[वल्लभे लघु व्यपक्रामत्यागच्छति पुनर्बहु बलिः
क्रिये तामरसिनि तव रोषस्य स्थिरस्य ।
येन निरर्गलं जल्पति किमपि न यावज्जन-
स्तावद्धिमेन विशीर्णा झटिति प्लुष्टतनुः ॥]

अत्रापि प्रियतमव्यलीकासहिष्णुः कापि कामिनी हिमानीप्लुष्टा

कमलिनीमालोक्य तस्यामात्मधर्मान्, प्रिये च सूर्यधर्मानारोपयति । ते च बलिः क्रियेऽहं तव रोषस्येत्यादिभिः पदैरुद्भिद्यमाना इह प्रतीयन्त इत्ययं सोद्भेदः समाधिभेदः । अन्यश्चान्यधर्मोश्चान्यधर्मा इति व्युत्पत्त्या धर्मिणोऽप्यध्यासे समाधिरिष्यते ॥

**वल्लहे इत्यादि** । 'वल्लभे लघु व्यपक्रामति पुनरागच्छति चिरेण बलिः क्रिये तामरसिनि तव रोषस्य स्थिरस्य । येन निराकुलं जल्पति किमपि न यावज्जनस्तावद्धिमेन विशीर्णा झटिति प्लुष्टतनुः ॥' इह हे तामरसिनि पद्मिनि, वल्लभे सूर्ये लघु शीघ्रं व्यपक्रामत्यपगच्छति सति हिमसमये रात्रेर्दीर्घत्वाच्चिरेण पुनरागच्छति सति तव रोषस्य स्थिरस्य बलिरुपहारोऽहं क्रिये इति काचित्खण्डिता पद्मिनीमुद्दिश्य वदति । येन हेतुना निराकुलो जनो यावदेव किमपि न जल्पति तावदेव हिमेन विशीर्णा झटिति त्वं दग्धतनुरसि । व्यलीकमप्रियम् । 'हिमानी हिमसंहतिः' इत्यमरः । प्लुष्टां दग्धाम् । ते धर्माः । धर्मारोपरूपे समाधावव्याप्तिरत आह—**अन्य इति** । अन्यो धर्मीह विवक्षितो धर्मपदसंनिधेः ॥

सधर्माणां धर्मिणश्च यथा—

'चन्द्रज्योत्स्नाविशदपुलिने सैकतेऽस्मिन्सरय्वा
वादद्वैतं सुचिरमभवत्सिद्धयूनोः कयोश्चित् ।
एको ब्रूते प्रथमनिहतं केशिनं कंसमन्यः
स त्वं तत्त्वं कथय भवता को हतस्तत्र पूर्वम् ॥ ८८ ॥'

अत्र संबोध्य वर्णनीये विष्णुस्वरूपस्य धर्मिणस्तद्धर्माणां चाध्यासादयं धर्मिधर्माध्यासरूपः समाधिः ॥

**चन्द्रेत्यादि** । कयोश्चित् सिद्धयूनोः सरय्वा नदीभेदस्यास्मिन् सैकते बहुकालं वादद्वैतं वचनविवादोऽभवत् । 'वादद्यूतम्' इति पाठे वादो विवाद एव द्यूतमित्यर्थः । सैकते कीदृशे । चन्द्रज्योत्स्नया विशदं स्वच्छं पुलिनं तोयोत्थितभागो यत्र तत्र । अनेन रम्यतोक्ता । वादस्वरूपमाह—एकः केशिनं प्रथमनिहतं ब्रूते, अन्यः कंसं प्रथमनिहतं ब्रूते । हे भगवन्, स प्रसिद्धस्त्वं तत्त्वं यथार्थं कथय ।

---

१. अर्थप्रदर्शनमेतत् । व्युत्पत्तिस्तु 'अन्यश्च धर्मश्च' इत्येव.

भवता तत्र तयोः केशिकंसयोर्मध्ये कः पूर्वं हत इति । सिद्धौ च तौ युवानौ चेति सिद्धयुवानौ । केशी असुरभेदः । कंसोऽप्यसुरभेदः । अत्र विष्णोस्तद्धर्माणां च चक्रधरत्वादीनामारोपः स्फुट एव ॥

धर्मिण एवाध्यासो यथा—

'प्राप्तश्रीरेष कस्मात्पुनरपि मयि तं मन्थखेदं विदध्या-
न्निद्रामप्यस्य पूर्वामनलसमनसो नैव संभावयामि ।
सेतुं बध्नाति कस्मात्पुनरयमखिलद्वीपनाथानुयात-
स्त्वय्यायाते वितर्कानिति दधत इवाभाति कम्पः पयोधेः ॥८९॥'

अत्र प्राप्तश्रीरेष कस्मादित्यादिभिर्मन्थखेदादिधर्माणां निवर्तितत्वात् प्राप्तश्रीरित्यादीनां च श्लेषेणैवाभिधानात् त्वयीति वर्णनीयपदे विष्णुस्वरूपस्य धर्मिण एवाध्यासात् तद्धर्माणां चानध्यासादयं धर्म्यध्यासरूपः समाधिः ॥

**प्राप्तेत्यादि** । हे रामदेव, समुद्रस्य कम्प आभाति । कीदृशस्य । त्वय्यायाते सति इति वितर्कान् दधत इव । एष प्राप्तलक्ष्मीः कोऽपि कस्मात्पुनरपि मद्विषये मन्थेन मन्थनदण्डेन खेदं विदध्यात्कुर्यात् । अनलसमनस आलस्यहीनस्यास्य निद्रामप्यपूर्वां नैव संभावयामि । अखिलद्वीपनाथो रावणस्तमनुलक्ष्यीकृत्य यातः प्रयातः पुनरयं कस्माद्धेतोः सेतुबन्धं बध्नाति । मथ्यतेऽनेनेति मन्थः । करणे 'हलश्च ३।३।१२१' इति घञ् । अत्र प्राप्तश्रीरित्यादिश्लिष्टपदैर्धर्मिण एव विष्णुरूपस्यारोपो न तु तद्धर्माणामसुरघातकत्वादीनाम् ॥

समाधिमेलितयोरभेदमाह—

**समाधिमेव मन्यन्ते [1]मे(मी)लितं तदपि द्विधा ।**
**धर्माणामेव चाध्यासे धर्मिणां वान्यवस्तुनि ॥ ४५ ॥**

समाधिरेव मेलितमुभयत्रापि धर्माध्यासात् ॥

---

१. 'आधारपुस्तकद्वये टीकापुस्तके च मेलितमिति पाठः समुपलभ्यते । परं काव्यप्रकाशादिषु तथा सरस्वतीकण्ठाभरणात्प्राचीने रुद्रटविरचिते काव्यालंकारेऽपि 'मीलितम्' इत्येव वरीवर्तीति तदनुरोधादत्रापि 'मीलितं,' 'मिलितं' वा युक्तं प्रतिभाति.

अत्रान्यधर्माणामेवान्यवस्तुन्यध्यासान्मेलितं यथा—

'पल्लविअं विअ करपल्लवेहिं पप्फुल्लिअं विअ णअणेहिं ।
फलिअं विअ पीणपओहरेहिं अज्जाए लावण्णम् ॥९०॥'

[पल्लवितमिव करपल्लवाभ्यां प्रफुल्लितमिव नयनाभ्याम् ।
फलितमिव पीनपयोधराभ्यामार्याया लावण्यम् ॥]

अत्र पल्लवितमिव पुष्पितमिव फलितमिवेत्युत्प्रेक्षया लताधर्माणां लावण्यधर्मिणि धर्माध्यारोपो दृश्यते । करपल्लवादीनां चानुपात्तव्यापारहेतुत्वेन साधकतमत्वेन वा प्राधान्यं लक्ष्यते । सोऽयमन्यवस्तुनि पुनरन्यधर्माणामेवारोपेण मेलितं नाम समाधेरेव भेदो भवति । स तूद्देशे समाध्युक्तिरित्युक्तिग्रहणाल्लभ्यते ।

**पल्लविअमित्यादि** । 'पल्लवितमिव करपल्लवाभ्यां प्रफुल्लितमिव नयनाभ्याम् । फलितमिव पीनपयोधराभ्यामार्याया लावण्यम् ॥' इहार्याया गृहपतिपुत्र्या नायिकाया लावण्यं सौकुमार्यं हस्तपल्लवाभ्यां पल्लवितमिव नेत्राभ्यां फुल्लितमिव पीनस्तनाभ्यां फलितमिवास्ति । अध्यारोपे बीजमाह—**उत्प्रेक्षयेति** । तर्हि करपल्लवादीनामध्यारोपाद्बहिर्भाव एव भवेदत आह—**करेति** । अनुपात्तोऽनुक्तो यो व्यापारोऽध्यासविषयस्तद्धेतुत्वेन तदुपस्थितिकारणत्वेन तत्करणत्वेन वा । अत एव कर्त्रपेक्षया प्रधानतया स्वातन्त्र्येणान्वयस्तेषामित्यर्थः । तर्हि समाध्युद्देशेऽनुद्देशः कथमस्त्यत आह—**स त्विति** । समाध्युक्तिरित्यत्र समाधिरिति कर्तव्ये उक्तिग्रहणमधिकार्थसूचकमित्युक्तिपदेनैव मेलितोद्देशः कृत इत्यर्थः ॥

धर्माणां धर्मिणश्च यथा—

'देहो व पडइ दिअहो कण्ठच्छेओ व लोहिओ होइ रई ।
गलइ रुहिरं व संझा घोलइ केसकसणं सिरम्मिअ तिमिरम् ॥९१॥'

[देह इव पतति दिवसः कण्ठच्छेद इव लोहितो भवति रविः ।
गलति रुधिरमिव संध्या घूर्णते केशकृष्णं शिर इव तिमिरम् ॥]

अत्र देहादयो यथोक्तक्रियावन्तो जन्तुवधक्रियायां निबद्धा दिवसादिभिरुपमेया दिवसावसानक्रियायां मेलितास्तदेतत् गुणक्रियावतां

द्रव्याणां प्रधानक्रियाध्यारोपे धर्मिधर्माध्यासे मेलितं नाम समाधेरेव भेदो भवति ।

**देहो व्व इत्यादि** । 'देह इव पतति दिवसः कण्ठच्छेद इव लोहितो भवति रविः । गलति रुधिरमिव संध्या घूर्णते केशकृष्णं शिर इव तिमिरम् ॥' **इह दिनमङ्गमिव** पतति, रक्तः सूर्यः कण्ठच्छेद इव भवति, रक्तमिव संध्या गलति, तिमिरं केशश्यामं शिर इव घूर्णते इतस्ततो याति । अत्र पतनादयः **क्रियाः**, लौहित्यादयो गुणाः, प्रधानक्रियाः पततीत्यादिकाः, तदध्यारोपो दिवसादिषु । इति समाध्युक्त्यलंकारनिरूपणम् ॥

## समासोक्त्यलंकारनिरूपणम् ॥

समासोक्तिं लक्षयति—

**यत्रोपमानादेवैतदुपमेयं प्रतीयते ।**
**अतिप्रसिद्धेस्तामाहुः समासोक्तिं मनीषिणः ॥ ४६ ॥**
**प्रतीयमाने वाच्ये वा सादृश्ये सोपजायते ।**
**श्लाघां गर्हामुभे नोभे तदुपाधीन्प्रचक्षते ॥ ४७ ॥**
**विशेष्यमात्रभिन्नापि तुल्याकारविशेषणा ।**
**अस्त्यसावपराप्यस्ति तुल्यातुल्यविशेषणा ॥ ४८ ॥**
**संक्षेपेणोच्यते यस्मात्समासोक्तिरियं ततः ।**
**सैवान्योक्तिरनन्योक्तिरुभयोक्तिश्च कथ्यते ॥ ४९ ॥**

**यत्रेति** । यत्रातिप्रसिद्धतयोपमानादेवैतस्योपमेयस्य ज्ञानं सा समासोक्तिः । समसनं समासः संक्षेपस्तदुक्तिरित्यन्वर्थतापि । प्रतीयमाने ज्ञायमाने वाच्येऽभिधीयमाने च सादृश्ये । श्लाघां प्रशंसाम्, गर्हां निन्दाम् । उभे श्लाघागर्हे च, नोभे अश्लाघागर्हे चैतानुपाधीन्प्रयोजकान् समासोक्तौ वदन्ति । विशेष्यमात्राभ्यां युक्तायुक्ताभ्यां भिन्नापि विशेषणद्वयभेदवती एका तुल्याकारविशेषणा, अपरा तुल्यातुल्यविशेषणा । संक्षेपोक्तौ च प्रकारद्वयं भवति तदाह—**अन्येत्यादि** ॥

तत्र प्रतीयमानसादृश्या श्लाघावती यथा—

'उत्तुङ्गे कृतसंश्रयस्य शिखरिण्युच्चावचग्रावणि
न्यग्रोधस्य किमङ्ग तस्य वचसा श्लाघासु पर्याप्यते ।

बन्धुर्वा स पुराकृतः किमथवा सत्कर्मणां संचयो
मार्गे रूक्षविपत्रशाखिनि जनो यं प्राप्य विश्राम्यति ॥९२॥'

अत्र न्यग्रोधेनैवोपमानेन प्रतीयमानसादृश्यस्य वर्णनीयवदान्योपमेयस्योक्तत्वात्तच्छ्लाघयैव तच्छ्लाघा प्रतीयत इति सेयं प्रतीयमानसादृश्या श्लाघावती समासोक्तिः ॥

**उत्तुङ्ग इत्यादि**। तस्य न्यग्रोधस्य वटवृक्षस्य श्लाघा स्वप्रशंसा स्ववचसोक्त्या किं समाप्यते। किंतु न। तस्य श्लाघा वक्तुमशक्येत्यर्थः। अङ्गेति सानुनयसंबोधने। कीदृशस्य। उत्तुङ्गे उच्छ्रिते। उच्चावचा निम्नोन्नता ये ग्रावाणः पाषाणास्तद्युक्ते च शिखरिणि गिरौ कृतावासस्य। श्लाघाहेतुमाह—स वटो बन्धुर्मित्रं वा पुरा पूर्वं कृतः। अर्थार्जनेन। अथवा सत्कर्मणां श्रेष्ठव्यापाराणां संचय उपचयः किम्। अर्थार्जनस्य। रूक्षा अस्निग्धा विपत्राः पत्रशून्याः शाखिनो वृक्षा यत्र तादृशे मार्गे यं वटवृक्षं प्राप्य जनो विश्राम्यति। उच्चावचेत्यत्र बहुव्रीह्यनन्तरं मतुबिति भ्रमो न कार्यः। उच्चावचग्रावाणोऽत्र सन्तीति विशिष्टस्यैव मत्वर्थसंबन्धाद्बिसकिसलयच्छेदपाथेयवन्त इतिवत्केवलाद्विशिष्टस्य भिन्नबुद्धिविषयत्वात्। अत एवादण्डीत्यादयो निस्तरङ्गं प्रयोगा इत्यवधेयम्। 'ग्रावोपलाश्मानः' इत्यमरः। अत्र परोपकारितया न्यग्रोधवदान्ययोः सादृश्यं प्रतीयमानं तत एवोभयोः श्लाघापि ॥

सैव गर्हावती यथा—

'किं जातोऽसि चतुष्पथे यदि घनच्छायोऽसि किं छायया
संपन्नः फलितोऽसि किं यदि फलैः पूर्णोऽसि[1] किं संनतः।
हे सद्वृक्ष सहस्व संप्रति शिखाशाखाशताकर्षण-
क्षोभोन्मोटनभञ्जनानि जनतः स्वैरेव दुश्चेष्टितैः ॥ ९३ ॥'

अत्रोपमानभूतस्य सद्वृक्षस्य व्याजगर्हणया तदुपमेयः कोऽपि सत्पुरुषो विगर्ह्यत इति सेयं प्रतीयमानसादृश्या गर्हावती नाम समासोक्तिः।

**किमित्यादि**। हे सद्वृक्ष, चतुष्पथे किमर्थं जातोऽस्युत्पन्नोऽसि। यदि त्वं

१. 'आढ्योऽसि' इति टीकाकारसंमतः पाठः.

घना निबिडा छाया यस्य तादृशोऽसि तदा छायया किं वृथा । यदि संपन्नः समृद्धः सन् फलितोऽसि तदा फलभरैस्तव किम् । किंतु न तव किमपि । यद्याढ्योऽसि महानसि तदा सम्यक्प्रकारेण नतः किम् । संप्रत्यधुना स्वैर्निजैरेव दुश्चेष्टितैर्जनतो लोकात्त्वं शिखायामग्रभागे शाखाशतस्याकर्षणमाकृष्टिः, क्षोभश्चालनम्, आमोटनं संकोचनम्, भञ्जनं छेदनमेतानि सहस्वानुभव । 'आढ्य इभ्ये महत्यपि' इति विश्वः । सहस्वेति 'षह मर्षणे' इति लोटि मध्यमपुरुषैकवचने रूपम् । 'अग्रमात्रे शिखा मता' इति धरणिः । जनत इति पञ्चम्यन्तात्तसिः । व्याजगर्हणा कपटनिन्दा वटवृक्षनिन्दां व्याजीकृत्य सत्पुरुषनिन्दोपक्रमात् ॥

सैवोभयवती यथा—

'निष्कन्दामरविन्दिनीं स्थपुटितोद्देशां स्थलीं पल्वले
जम्बालाविलमम्बु कर्तुमपरा सूते वराही सुतान् ।
दंष्ट्रायां चतुरर्णवोर्मिपटलैराप्लावितायामियं
यस्या एव शिशोः स्थिता विपदि भूः सा पुत्रिणी पोत्रिणी ९४'

अत्र पूर्वार्धे गर्हा, उत्तरार्धे श्लाघा गम्यते, सेयं प्रतीयमानसादृश्योभयवती समासोक्तिः ।

**निष्कन्दामित्यादि** । इतरान्या वराही सूकरी सुतान् सूकरान् सूते जनयति । किं कर्तुम् । अरविन्दिनीं निष्कन्दामुन्मूलितमूलां कर्तुं, स्थपुटितो निम्नोन्नतीकृत उद्देशो यस्यास्तादृशीं स्थलीं कर्तुं, पल्वलेऽल्पसरसि अम्बु जलं जम्बालेन कर्दमेनाविलमनच्छं कर्तुम् । सा पोत्रिणी वराही पुत्रिणी प्रशस्तपुत्रवती । यस्याः शिशोरेव बालकस्यैव दंष्ट्रायामियं भूर्विपदि प्रलये स्थिता । दंष्ट्रायां कीदृश्याम् । चतुर्णामर्णवानां समुद्राणामूर्मिपटलैः कल्लोलसमूहैराप्लावितायां पूरितायाम् । व्याप्तायामिति यावत् । 'जम्बालः पङ्कोऽस्त्री' इत्यमरः । वराहीति 'पुंयोगादाख्यायाम् ४।१।४८' इति ङीष् । पुत्रिणीति प्रशंसायामिनिः । 'वराहः सूकरो गृष्टिः कोलः पोत्री' इत्यमरः । अत्रोभयोः सादृश्यं वराहत्वादिना प्रतीयमानम् ॥

अनुभयवती यथा—

'इतः स्वपिति केशवः कुलमितस्तदीयद्विषा-
मितश्च शरणार्थिनः शिखरिपक्षिणः शेरते।
इतोऽपि वडवानलः सह समस्तसंवर्तकै-
रहो विततमूर्जितं भरसहं च सिन्धोर्वपुः॥ ९५॥'

अत्र गर्हा श्लाघा वा विस्मयोक्तावेवास्तमयते। सेयं प्रतीयमानसादृश्यानुभयवती नाम समासोक्तिः।

**इत इत्यादि।** सिन्धोः समुद्रस्य वपुराशयो विततं विस्तीर्णमूर्जितं बलवत् भारवहनक्षमं च। अत्रैवाश्चर्यम्। इतोऽत्रैव हरिर्वसति, अत्रैव केशवरिपूणामसुराणां पुरं नगरमस्ति। अत्रैव शरणं प्राप्ताः शिखरिणां पर्वतेषु मध्ये पक्षिणः सपक्षा मैनाकादयः शेरते स्वपन्ति। नच शिखरिपक्षिण इत्यत्र 'न निर्धारणे २।२।१०' इति षष्ठीसमासनिषेध इति वाच्यम्। तन्निषेधस्यानित्यत्वान्निर्धारणस्याविवक्षणाद्वा निर्धारणद्योतकजात्यादेरभावेन तदुन्नयनात्, यद्वा शिखरिणश्च ते पक्षिणश्चेति विशेषणसमासः। पूर्वनिपाते तु बहुष्वेकत्र नियम इति व्यवस्थितिः। अत्रैव वडवानलोऽस्ति सकलमेघैः सह। 'पुष्करावर्तसंवर्तकालकान्तिजलप्लवाः। इति वारिमुचां वंशश्चतुर्धा परिकीर्तितः॥' इति पुराणम्। अत्र श्लाघागर्हयोरस्तमनादनुभयवतीयम्॥

अभिधीयमानसादृश्या श्लाघावती तुल्याकारविशेषणा यथा—

'नालस्य प्रसरो जलेष्वपि कृतावासस्य कोषे रुचि-
र्दण्डे कर्कशता मुखेतिमृदुता मित्रे महान्प्रश्रयः।
आमूलं गुणसंग्रहव्यसनिता द्वेषश्च दोषाकरे
यस्यैषा स्थितिरम्बुजस्य वसतिर्युक्तैव तत्र श्रियः॥ ९६॥'

अत्राम्बुरुहसत्पुरुषयोः परस्परमुपमानोपमेयभावस्यातिशयप्रसिद्धेरुपमानेनैव श्लेषवत्तुल्यविशेषणपदाभिधीयमानसादृश्यमुपमानमुपमेयमेवाव-

---

१. टीकाकृता तु 'पुरमितस्तदीयद्विषा—' इति पाठो धृतः.

गम्यते । सेयमभिधीयमानसादृश्या श्लाघावती तुल्यविशेषणा नाम समासोक्तिः ॥

**नालस्येत्यादि** । यस्याम्बुजस्य पद्मस्यैवमनेनाकारेण स्थितिरवस्थितिस्तत्राम्बुजे श्रियो लक्ष्म्या वसतिर्वासो युक्त एव । तदाह—नालस्य नालयाः प्रसरो विस्तारः, अथ च न आलस्यस्यालसतायाः प्रसर आधिक्यम् । जलेष्वपि तोयेषु कृतावासस्य, अथ च मूर्खेष्वपि कृतावासस्य । कोषे कुड्मले रुचिः कान्तिः, अथ च कोषे पात्रेऽर्थसार्थे वा रुचिः प्रीतिः । दण्डे प्रकाण्डे कर्कशता काठिन्यम्, अथ च दण्डे शासने कर्कशता कार्कश्यम् । मुखे उपक्रमे मृदुता कोमलता, अथ च मुखे वदने मृदुता मधुरवाणीकता । मित्रे सूर्ये महान् प्रश्रयः प्रीतिः, अथ च मित्रे सुहृदि महाप्रीतिः । आमूलं मूलादारभ्य गुणस्य तन्तोः संग्रहे ग्रहणे व्यसनिता आसङ्गः, अथ चामूलमादिपुरुषादारभ्य गुणानां शीलादीनां संग्रहे वर्तुलीकरणे व्यसनिता प्रयत्नः । दोषाकरे रजनिकरे द्वेषोऽसूया, अथ च दोषाणामाकरे उत्पत्तिस्थाने जने द्वेषोऽप्रीतिः । 'नालो नालमथास्त्रियाम्' इत्यमरः । 'जलं नीरे च मूर्खे च' इति विश्वः । 'कोषोऽस्त्री कुड्मले पात्रे ह्यर्थसंघातदिव्ययोः ।' इति मेदिनीकारः । 'दण्डं प्रकाण्डे शास्तौ च' इति । 'मुखमास्ये च प्रारम्भे' इति । 'मित्रं सुहृदि मित्रोऽर्के' इति । 'शिफायां कारणे मूलम्' इति । 'गुणस्तन्तौ च शीलादौ' इति । 'दोषः स्याद्दूषणे दोषा रात्रौ बाहौ च कीर्तिता ।' इति । 'वसतिः स्यादवस्थाने' इति विश्वः । अत्र पद्मसज्जनयोः प्रसिद्धिसिद्धमुपमानोपमेयत्वमत उभयार्थकविशेषणपदैः श्लेष इव सादृश्यमभिधीयते । प्रशंसापरतया च श्लाघावत्त्वम् ॥

प्रतीयमानाभिधीयमानसादृश्या श्लाघागर्हावती तुल्यातुल्यविशेषणा यथा—

'उपाध्वं तत्पान्थाः पुनरपि सरो मार्गतिलकं
　　यदासाद्य स्वेच्छं विलसथ विलीनक्लमभराः ।
इतस्तु क्षाराब्धेर्जरठकमठक्षिप्तपयसो
　　निवृत्तिः कल्याणी न पुनरवतारः कथमपि ॥ ९७ ॥'

अत्र पूर्वार्धेऽभिधीयमानसादृश्ययोः श्लाघा, पश्चिमार्धे तु प्रतीयमान-

सादृश्ययोर्गर्हावगम्यते; सेयमुभयवती तुल्यातुल्यविशेषणाभिधीयमान-प्रतीयमानसादृश्या समासोक्तिः ॥

**उपाध्वमित्यादि** । हे पान्थाः, तत्सरस्तडागमुपाध्वं सेवध्वम् । कीदृशम् । मार्गस्य तिलकभूतमलंकारीभूतम् । यत्सर आसाद्य गतश्रमभरा यूयं स्वच्छं विलसथ यथेच्छं क्रीडध्वम् । इतोऽस्मात्क्षाराब्धेर्निवृत्तिरेव कल्याणी कुशलदा न पुनः कथमप्यवतारोऽत्र कुशलदः । अत्रावतरणं न कर्तव्यमिति भावः । क्षाराब्धेः कीदृशात् । जरठेन जीर्णेन कमठेन कच्छपेन क्षुण्णं पयो जलं यस्य तस्मात् । उपाध्वमिति उपपूर्व 'आस उपवेशने' लोण्मध्यमपुरुषबहुवचने 'धि च ८।२।२५' इति सकारलोपः । 'कमठकच्छपौ' इत्यमरः । कल्याणीति गौरादित्वान्ङीष् । अत्र पूर्वार्धे सरःसज्जनयोः परोपकारत्वादिगुणैस्तुल्यैरेव सादृश्यमभिहितम् । श्लाघा तु व्यक्तैव । उत्तरार्धे तु क्षाराब्धेस्तादृशस्यानुपकारकतया गर्हा व्यक्तैव ज्ञायते, इहासज्जनगता निन्दापि प्रतीयते; किंतु सा विशेषणद्वारा नेत्यतुल्यविशेषणता ॥

अन्योक्तिर्द्विधा स्वजातौ जात्यन्तरे च । तयोः स्वजातौ यथा—

'लक्ष्मीपयोधरोत्सङ्गकुङ्कुमारुणितो हरेः ।
बलिरेष स येनास्य भिक्षापात्रीकृतः करः ॥ ९८ ॥'

अत्र हरिशब्देन बलिशब्देन वा कश्चित् समानेतिवृत्तः पुंविशेष एवोच्यते; सेयं स्वजातिविषयान्योक्तिः संक्षेपोक्तिरूपत्वात्समासोक्तिरेव ।

**लक्ष्मीत्यादि** । स बलिरेव वदान्यः । येन बलिनास्य हरेर्विष्णोः करो हस्तो भिक्षापात्रीकृतो भिक्षापात्रत्वमापादितः । कीदृशः करः । लक्ष्मीस्तनक्रोडकुङ्कुमेनारुणितो लोहितीकृतः । अत्र स्वजातित्वं तुल्यचरितत्वम् । हरिबल्योरपेक्षयान्यत्वमपि ॥ तर्हि समासोक्तिता कथमत आह—**संक्षेपेति** । संक्षेपेणोपस्थापनादेव समासोक्तित्वमित्यर्थः ॥

जात्यन्तरे यथा—

'पिबन्मधु यथाकामं भ्रमरः फुल्लपङ्कजे ।
अप्यसंनद्धसौरभ्यं पश्य चुम्बति कुड्मलम् ॥ ९९ ॥'

अत्र भ्रमरशब्देन कश्चित् कामी, फुल्लपङ्कजशब्देन कापि प्रौढा-

ङ्गना, कुड्मलशब्देन कापि मुग्धाङ्गनाभिधीयते; सेयमन्यजातिविषयाऽन्योक्तिः समासोक्तिरेव भवति ॥

**पिबन्नित्यादि** । भ्रमरो यथाकामं यथेच्छं प्रफुल्लपङ्कजे मधु पिबन् सन् असंनद्धसौरभ्यमप्राप्तसौगन्ध्यमपि कुड्मलं चुम्बति । तत्पद्य । अत्र वाक्यार्थस्यैव कर्मता । अत्र भिन्नभिन्नजातितयान्यजातिता ॥

अनन्योक्तिशब्देनेहाध्यासविषया तद्भावापत्तिरुच्यते । यथैष ब्रह्मदत्त इति । सा द्विधा शुद्धा चित्रा च ।

तयोः शुद्धा यथा—

'सुधाबद्धग्रासैरुपवनचकोरैरनुसृतां
किरञ्ज्योत्स्नामच्छां नवलवलिपाकप्रणयिनीम् ।
उपप्राकाराग्रं प्रहिणु नयने तर्कय मना-
गनाकाशे कोऽयं गलितहरिणः शीतकिरणः ॥ १०० ॥'

अत्र कस्याश्चिन्मुखे चन्द्रमसमध्यास्य कश्चिदेवं ब्रूते । सा चेयं पूर्वार्धेऽभिधीयमानतुल्यविशेषणा, पश्चिमार्धे पुनरनाकाशे कोऽयं गलितहरिण इत्यत्र तुल्यविशेषणा समासोक्तिरेवानन्योक्तिः । एकस्यैव चाध्यासादियं शुद्धेत्युच्यते ॥

नान्यस्योक्तिरनन्योक्तिः । तथाचानन्योक्तिपदेन तद्भावापत्तिस्तत्ता विषयतैवोच्यते । एषोऽयमित्याकारस्तस्याः । **सुधेत्यादि** । हे सखे, उपप्राकाराग्रं प्राकाराग्रसमीपे नयने नेत्रद्वयं प्रहिणु देहि । मनाक् त्वं तर्कय । अनाकाशे आकाशातिरिक्तदेशे गलितहरिणस्त्यक्तलाञ्छनः कोऽयं शीतकिरणश्चन्द्र इति । कीदृशः । ज्योत्स्नां किरन् विक्षिपन् । कीदृशीम् । सुधा मिथ्या बद्धोऽनुबद्धो ग्रासः कवलो यैरेवंभूतैरुपवनस्थितचकोरैरनुसृतामनुगताम् । स्वच्छाम् । नवा नूतना या लवली लताभेदस्तस्याः पाकस्य प्रणयिनीं प्रश्रयवतीं च । 'लवली च लताभिदा' इति विश्वः । लवलीवाचको लवलिशब्दोऽपि । 'लवलिः श्वेतपार्थपी (?) इति शब्दभेदः । उपप्राकाराग्रमित्यत्र सामीप्येऽव्ययीभावः । अत्र अध्यास्य आरोप्य । पूर्वार्धे तुल्यविशेषणत्वमुक्तम्, उत्तरार्धेऽतुल्यविशेषणत्वम् । तस्यैवाभिधानादनन्योक्तिरेकस्यैवाभिधानाच्छुद्धता च ॥

१. टीकाकृतातु 'मुधा बद्धग्रासैः' इति पाठो धृतः. २. 'पादपी' इति स्यात्.

चित्रा यथा—

'कमलमनम्भसि कमले कुवलये तानि च कनकलतिकायाम् ।
सा च सुकुमारसुभगेत्युत्पातपरम्परा केयम् ॥ १०१ ॥'

अत्राध्यासः पूर्ववद्वैचित्र्यं च निगदेनैव व्याख्यातम् । सेयमनन्योक्तिः समासोक्तिरेवानेकाध्यासवैचित्र्याच्चित्रेत्युच्यते ॥

**कमलमित्यादि** । अनम्भसि जलशून्ये देशे कमलमस्ति । कमले पुनः कुवलये नीलनलिनद्वयम्, तानि च कमलकुवलयानि कनकलतिकायां सुवर्णलतायाम्, सा च कनकलतिका सुकुमारा कोमला सती सुभगा रम्येत्यनेन प्रकारेण केयमुत्पातपरम्परारिष्टपङ्क्तिः । 'उत्पातोऽरिष्टमित्यपि' इत्यमरः । **पूर्ववदिति** । कस्याश्चिन्मुखादौ कमलाद्यारोपः, विचित्रता च कमलादौ कुवलयाद्यभिधानेनैवोक्ता तस्या एवाभिधानादनन्यतयोक्तिः ॥

उभयोक्तिर्यथा—

'लावण्यसिन्धुरपरैव हि केयमत्र
यत्रोत्पलानि शशिना सह संप्लवन्ते ।
उन्मज्जति द्विरदकुम्भतटी च यत्र
यत्रापरे कदलिकाण्डमृणालदण्डाः ॥ १०२ ॥'

अत्रापूर्वेयं लावण्यसिन्धुरित्यन्योक्तिः, यत्रोत्पलानि शशिना सह संप्लवन्त इत्यादिरनन्योक्तिः, सेयमुभययोगादुभयोक्तिरपदिश्यते । उपलक्षणं चैतत् । तेनान्यापि योपमानोपमेयविषये संक्षेपोक्तिः सापि समासोक्तिरेव भवति ।

**लावण्येत्यादि** । अत्र देशेऽपरैवापूर्वैव केयं लावण्यसिन्धुः सौकुमार्यनदी । यत्र चन्द्रेण सह पद्मानि संप्लवन्ते संमिलितानि भवन्ति । यत्र कुम्भिकुम्भतटी उन्मज्जति उत्थिता भवति । यत्रापरेऽन्ये कदलीप्रकाण्डबिसदण्डाः सन्ति । 'सिन्धुरब्धौ पुमान्नद्यां स्त्रियाम्' इति मेदिनीकारः । 'तीरदेशे तटी मता' इति च । अत्र सिंधूक्त्यान्योक्तिता, यत्रेत्यादिना सिन्धुरेवोक्तेत्यनन्योक्तिता । अन्यानन्यातिरिक्तसमासोक्तिं संगृह्णाति—**उपलक्षणमिति** ॥

यथा—

'इन्दुर्लिप्त इवाञ्जनेन जडिता दृष्टिर्मृगीणामिव
प्रम्लानारुणिमेव विद्रुमदलं श्यामेव हेमप्रभा ।
पारुष्यं कलया च कोकिलवधूकण्ठेष्विव प्रस्तुतं
सीतायाः पुरतश्च हन्त शिखिनां बर्हाः सगर्हा इव १०३'

अत्र संक्षेपतः सीताशब्दवाच्यस्य मुखादेरवयवसमूहस्याश्रयत इन्दुरञ्जनेनैव लिप्तः, जडितेव मृगीणां दृष्टिः, प्रम्लानमिवारुण्यं विद्रुमस्य, श्यामेव हेमकान्तिः, परुषा इव कोकिलालापाः, सगर्हा इव शिखिनां बर्हा इत्युत्प्रेक्षोक्तेरनुक्तान्यपि तदुपमेयानि मुखादीनि प्रतीयन्ते, सेयमपि संक्षेपोक्तिः समासोक्तिरेव भवति । कः पुनः समासोक्तेः समाध्युक्तेर्वा विशेषः । उच्यते । यत्र प्राकरणिकेऽप्राकरणिको धर्मोऽध्यास्यते सा समाध्युक्तिः यथा—'असहन्तिव्व किलिम्मइ पिअअमपच्छक्खदूसणं दिणलच्छी ।' इति । यत्र पुनरप्राकरणिके प्राकरणिकधर्मः सा समासोक्तिः । यथा—'पिबन्मधु यथाकामं भ्रमरः फुल्लपङ्कजे ।' इति । ननु धर्मिणोऽध्यासे समानमिति चेत् । न । 'स त्वं तत्त्वं कथय भवता को हतस्तत्र पूर्वम्—' इत्यादिषु 'अनाकाशे कोऽयं गलितहरिणः शीतकिरणः' इत्यादिषु च प्रव्यक्त एवाध्यासविशेषो दृश्यते । एकत्र मनसान्यत्र तु वचसेति सोऽयं समाध्युक्तेः समासोक्तेश्च भेदो भवति ।

**इन्दुरित्यादि** । सीतायाः पुरतोऽग्रेऽञ्जनेन कज्जलेन लिप्त इव चन्द्रः । हरिणीनां दृष्टिर्जडितेव जडीभूतेव । प्रवालदलं विम्लानलौहित्यमिव । कलकोकिलवधूकण्ठेषु पारुष्यमतिक्रमवचनमिव प्रस्तुतमुपक्रान्तम् । हन्त हर्षे विषादे वा । शिखिनां मयूराणां बर्हाश्च सगर्हा इव जाताः । 'पारुष्यमतिवादः स्यात्' इत्यमरः । अत्र सीतापदेन मुखाद्यवयवसमूह उक्तस्तदग्रे उपमानानां तत्तदृशा उत्प्रेक्षाभिधानादनुक्ता-

न्यपि तदुपमेयानि मुखादीनि ज्ञायन्त इत्युपमानोपमेयविषये संक्षेपोक्तिरियम् । समाध्युक्तिसमासोक्त्योरभेदं मन्वानो भेदकं पृच्छति—**क इति** । उत्तरम्—**यत्रेति** । यत्र प्रकरणपरिप्राप्ते विशेष्येऽप्रकरणपरिप्राप्तधर्माध्यासः सा समाध्युक्तिः । [ यथा— ] असहमानेव क्लाम्यतीत्यादि । अत्र प्रियतमप्रत्यक्षदूषणाध्यारोपोऽप्राकरणिकः । यत्राप्रस्तुते प्रस्तुतधर्माध्यासः सा समासोक्तिः । यथा—पिबन्मधु यथाकाममिति । अत्र भ्रमरेऽप्रकृते प्रकृतस्य कामिनोऽध्यासः तर्हि धर्म्यध्यासतुल्यतैवास्येत्याह—**नन्विति** । प्राकरणिकाप्राकरणिकत्वाभ्यामेव विशेषस्तयोरिति धर्म्यध्यासेऽपि न दोष इत्याह—**नेति** । स त्वं तत्त्वमित्यादौ धर्मिधर्मयोरध्यासः, अनाकाश इत्यादौ धर्मिण एवाध्यास इति भेद इत्यर्थः । स त्वं तत्त्वमित्यादौ मनसा, अनाकाश इत्यादौ च वचनेनाध्यासः ॥ इति समासोक्त्यलंकारनिरूपणम् ॥

## उत्प्रेक्षालंकारनिरूपणम् ।

**अन्यथावस्थितं वस्तु यस्यामुत्प्रेक्ष्यतेऽन्यथा ।**
**द्रव्यं गुणः क्रिया चापि तामुत्प्रेक्षां प्रचक्षते ॥ ५० ॥**

उत्प्रेक्षालक्षणमाह—**अन्यथेति** । प्रकारान्तरेणावस्थितं वस्तु यत्र प्रकारान्तरेणोत्प्रेक्ष्यते परिकल्प्यते सोत्प्रेक्षा । असदारोपणमुत्प्रेक्षेति लक्षणम् । किंरूपं वस्त्वित्याकाङ्क्षायामाह—**द्रव्यमिति** । द्रव्यं पृथिव्यादि, गुणो रूपादिः, क्रिया पाकादिः ॥

तासु द्रव्योत्प्रेक्षा यथा—

'देहस्था दर्पणे यस्य पश्यति प्रतिमामुमा ।
अन्यार्धार्धमिवोत्पन्नमर्धनारीश्वरान्तरम् ॥ १०४ ॥'

अत्र प्रतिबिम्बरूपेण दर्पणेऽन्यथावस्थितस्यार्धनारीश्वररूपलक्षणस्य द्रव्यस्य यदपरार्धोत्पन्नार्धनारीश्वररूपान्तरेण द्रव्यान्तररूपेणोत्प्रेक्षणं सेयमुत्प्रेक्षा द्रव्योत्प्रेक्षेति भवति ।

**देहस्थेत्यादि** । यस्य दर्पणे प्रतिमां प्रतिबिम्बं देहस्था गौरी पश्यति अन्यार्धाभ्यामुत्पन्नमर्धनारीश्वरान्तरमिव । अत्रेवशब्द उत्प्रेक्षाव्यञ्जकः । अर्धनारीश्वरान्तररूपं द्रव्यमिह कल्प्यत इत्युत्प्रेक्षा द्रव्यगता ॥

गुणोत्प्रेक्षा यथा—

'पल्लविअं विअ करपल्लवेहिं पप्फुलिअं विअ णअणेहिं ।
फलिअं विअ पीणपओहरेहिं अज्जाए लावण्णम् ॥ १०५ ॥'

[पल्लवितमिव करपल्लवाभ्यां प्रफुल्लितमिव नयनाभ्याम् ।
फलितमिव पीनपयोधराभ्यामार्याया लावण्यम् ॥]

अत्र करपल्लवादिरूपेणान्यथावस्थितस्याङ्गलावण्यलक्षणस्य यदेतत् पल्लवितत्वादिरूपेणान्यथोत्प्रेक्षणं सेयमुत्प्रेक्षा गुणोत्प्रेक्षेति भवति ।

**पल्लविअमित्यादि** । विवृतेयं समाध्यलंकारे । अत्र सौन्दर्यस्य गुणस्य पल्लवितत्वादिना कल्पनं गुणोत्प्रेक्षा ॥

क्रियोत्प्रेक्षा यथा—

'सेनागजाः स्वकरपुष्करलेखनीभि-
र्गण्डस्थलान्मदमषीं मुहुराददानाः ।
मन्ये नरेन्द्र तव तोयधितीरताली-
पत्रोदरेषु विजयस्तुतिमालिखन्ति ॥ १०६ ॥'

अत्र सेनागजानां गण्डस्थलेभ्यो लेखन्याकारैः करैर्मषीरूपस्य मदपयसो यदादानम्, यश्चास्य तीरतालीपत्रोदरेषु महावर्णतया निक्षेपः स उक्तरूपेणान्यथोत्प्रेक्ष्यत इति सेयमुत्प्रेक्षा क्रियोत्प्रेक्षा भवति ।

**सेनेत्यादि** । हे नरेन्द्र, सेनागजास्तव विजयस्तुतिमालिखन्तीति मन्ये । कीदृशाः । स्वकराणां हस्तिहस्तानां यानि पुष्कराण्यग्राणि तान्येव लेखन्यः कैंप इति ख्यातास्ताभिर्गण्डस्थलात् मदमेव मषीं वारंवारमाददाना गृह्णन्तः । कुत्र लिखन्तीत्यत आह—समुद्रतीरतालपत्रमध्येषु । मन्येशब्द उत्प्रेक्षाव्यञ्जकः । 'पुष्करं करिहस्ताग्रे' इति विश्वः । न च लिखेः कुटादिपाठात् ङित्त्वे गुणाभावे लिखनीति स्यादिति वाच्यम् । 'रद विलेखने' इति निर्देशेन ङित्त्वविधेरनित्यत्वबोधनात् । अत एव 'लेखनीकृतकर्णस्य कायस्थस्य न विश्वसेत् ।' इत्यादिप्रयोगाः । 'लेखनी

१. मूलसंमतस्तु 'पल्लव' इति पाठः. २. भाषान्तरशब्दोऽयम्.

लिपिसाधिका' इति रत्नकोषः। ('करिणां बन्धनस्तम्भ आलानम्' इत्यमरः। 'शरीरं वर्ष्म विग्रहः' इति च।) अत्र पुष्करादेर्लेखन्यादित्वेनोत्प्रेक्षणं क्रियोत्प्रेक्षा। न चेह द्रव्योत्प्रेक्षैवेति वाच्यम्; लिखनरूपक्रियायामेव सर्वेषां तात्पर्यात्। तस्या एव सर्वैर्निर्वाहात् यत्परः शब्दः स शब्दार्थ इति न्यायात्॥

**उत्प्रेक्षावयवो यश्च या चोत्प्रेक्षोपमा मता।**
**मतं चेति न भिद्यन्ते तान्युत्प्रेक्षास्वरूपतः॥ ५१॥**

उत्प्रेक्षावयववादीनामुत्प्रेक्षातो न भेद इत्याह—**उत्प्रेक्षेति**॥

तत्रोत्प्रेक्षावयवो यथा—

'अङ्गुलीभिरिव केशसंचयं [1]संनिगृह्य तिमिरं मरीचिभिः।
कुड्मलीकृतसरोजलोचनं चुम्बतीव रजनीमुखं शशी॥१०७॥'

अत्राङ्गुलीभिः केशेषु गृहीत्वा प्रियामुखं चुम्ब्यते सा च लोचने निमीलयतीति प्रायोवादः। तत्र मुखचुम्बनादिक्रिया प्रधानमङ्गिभूता प्रतीयते, केशग्रहणाक्षिनिमीलने चाङ्गभूतेऽप्रधाने। तत्राङ्गिभूतायाः क्रियाया उत्प्रेक्षणेनावयवभूता क्रियोत्प्रेक्षिता भवति। यथा हि 'कुड्मलीकृतसरोजलोचनम्' इत्यत्र नोत्प्रेक्षापदम्, एवं 'अङ्गुलीमरीचिभिस्तिमिरकेशसंचयं संनिगृह्य' इत्यत्रापि तन्न प्राप्नोति; मरीच्यङ्गुलिसंनिगृहीततिमिरकेशसंचयमित्येवं वा वक्तव्यं भवति। तत्र योऽयमवयवक्रियायामप्यन्यपदार्थोक्तद्वितीयावयवक्रियाविलक्षण इव प्रयोगेण पृथक्पदतया वाक्यकल्पः स इवास्यापि व्याख्यानपरत्वेनाप्यनुयोज्यमानः कविभिरुत्प्रेक्षावयव इत्युच्यते। अन्ये पुनर्यत्र प्रधानक्रिया नोत्प्रेक्ष्यते, अवयवक्रिया तूत्प्रेक्ष्यते तमुत्प्रेक्षावयवं वर्णयन्ति।

**अङ्गुलीभिरित्यादि**। शशी रजनीमुखं चुम्बतीव। कुड्मलीकृतानि सरोजान्येव लोचनानि यत्र चुम्बने तद्यथा स्यादेवम्। किं कृत्वा। मरीचिभिरङ्गुलीभिस्तिमिरं केशसंचयं संनिगृह्य गृहीत्वेव। प्रायोवादो भारतादौ दर्शनात्। अत्र द्वितीयेनेवपदेन भिन्नपदतया वाक्यकल्पनमितरपदस्यापि तच्छून्यपदस्यापि तदर्थ-

१. 'सन्नियम्य' इति पाठः.

परत्वमित्युत्प्रेक्षावयवत्वम् । अत एवोत्प्रेक्षाभेदत्वम् । अवयवक्रियामात्रस्यावयविक्रियोत्प्रेक्षणादवयवावयविभावः । तत्राङ्गाङ्गिभाव एव । यद्वा अवयवमात्रक्रियोत्प्रेक्षणमेवावयवित्वोत्प्रेक्षेत्याह—**अन्य इति** ॥

यथा—

'लीनेव प्रतिबिम्बितेव लिखितेवोत्कीर्णरूपेव च
प्रत्युप्तेव च वज्रलेपघटितेवान्तर्निखातेव च ।
सा नश्चेतसि कीलितेव विशिखैश्चेतोभुवः पञ्चभि-
श्चिन्तासंततितन्तुजालनिबिडस्यूतेव लग्ना प्रिया ॥१०८॥'

तेषां मते पूर्वोदाहरणमुत्प्रेक्षावयवो न भवति ।

**लीनेवेत्यादि** । विवृतोऽयमनुप्रासे । एतन्मते पूर्वोदाहरणम् 'अङ्गुलीभिरिव-' इत्यादि । उत्प्रेक्षोपमायामन्तर्भवतीत्याह—**तेषामिति** ॥

उत्प्रेक्षोपमा यथा—

'किंशुकव्यपदेशेन तरुमारुह्य सर्वतः ।
दग्धादग्धामरण्यानीं पश्यतीव विभावसुः ॥ १०९ ॥'

अत्र व्यपदेशशब्देन किंशुककुसुमानामग्निसादृश्यमभिधाय दर्शनक्रियोत्प्रेक्ष्यत इति सेयमुत्प्रेक्षोपमा । पूर्वस्मिन्नप्युदाहरणे मरीचिभिरङ्गुलीभिरिव तिमिरं केशसंचयमिव संनिगृह्येत्युपमानार्थानुप्रवेश उत्प्रेक्षायां द्रष्टव्यः । सेयमुत्प्रेक्षावयव उत्प्रेक्षोपमा चोत्प्रेक्षैव भवति ॥

**किंशुकेत्यादि** । विभावसुरग्निररण्यान्या महारण्यस्य दग्धादग्धं दग्धमदग्धं च भागं पश्यतीव । किं कृत्वा । किंशुकव्यपदेशेन किंशुककुसुमव्याजेन सर्वत्र वृक्षमारुह्य । 'महारण्यमरण्यानी' इत्यमरः । 'चित्रभानुर्विभावसुः' इति च । अत्र व्याजपदेन किंशुककुसुमाग्न्योः सादृश्यमभिप्रेतमत उपमागर्भोत्प्रेक्षेयम् ॥

मतं यथा—

'यदेतच्चन्द्रान्तर्जलदलवलीलां वितनुते
तदाचष्टे लोकः शशक इति नो मां प्रति तथा ।

अहं त्विन्दुं मन्ये त्वदरिविरहाक्रान्ततरुणी-
कटाक्षोल्कापातव्रणकिणकलङ्काङ्किततनुम् ॥ ११० ॥'

अत्र कटाक्षोल्कापातव्रणकिणकलङ्काङ्किततनुमिन्दुमहं मन्ये इत्यनेन स्वमतद्वारकमुत्प्रेक्षायाः समर्थनं कृतमित्ययं मताभिधानमुत्प्रेक्षाया एव प्रकारः ॥

**यदेतदित्यादि**। यदेतच्चन्द्रस्यान्तर्मध्ये मेचकणविलासं कुरुते लोकस्तच्छशक इत्याचष्टे वदति। मां प्रति तथा नैतत्। अहं पुनरिन्दुं मन्ये। कीदृशम्। त्वदीयशत्रुविरहग्रस्ताया युवत्याः कटाक्ष एवोल्कापातस्तस्य व्रणकिण एव कलङ्कस्तेनाङ्किता तनुः शरीरं यस्य तादृशम्। 'लवलेशकणाणवः' इत्यमरः। 'अमानोनाश्च प्रतिषेधवचनाः' इति च। अत्र निजमतोपन्यासादुत्प्रेक्षासमर्थनमिति मतोत्प्रेक्षेयम् ॥ इत्युत्प्रेक्षालंकारनिरूपणम् ॥

## अप्रस्तुतप्रशंसालंकारनिरूपणम्।

अप्रस्तुतस्तुतिलक्षणमाह—

**अप्रस्तुतप्रशंसा स्यादस्तोतव्यस्य या स्तुतिः।**
**कुतोऽपि हेतोर्वाच्या च प्रत्येतव्या च सोच्यते ॥५२॥**
**सा तु धर्मार्थकामानां प्रायोऽन्यतमबाधया।**
**स्वाभिप्रायप्रसिद्ध्या च जायमानेह दृश्यते ॥ ५३ ॥**

**अप्रस्तुतेति**। अस्तोतव्यस्य निन्दितस्य कुतोऽपि कारणात्स्तुतिः प्रशंसा अप्रस्तुतस्तुतिः अत एव समासोक्तेर्भेदः। तत्र ह्युपमानोपमेयता, अत्र तु निन्दितमर्थान्तरम्, अन्यस्य स्तुतिरिति। सा त्वभिधीयमाना प्रतीयमाना चेत्याह—**वाच्येति**। तत्र हेतुद्वारकमपि विभागमाह—**सा त्विति**। धर्मश्चार्थश्च कामश्च तेषामन्यतमस्य प्रायो बाहुल्येन बाधया सर्वत्र स्वाभिप्रायस्य प्रकृष्टसिद्ध्या सोत्पद्यमाना प्रतीयत इत्यर्थः ॥

तासु धर्मबाधया वाच्या तथा—

'मेदश्छेदकृशोदरं लघु भवत्युत्साहयोग्यं वपुः
सत्त्वानामपि लक्ष्यते विकृतिमच्चित्तं भयक्रोधयोः।

---

१. 'स्युत्थानयोग्यं' इति पाठः.

उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले
मिथ्यैव व्यसनं वदन्ति मृगयामीदृग्विनोदः कुतः १११'

अत्र यथोक्तैर्हेतुभिः स्वाभिप्रायसाधनेन यदिदमीदृग्विनोदः कुत इति साक्षान्मृगयाभिनन्दनं सेयं वाच्या नामाप्रस्तुतस्तुतिः 'अहिंसा परमो धर्मः' इति धर्मं बाधते ॥

**भेद इत्यादि** । सन्तो मृगयामाखेटकं व्यसनमकर्तव्यं वदन्ति यत्तन्मिथ्या । ईदृग्विनोद उत्साहः कुतः कुत्र । किंतु न कुत्रापि । हि यतो वपुर्लघु भवति निन्दितमिव भवति । कीदृशम् । मेदसो बलस्य छेदेन संचलनेन कृशमुदरं यत्र । मेदसां स्थित्या स्थौल्यं भवति । कृशोदरतयैवोत्साहयोग्यम् । अत एव तुन्दिलेष्वनुत्साहः । सत्त्वानां प्राणिनां भयक्रोधयोर्विकारयोगि चित्तमपि लक्ष्यते । भये चित्तमीदृक्, क्रोधे चेदृगिति । स च धन्विनां धनुर्धराणामुत्कर्षो यदिषवश्चले लक्ष्ये सिध्यन्ति च भेदका भवन्ति । 'मेदस्तु वपा वसा' इत्यमरः । अत्रोक्तहेतुद्वारा निजाभिप्रायस्य सिद्ध्या मृगयाभिनन्दनं धर्मबाधनयाभिधीयमानमत इयमप्रस्तुतस्तुतिः ॥ धर्मबाधनामाह—**अहिंसेति** । मृगया हिंसाजनिका । अतो धर्मबाधात्रेत्यर्थः ॥

धर्मबाधयैव प्रत्येतव्या यथा—

'कालक्खरदुस्सिक्खिअ बालअ रे लग्ग मज्झ कण्ठम्मि ।
दोण्ह वि णरअणिवासो समअं जइ होइ ता होउ ॥११२॥'

[कालाक्षरदुःशिक्षित बालक रे लग मम कण्ठे ।
द्वयोरपि नरकनिवासः समकं यदि भवति तद्भवतु ॥]

अत्र कालाक्षरदुःशिक्षिणेत्यनेन लिपिज्ञानादिभिरधीतधर्मशास्त्राभिमतरूपकपोगण्डः कोऽपि कयाप्यविनयवत्या सोपालम्भमेहि रे कण्ठे लगेत्यभियुज्यते । तत्र ते मतमेवं कृते यदि नरकः स्यात्; स यद्यावयोः सहैव, नासौ नरक इति; किं तर्हि स्वर्ग इति । सोऽयं स्वाभिप्रायसाधनान्महासाहसे नियोगस्तस्येह साक्षादस्तुतस्यास्तोतव्यस्य स्तुतिः प्रतीयते । सेयं प्रत्येतव्या नामाप्रस्तुतप्रशंसा 'परस्य दारान्मनसापि नेच्छेत्' इति धर्मं बाधते ॥

**कालाक्खरेत्यादि** । 'कालाक्षरदुःशिक्षित बालक रे लग मम कण्ठे । द्वयो-रपि नरकनिवासः समको यदि भवति तदा भवतु ॥' इह रे कालाक्षरेषु दुःशिक्षित दुरुपदेश बालक षोडशवर्षवयस्क, मम कण्ठे लग । मामालिङ्गयेत्यर्थः । द्वयोराव-योस्तथा सति नरकनिवासः समकस्तुल्यो यदि भवति तदा भवतु । तत्राप्यावयोः समान एवेति नरकोऽपि स्वर्गः । कालाक्षरेति लौकिकी संज्ञा । रे इति नीचसंबो-धनम् । 'बाल आषोडशाद्वर्षात्' इति मनुः । समक इति स्वार्थे कन् । पोगण्डो व्यवहारानभिज्ञः । पोगण्डस्तु ततःपरम् ।' 'परतो व्यवहारज्ञः' इति मनुः । **अधीतेति** । अधीतं धर्मशास्त्रं मन्वादिस्मृतिर्येन सः । अभिमतमाकाङ्क्षितं रूपं सौन्दर्यं यस्य सः । तादृशश्चासौ पोगण्डश्चेति कर्मधारयः । रूपक इत्यत्र 'शेषा-द्विभाषा ५।४।१५४' इति कप् । अविनयवती वेश्या । अत्र निजाभिप्रायसिद्ध्या महासाहसे सुरतरूपे नियोगस्य साक्षादनभिधानात्प्रतीयमाने वा प्रस्तुतस्तुतिः । धर्मबाधामाह—**परस्येति** । दारान् पत्नीम् ॥

अर्थबाधया वाच्या यथा—

'पङ्गो वन्द्यस्त्वमसि न गृहं यासि योऽर्थी परेषां
धन्योऽन्ध त्वं धनमदवतां नेक्षसे यन्मुखानि ।
श्लाघ्यो मूक त्वमपि कृपणं स्तौषि नार्थाशया यः
स्तोतव्यस्त्वं बधिर न गिरं यः खलानां शृणोषि ॥११३॥'

अत्र स्तोतव्यानां पङ्ग्वन्धमूकबधिराणां वन्द्यधन्यश्लाघ्यस्तोतव्य-पदैः साक्षादभिनन्दनादियं वाच्या नामाप्रस्तुतप्रशंसाभिमानिनोऽर्थ-सिद्धिं बाधते ॥

**पङ्गो इत्यादि** । हे पङ्गो खञ्ज, त्वं वन्द्योऽसि; यस्त्वमर्थी सन् परेषां गृहं न यासि । हे अन्ध दृष्टिशून्य, त्वं धन्यः, यद्धनगर्ववतां मुखानि त्वं नेक्षसे न पश्यसि । हे मूक, त्वं श्लाघ्योऽसि; यस्त्वं कृपणं जनमर्थाशया न स्तौषि । हे बधिर श्रवणशून्य, त्वं स्तोतव्योऽसि; यस्त्वं खलानां दुर्जनानां गिरं वाणीं न शृणोषि । 'पङ्गुः खञ्ज इति स्मृतः' इति हारावली । 'अवाचि मूकः' इत्यमरः । अत्र पङ्ग्वादीनां वन्द्यादिपदैः साक्षादभिनन्दनादभिधीयमानता । अर्थबाधामाह—**अभीति** । अनेन मानिनामर्थसिद्धिबाध एवोक्तः ॥

अर्थबाधयैव प्रत्येतव्या यथा—

'कामं वनेषु हरिणास्तृणानि खादन्त्ययत्नसुलभानि ।
विदधति धनिषु न दैन्यं ते किल पशवो वयं सुधियः ॥११४॥'

अत्र ते किल पशवो वयं सुधिय इति मृगाणामसाक्षादभिनन्दनं तेनेयमस्तोतव्यानाममीषां वाक्यार्थत्वेन स्तुतिप्रतीतेः प्रत्येतव्या नामाप्रस्तुतप्रशंसा मनस्विनोऽर्थसिद्धिं बाधते ॥

**काममित्यादि** । हरिणा वनेष्वप्रयत्नतः सुलभेन तृणेन काममत्यर्थं जीवन्ति । धनिषु धनिकेषु दैन्यं न विदधति न कुर्वन्ति । तथापि ते हरिणाः पशवो वयं पुनः सुधियः पण्डिताः । किल प्रसिद्धौ निश्चये वा । 'अत्यर्थेऽनुमतौ कामम्' इति विश्वः । अत्र मृगाणां न साक्षादभिनन्दनम्, किंतु तत्प्रतीयत इतीयं प्रत्येतव्या । अत्राप्यर्थबाधा मनस्विन एव ॥

कामबाधया वाच्या यथा—

'ण मुअन्ति दीहसासं ण रुअन्ति णं होन्ति विरहकिसिआओ ।
धण्णाओ ताओ जाणं बहुवल्लह वल्लहो ण तुमम् ॥११५॥'

[न मुञ्चन्ति दीर्घश्वासं न रुदन्ति न भवन्ति विरहकृशाः ।
धन्यास्ता यासां बहुवल्लभ वल्लभो न त्वम् ॥]

अत्र धन्यास्ता यासां त्वं न वल्लभ इति येयमतिरक्तायाः साक्षादस्तोतव्यस्तुतिः सेयं वाच्या नामाप्रस्तुतप्रशंसा तस्या एव कामसिद्धिं बाधते ॥

**णेत्यादि** । 'न मुञ्चन्ति दीर्घश्वासं न रुदन्ति न भवन्ति विरहकृशाः । धन्यास्ता यासां बहुवल्लभ वल्लभो न त्वम् ॥' नायिकां नायकविशेषवर्तीं दृष्ट्वा तत्सखी नायकमुपगम्य तस्या अनुरागं दशां चाह—**न मुञ्चन्तीति** । हे बहुवल्लभ, ता नायिका धन्या दीर्घश्वासं विरहजं न त्यजन्ति, न रुदन्ति, विरहकृशाश्च न

---

१.–२. गाथासप्तशत्यां 'चिरं ण होन्ति किसिआओ' इति पाठभेदः, 'चिरं न भवन्ति कृशाः' इति छायाभेदश्च.

भवन्ति । यासां त्वं वल्लभो नासि । अत्र धन्या इत्यादिना अनुरागिण्याः साक्षात्स्तुतिरभिहिता तस्या एव कामसिद्धिबाधिका ॥

कामबाधयैव प्रत्येतव्या यथा—

'सुहउच्छअं जणं दुल्लहं वि दूराहि अम्ह आणन्त ।
उअआरअ जर जीअं वि णेन्त ण कआवराहोसि ॥११६॥'

[सुखपृच्छकं जनं दुर्लभमपि दूरादस्माकमानयन् ।
उपकारक ज्वर जीवमपि नयन्न कृतापराधोऽसि ॥]

अत्र पूर्वोक्तास्मदभिप्रायसिद्ध्यैवंनाम त्वयास्माकमुपकृतं येन जीवितमपि हरन्नापराध्यसीति ज्वरं प्रति यदतिरक्तया वाक्यं तेनेहास्तोतव्यस्य ज्वरस्य स्तुतिः प्रतीयते; सेयं प्रत्येतव्या नामाप्रस्तुतप्रशंसा तस्या एव शरीरबाधया सर्वानपि कामान् बाधते ॥

**सुहेत्यादि** । "सुखपृच्छकं जनं दुर्लभमपि दूरान्ममानयमान[1] । उपकारक ज्वर जीवमपि गृह्णन्[2] कृतापराधोऽसि ॥" काचिदत्यनुरागिणी नायकमन्यानुरक्तमपि वार्ताकरणायातं दोषगर्भमाह—**सुखेति** । हे ज्वर, सुखपृच्छकं तवाङ्गे सुखमधुनेति प्रश्नकारकं जनं दुर्लभमपि मम कृते दूरदेशादानयमान प्रापक, अत एवोपकारक, जीवमपि गृह्णन् त्वं न कृतापराधोऽसि । सुखं सृष्टु पृच्छति सुखपृच्छकः । 'क्रियासमभिहारे वुन्' इति योगविभागाद्वुन् । अत्र सुखपृच्छकेत्यादिना स्वाभिप्रायसिद्ध्यानुरक्ताया ज्वरं प्रति वाक्यम् । तेनाप्रस्तुतस्तुतिर्जायते न त्वभिधीयत इति । कामबाधामाह—**शरीरेति** ॥ इत्यप्रस्तुतप्रशंसालंकारनिरूपणम् ।

## तुल्ययोगितालंकारनिरूपणम् ।

तुल्ययोगितालक्षणमाह—

**विवक्षितगुणोत्कृष्टैर्यत्समीकृत्य कस्यचित् ।
कीर्तनं स्तुतिनिन्दार्थं सा मता तुल्ययोगिता ॥ ५४ ॥**

**विवक्षितेति** । विवक्षितो वक्तुमिष्टो यो गुणस्तेनोत्कृष्टा अधिका ये तैः सह स्तुत्यर्थं निन्दार्थं वा कस्यचित्स्तुत्यस्य निन्द्यस्य वा तेन गुणेन तस्य यत्समीकृत्य

१ 'दूरान्ममानयमान' इति व्याख्यादृतः पाठः. २. 'गृह्णन्' इति पाठः.

कीर्तनमभिधानं सा तुल्ययोगिता । गुणोऽत्र धर्मः साधुरसाधुर्वा । अत एव स्तुतिर्वा निन्दा वा स्यात् ॥

सा अभिधीयमानतुल्यगुणत्वेन स्तुत्यर्था यथा—

'शेषो हिमगिरिस्त्वं च महान्तो गुरवः स्थिराः ।
इमां लङ्घितमर्यादां चलन्तीं बिभृथ क्षितिम् ॥ ११७ ॥'

अत्राभिधीयमानमहत्त्वादिगुणोत्कृष्टाभ्यां शेषाहितुषारशैलाभ्यां सह स्तुत्यर्थं तुल्ययोगेन क्षितिपतेरभिहितत्वादियं स्तुत्यर्था तुल्ययोगिता ॥

**शेष इत्यादि** । शेषः सर्पभेदो हिमालयस्त्वं च सर्वे यूयमिमां क्षितिं बिभृथ धारयथ । कीदृशाः । महान्तो महत्त्ववन्तः गुरवो गुरुत्वाश्रयाः स्थिराः स्थैर्यवन्तश्च । कीदृशीम् । लङ्घितातिक्रान्ता मर्यादा यया तामत एव चलन्तीमितस्ततो गामिनीं च । अत्र महत्त्वादिकमभिहितम् । भूपस्य च शेषहिमाद्रिभ्यां तुल्यताख्यापनेनोत्कृष्टसाम्यकथनात्स्तुतियोगः ॥

अभिधीयमानतुल्यगुणत्व एव निन्दार्था यथा—

'संगतानि मृगाक्षीणां तडिद्विलसितान्यपि ।
क्षणद्वयं न तिष्ठन्ति घनारब्धान्यपि स्वयम् ॥ ११८ ॥'

अत्र घनारब्धान्यपीत्यादिभिरभिधीयमानतुल्यगुणानां मृगाक्षीसंगतानां तडिद्विलसितानां च निन्दार्थं तुल्ययोगेनाभिधानादियं निन्दार्था तुल्ययोगिता ॥

**संगतानीत्यादि** । मृगाक्षीणां संगतानि संगमाः स्वयं घनं निरन्तरमारब्धान्यपि कृतान्यपि, तथा तडितां विद्युतां विलसितानि च घनैर्मेघैरारब्धान्यपि क्षणद्वयमारम्भक्षणादूर्ध्वमपरमपि क्षणं न तिष्ठन्ति; कुतो दीर्घकालम् । अत्र प्रसिद्धचापलया विद्युता स्त्रीणां संगमस्य चपलता समीकृत्योच्यत इति निन्दातुल्ययोगितेयम् ॥

प्रतीयमानतुल्यगुणत्वे स्तुत्यर्था यथा—

'यमः कुबेरो वरुणः सहस्राक्षो भवानपि ।
बिभ्रत्यनन्यविषयां लोकपाल इति श्रुतिम् ॥ ११९ ॥'

अत्र यमादयः पञ्च भवन्तो लोकपाला इत्यनुक्तमपि तुल्यवस्तुयोगितयैव स्तुत्यर्थमेषां मिथः सादृश्यं प्रतीयते; सेयं प्रतीयमानतुल्यगुणत्वे स्तुत्यर्था तुल्ययोगिता ॥

**यम इत्यादि ।** यमादयो भवन्तोऽनन्यविषयामनन्यगामिनीं लोकपाल इत्यनेनाकारेण श्रुतिं ख्यातिं बिभ्रति धारयन्ति । सहस्राक्ष इन्द्रः । 'श्रुतिः ख्यातौ च वेदे च' इति विश्वः । अत्र चत्वारो यमादयो लोकपालाः, इदानीं भवान् पञ्चमो लोकपालशब्दवाच्य इति यमादिसमानताख्यापनेनोत्कृष्टसाम्यकथनाद्राज्ञः स्तुतिः । सा तु प्रतीयमानतुल्यगुणेनैव ॥

प्रतीयमानतुल्यगुणत्व एव निन्दार्था यथा—

'राजानमपि सेवन्ते विषमप्युपभुञ्जते ।
रमन्ते च परस्त्रीभिर्विषमाः खलु मानवाः ॥ १२० ॥'

अत्र योऽयं सेवादिर्मानवानां राजविषये स्त्रीषु च वैषम्यहेतुतुल्यत्वेन योगो राजादीनां वा कर्मादितुल्यतया तत्क्रियायां समावेशः सोऽमीषां मिथः सादृश्यं प्रत्याययन् राजसेवापरस्त्रीरत्योर्विषोपभोगतुल्यतां गमयतीति सेयं प्रतीयमानतुल्यगुणत्वे निन्दार्था तुल्ययोगिता ॥

**राजानमित्यादि ।** भूपमपि सेवन्ते, विषमप्युपभुञ्जते खादन्ति, अन्यस्त्रीभिः सह रमन्ते विलसन्ति । अतो मनुष्या विषमाः साहसिकाः । खलु हेतौ । अत्र विषमतायां वा तुल्ययोगस्तत्क्रियाविषयतया वा राजसेवापरस्त्रीरत्योर्विषोपभोगतुल्यतां बोधयति स च प्रतीयमान एव ॥

मतान्तरेण तुल्ययोगितामाह—

**अन्ये सुखनिमित्ते च दुःखहेतौ च वस्तुनि ।**
**स्तुतिनिन्दार्थमेवाहुस्तुल्यत्वे तुल्ययोगिताम् ॥ ५५ ॥**

**अन्ये इति ।** सुखहेतुदुःखहेतुवस्तुनोः स्तुतिनिन्दार्थं साम्ये तुल्ययोगितामन्ये प्राहुः ॥

---

१. 'रहो साहसिका नराः' इति पाठः. २. 'कर्मत्वादिरूपस्य' इति क. ख.

सा स्तुत्यर्था यथा—

'आहूतस्याभिषेकाय विसृष्टस्य वनाय च ।
न मया लक्षितस्तस्य स्वल्पोऽप्याकारविभ्रमः ॥ १२१ ॥'

अत्र रामस्य राज्याभिषेकवनगमनयोः पितुरादेशेन तुल्यरूपतया स्तुतिः प्रतीयते ॥

**आहूतस्येत्यादि** । अभिषेकाय राज्याभिषेकायाहूतस्य कृताह्वानस्य, वनाय वनं गन्तुं विसृष्टस्य च तस्य रामस्य स्वल्पोऽप्याकारविभ्रम आकारान्यथात्वं मया न लक्षितः । 'अन्यथात्वेऽपि विभ्रमः' इति धरणिः । अत्र राज्याभिषेकः सुखहेतुः, वनगमनं दुःखहेतुः, तयोः पितृभक्त्या तुल्यत्वेन स्तुतित्वम् ॥

निन्दार्था यथा—

'यश्च निम्बं परशुना यश्चैनं मधुसर्पिषा ।
यश्चैनं गन्धमाल्याभ्यां सर्वस्य कटुरेव सः ॥ १२२ ॥'

अत्र यः परशुना छिनत्ति, योऽमुं मधुसर्पिषा सिञ्चति, यो वा गन्धमाल्याभ्यामर्चति तं प्रति तुल्यमेव निम्बस्य कटुत्वमिति समासोक्त्या तदुपमेयस्य निन्दा प्रतीयते ॥

**यश्चेत्यादि** । यो निम्बवृक्षं परशुना कुठारेण छिनत्ति, यश्चैनं निम्बं मधुसर्पिषा मधुसहितेन घृतेन सिञ्चति, यश्चैनं गन्धमाल्याभ्यामर्चति सर्वस्य कृते स निम्बः कटुरेव तिक्त एव । 'पुष्पपुष्पस्रजोर्माल्यम्' इत्यमरः । अत्र समासोक्त्या समसनेन । साम्यापादनेनेति यावत् । उपमेयनिन्दाज्ञानम् ॥ इति तुल्ययोगितालंकारनिरूपणम् ॥

## लेशालंकारनिरूपणम् ।

लेशलक्षणमाह—

**दोषस्य यो गुणीभावो दोषीभावो गुणस्य यः ।**
**स लेशः स्यात्ततो नान्या व्याजस्तुतिरपीष्यते ॥ ५६ ॥**

**दोषस्येति** । दोषस्य गुणत्वम्, गुणस्य च दोषत्वं यत्तदेव लेशलक्षणम् । तर्हि व्याजस्तुतावप्येवम् । तथा चातिव्याप्तिः । अत उक्तम्—**तत इति** । ततो लेशाद्व्याजस्तुतिरभिन्नैवेति । नातिव्याप्तिरित्यर्थः ॥

तत्र दोषस्य गुणीभावो लेशो यथा—

'युवैष गुणवान्राजा योग्यस्ते पतिरूर्जितः ।
रणोत्सवे मनः सक्तं यस्य कामोत्सवादपि ॥ १२३ ॥'

अत्र येयमुत्तरार्धेन राज्ञो वीर्यप्रकर्षस्य स्तुतिः सा कन्याया निरन्तरान्भोगान् निर्विविक्षोर्दोषत्वेन प्रतिभासिष्यत इत्यभिप्रेत्य योऽयं विदग्धसख्या राजप्रकोपपरिजिहीर्षया दोषोऽपि गुणरूपेणोक्तः; सोऽयं दोषस्य गुणीभावो नाम लेशतोऽल्पतया शनैरनन्यविदित उच्यमानो लेश इत्युच्यते ॥

**युवेत्यादि** । स्वयंवरे कस्मिन्नपि नृपे दर्शितभावां सखीं निवर्तयितुं कापि स्तुतिव्याजात्तं निन्दति । युवत्वगुणित्वनृपत्वबलवत्त्वेभ्य एष तव पतिर्योग्यः । यस्य कामोत्सवादपि विषयोत्सवमनादृत्य रणोत्सवे मनः सक्तमासक्तम् । निर्विविक्षोरुपभोक्तुमिच्छोः कन्यायाः । 'निर्वेश उपभोगः स्यात्' इत्यमरः । अत्र विदग्धया सख्या राजकोपशान्तये भोगेच्छुं प्रति वीर्यप्रकर्षरूपस्तवस्य दोषत्वेऽपि गुणत्वेनाल्पतयोपन्यसनाल्लेशोऽयं दोषस्य गुणीभावलक्षणः । अल्पतयैवात्र लेशता ॥

गुणस्य दोषीभावो यथा—

'चपलो निर्दयश्चासौ जनः किं तेन मे सखि ।
आगःप्रमार्जनायैव चाटवो येन शिक्षिताः ॥ १२४ ॥'

अत्र पूर्वार्धेन मानपरिग्रहानुगुणं सखीनामग्रतः प्रकाशं प्रतिज्ञाय तदनिर्वाहमाशङ्कमाना तदुपहासं परिजिहीर्षुर्दोषाभासं तद्गुणग्राममाह—आगःप्रमार्जनायैव चाटवो येन शिक्षिता इति; सोऽयं गुणस्य दोषीभावो नाम लेशभेदो भवति । अन्ये पुनः समस्तमेव लेशलक्षणमाचक्षते—यत्र दोषस्य गुणीभावो गुणस्य च दोषीभाव इति । सोऽपि द्विधा—समासोक्त्या, असमासोक्त्या च ॥

**चपल इति** । हे सखि, चपलो निर्भयश्चासौ जनो भवतु तेन मम किम् । किंतु न किमपि । येन जनेनागःप्रमार्जनायापराधप्रोञ्छनाय परं चाटवः प्रियवादाः

शिक्षिताः । 'आगोऽपराधो मन्तुश्च' इत्यमरः । अत्र दोषवदाभासते प्रतिभातीति दोषाभासो न त्वयं परमार्थतो दोषः । चाटुकारिता हि गुणो येन कृतापराधोऽपि मामनुकूलयन्मानभङ्गं करोति । अत एव च तत्रानुरागः । तथा च चपल इत्यादिना सखीजनोद्दिष्टं मानं रागात्कर्तुमशक्ततया बालया चाटुकारिता दोषाभासो गुणः कोऽपि दर्शित इति गुणस्य दोषतात्र । गुणदोषयोर्मिलितयोरेव तत्त्वं लेश इति मतमाह—**अन्ये इति** । समासोक्तिर्गोपनेन भणनम्, असमासोक्तिः स्फुटभणनम् ॥

तयोः समासोक्त्या यथा—

'गुणानामेव दौरात्म्याद्धुरि धुर्यो नियुज्यते ।
असंजातकिणस्कन्धः सुखं स्वपिति गौर्गलिः ॥ १२५ ॥'

अयमपि प्रकोपभयाल्लेशेनैवोच्यत इति लेशः ॥

**गुणानामित्यादि** । गुणानां वहनक्षमत्वादीनां दौरात्म्याद्दोषाद्धुर्यो धुरंधरो गोवृषो धुरि धुरायां नियुज्यते । गलिः पुनर्गौरसंजातोऽनुत्पन्नः किणो मृतशोणितमांसपिण्डो यत्रेदृशः स्कन्धो यस्य स सुखं यथा स्यादेवं स्वपिति । धुरं वहतीति धुर्यः । 'धुरो यड्ढकौ ४।४।७७' इति यत् । 'किणः स्यान्मृतशोणिते' इति रत्नकोषः । 'गलिस्तु वहनाशक्ते' इत्यपि । अत्र रोषभयादेव समासेन गुणदोषयोरभिधानाल्लेशः ॥

असमासोक्त्या यथा—

'सन्तः सच्चरितोदयव्यसनिनः प्रादुर्भवद्यन्त्रणाः
सर्वत्रैव जनापवादचकिता जीवन्ति दुःखं सदा ।
अव्युत्पन्नमतिः कृतेन न सता नैवासता व्याकुलो
युक्तायुक्तविवेकशून्यहृदयो धन्यो जनः प्राकृतः ॥१२६॥'

अत्रापि प्रकोपभयादि पूर्ववत् । अथैष व्यस्तलक्षणत्वेन कस्मान्न लेश इत्युच्यते । दोषगुणीभावस्याप्रस्तुतस्तुत्या गुणदोषीभावस्य तु व्याजस्तुत्यापहारात् ॥

**सन्त इत्यादि** । सन्तः सदा दुःखं यथा स्यादेवं जीवन्ति । कीदृशाः । सच्चरितस्य सद्व्यापारस्योदये व्यसनिन आसक्ताः । प्रादुर्भवन्त्याविर्भवन्ति यन्त्रणा अनापत्तयो येषां ते । सर्वत्र कार्ये जनानामपवादे दूषणोक्तौ चकिताः सतर्काः । अत

एव दुःखमयता । प्राकृतोऽविविक्तो जनो धन्योऽस्ति । कीदृशः । अव्युत्पन्ना अविशेषवती मतिर्यस्य सः । न सता साधुना कृतेन कार्येण नैवासता असाधुना कार्येण व्याकुलः । साध्वसाधुकार्यरहित इत्यर्थः । अत एव इदं कृत्यमिदमकृत्यमिति विचारशून्यहृदयश्च । अत्रापि रोषभयादेव लेशतोऽभिधानम् । दोषगुणीभावो गुणदोषीभावश्च व्यस्तोऽत्र कथं न लेश इति पृच्छति—**अथेति**। उत्तरम् । **दोषेति** । आद्यस्याप्रस्तुतस्तुत्याम्, अन्त्यस्य व्याजस्तुत्यां विषयीकरणात्तयोरेवान्तर्भाव इत्यर्थः ॥

व्याजस्तुतिरपि द्विधा—शुद्धा मिश्रा च । तयोः शुद्धा यथा—

'पुंसः पुराणादाच्छिद्य श्रीस्त्वया परिभुज्यते ।
राजन्निक्ष्वाकुवंश्यस्य किमिदं तव युज्यते ॥ १२७ ॥'

अत्र शुद्धपरदारापहरणलक्षणनिन्दाव्याजेन स्तुतेर्विहितत्वादियं शुद्धानाम व्याजस्तुतिर्गुणदोषीभावलक्षणाल्लेशान्न पृथक् ॥

**पुंस इत्यादि** । पुराणात्पुंसः पुराणपुरुषाद्विष्णोः श्रीः कमला आच्छिद्य गृहीत्वा त्वया परिभुज्यते सेव्यते । हे राजन्, इक्ष्वाकुर्नृपविशेषो वंश्यो यस्य तस्य तवेदं किं युज्यते । किंतु नार्हतीति निन्दाभासः । अथ च पुराणात्पुंसो वृद्धात्पुरुषाच्छ्रीः संपदाच्छिद्य त्वया भुज्यत इति तात्पर्यार्थः । अत्र श्रीपदे व्याजः । स च शुद्ध एव । तेन च शुद्धिरिह ॥ लेशाभेदमाह—**गुणेति** ॥

मिश्रा यथा—

'प्रियोऽसि प्राज्ञोऽसि प्रभुरसि कुलीनोऽस्यसि युवा
युवत्यस्त्वामेवं कति न पतिमुर्वीश वृणते ।
अतश्चैतां कीर्तिं रघुनहुषमान्धातृमहिषीं
पराम्रष्टुं वृद्धामधिगतनयो नार्हति भवान् ॥ १२८ ॥'

अत्र स्तुतिपदमिश्रैव व्याजगर्हया स्तुतिरितीयं मिश्रानाम व्याजस्तुतिर्लेशभेदः ॥

**प्रिय इत्यादि** । हे राजन्, प्रियः प्रीतोऽसि । प्राज्ञ उत्कृष्टमतिरसि । ईश्वरोऽसि । शुद्धवंशोऽसि । तरुणोऽसि । एवं सति कियत्यस्तरुण्यस्त्वां पतिं न वृणते न स्वीकुर्वन्ति । अतो हेतोरेतां कीर्तिं परामष्टुमाक्रमितुं भवान्नार्हति । कीदृशीम् । रघुनहुषमान्धातॄणां नृपविशेषाणां महिषीं महादेवीमत एव वृद्धामतिवयस्कां च ।

'कृताभिषेका महिषी' इत्यमरः । अत्र महिषीवृद्धापदयोर्व्याजात् कपटान्निन्दास्तुतिर्लेशत एव ॥ इति लेशालंकारनिरूपणम् ॥

## सहोक्त्यलंकारनिरूपणम् ।

सहोक्तिलक्षणमाह—

**कर्त्रादीनां समावेशः सहान्यैर्यः क्रियादिषु ।**
**विविक्तश्चाविविक्तश्च सहोक्तिः सा निगद्यते ॥ ५७ ॥**
**वैसादृश्यवती चेयमुच्यमाना मनीषिभिः ।**
**सहेत्वादिप्रयोगेषु ससादृश्या च दृश्यते ॥ ५८ ॥**

**कर्त्रेति** । क्रियादिषु कर्त्रादीनामन्यैः सह यः समावेशोऽवस्थानं सा सहोक्तिः । आदिपदात्कर्मादिपरिग्रहः । स समावेशो विविक्तः केवलः, अविविक्तो मिश्रः ॥

सा कर्तृविविक्तक्रियासमावेशे यथा—

'कोकिलालापमधुराः सुगन्धिवनवायवः ।
यान्ति सार्धं जनानन्दैर्वृद्धिं सुरभिवासराः ॥ १२९ ॥'

अत्र सुरभिवासरा इति कर्तृपदार्थः केवल एव जनानन्दैः सह वृद्धिप्राप्तिक्रियायां समाविष्ट इति सेयं विविक्तकर्तृक्रियासमावेशा नाम वैसादृश्यवती सहोक्तिः ॥

**कोकिलेत्यादि** । सुरभिवासरा वसन्तदिवसाः जनहर्षैः सह वृद्धिं यान्ति । कीदृशाः । कोकिलालापो मधुरो मनोहरो येषु ते, सुगन्धयः शोभनगन्धवन्तो वनवायवो मलयानिला येषु ते । अत्र केवलस्य कर्तुर्वसन्तदिनस्य जनानन्दैः सह वृद्धिप्राप्तिक्रियासमावेशः । स च विसदृश एव । दिनवृद्धेर्दण्डाधिक्यरूपत्वात्, आनन्दवृद्धेरतिसुखरूपत्वात् ॥

कर्मणो ऽविविक्तक्रियासमावेशो यथा—

'उज्झसि पिआइ समअं तह वि हु रे भणसि कीस किसिअं त्ति ।
उवरिभरेण अ अण्णुअ मुअइ वइल्लो वि अङ्गाइं ॥ १३० ॥'

[उह्यसे प्रियया समदं तथापि खलु रे भणसि किमिति कृशेति ।
उपरिभरेण च हे अज्ञ मुञ्चति वृषभोऽप्यङ्गानि ॥ ]

अत्र संबोध्यमानयुष्मदर्थः कर्मतामापन्न उह्यस इति क्रियायां केवल एव क्रियापदार्थेन सह समाविष्टः; सेयं विविक्तकर्मक्रियासमावेशा नाम वैसादृश्यवती सहोक्तिः ॥

**उज्झसीत्यादि** । "उह्यसे प्रियया समदं तथापि खलु रे भणसि किमिति कृशेति । उपरिभरेण च हे अज्ञ मुञ्चति वृषभोऽप्यङ्गानि ॥" अपराधवता केनचिदबला दुर्बला किमिति त्वं कृशेति पृष्टा । तमुद्दिश्याह—**उह्यस इति** । प्रियया समदं सगर्वं यथा स्यादेवं त्वमुह्यसे भ्रियसे । तथापि रे त्वं वदसि किमिति कृशासि त्वमिति । हे अज्ञ ज्ञानहीन, उपरिभरेण गोण्यादिगौरवेण वृषभोऽप्यङ्गानि मुञ्चति त्यजति । किं पुनरबलेति भावः । उह्यस इति 'वह प्रापणे' कर्मणि लकारः । वइल्लो वृषभः । रेशब्दः साक्षेपसंबोधने । अत्र वहनक्रियायां त्वमिति बोध्योऽर्थः कर्मीभूतः केवल एव प्रियापदार्थेन सह समाश्लिष्टस्तयोश्च विसदृशता व्यक्तैव ॥

विविक्ताया एव लक्षणान्तरमाह—

**यत्रानेकोऽपि कर्त्रादिः प्रविविक्तैः क्रियादिभिः ।**
**विविक्तभावं लभते विविक्ता सापि कथ्यते ॥ ५९ ॥**

**यत्रेति** । यत्रानेकः कर्त्रादिर्भिन्नैः क्रियादिभिर्भेदं लभते सा विविक्तेति कथ्यते ॥

सा कर्तृद्वयस्य पृथक् क्रियासमावेशे यथा—

'वर्धते सह पान्थानां मूर्च्छया चूतमञ्जरी ।
वहन्ति च समं तेषामश्रुभिर्मलयानिलाः ॥ १३१ ॥'

अत्र चूतमञ्जरी मूर्च्छया सह वर्धनक्रियायाम्, *मलयानिलाश्चा*श्रुभिः सह वहनक्रियायां पृथक् पृथग्विवेकेनैव कर्तारः समाविष्टाः, सेयमपि विविक्तकर्तृक्रियासमावेशैव वैसादृश्यवती सहोक्तिः । एवं कर्मणोऽपि विवेके द्रष्टव्या ॥

**वर्धत इत्यादि** । चूतमञ्जरी पान्थानां मूर्च्छया सह वर्धते, मलयानिलास्तेषां पान्थानामश्रुभिः सह वहन्ति वान्ति भ्रश्यन्ति च । 'पथिकः पान्थ इत्यपि' इत्यमरः । अत्र चूतमञ्जर्यादेस्तत्क्रियायां विवेकेनैव कर्तृत्वेन समावेशः । विसदृशता तु व्यक्तैव ॥

कर्तृणामविविक्तक्रियासमावेशे यथा—

'धीरेण समं जामा हिअएण समं अणिट्ठिआ उवएसा ।
उच्छाहेण सह भुआ बाहेण समं गलन्ति से उल्लावा ॥१३२'

[धैर्येण समं यामा हृदयेन सममनिष्ठिता उपदेशाः ।
उत्साहेन सह भुजौ बाष्पेण समं गलन्त्यस्या उल्लापाः ॥]

अत्र यामादीनां बहूनां धैर्यादिभिः सह गलनक्रियायामेकस्यामेवाविविक्तः समावेशो दृश्यते; सेयमविविक्तकर्तृक्रियासमावेशा नाम वैसादृश्यवती सहोक्तिः ॥

**धीरेणेत्यादि** । "धैर्येण समं यामा हृदयेन सममनिष्ठिता उपदेशाः । उत्साहेन सह भुजौ बाष्पेण समं गलन्त्यस्या उल्लापाः ॥" अस्य रामस्य धैर्येण समं यामा रात्रिप्रहरा गलन्ति । हृदयेन सममनिष्ठिता अनिर्व्यूढा अनिश्चिता वा उपदेशा गलन्ति । उत्साहेन सह भुजा बाहवो गलन्ति । बाष्पेण समसुल्लापा आलापा वचनानि गलन्ति । धैर्यविगमानुचिते सदुपदेशावस्थितिः । ततो मनःशून्यता, तत उत्साहत्यागः, ततो भुजस्खलनम्, ततोऽश्रुणा सह वचनतेति क्रमेणाधिकार्तितो मन्मथदशाधिक्यमुक्तम् । उत्साहोऽध्यवसायः । अत्र गलनक्रियाया एकत्वेनाविविक्तता । वैसादृश्यं च व्यक्तमेव ॥

कर्मणामविविक्तक्रियासमावेशे इवशब्देन सहशब्दस्य स्थाने ससादृश्या यथा—

'धीरं व जलसमूहं तिमिणिवहं विअ सपक्खपव्वअलोअम् ।
णइसोत्तेव तरङ्गे रअणाइँ व गरुअगुणसआइँ वहन्तम् ॥१३३॥'

[धैर्यमिव जलसमूहं तिमिनिवहमिव सपक्षपर्वतलोकम् ।
नदीस्रोतांसीव तरङ्गान् रत्नानीव गुरुकगुणशतानि वहन्तम् ॥]

अत्र धैर्येण सह जलसमूहस्य, तिमिनिवहेन सपक्षपर्वतलोकस्य, नदीस्रोतोभिस्तरङ्गाणाम्, रत्नैश्च गुरुकगुणशतानां मिथः प्रतीयमानं सादृश्यमिवेन द्योत्यते । सहार्थश्च वाक्यार्थसामर्थ्येन लभ्यत इति सेयं

१. 'णिसाआमा' इति सेतुबन्धे पाठः.

धैर्यादीनां बहूनां वहनक्रियायामेकस्यामेवाविवेकतः कर्मभूतानामावेशे-नाविविक्तकर्मक्रियासमावेशा नाम ससादृश्या सहोक्तिः ॥

**धीरं वेत्यादि** । "धैर्यमिव जलसमूहं तिमिनिवहमिव सपक्षपर्वतलोकम् । नदीस्रोतांसीव तरङ्गान् रत्नानीव गुरुकगुणशतानि वहन्तम् ॥" इह समुद्रं कीदृशम् । धैर्यमिव जलसमूहं वहन्तम्, तिमिनिवहमिव मत्स्यविशेषसमूहमिव सपक्षं पक्ष-युक्तम्, स्वपक्षं स्वमित्रं वा पर्वतलोकं मैनाकादिकं वहन्तम्, नदीप्रवाहानिव तर-ङ्गान् वहन्तम्, रत्नानीव गुरुकगुणशतानि महत्त्वादीनि वहन्तम् । 'अस्ति मत्स्य-स्तिमिर्नाम शतयोजनविस्तृतः ।' इति रामायणम् । 'समूहेऽपि मतो लोकः' इति रत्नकोषः । गुरुकेति स्वार्थे कन् । अत्र धैर्यजलसमूहादीनां मिथः सादृश्यं व्यक्तमेव प्रतीयमानमिवशब्देन द्योत्यते, साहित्यं च वाक्यार्थतया गम्यत इति सहोक्तिरियं सादृश्यवती ॥

ग्रहणप्रयोजनमाह—

आदिग्रहणाद्गुणसमावेशोऽपि गुणिनः ससादृश्या यथा—

'सह दीर्घा मम श्वासैरिमाः संप्रति रात्रयः ।
पाण्डुराश्च ममैवाङ्गैः सह ताश्चन्द्रभूषणाः ॥ १२४ ॥'

अत्र रात्रयो दीर्घाः पाण्डुराश्चेति दैर्घ्यपाण्डुरत्वगुणयोरविवेकेन रात्रिषु रात्रीणां च तयोः श्वासैरङ्गैश्च सह समावेशो दृश्यते; सेयमवि-विक्तगुणसमावेशानामेवाद्यप्रयोगेऽपि ससादृश्या सहोक्तिः ।

**आदीति** ॥ **सहेत्यादि** । इमा रात्रयः संप्रति विरहावस्थायां मम सह दीर्घाः, ममैवाङ्गैः सह चन्द्रभूषणाश्चन्द्रालंकारास्ता रात्रयः पाण्डुराश्च । चन्द्रभू-षणत्वं रात्रीणां पाण्डुरत्वे हेतुः । विरहदशायां खेदान्निःश्वासदीर्घता, अङ्गपाण्डिमा, रात्रिदीर्घता च भवति । अत्र दीर्घत्वपाण्डुत्वगुणयोः समावेशः सादृश्यगर्भ एवेति ससादृश्येयं सहोक्तिः ॥ इति सहोक्त्यलंकारनिरूपणम् ॥

## समुच्चयालंकारनिरूपणम् ।

समुच्चयलक्षणमाह—

**द्रव्यक्रियागुणादीनां क्रियाद्रव्यगुणादिषु ।**
**निवेशनमनेकेषामेकतः स्यात्समुच्चयः ॥ ६० ॥**

इतरेतरयोगो यः समाहारो य उच्यते ।
अन्वाचय इहान्यो यः सोऽपि नान्यः समुच्चयात् ॥६१॥
द्विपदाश्रयश्चापि स स्यात्स स्याद्बहुपदाश्रयः ।
उभयाश्रयश्च स स्यात्स स्यादनुभयाश्रयः ॥ ६२ ॥
त्रयः प्रतिपदं वा स्युर्द्योतकैरुत्तरत्र वा ।
पदैः शुद्धाश्च मिश्राश्च तुरीयो द्योतकं विना ॥ ६३ ॥

**द्रव्येति** । द्रव्यादीनामेकक्रियादिसमावेशः समुच्चयः । इतरेतरयोगादीनां समुच्चयाभेदमाह—**इतरेति** । इतरेतरयोगः परस्परापेक्षावयवभेदानुगतः समुच्चयः । समाहारस्तिरोहितावयवभेदः संहतिप्रधानः समुच्चय एव, अन्वाचयो यत्रैकं प्रधानमन्यदप्रधानमन्वीयते सः । समुच्चयं विभजते—**द्विपदेति** । उभयं द्विपदबहुपदे । अनुभयमद्विपदबहुपदे । एषु मध्ये आद्यास्त्रयः प्रतिपदं वोत्तरत्र वा पदद्योतकैः सह संभवन्तीत्याह—**त्रय इति** । त्रय एव शुद्धा मिश्राश्च भवन्ति । तुरीयोऽनुभयाश्रयः समुच्चयो द्योतकं चकारादिकं विनैव भवति ॥

तत्र द्विपदाश्रयः प्रतिपदाश्रितद्योतकत्वेन द्रव्ययोः क्रियासमुच्चयो यथा—

'निर्यता परिजनेन बोधितः स्फूर्जमानरुचिरुल्लसद्दशः ।
द्वारसंवलनमांसलोऽधिकं दीपकश्च मदनश्च दिद्युते ॥१३५॥'

अत्र दीपकश्च मदनश्चेति द्वे द्रव्ये प्रतिपदं चकारेणैकस्यां दिद्युते इति क्रियायां समुच्चयेन निवेशिते; तेन दिद्युताते इति द्विवचनम्, दीपकमदनाविति चार्थे द्वन्द्वश्च न भवति ॥

**निर्यतेत्यादि** । दीपकः प्रशस्तदीपश्च मदनः कामश्चाधिकं दिद्युते दीप्तो बभूव । कीदृशः । निर्यता गच्छता सेवकेन सख्यादिना च बोधितः प्रकाशितो जागरितश्च । स्फूर्जमाना स्फुरन्ती रुचिर्दीप्तिरनुरागश्च यस्य सः । उल्लसन्ती दशा वर्तिरवस्था च यस्य सः । द्वारे गृहद्वारे मदनबोधकभावे च संवलनं मिलनं तेन मांसलः स्फीतः । दीपक इति प्रशंसायां कन् । दिद्युत इति 'द्युत दीप्तौ' इत्यस्य लिटि रूपम् ।

अत्र चकाराभ्यां द्रव्ययोरेकक्रियानिवेशनात्समुच्चयः । यदि समुच्चयेन निवेशनं न स्यात्तदा दोषमाह—**तेनेति** । अन्योन्यनिरपेक्षतया द्विवचनं द्वन्द्वश्च स्यादित्यर्थः ॥

द्विपदाश्रय एवोत्तरपदाश्रितद्योतकेन क्रिययोर्द्रव्यसमुच्चयो यथा—

'निकामं क्षामाङ्गी सरसकदलीगर्भसुभगा
कलाशेषा मूर्तिः शशिन इव नेत्रोत्सवकरी ।
अवस्थामापन्ना मदनदहनोद्दाहविधुरा-
मियं नः कल्याणी रमयति मनः कम्पयति च १३६'

अत्र रमयति कम्पयति चेति द्वे क्रिये उत्तरपदवर्तिना चकारेणैकस्मिन्मनोलक्षणे द्रव्ये कर्मणि समुच्चयेनैककालमेव निवेशिते; तेनायमन्वाचयो न भवति ॥

**निकाममित्यादि** । इयं मालती नोऽस्माकं मनो रमयति कम्पयति च । कीदृशी । मदन एव दहनोऽग्निस्तस्मादुद्दाहः प्रकृष्टदाहस्तेन विधुरा विह्वलामवस्थां दशामापन्ना प्राप्ता । अत एव निकाममत्यर्थं क्षीणाङ्गी । सरसो यः कदल्या गर्भो मज्जा तद्वत्सुभगा मनोहरा । अनेन पाण्डुरता तीक्ष्णता चोक्ता । चन्द्रस्य कलाशेषा कलनामात्रावस्थिता मूर्तिरिव नेत्रानन्दजनिका कल्याणी कुशलवती । कदल्या गर्भपदेनातिपाण्डुरत्वकोमलत्वे ध्वनिते । प्रकृतकार्यसंपादकतया रमयति । अतिपीडयारिष्टाशङ्कित्वान्मनःकम्पनमिहेत्याशयः । अत्र कम्पयति चेत्युत्तरपदस्थेन चकारेणैकत्र मनोलक्षणे द्रव्ये क्रियाद्वयनिवेशनात्समुच्चयः । समुच्चयेन निवेशनाभावे दोषमाह—**तेनेति** । परस्परनैरपेक्ष्ये उत्तरपदस्थचकारेणान्वाचयापत्तिरित्यर्थः ॥

बहुपदाश्रयः प्रतिपदाश्रितद्योतकत्वेन गुणानां क्रियासमुच्चयो यथा—

'अप्राकृतस्तु कथमस्तु न विस्मयाय
यस्मिन्नुवास करुणा च कृतज्ञता च ।
लक्ष्मीश्च सात्त्विकगुणज्वलितं च तेजो
धर्मश्च मानविजयौ च पराक्रमश्च ॥ १३७ ॥'

अत्र करुणा च कृतज्ञता चेत्यादयो गुणाः प्रत्येकं बहुपदाश्रयत्वेन

चाकारेणैकस्यामुवासेति क्रियायां समुच्चयेन निवेश्यन्ते । तेन गुणेषु बहुवचनं न भवति, करुणाकृतज्ञतादीनां द्वन्द्वसमासश्च न भवति यस्मिन्नित्यपेक्षायां चायमेव गुणानां द्रव्यसमुच्चयो भवति ॥

**अप्राकृत इत्यादि** । स नृपतिर्विस्मयाय कथं नास्तु । कीदृशः । अप्राकृतोऽनीचः । महाजन इति यावत् । 'नीचः प्राकृतश्च पृथग्जनः' इत्यमरः । यस्मिन् करुणा दया, कृतज्ञता विज्ञता, लक्ष्मीः संपत्तिः, सात्त्विकगुणेन जाज्वल्यमानं तेजश्च, धर्मः सुकृतं, मानो विनयः, पराक्रमश्चोवास वसति स्म । इह कारुणिकस्य करुणामात्रप्रवृत्त्या कृतज्ञतायाः साहजिकोऽभाव इति । तथा चास्मिन्नुभयमिति महाजनतास्य सूचिता । तथाप्यलक्ष्मीकस्य न किमपि श्लाघाविषय इति सलक्ष्मीकतोक्ता । तथापि निःसात्त्विकस्य कुतो महाजनत्वमतः सात्त्विकगुणाधिक्यमुक्तम् । निष्प्रतापस्य सर्वमुक्तं लक्षणमशोभाकरमेव भवतीति तेजस आधिक्यमुक्तम् । भवतु यथोक्तगुणसंपत्तिः, अधार्मिके सर्वे गुणा विगुणायन्ते । तदर्थमाह—**धर्मश्चेति** । मानविनयपराक्रमाः प्रत्येकं महापुरुषे विशेषगुणा इति तेऽप्युक्ता इति । अत्रानेकपदाश्रितचकारैरेकक्रियायां नानागुणाः समुच्चयेन निवेशिता इति समुच्चयता ॥ तदभावे दोषमाह—**तेनेति** । असमुच्चयनिवेशे करुणादय ऊषुरिति स्यादित्यर्थः । **यस्मिन्निति** । यदि यस्मिन्नित्यैकद्रव्ये गुणसमुच्चयविवक्षात्र तदा सोऽपि भवतीत्यर्थः ॥

बहुपदाश्रय एवोत्तरपदाश्रितद्योतकत्वेन गुणानां क्रियासमुच्चयो यथा—

'रूपमप्रतिविधानमनोज्ञं प्रेम कार्यमनपेक्ष्य विकाशि ।
चाटु चाकृतकसंभ्रममासां कार्मणत्वमगमद्रमणेषु ॥ १३८ ॥'

अत्र रूपं प्रेम चाटु चेति बहवो गुणा उत्तरपदाश्रयेण चकारेणागमदित्येकस्यां क्रियायां समुच्चयेन निवेश्यन्ते, तेनागमन्निति बहुवचनं द्वन्द्वो वा न स्यात् । कार्मणत्वमित्यपेक्षायां चायमेव गुणानां जातिसमुच्चयो भवति ॥

**रूपमित्यादि** । आसां स्त्रीणां रमणेषु विषये इदमिदं कार्मणत्वं वशीकरणे मूलकर्मत्वमगमत् ययौ । अप्रतिविधानेनानिर्बन्धेन । सहजेनेति यावत् । मनोज्ञरूपं कार्यमनपेक्ष्य विकाशि सहजप्रकाशवत्प्रेम, अकृतकः स्वाभाविकः संभ्रम

आदरो यत्रेदृशं चाटु कौशलं च । 'मूलकर्म तु कार्मणम्' इत्यमरः । अत्र रूपादयो गुणा अन्त्यपदस्थितचकारेण गमनरूपक्रियायां समुच्चयेन निवेशिता इति समुच्चयः । तदभावे दोषमाह—**अगमन्निति** । असमुच्चये बहुवचनं द्वन्द्वश्च स्यादित्यर्थः । इदमेव गुणानां कार्मणत्वम् । जात्या समुच्चयेन जातिसमुच्चयोऽपीत्याह—**कार्मणत्वमिति** ॥

उभयपदाश्रय उत्तरपदाश्रितद्योतकत्वेन द्रव्यगुणानां क्रियासमुच्चयो यथा—

'विचिन्त्यमानं मनसापि देहिनामिदं हि लोकेषु चकास्ति दुर्लभम् ।
निशा सचन्द्रा मदिरा च सोत्पला प्रियानुरागोऽभिनवं च यौवनम् ॥'

अत्र निशा मदिरा च द्रव्ये, अनुरागो यौवनं च गुणौ, बहुष्वपि पदेषु द्वन्द्वे सत्यपि उत्तरपदाश्रयनिवेशिना चकारेण चकास्तीत्येकस्यां क्रियायां निवेश्यन्ते; तेन चकासतीति बहुवचनं समासश्च न स्यात् । अयमेव च दुर्लभमित्यपेक्षायां द्रव्यगुणानां गुणसमुच्चयो भवति । तेऽमी त्रयोऽपि शुद्धाः ॥

**विचिन्त्येत्यादि** । इदं लोकेषु भुवनेषु मध्ये देहिनां प्राणिनां विचिन्त्यमानं मनसापि दुर्लभमेव चकास्ति । हिरवधारणे । किं तत् । सचन्द्रा रात्रिः, सकमलं मद्यम्, प्रियाया अनुरागः प्रीतिः, अभिनवं यौवनं च । अत्र चन्द्रशो युगलत्वेनान्त्यपदस्थितचकारेणैकक्रियानिवेशः । तदभावे दोषमाह—**तेनेति** । दुर्लभत्वविवक्षया दुःखमयत्वे गुणसमुच्चयोऽपीत्याह—**अयमिति** ॥

मिश्रः पुनरुभयपदाश्रयवद्बहुपदाश्रयश्च भवति । यथा—

'आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च संध्ये धर्मश्च जानाति नरस्य वृत्तम् १४०'

अत्रादित्यचन्द्रादयो द्रव्यविशेषा उत्तरपदनिवेशिना प्रतिपदनिवेशिना च चकारेण जानातीत्येकस्यां क्रियायां संनिवेश्यन्ते । तेन च बहुवचनाभावे समासाभावे चैष मिश्रः समुच्चयभेदो भवति ॥

**आदित्येत्यादि** । अनिलो वायुः, अनलोऽग्निः, द्यौराकाशः, आपो जलम्, हृदयम्, यमः, अहो दिनम्, उभे प्रातःसायम्, धर्मो विधाता चायं जनस्य वृत्तं चरित्रं जानाति । आदित्यचन्द्रौ जानीत इति विभक्तिविपरिणामेनान्वयः । 'धर्मो गुणादौ लोकेशे' इति रत्नकोषः । अत्रादित्यादय उत्तरपदप्रतिपदनिवेशितचकारैणैकक्रियायां निवेशिता इति मिश्रता । तदभावे दोषमाह—**तेनेति** ।

अनुभयाश्रयस्तु समुच्चयोऽन्वाचयश्च न भवति । द्वयोरपि दीपकेन विषयापहारात् । तेनेतरेतरयोगसमाहारयोः स उदाह्रियते तत्रेतरेतरयोगो यथा—

'सावशेषपदमुक्तमुपेक्षा स्रस्तमाल्यवसनाभरणेषु ।
गन्तुमुत्थितमकारणतः स्म द्योतयन्ति मदविभ्रममासाम् ॥१४१॥'

अत्रोक्तम्, उपेक्षा, उत्थितमित्येते क्रियाद्रव्यविशेषा इतरेतरयोगेन मदविलासद्योतनक्रियायां निवेश्यन्ते; तेन द्योतयन्तीति बहुवचनं द्वन्द्वसमासश्च तद्विवक्षायां स्यात् । न चेह द्योतकश्चकार उत्तरपदे प्रतिपदं वा विद्यत इति सोऽयमनुभयाश्रयः समुच्चयभेदः ॥

**अनुभयेति** । यत्र द्विपदे बहुपदे वा चकारो नास्ति समुच्चयोऽन्वाचयोऽपि न भवति । दीपकलक्षणेन तस्य विषयीकरणादेकत्रवर्तिना क्रियादिवाचकपदेन सर्ववाक्योपकारकत्वस्य दीपकत्वात्, तादृशसमुच्चयान्वाचययोश्च तत्सत्त्वादित्याशयः ॥ **सावशेषेत्यादि** । आसां स्त्रीणामेतानि मदविभ्रमं मत्ततविलासं द्योतयन्ति स्म । तान्याह—सहावशेषैरवशिष्टभागैर्वर्तते सावशेषं सखण्डं पदं यत्रेदृशमुक्तं वचनम् । खण्डाक्षरवचनमित्यर्थः । स्रस्तानि स्खलितानि यानि मालावस्त्रालङ्करणानि तेषूपेक्षा असंवरणम् । अकारणतो हेतुं विनैव गन्तुं गमनं कर्तुमुत्थितमुत्थानं च । उक्तमिति भावे क्तः । उत्थितमित्यपि भावे क्तः । अकारणत इति पञ्चम्यास्तसिः । अत्रोक्तादेर्वचनादिरूपक्रियात्मकस्य तदाश्रयस्य द्रव्यस्य मिथो योगेन प्रधानक्रियायां निवेशः । अत एव द्योतयन्तीति बहुवचनम् । समुच्चयस्वीकारे दोषमाह—**द्वन्द्वेति** ॥

समाहारो यथा—

'वपुर्विरूपाक्षमलक्ष्यजन्मता दिगम्बरत्वेन निवेदितं वसु ।
वरेषु यद्बालमृगाक्षि मृग्यते तदस्ति किं व्यस्तमपि त्रिलोचने १४२'

अत्र 'यद्वरेषु मृग्यते तत्किं त्रिलोचने व्यस्तमप्यस्ति' इति ब्रुवन् वपुर्वयोवसूनां समुदायं समस्तमेवाभिसंधत्ते। तस्य चाविर्भूतावयवभेदत्वेनेतरेतरयोगः, तिरोहितावयवभेदत्वेन समाहारः। स इह यदित्येकवचनान्तेन नपुंसकेन च कथ्यते। न चेह कश्चिदपि चकारोऽस्तीति सोऽयमप्यनुभयाश्रयः समुच्चयभेदः॥

**वपुरित्यादि**। हे बालमृगाक्षि शिशुहरिणनेत्रे गौरि, वरेषु यन्मृग्यतेऽन्विष्यते तत्रिलोचने शिवे व्यस्तमप्येकैकमप्यस्ति किम्। किंतु नास्त्येव। तदाह—वपुः शरीरं विरूपमक्षि यत्र तादृशं विरूपं विरुद्धस्वरूपम्। नेत्रे द्वित्वसंबन्धस्याविरुद्धत्वात्, त्रित्वस्य विरुद्धत्वात्। अलक्ष्यमलक्षणीयं जन्म उत्पत्तिः कुलमिति यावत्। यस्य सोऽलक्ष्यजन्मा तस्य भावोऽलक्ष्यजन्मता। अकुलीनतेत्यर्थः। दिश एवाम्बरं यस्य तद्भावेन वसु धनं निवेदितं कथितम्। 'नग्नोऽवासा दिगम्बरः' इत्यमरः। मृग्यत इति मृग अन्वेषणे कर्मणि लकारः। अत्र वपुरादिसमुच्चये यदा स्फुटावयवभेदतां तदेतरेतरयोगः। यदा तु तिरोहितावयवभेदता तदा समाहारः। यदित्येकत्वक्लीबत्वाभ्यामिह समाहार एवोक्तः। चकारयोगेऽपीतरेतरयोगमाह—**न चेति**॥

चयोगेऽपीतरेतरयोगः। स उत्तरपदयोगेऽपि यथा—

'तत्क्षणं विपरिवर्तितह्रियोर्नेष्यतोः शयनमिद्धरागयोः।
सा बभूव वशवर्तिनी द्वयोः शूलिनः सुवदना मदस्य च॥१४३॥'

अत्र शूलिनो मदस्य चेत्युत्तरपदाश्रयेण चकारेण द्वौ द्रव्यविशेषौ 'वशवर्तिनी' इत्येतस्मिन् गुणपदे यदीतरेतरयोगेन संनिवेश्येते तदा 'विपरिवर्तितह्रियोः' इत्यादिषु 'द्वयोः' इतिपर्यन्तेषु द्विवचनमेकशेषो वा न स्यात्। सोऽयमपि द्विपदाश्रय उत्तरपदाश्रितद्योतकश्च समुच्चयभेदः॥

**तत्क्षणमित्यादि**। सा सुवदना गौरी शूलिनो हरस्य मदस्य मत्ततायाश्च द्वयोर्वशवर्तिनी आयत्ता बभूव। द्वयोः कीदृशयोः। तत्कालं विपरिवर्तिता विगता ह्रीर्लज्जा ययोस्तयोः। इद्ध उपचितो रागो ययोस्तयोः। अत एव शयनं नेष्यतोः शय्यां नेच्छतोः। अत्र शूलिमदयोर्वशवर्तित्व इतरेतरयोगेन संनिवेशे दोषमाह—

**तथेति** । बहुपदाश्रय उत्तरपदाश्रितचकारेणेतरेतरयोगो भवतीत्याह—**एव-मिति** । **समाहारमिति** । विचिन्त्यमानमिति श्लोके इदमित्येकत्वक्लीबत्वाभ्यां समाहार उक्त इत्यर्थः । द्रव्यादिविषयत्वे इतरेतरयोगसमाहारयोः सत्त्वादन्वाचये विषयान्तरमाह— **क्रियेति** ॥

एवमपरेऽपीतरेतरयोगेऽपि चयोगा उदाहार्याः । समाहारस्तु चयोगविषयो विचिन्त्यमानमित्यादिनैवोक्तः, अन्वाचयस्तु क्रियाविषय एवोपपद्यते । तत्र चोत्तरपदाश्रय एव चकारो भवति ॥ यथा—

'गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः ।
सौदामिन्या कनकनिकषस्निग्धया दर्शयोर्वीं
तोयोत्सर्गस्तनितमुखरो मा च भूर्विक्लवास्ताः ॥१४४'

अत्र पूर्वं 'दर्शय' इत्युर्वीकर्मविषयत्वेन क्रियामुपन्यस्य 'तोयोत्सर्गस्तनितमुखरो मा च भूः' इति तत्कर्तर्येव धर्मिण्यकर्मकं क्रियान्तरमन्वाचीयते, सोऽयं भिन्नकालत्वभिन्नविषयत्वाभ्यामन्वाचयः समुच्चयाद्भिन्नो भवति ॥

नन्वेवं यदि समुच्चयेऽपि भिन्नविषये क्रिये तुल्यकालमेव प्रयुज्येते; को दोषः स्यात् । न कश्चित् । किंतु तस्य समुच्चयमुद्रया विषयोऽपहृत इति नोदाह्रियते ॥

**गच्छन्तीनामिति** । तत्र स्त्रीणां सौदामिन्या विद्युता त्वमुर्वीं भूमिं दर्शय । कीदृशीनाम् । नक्तं रात्रौ पतिगृहं गच्छतीनाम् । कस्मिन् सति । सूच्यग्रभेदनीयैरन्धकारै राजमार्गेऽवरुद्धदर्शने सति । सौदामिन्या कीदृश्या । कनकस्य हिरण्यस्य निकषः कषपट्टिकायां कषणरेखा तद्वत्स्निग्धया रम्यया तोयत्यागस्तनितमुखरस्त्वं मा भूः मा भव । यतस्ता अनाथा विक्लवा विह्वलाः स्युः । 'निकषः कषरेखायां पट्टिकायां कषस्य च' इति मेदिनीकारः । 'स्तनितं घनगर्जितम्' इत्यमरः । माभूरित्यत्र 'न माङ्योगे ६।४।७४' इत्यड्निषेधः । अत्राद्यक्रियामुक्त्वा द्वितीयक्रियाया अन्वाचयः । समुच्चयाद्भेदमाह—**भिन्नेति** । समुच्चये एककालिक

एकविषयेऽन्वयः, अत्रत्वन्वये कालभेदो विषयभेदश्चेति भेदादित्यर्थः। उक्तैध- र्म्ययोः समुच्चये सत्त्वमाशङ्क्य परिहरति—**किंत्विति**। समुच्चये उभयधर्मवत्त्वेऽपि समुच्चयत्वेनैव विषयपरिहारः, इह तु विवक्षयैव विनिगमनेत्याशयः॥

समासेऽपीतरेतरयोगादनुभयाश्रयः समुच्चयभेदो यथा—

'वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥ १४५॥'

अत्र 'वागर्थाविव' इति परवल्लिङ्गता 'संपृक्तौ पितरौ' इत्यत्र योऽयं 'पुमान् स्त्रिया १।२।६७', 'पिता मात्रा १।२।७०' इति चैकशेषस्तेनैष विशेषलक्षणयोगाद्वक्रोक्तित्वे सत्यलंकारतां लभत इति; न धवखदिरादिष्वतिप्रसङ्ग इत्ययमपि समुच्चयभेदः॥

**वागर्थावित्यादि**। अहं गौरीहरौ वन्दे नमामि। किमर्थम्। वाक् चार्थश्च तयोः प्रतिपत्तये निश्चयाय। कीदृशौ। वागर्थाविव शब्दतदभिधेयाविव संपृक्तौ संबद्धौ। यथा शब्दस्तद्वाच्योऽर्थश्च द्वौ नित्यसंबद्धौ वाच्यवाचकत्वसंबन्धेन तथा यौ नित्यसंबद्धावित्यर्थः। जगतो लोकस्य पितरौ मातृजनकौ। पिता च माता चेति द्वन्द्वे 'पिता मात्रा १।२।७०' इत्येकशेषे पितराविति। पार्वत्या मातृत्वेन मातुश्चातिगौरवेणाभ्यर्हितत्वात्पूर्वनिपातः। 'सहस्रेण पितुर्माता गौरवेणातिरिच्यते।' इति स्मृतिः। अनेनार्धनारीश्वर उक्तः। यद्वा पार्वतीं पातीति पार्वतीपो हरः, रमाया लक्ष्म्या ईश्वरो हरिस्तौ वन्दे। यद्वा पार्वतीपरो हरो मायाः लक्ष्म्या ईश्वरो हरिस्तौ हरहरी वन्दे। कीदृशौ। लोकस्य पितरौ जनकौ। अन्यत्तुल्यमेव। एतेन हरिहररूपमुक्तमिति कुव्याख्या। 'रमा लक्ष्म्यामपीष्यते' इति विश्वः। 'मा च लक्ष्मीर्निगद्यते' इत्येकाक्षरः। परवल्लिङ्गता अर्थशब्दलिङ्गता। संपृक्ता च संपृक्तश्चेत्यत्र 'पुमान् स्त्रिया १।२।६७' इत्येकशेषः। अतएवोक्तेर्वक्रतयेहालंकारता। न च धवखदिरावित्यादिषु वक्रोक्तिरतो नालंकारता॥

समाहारयोगादपि यथा—

'स्त्रीणां हावैः कृते यत्र निजकार्ये मनोभुवा।
अक्षिभ्रुवनिभं न्यस्तं तन्मुखे शरकार्मुकम्॥ १४६॥'

अत्रापि योऽयं 'अक्षिभ्रुवम्', 'शरकार्मुकम्', इत्येतयोः 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् २।४।२' इति, 'वाङ्मनसाक्षिभ्रुव-५।४।७७' इति च विशेषलक्षणयोगस्तेन धवखदिरपलाशमित्येवमादिषु नातिप्रसङ्गो भवति ॥

**स्त्रीणामित्यादि** । यत्र नगरे मनोभुवा कामेन तन्मुखे स्त्रीणां मुखेऽक्षिभ्रुवनिभं नेत्रभ्रूव्याजं शरकार्मुकं न्यस्तमारोपितम् । स्त्रीणां हावैः शृङ्गारजक्रियाभिर्निजकार्ये मनश्चापलादौ कृते सति । 'हावाः क्रियाः शृङ्गारभावजाः' इत्यमरः । अत्रापि विशेषलक्षणाभ्यामेव वक्रोक्तिता ॥ इति समुच्चयालंकारनिरूपणम् ॥

## आक्षेपालंकारनिरूपणम् ।

आक्षेपं लक्षयति—

**विधिनाथ निषेधेन प्रतिषेधोक्तिरत्र या ।**
**शुद्धा मिश्रा च साक्षेपो रोधो नाक्षेपतः पृथक् ॥ ६४॥**

**विधिनेति** । विधिना हेतुना प्रतिषेधेन वा हेतुना या प्रतिषेधस्योक्तिर्निर्वचनं सा आक्षेपः । रोधः पुनराक्षेप एवेत्याह—**रोध इति** । आक्षेपलक्षणेनैव गृहीतत्वाद्रोधो न ततो भिन्न इत्यर्थः ॥

तत्र विध्याक्षेपः शुद्धो यथा—

'गच्छ गच्छसि चेत्कान्त पन्थानः सन्तु ते शिवाः ।
ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान् ॥ १४७ ॥'

अत्र 'गच्छ' इत्यस्य विधिवाक्यस्य 'ममापि जन्म तत्रैव भूयात्' इत्याशिषानुकूलतयैव मरणसूचनान्निषेधः क्रियत इति शुद्धोऽयं विध्याक्षेपः ॥

**गच्छेत्यादि** । इह हे कान्त वल्लभ, चेद्यदि गच्छसि तदा गच्छ । विदेसमिति शेषः । मया न रोधः क्रियते । किंतु भवान्यत्र गतो भूयात्तत्रैव ममापि जन्म भूयादिति । परं वदामीति शेषः । अत्र गमनस्य विधिरूपस्य जन्म भूयादित्यनेन विधिरूपेणैव त्वयि गते मया मर्तव्यमिति मरणसूचनाद्विधिना गमनप्रतिषेधोक्तिः अन्यासंकरेण च शुद्धता ॥

मिश्रो यथा—

'अलं विवादेन यथा श्रुतं त्वया तथाविधस्तावदशेषमस्तु सः।
ममात्र भावैकरसं मनः स्थितं न कामवृत्तिर्वचनीयमीक्षते १४८'

अत्र 'अलं विवादेन' इति निषेधेन, 'तथाविधः सोऽस्तु—' इति विधिना च तन्मतमवस्थाप्य, 'ममात्र भावैकरसं मनः स्थितम्' इति विधिना, 'न कामवृत्तिर्वचनीयमीक्षते' इति प्रतिषेधेन च यत्पुनराक्षिपति; सोऽयं विधिनिषेधाभ्यां विधिमिश्र आक्षेपो भवति ॥

**अलमित्यादि**। त्वया यथा श्रुतं तत्र विवादेनालं निष्फलम्। अशेषं समग्रं यथा स्यादेवं स तावत्तथाविध एवास्तु। मम मनोऽत्र भावैकरसमभिप्रायवशं स्थितमस्ति। यद्यपि भवे विरूपाक्षत्वादिकं त्वदुक्तं वर्तते, तथापि मन्मनस्तदेकपरमित्यर्थः। अत्र हेतुः कामवृत्तिरिच्छाव्यापारो वचनीयं वक्तव्यं नेक्षते न पश्यति। इच्छा न परार्थयोज्या भवतीत्यर्थः। अत्र निषेधविधिभ्यां तन्मतस्थापनरूपस्य विधेर्विधिनिषेधाभ्यामाक्षेप इति विध्याक्षेपोऽयं मिश्रः॥

निषेधाक्षेपः शुद्धो यथा—

'कुतः कुवलयं कर्णे करोषि कलभाषिणि।
किमपाङ्गमपर्याप्तमस्मिन्कर्मणि मन्यसे॥ १४९॥'

अत्र 'कुतः कुवलयं कर्णे करोषि' इत्यस्य निषेधवाक्यस्य 'किमपाङ्गम्—' इत्यादिना प्रश्नपरेणापि निषेधपर्यवसायिना वाक्येन समर्थनं क्रियत इत्ययं शुद्धो निषेधाक्षेपः॥

**कुत इत्यादि**। हे कलभाषिणि मधुरवचने, कस्मान्नीलोत्पलं कर्णे करोषि। कुत इति प्रतिषेधे हेतुमाह—अस्मिन् कर्मणि कामिवशीकरणादौ किमपाङ्गं नेत्रप्रान्तमपर्याप्तमसमर्थं त्वं मन्यसे। अत्र निषेधस्य निषेधपर्यवसायिवाक्येन क्षेपणान्निषेधाक्षेपः। शुद्धता च कैवल्येन॥

---

१. 'कामावृत्तिः स्वेच्छाव्यवहारी वचनीयमस्थानसङ्गापवादं नेक्षते न विचारयति। नहि स्वेच्छाचारिणो लोकापवादाद्बिभ्यतीति भावः।' इति मल्लिनाथव्याख्यानमेवात्र साधीयः.

**मिश्रो यथा—**

'सच्चं गुरुओ गिरिणो को भणइ जलासआ ण गम्भीरा ।
धीरेहिं उवम माउं तह वि खु मह णत्थि उच्छाहो ॥ १५० ॥'

[सत्यं गुरवो गिरयः को भणति जलाशया न गम्भीराः ।
धीरैरुपमातुं तथापि खलु मम नास्त्युत्साहः ॥]

अत्र 'सत्यं गुरवो गिरयः' इति विधिः, 'क आह जलाशया न गम्भीराः' इति परमताक्षेपस्ताभ्यां गिरीणां गुरुत्वम् सागराणां च गाम्भीर्यं यदयमुत्तरार्धेन धीरापेक्षया निषेधति, अन्यापेक्षया तत्तदेव विधत्ते; स एष मिश्रो निषेधाक्षेपः ॥

**सच्चमित्यादि** । 'सत्यं गुरवो गिरयः को भणति जलाशया न गम्भीराः । धीरैरुपमातुं तथापि मम नास्त्युत्साहः ॥' इह पर्वता निश्चितं गुरुत्वाश्रयाः । को वदति जलाशयाः सागरा न गम्भीराः किंतु गम्भीरा एव । गिरिसागरौ धीरैः सहोपमातुं सदृशीकर्तुं तथापि मम नोत्साहोऽस्ति धीराणां तयोराधिक्यात् । 'जलाशयो जलाधारः' इति कोषाद्यद्यपि जलाशयपदं जलाधारमात्रार्थकं तथाप्यतिगाम्भीर्ययोग्यतया सागरपरम् । अत्र विधिनिषेधाभ्यां गुरुत्वगाम्भीर्यनिषेधोऽन्यापेक्षया विधिश्चेति मिश्रता ॥

'रोधो नाक्षेपतः पृथक्' इति यदुक्तं तत्रैतावान्विशेषः—

**क्रियासु त्तिष्ठमानस्य वारणं कारणेन यत् ।**
**उक्त्या युक्त्या च रोधो य आक्षेपः सोऽयमुच्यते ॥६५॥**
**प्रतिकूलोऽनुकूलश्च विधौ रोधोऽभिधीयते ।**
**निषेधेऽप्युक्तियुक्तिभ्यां द्विप्रकारः स कथ्यते ॥ ६६ ॥**

रोधे विशेषमाह—**क्रियास्विति** । क्रियासूद्योगिनां हेतुद्वारा यन्निवारणमुक्त्या युक्त्या च स रोधः । स च शेषीभूत आक्षेप एव । विधिनिषेधयोगित्वमथाक्षेपसाधारण्यम् ॥ ६५ ॥ ६६ ॥

तत्रोक्त्या विधौ प्रतिकूलो यथा—

'किं जम्पिएण दहमुह जम्पिअसरिसं अणिव्वहन्तस्स भरम् ।
एत्तिअ जम्पिअसारं णिहणं अण्णे वि वज्जधारासु वआ ॥१५१'

[किं जल्पितेन दशमुख जल्पितसदृशमनिर्वाहयतो भरम् ।
एतावद् जल्पितसारं निधनमन्येऽपि वज्रधारासु गताः ॥]

अत्र 'किमः' प्रतिकूलवाचित्वाद् वचनवृत्त्यैव जल्पन् दशाननश्चित्ररथेन रुद्धः, कारणं च वज्रप्रभावकीर्तनादिति प्रातिकूल्येनोपन्यस्तम्; सोऽयमौक्तः प्रतिकूलश्च विध्याक्षेपो रोध इत्युच्यते ॥

**किमित्यादि** । "किं जल्पितेन दशमुख जल्पितसदृशमनिर्वाहयतो भरम् । एतावद् जल्पितसारं निधनमन्येऽपि वज्रधारासु गताः ॥" इह हे दशमुख रावण, जल्पितेन भाषितेन किम् । किंतु न किमपि । कस्य, उक्तिसदृशं भरमनिर्वाहयतः पुंसः । भरमध्यवसायम् । एतावदेतदेव जल्पितसारं श्रेष्ठम् यदन्येऽपि योधा वज्रधारासु निधनं नाशं गताः । 'श्रेष्ठेऽर्थेवत्सारमुदाहरन्ति' इति शाश्वतः । अत्र जल्पन् रावणश्चित्ररथेन वज्रप्रभावकीर्तनरूपप्रतिकूलोक्त्या रुद्ध इति विध्याक्षेपविरोधः ॥

उक्त्यैव विधावनुकूलो यथा—

'हन्तुं विमग्गमाणो हन्तुं तुरिअस्स अप्पणा दहवअणम् ।
किं इच्छसि काउं जे पवअवइ पिअं ति विप्पिअं रहवइणो १५२'

[हन्तुं विमार्गमाणो हन्तुं त्वरितस्यात्मना दशवदनम् ।
किमिच्छसि कर्तुं यत्प्लवगपते प्रियमिति विप्रियं रघुपतेः ॥]

अत्रापि 'किमः' प्रतिषेधवाचित्वात् वचनवृत्त्यैव दशाननवधायोत्तिष्ठमानः सुग्रीवो जाम्बवता रुद्धः, कारणं पुनरानुकूल्येनैवोक्तम्—'किमेतत् त्वया रघुपतेः प्रियरूपं विप्रियमुपक्रान्तम्' इति । सोऽयमौक्तोऽनुकूलश्च विध्याक्षेपो रोध इत्युच्यते ॥

**हन्तुमित्यादि** । "हन्तुं विमार्गमाणो हन्तुं त्वरितस्यात्मना दशवदनम् । किमिच्छसि कर्तुं प्लवगपतेऽस्य प्रियमिति विप्रियं रघुपतेः ॥" इह हे प्लवगपते सुग्रीव, दशवदनं हन्तुं विमार्गमाणो याचमानस्त्वं रघुपते रामस्य किं प्रियमिति कृत्वा

विप्रियमनिष्टं कर्तुमिच्छसि । कथं विप्रियता तत्राह—कीदृशस्य । दशवदनमेवात्मना हन्तुं त्वरितस्य, प्रभुणा जिघांसितस्य हि वधेऽपराध इति स एव पुरुषोत्तमस्तं घातयतु । समेतैर्भवदादिभिः साहाय्यमाचर्यतामित्याशयः । यच्छब्दोऽव्ययत्वेनानेकार्थतया संबोधनार्थः । यद्वा जेशब्दः पादपूरणे । दशवदनपदमाकाङ्क्षाक्रमेणावृत्त्या हननद्वयान्वयि । अत्र रावणवधोद्यमो विधिरुक्त्यैव जाम्बवता रुद्धोऽनुकूलतया हेतुमुद्भाव्येति रोधोऽयं विध्याक्षेपशेषः ॥

विधावेव युक्त्यानुकूलः प्रतिकूलश्च यथा—

'गच्छेति वक्तुमिच्छामि त्वत्प्रियं मत्प्रियैषिणी ।
निर्गच्छति मुखाद्वाणी मा गा इति करोमि किम् ॥ १५३ ॥'

अत्र यथोक्तमुक्त्वा 'किं करोमि' इत्यानुकूल्येनैवाह । अत्र किमः प्रश्नार्थत्वेऽपि युक्त्या निषेधार्थत्वं गम्यते, सोऽयं यौक्तोऽनुकूलश्च विध्याक्षेपो रोध इत्युच्यते ॥ अयमेव चास्या वैयात्योक्तिपक्षे यौक्तः प्रतिकूलविध्याक्षेपो रोधो भवति ॥

**गच्छेत्यादि** । हे सखि, त्वत्प्रियं गच्छेति वक्तुमिच्छामि । मत्प्रियैषिणी स्त्रीत्वेन स्त्री प्रियत्वान्मा गा इति वाणी मम मुखान्निर्गच्छतीति किं करोमि । 'मत्प्रियं त्वत्प्रियैषिणी' इति पाठे तु त्वत्प्रियैषिण्यहं गच्छेति विवक्षामि, मत्प्रियं यथा भवति तथा मा गा इति वाणी निःसरतीति योज्यम् । अत्र किं करोमीत्यस्य युक्त्या प्रकृतोपपत्त्या निषेधार्थतावगमः । यदि वैयात्यात्प्रागल्भ्याद् विपरीतमभिधत्ते तदा मा गच्छेति वक्तुमिच्छामि, गच्छेति वाणी निःसरतीत्यत्र किं करोमीति तदा युक्तिसिद्ध एव रोधोऽयम् ॥

युक्त्या निषेधे प्रतिकूलो यथा—

'पउरजुआणो गामो महुमासो जोव्वणं पई ठेरो ।
जुण्णसुरा साहीणा असई मा होउ किं मरउ ॥ १५४ ॥'

[प्रचुरयुवा ग्रामो मधुमासो यौवनं पतिः स्थविरः ।
जीर्णसुरा स्वाधीना असती मा भवतु किं म्रियताम् ॥]

अत्र 'असती मा भवतु' इति यः प्रतिषेधमाह स 'प्रचुरयुवा

ग्रामः—' इत्यादि कारणमुक्त्वा ततः 'किं म्रियताम्' इति प्रातिकूल्येन रुध्यते । तत्र किमः काक्का सासूयप्रश्नार्थस्य युक्त्या निषेधार्थत्वं गम्यते; सोऽयं यौक्तः प्रतिकूलनिषेधाक्षेपो रोध इत्युच्यते ॥

**पउर इत्यादि** । "प्रचुरयुवको ग्रामो मधुमासो यौवनं पतिः स्थविरः । जीर्णसुरा स्वाधीना असती मा भवतु किं म्रियताम् ॥" काचिद्वृद्धपतिका चलचित्तेति ज्ञात्वा कयाचित्कस्मैचित्कथितम् । सा तु तत्रोत्तरमाह—**प्रचुर इति** । प्रचुरा बहवो युवानस्तरुणा यत्र तादृशः । 'शेषाद्विभाषा ५।४।१५४' इति कप् । मधुमासो वसन्तः, यौवनम्, स्वामी स्थविरो वृद्धः । जीर्णसुरा पुराणमद्यं स्वाधीनं निजायत्तमतोऽसती सा मा भवतु किं म्रियताम् । यद्यस्मिन् वत्सरे सा चञ्चला न स्यान्म्रियेतैवेत्यर्थः । सुरा जीर्णा प्रीतिकरीति मद्यपप्रसिद्धिः । अत्र किं म्रियतामिति किमः काकुगर्भतया सासूयप्रश्नार्थता युक्त्या निषेधविषयिणी ज्ञायत इति रोधोऽयम् ॥

युक्त्यैव निषेधेऽनुकूलो यथा—

'कह मा झिज्जउ मज्झो इमाइ कन्दोट्टदलसरिच्छेहिं ।
अच्छीहिं जो ण दीसइ घणथणभररुद्धपसरेहिं ॥ १५५ ॥'

[कथं मा क्षीयतां मध्योऽस्याः कुवलयदलसदृक्षाभ्याम् ।
अक्षिभ्यां यो न दृश्यते घनस्तनभररुद्धप्रसराभ्याम् ॥]

अत्र 'स्तनादिवदस्या मध्योऽपि मा क्षीयताम्' इति निषेधवादी केनचिदानुकूल्येन रुध्यते । कथमयं मा क्षीयतामिति । योऽस्याः कुवलयदलसदृक्षाभ्यां लोचनाभ्यां घनस्तनरुद्धप्रसराभ्यां न दृश्यते । इयं ह्येताभ्यामन्यमीक्षमाणा यन्न पश्यति सोऽहमिव मध्योऽपि क्षीयमाणो लक्ष्यते तत्र किमः प्रश्नार्थत्वे निषेधार्थत्वं गम्यते; सोऽयं यौक्तोऽनुकूलश्च निषेधाक्षेपो रोध इत्युच्यते ॥

**कहमित्यादि** । "कथं मा क्षीयतां मध्योऽस्याः कुवलयदलसदृक्षाभ्याम् । अक्षिभ्यां यो न दृश्यते घनस्तनभररुद्धप्रसराभ्याम् ॥" इहास्या नायिकाया मध्यः कथं मा क्षीयतां न क्षीणतां यातु । योऽस्याः कुवलयदलतुल्याभ्यामक्षिभ्यां निबिड-

१. 'उप्पलिए कलमकन्दोट्टा' इति देशीनाममाला.

कुचभरावरुद्धगताभ्यां न दृश्यते । अत्रानया नेत्राभ्यामन्यमीक्षमाणया यथाहं न दृष्ट इत्यहं क्षीणस्तथा मध्योऽपि तेनैव क्षीणतापन्न इति लक्ष्यते । इहापि किमो निषेधार्थत्वं युक्त्यैव ज्ञायते ॥

निषेध एवोक्त्या प्रतिकूलोऽनुकूलश्च यथा—

'भ्रुकुटिरारचिता गतमग्रतो हृतमथाननमुक्तमसाधु वा ।
इयमतिप्रभुता क्रियते बलादकुपितोऽपि हि यत्कुपितो जनः १५६'

अत्र 'अकुपितोऽपि कुपितः क्रियते' इति योऽयं निषेधाक्षेपरूप उपालम्भः, तत्र च 'भ्रुकुटिरारचिता—' इत्यादिवैयात्येन प्रतिकूलं कारणमुपन्यस्य, 'सेयमतिप्रभुता, सोऽयं बलात्कारः' इति काका वाचनिकमेवोपालम्भमभिधत्ते; तेनायमौक्तः प्रतिकूलश्च निषेधाक्षेपो रोध इत्युच्यते ॥ अयमेव चास्या अवैयात्योक्तिपक्षे स्वरूपाख्यानादौक्तोऽनुकूलनिषेधाक्षेपो रोधो भवति ॥

**भ्रुकुटिरित्यादि** । इयमतिप्रभुता बलात्कारः । हि यतोऽकोपवानपि जनो बलात्कारेण कोपवान् क्रियते । तदाह—त्वया भ्रुकुटिर्भ्रूकौटिल्यमारचितम् । अग्रतोऽग्रे गतम् । अनन्तरमाननं चुम्बनादपहृतम् । असाधूक्तं च । वाशब्दश्चार्थे । अत्र धार्ष्ट्येन प्रतिकूलकारणमुपन्यस्य काका वाचनिक एवोपालम्भः । अस्या अधार्ष्ट्यपक्षे स्वरूपाख्यानपरमिदमित्युक्तानुकूलनिषेधाक्षेपरोधोऽप्ययमित्याह—**अयमिति** ॥

यदा तु कारणमुपन्यस्यापि क्रियासूत्तिष्ठमानो न रुध्यते तदाक्षेप एव न रोधः ।

तद्यथा—

'गमिआ कलम्बवाआ दिट्ठं मेहन्धआरिअं गअणअलम् ।
सहिओ गज्जिअसद्दो तह वि हु से णत्थि जीविए आसंगो ॥'

[गमिताः कदम्बवाता दृष्टं मेघान्धकारितं गगनतलम् ।
सोढो गर्जितशब्दस्तथापि खल्वस्य नास्ति जीवितेऽध्यवसायः ॥]

अत्र कदम्बवातातिवाहनादीनां जीविताध्यवसायहेतूनामुपन्यासेऽपि

क्रियासूत्तिष्ठमानो न रुध्यते कथमयं न जीवतीति । किं तर्हि कारण-मेवाक्षिप्यते—'तथापि नास्त्यस्य जीवितेऽध्यवसाय' इति । सोऽयमा-क्षेप एव न रोधः ॥

**गमिआ इत्यादि** । 'गमिताः कदम्बवाता दृष्टं मेघान्धकारितं गगनतलम् । सोढो गर्जितशब्दस्तथापि खल्वस्य नास्ति जीविते आसङ्गः ॥" इहास्य रामस्य तथापि जीविते प्राणधारणे आसङ्गोऽध्यवसायो नास्ति । खलु निश्चये वाक्यभूषायां वा । यद्यपि कदम्बपुष्पसंपर्किणो वाता गमिता नीताः, दृष्टं मेघान्धकारयुक्तं गगनतलम्, गर्जितरूपः शब्दः सोढः श्रुतः । इहासह्यसहनेऽपि जीवितानध्यवसाये प्रेमातिशयो हेतुः । प्रयाणोचितकाले शरद्यपि यदि न गमनं स्यात्तदा प्रियासमागमो मे न स्यादिति बुद्धिः । यद्वा नेतव्यकालस्य घोरत्वाद्दुर्गवासरयोरध्यवसायः । यद्वा कदम्बवाता गमिताः, विकसदमलकमलवाताः कथं गमितव्याः । मेघान्धकारितं गगनतलं दृष्टम्, शरच्चन्द्रचन्द्रिकाधवलितं कथं द्रष्टव्यम् । गर्जितशब्दः सोढः, कलहंसकलरवः कथं सोढव्य इति विमर्शेनानध्यवसायः । यद्वा एतैरेवानर्थसार्थैः कदर्थिता व्यर्थप्रत्याशासमर्थना सीता यदि मृता स्यात्तदा मदीयाशानाश एव भवेदितिबुद्ध्यानध्यवसायः । अत्र जीवनक्रियायामुपस्थितस्य न रोधः, किं तु कारणाक्षेप एवेत्याक्षेपता ॥

क्रियोद्यतस्यापि वारणे कारणानामन्यपरत्वे रोधो न भवति । यथा—

'धनं च बहु लभ्यन्ते सुखं क्षेमं च वर्त्मनि ।
न च मे प्राणसंदेहस्तथापि प्रिय मा स्म गाः ॥ १५८ ॥'

अत्र यद्यपि यात्रोद्यतः प्रियो रुध्यते । प्रभूतार्थलाभादीनां कारणानां गमनपरत्वमेव न निवारणपरत्वम्; अतोऽयं न रोधः, किं तर्हि आक्षेप एव भवति ॥

**धनमित्यादि** । हे प्रिय, यद्यपि ते तव धनं बहु प्रचुरं लभ्यं प्राप्यम् । वर्त्मनि सुखम्; न दुर्गो मार्गः । क्षेमं कुशलं च चौराद्यनुपहतेः । न च मे प्राणसंशयोऽस्ति । तथापि त्वं मा गाः स्म मायासीः । 'कुशलं क्षेममस्त्रियाम्' इत्यमरः । अत्र प्रचुरधनलाभादिहेतूनां गमनपरत्वेनाक्षेपता ॥ इत्याक्षेपालंकारनिरूपणम् ॥

## अर्थान्तरन्यासालंकारः ।

अर्थान्तरन्यासं लक्षयति—

**ज्ञेयः सोऽर्थान्तरन्यासो वस्तु प्रस्तुत्य किंचन ।**
**तत्साधनसमर्थस्य न्यासो योऽन्यस्य वस्तुनः ॥ ६७ ॥**
**स उपन्यस्तवस्तूनां साधर्म्येण च कथ्यते ।**
**वैधर्म्येण च विद्वद्भिर्वैपरीत्येन कुत्रचित् ॥ ६८ ॥**

**ज्ञेयमिति** । किंचन किमपि वस्तु वाच्यं प्रस्तुत्य प्रक्रम्य तद्वस्तुसाधनसमर्थस्यान्यस्य वस्तुनो वाक्यार्थन्यास उपन्यासो यः सोऽर्थान्तरन्यासः । वैपरीत्यं विपर्ययः ॥

तेषु साधर्म्येण यथा—

'पयोमुचः परीतापं हरन्त्येते शरीरिणाम् ।
नन्वात्मलाभो महतां परदुःखोपशान्तये ॥ १५९ ॥'

अत्र परीतापापहरणक्षमस्य जलदाख्यस्य महावस्तुनो न्यसनं विधाय तत्साधनसाधर्म्येणैव तत्साधनक्षमं महापुरुषलक्षणं वस्त्वन्तरमुपन्यस्यति, सोऽयं साधर्म्येणार्थान्तरन्यासः ॥

**पयोमुच इत्यादि** । एते मेघाः शरीरिणां परितापं हरन्ति । ननु निश्चये । महतामात्मलाभोऽवस्थितिः परदुःखोपशान्त्यर्थं भवति । अत्र पूर्वार्धोपस्थापितार्थसिद्धये साधर्म्यपुरस्कारेणोत्तरार्धोपन्यासः स्फुट एव ॥

वैधर्म्येण यथा—

'प्रियेण संग्रथ्य विपक्षसंनिधा-
वुपाहितां वक्षसि पीवरस्तने ।
स्रजं न काचिद्विजहौ जलाविलां
वसन्ति हि प्रेम्णि गुणा न वस्तुनि ॥ १६० ॥'

अत्रापि प्रियतमेन स्वयं कान्ताहृदये समारोपितायाः स्रजः प्रेम-

कारणमुपन्यस्य जलाविलदोषवत्या अपि स्रजो यदत्यागकारणं तदिह वैधर्म्यद्वारेण प्रतिपादितमतो वैधर्म्येणायमर्थान्तरन्यासः ॥

**प्रियेणेत्यादि** । काचिन्नारी जलाविलामपि स्रजं मालां न विजहौ न तत्याज । कीदृशीम् । प्रियेण संग्रथ्य ग्रथित्वा मांसलकुचवति हृदये विपक्षस्य सपत्न्याः समीपे उपाहितामारोपिताम् । अत्रोपपत्तिमाह—हि यतः प्रेम्णि प्रीतौ गुणा वसन्ति न वस्तुनि गुणा वसन्ति । अत्र जलाविलमालाया अप्यत्यागहेतुर्वसन्तीत्यादिना वैधर्म्यपुरस्कारेणोक्तः ॥

विपर्ययेण यथा—

'जो जस्स हिअअदइओ दुक्खं देन्तो वि सो सुहं देइ ।
दइअणहदूमिआणं वि वड्ढीइ त्थणआणं रोमञ्चो ॥ १६१ ॥'

[यो यस्य हृदयदयितो दुःखं ददद‍पि स सुखं ददाति ।
दयितनखदूनयोरपि वर्धते स्तनयो रोमाञ्चः ॥]

अत्र साधनसमर्थं वस्तु प्रथमत एवोपन्यस्य पश्चात् तत्साध्यमभिहितमिति विपर्यासादयं विपर्ययो नामार्थान्तरन्यासः ॥

**जो इत्यादि** । "यो यस्य हृदयदयितो दुःखं दददपि स तथा तस्य । दयितनखदुःखितयोरपि वर्धते स्तनयो रोमाञ्चः ॥" इह यो यस्य हृदयप्रियः स दुःखं दददपि तस्य तथा प्रिय एव । अत्र हेतुः—दयितनखेन दुःखितयोरपि स्तनयो रोमाञ्चो वर्धते । दददित्यत्र 'नाभ्यस्ताच्छतुः ७।१।७८' इति निषेधः । अत्र प्रथमं हेतुरुक्तस्ततस्तत्कार्यमुक्तमिति विपरीतता ॥

उभयन्यासस्यार्थान्तरन्यासादभेदमाह—

**प्रोक्तो यस्तूभयन्यासोऽर्थान्तरन्यास एव सः ।**
**स प्रत्यनीकन्यासश्च प्रतीकन्यास एव च ॥ ६९ ॥**

**प्रोक्त इति** । प्रत्यनीकः परिपन्थी, प्रतीकोऽवयव एकदेश इति यावत् । 'अङ्गं प्रतीकोऽवयवः' इत्यमरः ॥

तेषूभयन्यासो यथा—

'ते विरला सप्पुरिसा जे अभणन्ता घडन्ति कज्जालावे ।
थोअच्चिअ ते वि दुमा जे अमुणिअकुसुमणिग्गमा देन्ति फलम् ॥'

[ते विरलाः सत्पुरुषा येऽभण्यमाना घटन्ते कार्यालापम् ।
स्तोका एव तेऽपि द्रुमा येऽज्ञातकुसुमनिर्गमा ददति फलम् ॥]

अत्र विद्यमानमपि साध्यसाधनभावमप्रतिपाद्य यदुभयोर्वस्तुनोर्न्यसनं सोऽयमुभयन्यासः ॥

ते विरला इत्यादि । "ते विरलाः सत्पुरुषा येऽभण्यमाना घटन्ते कार्यालापम् । स्तोका एव तेऽपि द्रुमा येऽज्ञातकुसुमनिर्गमा ददति फलम् ॥" इह ते सज्जना विरलाः परिमिताः । अल्पा इति यावत् । ये कार्यार्थमालापमाज्ञामभण्यमाना घटन्ते कार्यारूढा भवन्ति, तेऽपि वृक्षाः स्तोका एवाल्पा एव येऽज्ञातपुष्पोद्गमाः सन्तः फलं ददति । अभण्यमाना इति णिज्गर्भत्वेन द्विकर्मकता । यद्वा कार्यालापे कार्यकरणे घटन्ते । कीदृशाः । अभण्यमाना अनुक्ताः । 'आलापो वचने कृतौ' इति शाश्वतः । अत्र हेतुहेतुमद्भावपुरस्कारेणोभयोरुपन्यासः ॥

प्रत्यनीकन्यासो यथा—

'विरला उवआरिच्चिअ णिरवेक्खा जलहरव्व वट्टन्ति ।
झिज्जन्ति ताण विरहे विरलच्चिअ सरिप्पवाहव्व ॥ १६३ ॥

[विरला उपकृत्यैव निरपेक्षा जलधरा इव वर्तन्ते ।
क्षीयन्ते तेषां विरहे विरला एव सरित्प्रवाहा इव ॥]

अत्र यदिदमुपकृत्यानपेक्षितप्रत्युपकाराणां गमनम्, यच्चाकृतप्रत्युपकाराणां तद्विरहेऽवसादनं तदुभयमपि जलधरसरित्प्रवाहयोरन्योन्यातिशयितयोरुपन्यस्यमानं प्रत्यनीकन्यासो भवति ॥

विरला इत्यादि । "विरला उपकृत्यैव निरपेक्षा जलधरा इव वर्तन्ते । क्षीयन्ते तेषां विरहे विरला एव सरित्प्रवाहा इव ॥" इह ये उपकृत्य उपकारं कृत्वा निरपेक्षाः प्रत्युपकारानपेक्षा वर्तन्ते ते विरला अल्पाः । मेघा इव । यथा मेघा उपकारं कृत्वा प्रत्युपकारनिस्पृहा वर्तन्ते तथेत्यर्थः । तेषामुपकारिणां विरहे विरला एव

क्षीयन्ते दुःखिता भवन्ति । नदीप्रवाहा इव । यथा नदीप्रवाहा उपकारिणां मेघानां विरहे क्षीणा भवन्ति तथेत्यर्थः । क्षीयन्त इति कर्मकर्तरि । क्षियोऽनात्मनेपदित्वात् । अवसदनमवसादः । भावे घञ् । अत्र मेघनदीप्रवाहयोर्मिथः समर्थयोः प्रत्यनीकभावः प्रतिपक्षता । प्रतिनिधिभूतमनीकं सैन्यं यस्य सः प्रत्यनीकः परिपन्थी । 'प्रति प्रतिनिधौ चिह्ने' इति मेदिनीकारः । 'अनीकोऽस्त्री रणे सैन्ये' इति च ॥

प्रतीकन्यासो यथा—

'का कथा बाणसंधाने ज्याशब्देनैव दूरतः ।
हुंकारेणेव धनुषः स हि विघ्नानपोहति ॥ १६४ ॥'

अत्र विघ्नप्रोत्सारणसमर्थाया बाणमोक्षलक्षणायाः क्रियायाः प्रथमावयवभूतं ज्याशब्दं धनुषो हुंकारमिवेति तत्साधनमुपन्यस्य प्रतीकन्यासनामानमर्थान्तरन्यासमभिधत्ते ॥

**का कथेत्यादि** । बाणसंधाने धनुषि बाणारोपणे तस्य का कथा । तेन सर्वसिद्धेः । यतः स राजा दूरात् ज्याशब्देनैव विघ्नान्यपोहति वारयति । ज्याशब्देन कीदृशेन । धनुषो हुंकारेणेव । चापस्य हुंकारतुल्येनेत्यर्थः । दूरत इति पञ्चम्यां तसिः ॥ **विघ्नानीति** । यद्यपि 'विघ्नोऽन्तरायः प्रत्यूहः' इत्यमराद्विघ्नशब्दे पुंस्त्वम्, तथापि 'लिङ्गमशिष्यं लोकाश्रयत्वात्' इति नपुंसकत्वमपि । अत एव 'अविघ्नमस्तु ते स्थेयाः पितेव धुरि पुत्रिणाम्' इति रघुप्रयोगोऽपि । 'स हि विघ्नानपोहती'ति वा पाठः कर्तव्यः । अत्र ज्याशब्दस्य चापैकदेशस्य न्यसनात्प्रतीकन्यासता ॥ इत्यर्थान्तरन्यासालंकारनिरूपणम् ॥

## विशेषालंकारनिरूपणम् ।

विशेषोक्तिलक्षणमाह—

**गुणजातिक्रियादीनां यत्र वैकल्यदर्शनम् ।
विशेषदर्शनायैव सा विशेषोक्तिरिष्यते ॥ ७० ॥
प्रत्येतव्येऽभिधेये च सा विशेषस्य कारणे ।
वैकल्यादर्शनेनापि क्वचिदप्युपपद्यते ॥ ७१ ॥**

**गुणेति** । विशेषदर्शनायाधिक्यख्यापनार्थं गुणादीनां मध्ये यत्तेषां वैकल्यदर्शनं विकलत्वाभिधानं सा विशेषोक्तिः । एकगुणहानिकल्पनया शेषगुणे दार्ढ्यं

विशेषोक्तिरिति लक्षणम् । एवं जात्यादावप्यादिपदाद्द्रव्यसंग्रहः । विशेषदर्शनायेत्यनेन विभावनातो भेद उक्तः । तत्र हि नातिशयो वाच्यः किंतु कारणान्तरम् । इह तु गुणादिप्रतिषेधेन पदार्थानामतिशय इति । गुणादीनां वैकल्यादर्शनेऽपि सा भवतीत्याह—**वैकल्येति** ॥

सा गुणवैकल्येन यथा—

'न कठोरं न वा तीक्ष्णमायुधं पुष्पधन्वनः ।
तथापि जितमेवाभूदमुना भुवनत्रयम् ॥ १६५ ॥'

अत्र तीक्ष्णेनाकठोरेण चायुधेन पुष्पधन्वा त्रीणि जगन्ति विजयत इति तस्य प्रभावातिशयः प्रतीयते; सेयं प्रतीयमानविशेषहेतुर्गुणवैकल्यवती विशेषोक्तिः ॥

**न कठोरमित्यादि** । कामस्य प्रहरणं न कठिनं न वा निशितम् । तथाप्यमुना कामेन लोकत्रयं जितमेवासीत् । पुष्पधन्वन इत्यनेनाकठोरत्वमतीक्ष्णत्वं च दर्शितम् । पुष्पस्यैवासत्त्वात् । अत्र काठिन्यादिगुणवैकल्यमतिशयविजयप्रदर्शनायोक्तमिति गुणवैकल्यवतीयम् ॥

जातिवैकल्येन यथा—

'न देवकन्यका नापि गन्धर्वकुलसंभवा ।
तथाप्येषा तपोभङ्गं विधातुं वेधसोऽप्यलम् ॥ १६६ ॥'

अत्र देवकन्यकात्वाभावेऽप्येषा वेधसोऽपि तपोभङ्गं विधातुमलमिति वर्णनीयाया रूपातिशयः प्रतीयते; सेयं प्रतीयमानविशेषहेतुर्जातिवैकल्यवती विशेषोक्तिः ॥

**न देवेत्यादि** । एषा न देवकन्या नापि गन्धर्ववंशजा तथापि वेधसो ब्रह्मणोऽपि तपोभङ्गं विधातुमलं समर्था । अत्र देवत्वादिजातिनिषेधो विशेषस्तु मानुषीत्वेन तत्कार्यकरणम् ॥

क्रियावैकल्येन यथा—

'न बद्धा भ्रुकुटिर्नापि स्फुरितो रदनच्छदः ।
न च रक्ताभवद्दृष्टिर्जितं च द्विषतां कुलम् ॥ १६७ ॥'

अत्र भ्रूभङ्गादेरभावेऽपि योऽयं द्विषतां जयस्तेन वर्णनीयस्य प्रतापातिशयः प्रतीयते; सेयं प्रतीयमानविशेषहेतुः क्रियावैकल्यवती विशेषोक्तिः ॥

**न बद्धेत्यादि।** भ्रूभङ्गो न बद्धः, अधरोऽपि न स्फुरितः, दृष्टिरपि न रक्ता कृत्ता, तथापि वीर, त्वया द्विषतां शत्रूणां कुलं जितम्। अत्र भ्रुकुटीत्यादिक्रियानिषेधात्क्रियावैकल्यम्। अतिशयस्तु लीलया शत्रुजयः ॥

आदिग्रहणाद्द्रव्यवैकल्येन यथा—

'न रथा न च मातङ्गा न हया न च पत्तयः।
स्त्रीणामपाङ्गदृष्ट्यैव जीयते जगतां त्रयम् ॥ १६८ ॥'

अत्र रथादेरभावेऽपि जगत्त्रयविजयहेतुः स्त्रीणामपाङ्गावलोकनमभिधीयते; सेयमभिधेयविशेषहेतुर्द्रव्यवैकल्यवती विशेषोक्तिः ॥

**न रथा इत्यादि।** न रथा न च हस्तिनो नाश्वा न वा पदातयः सन्ति तथापि स्त्रीणामपाङ्गदृष्ट्यैव कटाक्षेणैव लोकत्रयं जीयते। 'हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयम्।' इत्यमरः। तदिह सेनाङ्गनिषेधाद्द्रव्यवैकल्यम्, अतिशयस्तु तदभावेऽपि त्रिभुवनजयः। द्रव्यस्यापि वैकल्येनैकदेशविकलतया अपरा विशेषोक्तिः। प्रथमा द्रव्यवैकल्यवती, इयं तु द्रव्यैकदेशवैकल्यवतीति भेदः ॥

द्रव्यस्यापि वैकल्येन यथा—

'एकचक्रो रथो यन्ता विकलो विषमा हयाः।
आक्रामत्येव तेजस्वी तथाप्यर्को जगत्त्रयम् ॥ १६९ ॥'

अत्र रथादीनां द्रव्याणामेकचक्रत्वादिभिर्वैकल्येऽपि यदेतद्भगवतो भास्करस्य भुवनत्रयाक्रमणं तस्येह तेजस्विता हेतुरभिधीयते; सेयमभिधेयविशेषहेतुर्वैकल्यवद्द्रव्या नामापरा विशेषोक्तिः ॥

**एकेत्यादि।** रथस्यैकं चक्रम्, यन्ता सारथिरनूरुर्विकलश्चरणहीनः, अश्वा

---

१. 'भ्रुकुटिभङ्गादेः' इति क-पुस्तके पाठः.

विषमाः सप्त, तथापि रविस्तेजस्वी जगत्त्रयमाक्रामति । 'सप्ताश्वा नव दन्तिनः' इति नीतौ निषेधः । आक्रामतीत्यत्रोत्क्रमणाभावात् 'आङ उद्गमने १।३।४०' इति न तङ् । अत्र रथादीनामेकदेशविकलतेति द्वितीयेयम् ॥

द्रव्यस्य योगायोगाभ्यामवैकल्येनापि क्वचिदेषा विशेषायाविशेषाय च यथा—

'अयं तया रथक्षोभादंसेनांसो निपीडितः ।
एकः कृती शरीरेऽस्मिञ्शेषमङ्गं भुवो भरः ॥ १७० ॥'

अत्र 'अयं तया स्पृष्टोंऽसः स पुण्यवान्, तया चास्पृष्टं शेषमङ्गं मे निरर्थकम्' इति योऽयमवैकल्यदर्शनेऽपि विशेषस्तेनैषाहेतुमत्यपि हेतुमता विशेष्यमाणा यथोक्ता विशेषोक्तिर्भवति । या पुनरिहोर्वश्यामितो वाक्याद्गुणादिवैशिष्ट्यावगतिः सा पर्यायोक्तिर्न विशेषोक्तिः ॥

**अयमित्यादि** । अयमंसो बाहुमूलं तया स्त्रिया रतिलोभान्निजांसेन निपीडित इत्येक एवायं ममाङ्गे कृती रम्यः । शेषमङ्गं भूमेर्भरो भारजनकम् । शेषशब्दः कर्मघञन्तो वाच्यलिङ्गः । अङ्गभरशब्दयोरजहल्लिङ्गतयान्वयः । अत्रावैकल्यदर्शनेऽपि विशेषोक्तेरियमन्या भवति । ययनेन वाक्येनोर्वश्या गुणविशेषवत्त्वज्ञानं तदोक्तलक्षणाभावात्पर्यायोक्तिरेवेत्याह—**यत्पुनरिति** ॥ इति विशेषालंकारनिरूपणम् ।

## परिकरालंकारनिरूपणम् ।

परिकरं लक्षयति—

**क्रियाकारकसंबन्धिसाध्यदृष्टान्तवस्तुषु ।
क्रियापदाद्युपस्कारमाहुः परिकरं बुधाः ॥ ७२ ॥**

**क्रियेति** । क्रिया धात्वर्थः, कारकं कर्मादि, संबन्धी संबन्धवान्, साध्यं सिसाधयिषितम्, दृष्टान्तो निदर्शनम्, वस्तु पदार्थः । एषु क्रियापदादेरुपस्कारः परिष्कारः परिकरः । साभिप्रायविशेषणेन विशेष्योक्तिः परिकर इति लक्षणम् ॥

---

१. 'विशिष्टावगतिः' इति ख. ग.

तेषु क्रियापरिकरो यथा—

'ववसिअणिवेइअत्थो सो मारुइलद्धपच्चआगअहरिसम्।
सुग्गीवेण उरत्थलवणमालामलिअमहुअरं उवऊढो ॥ १७१॥'

[व्यवसितनिवेदितार्थः स मारुतिलब्धप्रत्ययागतहर्षम्।
सुग्रीवेणोरःस्थलवनमालामृदितमधुकरमुपगूढः ॥]

अत्र 'मारुतिलब्धप्रत्ययागतहर्षम्' इत्यनेन, 'उरःस्थलवनमालमृदितमधुकरम्' इत्यनेन चोपगूहनक्रियायाः परिकरितत्वादयं क्रियापरिकरः॥

**ववसिअ इत्यादि**। "व्यवसितनिवेदितार्थः स मारुतिलब्धप्रत्ययागतहर्षम्। सुग्रीवेणोरःस्थलवनमालामृदितमधुकरमुपगूढः॥" इह स विभीषणः सुग्रीवेणोपगूढ आलिङ्गितः। कीदृशः। व्यवसितस्य व्यवसायस्य निवेदितोऽर्थो येन सः। यद्वा व्यवसितश्चिकीर्षितो रामसाहाय्यरूपो निवेदितोऽर्थो येन सः। मारुतिना हनूमता लब्धप्रत्ययेन प्राप्तविश्वासेनागतहर्षं यथा स्यादेवमुरःस्थलस्य वनमालायां मृदिता मधुकरा यत्र तद्यथा स्यादेवमित्युपगूहनक्रियाया विशेषणद्वयम्। 'प्रत्ययः सहजे ज्ञाने विश्वासाचारहेतुषु।' इति मेदिनीकारः। अत्र प्रधानक्रियाया विशेषणद्वयेन परिष्कृतत्वात्क्रियापरिकरत्वम्॥

कारकपरिकरो यथा—

'पडिआ अ हत्थसिढिलिअणिरोहपण्डरसमूससन्तकवोला।
पेल्लिअवामपओहरविसमुण्णअदाहिणत्थणी जणअसुआ ॥१७२॥'

[पतिता च हस्तशिथिलितनिरोधपाण्डुरसमुच्छ्वसत्कपोला।
प्रेरितवामपयोधरविषमोन्नतदक्षिणस्तनी जनकसुता ॥]

अत्र 'हस्तशिथिलितनिरोधपाण्डुरसमुच्छ्वसत्कपोला' इत्यनेन, 'प्रेरितवामपयोधरविषमोन्नतदक्षिणस्तनी' इत्यनेन च 'जनकसुता' इति च कारकपदस्य परिकरितत्वादयं कारकपरिकरः॥

**पडिआअ इत्यादि**। "पतिता च हस्तशिथिलितनिरोधपाण्डुरसमुच्छ्वसत्कपोला। प्रेरितवामपयोधरविषमोन्नतदक्षिणस्तनी जनकसुता॥". इह जनकसुता

१. 'जनकसुता इत्यनेन च' इति ग.

सीता पतिता च । न केवलं मूर्च्छिता किंतु पतितापीति चकारार्थः । कीदृशी । हस्तेन शिथिलीकृतो निरोधो यन्त्रणं कपोलस्य अत एव पाणिपीडनत्यागात्पाण्डुरः समुच्छ्वसन् कपोलो यस्याः सा । यद्वा हस्तप्रहतनिरोधेन तत्संपर्कात्पाण्डुरः पीडनत्यागात्समुच्छ्वसन् कपोलो यस्याः सा । प्रेरितेन वामेन पयोधरेण स्तनेन विषमस्तिरश्चीन उन्नतो दक्षिणः स्तनो यस्याः सा । वामस्तनस्य चलनं प्रेरणमत्र रामादचिरभाविदुःखापनयनमिति सूचनम् । यद्वा स्त्रीणां वामः स्तनो निजो दक्षिणः पुरुषस्येति तेनैव पतिता । अत्र कर्तुः कारकतया तद्वाचकपदमेव परिष्कृतम् ॥

संबन्धिपरिकरो यथा—

'उम्मूलिआण खुलिआ उक्खिप्पन्ताण उज्जुअं ओसरिआ ।
णिज्जन्ताण णिराआ गिरीण मग्गेण पत्थिआ णइसोत्ता ॥१७३॥'

[उन्मूलितानां खण्डितान्युत्क्षिप्यमाणानमृजुकमपसृतानि ।
नीयमानानां निरायतानि गिरीणां मार्गेण प्रस्थितानि नदीस्रोतांसि ॥]

अत्रोद्ध्रियमाणगिरिसंबन्धिनोऽप्रयोजका अपि नदीप्रवाहा विशेषणैरुपस्कृता इति संबन्धिपरिकरोऽयम् ॥

**उम्मूलिआ इत्यादि** । "उन्मूलितानां खण्डितान्युत्क्षिप्यमाणानामृजुकमपसृतानि । नीयमानानां निरायतानि गिरीणां मार्गेण प्रस्थितानि नदीस्रोतांसि ॥" कीदृशानां कीदृशानि च । उन्मूलितानां चालनतः खण्डितानि, उत्क्षिप्यमाणानां ऋजुकमवक्रं यथा स्यादेवमपसृतानि, नीयमानानां निरायतानि वेगवशादवक्राणि च । अत्र नदीप्रवाहस्य संबन्धिनो विशेषणैः परिष्कारः ॥

साध्यपरिकरो यथा—

'धीरं हरइ विसाओ विणअं जोव्वणमओ अणङ्गो लज्जम् ।
एक्कन्तगहिअवक्खो किं सेसउ जं ठवेइ वअपरिणामो ॥१७४॥'

[धैर्यं हरति विषादो विनयं यौवनमदोऽनङ्गो लज्जाम् ।
एकान्तगृहीतपक्षः किं शिष्यतां यं स्थापयति वयःपरिणामः ॥]

अत्र गतवयसो न धैर्यम्, न विनयो, न लज्जेति साध्यं विषादयौवनमदानङ्गक्रियादृष्टान्तैरुपस्कृतमिति साध्यपरिकरोऽयम् ॥

धीरमित्यादि । "धैर्यं हरति विषादो विनयं यौवनमदोऽनङ्गो लज्जाम् । एकान्तगृहीतपक्षः किं शिष्यते यं स्थापयति वयःपरिणामः ॥" इह विषादो धैर्यं हरति, विनयमनौद्धत्यं वशित्वं वा यौवनमदो हरति, अनङ्गो लज्जां हरति । एकान्तेन गृहीतः पक्षो येन सः । अद्भुत इत्यर्थः । यद्वान्तःस्वरूपे एको गृहीतपक्षः सर्वहरस्वरूपो येन स वयःपरिणामो यत्स्थापयति स्थिरीकरोति तत्किं शिष्यतेऽवशिष्यते, किंतु सर्वमेव हरतीति भावः । अत्र साध्यस्य दृष्टान्तैः परिष्कारः ॥

दृष्टान्तपरिकरो यथा—

'मज्झट्ठिअधरणिहरं झिज्जइ अ समुद्दमण्डलं उव्वेलम् ।
रइरहवेअविअलिअं पडिअं विअ उक्कडक्खकोडिं चक्कम् १७५'

[मध्यस्थितधरणिधरं क्षीयते च समुद्रमण्डलमुद्वेलम् ।
रविरथवेगविगलितं पतितमिवोत्कटाक्षकोटि चक्रम् ॥]

अत्र प्रक्षिप्तमन्दरसमुद्रोदाहरणभूतं रविरथचक्रं 'उत्कटाक्षकोटि' इति विशेषणेन साम्यसिद्धये परिकरितमिति दृष्टान्तपरिकरोऽयम् ॥

मज्झेत्यादि । "मध्यस्थितधरणिधरं क्षीयते च समुद्रमण्डलमुद्वेलम् । रविरथवेगविगलितं पतितमिवोत्कटाक्षकोटि चक्रम् ॥" इह समुद्रमण्डलं क्षीयते च । चः पूर्वापेक्षया समुच्चये । कीदृशम् । मध्यस्थितो धरणिधरो मन्दरगिरिर्यत्र तत् । अत एवोद्वेलमुद्गतजलम् । 'वेला तत्तीरनीरयोः' इत्यमरः । सूर्यरथवेगेन स्खलितमनन्तरं पतितं चक्रमिव । चक्रं कीदृशम् । उत्कटा उद्भटा अक्षकोटिश्चक्राग्रं यत्र तत् । 'अक्षश्चक्रेऽपि पाशके' इति विश्वः । अत्र दृष्टान्तस्य साम्यार्थं विशेषणैः परिष्कारः ॥

वस्तुपरिकरो यथा—

'देवी पुत्रमसूत नृत्यत गणाः किं तिष्ठतेत्युद्भुजे
हर्षाद्भृङ्गिरिटावुदाहृतगिरा चामुण्डयालिङ्गिते ।
पायाद्वो जितदेवदुन्दुभिघनध्वानः प्रवृत्तस्तयो-
रन्योन्याङ्गनिपातजर्जरजरत्स्थूलास्थिजन्मा रवः ॥ १७६ ॥'

अत्र चामुण्डाभृङ्गिरिटिपरिष्वङ्गसंघट्टितपरस्परहृदयास्थिजन्मनः

शब्दस्य वस्तुतया परिगृहीतस्य 'देवी पुत्रमसूत—' इत्यादिभिः परिकरितत्वादयं वस्तुपरिकरः ॥

**देवीत्यादि ।** देवी गौरी पुत्रमसूत सूते स्म । ततो हे गणाः, नृत्यत नृत्यं कुरुत किमुपविष्टा भवथ इति कृत्वा उद्भुजे उत्तोलितबाहौ भृङ्गिरिटौ भृङ्गिनामके गणे चामुण्डया आलिङ्गिते सति तयोर्भृङ्गिरिटिचामुण्डयो रवः शब्दो वो युष्मान् पायाद्रक्षतु । चामुण्डया कीदृश्या । हर्षादुदाहृतोक्ता गीर्भृङ्गिरिटिवाणी यया तया । रवः कीदृशः । परस्पराङ्गसंबन्धेन जर्जरं स्फुटितं यज्जीर्णं स्थूलास्थि तस्माज्जन्म उत्पत्तिर्यस्य सः । जिता देवदुन्दुभेर्देवभेर्या निबिडध्वानस्य प्रवृत्तिर्येन सः । 'भेर्यामानकदुन्दुभी' इत्यमरः । अत्र शब्दविशेषस्य वस्तुत्वेन गृहीतस्य विशेषणैः परिष्कारः ॥

**क्रिया यथा समासेन तथा कृत्तद्धितादिभिः ।**
**विशेष्यते तदाहुस्तं क्रियापरिकरं परम् ॥ ७२ ॥**

**क्रियेति ।** यथा समासेन क्रिया विशेष्यते तथा यदि कृत्तद्धितादिभिर्विशेष्यते तदा क्रियापरिकर एव ॥

तत्र कृता तादर्थ्येन यथा—

'गेहाद्याता सरितमुदकं हारिका नाजिहीषे
मङ्क्ष्यामीति श्रयसि यमुनातीरवीरुद्गृहाणि ।
गोसंदायी विशसि विपिनान्येव गोवर्धनाद्रे-
र्न त्वं राधे दृशि निपतिता देवकीनन्दनस्य ॥ १७७ ॥'

अत्र 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् ३।३।१०' इत्यादिभिरुपपदभूतापि क्रियैव विशेष्यते, तेनायमपरः क्रियापरिकरो भवति । एवं लक्षणादिषु शत्रादिभिरपि द्रष्टव्यम् ॥

**गेहादित्यादि ।** हे राधे, त्वं देवकीनन्दनस्य कृष्णस्य दृशि नेत्रे न निपतितासि । त्वं गेहात्सरितं नदीं याता गता उदकं हारिका उदकमाहर्तुं न पुनराजिहीषे न पुनरागच्छसि । मङ्क्ष्यामि स्नास्यामीति कृत्वा यमुनातीरे वीरुधां लतानां गृहाणि श्रयस्याश्रयसि । गोसंदायी गवां बन्धनकारिणी सती गोवर्धनाद्रेर्वनान्येव

विशसि च। हारिकेति 'हृञ् हरणे' तुमुनर्थे ण्वुल्। आजिहीषे इति 'ओहाङ् गतौ' (आङ्पूर्वः)मध्यमपुरुषैकवचने 'श्लौ ६।१।१०'इति द्विर्वचनम्। 'भृञामित्७।४।७५' इत्याकारस्येत्त्वम्। मङ्क्ष्यामीति मस्जेर्लृटि उत्तमपुरुषे। 'मस्जेरन्त्यात्पूर्वं' इति नुमि नकारलोपे च रूपम्। 'लता प्रतानिनी वीरुद्' इत्यमरः। गोसंदायीति संदानं बन्धनम्। 'छान्द' इति प्रसिद्धम्। अत्र ण्वुलादिकृता तादर्थ्यपुरस्कारेण क्रिया विशेष्यते। **एवमिति**। यत्र 'लक्षणहेत्वोः।३।२।१२६', 'इङ्धार्योः शत्र-कृच्छ्रिणि २।२।१३०' इत्यनेन लक्षणादिशत्राद्यन्तेन क्रिया विशेष्यते तत्रापि क्रिया-परिकरो द्रष्टव्यः। यथा पुष्पात् स्ववृक्षे स्वयं गतः फलतस्तु समायात इत्यादि (?)॥

अव्ययेन यथा—

'सलीलमासक्तलतान्तभूषणं समासजन्त्या कुसुमावतंसकम्।
स्तनोपपीडं नुनुदे नितम्बिना घनेन कश्चिज्जघनेन कान्तया॥'

अत्र स्तनाभ्यामुपपीडयन्त्यायं नुनुदे इति। अर्थात् क्रियाविशेषणमेवैतदित्ययमपि क्रियापरिकरो भवति॥

एवं यथाविध्यनुप्रयोगादिष्वपि द्रष्टव्यम्। तेन क्रियायाः क्वचिदान्तरविशेषणयोगाद्व्यङ्ग्यत्वं भवतीत्यपि व्याख्यातम्॥

**सलीलमित्यादि**। कश्चिन्नायकः प्रियया जघनेन नुनुदे प्रेरितः। स्तनोपपीडं स्तनाभ्यामापीड्य। जघनेन कीदृशेन। नितम्बिना कटितटवता निबिडेन च। कान्तया कीदृश्या। सलीलं सविलासं यथा स्यादेवं पुष्पावतंसकं समासजन्त्या आरोपयन्त्या। कीदृशम्। आसक्तं संबद्धं लताभूषणं यत्र तत्। स्तनोपपीडमिति 'सप्तम्यां चोपपीड ३।४।४९' इति णमुल्। अत्र णमुलव्ययेन नोदनक्रियाया विशेषणं परिकरः॥ **एवमिति**। तत्र हि यस्माद्धातोर्लोडादिस्तस्मादेवाग्रिमप्रत्यय इति क्रियाया विशेषणत्वेन परिकरता॥

यथा—

'शय्यन्ते हतशायिकाः पथि तरुच्छायानिषण्णाध्वगैः
श्रीकण्ठायतनेषु धार्मिकजनैरास्यन्त उष्ट्रासिकाः।
शून्ये तत्र निकुञ्जशाखिनि सखि ग्रीष्मस्य मध्यंदिने
सज्जानां दयिताभिसारणविधौ रम्यः क्षणो वर्तते॥ १७९॥'

अत्र 'उष्ट्रासिका आस्यन्ते', 'हतशायिकाः शय्यन्ते' इत्यमूभ्यां सामान्यविशेषोपचरितरूपो भावात्मा ण्वुलैव प्रत्याय्यते । स आख्याताभ्यां सामान्यरूपेण, ण्वुलन्ताभ्यां विशेषरूपेण । बहुवचनं चेह कुत्सातिशयार्थम् । याहि नामोष्ट्रस्य कुत्सावत्यो बहुप्रकारवत्यो वक्षःसु आसिकाः, याश्च हतानामतिशयवत्यस्तथाभूता एव भूयस्यः शायिकाः प्रतीतास्ताभिर्विशेषरूपाभिरियमासिका शायिका चोपमानोपमेयसंबन्धजनितभेदाभेदपरिग्रहालङ्कारेणापि बहुत्वेनैव प्रत्याय्यते । तेनोष्ट्रासिका इवासनानि, हतशायिका इव शयनानि क्रियन्ते भवन्तीति वाक्यार्थो भवति, सोऽयं यथोक्तः क्रियापरिकरः ॥

**शय्यन्त इत्यादि** । पथि वृक्षच्छायोपविष्टपान्थैर्हतशायिका निन्दितशयनानीव शय्यन्ते शयनानि क्रियन्ते । श्रीकण्ठगृहेषु धार्मिकजनैस्तपस्विभिरुष्ट्रासिका इवोष्ट्रोपवेशनानीवास्यन्ते स्थीयन्ते । यथोष्ट्रो यत्र कुत्रचिदुपविशति तथा तपस्विभिरप्युपविश्यत इत्यर्थः । हे सखि, तत्र निकुञ्जशाखिनि निकुञ्जवृक्षे शून्ये विजने ग्रीष्मस्य मध्याह्ने सज्जानां सुसज्जानामभिसारिकाणां प्रियस्याभिसारणव्यापारे रम्यः क्षणो वर्तते । शय्यन्त इति 'शीङ् स्वप्ने' भावे यक् । शायिका इति 'धात्वर्थनिर्देशे ण्वुल् वक्तव्यः' इति शीङ्धातोः ण्वुल् । तथा च शायिकाः शयनानीत्यर्थः । श्रीकण्ठः शिवः । 'श्रीकण्ठः शितिकण्ठः कपालभृत्' इत्यमरः । आसिका इति । 'आस उपवेशने' 'धात्वर्थनिर्देशे ण्वुल् वक्तव्यः' इति ण्वुल् । तेन आसिका आसनानीत्यर्थः । 'सज्जः स्यात् संनद्धे संभृते त्रिषु' इति मेदिनीकारः । अत्र शयितापेक्षयोपविष्टस्याभिसरणे वारणीयत्वख्यापनार्थं विवरणे वैपरीत्यमाह—**अत्रेति** । अमूभ्यां वाक्याभ्याम् । सामान्यविशेषाभ्यां शय्यन्ते आस्यन्ते इति सामान्यम्, हतशायिका उष्ट्रासिकेति विशेषस्ताभ्यामुपरञ्चितमुपस्थापितं रूपं स्वरूपं यस्य सः । भावात्मा भावरूपो धर्म इति यावत् । प्रत्याय्यते बोध्यते । आख्याताभ्यामास्यन्ते शय्यन्त इत्यत्र । सामान्यरूपेण सामान्याकारेण । **ण्वुलेति** । उष्ट्रासिकाहतशायिकापदाभ्यामित्यर्थः । **विशेषेति** । विशेष्ये तयोः कथनादित्यर्थः । तर्हि भावस्यैकत्वादेकवचनं स्यात्तत्कथं बहुवचनं शय्यन्ते आस्यन्ते इति स्यादत आह—**बहुवचनमिति** । विशेषक्रियागतबहुत्वस्यैव सामान्यक्रियाया विवक्षितत्वाद्बहुवचनमित्यर्थः । विवक्षामूलं

कुत्साप्रतिपादनम् । कुत्सामेवाह—**या हीति** । तथा च तद्विशेषयोगाद्बहुत्वमित्येवाह—**ताभिरिति** । उपमानोपमेयसंबन्धेन जनितोऽभेदो यस्याः सा । भेदपरिग्रहाद्भेदपुरस्कारात् । लकारेण भावप्रत्ययेन । लकारवाच्यमर्थमाह—**तेनेति** ॥

क्वचित् पुनर्बाह्यमपि कृद्रूपं कृदर्थरूपं वा क्रियाविशेषणं भवति । यथा—

'शतं वारानुक्तः प्रियसखि वचोभिः स परुषैः
सहस्रं निर्धूतः पदनिपतितः पार्ष्णिहतिभिः ।
कियत्कृत्वो बद्धाः पुनरिह न वेद्मि भ्रुकुटय-
स्तथापि क्लिश्यन्मां क्षणमपि न धृष्टो विरमति ॥१८०॥'

अत्र 'वारान्' इति वारशब्दः कृदन्तः । वारसंख्यायाः कृत्वसुजिति कृत्वसुच् कृदर्थः । ताविमौ द्वावप्यावृत्तिरूपेण क्रियाया विशेषणं भवतः । नन्वेवमुष्ट्रासिकादीनां वारादीनां[1] च क्रियाविशेषणत्वात् कर्मतेव नपुंसकलिङ्गतापि प्राप्नोति । यथा—मृदु पचति, प्रशस्तं पठतीति । उच्यते । त्रिधा खलु क्रियाविशेषणं भवति—बाह्यम्, आभ्यन्तरम्, बाह्याभ्यन्तरं च । तत्र बाह्यं कर्मरूपं वारादि, आभ्यन्तरं विशेषरूपमुष्ट्रासिकादि, बाह्याभ्यन्तरं[2] गुणरूपं मृद्वादि । तेषु बाह्यं सोऽयमित्यभिधायासंबन्धादभेदोपचारेणाविचलितस्वरूपमेव[3] प्रधानं विशिषत् कथमिव स्वलिङ्गं जह्यात्, आभ्यन्तरं तु विशेषापरिग्रहादाविष्टलिङ्गसंख्यं कथमिवान्यलिङ्गं गृह्णीयात् । बाह्याभ्यन्तरं तु गुणत्वात् स्वलिङ्गविरहे 'गुणवचनानामाश्रयतो गुणवचनानि' इति विशेष्यलिङ्ग[4]ग्राह्येव भवति ॥

---

१. 'वारादीनाम्' ख. घ. २. 'बाह्याभ्यन्तररूपम्' ग. घ. ३. 'च प्रधानं विशिषत्' घ. ४. 'विशेष्यलिङ्गग्राह्यमेव' ख.

**शतमित्यादि** । हे प्रियसखि, तथापि स धृष्टो मां क्लिश्यन् क्षणमपि न विरमति न विरक्तो भवति । कीदृशः । परुषैर्निष्ठुरैर्वचनैः शतं वारान्यथा स्यादेवमुक्तः, पदे निपतितः, स च पार्ष्णिहतिभिः पादतलप्रहारैः सहस्रं वारान्निर्धूतश्चालितः, इह विषये भ्रुकुटयः पुनः कियत्कृत्वः कियद्वारान् न बद्धा इति न वेद्मि । वारानिति 'वृञ् वरणे' भावे घञ् । तेन वारपदमावृत्तिवचनं स्वत एव कियत्कृत्व इति । 'निष्ठुरं परुषं ग्राम्यम्' इत्यमरः । अत्र वारशब्दः कृदन्तः । कियत्कृत्व इत्यत्र वारसंख्यावाचकतायां कृत्वसुजिति कृदर्थता । कृदन्तस्य कृदर्थस्य चावृत्तिरूपेण पौनःपुन्यतया क्रियाविशेषणता । 'नपुंसकत्वं कर्मत्वं तुल्यत्वं च तथैकता । क्रियाविशेषणस्यैव मतं सूरिभिरादरात् ॥' इति मतमनुसृत्य क्लीबत्वमुष्ट्रासिकादीनां शङ्कते—**नन्विति** । समाधत्ते—**त्रिधेति** । यत्र धर्मधर्मिणोरभेदोपचारस्तत्र धर्मोऽजहत्स्वरूप एव धर्मिविशेषकः । सोऽयमित्यादौ विशेषरूपेण लिङ्गसंख्ययोरन्वये उष्ट्रासिकादौ कथमन्यलिङ्गग्रहः । 'गुणवचनानामाश्रयतो लिङ्गवचनानि' इति गुणरूपाणां विशेष्यलिङ्गता ॥

तद्धितकृत्वसुचोक्तः[1], थालादिनोच्यते—

यथा—

'अकृतकवलारम्भैर्भूयो भयस्थगितेक्षणाः
किमपि वलितग्रीवं स्थित्वा मुहुर्मृगपङ्क्तयः ।
गगनमसकृत्पश्यन्त्येतास्तथाश्रुघनैर्मुखे-
र्निपतति यथा शृङ्गाग्रेभ्यो भ्रमन्नयनोदकम् ॥ १८१ ॥'

अत्राद्यः प्रकारवचने थाल् अनेकवारानित्यर्थे 'असकृत्' इति तद्धितेन, 'पश्यन्ति' इति क्रियायाम्[2], 'वलितग्रीवम्' इति समासेन, 'किमपि' इति नाम्नाव्ययेन, 'स्थित्वा' इति कृता, 'मुहुः' इति कृदर्थे वीप्सया च क्रियाविशेषणेन सह विशेषयति, द्वितीयश्च 'यथा भ्रमन्नयनोदकं निपतति' इति शतृलक्षितया 'पतति' इति क्रियया[3] तमेवार्थमनुसंदधानः पूर्वक्रियाया एव विशेषणं भवति, सोऽयं[4] कृत्तद्धित-

१. तद्धितकृत्समासाव्ययोक्तस्थानादिनोच्यते' घ. २. 'क्रियाम्' 'क्रियायाः' वा भवेत्. ३. 'पतनक्रियया' क. ख. ४. 'योऽयम्' ग. घ.

समासाव्ययानां संनिपातरूपेऽपि क्रियापरिकरे 'यथा, तथा' इत्येतयोः प्राधान्यात्तद्धितेनैवोपदिश्यते ॥

**अकृतेत्यादि**। एला मृगपङ्क्तयस्तथा तेन प्रकारेण निबिडनेत्रजलैर्मुखैरसकृद्वारंवारं गमनं पश्यन्ति। यथा येन प्रकारेण नयनजलं भ्रमत् सत् शष्पाग्रेभ्यो निपतति। किं कृत्वा। अकृतकवलीयमैरास्यैः किमपि वलितग्रीवमुत्तोलितघाटाकं यथा स्यादेवं स्थित्वा। कीदृश्यः। भयेन स्थगिते निश्चले ईक्षणे यासां ताः। अत्र तथेत्यत्र प्रकारवचने थाल्। पश्यन्तीति क्रियायामनेनानेन क्रियाविशेषणेन सह विशेषयतीत्यन्वयः॥ असकृदिति 'एकस्य सकृच्च ५।४।१९' इति सुच्प्रत्ययः, सकृदादेशः संयोगान्तलोपश्च। तेन सकृच्छब्दस्तद्धिताधिकारीयः। पश्चान्नञ्समासः। चलिता ग्रीवा यत्रेति समासः। नाम्ना प्रातिपदिकेन। क्त्वाप्रत्ययः कृत्। **मुहुरिति**। वारंवारं स्थित्वेत्यत्र पूर्वकालिकावस्थान एव 'वीप्सेति कृदर्थे वीप्सा स्यादेवेत्यर्थः। **द्वितीय इति**। यथेत्यत्र थाल्। तमेवार्थं प्रकाररूपं संदधान उपस्थापयन् पूर्वक्रियायाः प्रधानक्रियायाः पश्यन्तीतिरूपाया विशेषणं भवति। तथा च कृत्वसुचा प्रत्ययेनोक्तं यत्स्थानं वारंवारादिलक्षणं तेन यदि तद्धित उच्यते तद्धितस्य वारंवारार्थता भवति तदायं परिकरभेदः कृत्प्रभृतीनां संनिपातरूपः समन्वयरूप इत्यर्थः॥

एतेन तद्यदोर्विपर्ययस्तद्विशेषणयोगश्च व्याख्यातः। तद्यथा—

'जह जह णिसा समप्पइ तह तह वेविरतरङ्गपडिमापडिअम्[1]।
किंकाअव्वविमूढं वेवइ[2] हिअअं व्व उअहिणो ससिबिम्बम्॥१८२॥'

[यथा यथा निशा समाप्यते तथा तथा वेपमानतरङ्गप्रतिमापतितम्।
किंकर्तव्यविमूढं वेपते हृदयमिवोदधेः शशिबिम्बम्॥]

अत्र 'यथा, तथा' इति क्रियाविशेषणयोरपरमपि विशेषणं वीप्सा भवति। सोऽयमेवंप्रकारः क्रियापरिकरो द्रष्टव्यः॥

**जह जहेत्यादि**। "यथा यथा निशा समाप्यते तथा तथा वेपमानतरङ्गप्रतिमापतितम्। किंकर्तव्यविमूढं [3]वेपते हृदयमिवोदधेः शशिबिम्बम्॥" इह

१. सेतुबन्धे 'वलिअम्' इति पाठः. २–३. सेतुबन्धे 'घोडइ' इति पाठः, 'घूर्णते' इति छाया च.

निशा यथा यथा समाप्यते स्वयं समाप्तिं याति । कर्मकर्तरि तङ् । तथा तथा शशिबिम्बं घूर्णते । कीदृशम् । वेपनशीलतरङ्गे प्रतिमया प्रतिबिम्बेन पतितम् । किंकर्तव्यमत्रेति विमूढं मुग्धमुदधेर्हृदयमिव । इवशब्द उत्प्रेक्षायाम् । अत्र तच्छब्द-यच्छब्दयोर्वैपरीत्यम् । यथा शशिबिम्बं घूर्णते तथा निशा समाप्यत इति वक्तव्ये यथोक्तं विपरीतम् । तद्विशेषणयोगः क्रियाविशेषणान्तरयोगो वीप्साकारितः ॥

क्रियाविशेषणं कैश्चित्संबोधनमपीष्यते ।
संबन्धिभिः पदैरेव लक्ष्यन्ते लक्षणादयः ॥ ७४ ॥

तेषु संबोधनपरिकरो यथा—

'धर्मस्योत्सववैजयन्ति मुकुटस्रग्वेणि गौरीपते-
स्त्वां रत्नाकरपत्नि जह्नुतनये भागीरथि प्रार्थये ।
त्वत्तोयान्तशिलानिषण्णवपुषस्त्वद्वीचिभिः प्रेङ्खत-
स्त्वन्नाम स्मरतस्त्वदर्पितदृशः प्राणाः प्रयास्यन्ति मे ॥१८३॥'

अत्र 'भागीरथि' इति संबोधनपदं 'धर्मस्योत्सववैजयन्ति' इत्यादिभिः परिष्क्रियते । तत्र यथाकथंचिदप्युच्यमानोऽर्थः क्रियाविशेषणत्वं नातिक्रामतीत्ययमपि क्रियापरिकरः ।

**धर्मस्येत्यादि** । हे भगीरथि भगीरथावतारिते हे गङ्गे, त्वामहं प्रार्थये धर्मस्योत्सवे वैजयन्ति पताकारूपे, हे भवानीपतेर्मुकुटमालारूपा वेणी प्रवाहो यस्यास्तादृशे, हे रत्नाकरस्य समुद्रस्य पत्नि जाये, हे जह्नुमुनिकन्यके । प्रार्थनाविषयमाह—मम प्राणाः प्रयास्यन्ति गमिष्यन्ति । कीदृशस्य । त्वत्तोयस्यान्ते समीपे शिलानिषण्णाङ्गस्य त्वद्वीचिभिः त्वत्तरङ्गैः प्रेङ्खतश्चलतस्त्वदीयं नाम स्मरतस्त्वदर्पितदृशस्त्वयि दत्तनेत्रस्य च । 'वैजयन्ती पताकायाम्' इति मेदिनीकारः । 'अन्तः शेषेऽन्तिके स्त्रियाम्' इति च । अत्र स्फुटक्रियाविशेषणत्वं नास्तीत्यत आह—**तत्रेति** । विशिष्टायाः प्रार्थनकर्मतया विशेषणस्याप्यन्वय इति यथाकथंचिदित्यस्यार्थः ॥

---

१. 'क्रियाविशेषणम्' क. ख.

लक्षणपरिकरो यथा—

'महाप्रथिम्ना जघनस्थलेन सा महेभकुम्भोच्चकुचेन वक्षसा ।
मुखेन दीर्घोज्ज्वललोलचक्षुषा वयस्य कान्ता कथय क वर्तते॥१८४॥'

अत्र जघनस्थलादीनि लक्षणानि महाप्रथिम्नेत्यादिभिः परिष्क्रियन्ते; सोऽयं लक्षणपरिकरः ॥

महावाक्यस्थसंबन्धिपदैर्लक्षणादयो यत्र लक्ष्यन्ते स परिकर एवेत्युक्तं विवृणोति—**लक्षणेति** ॥ **महेत्यादि** । हे वयस्य मित्र, त्वं कथय सा कान्ता क्व वर्तते । कीदृशी । महान् प्रथिमा स्थूलत्वं यस्य तेन जघनस्थलेन लक्षिता । महाकुम्भिकुम्भस्थलादप्युच्चौ कुचौ यत्र तेन हृदयेन लक्षिता । दीर्घे, उज्ज्वले, निर्मले, लोले चपले चक्षुषी यत्र तेन मुखेन लक्षिता च । इह लक्षकपदानां संबन्धिभिर्विशेषणैः परिष्कारः ॥

हेतुपरिकरो यथा—

'त्वया जगन्ति पुण्यानि त्वय्यपुण्या जनोक्तयः ।
नाथवन्तस्त्वया लोकास्त्वमनाथा विपद्यसे ॥ १८५ ॥'

अत्र प्रथमतृतीयपादयोः 'त्वया, त्वया' इति हेतू द्वितीयचतुर्थपादाभ्यां परिष्क्रियेते; सोऽयं हेतुपरिकरः ॥

आदिपदग्राह्यं हेत्वादि । तत्र हेतावाह—**हेत्विति** । **त्वयेत्यादि** । त्वया जगन्ति पवित्राणि । त्वयि जनोक्तयोऽपुण्या अकुशलाः । त्वया लोका जना नाथवन्तः सरक्षकाः । त्वमनाथा अशरणा विपद्यसे विपन्ना भवसि । अत्र हेतुद्वयपरिष्कारो व्यक्त एव ॥

सहार्थपरिकरो यथा—

'अनेन यूना सह पार्थिवेन रम्भोरु कच्चिन्मनसो रुचिस्ते ।
सिप्रातरङ्गानिलकम्पितासु विहर्तुमुद्यानपरम्परासु ॥१८६॥'

---

१. 'त्वया पुण्या' क-घ. २. मुद्रित उत्तररामचरिते 'विपत्स्यसे' इति पाठः.

अत्र 'अनेन' इति सहार्थः 'यूना, पार्थिवेन' इति च पदाभ्यां परिष्क्रियते; सोऽयं सहार्थपरिकरः ॥

**अनेनेत्यादि** । हे रम्भोरु, अनेन तरुणेन भूपेन सह तव मनसो रुचिरभिलाषः कच्चित्कथयेत्यर्थः । किमर्थम् । वनपङ्क्तिषु विहर्तुं क्रीडां कर्तुम् । कीदृशीषु । सिप्रा नदीभेदस्तत्तरङ्गसंगिवायुना कल्पितासु । 'कच्चित्कामप्रवेदने' इत्यमरः । अत्रानेनेति 'सहयुक्तेऽप्रधाने २।३।१९' इति तृतीया । तत्प्रतिपाद्यः सहार्थोऽत्र विशेषणाभ्यां परिष्क्रियते ॥

तादर्थ्यपरिकरो यथा—

'इन्दीवरश्यामतनुर्नृपोऽयं[1] त्वं रोचनागौरशरीरयष्टिः ।
अन्योन्यशोभापरिवृद्धये वां योगस्तडित्तोयदयोरिवास्तु १८७'

अत्र 'अन्योन्यशोभापरिवृद्धये' इति तादर्थ्यार्थः शेषपदार्थैः परिष्क्रियते; सोऽयं तादर्थ्यपरिकरः ॥

**इन्दीवरेत्यादि** । वां युवयोर्योगः संबन्धः परस्परशोभासंपत्त्यै भवतु । विद्युन्मेघयोरिव, यथा तयोर्योगः परस्परशोभार्थं तथेत्यर्थः । अयं नृपो नीलनलिनश्यामाङ्गः, त्वं च गोरोचनावत् गौराङ्गयष्टिः । अत्र परिवृद्धये इति तादर्थ्ये चतुर्थीति तादर्थ्यार्थपरिष्कारः ॥

उपपदपरिकरो यथा—

'प्रत्यक्षवस्तुविषयाय जगद्धिताय
विश्वस्थितिप्रलयसंभवकारणाय ।
सर्वात्मने विजितकोपमनोभवाय[2]
तुभ्यं नमस्त्रिभुवनप्रभवे शिवाय ॥ १८८ ॥'

अत्र 'नमस्तुभ्यम्' इत्युपपदार्थः समस्तपदैः परिष्क्रियते; सोऽयमुपपदपरिकरः ॥

---

१. मुद्रितरघुवंशपुस्तकेषु 'नृपोऽसौ' इति पाठः. २. 'काममनोभवाय' घ.

**प्रत्यक्षेत्यादि** । तुभ्यं नमः । कीदृशाय । प्रत्यक्षो वस्तूनां पदार्थानां विषयो रूपादिकं यस्य तस्मै । यद्वा प्रत्यक्षौ वस्तुविषयौ पदार्थघटपटादी यस्य तस्मै । पदार्थं इह स्वर्गापूर्वदेवतादिः । 'रूपादौ विषयः पुमान्' इति मेदिनीकारः । जगतां हितोयोपकारकाय । विश्वस्य भुवनस्य स्थितिरवस्थानम्, प्रलयो नाशः, संभव उत्पत्तिस्तेषां हेतवे । सर्वं वस्तु आत्मा स्वं यस्य तस्मै । सर्वरूपायेत्यर्थः । विजितौ रोषकामौ येन तस्मै । त्रिभुवनस्य प्रभवे ईश्वराय शिवाय कल्याणकारकाय च । अत्र 'नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च २।३।१६' इति तुभ्यमिति नमोयोगे उपपदविभक्तिश्चतुर्थी तदर्थं इतरपदार्थैः परिष्क्रियते ॥

**उपमारूपकादीनां शब्दार्थोभयभङ्गिभिः ।**
**साधर्म्योत्पादनं यत्तन्मन्ये परिकरं विदुः ॥ ७५ ॥**

**उपमेति** । उपमादीनां शब्दार्थोभयभङ्गिभिर्यत्साधर्म्योत्पादनं स परिकरः । शब्दश्चार्थश्चोभयं च तेषां भङ्गिभिर्भजनैः ॥

तत्र सशब्दकृत उपमायां यथा—

'कह कह विरएइ पअं मग्गं पुलएइ छेज्जमाविसइ ।
चोरव कई अत्थं लद्धुं दुक्खेण णिव्वहइ ॥ १८० ॥'
[कथं कथं विरचयति पदं मार्गं प्रलोकते छेद्यमाविशति ।
चोर इव कविरर्थं लब्धुं दुःखेन निर्वहति ॥]

अत्र पदमार्गच्छेद्यैः शब्दैर्भिन्नार्थैरभिन्नार्थविरचनादिक्रियानिवेशिभिः कविचोरयोरप्रसिद्धमौपम्यं साधितमिति शाब्दोऽयमौपम्यपरिकरः ॥

**कह इत्यादि** । 'कथं कथमपि रचयति । पदं मार्गं प्रलोकते छेद्यमाविशति । चौर इव कविरर्थं लब्धुं दुःखेन निर्वहति ॥' इह कविरर्थं वाच्यं लब्धुं प्राप्तुं दुःखेन निर्वहति समर्थो भवतीत्यर्थः । चौरसाम्यमाह—कथं कथमपि कष्टसृष्ट्या पदं विभक्त्यन्तरं रचयति, कुत्रकुत्रापि वा पदं रचयति, मार्गं कविवर्त्म प्रलोकते पश्यति । अनेन पथा कविभिः किं गतमित्यनुसंदधातीत्यर्थः । छेद्यं छेदनीयमशुद्धमाविशति । चौर इव । यथा चौरः क्वापि कथमपि पदं व्यवसायं पादं वा रचयति, मार्गं गतागतवर्त्म पश्यति, छेद्यं छेदार्हं स्थानं प्रविशति, अर्थं साधुधनं प्राप्तुं दुःखेन शक्नोति तथेत्यर्थः । अत्र साम्यापादकविशेषणैरुपमा असिद्धापि साधिता ॥

अर्थकृतो रूपके यथा—

'विअडे गअणसमुद्दे दिअसे सूरेण मन्दरेण व महिए ।
णीइ मइरब्व संज्झा तिस्सा मग्गेण अमअकलसो व्व ससी ॥१९०॥'

[विकटे गगनसमुद्रे दिवसे सूर्येण मन्दरेणेव मथिते ।
निर्याति मदिरेव संध्या तस्या मार्गेणामृतकलश इव शशी ॥]

अत्र गगने समुद्रत्वेन रूपिते सूर्यसंध्याशशिभिः, मन्दरमदिराऽमृतकलशैश्च मथनादिक्रियानिवेशिभिरर्थैः परस्परोपमानात्साधर्म्यमुत्पादितमित्यर्थोऽयं रूपकपरिकरः ॥

**विअडे इत्यादि** । 'विकटे गगनसमुद्रे मन्दरेणेव (महिते) मथिते । निर्गच्छति मदिरेव संध्या तस्या मार्गेणामृतकलश इव शशी ॥' इह संध्या निर्गच्छति । विकटे महति गगनसमुद्रे मन्दरगिरिणेव रविणा दिवसे महिते पूजितेऽथ च मथिते सति मदिरेव यथा मन्दरमथिते समुद्रे मदिरा निर्गच्छति तथेत्यर्थः । तस्याः संध्याया मार्गेण यथा चन्द्रोऽमृतकलश इवास्ति निर्गच्छति वा । आकाङ्क्षाक्रमेण निर्गच्छतिरुभयान्वयी । अत्र सूर्यादिभिरर्थैरन्योन्योपमानात्साधर्म्योपपत्तिरित्यार्थोऽयम् ॥

उभयकृतश्च विसेधश्लेषे[1] यथा—

'रइअमुणालाहरणो णलिणदलत्थइअ[2]पीवरत्थणअलसो ।
वहइ पिअसंगमम्मि वि मअणाअप्पपसाहणं जुअइजणो ॥१९१॥'

[रचितमृणालाभरणो नलिनदलस्थगितपीवरस्तनकलशः ।
वहति प्रियसंगमेऽपि मदनाकल्पप्रसाधनं युवतिजनः ॥]

अत्र 'प्रियसंगमेऽपि मदनाकल्पप्रसाधनं भवति' इति विरुद्धार्थयोः साधर्म्योत्पादनार्थं[3] जले क्रीडतो युवतिजनस्य यथोक्तविशेषणाभ्यां

१. 'विरोधश्लेषयोः' क. 'विरोधश्लेषो' ख. २. 'च्छइअ' ग. घ. ३. अत्र 'अन्येष्वपि दृश्यते' इति भाष्यम् । अपिशब्दः सर्वोपाधिव्यभिचारार्थः । तेन असिध्यतिरिक्तादपि धातोर्भवितुमर्हतीति वैयाकरणाः.

शब्दतोऽर्थतश्चोपस्कारः कृत इत्युभयकृतोऽयं विरोधश्लेषपरिकरः। एवमलंकारान्तरेष्वपि द्रष्टव्यम्॥

रइअ इत्यादि। 'रचितमृणालाभरणो नलिनीदलोत्थगितपीवरस्तनकलशः। वहति प्रियसंगमेऽपि मदनाकल्पप्रसाधनं युवतिजनः॥' इह युवतिजनः पतिसंगमेऽपि मदनस्याकल्प उत्कण्ठा तदर्थं प्रसाधनमलंकारं वहति। कीदृशः। कृतमृणालालंकारः। पद्मिनीपत्रैरुत्थगित उत्तम्भितः। आवृत इति यावत्। पीवरकुचघटो येन सः। उत्थगित इति उत्पूर्वात् 'थगि (छगे) संवरणे' कर्मणि क्तः। 'आकल्पकस्तमोमोहग्रस्ताबू( न्थिषू )त्कलिकामुदोः।' इति मेदिनीकारः। यद्वा मदनस्य रतिपतेराकल्पकमज्ञनकं प्रसाधनमित्यर्थः। अत्र प्रियसंगमे कामजनकमेव प्रसाधनं युक्तमिह तु तद्वैपरीत्येन विरुद्धार्थता। जलक्रीडायां तु मृणालनलिनीभ्यां युवतेरुपस्कारः शाब्द आर्थश्च व्यक्त एव॥

**एकावलीति या सापि भिन्ना परिकरान्न हि।**
**त्रिधा सापि समुद्दिष्टा शब्दार्थोभयभेदतः॥ ७६॥**

पूर्वं प्रति यत्रोत्तरस्य वस्तुनो वीप्सया विशेषणत्वेन स्थापनं निषेधो वा सैकावली। इयमपि परिकरादभिन्नैवेत्याह—**एकावलीति**। एकेनापरस्य परिष्करणमेकावल्यामपि लभ्यते इत्यनयोरभेद इत्यर्थः॥

तत्र शब्दैकावली यथा—

'पर्वतभेदि पवित्रं जैत्रं नरकस्य बहुमतङ्गहनम्।
हरिमिव हरिमिव हरिमिव वहति पयः पश्यत पयोष्णी॥१९२॥'

अत्र 'हरिमिव, हरिमिव, हरिमिव' इति शब्दैकावल्या विभिन्नार्थया 'पयः'कर्मकारकमुपस्क्रियते; सेयं शब्दैकावली परिकरस्यैव भेदः॥

**पर्वतेत्यादि**। इयं पयोष्णी नदीभेदः पयो जलं वहति तत्पश्यत। वाक्यार्थस्यैव वा कर्मता। पयः कीदृशम्। पर्वतस्याद्रेर्भेदनशीलम्। अद्रिं भित्त्वा वहनात्। पवित्रं पुण्यहेतुकम्। नरकस्य निरयस्य जैत्रमत एव बहुमतमनेकसंमतं गहनमगाधम्। हरिरिन्द्रस्तमिव। इन्द्रं कीदृशम्। 'अद्रिपक्षस्य छेद्यत्वेन पर्वतभेदी पविना वज्रेण त्रायते 'अन्यत्रापि दृश्यते' इति त्रः पवित्रः। पश्चात्कर्मधारयः।

यद्वा पर्वतभेदिना पविना त्रायते इति पर्वतभेदिपवित्रस्तम् । हे नर नल इति संबोधनम् । रलयोरेकत्र स्मरणात् । कस्य बहुमतमीषन्मतं जैत्रं किंतु सर्वस्यैव संपूर्णमेव स्वीकृतम् । बहुमतमितीषदसमाप्तौ बहुच् । स चादौ भवति 'विभाषा सुपो बहुच् पुरस्तात्तु ५।३।६८' इति सूत्रेण । गहनं कठोरम् । हरिः सिंहस्तमिव पर्वतस्य । भिद्यत इति भेदो विवरम् । गुहेति यावत् । तत्संबद्धं तच्छायित्वात् । पवित्रं श्वेतं नरकस्य प्रशस्तपुंसोऽपि जेतारम् । बहुबहुमानविषयो मतङ्गो मुनिभेदो येषां ते बहुमतङ्गा हस्तिनस्तेषां पितृत्वेन तस्य पूज्यत्वात् तान् हन्ति तम् । हरिर्विष्णुस्तमिव । पर्वतस्य गोवर्धनस्य भेदकमुत्थापकत्वात् । पवेर्वज्रात् त्रः त्राणं यस्मात्तत् । विष्णुस्मरणस्य तदपि फलम् । नरकस्य दैत्यभेदस्य जैत्रम् । बहुमतङ्गान् हिंस्रान् हन्ति यस्तम् । हरिर्वायुस्तमिव सोऽप्यतिवेगित्वादद्रिभेदी, पवित्रः पवनत्वात् । अत एव नरकस्य कश्मलस्य निवारकः । बहूनां वातयोगिनां स्वीकृतः गहनः कष्टेन परिचेयश्च भवति । 'इन्द्रे सिंहेऽनिले विष्णौ हरिः शमनसूर्ययोः ।'[1] इति शाश्वतः । अत्र हरिमिवेत्यादिशब्दरूपैकावल्या विशेषणत्वेन पयोरूपस्य कर्मकारकस्य परिष्कारः ॥

अर्थैकावली यथा—

'किमिति कबरी यादृक् तादृग् दृशौ किमकज्जले
　　न खलु लिखिताः पत्त्रावल्यः किमद्य कपोलयोः ।
अयमयमयं किंच क्राम्यत्यसंसरणेन ते
　　प्रियसखि सखीहस्तन्यस्तो विलासपरिच्छदः ॥१९३॥'

अत्र 'अयमयमयम्' इति सर्वनामपरामृश्यमानया प्रागुपन्यस्तकारणभूतया ततोऽन्यया वा तथाविधयार्थैकावल्या 'परिच्छदः' इति कर्तृकारकमभिन्नार्थ इव परिष्क्रियते; सेयमर्थैकावली परिकरस्यैव भेदः ॥

**किमित्यादि** । हे शशिमुखि, सखीहस्तारोपितोऽयमयं विलासार्थं परिच्छदस्तवासंस्मरणेन किंचित्क्राम्यति । तदाह—कबरी केशवेशः । किमिति यादृक् तादृक् । न रम्य इत्यर्थः । 'कबरी केशवेशः स्यात्' इत्यमरः । दृशौ नेत्रे अकज्जले

१. शाश्वतकोषे तु 'इन्द्रचन्द्राश्ववातार्कशुकभेकयमाहिषु । कपौ सिंहे सुवर्णाभे वर्णे विष्णौ हरिं विदुः ॥' इति विद्यते ।

किम्, कपोलयोः पत्रावल्योऽद्याधुना किं नैव लिखिताः। खलुशब्दोऽवधारणे वाक्यभूषायां वा। अत्रायमिति सर्वनामोपस्थापितयार्थैकावल्या तुल्ययैव परिच्छेदरूपस्य कर्तृकारकस्य परिष्कारः ॥

उभयैकावली यथा—

'अम्बा तुष्यति न मया न स्नुषया सापि नाम्बया न मया।
अहमपि न तया न तया वद राजन् कस्य दोषोऽयम् ॥१९४॥'

अत्राम्बास्नुषास्मदर्थलक्षणैरर्थैस्तद्वाचिभिः सर्वनामभिः शब्दैरेकावलीक्रमेण मिथोऽनुस्यूतैर्मिथोऽनुस्यूत एव 'तुष्यति' इति क्रियाहेतुर्मयेत्यादिभिः परिष्क्रियते; सेयमुभयग्रथितत्वादुभयैकावली परिकरस्यैव भेदः ॥

**अम्बेत्यादि**। अम्बा माता न मया तुष्यति तुष्टा भवति। न स्नुषया पुत्रवध्वा तुष्यति। सापि स्नुषा नाम्बया न मया च तुष्यति। अहमपि न तयाम्बया न तया स्नुषया च तुष्यामि। हे राजन्, कस्य दोषोऽयमिति वद। वदेत्यत्र वाक्यार्थस्यैव कर्मता। 'अम्बा माताम्बिकापि च' इति रत्नकोषः। 'समाः स्नुषाजनीवध्वः' इत्यमरः। अत्राम्बाद्यर्थैस्तद्वाचकशब्दैश्च मयेत्यादेः परिष्कारः ॥ इति परिकरालंकारनिरूपणम् ॥

## दीपकालंकारनिरूपणम्।

दीपकं लक्षयति—

**क्रियाजातिगुणद्रव्यवाचिनैकत्रवर्तिना।**
**सर्ववाक्योपकारश्चेद्दीपकं तन्निगद्यते ॥ ७७ ॥**
**अर्थावृत्तिः पदावृत्तिरुभयावृत्तिरावली।**
**संपुटं रसना माला चक्रवालं च तद्भिदाः ॥ ७८ ॥**

**क्रियेत्यादि**। एकत्र स्थितेन जात्यादिवाचिना पदेन यदि सर्ववाक्योपकारः क्रियते तदा दीपकम्। दीपयतीति दीपकमित्यन्वर्थं नाम। अष्टधा तदित्याह—**अर्थेति**। तस्य दीपकस्य भिदा भेदाः ॥

तेषु क्रियावाचिना आदिदीपकं यथा—

'चरन्ति चतुरम्भोधिवेलोद्यानेषु दन्तिनः ।
चक्रवालाद्रिकुञ्जेषु कुन्दभासो गुणाश्च ते ॥ १९५ ॥'

अत्र 'चरन्ति' इति क्रियया द्वयोरपि वाक्ययोरादिपदस्थयैवोपकारः क्रियत इत्यादिदीपकमिदं क्रियाविषयमुच्यते । एवं मध्यान्तयोरपि द्रष्टव्यम् ॥

**चरन्तीत्यादि** । तव दन्तिनो हस्तिनश्चतुःसमुद्रकूलवनेषु चरन्ति । कुन्दपुष्पदीप्तयो निर्मलास्तव गुणाश्च चक्रवालस्य लोकालोकस्याद्रेः कुञ्जेषु चरन्ति गच्छन्ति । अत्र क्रियावाचिना चरन्तीति पदेनादिस्थेन वाक्यद्वयं दीपितम् । मध्यस्थितेन वा क्रियापदेन यत्र वाक्यदीपनं तदपि मध्यदीपकमन्तदीपकं चेति मन्तव्यमित्याह—**एवमिति** ॥

जातिवाचिना आदिदीपकं यथा—

'पवनो दक्षिणः पर्णं जीर्णं हरति वीरुधाम् ।
स एव च नताङ्गीनां मानभङ्गाय कल्पते ॥ १९६ ॥'

अत्र 'पवनः' इत्यादिपादे जातिपदं तेनादिदीपकमिदं जातिविषयमुच्यते । एवं मध्यान्तयोरपि द्रष्टव्यम् ॥

**पवन इत्यादि** । दक्षिणः पवनो मलयानिलो वीरुधां लतानां जीर्णं पक्वं पर्णं पत्रं हरति । स एव पवनो नागरीणां मानभङ्गाय कल्पते शक्तो भवति । अत्र पवनपदस्य सामान्यत एवोभयत्रान्वयाज्जातिवाचकत्वमादिस्थत्वं च । एवं चेत्ययं समुदायोऽत्यन्तमभेदमाह । मध्यान्तस्थयोरपि जातिवाचिनोर्दीपकं तत्तन्नाम्ना ज्ञेयमित्याह—**एवमिति** ॥

गुणवाचिना आदिदीपकं यथा—

'श्यामलाः प्रावृषेण्याभिर्दिशो जीमूतपङ्क्तिभिः ।
भुवश्च सुकुमाराभिर्नवशाद्वलराजिभिः ॥ १९७ ॥'

अत्र 'श्यामलाः' इत्यादिपादे गुणपदं तेनादिदीपकमिदं गुणविषयमुच्यते । एवं मध्यान्तयोरपि द्रष्टव्यम् ॥

**श्यामला इत्यादि ।** प्रावृषेण्याभिर्वर्षजाताभिर्जीमूतपङ्क्तिभिर्मेघसंघैर्दिशः श्यामलाः श्यामाः । रम्याभिर्नूतनतृणपङ्क्तिभिर्भुवश्च श्यामलाः सन्ति । 'कालश्यामलमेचकाः' इत्यमरः। अत्र जाते इत्यर्थे 'प्रावृष एण्यः ४।३।१७' इत्येण्यप्रत्ययः। 'घनजीमूतमुदिर' इत्यमरः। 'शाद्वलः शादहरिते' इति च। 'शादः स्यात्कर्दमे शस्ये' इति मेदिनीकारः। अत्र श्यामलपदेन गुणवाचिनानादिस्थेन दीपनम्। मध्यान्तस्थयोरपि गुणवाचिनोरेवं ज्ञेयमित्याह—**एवमिति** ॥

द्रव्यवाचिना आदिदीपकं यथा—

'विष्णुना विक्रमस्थेन दानवानां विभूतयः।
क्वापि नीताः कुतोऽप्यासन्नानीता देवतर्द्धयः ॥ १९८ ॥'

अत्र 'विष्णुना' इत्यादिपादे द्रव्यपदं तेनादिदीपकमिदं द्रव्यविषयमुच्यते । एवं मध्यान्तयोरपि द्रष्टव्यम् ॥

**विष्णुनेत्यादि ।** दानवानां दनोरपत्यानामसुराणां विभूतयः संपत्तयो विक्रान्तेन विष्णुना क्वापि नीताः प्रापिताः। तेनैव देवतानामृद्धयः श्रियः कुतोऽप्यवधिभूतादानीता आसन् स्थिताः। 'संशतौ (?) वुपचये ऋद्धिः' इति नानार्थः। अत्र विष्णुशब्दो द्रव्यपर आदिस्थश्च । मध्यान्तस्थयोरपि द्रव्यवाचिनोरेवं द्रष्टव्यमित्याह—**एवमिति** ॥

अर्थावृत्तिर्यथा—

'हृष्यति चूतेषु चिरं तुष्यति बकुलेषु मोदते मरुति।
इह हि मधौ कलकूजिषु पिकेषु च प्रीयते कामी ॥१९९॥'

अत्र 'हृष्यति, तुष्यति, मोदते, प्रीयते' इत्येतैः पदैः स एवार्थ आवर्त्यमानः सर्ववाक्यानि दीपयति; सेयमर्थावृत्तिर्दीपकस्य भेदः ॥

**हृष्यतीति ।** कामी इह मधौ वसन्ते चूतेषु हृष्यति हृष्टो भवति । बकुलेषु तुष्यति । मरुति वाते मोदते । कलरवेषु कोकिलेषु च प्रीयते प्रीतो भवति । सर्वत्र चिरमित्यन्वयः । हिरवधारणे । प्रीयत इति 'प्रीङ् प्रीतौ' दैवादिकः । अत्र हृष्यतीत्यादिपदैरावर्तमानोऽर्थः सर्ववाक्यदीपकः ॥

---

१. 'संपत्तावुपचये ऋद्धिः' इति भवेत्. २. 'प्रीयते' ग. घ. नास्ति.

पदावृत्तिर्यथा—

'उत्कण्ठयति मेघानां माला वृन्दं कलापिनाम् ।
यूनामुत्कण्ठयत्यद्य मानसं मकरध्वजः ॥ २०० ॥'

अत्रोद्ग्रीवं करोति, उत्कण्ठावन्तं करोतीत्यर्थयोः 'उत्कण्ठयति' इति पदमावर्त्यमानं वाक्यद्वयमपि दीपयति; सेयं पदावृत्तिर्दीपकस्य भेदः ॥

**उत्कण्ठयतीत्यादि** । मेघानां पङ्क्तिः, मयूराणां वृन्दं समूहमुत्कण्ठयत्युद्ग्रीवयति । अद्येदानीं कामश्च यूनां चित्तमुत्कण्ठयत्युत्सुकयति । अत्रोत्कण्ठयतीति पदमावर्त्यमानं वाक्यद्वयदीपकम् ॥

उभयावृत्तिर्यथा—

'जय देव भुवनभावन जय भगवन्निखिलवरद निगमनिधे ।
जय रुचिरचन्द्रशेखर जय मदनान्तक जयादिगुरो ॥ २०१ ॥'

अत्र जयेत्यर्थः शब्दश्चावर्त्यमानः सर्ववाक्यानि दीपयति; सेयमुभयावृत्तिर्दीपकस्य भेदः ॥

**जयेत्यादि** । हे देव महादेव, भुवनस्य जगतो भावन जनक, जय । हे भगवन्नखिलेषु जनेषु वरप्रद, निगमस्य वेदस्य निधे आश्रय, जय । रम्यचन्द्रचूड, जय । मदननाशक, जय प्रथमगुरो, जय । 'निगमो नगरे वेदे' इति मेदिनीकारः[१] । अत्र जयशब्दस्तदर्थश्चावर्त्यमानः सर्ववाक्यदीपकः ॥

आवली यथा—

'त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह-
स्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च ।
परिच्छिन्नामेवं त्वयि परिणता बिभ्रति गिरं
न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि ॥२०२॥'

अत्र पूर्वार्धे त्वमिति शब्दार्थयोः प्रथमावृत्तिः प्रथमपादस्यया

१. 'निगमो वाणिजे पुर्यां कटे वेदे वणिक्पथे' इति मेदिनी.

'असि' इति क्रियया दीप्यते। ततस्तृतीयपादे 'त्वयि' इति रूपान्तरेण युष्मदर्थ आवर्त्यमानः क्रियान्तरेण संबध्यते, चतुर्थपादे पुनरपि तेनैव रूपेणास्त्यर्थेन भवतिना संबध्यत इति; सेयं वृत्तीनामावृत्तिरावलीति दीपकस्यैव भेदो भवति॥

**त्वमित्यादि**। परिणताः परिणामिनोऽर्कादयस्त्वयि त्वद्विषय एवं परिच्छिन्नां गिरं वाणीं बिभ्रति धारयन्ति। इह जगति यत्तत्त्वं वस्तु त्वं न भवसि तत्तत्त्वं वयं पुनर्न विद्मो न जानीमः। सर्वात्मकत्वाद्भवस्य। परिच्छिन्नवाणीमाह—त्वमादित्यस्त्वं चन्द्रस्त्वं वायुस्त्वमग्निस्त्वं जलं त्वमाकाशम्। उ हे। त्वं भूमिस्त्वमात्मा चासीति। 'उ संबोधनशेषोक्त्योः' इति मेदिनीकारः॥ अत्र प्रथमार्धे त्वमितिशब्दार्थयोरावृत्तिरसीतिक्रियया दीपिता, तृतीयपादे त्वयीतिरूपान्तरेण विषयत्वेन युष्मदर्थस्त्वमित्येवंरूपो धारणक्रियान्वयी। अन्त्यपादेऽपि त्वमित्येव भवनान्वयीत्यावृत्तीनामावृत्तिरावलीति॥

संपुटं यथा—

'णवपल्लवेसु लोलइ घोलइ विडवेसु चलइ सिहरेसु।
थवइ थवएसु चलणे वसन्तलच्छी असोअस्स॥२०३॥'

[नवपल्लवेषु लोलति घूर्णते विटपेषु चलति शिखरेषु।
स्थापयति स्तबकेषु चरणौ वसन्तलक्ष्मीरशोकस्य॥]

अत्र 'नवपल्लवेषु—' इत्यादीनि 'अशोकस्य' इति; 'लोलति—' इत्यादीनि 'वसन्तलक्ष्मीः' इति पदे द्रव्यवाचिनी संपुटक्रमेण मिथः संबध्यमाने मिथः संबद्धान्येव दीपयतः, तदेतत्संपुटं नाम दीपकस्य भेदः॥

**णवेत्यादि**। "नवपल्लवेषु लोलति घूर्णते विटपेषु चलति शिखरेषु। स्थापयति स्तबकेषु चरणौ वसन्तलक्ष्मीरशोकस्य॥" इहाशोकस्य नवपल्लवेषु वसन्तलक्ष्मीर्लोलति लुठति। तस्य विटपेषु शाखासु घूर्णते, तस्य शिखरेष्वग्रेषु चलति गच्छति, तस्य स्तबकेषु पुष्पगुच्छेषु चरणौ स्थापयति। लोलतीति

'लोलै चलने' तौदादिकः। यद्वा लोलतीति क्विबन्तात्तिप्। अत्र पदद्वयं द्रव्यवाचकं संपुटक्रमेण मिथः संबध्यमानं मिथः संबद्धान्येव पदानि दीपयतीति संपुटम् ॥

रसना यथा—

'सलिलं विकाशिकमलं कमलानि सुगन्धिमधुसमृद्धानि ।
मधु लीनालिकुलाकुलमलिकुलमपि च मधुरणितमिह ॥ २०४ ॥'

अत्र रसनाक्रमेण मिथः संग्रथितानि 'सलिलं विकाशिकमलम्' इत्यादीनि वाक्यानि 'इह' इत्यन्तस्थितेनाधिकरणवाचिना द्रव्यदीपकेन दीप्यन्ते; तदेतत् रसनादीपकं नामादिदीपकभेदः ॥

**सलिलमित्यादि**। जलं प्रफुल्लपद्मम्, पद्मानि सुगन्धमधुना समृद्धानि। लीनं यदलिकुलं तेनाकुलं मधु, भ्रमरकुलमपीह वसन्ते मधुरणितं मधुना पुष्परसेन शब्दितं मधौ मधूकक्षुमे वा शब्दितम्। 'मधु पुष्परसक्षौद्रमद्ये ना तु मधुद्रुमे' इति मेदिनीकारः। अत्र क्षुद्रघण्टिकाक्रमेण संग्रथितानि सलिलादिपदान्यन्तःस्थिताधिकरणरूपद्रव्यवाचकेनेहेति पदेन दीप्यन्ते ॥

माला यथा—

'इमिणा सरएण ससी ससिणा वि णिसा णिसाँइ कुमुअवणम् ।
कुमुअवणेण अ पुलिणं पुँलिणेण अ सोहए हंसउलम् ॥२०५॥'

[अनया शरदा शशी शशिनापि निशा निशया कुमुदवनम् ।
कुमुदवनेन च पुलिनं पुलिनेन च शोभते हंसकुलम् ॥]

अत्र मालाक्रमेण परस्परग्रथिताः कर्तारो हेतवश्च शशिप्रभृतयः 'शोभते' इति क्रियया दीप्यन्ते; तदेतन्मालादीपकं नाम दीपकस्य भेदः ॥

कः पुनरस्य पूर्वस्माद्विशेषः। पूर्वत्र वृत्तिच्छिन्नं रसनायां सर्वत्र

१. नैष धातुः क्वापि धातुपाठे वर्तते। 'लुड विलोडने' इति, 'लोड उन्मादे' इति च भौवादिकौ। उभयोरपि लोडतीति। डलयोरभेदाल्लोलतीति च. २. 'लीलालिकुल' ग. घ. ३. 'णिसाए' ग. ४. अत्रैकमात्राया न्यूनत्वाच्छन्दोदोषः प्रतिभाति.

इह तु स्वतन्त्रं मालापुष्पवत् पदं पदेन युज्यमानं क्रियादिभिः संबध्यत इति ततो भिद्यते ॥

इसिणेत्यादि । "अनया शरदा शशी शशिनापि निशा निशया कुमुदवनम् । कुमुदवनेन च पुलिनं पुलिनेन च शोभते हंसकुलम् ॥" इह सर्वत्र शोभत इति क्रियान्वयः । अत्रान्योन्यमथनया मालाक्रमस्तेन च प्रधानक्रियायां दीपनम् । परस्परग्रथनया रसनामालयोर्भेदं पृच्छति—क इति । उत्तरम् । पूर्वत्रेति । रसनायां सर्वत्र वृत्त्या छन्दसा छिन्नं भिन्नीभूतं पदं पदेन युज्यते । मालायां तु प्रत्येकमेव पदं पदेन युज्यत इत्यनयोर्भेद इत्यर्थः ॥

चक्रवालं यथा—

'संग्रामाङ्गणमागतेन भवता चापे समारोपिते
देवाकर्णय येन येन सहसा यद्यत्समासादितम् ।
कोदण्डेन शराः शरैररिशिरस्तेनापि भूमण्डलं
तेन त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रयम् ॥२०६॥'

अत्र 'संग्रामाङ्गणमागतेन भवता चापे समारोपिते' इति भावलक्षणाक्षिप्तस्य भावविशेषस्य द्वितीयपादे कारकवीप्सया यत् संक्षेपेणाभिधानं तदेतच्चक्रवालाद्रिणेव मालादीपकेन विस्तारवता वेष्टितमिदं चक्रवालं नाम दीपकस्य भेदः ॥

संग्रामेत्यादि । विवृतोऽयं विस्तारगुणे । अत्र भावः क्रिया । सा च सामान्यलक्षणेन ज्ञाता विशेषमाक्षिपति । ज्ञानसामान्यस्य विशेषे जिज्ञासोदयात् तत्र च समारोपणरूपे कारकजिज्ञासायां सामान्यत एव वीप्सयाभिधानं येनेति यदिति च । विस्तरवत्त्वेन चक्रवालादिसाम्यमस्य ॥ इति दीपकालंकारनिरूपणम् ॥

## क्रमालंकारनिरूपणम् ।

क्रमलक्षणमाह—

**शब्दस्य यदि वार्थस्य द्वयोरप्यनयोरथ ।**
**भणनं परिपाट्या यत् क्रमः स परिकीर्तितः ॥ ७९ ॥**

---

१. 'ततोऽयं भिद्यते' क. ख. २. 'देवालोकय' क. पुस्तके. ३. 'ससाध्वसः' इत्यपि पाठः ग.

**शब्दस्येति** । शब्दार्थयोः परिपाट्या भणनं क्रमः । शब्दतदर्थतदुभयभेदात्स त्रिधेति विभागः ॥

तत्र शब्दपरिपाटी द्विधा—पदतो वाक्यतश्च । तयोराद्या यथा—

'तस्याः प्रवृद्धलीलाभिरालापस्मितदृष्टिभिः ।
जीयन्ते वल्लकीकुन्दस्रगिन्दीवरसंपदः ॥ २०७ ॥'

अत्रालापस्मितदृष्टिभिः पदार्थैर्वल्लकीकुन्दस्रगिन्दीवरसंपदः पदार्था[1] जीयन्त इति शब्दपरिपाट्या भणनम्; सेयं पदतः शब्दपरिपाटी क्रमः ॥

**तस्या इत्यादि** । तस्या आलापस्मितदृष्टिभिर्वचनेषद्धासालोकनैर्वल्लकीकुन्दस्र-गिन्दीवरसंपदो वीणाकुन्दमालानीलाब्जसंपत्तयो जीयन्ते । कीदृशीभिः । उपचित-विलासाभिः । अत्र शब्दस्य पदरूपस्य परिपाट्या भणनमिति पदघटितः शाब्दक्रमः ॥

वाक्यतो यथा—

'इन्दुर्मूर्ध्नि शिवस्य शैलदुहितुर्वक्रो नखाङ्कः स्तने
देयाद्वोऽभ्युदयं द्वयं तदुपमामालम्बमानं मिथः ।
संवादः प्रणवेन यस्य दलता[2] कार्यैकतायां तयो-
रूर्ध्वद्वारि[3] विचिन्तितेन च हृदि ध्यातस्वरूपेण च २०८'

अत्र 'इन्दुर्मूर्ध्नि शिवस्य', 'शैलदुहितुर्वक्रो नखाङ्कः स्तने' इति वाच्यार्थवाचिनौ[5] शब्दसमुदायौ क्रमेण 'ऊर्ध्वद्वारि[3] विचिन्तितेन च', 'हृदि ध्यातस्वरूपेण[4] च' इति वाक्यार्थद्वयवाचिभ्यां शब्दसमुदायाभ्यां संबध्येते; सेयं वाक्यतः शब्दपरिपाटी क्रमः ॥

**इन्दुरित्यादि** । विवृतोऽयं संमितत्वगुणे । अत्र वाक्यार्थाभिधायकौ शब्द-समुदायौ तादृशाभ्यां शब्दसमुदायाभ्यां संबद्धाविति वाक्यघटितः शाब्दक्रमः ॥

---

१. 'वल्लक्यादयः पदार्था' घ. २. 'लसता' ख. ३–३. 'ऊर्ध्वद्वारविचिन्तितेन' ख. ग. ४–४. 'हृदि ध्यातः. स्वरूपेण च' क. ग. ५. 'चाभ्यार्थवाचिनौ' क. ख.

अर्थपरिपाटी द्विधा—कालतो देशतश्च । तयोराद्या यथा—

'हस्ते लीलाकमलमलकं बालकुन्दानुविद्धं
नीता लोध्रप्रसवरजसा पाण्डुतामाननश्रीः ।
चूडापाशे नवकुरबकं चारु कर्णे शिरीषं
सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम् ॥ २०९ ॥'

अत्र 'हस्ते लीलाकमलमलकं बालकुन्दानुविद्धम्' इत्याद्यर्थानां शरदादिकालक्रमेण भणनम्; सेयं कालतोऽर्थपरिपाटी क्रमः ॥

हस्ते इत्यादि । यत्र पुर्यां वधूनां हस्ते लीलाकमलम्, अलकं चूर्णकुन्तलं बालकुन्देनानुविद्धं संबद्धम् । लोध्रप्रसवस्य लोध्रपुष्पस्य रजसा धूल्या मुखश्रीः पाण्डुतां श्वेततां नीता । चूडापाशे प्रशस्तशिखायां नूतनकुरबकपुष्पम्, चारु मनोज्ञं शिरीषपुष्पं कर्णे, सीमन्ते नीपं कदम्बपुष्पम् । त्वदुपगमस्त्वदीयागमनं तस्माज्जातम् । इदं सर्वपुष्पविशेषणम् । 'चूडा शिखायां बाहुभूषणे' इति मेदिनीकारः । शिखापरस्यापि पाशपदस्य केशपरत्वमेव । अत्र शरदादिकालक्रमेणार्थानां क्रमादार्थक्रमः ॥

द्वितीया यथा—

'पायाद्वो रचितत्रिविक्रमतनुर्देवः स दैत्यान्तको
यस्याकस्मिकवर्धमानवपुषस्तिग्मद्युतेर्मण्डलम् ।
मौलौ रत्नरुचि श्रुतौ परिलसत्ताटङ्ककान्ति क्रमा-
ज्जातं वक्षसि कौस्तुभाभमुदरे नाभीसरोजोपमम् ॥ २१० ॥'

अत्र त्रिविक्रमतनोर्वैकुण्ठस्य प्रवृद्धिसमये क्रमेणैव मौलिश्रुतिवक्ष-उदरलक्षणेषु शरीरदेशेषु भास्वन्मण्डलस्य चूडारत्नताटङ्ककौस्तुभनाभ्यम्बुजैर्योऽयमौपम्यलाभः; सेयं देशतोऽर्थपरिपाटी क्रमः ॥

---

१. 'रत्नरुचिः' ग. घ. २. 'ताटङ्ककान्तिः' ग. घ. ३. 'यातं' ग. घ. ४. 'सेयमौपम्यलाभो ग. घ.

पायादित्यादि । स देवो वो युष्मान् पायात् रक्षतात् । कीदृशः । रचिता त्रिविक्रमस्य वामनस्य तनुः शरीरं येन सः । दैत्यनाशकश्च । यस्याकस्माद्वर्धमान-शरीरस्य सूर्यमण्डलं मौलौ रत्नरुचि जातम्, क्रमात् श्रुतौ कर्णे शोभमानताटङ्क-कान्ति जातम्, वक्षसि कौस्तुभदीप्ति जातम्, उदरे नाभिपद्मोपमं जातम्। 'कौस्तुभो मणिः' इत्यमरः। इह हरेर्नाभिपद्मस्य श्वेततया रूपेण न साम्यं किं त्वाकारादिनेत्य-वधेयम्। 'वैकुण्ठो विष्टरश्रवाः' इत्यमरः। अत्र मौलिप्रभृतिदेशपुरस्कारेणार्थक्रमः ॥

उभयपरिपाटी द्विधा—शब्दप्रधाना, अर्थप्रधाना च। तयोराद्या यथा—

'पङ्कअ पङ्कि वहेलिअ कुवलअ खित्तउ दहहिं
　　वालिहिं बिम्ब विविक्खिओ घत्तिओ चन्दु णहहि ।
करणअणाहरवअणहिं तहिं लीलावइहिं
　　णिअसिट्ठि वि उग्घिट्ठीणा इं पआवइहिं ॥ २११ ॥'

[पङ्कजं पङ्केऽवहेल्य कुवलयं क्षिप्त्वा ह्रदे
　　वृन्ते बिम्बं विप्रकीर्णं निरस्तश्चन्द्रो नभसि ।
करनयनाधरवदनैस्तत्र लीलावत्यां
　　निजसृष्टिरप्युत्सृष्टा किं प्रजापतिना ॥]

अत्र पङ्कजकुवलयबिम्बीफलचन्द्रमसां करनयनाधरवदनैर्यथासंख्यं पराजयत इति शब्दपरिपाट्यैव पङ्कजानि पङ्के न्यस्तानि, कुवलयानि ह्रदे क्षिप्तानि, बिम्बं वृन्ते प्रकीर्णम्, चन्द्रो नभसि निरस्त इत्याधारा-णामुपर्युपरिभावः, क्रियाणां च त्यागतारतम्यमित्यर्थपरिपाटी न्यग्भवति; सेयं शब्दप्रधानोभयपरिपाटी क्रमः ॥

पङ्क इत्यादि । "पङ्कजानि पङ्के न्यस्तानि कुवलयानि क्षिप्तानि ह्रदे वृत्तौ बिम्बं विनिकीर्णं निरस्तश्चन्द्रो नभसि । करनयनाधरवदनैस्तस्यां लीलावत्यां निज-सृष्टिरप्युत्सृष्टेव प्रजापतिना ॥" इह प्रजापतिना ब्रह्मणा तस्यां लीलावत्यां नायि-

१. 'मुद्दपूरिअविणवज्जे बाली' इतिदेशीनाममालानुसारेण सण्ठिई तृणं वृन्तमपि भवति । 'वृत्तौ' श. भ.

कायां हस्तनेत्राधरमुखैर्निजसृष्टिरप्युत्सृष्टेव दत्तेव। पङ्कजादीनामपासनात्। तदेवाह—पङ्कजानि पङ्के कर्दमे न्यस्तानि। नीलाब्जानि ह्रदेऽगाधजले क्षिप्तानि। वृत्तौ वेष्टने बिम्बफलं न्यस्तम्, चन्द्रो गगने क्षिप्त इति। 'स्रष्टा प्रजापतिर्वेधाः' इत्यमरः। अत्र पङ्कजादीनां करादिना जये शाब्दक्रमः प्रधानीभूतोऽधिकरणानामुपर्युपरिभावः, क्रियाणां च त्यागतारतम्यमित्यार्थक्रमश्च न्यग्भूतोऽप्रधान इत्युभयक्रमेऽपि शब्दप्रधानता॥

अर्थप्रधाना यथा—

'गङ्गे देवि दृशा पुनीहि यमुने मातः पुनर्दर्शनं
संप्रश्नोऽस्तु पितः प्रयाग भगवन्न्यग्रोध मां ध्यास्यसि।
तं हारासिलतावतंसविपुलस्थूलांसवक्षोभुजं
पुंभावं भवतामवन्तिनगरीनाथं दिदृक्षामहे॥ २१२॥'

अत्र गङ्गायमुनाप्रयागन्यग्रोधतत्पुंभावावन्तिनगरीनाथलक्षणानामर्थानां मुख्यक्रमेण 'देवि दृशा पुनीहि', 'मातः पुनर्दर्शनम्', 'पितः संप्रश्नः', 'भगवन्मां ध्यास्यसि' इति मुख्यक्रमेणैव संभ्रमद्भिर्वचोविशेषैरभ्यर्थ्य 'भवतामेव पुंभावमवन्तिनगरीनाथं दिदृक्षामहे' इति येयमभ्यर्थनाभङ्गिः सार्थपरिपाटीकृता तस्यां च 'गङ्गे, यमुने, प्रयाग, न्यग्रोध' इति, 'हारासिलतावतंसविपुलवक्षःस्थूलांस' इति च शब्दपरिपाटी परस्परमुपमानोपमेयभूते न्यग्भवतः, सेयमर्थप्रधानोभयपरिपाटी क्रमः॥

**गङ्गेत्यादि**। हे गङ्गे देवि, दृशा मां पुनीहि, हे मातर्यमुने, पुनर्दर्शनमस्तु, हे पितः प्रयाग, भवान् स्वाप्रश्नोऽस्तु सुसंवादोऽस्तु। हे भगवन् न्यग्रोध अक्षयवट, मां ध्यास्यसि स्मरिष्यसि। तमवन्तिनगरीनाथमुज्जयिनीपतिं भोजराजं नृपं वयं दिदृक्षामहे द्रष्टुमिच्छामः। कीदृशम्। हारखङ्गलताकर्णालंकारैर्विपुलाः पीनबाहुमूलयुक्तवक्षोभुजा यस्य तम्। भवतामेव पुंभावं पुरुषरूपम्। स्वाप्रश्न इति। स्वस्य

१. 'अभ्यर्चा' क.

आ समन्तात् प्रश्नः संवादः । यथा आपृच्छस्वेत्यत्र । वतंसेन कर्णालंकारेण विपुलः स्थूलश्चांसो बाहुमूलं यत्र वक्षसि तत् । 'वतंसः कर्णपूरे स्यात्' इति विश्वः । अत्रादरवता वचनरचनेनाभ्यर्च्य प्रार्थनाभङ्गिरर्थपरिपाटीकृता । तस्यां च गङ्गया हारस्य, यमुनयासिलतायाः, प्रयागेण वतंसविपुलस्थूलांसनक्षसः, न्यग्रोधेन भुजस्य शाब्देन क्रमेण मिथ उपमानोपमेयभावो न्यग्भूत इत्युभयक्रमेऽर्थप्रधानता ॥ इति क्रमालंकारनिरूपणम् ॥

## पर्यायालंकारनिरूपणम् ।

पर्यायं लक्षयति—

**मिषं यदुक्तिभङ्गिर्यावसरो यः स सूरिभिः ।**
**निराकाङ्क्षोऽथ साकाङ्क्षः पर्याय इति गीयते ॥८०॥**

**मिषमिति** । यन्मिषम्, योक्तिभङ्गिः, यश्चावसरः स पर्यायः । मिषाद्यन्यतम एव पर्याय इति लक्षणम् ॥

तेषु निराकाङ्क्षं मिषं यथा—

'मया विमुक्ता बहिरेव वल्लकी व्रजेदवश्यायकणैश्च सार्द्रताम् ।
द्रुतं तदेनां करवै निचोलके कयाचिदेवं मिषतो विनिर्ययें २१३'

अत्र 'कयाचिदेवं मिषतो विनिर्ययें' इत्युदर्काभिधानेनाकाङ्क्षानिवृत्तेर्निराकाङ्क्षमेतन्मिषं नाम पर्यायभेदः ॥

**मयेत्यादि** । कयाचिन्नायिकया एवमनेन प्रकारेण मिषतो व्याजाद्विनिर्ययें बहिर्भूतम् । तदेवाह—मया त्यक्ता वल्लकी वीणा बहिरेव गच्छेत् । अवश्यायकणैर्हिमलवैः सार्द्रतां च व्रजेत् । तत एनां शीघ्रं निचोलके वस्त्रेऽहं करवै करिष्यामि । 'अवश्यायस्तु नीहारः' इत्यमरः । 'निचोलः प्रच्छदपटः' इति च । उदर्क उत्तरकालशुद्धिस्तदभिधानं मिषपर्यायः ॥

तदेव साकाङ्क्षं यथा—

'दशत्यसौ परभृतः सहकारस्य मञ्जरीम् ।
तमहं वारयिष्यामि युवाभ्यां स्वैरमास्यताम् ॥ २१४ ॥'

---

१. 'निराकृतेर्निराकाङ्क्ष' क. 'निराकृतेति' ख.

अत्र 'कयाचिदेवं मिषतो विनिर्ययेे' इतिवदुदर्कानभिधानात् साकाङ्क्षमेतन्मिषं नाम पर्यायस्य भेदः ॥

**दशतीत्यादि**। असौ परभृतः पिकः सहकारस्य मञ्जरीं दशति तमहं वारयिष्यामि। ततो युवाभ्यां स्वैरं स्वच्छन्दमास्यतामुपविश्यताम्। 'स्वच्छन्दमन्दयोः स्वैरम्' इति विश्वः। अत्रोदर्कानभिधानात्साकाङ्क्षत्वम् ॥

निराकाङ्क्षोक्तिभङ्गिर्यथा—

'राजन् राजसुता न पाठयति मां देव्योऽपि तूष्णीं स्थिताः
कुब्जे भोजय मां कुमार कुशलं नाद्याज्जुके भुज्यते।
इत्थं नाथ शुकस्तवारिभवने मुक्तोऽध्वगैः पञ्जरा-
च्चित्रस्थानवलोक्य वेश्मवलभीष्वेकैकमाभाषते ॥ २१५ ॥'

अत्रान्योक्तिभङ्ग्या शून्यीकृतारिनगरस्य नरपतेः कश्चित् प्रतापं वर्णयति। तत्र वाक्यस्य परिपूर्णत्वेन निराकाङ्क्षत्वान्निराकाङ्क्षेयमुक्तिभङ्गिः ॥

**राजन्नित्यादि**। हे नाथ हे प्रभो, तवारिभवने शत्रुगृहे इत्थमनेनाकारेण वेश्मवलभीषु गृहोपरिकुटीषु चित्रलिखितानेतान्विलोक्य प्रत्येकं शुक आभाषते वदति। कीदृशः। अध्वगैः पथिकैः पञ्जरान्मुक्तस्त्यक्तः। आभाषणस्वरूपमाह—हे राजन्, राजसुता कुमारिका मां न पाठयति। देव्यो महादेव्योऽपि तूष्णीं स्थिताः कृतमौनाः। हे कुब्जे, मां भोजय। हे कुमार राजबालक, तव कुशलम्। हे अज्जुके गणिके, अद्य मया न भुज्यते। 'देवी कृताभिषेकायाम्' इत्यमरः। बाहुल्येन कुब्जायाः शुकभोजनं नृपगृहे कर्म। 'युवराजस्तु कुमारः' इत्यमरः। 'नाट्योक्तौ गणिकाज्जुका' इति च। अत्र प्रतापवर्णने पूर्णवाक्यतया निराकाङ्क्षत्वम्। उक्तौ तु भङ्गिर्व्यक्तैव ॥

साकाङ्क्षा यथा—

'शान्त्यै वोऽस्तु कपालदाम जगतां पत्युर्यदीयां लिपिं
क्वापि क्वापि गणाः पठन्ति पदशो नातिप्रसिद्धाक्षराम्।

१. 'गम्यते' ग. २. 'सन्धिविग्रहौ चापि किं भुज्यते' इति, 'शून्यवलभावेकैकमाभाषते' इति च काव्यप्रकाशेऽप्रस्तुतप्रशंसायामुदाहृतेऽस्मिन्नेव श्लोके पाठभेदः.

विश्वं स्रक्ष्यति वक्ष्यति क्षितिमपामीशिष्यतेऽशिष्यते
नागै रागिषु रंस्यतेऽत्स्यति जगन्निर्वेक्ष्यति द्यामिति ॥ २१६॥'

अत्रानयोक्तिभङ्ग्या ब्रह्माद्यस्तमयेऽप्यनस्तमितस्य भगवतो महेश्वरस्य प्रभावो वर्ण्यते, तत्र च 'यदीयां लिपिं क्वापि क्वापि गणाः पठन्ति पदशो नातिप्रसिद्धाक्षराम्' इत्यनेनैव वाक्येऽस्मिन्नाकाङ्क्षोत्थाप्यते । सा च 'विश्वं स्रक्ष्यति' इत्यस्मिन्नीदृशी—ब्रह्मणां चतुर्युगसहस्रान्ते दिनमेकमिति मानेनैष वर्षशतजीवी विश्वं स्रक्ष्यति ब्रह्मेति ज्ञाप्यते, कपालं चास्य भगवतो भूषणं भविष्यति । 'वक्ष्यति क्षितिम्' इत्यस्मिन्नीदृशी—ब्रह्मणामेयं (?) वर्षशतेनैकं दिनमिति मानेनैष पुरुषायुषजीवी क्षितिं वक्ष्यति विष्णुरिति ज्ञाप्यते, कपालं चास्य भगवतो भूषा भविष्यतीति । एवम् 'अपामीशिष्यते—' इत्यादिषु वरुणकामयमेन्द्रविषयत्वेन योजनीयम् । सेयमनेकप्रकारेण ब्रह्मादीनां साक्षादनभिधानेन साकाङ्क्षोक्तिभङ्गिः ॥

**शान्त्या इत्यादि ।** जगतां पत्युर्हरस्य कपालदाम ललाटमाला वो युष्माकं शान्त्यै शमायास्तु । पञ्चवक्त्रतया कपालानां माला । यदीयां लिपिं यत्संबन्धिनीमक्षरालीं गणा नन्द्यादयः क्वापि पदशः पदक्रमेण पठन्ति वाचयन्ति । कीदृशीम् ? नातिप्रसिद्धवर्णाम् । अत एव क्वाचित्कः पाठः । पाठविषयमाह—अयं शिवो विश्वं जगत् स्रक्ष्यति निर्मास्यति । क्षितिं भूमिं वक्ष्यति धारयिष्यति । अपामीशिष्यते जलेष्वैश्वर्यं लप्स्यते । नागैः सर्पैरशिष्यते भोक्ष्यते । अयं रागिषु विषयासक्तेषु रंस्यते क्रीडिष्यति । जगदयमत्स्यसि भक्षिष्यति । द्यां स्वर्गं निर्वेक्ष्यत्युपभोक्ष्यति । इति । स्रक्ष्यतीति 'सृज विसर्गे' लृट् । 'सृजिदृशोर्झल्यमकिति

१. 'शिष्यते' ग. २. 'ब्रह्मणश्च' इति युक्तं प्रतिभाति । 'चतुर्युगसहस्रान्ते ब्रह्मणो दिनमुच्यते' इत्यत्र प्रमाणम्. ३. 'भविष्यतीति' क. ख. ४. 'ब्रह्मणामेवं वर्षशतेन' इति भवेत् । यत्र ब्राह्मे वर्षे मानुषचतुर्युगसहस्रात्मकमेकं दिनमित्यर्थः.

६।१।५८' इत्यम्। वक्ष्यतीति 'वह प्रापणे' लृट्। 'षढोः कः सि ८।२।४१' इति कत्वम्। ईशिष्यत इति 'ईश ऐश्वर्ये' लृट्। अशिष्यत इति 'अश भोजने' लृटि कर्मणि। रंस्यत इति 'रमु क्रीडायाम्' लृट्। अत्स्यतीति 'अद भक्षणे' लृट्। निर्वेक्ष्यतीति निपूर्वात् विशेर्लृट्। अस्तसमये विनाशे। ब्रह्मणा करणेनेदृशी आकाङ्क्षा। चतुर्णां युगानामेकसहस्रेण ब्रह्मण एकं दिनम्। अनेनैव क्रमेणाहोरात्रादिकम्। ईदृश्याकाङ्क्षा। शतसंख्यब्रह्मापवर्गानन्तरमेकं दिनं वैष्णवम्। अनेनैव क्रमेणाहोरात्रादिकम्। पुरुषायुषेति अचतुरादौ निपातितम्। अपामीशिष्यत इति वरुणादयो ज्ञेयाः। अत्र ब्रह्मादीनां साक्षादभिधानाभावात् साकाङ्क्षता॥

अवसरो निराकाङ्क्षो यथा—

'अथ तैः परिदेविताक्षरैर्हृदये दिग्धशरैरिवार्दितः[1]।
रतिमभ्युपपत्तुमातुरां मधुरात्मानमदर्शयत्पुरः॥ २१७॥'

**अथेत्यादि**। अनन्तरं मधुर्वसन्तोऽग्रे आत्मानमदर्शयत् दर्शितवान्। किं कर्तुम्। आतुरां विह्वलां रतिं कामवधूमभ्युपपत्तुं बोधयितुम्। कीदृशः। तैः परिदेविताक्षरैर्विलापाक्षरैर्दिग्धशरैर्विषाक्तशरैरिवार्दितः पीडितः। 'विलापः परिदेवनम्' इत्यमरः। 'दिग्धो विषाक्तबाणे स्यात्पुंसि लिप्तेऽन्यलिङ्गकः' इति मेदिनीकारः। नानार्थत्वादेव, नियमार्थं शरपदमिह। अत्र वसन्ताविर्भावप्रस्तावो निरपेक्ष एवेति निराकाङ्क्षत्वम्॥

अत्र

'क्व नु ते हृदयंगमः सखा कुसुमायोजितकार्मुको मधुः।
न खलूग्ररुषा पिनाकिना गमितः सोऽपि सुहृद्गतां गतिम्॥२१८॥'

इति यानि रतेः परिदेविताक्षराणि तैराकृष्टहृदयस्य मधोर्योऽयमात्मदर्शनाय प्रस्तावः सोऽयं न किंचनाकाङ्क्षतीति निराकाङ्क्षोऽयमवसरः पर्यायस्य भेदः॥

---

१. 'आर्दितः' इति कुमारसंभवटीकायां मल्लिनाथधृतः पाठः.

साकाङ्क्षो यथा—

'अज्जवि बालो दामोअरो त्ति इअ जम्पिए जसोआए ।
कह्णमुहपेसिअच्छं णिहुअं हसिअं वअवहूए ॥ २१९ ॥'

[अद्यापि बालो दामोदर इतीति जल्पिते यशोदया ।
कृष्णमुखप्रेषिताक्षं निभृतं हसितं व्रजवध्वा ॥]

अत्र 'अद्यापि बालो दामोदरः' इति यशोदया कृतप्रस्तावनस्य कृष्णस्य वक्त्रे विन्यस्तलोचनया तद्रहस्यवेदिन्या व्रजवधूमतल्लिकया यदेतन्निभृतं हसितं तत् तवाम्बा बालं त्वां ब्रूते, त्वं तु मादृशीभिर्निधुवनविदग्धाभिर्दिवानिशं यमुनानिकुञ्जोदरेषु विहरसीत्यादिनार्थजातेन साकाङ्क्षमिति साकाङ्क्षोऽयमवसरः पर्यायस्य भेदः ॥

**अज्जवि इत्यादि ।** "अद्यापि बालो दामोदर इतीति जल्पिते यशोदया । कृष्णमुखप्रेषिताक्षं निभृतं हसितं व्रजवध्वा ॥" यशोदया कृष्णबाल्य उद्भाविते व्रजवधूः स्मेरं दृष्ट्वा काचित् कस्मैचित् कथयति—**अद्यापीति** । यशोदयाद्यापि दामोदरो बाल एवेत्युक्ते कयाचिद्गोपवध्वा कृष्णमुखे प्रेषितं न्यस्तमक्षि यत्र हसिते एवं निभृतमेकान्ते हसितम् । रहो रहस्यमेकान्तचेष्टा । मतल्लिका प्रशस्ता । 'मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ । प्रशस्तवाचकान्यमूनि' इत्यमरः । निधुवनं सुरतम् । 'निधुवनमायोजनमाहुः' इति हारावली । अत्रानेकेनार्थजातेन साकाङ्क्षता व्यक्तैव ॥ इति पर्यायालंकारनिरूपणम् ॥

## अतिशयोक्त्यलंकारः ।

अतिशयलक्षणमाह—

**विवक्षया विशेषस्य लोकसीमातिवर्तिनी ।**
**असावतिशयोक्तिः स्यादलंकारोत्तमा च सा ॥ ८१ ॥**
**सा च प्रायो गुणानां च क्रियाणां चोपकल्प्यते ।**
**नहि द्रव्यस्य जातेर्वा भवत्यतिशयः क्वचित् ॥ ८२ ॥**

---

१–२. गाथासप्तशत्यां तु 'वअवहूहिं' इति पाठः, 'व्रजवधूभिः' इति छाया च. ३. 'बालत्वम्' ग. ४. 'चोपकल्पते' क. ख.

**प्रभावातिशयो यश्च यश्चानुभवनात्मकः ।**
**अन्योन्यातिशयो यश्च तेऽपि नातिशयात्पृथक् ॥८३॥**
**अलंकारान्तराणामप्येकमाहुः परायणम् ।**
**वागीशमहितामुक्तिमिमामतिशयाह्वयाम् ॥ ८४ ॥**

**विवक्षेति** । विशेषस्य प्रकर्षस्य लोकसीमातिवर्तिनी लोकमर्यादातिशयिता या विवक्षा वक्तुमिच्छा सातिशयोक्तिः । केवलस्य, अखण्डाया जातेश्चातिशयाभावाद्गुणक्रिययोरेवातिशय इत्याह—**सा चेति** । उपकल्प्यते समर्थ्यते ॥ **अलमिति** । न केवलं प्रभावादीनामेवातिशयोक्तिरपि त्वलंकाराणामपीमामतिशयाभिधानामुक्तिमेकं परायणमाश्रयं वदन्ति । कीदृशीम् । वागीशेन वाक्पतिना महितां पूजिताम् । 'परायणमाश्रये' इति विश्वः ॥

तत्र गुणातिशयेन महत्त्वातिशयो यथा—

'अहो विशालं भूपाल भुवनत्रितयोदरम् ।
माति मातुमशक्योऽपि यशोराशिर्यदत्र ते ॥ २२० ॥'

अत्रैवं यशोराशेरशक्यमानस्याप्यतिशयोक्त्या विशेषविवक्षा । येन त्रिभुवनोदरमपि संकीर्णमाशङ्क्यते; सोऽयं महत्त्वातिशयो नामातिशयभेदः ॥

**अहो इत्यादि** । हे भूपाल, यस्मादत्र भुवनत्रितयोदरे मातुं परिच्छेत्तुमशक्योऽपि तव यशोराशिर्माति संमाति । तस्माद्भुवनत्रितयोदरं विशालमत्राहो आश्चर्यम् । अत्र यशोराशिरूपस्य गुणस्यातिशयेन महत्त्वातिशयः स्फुट एव ॥

तनुत्वातिशयो यथा—

'स्तनयोर्जघनस्यापि मध्ये मध्यं प्रिये तव ।
अस्ति नास्तीति संदेहो न मेऽद्यापि निवर्तते ॥ २२१ ॥'

अत्रैवं मध्यस्य लोकसीमातिक्रमेण तानवातिशयविवक्षा येन तदस्ति नास्तीति वा संदिह्यते; सोऽयं तनुत्वातिशयो नामातिशयभेदः ॥

**स्तनयोरित्यादि** । हे प्रिये, तव स्तनयोर्जघनस्यापि मध्येऽन्तराले मध्यमवलममतिकृशत्वादस्ति नास्तीति संदेहो ममाद्यापि न निवर्तते । अत्र तानवस्य तनुत्वस्यातिशयः । **लोकेति** । नहि लोकः पयोधरभरस्थित्यन्यथानुपपत्त्यापि मध्यं निश्चिनोतीत्यर्थः ॥

कान्त्यतिशयो यथा—

'मल्लिकामालभारिण्यः सर्वाङ्गीणार्द्रचन्दनाः ।
क्षौमवत्यो न लक्ष्यन्ते ज्योत्स्नायामभिसारिकाः ॥ २२२ ॥'

अत्रैवं चन्द्रालोकस्य लोकसीमातिक्रमेण बाहुल्योत्कर्षविवक्षा । येन तस्मिन् समानाभिहारेणाभिसारिका अपि न लक्ष्यन्ते सोऽयं कान्त्यतिशयो नामातिशयभेदः ॥ अथास्य पिहितात्को विशेषः । उच्यते । पिहिते चन्द्रातपस्योत्कर्षेणाभिसारिकातिरस्कारो विवक्ष्यते, इह त्वभिसारिकातिरस्कारेण चन्द्रातपोत्कर्ष इति ॥

**मल्लिकेत्यादि** । ईदृश्योऽभिसारिका ज्योत्स्नायां चन्द्रकिरणेऽपि न लक्ष्यन्ते[1] न ज्ञायन्ते केनापि । कीदृश्यः । मल्लिका मालती तस्या मालां बिभ्रति । 'मालेषीकाष्टकानां भारतूलहि(चि)तेषु' इति ह्रस्वः । सर्वाङ्गीणं सर्वाङ्गव्यापकमार्द्रं चन्दनं यासां ताः । क्षौमवत्यो दुकूलयुक्ताश्च । क्षौम इति 'टुक्षु शब्दे' इति मनिन् । क्षुमा प्रज्ञादित्वात् स्वार्थेऽण् वृद्धिश्च । अत एव 'क्षुमवत्' इत्यपि पाठः । अत्र चन्द्रकान्तेरतिशयः स्फुट एव । 'अभिहारोऽभियोगः स्यात्' इति मेदिनीकारः । लोकसीमातिक्रमश्च नहि शुक्लाम्बरतया ज्योत्स्नायामभिसारिका न लक्ष्यन्त इति लोकसीमेत्यर्थः । उत्कर्षरूपस्यार्थस्योभयत्र विवक्षणात् पिहितकान्त्यतिशययोरभेदः । किमिति पृच्छति—**अथेति** । उत्तरम् । **पिहित इति** । चन्द्रातपोत्कर्षतया तौल्येऽपि पिहिते तेनाभिसारिकातिरस्कार इह तु तस्यास्तिरस्कारेण चन्द्रातपोत्कर्ष इति प्रकाराभ्यां तयोर्भेद इत्याशयः ॥

प्रभावातिशयो यथा—

'तं दइआहिण्णाणं[2] जम्मि वि अङ्गम्मि राहवेण ण णिमिअम् ।
सीआपरिमट्टेण व ऊढो तेण वि णिरन्तरं रोमञ्चो ॥ २२३ ॥'

---

१. 'इष्टकेषीकामालानां चिततूलभारिषु ६।३।६५' इति भाष्यम्. २. 'भिण्णाणं' ग.

[तद्दयिताभिज्ञानं यस्मिन्नप्यङ्के राघवेण न न्यस्तम्।
सीतापरिमृष्टेनैवोढस्तेनापि निरन्तरं रोमाञ्चः॥]

अत्र दयिताभिज्ञानस्य योऽयं रोमाञ्चक्रियाविशेषः स क्रियातिशयस्यैव भेदः प्रभावातिशय उच्यते॥

**तमित्यादि।** 'तद्दयिताभिज्ञानं यस्मिन्नप्यङ्के राघवेण न निर्मितम्। सीतापरिस्पृष्टेनेव व्यूढस्तेनापि निरन्तरं रोमाञ्चः॥'' इह तद्दयिताया वल्लभायाः सीताया अभिज्ञानं चिह्नं मणिरूपं यस्मिन्नप्यङ्के रामेण न निर्मितं न निहितं तेनाप्यङ्केन सीतया परि सर्वतोभावेन स्पृष्टेनेव निरन्तरं यथा भवत्येवं रोमाञ्चो व्यूढो धृतः। 'अभिज्ञानं भवेच्चिह्ने' इति शाश्वतः। अत्र रोमाञ्चहेतुक्रियातिशयेन प्रभावातिशय एव विवक्षितः॥

अनुभावातिशयो यथा—

'विमलिअरसाअलेण वि विसहरवइणा अदिट्ठमूलच्छेअम्।
अप्पत्ततुङ्गसिहरं तिहुअणहरणे पवड्ढिएणे वि हरिणा॥२२४॥'

[विमर्दितरसातलेनापि विषधरपतिनादृष्टमूलच्छेदम्।
अप्राप्ततुङ्गशिखरं त्रिभुवनहरणे प्रवर्धितेनापि हरिणा॥]

अत्र रसातलमपि मृद्नता शेषेणापि च तस्य मूलं न दृष्टम्, त्रिभुवनमप्युल्लङ्घयता हरिणापि न तुङ्गशिखराणि प्राप्तानीति यदेतल्लोकसीमातिक्रमेण विशेषव्यवस्थया पर्वतानुभावभणनं सोऽयमनुभूयमानमाहात्म्यातिशयस्यैव भेदोऽनुभावातिशय उच्यते॥

**विमलिअ इत्यादि।** ''विमर्दितरसातलेनापि विषधरपतिनादृष्टमूलच्छेदम्। अप्राप्ततुङ्गशिखरं त्रिभुवनहरणप्रवर्धितेनापि हरिणा॥'' इह सुवेलं कीदृशम्। विषधरपतिना शेषेणादृष्टो मूलस्य छेदः शेषो यस्य तम्। कीदृशेन। विमर्दितं

१. 'सेतुबन्धे' तु 'वूढो' इति पाठः, 'व्यूढः' (विशेषेणोढः) इति छाया च.
२. सेतुबन्धे 'तिहुअणहरणपरिवड्ढिएण' इति पाठभेदः 'त्रिभुवनहरणपरिवर्धितेन' इति छायाभेदश्च.

विमलितं निर्मलीकृतं वा रसातलं येन तेन । पुनः कीदृशम् । हरिणा त्रिविक्रमेणाप्यप्राप्ततुङ्गशिखरम् । कीदृशेन । त्रिभुवनहरणाय सर्वतो भावाद्वर्धितेन वृद्धिं गतेन । मृद्नता मर्दयता । अत्र पर्वतानुभावातिशयविवक्षयातिशयः स च तैरनुभूयमान एव ॥

'रणदुज्जओ दहमुहो सुरा अवज्झा अ तिहुअणस्स इमे ।
पडइ अणत्थोत्ति फुडं विहीसणेन फुडिआहरं णीससिअम् २२५'

[रणदुर्जयो दशमुखः सुरा अवध्याश्च त्रिभुवनस्येमे ।
पतत्यनर्थ इति स्फुटं विभीषणेन स्फुटिताधरं निश्वसितम् ॥

अत्र दशास्यः समरे न जीयते, सुराश्चामरत्वान्न वध्यन्ते, तयोश्च परस्परं संघट्टक्रियातिशयात्त्रिभुवनमपि क्षयं यास्यतीति येयमन्योन्यक्रियातिशयभणनाल्लोकसीमातिक्रमेण विशेषविवक्षा सोऽयं क्रियातिशयो नामातिशय एवान्योन्यातिशय उच्यते ॥

**रणेत्यादि ।** "रणदुर्जयो दशमुखः सुरा अवध्या अहो त्रिभुवनस्यासौ । पतत्यनर्थ इति स्फुटं विभीषणेन स्फुटिताधरं निश्वसितम् ॥" इह स्फुटिताधरं व्यक्तीकृताधरं यथा स्यादेवं विभीषणेन रावणभ्रात्रा निश्वसितं निश्वासस्त्यक्तः स्फुटं व्यक्तमेव । कुतः। दशास्यो रणे दुर्जयः, सुरा देवा अमरत्वादवध्याः। अहो आश्चर्यमसौ त्रिभुवनस्यानर्थः पततीति । इतिर्हेतौ । अत्र दशास्यसुरयोरन्योन्यक्रियातिशयोक्तेरन्योन्यातिशयः । सकलभुवनक्षयकारितया लोकसीमातिपातः ॥ इत्यतिशयोक्त्यलंकारनिरूपणम् ॥

## श्लेषालंकारनिरूपणम् ।

श्लेषं लक्षयति—

**श्लेषोऽनेकार्थकथनं पदेनैकेन कथ्यते ।
पदक्रियाकारकैः स्याद्भिन्नाभिन्नैः स षड्विधः ॥ ८५ ॥**

**श्लेष इति ।** एकेन पदेन विभक्त्यन्तेनानेकेषामर्थानां कथनं यत्र स श्लेषः कथ्यते । एकरूपान्वितमनेकार्थं वचः श्लेष इति लक्षणम् । स च षड्विधः पदादिभिः स्यात् ॥

तेषु भिन्नपदो यथा—

'दोषाकरेण संबध्नन्नक्षत्रपथवर्तिना।
राज्ञा प्रदोषो मामित्थमप्रियं किं न बाधते ॥२२६॥'

अत्र 'प्रदोषो रात्रेः प्रथमयामः किमिति प्रियारहितं मां न बाधते' इत्युक्तेर्युक्तिमाह—इत्थमनुभूयमानेन प्रकारेण। राज्ञा संबध्नन्। कीदृशेन। दोषाकरेण नक्षत्रपथवर्तिनेति। यो हि दोषाणामाकरेण राजमार्गातिगामिना च राज्ञा प्रकृष्टदोषः संबध्यते सोऽप्रियमवश्यं बाधत एव; तदत्र पूर्वस्मिन्प्राकरणिकेऽर्थे द्वितीयोऽर्थोऽप्राकरणिकः पदभेदेनोपश्लिष्यमाणो भिन्नपदश्लेषापदेशमासादयति॥

**दोषेत्यादि**। प्रकृष्टो दोषो दूषणं यस्य स दुर्जनो मां किं न बाधते, किंतु बाधत एव। मां कीदृशम्। अप्रियं तस्य द्वेष्यम्। कीदृशः। इत्थमनुभूयमानेन प्रकारेण राज्ञा भूपेन सह संबध्नन् युञ्जन्। आत्मानमित्यध्याहार्यम्। अत्र कर्मवद्भावो न कृतः संबध्यमान इत्यर्थत्वात्। राज्ञा कीदृशेन। दोषाणां दूषणानामाकरेण स्थानेन। क्षत्रपथः क्षत्रियमार्गस्तत्र वर्तितुं शीलं यस्य तेन। पश्चान्नकारसंबन्धः। क्षत्रियधर्मशून्येनेत्यर्थः। पक्षे प्रदोषो रजनीमुखं मामप्रियं प्रियारहितं किं न बाधते किंतु बाधत एव। कीदृशः। राज्ञा चन्द्रेणेत्थं संबध्यमानः। कीदृशेन। दोषाकरेण रात्रिकरेण। नक्षत्रपथं व्योम तदवस्थितिशीलेन च। अत्र राजपदमभिन्नम्। शेषपदानां भेदाद्भिन्नपदश्लेषः॥

अभिन्नपदो यथा—

'असावुदयमारूढः कान्तिमान् रक्तमण्डलः।
राजा हरति लोकस्य हृदयं मृदुभिः करैः॥ २२७॥'

अत्रायमुदीयमानश्चन्द्रमा लोकस्य हृदयं हरतीत्युक्तेर्युक्तिमाह—राजानुरक्तमण्डल उदयी मृदुकरः कान्तिमानिति। यो ह्येवंभूतो राजा

१. 'राजमार्गाभिगामिना' घ. २. 'सोऽपि प्रियम्' ग. ३. 'सर्वस्य' ग.

सोऽवश्यं लोकस्य हृदयहारी भवति । अत्रापि च प्राकरणिकेऽर्थेऽप्राकरणिक उपश्लिष्यमाणः पदानामभेदेनाभिन्नपदश्लेषो भवति ॥

**असावित्यादि** । असौ राजा नृपो मृदुभिरपीडाकरैः करै राजग्राह्यैर्लोकस्य हृदयं हरति । कीदृशः । उदयं वृद्धिमारूढः प्राप्तः । कान्तिमान् शोभायुक्तः । रक्तमनुरक्तं मण्डलं देशो यस्य सः । पक्षे असौ राजा चन्द्रः करैः किरणैर्मृदुभिः शीतलैर्जनस्य हृदयं हरति गृह्णाति । कीदृशः । उदयमुदयाद्रिमुपगतः । कान्तिमान् दीप्तियुक्तो रक्तमण्डलो लोहितबिम्बश्च । 'उदयो वृद्धावुदयपर्वते' इति विश्वः । 'मण्डलं बिम्बदेशयोः' इति च । अत्र राजादिपदानामभेदेनाभिन्नपदश्लेषत्वम् ॥

भिन्नक्रियो यथा—

'मधुरा रागवर्धिन्यः कोमलाः कोकिलागिरः ।
आकर्ण्यन्ते मदकलाः श्लिष्यन्ते चासितेक्षणाः ॥ २२८ ॥'

अत्र 'आकर्ण्यन्ते, श्लिष्यन्ते च' इति क्रियापदद्वितयस्य प्राधान्यतः समुच्चयेनोपात्तस्य 'मधुरा—' इत्यादिभिः श्लिष्टपदैः 'कोकिलागिरः', 'असितेक्षणाः' इति वा विशेष्यैकपदवर्जं पर्यायतः संबन्धो भवति । तद्यथा—आकर्ण्यन्ते । काः । कोकिलागिरः । कीदृश्यः । मधुराः, रागवर्धिन्यः, कोमलाः । पुनरपि किंभूताः । आसिते उपवेशिते निश्चलीकृते अन्तःप्रमोदानुभावादीक्षणे याभिस्तास्तथा । सर्वोऽपि हि मधुरं शब्दमाकर्णयन् निश्चलाक्षो भवति । श्लिष्यन्ते च । काः । असितेक्षणाः हरिणचक्षुषः । किंभूताः । मदकलाः, कोकिलागिरः, कोमलाः, रागवर्धिन्यः, मधुरा इति । सोऽयं द्वयोर्विभिन्नक्रिययोर्भिन्नार्थे[1] च रूपिणां पदार्थानामुपश्लेषो भिन्नक्रियः श्लेष उच्यते ॥

**मधुरा इत्यादि** । कोकिलागिर आकर्ण्यन्ते, असितेक्षणाः श्यामनेत्राः प्रियाः आश्लिष्यन्ते च । कीदृश्यः । मधुराः श्रुतिसुखा रम्याश्च । रागवर्धिन्योऽनुरागजनिका रतिजनिकाश्च । कोमला मनोज्ञा मृद्वङ्ग्यश्च । मदकला यौवनवसन्तादिकृत-

१. 'भिन्नार्थैकरूपाणाम्' ख.

मदमधुराः । मदेन मद्यविकारेण कलध्वनियुक्ताश्च । आसिते उपवेशिते निश्चली-कृतेऽन्तःप्रमोदानुभवादीक्षणे याभिस्तासां मधुरं स्वमाकर्णयन्निश्चलाक्षो भवति । पक्षेऽसितेक्षणाः । कीदृश्यः । कोकिलानामिव गिरो यासां ताः । अत्र क्रियाभेदा-द्भिन्नक्रियत्वमितरपदानामभिन्नानामेवार्थद्वयबोधकता ॥

[1]अभिन्नक्रियो यथा—

'स्वभावमधुराः स्निग्धाः शंसन्त्यो रागमुल्बणम् ।
दृशो दूत्यश्च कर्षन्ति कान्ताभिः प्रेषिताः प्रियान् ॥ २२९ ॥'

अत्र 'कर्षन्ति' इत्येतस्यां क्रियायां दृशां दूतीनां च श्लिष्टपदत्वेना-वेशादयमभिन्नक्रियो नाम श्लेषविशेषः । प्रथमयोरस्य वा को विशेष इति चेत् । तत्रैकस्यैव प्राकरणिकत्वम्, अत्र तु द्वयोरपीति । अयं च भिन्नकारकोऽपि भवति ॥

**स्वभावेत्यादि** । कान्ताभिः प्रेषिता दृशो दूत्यश्च प्रियान् वल्लभान् कर्षन्ति । कीदृश्यः । स्वभावेन सहजेन मधुरा ललिताः । तदुक्तं मत्संगीतसर्वस्वे—'मधुरा कुञ्चितान्ता च सभ्रूक्षेपा च सस्मिता । समन्मथविकारा च दृष्टिः सा ललिता मता ॥' इति । स्निग्धाः स्नेहवत्यः । उल्बणमधिकं रागं लौहित्यं शंसन्त्यः । पक्षे सहजमधुराः । यद्वा स्वभावात्प्रियवादिन्यः स्निग्धा आत्मीयाः । अधिकं रागं मद्यविकारकृतं शंसन्त्यः । यद्वा रागमनुरागं कथयन्त्यः । अत्र प्रियाकर्षणरूपैकैव क्रिया साधारणीत्येकक्रियात्वम् । भिन्नपदाभिन्नपदाभ्यामस्य च को भेद इति पृच्छति—**प्रथमयोरिति** । वाशब्दश्चार्थे । उत्तरम्—**तत्रेति** । तयोरेकैकस्यैव प्रकरणापन्नत्वमत्र तु दृष्टं द्वयोरपि प्राकरणिकत्वमिति भेद इत्यर्थः । अनेककर्तृक-त्वेनायं भिन्नकारकोदाहरणमपीत्याह—**अयमिति** ॥

भिन्नकारको यथा—

'गतिर्वेणी च नागेन वपुरूरू च रम्भया ।
ओष्ठौ पाणी प्रवालैश्च तस्यास्तुल्यत्वमाययुः ॥ २३० ॥'

अत्रैकस्मिन् पक्षे धर्मधर्मिणोरभेदोपचारान्नागगतिर्गृह्यते । तत्र गते-

---

१. 'अभिन्नक्रिययोः' ग.

वेण्याश्च नागेन हस्तिना अहिना च तुल्यत्वम्, वपुष ऊर्वोश्च रम्भया कदल्या अप्सरोभिश्च तुल्यत्वम्, ओष्ठयोः पाण्योश्च प्रवालैर्विद्रुमैर्नवपल्लवैश्च तुल्यत्वं वर्णनीययोः श्लेषप्रभावाल्लभ्यते; सोऽयमनेककर्तृकत्वाद्भिन्नकारक इति श्लेषो भवति ॥

**गतिरित्यादि**। तस्या नायिकाया गतिर्गमनं वेणी केशरचना च नागेन हस्तिना सर्पेण च, तस्या वपुरूरुद्वयं च रम्भयाऽप्सरोभेदेन कदल्या च, तस्याः पाणी हस्तावोष्ठौ च प्रवालैर्विद्रुमैः पल्लवैश्च सर्वाणि तुल्यत्वमाययुः। 'नागो हस्तिभुजङ्गयोः' इति शाश्वतः। 'कदल्यप्सरसो रम्भा' इति च। 'पल्लवे विद्रुमे चापि प्रवालः' इति धरणिः। गतिनानात्वादाह—**धर्मेति**। अत्र नानाकर्तृकत्वादेव भिन्नकारकता ॥

अभिन्नकारको यथा—

'कृष्णार्जुनानुरक्तापि दृष्टिः कर्णावलम्बिनी ।
याति विश्वसनीयत्वं कस्य ते कलभाषिणि ॥ २३१ ॥'

अत्र 'हे कलभाषिणि, कस्य ते दृष्टिर्विश्वास्या भवति' इत्युक्तेर्युक्तिमाह—'कृष्णार्जुनानुरक्तापि कर्णावलम्बिनी' इति च। या हि कृष्णार्जुनेनानुरज्यते कथं सा कर्णपक्षपातिनी भवति, या चैवमुभयगता तस्यां को विश्वसिति; स चायमेककर्तृकत्वादभिन्नकारक इति श्लेषो भवति ॥

**कृष्णेत्यादि**। हे कलभाषिणि मधुरवचने, तव दृष्टिः कस्य विश्वसनीयत्वं विश्वासविषयतां याति किंतु न कस्यापि। अत्र हेतुः कृष्णा श्यामा, अर्जुना धवला, अनुरक्ता प्रान्तलोहिता च। प्रादेशिकोऽयं क्रमः। कर्णपर्यन्तगामिनी च। पक्षे कृष्णे हरौ, अर्जुने पार्थे चानुरक्तानुरागवती कर्णपक्षपातिनी च या सा विरुद्धोभयगता कथं विश्वसनीया भवति। 'वलक्षो धवलोऽर्जुनः' इत्यमरः। अत्र कर्तुरेकतयाभिन्नकारकता ॥ इति श्लेषालंकारनिरूपणम् ॥

## भाविकालंकारनिरूपणम् ।

भावनालक्षणमाह—

**स्वाभिप्रायस्य कथनं यदि वाप्यन्यभावना ।**
**अन्यापदेशो वा यस्तु त्रिविधं भाविकं विदुः ॥ ८६ ॥**

१. 'तुल्यत्वम्' क. ख. ग.

**मते चास्माकमुद्भेदो विद्यते नैव भाविकात् ।**
**व्यक्ताव्यक्तोभयाख्याभिस्त्रिविधः सोऽपि कथ्यते ॥८७॥**

**खेत्यादि** । निजाशयकथनमन्यकथनमन्यापदेशश्च भाविकम् । भावे कवेरभिप्राये भवं भाविकमित्यन्वर्थनामतापि । उद्भेदभाविकयोरभेदमाह—**मत इति** । सोऽपि उद्भेदोऽपि ॥

तत्र भाविकभेदेषु स्वाभिप्रायकथनं यथा—

'णावज्झइ दुग्गेज्झिआ दिट्ठम्मि जम्मि भिउडिआ
जत्थ ण अव्वाहारओ घिप्पइ आहासत्तए ।
विच्छुहइ अहिणिंदए जत्थ ण सो वअंसिआ
तं मे कहेउ[1] माणअं जइ मे इच्छहि जीअअंम्[2] ॥२३२॥

[नाबध्यते दुर्गृहीता दृष्टे यस्मिन् भ्रुकुटिका
यत्र नाव्याहारो गृह्यते आभाषमाणे ।
विक्षुभ्यतेऽभिनिन्द्यते यत्र न स वयस्यया
तं मे कथय मानं यदि मे इच्छसि जीवनम् ॥]

अत्र भ्रूभेदा[3]संभाषणप्रियतमावक्षेपान् प्रत्यनभिमतप्रतिपादनरूपस्याभिप्रायस्य कथितत्वादिदं स्वाभिप्रायकथनं नाम भाविकम् ॥

**णावज्झइ इत्यादि** । "नाबध्यते दुर्ग्राह्या दृष्टे यस्मिन् भ्रुकुटिका यत्र न च (चा)व्याहारो गृह्यते आभाषमाणे । विक्षुभ्यतेऽभिनीयमाने यत्र न स वयस्यया तं मे कथय मानं यदि मे इच्छसि जीवितम् ॥" इह यस्मिन् दृष्टे दुर्ग्रहा भ्रुकुटिर्नाबध्यते समन्तान्न बध्यते यत्राभाषमाणेऽव्याहारो न च गृह्यते । यत्राभिनीयमाने वयस्यया स न क्षुभ्यते तं मानं मम कथय यदि मम जीवनमिच्छसि । अत्रानाकाङ्क्षितरूपस्याभिप्रायस्य कथनम् ॥

---

१. 'कहहु' क. ख. ग. २. 'जीइअम्' इति घ. ३. 'भ्रूद्भेदा' ख.

अन्यभावना यथा—

'दंसणवलिअं दढकं विबन्धणं दीहरं सुपरिणाहम् ।
होइ घरे साहीणं मुसलं धण्णाणं महिलाणम् ॥ २३३ ॥'
[दंशनवलितं दृढकं विबन्धनं दीर्घं सुपरिणाहम् ।
भवति गृहे स्वाधीनं मुसलं धन्यानां महिलानाम् ॥]

अत्र मेढ्रभावनया मुसलरूपस्योक्तत्वादिदमन्यभावनाभिधानं भाविकम् ॥

**दंसणेत्यादि** । "दंशनेन वलितं दृढकं विबन्धनं दीर्घं सुपरिणाहम् । भवति गृहे स्वाधीनं मुसलं धन्यानां महिलानाम् ॥" इहोत्तमस्त्रीणां गृहे ईदृशं मुसलं स्वायत्तं भवति । कीदृशम् । दंशने धान्यादिमर्दने वलितं लग्नम् । दृढकं दृढम् । स्वार्थे कन् । विगतबन्धनं दीर्घं सुपरिणाहमतिस्थूलं च । मेढ्रपक्षे दंशने भगमर्दने वलितं संनद्धं दृढं विगतबन्धनं दीर्घमतिस्थूलं च । अत्र मेढ्राभिप्रायेण मुसलोक्तेरन्यभावना ॥

अन्यापदेशो यथा—

'आसाइअमण्णाएण जेत्तिअं तेत्तिअं चिअ विहिणम् ।
ओरमसु वसह एण्हिं रक्खिज्जइ गहवइच्छेत्तम् ॥ २३४ ॥'
[आस्वादितमज्ञातेन यावत्तावदेव व्रीहीणाम् ।
उपरम वृषभेदानीं रक्ष्यते गृहपतिक्षेत्रम् ॥]

अत्र परक्षेत्रस्य घस्मरवृषनिवारणापदेशेन चिरात्परिज्ञात उपपतिर्निवार्यते, तदिदमन्यापदेशाख्यं भाविकम् ॥

**आसाइअ इत्यादि** । "आस्वादितमज्ञातेन यावत्तावतैव बन्धय धृतिम् । उपरमस्व वृषभात्र रक्षयित्वा गृहपतिक्षेत्रम् ॥" इह हे वृषभ, गृहपतिक्षेत्रं रक्षयित्वा त्वमुपरमस्व क्रीडय । अज्ञातेन त्वया यावदेवास्वादितं तावतैव धृतिं बन्धय । अत्र वृषभनिवारणव्याजेनोपपतिनिवारणमन्यापदेशः ॥

---

१· 'जित्तिअम्' ग. घ.　　२. 'वार्यते' क. ख.

उद्भेदेषु व्यक्तो यथा—

'मंतेसि महुमहपणअं संदाणेसि तिअसेसपाअवरअणम्।
ओजसु मुद्धंसुहावं संभावेसु सुरणाह जाअवेलोअम्॥ २३५॥'

[मनुषे मधुमथप्रणयं संदानयसि त्रिदशेशपादपरत्नम्।
अपजहि मुग्धस्वभावं संभावय सुरनाथ यादवलोकम्॥]

अत्र मायाविनो महेन्द्रस्याभिप्रायः सत्यकेन व्यक्तमेवोद्भिन्न इति व्यक्तोऽयमुद्भेदः॥

**मन्तेसीत्यादि**। "मनुषे मधुमथप्रणयं संदानयसि त्रिदशेश पादपरत्नम्। अपजहि मुग्धस्वभावं संभावय सुरनाथ यादवलोकम्॥" इह हे सुरनाथ इन्द्र, यदि मधुमथस्य कृष्णस्य प्रणयं प्रीतिं मनुषे स्वीकरोषि। देवे पादपरत्नं पारिजातवृक्षं संददाने सति मुग्धं स्वभावं मौग्ध्यमपजहि त्यज। यादवलोकं संभावय प्रीणय। अत्रेन्द्राभिप्रायः सत्यकेन तत्सारथिना व्यक्तः प्रकाशितः॥

अव्यक्तो यथा—

'निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः।
मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम्॥२३६॥'

अत्र 'वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम्' इत्याक्षेपवता प्राकरणिकोदाहरणेन यद्यपि दूत्या दुश्चेष्टितं निर्भिन्नं तथापि न पूर्ववद्व्यक्तमित्यव्यक्तोऽयमुद्भेदः॥

**निःशेषेत्यादि**। हे दूति, इतः स्थानात्त्वं वापीं पुष्करिणीं स्नातुं गतासि। तस्याधमस्यान्तिकं न गतासि। हे मिथ्यावादिनि, हे सुहृज्जनस्याज्ञातदुःखागमे। स्नानचिह्नान्याह—स्तनतटं निःशेषच्युतचन्दनमशेषक्षरितचन्दनमस्ति। तवाधरोऽपि त्यक्तलौहित्यः। तव नेत्रेऽत्यर्थमञ्जनशून्ये। तथा तवेयं तन्वी कृशा तनुः

१. 'मुद्ध' इति पाठः. २. 'जा अव' ख. ग. ३. 'पीडागमा' क. ख. ४. 'प्रकृतोदाहरणेन' क. ख.

शरीरं पुलकिता रोमाञ्चवती च । अत्र स्नानसंभोगयोस्तुल्यचिह्नस्योपदर्शनेन प्रकरणपरिप्राप्तं दूतीदुश्चेष्टितमुद्भिन्नम्, न च प्रागव्यक्तता ॥

उभयरूपो यथा—

'अम्लानोत्पलकोमले सखि दृशौ नीलाञ्जनेनाञ्चिते
कर्पूरच्छुरणाच्च गण्डफलके संवेल्लितः पाण्डिमा ।
श्वासाः सन्तु च कन्दुकभ्रमिभुवः किंतु प्रभावाहिना-
मङ्गानां कृशिमानमुत्कटममुं को नाम नोत्प्रेक्षते ॥२३७॥'

अत्र 'दृशोर्म्लानता, गण्डयोः पाण्डुरत्वम्, श्वासानां दैर्घ्यम्' इत्युत्कण्ठाचिह्ननिह्नवाय योऽयमविनयवत्या नीलाञ्जनादिप्रयोगस्तस्य तथाभ्युपगमेऽपि 'अङ्गानां कृशिमानमुत्कटममुं को नाम नोत्प्रेक्षते' इति योऽयं सखीव्याहारस्तेन तदभिप्राय उद्भिन्नोऽनुद्भिन्नश्च भवतीत्युभयरूपोऽयमुद्भेदः । तेऽमी त्रयोऽप्युद्भेदा भाविकान्न भिद्यन्ते ॥

**अम्लानेत्यादि** । किंतु हे सखि, तवाङ्गानाममुमुद्भटं कृशिमानं कृशत्वं को न नामोत्प्रेक्षते किंतून्नयत एव । यद्यपि तव दृशावम्लाने म्लानिहीने उत्पन्ने इव कोमले मनोज्ञे स्तः । कीदृशे । नीलकज्जलेनाञ्चिते । यतः कर्पूरस्य छुरणात् संबन्धात् पाण्डिमा पाण्डुरत्वं गण्डफलके संवेल्लितः संबद्धः । श्वासाश्च कन्दुकक्रीडनार्थं या भ्रमिर्भ्रमणं तत्प्रभवाः सन्तु । अङ्गानां कीदृशानाम् । प्रभावाहिनां प्रभां दीप्तिं वोढुं धर्तुं शीलं येषां तेषाम् । सहजरम्याणामित्यर्थः । अविनयवत्या असत्याः । अत्राविनयवत्या आशयः किंचिद्व्यक्तीकृतः । किंचिच्चाव्यक्तीकृत इत्युभयरूपता ॥ इति भाविकालंकारनिरूपणम् ॥

## संसृष्टयलंकारनिरूपणम् ।

संसृष्टिलक्षणमाह—

**संसृष्टिरिति विज्ञेया नानालंकारसंकरः[3] ।**
**सा तु व्यक्ता तथाव्यक्ता व्यक्ताव्यक्तेति च त्रिधा ॥८८॥**

---

१. 'न पुनस्तस्याधमस्यान्तिकम्' क. ख.　　२. 'तत्त्वाभ्युपगमेऽपि' क. ख.
३. 'सर्वालंकारसंकरः' क. ख.

तिलतण्डुलवद्यक्ता छायादर्शवदेव च ।
अव्यक्ता क्षीरजलवत्पांसुपानीयवच्च सा ॥ ८९ ॥
व्यक्ताव्यक्ता च संसृष्टिर्नरसिंहवदिष्यते ।
चित्रवर्णवदन्यस्मिन्नानालंकारसंकरे ॥ ९० ॥

**संसृष्टिरिति** । नानालंकाराणां संकरोऽपि······संसृष्टिः । **छायेति** । प्रतिबिम्बदर्पणवदित्यर्थः । क्षीरं दुग्धम् । पांसुर्धूलिः । **चित्रेति** । चित्रलिखितवर्णिकावदित्यर्थः ॥

व्यक्ता तिलतण्डुलवद्यथा—

'पिनष्टीव तरङ्गाग्रैरुदधिः फेनचन्दनम् ।
तदादाय करैरिन्दुर्लिम्पतीव दिगङ्गनाः ॥ २३८ ॥'

अत्रोत्प्रेक्षाद्वयम्, रूपकद्वयं च तिलतण्डुलवत्संकीर्यते ॥

**पिनष्टीत्यादि** । समुद्रस्तरङ्गाग्रैः फेनचन्दनं पिनष्टीव । इन्दुः करैस्तदादाय दिगङ्गना लिम्पतीव । अत्रेवशब्दाभ्यामुत्प्रेक्षाद्वयम् । फेन एव चन्दनम्, दिश एवाङ्गना इति रूपकद्वयम् । तदिदं मिश्रितं तिलतण्डुलवत् । यथा तिलानां तण्डुलानां च मिथो निरपेक्षाणामेव संकीर्णता तथात्रापि ॥

व्यक्तैव छायादर्शवद्यथा—

'निर्मलेन्दु नभो रेजे विकचाब्जं बभौ सरः ।
परं पर्यश्रुनयनौ मम्लतुर्भ्रातरावुभौ ॥ २३९ ॥'

अत्रादर्शे छायेव हेत्वलंकारे रामलक्ष्मणमुखयोरिन्दुपद्मौपम्येन सदृशासदृशव्यतिरेको दृश्यते ॥

**निर्मलेत्यादि** । विवृतोऽयं व्यतिरेकालंकारे । अत्र पूर्वार्धेन हेत्वलंकारे दर्शिते तदाधारक एव सदृशासदृशयोर्व्यतिरेकः । स च दर्पणे प्रतिबिम्ब इवाधाराधेयभावेन व्यवस्थापितः ॥

---

१. 'पांशुपानीयवच्च सा' पाठः. २. 'अत्रादर्शच्छायेव' ख.

अव्यक्ता क्षीरजलवद्यथा—

'क्षीरक्षालितचन्द्रेव नीलीधौताम्बरेव च ।
टङ्कोल्लिखितसूर्येव वसन्तश्रीरदृश्यत ॥ २४० ॥'

अत्रोपमोत्प्रेक्षे क्षीरनीरवन्मिश्रे संसृष्टे न व्यज्येते ॥

**क्षीरेत्यादि** । वसन्तश्रीर्वसन्तशोभाऽदृश्यत जनैः । कीदृशी । क्षीरेण दुग्धेन क्षालितश्चन्द्रो यस्यां सा । नीलीद्रव्येन धौतं क्षालितमम्बरमाकाशं यस्यां सा । टङ्केन पाषाणदारणेनोल्लिखित उत्खण्डितः सूर्यो यस्यां सा । 'टङ्कः पाषाणदारणः' इत्यमरः । अत्रोपमोत्प्रेक्षयोर्मिथो मिलनादव्यक्तता । उभयव्यञ्जकस्य तुल्यकक्षतया प्रवृत्तेरिदं बोद्धव्यम् ॥

अव्यक्तैव पांसूदकवद्यथा—

'कृष्णार्जुनानुरक्तापि दृष्टिः कर्णावलम्बिनी ।
याति विश्वसनीयत्वं कस्य ते कलभाषिणि ॥ २४१ ॥'

अत्र पांसूदकयोरिव मृत्पिण्डे श्लेषविरोधयोरव्यक्तयोरेव व्याजस्तुतावङ्गभावोऽवगम्यते ॥

**कृष्णेत्यादि** । विवृतोऽयं भाविकालंकारे । अत्र यथा मृत्तिकापिण्डे धूलिजलयोर्मिथो मिलनादव्यक्तता तथा श्लेषविरोधयोर्व्याजस्तुतिप्रसङ्गतः संकरः ॥

व्यक्ताव्यक्ता नरसिंहवद्यथा—

'रजोभिस्तुरगोत्कीर्णैर्गजैश्च घनसंनिभैः ।
भुवस्तलमिव व्योम कुर्वन्व्योमेव भूतलम् ॥ २४२ ॥'

अत्र नरसिंहजाताविव सिंहनरशरीरभागयोः परिवृत्त्यलंकारहेतूपमयोरङ्गभावो व्यक्ताव्यक्तरूपः परिस्फुरन्नुपलभ्यते ॥

**रजोभिरित्यादि** । स कीदृशः । हयखुरक्षुण्णै रजोभिर्मेघतुल्यैर्हस्तिभिश्च गगनं

---

१. 'मृत्पिण्डश्लेषविरोधयोः' घ.

भूतलमिव, भूतलं गगनतलमिव कुर्वन् । अत्र यथा नरसिंहजातौ सिंहनराङ्गभागयोर्व्यक्ताव्यक्तरूपं स्फुरणं तथा परिवृत्त्यलंकारे हेतूपमयोरङ्गभावो व्यक्ताव्यक्तरूपः ॥

व्यक्ताव्यक्तैव चित्रवर्णवद्यथा—

'मयूरारावमुखरां प्रावृषं सतडिल्लताम् ।
महाटवीमिवोल्लङ्घ्य तोयानि मुमुचुर्घनाः ॥ २४३ ॥'

अत्र पटावयवस्थानां नीलादीनामिव पटावयव्याश्रिते चित्रवर्णे श्लेषरूपकोपमार्थश्लेषाणां पदपदार्थाश्रयाणां शरद्वर्णनवाक्याश्रयिणि समाध्यलंकारे व्यक्ताव्यक्तरूपोऽङ्गाङ्गिभावः प्रतीयते ॥

**मयूरेत्यादि** । मेघा जलानि सृजन्ति स्म । महाटवीं महारण्यमिव प्रावृषं वर्षा उल्लङ्घ्य । कीदृशीम् । मयूरशब्दमुखरां, सह तडितेव लतया वर्तते ताम् । अत्रावयवाश्रितनीलादीनामवयव्याश्रिते चित्रवर्णे यथाङ्गाङ्गिभावस्तथा श्लेषादीनां समाध्यलंकारे व्यक्ताव्यक्तरूपोऽङ्गाङ्गिभावः प्रतीयत इति ॥

**चतुर्विंशतिरित्येताः क्रमेणोभयसंश्रयाः ।**
**काव्यालंकृतयः प्रोक्ता यथावदुपमादयः ॥ ९१ ॥**

**इति श्रीमहाराजाधिराजश्रीभोजदेवविरचिते सरस्वतीकण्ठाभरणे उभयालंकारविवेचनो नाम चतुर्थः परिच्छेदः ॥**

**चतुर्विंशतिरिति** । इत्यनेन प्रकारेण चतुर्विंशतिरेता उपमादयः काव्यालंकृतय उक्ता इत्यन्वयः । अजहल्लिङ्गतात्र ॥ **उभयेति** । शब्दार्थाश्रिता इत्यर्थः ॥

रत्नं रत्नधरोऽजनिष्ट गुणिनामाद्योऽनवद्यः सतां
सा शुद्धा दमयन्तिकापि सुषुवे नैयायिकं यं सुतम् ।
तस्य श्रीजगद्धरस्य कवितुर्वाणीगणा(ला)लंकृते-
ष्टीकायामुभयप्रकाशनपरिच्छेदश्चतुर्थो गतः ॥

इति महामहोपाध्यायधर्माधिकरणिकश्रीजगद्धरविरचिते सरस्वतीकण्ठाभरणविवरणे चतुर्थः परिच्छेदः ॥

---

१. 'मयूरारावमुखरा' ग.

## पञ्चमः परिच्छेदः ।

रसोऽभिमानोऽहंकारः शृङ्गार इति गीयते ।
योऽर्थस्तस्यान्वयात्काव्यं कमनीयत्वमश्नुते ॥ १ ॥
विशिष्टादृष्टजन्मायं जन्मिनामन्तरात्मसु ।
आत्मसम्यग्गुणोद्भूतेरेको हेतुः प्रकाशते ॥ २ ॥
शृङ्गारी चेत्कविः काव्ये जातं रसमयं जगत् ।
स एव चेदशृङ्गारी नीरसं सर्वमेव तत् ॥ ३ ॥
पश्यति स्त्रीति वाक्ये हि न रसः प्रतिभासते ।
विलोकयति कान्तेति व्यक्तमेव प्रतीयते ॥ ४ ॥
कन्ये कामयमानं मां त्वं न कामयसे कथम् ।
इति ग्राम्योऽयमर्थात्मा वैरस्यायैव कल्पते ॥ ५ ॥
कामं कन्दर्पचाण्डालो मयि वामाक्षि निर्दयः ।
त्वयि निर्मत्सरो दिष्ट्येत्यग्राम्योऽर्थो रसावहः ॥ ६ ॥
नवोऽर्थः सूक्तिरग्राम्या श्रव्यो बन्धः स्फुटा श्रुतिः ।
अलौकि[1]कार्था युक्तिश्च रसमाहर्तुमीशते ॥ ७ ॥
वक्रोक्तिश्च रसोक्तिश्च स्वभावोक्तिश्च वाङ्मयम् ।
सर्वा[2]सु ग्राहिणीं तासु रसोक्तिं प्रतिजानते ॥ ८ ॥
[3]भावो जन्मानुबन्धोऽ[4]र्थ निष्पत्तिः पुष्टिसंकरौ ।
ह्रासाभासौ शमः शेषो विशेषः प[5]रिशेषवान् ॥ ९ ॥
विप्रलम्भोऽथ संभोगस्तच्चेष्टास्तत्परी[6]ष्टयः ।
निरुक्तयः प्रकीर्णानि प्रेमाणः प्रेमपुष्टयः ॥ १० ॥

---

१. 'अलौकिकार्थयुक्तिश्च' क.ख. २. 'सर्वानुग्राहिणीम्' क. ३. अथ चतुर्विंशतिरसोक्तीराह. ४. 'अर्थनिष्पत्तिः' क.ख. ५. 'परिपोषवान्' क.ख. ६. परीक्षाः.

नायिकानायकगुणाः पाकाद्याः प्रेमभक्तयः।
नानालंकारसंसृष्टेः प्रकाराश्च रसोक्तयः[1] ॥ ११ ॥
चतुर्विंशतिरित्युक्ता रसान्वयविभूतयः।
स्वरूपमासां यो वेद स काव्यं कर्तुमर्हति ॥ १२ ॥
आलम्बनविभावेभ्यः स्वेभ्यः स्वेभ्यः समुन्मिषन्।
रसो रत्यादिरूपेण भाव इत्यभिधीयते ॥ १३ ॥
रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चाष्टौ स्थायिभावाः प्रकीर्तिताः ॥ १४ ॥
स्तम्भस्तनूरुहोद्भेदो[2] गद्गदः स्वेदवेपथू।
वैवर्ण्यमश्रु[3]प्रलय इत्यष्टौ सात्त्विकाः स्मृताः[4] ॥ १५ ॥
स्मृतिर्वितर्क उत्कण्ठा[5] चिन्ता चपलता मतिः।
गर्वः स्नेहो धृतिर्व्रीडावहित्थं मूढता मदः ॥ १६ ॥
हर्षामर्षावसूयेर्ष्या विषादो दैन्यमुग्रता।
त्रासः शङ्का गदो ग्लानिरुन्मादः संभ्रमः श्रमः ॥ १७ ॥
निर्वेदो जाड्यमालस्यं निद्रा सुप्तं प्रबुद्धता।
इति भावास्त्रयस्त्रिंशद्विज्ञेया व्यभिचारिणः ॥ १८ ॥
चिरं चित्तेऽवतिष्ठन्ते संबध्यन्तेऽनुबन्धिभिः।
रसत्वं प्रतिपद्यन्ते प्रबुद्धाः[6] स्थायिनोऽत्र ते ॥ १९ ॥
रजस्तमोभ्यामस्पृष्टं मनः सत्त्वमिहोच्यते।
निर्वृत्तयेऽस्य तद्योगात्प्रभवन्तीति सात्त्विकाः ॥ २० ॥
विशेषेणाभितः काये स्थायिनं चारयन्ति ये।

१. रसोक्तीनाम्. २. 'तनुरुहोद्भेद' ग.घ. ३. 'अश्रुप्रलयाविसष्टौ' क.ख. ४ 'मताः' क.ख. ५. 'वितर्कश्चोत्कण्ठा' क.ख. ६. 'भप्रबुद्धाः' क.ख.

अनुभावादिहेतूंस्तान्वदन्ति व्यभिचारिणः ॥ २१ ॥
जनित्वा ये न जायन्ते तेऽथवा व्यभिचारिणः ।
स्मृत्यादयो हि प्रेमादौ भवन्ति न भवन्ति च ॥२२॥
रतौ संचारिणः सर्वान् गर्वस्नेहौ धृतिं[1] मतिम् ।
स्थास्नूनेवोद्धतप्रेयःशान्तोदात्तेषु जानते ॥ २३ ॥
संस्कारपाटवादिभ्योऽनुभावं वा निजाश्रये ।
संचारिणं वा जनयन् सात्त्विकं वा स जायते ॥ २४ ॥
उद्दीपनविभावेभ्यः स्मृतिहेतौ पटीयसि ।
अनुबन्धोऽनुभावादेरनुबन्धो[2]ऽस्य कथ्यते ॥ २५ ॥
विभावस्यानुभावस्य सात्त्विकव्यभिचारिणोः ।
संयोगे तस्य[3] निष्पत्तिमात्रं निष्पत्तिरुच्यते[4] ॥ २६ ॥
विषयाश्रयसंस्कारगुणप्रकृतिपाटवैः ।
दीपनातिशयैश्चास्य प्रकर्षः पुष्टिरुच्यते ॥ २७ ॥
तुल्यकालबलोत्पत्तिहेतौ भावान्तरोदये ।
संसर्गस्तस्य यस्तेन संकरः स निगद्यते ॥ २८ ॥
रसान्तरतिरस्काराद‍न्यद्रागाच्च तस्य यः ।
भवत्यपचयो वृद्धेस्तद्ध्रासं तं प्रचक्षते ॥ २९ ॥
हीनपात्रेषु तिर्यक्षु[5] नायकप्रतियोगिषु ।
गौणेष्वेव पदार्थेषु तमाभासं विजानते ॥ ३० ॥
बलवत्सूपजातेषु प्रतिकूलेषु हेतुषु ।
सर्वात्मना समुच्छेदः प्रशमस्तस्य वर्ण्यते ॥ ३१ ॥
आश्रयात्प्रकृतेर्वापि संस्कार[6]स्थैर्यतोऽपि वा ।

१. 'गर्वस्नेहैर्धृतिं' ख. २. 'अनुबन्धः स' ख. ३. रसस्य. ४. 'निष्पत्तिरिष्यते' ख. ५. 'प्रचक्षते' घ. ६. 'संसारस्थैर्यतोऽपि वा' घ.

योऽस्यात्यन्तम[1]नुच्छेदः स शेष इति शब्द्यते ॥ ३२ ॥
शृङ्गाराद्या रसा ये च ये च शान्तोद्धतादयः ।
ये च रत्यादिभेदास्तान्विशेषानस्य मन्वते ॥ ३३ ॥
विभावश्चानुभावश्च संचारी [2]चाश्रयश्च यः ।
ये च लीलादयो यूनां परिशे[3]षः स कीर्त्यते ॥ ३४ ॥
आश्रयो यस्य रत्यादिः प्रेमादेरुपजायते ।
विषयो यत्र योषादौ सोऽ[5]स्य जन्माधिगच्छति ॥ ३५ ॥
आलम्बनविभावः स ज्ञानकारणमुच्यते ।
तेनादरादिरूपेण संस्कारस्तस्य जायते ॥ ३६ ॥
आहतः पटुरभ्यस्त आश्रयादेर्गुणेन सः ।
तत्प्रबोधाय माल्यर्तुचन्दनेन्दूदयादयः ॥ ३७ ॥
उद्दीपनविभावास्ते स तैः स्मरति वाञ्छति ।
द्वेष्टि प्रयततेऽवैति मन्यते वक्ति चेष्टते ॥ ३८ ॥
तेऽनुभावास्तदा ये स्युः स्वेदरोमोद्गमादयः ।
हर्षामर्षादयो ये च ज्ञेयाः संचारिणोऽत्र ते ॥ ३९ ॥
स्मृतीच्छायत्नजन्मानो मनोवाक्कायसंश्रयाः ।
विलासा ये वरस्त्रीणां ज्ञेया लीलादयस्तु ते ॥ ४० ॥
लीला विलासो विच्छित्तिर्विभ्रमः किलकिञ्चितम् ।
मोट्टायितं कुट्टमितं विब्बोको ललितं तथा ॥ ४१ ॥
विहृतं क्रीडितं केलिरिति स्त्रीणां स्वभावजाः ।
हेलाहावादयश्चान्ये ज्ञेयाः स्त्रीपुंसयोरपि ॥ ४२ ॥

---

१. 'मविच्छेदः' क.ख. २. 'चाश्रयश्च' ख. ३. 'परिपोषः' क.ख. ४. रत्यादेः. ५. 'अन्यतः' क.ख.

उपसंख्यानमेतेषामनुभावेषु मन्वते ।
पश्चाद्भावानुभूतिभ्यां स्मरणाद्यनुभाववत् ॥ ४३ ॥
स्मृत्यादयोऽनुभावाश्च भावाः संचारिणश्च ये ।
नाट्येषु[1] क्रियमाणास्ते नटैरभिनयाः स्मृताः ॥ ४४ ॥
भावो यदा रतिर्नाम प्रकर्षमधिगच्छति ।
नाधिगच्छति चाभीष्टं विप्रलम्भस्तदोच्यते ॥ ४५ ॥
पूर्वानुरागो मानश्च प्रवासः करुणश्च सः ।
पुरुषस्त्रीप्रकाण्डेषु चतुःकाण्डः प्रकाशते ॥ ४६ ॥
प्रागसंगतयोर्[2]यूनोरभिलाषः प्रवर्तते ।
संकल्परमणीयोऽनुरागः स प्राच्य उच्यते ॥ ४७ ॥
अहेरिव गतिः प्रेम्णः स्वभावकुटिलेति सः ।
अहेतोर्[3]मेति नेत्युक्तेर्हेतोर्वा[4] मान उच्यते ॥ ४८ ॥
देशान्तरादिभिर्यूनोर्व्यवधानं चिराय यत् ।
नवेऽनुरागे प्रौढे वा प्रवासः सोऽभिधीयते ॥ ४९ ॥
लोकान्तरगते यूनि वल्लभे वल्लभा यदा ।
भृशं दुःखायते दीना[5] करुणः स तदोच्यते ॥ ५० ॥
रतिरेवेष्टसंप्राप्तौ पुष्टः संभोग उच्यते ।
सोऽपि पूर्वानुरागादेरानन्तर्याच्चतुर्विधः ॥ ५१ ॥
न विना विप्रलम्भेन संभोगः पुष्टिमश्नुते ।
कषायिते हि वस्त्रादौ भूयान्रागोऽनुषज्यते ॥ ५२ ॥

---

१. 'नाट्येषु' (?) क., 'नाट्येऽनुक्रियमाणाः' ख. २. 'प्रागसंकेतयोर्यूनोः' ख.
३. 'अहेतोर्नेति मेत्युक्ते' क. ४. 'स न उच्यते' क. ५. 'दीनः' क.

स्त्रीपुंसयोर्विप्रलम्भे वैचित्त्याकल्पनादयः[1] ।
चेष्टाविशेषाः संभोगे चुम्बनालिङ्गनादयः ॥ ५३ ॥
विप्रलम्भेऽभियोगाद्यैः संभोगे साध्वसादिभिः ।
मिथःपरीक्षा याः[2] प्रेम्णो निर्दिष्टास्ताः परीष्टयः ॥५४॥
विप्रलम्भादिशब्दानां लोकसिद्धेषु वस्तुषु ।
प्रकृत्यादिविभागेन विनिवेशा निरुक्तयः ॥ ५५ ॥
संश्रुत्य विप्रलम्भार्थान्गृधिवञ्च्योः प्रलम्भने ।
इत्यादिज्ञापकाज्ज्ञेयः प्रपूर्वो वञ्चने लभिः ॥ ५६ ॥
आदानं च प्रतिश्रुत्य विसंवादनमेव च ।
कालस्य हरणं चाहुः प्रत्यादानं च वञ्चनम् ॥ ५७ ॥
पूर्वानुरागपूर्वेषु विप्रलम्भेषु तत्क्रमात् ।
विशेषद्योतकेनेह व्युपसर्गेण सूच्यते ॥ ५८ ॥
प्रतिश्रवो हि पूर्वानुरागे[3] वक्रेक्षितादिभिः ।
अभीष्टालिङ्गनादीनामदानं[4] ह्रीभयादिभिः ॥ ५९ ॥
माने निवारणं तेषां[5] विसंवादनमुच्यते ।
अयथावत्प्रदानं वा व्यलीकस्मरणादिभिः ॥ ६० ॥
प्रवासे कालहरणं व्यक्तमेषां प्रतीयते ।
प्रोष्यागतेष्विहैतानि कान्ताः कान्तेषु युञ्जते ॥ ६१ ॥
प्रत्यादानं पुनस्तेषां करुणे[6] को न मन्यते ।
स्वयं दत्तानि हि विधिस्तानि तत्रापकर्षति ॥ ६२ ॥

---

१. 'वैचित्त्याकल्पकादयः' ग. २. 'परीक्षा या प्रेम्णो' घ. ३. 'पूर्वानुरागवक्रेक्षितादिभिः' क. ४. 'मादानं' क.ख. ५. अभीष्टालिङ्गनादीनाम्. ६. 'कारुणे' ग.

प्रलम्भेत्यत्र यदि वा वञ्चनामात्रवाचिनि ।
विना समासे चतुराश्चतुरोऽर्थान्नियुञ्जते ॥ ६३ ॥
विविधश्च विरुद्धश्च व्याविद्धश्च क्रमेण सः ।
विनिषिद्धश्च पूर्वानुरागादिषु विषज्यते ॥ ६४ ॥
पूर्वानुरागे विविधं वञ्चनं व्रीडितादिभिः ।
माने विरुद्धं तत्प्राहुः पुनरीर्ष्यायितादिभिः ॥ ६५ ॥
व्याविद्धं दीर्घकालत्वात्प्रवासे तत्प्रतीयते ।
विनिषिद्धं तु करुणे करुणत्वेन गीयते ॥ ६६ ॥
रागोऽनु सह पश्चाद्वानुरूपोऽनुगतोऽपि वा ।
यूनोरपूर्वः पूर्वानुरागशब्देन शब्द्यते ॥ ६७ ॥
राजते रञ्जतेर्वापि रागः करणभावयोः ।
घञान्यत्कारके भावे नलोपेन नियम्यते ॥ ६८ ॥
मान्यते प्रेयसा येन यं प्रियत्वेन मन्यते ।
मनुते वा मिमीते वा प्रेममानः स कथ्यते ॥ ६९ ॥
महाभाष्यकृतः कोऽसावनुमान इति स्मृतेः ।
ल्युडन्तोऽपि न पुंलिङ्गो मानशब्दः प्रदुष्यति ॥ ७० ॥
यत्राङ्गना युवानश्च वसते न वसन्ति च ।
स प्रवासः प्रशब्देन प्रतीपार्थेन कथ्यते ॥ ७१ ॥
चित्तोत्कण्ठादिभिश्चेतो भृशं वासयतीह यः ।
प्रवासयति वा यूनः स प्रवासो निरुच्यते ॥ ७२ ॥

---

१. 'प्रलभेत्यत्र' घ. २. विशब्देन. ३. 'न्मयुञ्जते' ख. ४. पूर्वानुरागप्रवासकरुणाख्येषु. ५. वञ्चनम्. ६. 'करुणः' ख., 'किरगे' ग. ७. 'करणभावयोः' ख. ८. 'घञापि करणे भावे' घ., 'घञान्यकारके भावे' क. ९. 'चिन्तोत्कण्ठादिभिश्चेतो' क.ख.

प्रपूर्वको वसिर्ज्ञेयः कारितान्तःप्रमापणे[1]।
तूष्णीं प्रवासयेदेनमिति वृद्धानुशासनात् ॥ ७३ ॥
अभूतोत्पादनायां कृञ् दृष्टः कुरु घटं यथा।
दृष्टश्चोच्चारणे चौरंकारमाक्रोशतीतिवत् ॥ ७४ ॥
दृष्टोऽवस्थापनेऽश्मानमितः कुरु यथोच्यते।
अभ्यञ्जनेऽपि च यथा पादौ[2] मे सर्पिषा[3] कुरु ॥ ७५ ॥
मूर्च्छाविलापौ कुरुते कुरुते साहसे[4] मनः।
करोति चित्तं[5] दुःखेन योऽसौ करुण उच्यते ॥ ७६ ॥
भुजिः पालनकौटिल्याभ्यवहारानुभूतिषु।
भुनक्ति भुग्नो भुङ्क्तेऽन्नं भुङ्क्ते सुखमितीष्यते ॥ ७७ ॥
समीचीनार्थसंपूर्वात्ततो घञ्प्रत्यये सति।
भावे वा कारके वापि रूपं संभोग इष्यते ॥ ७८ ॥
स पालनार्थः[6] पूर्वानुरागानन्तर उच्यते।
उत्पन्ना हि रतिस्तस्मिन्नानुकूल्येन पाल्यते ॥ ७९ ॥
स मानानन्तरं प्राप्तः कौटिल्यार्थं विगाहते।
स्वतोऽपि कुटिलं प्रेम किं नु[7] मानान्वये सति ॥ ८० ॥
प्रवासानन्तरे तस्याभ्यवहारार्थतेष्यते।
तत्र क्षुपोषितैरन्नमिव निर्विश्यते रतिः ॥ ८१ ॥
करुणानन्तरगतोऽनुभवार्थः[8] स कथ्यते।
विस्रम्भवद्भिरस्मिन्हि[9] सुखमेवानुभूयते[10] ॥ ८२ ॥

---

१. अन्तःप्रमापणमाभ्यन्तरो वधः. २. मे पादौ सर्पिषाभ्यञ्जयेत्यर्थः. ३. 'पादौ मे कुरु सर्पिषा क.ख. ४. 'कुरुते साहसं मनः' क.ख. ५. 'करोति दुःखं चित्तेन' क.ख. ६. 'स पावनार्थः' क. ७. 'किमु मानान्वये सति' क. ८. 'ऽनुभावार्थः स कथ्यते' क.ख. ९. 'विश्रम्भवद्भिः' क.ख.ग. १०. 'मुखमेवानुभूयते' घ.

यदि वा भोग इत्यस्य संप्रयोगार्थवाचिनः ।
सम[1]ा समासे चे[2]त्वारो विशेषा[3]स्तमुपासते ॥ ८३ ॥
स संक्षिप्तोऽ[4]र्थ संकीर्णः संपूर्णः सम्यगृद्धिमान् ।
अनन्तरोपदिष्टेषु संभोगेषूपपद्यते ॥ ८४ ॥
नवे हि सङ्गमे प्रायो युवानः साध्वसादिभिः ।
संक्षिप्तानेव रत्यर्थमुपचारान्प्रयुञ्जते ॥ ८५ ॥
मानस्यानन्तरे तेषां व्यलीकस्मरणादिभिः ।
रोषशेषानुसंधानात्संकरः केन वार्यते ॥ ८६ ॥
संपूर्णः पूर्णकामानां कामिनां प्रोष्यसंगमे ।
उत्कण्ठितानां भूयिष्ठमुपभोगः प्रवर्तते ॥ ८७ ॥
प्रत्यागतेऽपि यत्रैषा रतिपुष्टिः प्रिये जने ।
सा किमावर्ण्यते यूनां तत्रैव मृतजीविते ॥ ८८ ॥
पूर्वानु[6]रागः पूर्वाणां व्युत्पत्तिभिरुदाहृतः ।
अनन्तराणां सर्वेषां तत्समासे निरुक्तयः ॥ ८९ ॥
वृत्तिस्तत्राजहत्स्वार्था जहत्स्वार्थापि वर्तताम् ।
प्रधानमनुपस्कृत्य न तदर्थो निवर्तते ॥ ९० ॥
प्रथमानन्तरे वृत्तेरजहत्स्वार्थतेष्यते ।
नात्यन्तमजहत्स्वार्थां तां मानानन्तरे विदुः ॥ ९१ ॥
प्रवासानन्तरे त्वीषदजहत्स्वार्थतेष्यते ।
करुणार्थस्य गन्धोऽपि नास्त्येव तदनन्तरे ॥ ९२ ॥

---

१. समा सम्रुपसर्गेण. २. 'चतुराश्चतुरोऽर्थान् प्रचक्षते' क.ख. ३. तं संभोगम्. ४. 'संक्षिप्तोऽर्थसंकीर्णः' क. ५. 'प्रयोजने' क. ६. 'पूर्वानुरागपूर्वाणां' क.ख.

अष्टमीचन्द्रकः[1] कुन्दचतुर्थी[2] सुवसन्तकः[3] ।
आन्दोलनचतुर्थ्ये[4]कशाल्मली[5] मदनोत्सवः[6] ॥ ९३ ॥
उदकक्ष्वेडिका[7]शोकोत्तंसिका[8] चूतभञ्जिका[9] ।
पुष्पावचायिका[10] चूतलतिका[11] भूतमातृका[12] ॥ ९४ ॥
कदम्बयुद्धा[13]नि नवपत्रिका[14] बिसखादिका[15] ।
शक्रार्चा[16] कौमुदी[17] यक्षरात्रि[18]रभ्यूषखादिका[19] ॥ ९५ ॥
नवेक्षुभक्षिका[20] तोयक्रीडा[21] प्रेक्षा[22]दिदर्शनम् ।

---

१. प्रकीर्णकेषु स्पृहयन्तीव्रतमष्टमीचन्द्रकः. स हिं चैत्रचतुर्थीतोऽष्टमचतुर्थ्यामुपादीयमानः कामिनीभिरर्च्यते. २. यस्यां यवस्रस्तरेष्वबला लोलन्ति सा कुन्दचतुर्थी. ३. वसन्तावतारदिवसः सुवसन्तकः. ४. यस्यां स्त्रियो दोलामारोहन्ति सा आन्दोलनचतुर्थी. ५. एकमेव सुकुसुमनिर्भरशाल्मलिवृक्षमाश्रित्य सुनिमीलितकादिभिः खेलतां क्रीडा एकशाल्मली. ६. त्रयोदश्यां कामदेवपूजा मदनोत्सवः. ७. गन्धोदकपूर्णवंशनाडीशृङ्गादिभिर्यूनां प्रियजनाभिषेककर्दमेन क्रीडा उदकक्ष्वेडिका. ८. यत्रोत्तमस्त्रियः पदाभिघातेनाशोकं विकाश्य तत्कुसुममवतंसयन्ति सा अशोकोत्तंसिका. ९. यत्राङ्गनाभिश्चूतमञ्जर्योऽवच्चित्यानङ्गाय बालरागत्वेनैव दायंदायमवतंस्यन्ते सा चूतभञ्जिका., 'भूतभञ्जिका' घ. १०. यत्र युवत्यो मदिरागण्डूषदोहदेन बकुलं विकाश्य तत्पुष्पाण्यवचिन्वन्ति सा पुष्पावचायिका. ११. यत्र कस्ते प्रियतम इति पृच्छद्भिः पलाशादिनवलताभिः प्रियो जनो हन्यते सा चूतलतिका. १२. पश्चात्मनानुनयन्ती भूतमातृका. १३. वर्षासु कदम्बनीपहारिद्रकादिकुसुमैः प्रहरणभूतैर्द्विधा बलं विभज्य कामिनीनां क्रीडा कदम्बयुद्धानि., कादम्बयुद्धानीत्यपि पाठः. १४. प्रथमवर्षणप्ररूढनवतृणाङ्कुरासु स्थलीषु शाद्वलमभ्यर्च्य भुक्तपीतानां कृत्रिमविवाहादिक्रीडा नवपत्रिका. १५. अभिनवबिसाङ्कुरोद्भेदाभिरामसरः समाश्रित्य कामिमिथुनानां क्रीडा बिसखादिका. १६. शक्रोत्सवदिवसेः शक्रार्चा. १७. आश्विने पौर्णमासी कौमुदी. १८. दीपोत्सवो यक्षरात्रिः. १९. शमीधान्यानामार्द्राणामेवाग्निपक्वानामभ्यवहारोऽभ्यूषखादिका.' 'अभ्युषखादिका' इत्यपि पाठः. २०. प्रथमतः पत्रेक्षुभक्षणं नवेक्षुभक्षिका. २१. ग्रीष्मादौ जलाशयावगाहनं तोयक्रीडा. २२. नाथादिदर्शनं प्रेक्षा.

द्यूतानि मधुपानं च प्रकीर्णानीति जानते ॥ ९६ ॥

१. आलिङ्गनादिम्लक्षा दुरोदरादिक्रीडा द्यूतानि. २. रागोद्दीपनाय माध्वीकादिसेवा मधुपानम्. वात्स्यायनीये कामशास्त्रे क्रीडाद्वैविध्यं समस्या देश्याश्चेति भेदात् । तासु काश्चिद्विहाय सर्वा अपि नैताभ्यः पृथक् तत्रोल्लिखितटीकाकर्त्रा व्याख्याता इत्यत्रापि तद्व्याख्यानं समुद्धृत्य विलिखामः—'समस्याः क्रीडा आह—यक्षरात्रिः, कौमुदीजागरः, सुवसन्तकः । यक्षरात्रिरिति सुखरात्रिः । यक्षाणां तत्र संनिधानात् । तत्र प्रायशो लोकस्य द्यूतक्रीडा । कौमुदीजागर इति । आश्वयुज्यां हि पौर्णमास्यां कौमुद्या ज्योत्स्नायाः प्रकर्षेण प्रवृत्तेः । तत्र दोलाद्यूतप्रायाः क्रीडाः । सुवसन्तक इति । सुवसन्तो मदनोत्सवः । तत्र नृत्यगीतवाद्यप्रायाः क्रीडाः । एता माहिमान्यः क्रीडाः ॥ देश्या आह—सहकारभञ्जिका, अभ्यूषखादिका, बिसखादिका, नवपत्रिका, उदकक्ष्वेडिका, पाञ्चालानुयानम्, एकशाल्मली, कदम्बयुद्धानि, तास्ताश्च माहिमान्यो देश्याश्च क्रीडा जनेभ्यो विशिष्टमाचरेयुः । इति संभूयक्रीडाः । सहकारभञ्जिकेति । सहकारफलानां भञ्जनं यत्र क्रीडायाम् । अभ्यूषखादिका फलानां विटपस्थानामग्नौ प्लोषितानां खादनं यत्र । बिसखादिका बिसानां मृणालानां खादनं यत्र । सरःसमीपवासिनामित्येते द्वे क्वचित्क्वचिद्दृश्येते । नवपत्रिका प्रथमवर्षणेन प्ररूढनवपत्रासु वनस्थलीषु या क्रीडा सा प्रायेणाटवीसमीपवासिनामाटविकानां च । उदकक्ष्वेडिकेति । 'वंशनाडी स्मृता क्ष्वेडा सिंहनादश्च कथ्यते' इति । उदकपूर्णा क्ष्वेडा यस्यां क्रीडायां सा मध्यदेश्यानाम् । यस्याः शृङ्गक्रीडेति प्रसिद्धिः । पाञ्चालानुयानम् । भिन्नालापचेष्टितैः पाञ्चालक्रीडा यथा मिथिलायाम् । एकशाल्मली एकमेव महान्तं कुसुमनिर्भरं शाल्मलीवृक्षमाश्रित्य तत्रत्यकुसुमाभरणानां क्रीडा । यथा वैदर्भाणाम् । यवचतुर्थी वैशाखशुक्लचतुर्थ्यां नायकानां परस्परं सुगन्धयवचूर्णप्रक्षेप इति पाश्चात्येषु प्रसिद्धा । आलोलचतुर्थी श्रावणशुक्लतृतीयायां हिन्दोलक्रीडा । मदनोत्सवो मदनप्रतिकृतिपूजनम् । दमनभञ्जिका परस्परं सुगन्धपुष्पविशेषावतंसनम् । होलाका ··· ··· ··· । अशोकोत्तंसिका अशोकपुष्पैः शिरोभूषणरचना । पुष्पावचायिका पुष्पक्रीडा । चूतलतिका चूतपल्लवावतंसनम् । इक्षुभञ्जिका इक्षुखण्डमण्डनम् । कदम्बयुद्धानि कदम्बकुसुमैः प्रहरणभूतैर्द्विधा बलं विभज्य युद्धानि । कदम्बग्रहणं कुसुमसुकुमारप्रहरणसूचनार्थम् । यष्टीष्टकादियुद्धानि तु न कार्याणि । यथा पौण्ड्राणां युद्धं क्वचित्क्वचिद्दृश्यते । तास्ताश्चेति । या या लोके प्रवृत्तिपूर्वाः । माहिमान्य इति महिमा महत्त्वं तद्विद्यते यासामिति । 'संज्ञायां मन्माभ्याम् ५।२।१३७'

नित्यो नैमित्तिकश्चान्यः सामान्योऽन्यो विशेषवान्।
प्रच्छन्नोऽन्यः प्रकाशोऽन्यः कृत्रिमाकृत्रिमावुभौ ॥९७॥
सहजाहार्यनामानौ परौ यौवनजोऽपरः।
विस्रम्भजश्च प्रेमाणो द्वादशैते महर्द्धयः ॥ ९८ ॥
चक्षुःप्रीतिर्मनःसङ्गः संकल्पोत्पत्तिसंततिः।
प्रलापो जागरः कार्श्यमरतिर्विषयान्तरे ॥ ९९ ॥
लज्जाविसर्जनं व्याधिरुन्मादो मूर्च्छनं मुहुः।
मरणं चेति विज्ञेयाः क्रमेण प्रेमपुष्टयः ॥ १०० ॥
नायकः प्रतिपूर्वोऽसावुपपूर्वोऽनुनायकः।
नायिका प्रतिपूर्वासावुपपूर्वानुनायिका ॥ १०१ ॥
नायिकानायकाभासावुभयाभास इत्यपि।

---

इति निप्रत्ययः। सर्वदेशव्यापिन्य इत्यर्थः। देशे भवा देश्याः। प्रादेशिन्य इत्यर्थः। जनेभ्यो विशिष्टमिति घटादयो नागरकाणामिति। समस्यास्तु साधारणाः। तत्र जना नागरकाश्च क्रीडन्ति। तस्मात्तेभ्यो विशिष्टमाचरेयुः नागरत्वद्योतनार्थम्। संभूयक्रीडा इति। आसु नागरकाणां द्रव्यमुपहार्य संभूयक्रीडनात्। कन्दर्पचूडामणिकर्ता वीरभद्रोऽपि—'कुर्याच्च यक्षरात्रिं सुखरात्रिः सा च कथ्यते लोके। ऐक्यं कोजागरया कौमुद्यास्तत्र निर्दिष्टम्॥ सुवसन्तकोऽत्र शास्त्रे भवति वसन्तस्य वासरः प्रथमः। विसखादिका सरस्यां विसभुक्तिः कीर्तिता लोकैः॥ मदनार्थिताम्रकुसुमैरवतंसे चाम्रभञ्जिका प्रोक्ता। अभ्यूषखादिकैवं ज्ञातव्या ग्रन्थतः परतः॥ अन्योन्यं जलसेकः पानीयक्ष्वेडिकेरिता विबुधैः। कृत्रिमविवाहलीला कथिता नवपत्रिका तज्ज्ञैः॥ कृत्रिमपुत्रकलीला स्यादनुयानं तथा तु पाञ्चाल्याः। शाल्मल्यामधिरुह्य क्रीडैका शाल्मली कथिता॥ युद्धं कदम्बमुकुलैः प्रविभज्य बलं परस्परं यत्र। स्यात्तत्कदम्बयुद्धं कुर्यादन्यास्तथा लीलाः॥' इति जयमङ्गलाकर्तुरनुव्याचष्टे.

१. 'नैमित्तिकश्चान्यो' क.घ. २. 'विस्रम्भजश्च' क.ख. ३. 'नायकः प्रतिपूर्वोऽयमुपपूर्वोऽनुनायकः' क.ख.

तिर्यक्षु[1] च तदाभास इति द्वादश नायकाः ॥ १०२ ॥
तेषु सर्वगुणोपेतः कथाव्यापी च नायकः ।
अन्यायवांस्तदुच्छेद्य उद्धतः प्रतिनायकः ॥ १०३ ॥
ततः कैश्चिद्गुणैर्हीनः पूज्यश्चैवोपनायकः ।
समो न्यूनोऽपि वा तस्य कनीयाननुनायकः ॥ १०४ ॥
स्यात्कथाव्यापिनी सर्वगुणयुक्ता च नायिका ।
हेतुरीर्ष्यायितादीनां सपत्नी प्रतिनायिका ॥ १०५ ॥
ततः कैश्चिद्गुणैर्हीना पूज्या चैवोपनायिका ।
समा न्यूनापि वा किंचित्कनीयस्यनुनायिका ॥ १०६ ॥
तदाभासास्तथैव स्युर्भेदाश्चै[2]षां गुणादिभिः ।
नायकस्तत्र गुणत उत्तमो मध्यमोऽधमः ॥ १०७ ॥
[3]प्रकृतेः सात्त्विकः स स्याद्राजसस्तामसस्तथा ।
साधारणोऽ[4]नन्यजातिः स विज्ञेयः परिग्रहात् ॥ १०८ ॥
उद्धतो ललितः शान्त उदात्तो धैर्यवृत्तितः ।
शठो धृष्टोऽनुकूलश्च दक्षिणश्च प्रवृत्तितः ॥ १०९ ॥
गुणतो नायिकापि स्यादुत्तमा मध्यमाधमा ।
मुग्धा मध्या प्रगल्भा च वयसा कौशलेन वा[5] ॥११०॥
धीराधीरा च धैर्येण स्वान्यदीयापरिग्रहात् ।
ऊढानूढोपयमनात्क्रमाज्ज्येष्ठा कनीयसी ॥ १११ ॥
मानर्द्धेरुद्धतोदात्ता शान्ता च ललिता च सा ।
सामान्या च पुनर्भूश्च स्वैरिणी चेति वृत्तितः ॥ ११२ ॥

---

१. 'तिर्यक्षु च तदाभासा' क.ख. २. 'भेदास्तेषां' क.ख. ३. 'प्राकृतः' ख.
४. 'अनन्यजातिः' ख. ५. 'च' क.ख.

आजीवतस्तु गणिका रूपाजीवा विलासिनी ।
अवस्थातोऽपराश्चाष्टौ विज्ञेयाः खण्डितादयः ॥११३॥
निद्राकुलितताम्राक्षो नारीनखविभूषितः ।
प्रातरेति प्रियो यस्याः कुतश्चित्सेह खण्डिता ॥ ११४॥
चाटुकारमपि प्राणनाथं कोपादपास्य या ।
पश्चात्तापमवाप्नोति कलहान्तरिता तु सा ॥ ११५ ॥
दूतीमहरहः प्रेष्य कृत्वा संकेतकं क्वचित् ।
यस्या न मिलितः प्रेयान्विप्रलब्धेति तां विदुः ॥११६॥
सा तु वासकसज्जा स्यात्सज्जिते वासवेश्मनि ।
प्रियमास्तीर्णपर्यङ्का भूषिता या प्रतीक्षते ॥ ११७ ॥
स्वाधीनपतिका सा तु यस्याः पार्श्वं न मुञ्चति ।
प्रियश्चित्ररतक्रीडासुखास्वादनलोलुपः ॥ ११८ ॥
पुष्पेषुपीडिता कान्तं याति या साभिसारिका ।
प्रियो देशान्तरे यस्याः सा तु प्रोषितभर्तृका ॥११९॥
यस्याः समुचितेऽप्यह्नि प्रवासी नैति वल्लभः ।
विरहोत्कण्ठिता सा तु द्वात्रिंशदिति नायिकाः ॥१२०॥
हीनपात्राणि शेषाणि पीठमर्दो विदूषकः ।
विटचेटौ पताकाश्च सख्यश्चैषां परिग्रहः ॥ १२१ ॥
महाकुलीनतौदार्यं महाभाग्यं कृतज्ञता ।
रूपयौवनवैदग्ध्यशीलसौभाग्यसंपदः ॥ १२२ ॥

---

१. 'निद्राकूणित' क.ख. २. 'कुतश्चित्खण्डितेति सा' क., 'कुतश्चित्खण्डिता तु सा' ख. ३. 'पर्यङ्के' क. ख. ४. उत्तमाद्यो विलासिन्यन्ताश्चतुर्विंशतिः, खण्डितादयो विरहोत्कण्ठिताश्चाष्टाविति द्वात्रिंशत्. ५. 'शीलसौभाग्यसंमदः' क.

मानितोदारवाक्यत्वमदरिद्रानुरागिता ।
द्वादशेति गुणानाहुर्नायकेष्वाभिगामिकान् ॥ १२३ ॥
मृद्वीकानालिकेराम्रपाकाद्याः पाकभक्तयः ।
नीलीकुसुम्भमञ्जिष्ठारागाद्या रागभक्तयः ॥ १२४ ॥
अन्तर्व्याजबहिर्व्याजनिर्व्याजा व्याजभक्तयः ।
धर्मार्थकामोदर्काश्च प्रेमसूदर्कभक्तयः ॥ १२५ ॥
वाक्यवच्च प्रबन्धेषु रसालंकारसंकरान् ।
निवेशयन्त्यनौचित्यपरीहारेण सूरयः ॥ १२६ ॥
चतुर्वृत्त्यङ्गसंपन्नं चतुरोदात्तनायकम् ।
चतुर्वर्गफलं को न प्रबन्धं बान्धवीयति ॥ १२७ ॥
मुखं प्रतिमुखं गर्भोऽवमर्शश्च मनीषिभिः ।
स्मृतानिर्वहणं चेति प्रबन्धे पञ्च संधयः ॥ १२८ ॥
अविस्तृतमसंक्षिप्तं श्रव्यवृत्तं सुगन्धि च ।
भिन्नसर्गान्तवृत्तं च काव्यं लोकोऽभिनन्दति ॥ १२९ ॥
पुरोपवनराष्ट्रादिसमुद्राश्रमवर्णनैः ।
देशसंपत्प्रबन्धस्य रसोत्कर्षाय कल्पते ॥ १३० ॥
ऋतुरात्रिंदिवार्केन्दूदयास्तमयकीर्तनैः ।
कालः काव्येषु संपन्नो रसपुष्टिं नियच्छति ॥ १३१ ॥
राजकन्याकुमारस्त्रीसेनासेनाङ्गभङ्गिभिः ।

१. अदरिद्रेत्यनुरागितायाया विशेषणम्. तेन स्थिरानुरागितेत्यर्थः. २. 'नारिकेराम्रपाकाद्या' ख., 'नारिकेलाम्रपाकाद्याः' घ. ३. 'प्रेमसंपर्कभक्तयः' क.ख. ४. 'रसालंकारसंकरात्' क. ५. 'चतुर्वृत्त्यङ्गसंपन्नं' क.ख. ६. 'सुसन्धि च' क. ७. 'ऋतुरात्रिं' क.ख. ८. 'दिवार्केन्दूदयास्तमयवर्णनैः' क.ख.

[1]पात्राणां वर्णनं काव्ये रसस्रोतोऽधितिष्ठति ॥ १३२ ॥
उद्यानसलिलक्रीडामधुपानरतोत्सवाः ।
विप्रलम्भा विवाहाश्च चेष्टाः काव्ये रसावहाः ॥१३३॥
मन्त्रदूतप्रयाणाजिनायकाभ्युदयादिभिः ।
पुष्टिः पुरुषकारस्य रसं काव्येषु वर्षति ॥ १३४ ॥
नावर्णनं नगर्यादेर्दोषाय विदुषां मतम् ।
यदि शैलर्तुराज्यादेर्वर्णनेनैव तुष्यति[2] ॥ १३५ ॥
गुणतः प्रागुपन्यस्य नायकं तेन विद्विषाम् ।
निराकरणमित्येष मार्गः प्रकृतिसुन्दरः ॥ १३६ ॥
वंश[3]वीर्यश्रुतादीनि वर्णयित्वा रिपोरपि ।
तज्जयान्नायकोत्कर्षकथनं च धिनोति नः ॥ १३७ ॥

अथैषां लक्षणोदाहरणानि—

त[4]त्र,

मनोनुकूलेष्वर्थेषु सुखसंवेदनं रतिः ।
[5]असंप्रयोगविषया सैव प्रीतिर्निगद्यते ॥ १३८ ॥

तद्रूपेण रसस्य भावो यथा—

'हरस्तु किंचित्प[6]रिवृत्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः ।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि ॥ १ ॥'

अत्र बिम्बोष्ठत्वादिभिर्मनोनुकूले पार्वतीमुखे विलोचनव्यापारानुमितो महेश्वरस्याभिलाषविशेषः सा[7]त्त्विकादेर[8]नुत्पादात्सुखानुभवस्योत्पत्तिमात्रमनुमापयति ॥

---

१. 'पात्राणां वर्णनात्काव्ये' क.ख. २. 'पुष्यति' ख. ३. 'वंशवृत्तश्रुतादीनि' क. ख. ४. 'तत्र' क.ख. नास्ति. ५. 'आसंप्रयोगविषया' क.ख. ६. 'परिलुप्तधैर्यः' ख. ७. 'सात्त्विको' क.ख. ८. 'रत्युत्पादात्' क.

तद्रूपेणैव सात्त्विकोत्पत्तौ जन्म यथा—

'अभू[1]दुरः कण्टकितप्रकोष्ठः स्विन्नाङ्गुलिः संववृते कुमारी ।
त[2]स्मिन्द्वये तत्क्षणमात्मवृत्तिः समं विभक्तेव मनोभवेन ॥ २ ॥'

अत्र स्वेदरोमोद्भेद[3]योः सात्त्विकयोरुत्पादाद्रसस्य रतिरूपेणाविर्भावोऽवगम्यते ।

जन्मैव सं[4]चार्युत्पत्तौ यथा—

'तयोर[5]पाङ्गप्रविचारितानि किंचिद्[6]व्यवस्थापितसंहृतानि ।
ह्रीयन्त्रणामानशिरे मनोज्ञामन्योन्यलोलानि विलोचनानि ॥ ३ ॥'

अत्र ह्रीः संचारिभावो जायमानो रसस्य जन्म ज्ञापयति ।

तदेवानु[7]भावोत्पत्तौ यथा—

'ततः सुनन्दावचनावसाने लज्जां मृ[8]दूकृत्य नरेन्द्रकन्या ।
दृष्ट्या प्रसादामलया कुमारं प्रत्यग्रहीत्संवरणस्रजेव ॥ ४ ॥'

अत्र दृष्टिलक्षणः शरीरार[9]म्भोऽनुभावो भवन् रसाविर्भावं लक्षयति ।

अनुभावादेरनेकस्यैकस्य वा पुनरुत्पत्तिरनुबन्धः । सोऽनेकस्य यथा—

'विवृण्वती शैलसुतापि भावमङ्गैः [10]कंचिद्बालकदम्बकल्पैः ।
साचीकृता चारुतरेण तस्थौ मुखेन पर्यस्तविलोचनेन ॥ ५ ॥'

---

१. 'आसीद्दरः कण्टकितप्रकोष्ठः' इति मल्लिनाथोट्टङ्कितः पाठः. २. 'वृत्तिस्तयोः पाणिसमागमेन समं विभक्तेव मनोभवस्य' मुद्रितपाठः. ३. 'स्वेदरोमोद्गमयोः' ख. ४. 'जन्मैव सत्त्वाद्युत्पत्तौ यथा' ख. ५. अत्र च 'तयोरुपान्तप्रतिचारितानि', 'तयोरपाङ्गप्रतिचालितानि', 'तयोरपाङ्गप्रतिवारितानि' इत्येवंविधा अनेके पाठाः. ६. अत्रापि 'क्रियासमापत्तिनिवर्तितानि', 'क्रियासमापत्तिविवर्तितानि', 'क्रियासमापत्तिषु कातराणि', 'तयोः समापत्तिषु कातराणि किंचिद्व्यवस्थापितसंहृतानि' इत्येवंविधा अनेके पाठाः. ७. 'तदेवानुभवोत्पत्तौ' क., 'तदेवानुभयोत्पत्तौ' ख. ८. 'तनूकृत्य' मुद्रितपाठः. ९. 'शरीरारम्भेऽनुभावो भवन्' क.ख., 'शरीरानुभावो भवन्' ग. १०. 'स्फुरद्बालकदम्बकल्पैः' ख. मुद्रितकुमारे.

अत्र देव्याः स्मरारौ[1] पूर्वमुत्पन्ना रतिः साभिलाषतदवलोकने[2]विविक्तवसन्तादिभिरुद्दीप्यमाना रोमाञ्चावहित्थलक्षणाभ्यां सात्त्विकव्यभिचारिभ्यामनुबध्यते ॥

एकस्यैव पुनः पुनर्यथा[3]—

'यान्त्या मुहुर्वलितकंधरमाननं त-
दावृत्तवृन्तशतपत्रनिभं वहन्त्या ।
दिग्धोऽमृतेन च विषेण च पक्ष्मलाक्ष्या
गाढं निखात इव मे हृदये कटाक्षः ॥ ६ ॥'

अत्र मालत्या माधवविषये पूर्वमुत्पन्ना रतिर्वसन्तावतारैस्तत्संनिधिविशेषप्रदर्शनादिभिरुद्दीप्यमाना[4] पुनः पुनरुत्पन्नेन वलितग्रीवकटाक्षविक्षेपलक्षणेन शरीरारम्भानुभावेनानुबध्यते । अत्रैव[5] माधवस्य मालतीविषये तदहरेवोत्पन्ना रतिस्तैरेवोद्दीपनैरुद्दीप्यमाना हर्षधृतिस्मृतिमतिव्याध्यादिभिः संचारिभावैर्वागारम्भेण चानुभावेनानुबध्यते ॥

रतिरूपेणैव रसनिष्पत्तिर्यथा—

'तं वीक्ष्य वेपथुमती सरसाङ्गयष्टि-
र्निक्षेप[6] एव पदमुद्धृतमपर्यन्ती[7] ।
मार्गाचलव्यतिकराकुलितेव सिन्धुः
शैलाधिराजतनया न ययौ न तस्थौ ॥ ७ ॥'

अत्र जन्मान्तरानुभवसंस्कारात्प्रतिकूलेऽपि शूलिनि शैलात्मजायाः[8] सर्वकालमेवाविच्छिन्ना रतिश्चिरविप्रयुक्तस्य[9] दुश्चरेणापि तपसा प्रार्थनीय-

---

१. 'शिवे' घ. २. 'तदवलोकनेन' क.ख. ३. 'पुनःपुनरुत्पत्तिर्यथा' ख. ४. 'वसन्तावतारतः संनिधिविशेष' घ. ५. 'अत्र च' घ. पुस्तके पाठान्तरम्. ६. 'निक्षेपणाय' क.ख. मुद्रिते. ७. 'मुद्धृतमुद्वहन्ती' कुमारसंभवस्य मुद्रितपाठः. ८. 'शिवायाः' घ. ९. 'चिरं विप्रयुक्तस्य' क.ख.

संगमस्य तस्याकस्मिकदर्शनेनोद्दीप्यमाना सद्यःसमुपजायमानसात्त्विकस्वेदस्तम्भवेपथूपलक्षितैर्हर्षस्मृत्यावेगसाध्वसादिभिर्व्यभिचारिभिर्भावैः[1][2] पदनिक्षेपलक्षणेन[3] च शरीरानुभावेन संसृज्यते । सोऽयं विभावानुभावव्यभिचारिसंयोगे[4] रतिरूपेण रसो निष्पद्यते ।

रतिरूपेणैव रसपुष्टिर्यथा[5]—

'पीनश्रोणि गभीरनाभि निभृतं मध्ये भृशोच्चस्तनं
　　पायाद्वः परिरब्धमब्धिदुहितुः कान्तेन कान्तं वपुः ।
स्वावासानुपघातनिर्वृतमनास्तत्कालमीलद्दृशे
　　यस्मै सोऽच्युतनाभिपद्मवसतिर्वेधाः शिवं ध्यायति ॥ ८ ॥'

अत्र सर्वदैव श्रीवत्सलक्ष्मणो लक्ष्मीविषये महाकुलीनतौदार्यस्थिरानुरागितारूपयौवनवैदग्ध्यशीलसौभाग्यमहाभाग्यादिभिः समुत्पन्ना रतिस्तदवयवविशेषकामनीयकविभावनेनोद्दीपनविभावातिशयेनोद्दीप्यमानां ब्रह्मणः समक्षमप्यालिङ्गनलक्षणेन शरीरारम्भानुभावेनानुमीयमानां लज्जाप्रणाशलक्षणां प्रेमपुष्टेरष्टमीमवस्थामध्यास्ते । अत्र चानुक्ता अपि सात्त्विका व्यभिचारिणोऽन्येऽपि चानुभावविशेषाः प्रतीयन्ते । श्रियोऽपि च समप्रात्मगुणसंपदाश्रये श्रीवत्सलक्ष्मणि तथाभूता तदभ्यधिका वा[6] रतिः प्रवृद्धप्रेमप्रियतमालिङ्गनलक्षणेनोद्दीपनविभावेनोद्दीप्यमाना नयननिमीलनानुमेयां समस्तसात्त्विकानुभावव्यभिचारिहेतुं प्रेमपुष्टेरुत्तमामवस्थामाश्रयति । सोऽयं विषयसौन्दर्यादाश्रयप्रकृतेः संस्कारपाटवादुद्दीपनातिशयाच्च परां कोटिमावहन् रसः पुष्ट इत्युच्यते । अत्रैव ब्रह्मणः श्रियं प्रति मनोहरा ममेयं सृष्टिरिति, रत्नाकरस्येयमात्मजेति, चन्द्रा-

१. 'हर्षधतिस्मृत्यावेग–' क.ख. २. 'व्यभिचारिभिर्भावैः' क.ख. ३. 'विक्षेपलक्षणेन' क.ख. ४. 'संयोगैः' क.ख. ५. 'रतिपुष्टिः' क. ६. 'च' ग. ७. 'उत्तरा' ख.

मृतादीनामियं सोदर्येति, विष्णोरियं प्रियतमेति, कामस्येयं जननीत्यादिभ्य आलम्बनेभ्यः समुत्पन्ना प्रीतिः स्वावासानुपघातिना शरीरसंनिवेशेन दृङ्निमीलनजनितया च तदुपघातशङ्कयोद्दीप्यमाना तत्क्षणोपजायमानतया आवेगस्मृतिवितर्कोन्मादमोहचिन्तादिभिर्व्यभिचारिभावैस्तदनुमेयैश्च स्तम्भवेपथुप्रभृतिसात्त्विकैः शिवानुध्यानलक्षणेन बुद्ध्यारम्भानुभावेन संसृज्यमाना परं प्रकर्षमारोहन्ती प्रतीयते॥[1]

रतौ भयादिसंकरो यथा—

'राहोश्चन्द्रकलामिवाननचरीं दैवात्समासाद्य मे
दस्योरस्य कृपाणपातविषयादाच्छिन्दतः प्रेयसीम्।
आतङ्काद्विकलं द्रुतं करुणया विक्षोभितं विस्मयात्
क्रोधेन ज्वलितं मुदा विकसितं चेतः कथं वर्तताम्॥ ९॥'

अत्र माधवस्य मालत्यां पूर्वमुत्पन्ना रतिस्तदवस्थालोकनादिभिरुद्दीपनविभावैरुद्दीप्यमाना[2] भयशोकविस्मयक्रोधहर्षैरपि रसान्तरैः पृथक्पृथग्विभावानुभावव्यभिचारिसंयोगान्निष्पद्यमानैः संकीर्यमाणा मनोवाग्बुद्धिशरीरारम्भानुभावैर्भयाद्यनुरूपैश्च[3] सात्त्विकव्यभिचारिभिः संपर्के परं प्रकर्षमारोहन्ती प्रतीयते। तत्र चेतसो वैकल्यादिपरिभावनं मनआरम्भः, वाक्योच्चारणं वागारम्भः, राहोरिव दस्योश्चन्द्रकलामिव प्रेयसीमित्यादि बुद्ध्यारम्भः, आच्छिन्दत[4] इत्यादि शरीरारम्भः, भयादीनां च पञ्चानामपि यथाक्रमं राहोरिति, चन्द्रकलामिवाननचरीमिति, दैवात्समासाद्य मे इति, दस्योरस्य कृपाणपातविषयादिति, आच्छिन्दतः प्रेयसीमित्यालम्बनविभावास्तत्स्वरूपपरिभावनान्युद्दीपनविभावाः, विकलम्,

१. 'मारोहतीति' क.ख. २. 'तदवस्थावलोकनादिभिः' ग.घ. ३. 'शारीरानुभावैः' घ. ४. 'आच्छिद्यत' घ.

द्रुतम्, विक्षोभितम्, ज्वलितम्, विकसितं चेते इत्यनुभावाः; आतङ्ककरुणाविस्मयक्रोधमुदनुरूपाश्च कम्पाश्रुस्तम्भवैवर्ण्यरोमाञ्चादयः सात्त्विकाः, मोहविषादवितर्कोग्रताधृत्यादयो व्यभिचारिणश्चानुमीयमाना निष्पत्तिहेतवो भवन्ति । सोऽयं तुल्यकालबलोत्पत्तिकारणानां भयादिनिष्पत्तीनां रतौ संसर्गः संकर इत्युच्यते ॥

रतिरूपेण रसप्रकर्षस्य ह्रासो यथा—

'कोपो यत्र भ्रुकुटिरचना निग्रहो यत्र मौनं
यत्रान्योन्यस्मितमनुनयो दृष्टिपातः प्रसादः ।
तस्य प्रेम्णस्तदिदमधुना वैशसं पश्य जातं
त्वं पादान्ते लुठसि न च मे मन्युमोक्षः खलायाः ॥ १० ॥'

अत्र योषिति रोषास्यरसान्तरतिरस्कारात्पुरुषे चान्यरागाद्रतिप्रकर्षस्य ह्रासोऽवसीयते ।

रतिरूपेण हीनपात्रेषु रसाभासो यथा—

'विक्किणइ माहमासम्मि पामरो पारडिं वइल्लेण ।
दिट्ठिं समुम्मुरे सामलीअ थणए णिअच्छन्तो ॥ ११ ॥'
[विक्रीणीते माघमासे पामरः प्रावरकं बलीवर्देन ।
दृष्टिं समुर्मुरे श्यामल्याः स्तनके नियच्छन् ॥]

---

१. 'चलितम्' क. २. 'विकसितं च त' घ. 'विकसितमित्यनुभावाः' क. ३. 'विषादोदकोग्रता' क. 'विषादामर्षोग्रता' ख. ४. 'भ्रुकुटिरचना' घ. ५. 'यत्रान्योन्यं' क. ६. 'चानुरागा—' ख., 'चान्यरागा' घ. ७. 'ह्रासोऽवगम्यते' क.ख. ८. 'पामरो पारणं वि इल्लेण' क. 'पामरो पारडिं बइल्लेण' ख. 'पामरो पाइडिं बइल्लेण' मुद्रितगाथास०. ९. 'णिद्धूमसुम्मुरे सामलीए थणए णिअच्छन्तो' क., 'णिद्धूमसुम्मुरव्विअ सामलीए थणो परिच्छन्तो' इति मुद्रितगाथास०, 'दिट्ठिं समुम्मुरे सामलीए थणए णिअच्छन्तो' ख.

तिर्यक्षु यथा—

'पीअडिअं सोहग्गं तंवाए उअह गोट्ठमज्झम्मि।
दुट्ठवसहस्स सिंगे अच्छिउडं कण्डुअन्तीए ॥ १२ ॥'

[प्रकटितं सौभाग्यं गवा पश्यत गोष्ठमध्ये।
दुष्टवृषभस्य शृङ्गेऽक्षिपुटं कण्डूयमानया ॥]

नायकप्रतियोगिषु यथा—

'पुलअं जणेन्ति दहकंधरस्स राहवसरा सरीरम्मि।
जणअसुआफंसमहग्घविअ करअलाअट्ठिअविमुक्का ॥ १३ ॥'

[पुलकं जनयन्ति दशकंधरस्य राघवशराः शरीरे।
जनकसुतास्पर्शमहार्घा इव करतलाकृष्टविमुक्ताः ॥]

गौणेषु यथा—

'उव्वहइ नवतणंकुररोमञ्चपसाहिआइं अंगाइं।
पाउसलच्छीअ पओहरेहिं पडिवेल्लिओ विंझो ॥ १४ ॥'

[उद्वहति नवतृणाङ्कुररोमाञ्चप्रसाधितान्यङ्गानि।
प्रावृट्लक्ष्म्याः पयोधराभ्यां प्रतिप्रेरितो विन्ध्यः ॥]

तं एते चत्वारोऽपि रसाभासा उच्यन्ते ॥

रतावेव लज्जारोषरूपरसान्तरयोः प्रशमो यथा—

'दृष्टे लोचनवन्मनाङ्मुकुलितं पार्श्वस्थिते वक्त्रव-
न्न्यग्भूतं बहिरासितं पुलकवत्स्पर्शे समातन्वति।

१. 'पअपाडिअं' क. 'पाअपडिअ' ख. २. 'उसह गोट्ठमज्झम्मि' क. 'वसह गोट्ठमज्झम्मि' ख. ३. 'जणेति' क. 'जणति' ख. ४. 'फअंस' क. 'फंस पहग्घ' ख. ५. 'करअलाठुविमुक्का' क. ६. 'नवतिणंकुर' क.ख. ७. 'पसाहिआइ' क.ख. ८. 'पाउसलच्छीए' क.ख. ९. 'विंझो' ख. १०. 'एते चत्वारोऽपि' क., 'त एतेऽपि चत्वारो' क.

नीवीबन्धवदागतं शिथिलतामाभाषमाणे ततो
मानेनापगतं ह्रियेव सुदृशः पादस्पृशि प्रेयसि ॥ १५ ॥'

अत्र बलवद्भ्यां प्रियप्रेमानुनयाभ्यां ह्रीरोषयोरुपशमः क्रियते ॥

रतावेव रोषरूपरसस्य शेषो यथा—

'एष्यत्युत्सुकमागते विचलितं संभाषिणि स्फारितं
संश्लिष्यत्यरुणं गृहीतवसने कोपाञ्चितभ्रूलतम् ।
मानिन्याश्चरणानतिव्यतिकरे बाष्पाम्बुपूर्णं क्षणा-
च्चक्षुर्जातमहो प्रपञ्चचतुरं जातागसि प्रेयसि ॥ १६ ॥'

अत्र कस्याश्चिद्बलवता प्रेम्णोन्मूलितस्यापि मानस्य शेषोऽनुवर्तते । त एते भावादयो दशापि रसप्रकारा हासादिष्वपि प्रायो दृश्यन्ते । ग्रन्थगौरवभयात्कैचित्कचिदुदाह्रियन्ते ॥

तत्र

**[2]न्यक्कव्रीडादिभिश्चेतोविकारो हास उच्यते ।**

तद्रूपेण रसस्य भावो यथा—

'कनककलशस्वच्छे राधापयोधरमण्डले
नवजलधरश्यामामात्मद्युतिं प्रतिबिम्बिताम् ।
असितसिचयप्रान्तभ्रान्त्या मुहुर्मुहुरुत्क्षिपन्
जयति जनितव्रीडाहासः प्रियाहसितो हरिः ॥ १७ ॥'

अत्र राधाया हरिन्यक्काद्, हरेस्तु व्रीडातो हासस्य सत्तामात्रं प्रतीयते ॥

---

१. 'विवलितं' क.ख. २. 'बाष्पाम्बुपूर्णेक्षणं' क. 'बाष्पाम्बुपूर्णं क्षणं' ख. ३. 'शेषेऽनुवर्तते' क. ४. 'भावा दशापि' क. ५. 'प्रायशो' ख. ६. 'न कचिदुदाह्रियन्ते' ख. ७. 'न्यक्कः क्रीडादिभिः' क., 'व्यक्तक्रीडादिभिः' ख., सोल्लुण्ठवचो न्यक्कवाच्यम्. ८ 'राधया व्यक्तितस्य' ख.

**शोकश्चित्तस्य वैधुर्यमभीष्टविरहादिभिः ॥ १३९ ॥**

तद्रूपेण रसस्य निष्पत्तिर्यथा—

'हृदयान्नापयातोऽसि दिक्षु सर्वासु दृश्यसे ।
वत्स राम गतोऽसीति संतापादनुमीयसे ॥ १८ ॥'

अत्र दशरथस्य रामवियोगादुत्पन्नस्तद्गुणस्मरणादिभिरुद्दीपितश्चिन्तासंतापादिर्वागारम्भेण चानुषज्यमानः शोकरूपेण रसो निष्पद्यते ॥

**प्रतिकूलेषु तैक्ष्ण्यस्य प्रबोधः क्रोध उच्यते ।**

तद्रूपेण रसस्य निष्पत्तिर्यथा—

'मय्येवमस्मरणदारुणचित्तवृत्तौ
वृत्तं रहः प्रणयमप्रतिपद्यमाने ।
भेदाद्भ्रुवोः कुटिलयोरतिलोहिताक्ष्या
भग्नं शरासनमिवातिरुषा स्मरस्य ॥ १९ ॥'

अत्र यद्यपि विभावानुभावव्यभिचारिसंयोगलक्षणाया रसनिष्पत्तेः 'अधिकमतिरुषातिलोहिताक्ष्या' इति प्रकर्षनिमित्तमतिशब्दोपादानं विद्यते, तथाप्युत्तमनायिकाश्रयः प्रियविषये न रोषः प्रकर्षमासादयति ॥

**कार्यारम्भेषु संरम्भः स्थेयानुत्साह इष्यते ॥ १४० ॥**

तद्रूपेण रसस्य जन्म यथा—

'मूर्ध्ना जाम्बवतोऽभिवाद्य चरणावापृच्छ्य सेनापती-
नाश्वास्याश्रुमुखान्मुहुः प्रियसखीन्प्रेष्यान्समादिश्य च ।
आरम्भं जगृहे महेन्द्रशिखरादम्भोनिधेर्लङ्घने
रंहस्वी रघुनाथपादरजसामुच्चैः स्मरन्मारुतिः ॥ २० ॥'

अत्राभिवादनप्रश्नाश्वासनसमादेशनाद्रिशिखरारोहणेष्टदेवतास्मरणानां

१. 'वीक्ष्यते' घ. २. 'मत्सरण' ख. ३. 'प्रतिपाद्यमाने'-क. ४. 'विभावानुभावसंचारिसंयोग' क.ख. ५. 'देवस्मरणानां' घ.

पूर्वरङ्गपर्यवसायित्वेनानुद्दीपनविभावत्वादनुत्साहानुभावत्वाच्च नायमनुबन्धो निष्पत्तिः प्रकर्षो वा भवति ॥

**भयं चित्तस्य वैक्लव्यं रौद्रादिजनितं विदुः ।**

तद्रूपेण रसस्यानुबन्धो यथा—

'मन्त्रान्मृत्युजितो जपद्भिरसकृद्ध्यायद्भिरिष्टान्सुरान्
शुष्यत्तालुभिराकुलाकुलपदैर्निर्वाग्भिरुत्कम्पिभिः ।
अध्वन्यैरिह जीवितेशमहिषव्याधूम्रधूमाविला
लङ्घ्यन्ते करिमांसघस्मररणत्कौलेयकाः पल्लयः ॥ २१ ॥'

अत्र यद्यपि पल्लीनामालम्बनत्वम्, तद्विशेषणयोरुद्दीपनत्वम्, मन्त्रजपादेरनुभावत्वम्, तालुशोषादीनां व्यभिचारित्वमिति विभावानुभावव्यभिचारिसंयोगोऽस्ति, तथापि मन्त्रजपेष्टदेवतानुध्यानयोर्लङ्घनोपायपरत्वान्न भयरूपेण रसस्य निष्पत्तिः । अध्वन्यानां हि तन्निष्पत्तावल्पसत्त्वतया स्तम्भमोहमूर्च्छामरणादिभिरुपायप्रयोगो न घटते ॥

**जुगुप्सा गर्हणार्थानां दोषसंदर्शनादिभिः ॥ १४१ ॥**

तद्रूपेण रसस्यानुगमो यथा—

'हे हस्त दक्षिण मृतस्य शिशोर्द्विजस्य
जीवातवे विसृज शूद्रमुनौ कृपाणम् ।
रामस्य गात्रमसि निर्भरगर्भखिन्न-
सीताप्रवासनपटोः करुणा कुतस्ते ॥ २२ ॥'

अत्र यद्यपि द्विजशिशोर्जीवनाय मुनिरपि शूद्रो वध्य इति न रामस्यात्मकर्मनिन्दा तथाप्यनपकारिणं जिघांसतो घृणानुवर्तत एव । सीता-

१. 'रणात्कौलेयकाः' क., 'रुणत्कौलेयकाः' ग.घ. २. 'न तद्विशेषणयोः' ख. ३. 'रसनिष्पत्तिः' क. ४. 'रे हस्त' क.ख. ५. 'प्यनयकारिणं' ख. ६. 'घृणा प्रवर्तेत इति सीतापरित्याग' क.ख.

परित्यागविषयत्वेनैवात्र जुगुप्सानुगमो ग्रहीतव्यः । शंम्बुकविषये पुनरस्या जन्ममात्रमेवेति ॥

**विस्मयश्चित्तविस्तारः पदार्थातिशयादिभिः ।**

तद्रूपेण रसंनिष्पत्तिर्यथा—

'कृष्णेनाम्ब गतेन रन्तुमसकृन्मृद्भक्षिता स्वेच्छया
सत्यं कृष्ण क एवमाह मुसली मिथ्याम्ब पश्याननम् ।
व्यादेहीति विकासिते च वदने दृष्ट्वा समस्तं जग-
न्माता यस्य जगाम विस्मयपदं पायात्स वः केशवः ॥ २३ ॥'

अत्र शिशोर्मुखे जगद्दर्शनमालम्बनविभावः, तत्सामग्र्यशैशवाद्यालोचनमुद्दीपनविभावः, विस्मयवशं जगामेत्यनेनानुपात्ता अपि सर्वे संचारिणोऽनुभावाश्च गृह्यन्ते ॥

**स्तम्भश्चेष्टाप्रतीघातो भयरागामयादिभिः ॥ १४२ ॥**

तद्रूपेण रसस्य पुष्टिर्यथा—

'तं ताणं हअच्छाअं णिच्चललोअणसिहं पउत्थपआवं ।
आलेक्खपईवाणिव णिअअं पअइचडुलत्तणं पि विअलिअं ॥२४॥'

[तत्तेषां हतच्छायं निश्चललोचनशिखं प्रोषितप्रतापम् ।
आलेख्यप्रदीपानामिव निजकं प्रकृतिचटुलत्वमपि विगलितम् ॥]

अयं च पुष्टोऽपि सात्त्विकत्वात् सदैवान्यानुयायीति नानुभावादिभिरनुबध्यते ॥

**हर्षाद्भुतभयादिभ्यो रोमाञ्चो रोमविक्रिया ।**

---

१. 'शम्बूकविषये' क. २. 'रसस्य जन्म यथा' क.ख. ३. 'रन्तुमधुना' क.ख. ४. 'मुशली' क.ख. ५. 'विदारिते तु वदने' क.ख. ६. 'शैशवाद्यालोकन' क.ख. ७. 'सर्वे संचारिणो' इत्यस्य स्थाने 'केवलं संचारिणः' क.ख. ८. 'तं ताणं' ख.

तद्रूपेण रसस्य जन्म यथा—

'करिमरि अआलगज्जिरजलआसणिपउणपडिरओ एसो ।
पइणो धणुरवकंखिणि रोमंचं किं मुहा वहसि ॥ २५ ॥'

[बन्दि अकालगर्जनजलदाशनिपतनप्रतिरव एषः ।
पत्युर्धनूरवाकाङ्क्षणशीले रोमाञ्च किं मुधा वहसि ॥]

अस्यापि सात्त्विकत्वादन्यानुबन्धादयो न जायन्ते ।

**मदप्रमदपीडादेर्वैस्वर्यं गद्गदं विदुः ।**

तद्रूपेण रसस्य निष्पत्तिर्यथा—

'पिपिप्रिय ससस्वयं मुमुमुखासवं देहि मे
ततत्यज दुदुद्रुतं भभभभाजनं काञ्चनम् ।
इति स्खलितजल्पितं मदवशात्कुरङ्गीदृशः
प्रगे हसितहेतवे सहचरीभिरध्येयत ॥ २६ ॥'

अत्रापि[1] सात्त्विकत्वान्निष्पन्नो नान्यैरनुबध्यते ॥

**वपुर्जलोद्गमः स्वेदो रतिघर्मश्रमादिभिः ॥ १४२ ॥**

तद्रूपेण रसस्य जन्म यथा—

'हिमव्यपायाद्विशदाधराणामापाण्डुरीभूतमुखच्छवीनाम्[2] ।
स्वेदोद्गमः किंपुरुषाङ्गनानां चक्रे पदं चित्रविशेषकेषु[3] ॥ २७ ॥'

अत्रापि पूर्ववदन्यानुषङ्गो न भवति ॥

**रागरोषभयादिभ्यः कम्पो गात्रस्य वेपथुः ।**

तद्रूपेण रसस्य जन्म यथा—

'मा गर्वमुद्वह कपोलतले चकास्ति
कान्तस्वहस्तलिखिता मम मञ्जरीति ।

---

१. 'अयमपि' क.ख. २. 'पाण्डरीभूत. ख. ३. 'पत्रविशेषकेषु' क.ख.

अन्यापि किं न सखि भाजनमीदृशानां
वैरी न चेद्भवति वेपथुरन्तरायः ॥ २८ ॥'

अयमपि प्राग्वदेवान्यैर्नानुगम्यते।

**विषादमदरोषादेर्वर्णान्यत्वं विवर्णता ॥ १४४ ॥**

तद्रूपेण रसस्य निष्पत्तिर्यथा—

'सहि सोहसु तेण समं अहं पि किं णिग्गआ पहाअम्मि।
अण्णचिअ दीसइ जेण दप्पणे कावि सा सुमुही ॥ २९ ॥'

[सखि साधय तेन सममहमपि किं निर्गता प्रभाते।
अन्यैव दृश्यते येन दर्पणे कापि सा सुमुखी ॥]

अयमपि नान्यैरनुबध्यते ॥

**अश्रु नेत्रोद्गतं वारि दुःखशोकप्रहर्षजम्।**

तद्रूपेण रसस्यानुबन्धो यथा—

'उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिं
बाष्पं कुरु स्थिरतया शिथिलानुबन्धम्।
अस्मिन्नलक्षितनतोन्नतभूमिभागे
मार्गे पदानि खलु ते विषमीभवन्ति ॥ ३० ॥'

अत्र बाष्पशब्देन लोचनाश्रयमश्रूच्यते न कण्ठाद्याश्रयो दुःखावेशः। यथा—'विललाप स बाष्पगद्गदम्', 'मुहुर्मग्नः कण्ठे तरलयति बाष्पः स्तनतटीम्' इत्यादि ॥

**प्रलयस्तीव्रदुःखादेरिन्द्रियास्तमयो मतः ॥ १४५ ॥**

तद्रूपेण रसस्य निष्पत्तिर्यथा—

'तीव्राभिषङ्गप्रभवेण वृत्तिं मोहेन संस्तम्भयतेन्द्रियाणाम्।
अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव ॥ ३१ ॥'

---

१. 'नान्यैरनुगम्यते' क.ख. २. 'सहि साहसु तेण' क. ३. 'पहअम्मि' ख. ४. 'मुहुर्लग्नः कण्ठे' क.ख. ५. 'इति' ख.

अत्र मोहशब्देन मूर्च्छोच्यते, न वक्ष्यमाणलक्षणो मोहः ॥

**स्मृतिः पूर्वानुभूतार्थविषयं ज्ञानमुच्यते ॥ १४६ ॥**

तद्रूपेण रसस्यानुबन्धो यथा—

'इतः प्रत्यादेशात्स्वजनमनुगन्तुं व्यवसिता
स्थिता तिष्ठेत्युच्चैर्वदति गुरुशिष्ये गुरुसमे ।
पुनर्दृष्टिं बाष्पप्रसर[1]कलुषामर्पितवती
मयि क्रूरे यत्तत्सविषमिव शल्यं दहति माम् ॥ ३२ ॥'

अत्र सविशेषा स्मृतिरिच्छया वागारम्भेण चानुबध्यते । निष्प-त्त्यादयः[2] पुनरस्या रत्यादिनिष्पत्तिष्वेव द्रष्टव्याः । रत्यादयोऽस्मृतिमू-लत्वात्तत्प्रकर्षापकर्षावनुवर्तन्ते[3] ॥

**ऊहो वितर्क इत्युक्तः पदार्थेषु यथामति ।**

तद्रूपेण रसस्य निष्पत्तिर्यथा—

'चित्ते निवेश्य परिकल्पितसत्त्वयोगा-[4]
न्रूपोच्चयेन घटिता मनसा कृता नु ।[5]
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः ॥ ३३ ॥'

सोऽयमसत्यः सत्यो वा स्मृतिज्ञानचिन्तनादिद्वारेण निर्णयान्तो निष्पन्न इत्युच्यते ॥

**उत्कण्ठेष्टानवाप्तौ योऽभिलाषः स्यात्तदाप्तये ॥ १४७ ॥**

तद्रूपेण रसस्य निष्पत्तिह्रासौ यथा—

'यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः[6] स्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।

---

१. 'बाष्पप्रकर' क.ख. २. 'तिष्ठेत्यादयः' ख. ३. 'रत्यादयो हि स्मृतिमूलत्तत्प्रकर्षाप-कर्षावनुवर्तन्ते' क.ख. ४. 'सत्त्वयोगात्' क.ख. ५. 'विधिना विहिता कृताङ्गी' पाठः। ६. 'बाष्पस्तम्भितकण्ठवृत्तिवचनम्' ख.

वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु[1] तनयाविश्लेषदुःखैर्नवैः ॥ ३४ ॥'

अत्र विभावानुभावव्यभिचारिसंयोगात् प्रीतिरिवोत्कण्ठापि तदनुषङ्गिणी निष्पन्ना उत्तरार्धप्रतिपाद्येन [2]निषेधेनैव विस्मयादिनाभिभूयमाना ह्रास इत्युच्यते । प्रकर्षश्चास्या ममारण्यौकस इत्यनेन निवार्यते ॥

**प्रयत्नपूर्विकार्थेषु स्मृतिश्चिन्तेति चोच्यते[3] ॥ १४८ ॥**

तद्रूपेण रसस्य प्रकर्षो यथा—

'चिन्ताणिअदइअसमागमम्मि कअमण्णुआइं[4] मरिऊण ।
सुण्णं कलहाअन्ती सहीहिँ[5] रुण्णा ण[6] ओ हसिआ ॥ ३५ ॥'

[चिन्तानीतदयितसमागमे कृतमन्युकानि स्मृत्वा ।
शून्यं कलहायमाना सखीभी रुदिता न वा हसिता ॥]

अत्र सखीरोदनेन शून्यकलहः, शून्यकलहेन साक्षात्कारः, साक्षात्कारेण चिन्ता, चिन्तया तु मूलभूता रतिः प्रकृष्यते ॥

**आत्मप्रकाशनपरा चेष्टा चपलतोच्यते ॥ १४९ ॥**

तद्रूपेण रसस्य जन्म यथा—

'कश्चित्कराभ्यामुपगूढनालमालोलपत्राभिहतद्विरेफम् ।
रजोभिरन्तःपरिवेषबन्धि लीलारविन्दं भ्रमयांचकार ॥ ३६ ॥'

अत्र[7] कश्चिल्लीलारविन्दभ्रमणचेष्टया इन्दुमत्यै[8] तिष्ठते ॥

**शास्त्रोक्तार्थानुसंधानादर्थनिर्धारणं मतिः ।**

---

१. 'न' ख. २. 'तथाविधेनैव' ख. ३. 'कथ्यते' क.ख. ४. 'मण्णुआइं' ख. ५. 'सहीहि' ख. ६. 'नावहसिआ' घ. ७. 'अत्र लीलारविन्दभ्रमणचेष्टया' क.ख ८. 'कश्चिदिन्दुमत्यै' क.ख.

तद्रूपेण रसस्यानुबन्धो यथा—

'असंशयं क्षत्रपरिग्रहक्षमा
　　यदार्यमस्यामभिलाषि मे मनः ।
सतां हि संदेहपदेषु वस्तुषु
　　प्रमाणमन्तःकरणप्रवृत्तयः ॥ ३७ ॥'

अत्र पूर्वार्धोक्तार्थनिर्धारणरूपा मतिरुत्तरार्धेनानुबध्यते ॥

**गर्वोऽन्येषामवज्ञानमात्मसंभावनादिभिः ॥ १५० ॥**

तद्रूपेण रसस्य पुष्टिर्यथा—

'धृतायुधो यावदहं तावदन्यैः किमायुधैः ।
यद्वा न सिद्धमस्त्रेण मम तत्केन सेत्स्यति ॥ ३८ ॥'

अत्र कर्णस्यात्मसंभावनयाश्वत्थामन्यवज्ञा प्रकृष्यते ॥

**अहेतुरनिवर्ती च स्नेहश्चित्तार्द्रता मता ।**

तद्रूपेण रसस्य निष्पत्तिर्यथा—

'अनेन कस्यापि कुलाङ्कुरेण
　　स्पृष्टस्य गात्रेषु सुखं ममैतत् ।
कां निर्वृतिं चेतसि तस्य कुर्या-
　　द्यस्यायमङ्गात्कृतिनः प्ररूढः ॥ ३९ ॥'

अत्र दुष्यन्तस्य सत्त्वदमनदर्शनादुत्पन्नस्तदङ्गस्पर्शसुखादिभिरुद्दीपितः स्पृहामतिवितर्कवागारम्भैः संसृज्यमानः स्नेहो निष्पद्यते ॥

**अभीष्टार्थस्य संप्राप्तौ स्पृहापर्याप्तता धृतिः ।**

---

१. 'अभिज्ञानम्' घ.　२. 'अवज्ञानम्' क.ख.　३. 'अनिवर्त्या च' क.ख.
४. 'रसनिष्पत्तिर्यथा' घ.　५. 'यस्यायमङ्गात्कृतिनः प्ररूढः.' ६. सत्त्वदमनः शकुन्तलातनयः.

तद्रूपेण रसस्य प्रकर्षो यथा—

'नीतो विक्रमबाहुरात्मसमतां प्राप्तेयमुर्वीतले
सारं सागरिका ससागरमहीप्राप्त्येकहेतुः प्रिया ।
देवी प्रीतिमुपागता च भगिनीलाभाज्जिताः कोसलाः
किं नास्ति त्वयि सत्यमात्यवृषभे यस्मिन्करोमि स्पृहाम् ॥४०॥'

अत्र वत्सराजस्य सर्वात्मना मनोरथसिद्धयो धृतेः प्रकर्षमावहन्ति ॥

**चेतोनिमीलनं व्रीडान्यङ्गरागस्तवादिभिः ॥ १५१ ॥**

तद्रूपेण रसस्य प्रकर्षे क्रोधशोकाभ्यां संकरो यथा—

'अक्षुद्रारिकृताभिमन्युनिधनप्रोद्भूततीव्रक्रुधः
पार्थस्याकृतशात्रवप्रतिकृतेरन्तःशुचा मुह्यतः ।
कीर्णा बाष्पकणैः पतन्ति धनुषि व्रीडाजडा दृष्टयो
हा वत्सेति गिरः स्फुरन्ति न पुनर्निर्यान्ति कण्ठाद्बहिः ॥४१॥'

अत्रार्जुनस्यान्यायेनाभिमन्युवधादुद्भूतौ दीप्तावेव क्रोधशोकावुद्भूतविप्रतीकारोत्थया तथाविधयैव व्रीडया संकीर्येते । तथाहि क्रोधशोकयोरनुभावभूता दृष्टयो वाचश्च व्रीडाजडा इति विशेषणानि संबध्यन्ते ॥

**अवहित्थं तु लज्जादेर्हर्षाद्याकारगोपनम् ॥ १५२ ॥**

तद्रूपेण रसस्यानुबन्धो यथा—

'एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्वती ॥ ४२ ॥'

---

१. 'रसनिष्पत्तिर्यथा' घ. २. 'कोशलाः' ख. ३. 'यस्मै' रत्नावल्या मुद्रिते पाठः. ४. 'न्वङ्ग' ख. ५. 'रसप्रकर्षात्' क.ख. ६. 'कोपशोकाभ्यां' ख. ७. 'निधनात्संक्रान्ततीव्रक्रुधः' क.ख. ८. 'अकृतविप्रतीकारोत्थया' घ. ९. 'व्रीडा इति विशेषणानि' घ.

अत्र—

'प्रणम्य शितिकण्ठाय विबुधास्तदनन्तरम् ।
चरणौ रञ्जयन्त्वस्याश्चूडामणिमरीचिभिः ॥ ४३ ॥'

इत्यादेर्देवर्षिवाक्यादुद्भूतः प्रहर्षाकारो गुरुसंनिधौ लज्जितया लीलाकमलपत्रगणनव्याजेन गौर्या गोप्यते ॥

**सुखदुःखादिजनितो मोहश्चित्तस्य मूढता ।**

तद्रूपेण रसनिष्पत्तिर्यथा—

'कान्ते तल्पमुपागते विगलिता नीवी स्वयं बन्धना-
द्वासो विश्लथमेखलागुणधृतं किंचिन्नितम्बे स्थितम् ।
एतावत्सखि वेद्मि केवलमहं तस्याङ्गसङ्गे पुनः
कोऽयं का वयमत्र किं नु सुरतं स्वल्पापि मे न स्मृतिः ४४'

अत्र स्थायिनी रतिर्मोहनिष्पत्त्या प्रकृष्यते ॥

**संमोहानन्दसंभेदो मदिरादिकृतो मदः ॥ १५३ ॥**

तद्रूपेण रसस्य निष्पत्तिर्यथा—

'घूर्णमाननयनं स्खलत्कथं स्वेदबिन्दुमदकारणस्मितम् ।
आननेन न तु तावदीश्वरश्चक्षुषा चिरमुमामुखं पपौ ॥ ४५ ॥'

अत्र नयनघूर्णनाकारणस्मितादयः संमोहानन्दसंभेदादुद्भवन्तो मदं निष्पादयन्ति ।

**मनःप्रसादो हर्षः स्यादिष्टावाप्तिस्तवादिभिः ।**

---

१. 'इत्यादिदेवर्षिवाक्यादुद्भूतः' घ. 'इत्यादेर्मुनिवाक्यादुद्भूतः' क. ख. २. 'उद्भूतप्रहर्षाकारो' ख. ३. 'गणनेन' क.ख. ४. 'रसस्य निष्पत्तिः' ख. ५. 'कोऽसौ कासि रतं नु किं कथमिति' क.ख. ६. 'संभेदा उद्भवन्तो' ख.

तद्रूपेण रसस्य प्रकर्षो यथा—

'जातस्य ते पितुरपीन्द्रजितो निहन्तु-
वत्सस्य वत्स कति नाम दिनान्यमूनि ।
तस्याप्यपत्यमधितिष्ठति वीरधर्मे
दिष्ट्या गतं दशरथस्य कुलं प्रतिष्ठाम् ॥ ४६ ॥'

अत्र दशरथसुहृदः सुमन्त्रसारथेः प्रभुकुलस्य प्रतिष्ठामाशंसतस्तत्सूनुमिन्द्रजितो हन्तारं पश्यतो मनोरथावाप्त्या हर्षो निष्पन्नस्तदपत्येऽपि वीरधर्ममाचरिष्णौ प्रकृष्टो दिष्ट्येत्यव्ययेन सूच्यते ॥

**क्रोधः कृतापराधेषु स्थिरोऽमर्षत्वमश्नुते ॥ १५४ ॥**

तद्रूपेण रसस्य प्रकर्षो यथा—

'लाक्षागृहानलविषान्नसभाप्रवेशैः
प्राणेषु वित्तनिचयेषु च नः प्रहृत्य ।
आकृष्टपाण्डववधूपरिधानकेशाः
स्वस्था भवन्ति मयि जीवति धार्तराष्ट्राः ॥ ४७ ॥'

अत्र भीमसेनस्य धार्तराष्ट्रेषु स्वस्था इति नाम्नोऽप्यसहनात् लाक्षागृहाद्यपकारजन्मामर्षः प्रतीयते ॥

**असूयान्यगुणर्द्धीनामौद्धत्यादसहिष्णुता ।**

तद्रूपेण रसस्य जन्म यथा—

'वन्द्यास्ते न विचारणीयचरितास्तिष्ठन्तु हुं वर्तते
सुन्दस्त्रीनिधनेऽप्यखण्डयशसो लोके महान्तो हि ते ।

---

१. 'रसनिष्पत्तिर्यथा' घ. २. 'वीरधर्मम्' घ. ३. 'दशरथस्य सुहृदः' घ. ४. 'प्रभुकुलप्रतिष्ठा' ख. ५. 'कृतापकारेषु' घ. ६. 'प्रकृत्य' घ. ७. 'भीमस्य' घ. ८. 'प्यसहमानात्' घ. ९. 'प्रकृष्यते' घ.

यानि त्रीणि कुतोमुखान्यपि पदान्यासन्खरायोघने
　　यद्वा कौशलमिन्द्रसूनुदमने तत्राप्यभिज्ञो जनः ॥ ४८ ॥'

अत्र यद्यपि सोल्लुण्ठदोषकीर्तनादिभिर्जुगुप्सा निष्पद्यते तथापि न तया स्वनिष्पत्तिहेतुरसूया संकीर्यते ॥

**ईर्षामाहुः समानेषु मानदानाद्यमर्षणम् ॥ १५५ ॥**

तद्रूपेण रसस्य प्रकर्षो यथा—

'हुं णिल्लज्ज समोसर तं च्चिअ अणुणेसु जाइ दे एअं ।
पाअग्गंगुट्ठालत्तएण तिलअं विणिम्मविअं ॥ ४९ ॥'

[हुं निर्लज्ज समपसर तामेवानुनय यस्यास्त एतत् ।
पादाग्राङ्गुष्ठालक्तकेन तिलकं विनिर्मितम् ॥]

अत्र कस्याश्चित् प्रेयसि सपत्नीं प्रसादयितुं गते तन्मानममृष्यमाणायाः समुत्पन्नेर्ष्या प्रियानुनयादिभिर्भृशायमानतया निष्पन्नालक्तकतिलकानुमेयैस्तत्पादपतनादिभिरुद्दीप्ता हुंकाराक्षेपभर्त्सनप्रतिभेदाविनाभूतैर्भ्रूभङ्गताडनाङ्गक्षेपवेपथुस्वेदगद्गदादिभिः संसृज्यमाना प्रकृष्यते ॥

**विषादश्चेतसो ग्लानिरुपायाभावनाशयोः ।**

तद्रूपेण रसस्य प्रकर्षो यथा—

'व्यर्थं यत्र कपीन्द्रसख्यमपि मे क्लेशः कपीनां वृथा
　　प्रज्ञा जाम्बवतोऽपि यत्र न गतिः पुत्रस्य वायोरपि ।
मार्गं यत्र न विश्वकर्मतनयः कर्तुं नलोऽपि क्षमः
　　सौमित्रेरपि पत्त्रिणामविषयस्तत्र प्रिया क्वापि मे ॥ ५० ॥'

---

१. 'त्रीण्यकुतोमुखानि' क., 'त्रीण्यकुतोभयानि' क. टिप्पण्याम्, 'त्रीणि कुतोमुखानि' ख. २. 'इन्द्रसूनुदलने' ग.घ. ३. 'मानदानाद्यमर्षणात्' ग. ४. 'हुम्' घ. नास्ति. ५. 'चिअ' ख. ६. 'पाअग्ग' ख. ७. 'वीर्यं हरीणां वृथा' क.ख.

अत्र सीतासमागमविषये रामस्य दृष्टावदानसुग्रीवसख्यादेरुपायस्याभावाद्विषादः प्रकृष्यते ॥

सत्त्वत्यागादनुत्कर्षो वाक्यादेर्दैन्यमुच्यते ॥ १५६ ॥

तद्रूपेण रसस्यानुबन्धो यथा—

'अस्मान्साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मन-
स्त्वय्यस्याः कथमप्यबान्धवकृतां भावप्रवृत्तिं च ताम्।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्याधीनमतः परं न खलु तद्वाच्यं वधूबन्धुभिः ॥ ५१ ॥'

अत्र स्नेहप्रभवं पादत्रयोक्तमर्थितादैन्यं तुरीयपादोपक्षिप्तयाच्ञादैन्यान्तरेणानुबध्यते ॥

विदुर्वाग्दण्डपारुष्यमुग्रतामपकारिषु।

तद्रूपेण रसस्य प्रकर्षो यथा—

'प्रणयिसखीसलीलपरिहासरसाधिगतै-
र्ललितशिरीषपुष्पहननैरपि ताम्यति यत्।
वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः
पततु शिरस्यकाण्डयमदण्ड इवैष भुजः ॥ ५२ ॥'

अत्र माधवस्य प्रकृष्टापकारिण्यघोरघण्टे विषये प्रकृष्टमेव वाक्पारुष्यं दण्डपारुष्यं च जायते ॥

त्रासश्चित्तचमत्कार आकस्मिकभयादिभिः ॥ १५७ ॥

तद्रूपेण रसस्य जन्म यथा—

'परिस्फुरन्मीनविघट्टितोरवः सुराङ्गनास्त्रासविलोलदृष्टयः।
उपाययुः कम्पितपाणिपल्लवाः सखीजनस्यापि विलोकनीयताम् ५३'

अत्र लोलदृष्टिता करावधूननं च स्त्रीणां स्वभावभीरुत्वविलासित्वाभ्यामपि भवतीति त्रासाविर्भावेऽप्यसमर्थमिति नानुबन्धो भवति ॥

**अनिष्टाभ्यागमोत्प्रेक्षां शङ्कामाचक्षते बुधाः ।**

तद्रूपेण रसस्य प्रकर्षो यथा—

'सहसा मा साहिज्जउ पिआगमो तीअ विरहकिसिआए ।
अच्चंतपहरिसेण वि जा अ मुआ सा मुआ च्चेअ ॥ ५४ ॥'

[सहसा मा साध्यतां प्रियागमस्तया विरहकृशया ।
अत्यन्तप्रहर्षेणापि या च मृता सा मृतैव ॥]

अत्र विरहिण्याः कार्श्यातिशयमुद्वीक्षमाणायाः कस्याश्चिद्वयस्यायाः स्नेहातिशयात् 'प्रेम पश्यति भयान्यपदेऽपी'ति प्रियागमप्रहर्षातिशयभावेऽप्यसहिष्णुतया तन्मरणशङ्का प्रकृष्यते ॥

**विरहादेर्मनस्तापः शरीरातङ्कदो गदः ॥ १५८ ॥**

तद्रूपेण रसस्य जन्म यथा—

'स्थितमुरसि विशालं पद्मिनीपत्रमेतत्
कथयति न तथान्तर्मन्मथोत्थामवस्थाम् ।
अतिशयपरितापग्लापिताभ्यां यथास्याः
स्तनयुगपरिणाहं मण्डलाभ्यां ब्रवीति ॥ ५५ ॥'

अत्र सागरिकायाः स्तननिहितसरोजिनीदलम्लापनेन वपुःसंतापो निष्पद्यते ॥

**बलस्यापचयो ग्लानिराधिव्याधिप्रकर्षभूः ।**

तद्रूपेण रसस्यानुबन्धो यथा—

'किसलयमिव मुग्धं बन्धनाद्विप्रलूनं
हृदयकुसुमशोषी दारुणो दीर्घशोकः ।

---

१. 'शरीरान्तकदो गदः' ख.   २. 'बन्दनाद्विप्रलूनम्' घ.

ग्लपयति परिपाण्डुक्षाममस्याः शरीरं
शरदिज इव घर्मः केतकीगर्भपत्रम् ॥ ५६ ॥'

अत्र प्रकृष्टशोकानुबन्धिनी ग्लानिर्वैवर्ण्यक्षामताभ्यामनुबध्यते ॥

**उत्कण्ठाहर्षशोकादेरुन्मादश्चित्तविप्लवः ॥ १५९ ॥**

तद्रूपेण रसस्य जन्म यथा—

'कांकार्यं क कलाधरस्य च कुलं भूयोऽपि दृश्येत सा
दोषाणामुपशान्तये श्रुतमहो कोपेऽपि शान्तं मुखम् ।
किं वक्ष्यन्त्यपकल्मषाः कृतधियो रेखैव सान्यादृशी
चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं धास्यति ५७'

अत्र विरहिणः पुरूरवस उत्कण्ठादिभिः प्रेमप्रकर्षादसत्प्रलापरूप उन्मादो निष्पद्यते ॥

**आदरातिशयाच्चेतस्यावेगः संभ्रमो मतः ।**

तद्रूपेण रसस्य संकरो यथा—

'अलमलमतिमात्रं साहसेनामुना ते
त्वरितमपि विमुञ्च त्वं लतापाशमेनम् ।
चलितमिव निरोद्धुं जीवितं जीवितेशे
क्षणमिह मम कण्ठे बाहुपाशं निधेहि ॥ ५८ ॥'

अत्र रतिजन्मा संभ्रमातिशयो रतिजन्मनैव मतिप्रकर्षेण संकीर्यते ॥

**मनःशरीरयोः खेदः क्रियातिशयतः श्रमः ॥ १६० ॥**

तद्रूपेण रसस्य संकरो यथा—

'स्खलयति वचनं ते संश्रयत्यङ्गमङ्गं
जनयति मुखचन्द्रोद्भासिनः स्वेदबिन्दून् ।

---

१. 'काकार्यं शश-लक्ष्मणः' विक्रमोर्वशीये । 'काकार्यं क कलाकरस्य' च. ख., 'क कलाधरस्य' च. ख. २. 'लेखैव' घ.

मुकुलयति च नेत्रे सर्वथा सुभ्रु खेद-
स्त्वयि विलसति तुल्यं वल्लभालोकनेन ॥ ५९ ॥'

अत्र मालत्याः पुष्पावचयजन्मा श्रमः, माधवावलोकनजा च रतिः, स्वेदगद्गदाङ्गसादनयनमुकुलैस्तुल्यधर्मिणौ मिथः संकीर्येते ॥

**चित्तस्य खेदो निर्वेदस्तत्त्वज्ञानोदयादिभिः ।**

तद्रूपेण रसस्य शेषो यथा—

'जरामरणदौर्गत्यव्याधयस्तावदासताम् ।
मन्ये जन्मैव धीराणां भूयोभूयस्त्रपाकरम् ॥ ६० ॥'

अत्र मोक्षायोत्सहमानस्य कस्यचिन्निर्वेदावगमो गम्यते ॥

**क्रियास्वपाटवं जाड्यं चिन्तोत्कण्ठाभयादिभिः ।**

तद्रूपेण रसस्यै निष्पत्तिर्यथा—

'शिथिलशिथिलं न्यस्य स्वैरं धनुःशिखरे शिरो
नयनसलिलैः कुर्वन्मौर्वीलतामपरामिव ।
अहह विकलः श्रुत्वा श्रुत्वा घनस्तनितध्वनिं
किमपि किमपि ध्यायन्नार्यो न याति न तिष्ठति ॥ ६१ ॥'

अत्र विरहिणो रामस्य क्रियास्वपाटवं निष्पाद्यते ॥

**क्रियाविद्वेष आलस्यं सुखसंविन्मदादिभिः ॥ १६१ ॥**

तद्रूपेण रसस्य निष्पत्तिर्यथा—

'घरिणिघणत्थणपेल्लणसुहेल्लिपडिअस्स होन्तपहिअस्स ।
अवसउणङ्गारअवारविट्टिदिअहा सुहावेन्ति ॥ ६२ ॥'

[गृहिणीघनस्तनप्रेरणसुखकेलिपतितस्य भविष्यत्पथिकस्य ।
अपशकुनाङ्गारकवारविष्टिदिवसाः सुखयन्ति ॥]

१. 'माधवालोकनेन' घ. २. 'रसनिष्पत्तिः' घ. ३. 'पेक्खण' घ. ४. 'णिपडिअस्स' क.ख. ५. 'होन्ति' क.ख. ६. 'अवसदुणंगर' ख. ७. 'दिअसा सुहावेन्ति' क.ख.

अत्र रतिसुखानुभवाज्जिगमिषोरप्यगच्छत आलस्यं निष्पद्यते ॥

**निद्रा व्यापारवैमुख्यमिन्द्रियाणां श्रमादिभिः।**

तद्रूपेण [1]रसस्यानुबन्धो यथा—

'णिद्दालसपरिघुम्मिर[2]तंस[3]वलन्तद्धतारआलोआ।
कामस्स वि दुव्विसहा दिट्ठिणिवाआ ससिमुहीए ॥ ६३ ॥'

[निद्रालसपरिघूर्णनशीलतिर्यग्वलदर्धतारकालोकाः।
कामस्यापि दुर्विषहा दृष्टिनिपाताः शशिमुख्याः ॥]

अत्र रतिश्रमजागरादिजनितनिद्राल[5]सा दृष्टिनिपातास्तार[4]काघूर्णनत्र्यस्रवलनादिभिरनुबध्यन्ते ॥

**निद्रादिजनितं सुप्तमिन्द्रियादिनिमीलनम् ॥ १६२ ॥**

तद्रूपेण [7]रसप्रकर्षो यथा—

'ओसुअइ दिण्ण[8]पडिवक्खवेअणं पसिढिलेहिँ अङ्गेहिँ।
णिव्वत्तिअसुरअरसाणुबंधसुहणि[9]ब्भरं सोण्हा ॥ ६४ ॥'

[अवस्वपिति दत्तप्रतिपक्षवेदनं प्रशिथिलैरङ्गैः।
निर्वर्तितसुरतरसानुबन्धसुखनिर्भरं स्नुषा ॥]

अत्र निर्भरपदेनैव प्रकर्षः प्रतिपाद्यते ॥

**निद्रापगमहेतुभ्यः प्रबोधश्चेतनागमः।**

तद्रूपेण रसस्यानुबन्धो यथा—

'प्रत्यग्रोन्मेषजिह्मा क्षणमनभिमुखी रत्नदीपप्रभाणा-
मात्मव्यापारगुर्वी जनितजललवाजृम्भणैः साङ्गभङ्गैः।

---

१. 'रसानुबन्धो' घ. २. 'घुण्णिरतं' ख., 'घुम्मिरतं' ग., 'गुम्मिरत' घ. ३. 'संवलतद्धा' क. ४. 'घूर्णनालसचलनादिभिः' क., 'घूर्णनत्र्यस्रचलनादिभिः' ख. ५. 'निद्रालसदृष्टिनिपाताः' क.ख. ६. 'बाह्येन्द्रियनिमीलनम्' क.ख. ७. 'रसस्य' ग. ८. 'पडिवक्खे अणं' ख. ९. 'णिब्भरं' क.

नागाङ्कं मोक्तुमिच्छोः शयनमुरुफणाचक्रवालोपधानं
निद्राच्छेदाभिताम्रा चिरमवतु हरेर्दृष्टिराकेकरा वः ॥६५॥'

अत्र दृष्टेः प्रत्यग्रोन्मेषजिह्मतादिभिः प्रबोधो नाद्यापि निष्पद्यत इति प्रतीयते ॥

**उक्ता भावादिभेदेन तेऽमी रत्यादयो रसाः ।**
**अथैतेष्वेव केषांचिद्विशेषानभिदध्महे ॥ १६३ ॥**

तत्र

**शृङ्गारवीरकरुणरौद्राद्भुतभयानकाः ।**
**बीभत्सहास्यप्रेयांसः शान्तदान्तोद्धता रसाः ॥ १६४ ॥**
**रतिर्निसर्गसंसर्गौपम्याध्यात्माभियोगजा ।**
**संप्रयोगाभिमानोत्था विषयोत्था च कथ्यते ॥ १६५ ॥**
**प्रीतिरप्येवमेव स्यान्न त्वस्यां सांप्रयोगिकी ।**
**आभ्यासिकी तु तत्स्थाने तदुदाहृतयो यथा ॥ १६६ ॥**

'मृतेति प्रेत्य संगन्तुं यथा मे मरणं मतम् ।
सैवावन्ती मया लब्धा कथमत्रैव जन्मनि ॥ ६६ ॥'

अत्र स्थायिनो विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति रतिरेव शृङ्गाररूपेण निष्पद्यते । अत्रावन्त्या वासवदत्ताया आलम्बनविभावभूतायाः सकाशादुत्पन्नो वत्सेश्वरस्य रतिस्थायिभावः, तस्याः पुनर्जीवनादिभिरुद्दीपनविभावैरुद्दीप्यमानो मृतेत्यादिना वागारम्भानुभावेनानुमीयमानैर्हर्षधृतिप्रभृतिभिः सुखात्मकैर्व्यभिचारिभिः संसृज्यमानः करुणानन्तरः संभोगः शृङ्गाराख्यां लभते ॥

---

१. 'नागाङ्कं' क. ख. २. 'निद्राच्छेदातिताम्रा' क. ख. ३. 'अभ्यासिकी' क., 'अन्यासिकी' ख.

'अजित्वा सार्णवामुर्वीमनिष्ट्वा विविधैर्मखैः ।
अदत्त्वा चार्थमर्थिभ्यो भवेयं पार्थिवः कथम् ॥ ६७ ॥'

अत्र वसुधाविजयादेरालम्बनविभावादुत्पन्नः स्थाय्युत्साहभावः स्थैर्यधैर्यादिभिरुद्दीपनविभावैरुद्दीप्यमानैः समुत्पन्नेषु वागारम्भानुमीयमानेषु स्मृतिमतिवितर्कादिषु निष्पन्नो वीररससंज्ञया व्यवह्रियते ॥

'यस्याः कुसुमशय्यापि कोमलाङ्ग्या रुजाकरी ।
साधिशेते कथं देवी हुताशनवतीं चिताम् ॥ ६८ ॥'

अत्र चालम्बनविभावभूतदेवीमरणादुत्पन्नः शोकः स्थायिभावश्चितानिवेशनहुताशनाङ्गज्वालादिभिरुद्दीपनविभावैरुद्दीप्यमानो वागारम्भानुमेयैर्निर्वेदग्लानिवैवर्ण्यादिभिर्व्यभिचारिभिः संसृज्यमानः करुण इति ज्ञायते ॥

'निगृह्य केशेष्वाकृष्टा कृष्णा येन ममाग्रतः ।
सोऽयं दुःशासनः पापो लब्धः किं जीवति क्षणम् ॥ ६९ ॥'

अत्र दुःशासनालम्बनविभावाय क्रुध्यतो भीमसेनस्य पूर्वमुत्पन्नः क्रोधः स्थायिभावस्तदवाप्तेः स्मर्यमाणसमक्षकृतद्रौपदीनिग्रहकेशकर्षणादिभिरुद्दीपनविभावैरुद्दीप्यमानः समुत्पन्नेषु वागारम्भानुमीयमानेष्वसूयावेगवेपथुश्रमादिषु दुःखात्मकेषु व्यभिचारिषु निष्पद्यमानो रौद्र इति निष्पद्यते ॥

'अंशुकानि प्रवालानि पुष्पं हारादिभूषणम् ।
फलं मधूनि हर्म्याणि शाखा नन्दनशाखिनाम् ॥ ७० ॥'

अत्र शाखिनां प्रवालपुष्पफलशाखासंपन्नं निजं रूपं नन्दनशाखिनां पुनः प्रवालादिस्थानेष्वंशुकहारमधुमन्दिराणि तदेतदाश्चर्यम् । अतश्चैतेभ्य आलम्बनविभावेभ्यः कस्यचिद्देवभूयंगतस्य समुत्पन्नो विस्मयः

१. 'निष्पाद्यमानो' ख. २. 'प्रवालादिस्थानेंशुकहार' क. ख. ३. 'विस्मयस्थायिभावः' क. ख.

स्थायिभावस्तदीयावयवदर्शनादिभिरुद्दीपनविभावैरुद्दीप्यमानः समुत्पन्नेषु वागारम्भानुमेयेषु हर्षरोमोद्गमस्वेदगद्गदादिषु व्यभिचारिषु निष्पद्यमानोऽद्भुत इत्युच्यते ॥

'इदं मघोनः कुलिशं धारासंनिहितानलम् ।
स्मरणं यस्य दैत्यस्त्रीगर्भपाताय कल्पते ॥ ७१ ॥'

अत्र महेन्द्रकुलिशाद्धारासंनिहितानलादालम्बनविभावात्स्मर्यमाणादपि दैत्यस्त्रीणामुत्पन्नो भयस्थायिभावस्तद्विदीर्णदानवमरणस्मरणादिभिरुद्दीपनविभावैरुद्दीप्यमानः स्वगर्भपातादिभिरनुभावादिभिस्तदनुमितैश्च स्वेदस्तम्भवेपथुप्रभृतिभिर्व्यभिचारिभिः संसृज्यमानो भयानकरसरूपेण निष्पन्नः केनचिदाख्यायमानोऽपि भयानक इत्याख्यायते ॥

'पायं पायं तवारीणां शोणितं पाणिसंपुटैः ।
कौणपाः सह नृत्यन्ति कबन्धैरन्त्रभूषणाः ॥ ७२ ॥'

अत्रालम्बनविभावभूतेभ्यः कौणपेभ्यः कस्यचिद्रिपुंजयशंसिनः पुंस उत्पन्नो जुगुप्सास्थायिभावः शिरश्छेदविगलद्रुधिरधारापरिप्लुतप्रर्णर्तितकबन्धकौणपान्त्रभूषणशोणितपानादिभिरुद्दीपनविभावैरुद्दीप्यमानः समुत्पन्नेषु वागारम्भानुमेयेषु भयावेशशङ्कावहित्थादिषु व्यभिचारिषु निष्पन्नो बीभत्स इति निगद्यते ॥

'इदमम्लानमानाया लग्नं स्तनतटे तव ।
छाद्यतामुत्तरीयेण नवं नखपदं सखि ॥ ७३ ॥'

---

१. 'संनिहितानलालम्बन' ख. २. 'भयस्थायिभावः' क. ख. ३. 'सगर्भपातादिभिः' घ. ४. 'करसम्पुटैः' क. ख. ५. 'रिपुविजयाशंसिनः' ख. ६. 'प्रवर्तित' ख. ७. 'व्यभिचारादिषु' क.

अत्र काचित् सखीं पूर्वं भर्तरि [1]गृहीतमानां तेनैव नखपदाङ्कि[2]तस्तनीमालम्बनविभावभूतामुपलभमानायाः कस्याश्चित्सख्या उत्पन्नो हासः स्थायिभावस्तदीयमानपरिग्रहस्मरणादिभिरुद्दीपनविभावैरुद्दीप्यमानः समुत्पन्नेषु वागारम्भानुमितेषु शङ्कावहित्थगद्गदादिव्यभिचारिषु नि[3]ष्पद्यमानो हास्यशब्देनाभिधीयते ॥

'यदेव रोचते मह्यं तदेव कुरुते प्रिया।
इति वेत्ति न [4]जानाति [5]तत्प्रियं यत्करोति सा ॥ ७४ ॥'

अत्र वत्सलप्रकृतेर्धीरतया ललितनायकस्य प्रि[6]यालम्बनविभावादुत्पन्नः स्नेह[7]स्थायिभावो विषयसौकुमार्यात्मप्रकृत्यादिभिरुद्दीपनविभावैरुद्दीप्यमानः समुपजायमानैर्मो[8]हधृतिस्मृत्यादिभिर्व्यभिचारिभावैरनुभावैश्च[9] संसृज्यमानो निष्पन्नः प्रेयानिति प्रतीयते ॥

रतिप्रीत्योरपि चायमेव मूलप्रकृतिरिष्यते। यदित्थमाहुः—

'अहेतुः पक्षपातो यस्तस्य नास्ति प्रतिक्रिया।
स हि स्नेहात्मकस्तन्तुरन्तर्मर्माणि सीव्यति ॥ ७५ ॥
सर्वाः संपत्तयस्तस्य संतुष्टं यस्य मानसम्।
उपानद्गूढपादस्य ननु [10]चर्मास्तृतैव भूः ॥ ७६ ॥'

अत्र कस्यचिदुपशान्तप्रकृतेर्धीर[11]शान्तनायकस्य यथोपनतमनोनुकूलदारादिसंपत्तेरालम्बनविभावभूतायाः समुत्पन्नो धृतिस्थायिभावो वस्तुतत्त्वालोचनादिभिरुद्दीपनविभावैरुद्दीप्यमानः समुपजायमानस्मृ[12]त्यादिभिर्व्यभि-

१. 'प्रगृहीतमानां' क. ख. २. 'पदाङ्कितस्तनाम्' ख. ३. 'निष्पाद्यमानो' क. ४. 'जानामि' ख. ५. 'यत्प्रियं तत्करोति सा' क.ख. ६. 'प्रियानुभाव' क.ख. ७. 'स्नेहस्थायिभावो' क. ८. 'मोहमतिधृतिस्मृति' क.ख. ९. 'प्रशंसादिभिः' इत्यधिकः पाठः क.ख. १०. 'चर्मावृतैव' क.ख. ११. 'धीरप्रशान्त' क.ख. १२. 'स्मृतिमत्यासत्या' क. 'स्मृतिमत्यादिभिः' ख.

चारिभावैर्वागारम्भादिभिरनुषज्यमानो निष्पन्नः शान्त इत्यभिगीयते ॥

अन्ये पुनरस्य शमं प्रकृतिमामनन्ति स तु धृतेरेव विशेषो भवति ॥

'साधारण्यान्निरातङ्कः कन्यामन्योऽपि याचते ।
किं पुनर्जगतां जेता प्रपौत्रः परमेष्ठिनः ॥ ७७ ॥'

अत्र रामस्योदात्तप्रकृतेर्निसर्गत एव तत्त्वाभिनिवेशिनी मतिर्नोकृत्यविषये प्रवर्तते, न च प्रवृत्तोपारमति, सा च सीतेयं मम स्वीकारयोग्येत्येवंरूपेण प्रवृत्ता रावणप्रार्थनालक्ष्मणप्रोत्साहनाभ्यामुद्दीप्यमाना समुपजायमानचिन्तावितर्कव्रीडावहित्थस्मृत्यादिभिः कालोचितोत्तरानुमीयमानैश्च विवेकचातुर्यौदार्यधैर्यादिभिः संसृज्यमानोदात्तरसरूपेण निष्पद्यते ॥

'अपकर्ताहमस्मीति मा ते मनसि भूद्भयम् ।
विमुखेषु न मे खङ्गः प्रहर्तुं जातु वाञ्छति ॥ ७८ ॥'

अत्र मयास्यापकारः कृत इति यच्चेतसि भयं तन्माभूत् 'पराङ्मुखेषु मे खङ्गः कदाचिदपि न प्रहर्तुमुत्सहते' इति सर्वदैव रूढोऽहंकारः प्रतीयते । सोऽयं गर्वप्रकृतिरुद्धतो नाम रसः । केचित् पुनः—

'आस्थामालम्ब्य नीतेषु वशं क्षुद्रेष्वरातिषु ।
व्यक्तिमायाति महतां माहात्म्यमनुकम्पया ॥ ७९ ॥'

इत्येवमूर्जस्वीत्युदात्तपक्षे निक्षिपन्तः पूर्वोक्तमेव गर्वप्रकर्षोदाहरणं धृतायुधो यावदहमित्याद्युद्धतनिष्पत्तौ वर्णयन्ति ॥

रतिविशेषेषु नैसर्गिकी यथा—

'इयं महेन्द्रप्रभृतीनधिश्रियश्चतुर्दिगीशानवमन्य मानिनी ।
अरूपहार्यं मदनस्य निग्रहात्पिनाकपाणिं पतिमाप्तुमिच्छति ॥ ८० ॥'

---

१. 'इति गीयते' क.ख. २. 'प्रवृत्तोपरमति' क.ख. ३. 'संसृज्यमान उदात्तरसरूपेण' क. ४. 'यत्ते चेतसि भयम्' ख. ५. 'न मम खङ्गः पराङ्मुखेषु कदाचिदपि प्रहर्तुमुत्सहते' क.ख.ग. ६. 'अवमत्य मानिनी' क.ख.

अत्र जन्मान्तरवासनया निसर्गत इयं भवति ॥

सांसर्गिकी यथा—

'भित्त्वा सद्यः किसलयपुटान् देवदारुद्रुमाणां
ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः ।
आलिङ्ग्यन्ते गुणवति मया ते तुषाराद्रिवाताः
पूर्वस्पृष्टं[1] यदि किल भवेदङ्गमेभिस्तवेति ॥ ८१ ॥'

अत्र शैत्यसौरभादिभिर्विरहिजनोद्वेजनीया[2] अपि वायवः प्रियतमाङ्गसंसर्गसंभावनया समाश्लिष्यन्त[3] इति संसर्गत इयं भवति ॥

औपमानिकी यथा—

'अपि जनकसुतायास्तच्च तच्चानुरूपं
स्फुटमिह शिशुयुग्मे नैपुणोन्नेयमस्ति ।
ननु पुनरिव तन्मे गोचरीभूतमक्ष्णो-
रभिनवशतपत्रश्रीर्मदास्यं[4] प्रियायाः ॥ ८२ ॥'

सेयं सीताविषयिणी रतिस्तदुपमानदर्शनेन रामं रमयेति[5] ॥

आध्यात्मिकी यथा—

'कामं[6] प्रत्यादिष्टां स्मरामि न परिग्रहं मुनेस्तनयाम् ।
बलवत्तु दूयमानं प्रत्याययतीव मे चेतः ॥ ८३ ॥'

अत्र सेयं दुर्वाससः शापाद्विस्मृतविवाहादिवृत्तान्तस्य दुष्यन्तस्य शकुन्तलायां रतिरध्यात्मं भवति ॥

---

१. 'पूर्वं स्पृष्टम्' क.ख. २. 'विरहिण उद्वेजनीया' क.ख. ३. 'समालिङ्ग्यन्त इति संसर्गादियं रतिर्भवति' क.ख. ४. 'शतपत्रश्रीव' क. ५. 'रमयते' क.ख. ६. 'कामं प्रत्यादिष्टम्' क.

आभियोगिकी यथा—

'अलसवलितमुग्धस्निग्धनिष्पन्दमन्दै-
रधिकविकसदन्तर्विस्मयस्मेरतारैः ।
हृदयमशरणं[1] मे पक्ष्मलाक्ष्याः कटाक्षै-
रपहृतमपविद्धं पीतमुन्मूलितं च ॥ ८४ ॥'

सेयमनुरागातिशयसूचकमालतीकटाक्षाभियोगे माधवस्य रतिरिती-वोत्पद्यते[2] ॥

सांप्रयोगिकी यथा—

'उन्नमय्य सकचग्रहमास्यं
चुम्बति प्रियतमे हठवृत्त्या ।
हुंहुँ मुञ्च ममेति च मन्दं
जल्पितं जयति मानधनायाः ॥ ८५ ॥'

अत्र तर्जनार्थ—मोक्षार्थ—वारणार्थानां मन्दं मन्दं प्रयोगान्मानवत्याः संप्रयोगे रत्युत्पत्तिः प्रतीयते ॥

आभिमानिकी यथा—

'इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयो-
रसावस्याः स्पर्शो वपुषि बहुल[3]श्चन्दनरसः ।
अयं बाहुः कण्ठे शिशिरमसृणो[4] मौक्तिकसरः
किमस्या न प्रेयो यदि परमसह्यस्तु विरहः ॥ ८६ ॥'

अत्र रुचिविशेषोऽभिमानस्तत एवंप्राया रतयो भवन्ति ॥

---

१. 'हृदयमसरणं मे' क.　२. 'रतिरेवोत्पद्यते' क.ख.　३. 'बहुलः' ख.
४. 'शिशिरसमृणो' ख.

वैषयिकीषु शब्दे यथा—

'विलासमसृणोल्लसन्मुसललोलदोष्कन्दली-
परस्परपरिस्खलद्वलयनिःस्वनोद्बन्धुराः।
लसन्ति कलहुंकृतिप्रसभकम्पितोरःस्थले-
त्रुटद्गमकसंकुलाः कलमकण्डनीगीतयः॥ ८७॥'

स्पर्शे यथा—

'बध्नन्नङ्गेषु रोमाञ्चं कुर्वन्मनसि निर्वृतिम्।
नेत्रे निमीलयन्नेष प्रियास्पर्शः प्रवर्तते॥ ८८॥'

रूपे यथा—

'ता राघवं दृष्टिभिरापिबन्त्यो नार्यो न जग्मुर्विषयान्तराणि।
तथा हि शेषेन्द्रियवृत्तिरासां सर्वात्मना चक्षुरिव प्रविष्टा ८९'

रसे यथा—

'कस्य नो कुरुते मुग्धे पिपासाकुलितं मनः।
अयं ते विद्रुमच्छायो मरुमार्ग इवाधरः॥ ९०॥'

गन्धे यथा—

'रन्धणकम्मणिउणिए मा जूरसु रत्तपाडलसुअन्धम्।
मुहमारुअं पिअन्तो धूमाइ सिही ण पज्जलइ॥ ९१॥'

[रन्धनकर्मनिपुणिके मा क्रुध्यस्व रक्तपाटलसुगन्धम्।
मुखमारुतं पिबन् धूमायते शिखी न प्रज्वलति॥]

---

१. 'वैषयिकी शब्देषु यथा' क. २. 'कम्पितोरःस्थली' ख. ३. 'लुटद्गमकसंकुलाः' ख. ४. 'कलमकण्डनी' घ. ५. 'तन्वि' क.ख. ६. 'गन्धो यथा' ख. ७. 'मा ऊरसु' क., 'मा झुरसु' ख. ८. 'मा खिद्यस्व' इति घ-पुस्तके च्छाया.

प्रीतिविशेषेषु नैसर्गिकी यथा—

'आलक्ष्य दन्तमुकुलाननिमित्तहासा-
नव्यक्तवर्णरमणीयवचःप्रवृत्तीन् ।
अङ्काश्रयप्रणयिनस्तनयान्वहन्तो
धन्यास्तदङ्गरजसा मलिनीभवन्ति ॥ ९२ ॥'

अत्र यदा यदा रतिर्जायते तदा तदा पुत्रेषु स्निह्यति पुत्ररूपेण वा जायत इति जन्मान्तरवासनारूपो निसर्गः संगच्छते ॥

सांसर्गिकी यथा—

'विश्वंभरा भगवती भवतीमसूत
राजा प्रजापतिसमो जनकः पिता ते ।
तेषां वधूस्त्वमसि नन्दिनि पार्थिवानां
येषां कुले च सविता च गुरुर्वयं च ॥ ९३ ॥'

अत्र विश्वंभरादिसंसर्गात् सीतायां वसिष्ठमिश्राः स्निह्यन्ति ।

औपमानिकी यथा—

'कुवलयदलस्निग्धश्यामः शिखण्डकमण्डनो
बटुपरिषदं पुण्यश्रीकः श्रियैव सभाजयन् ।
पुनरिव शिशुर्भूत्वा वत्सः स मे रघुनन्दनो
झटिति कुरुते दृष्टः कोऽयं दृशोरमृताञ्जनम् ॥ ९४ ॥'

अत्र रामौपम्याल्लवे जनकः प्रीयते ॥

आध्यात्मिकी यथा—

'परितस्तं पृथासूनुः स्नेहेन परितस्तरे ।
अविज्ञातेऽपि बन्धौ हि बलात्प्रह्लादते मनः ॥ ९५ ॥'

---

१. 'निमित्तधारान्' क., 'निमित्तहासैः' ख. २. 'परुषीभवन्ति' ग. ३. 'अत्र यदा रतिर्जायते तदा पुत्रेषु स्निह्यति' ख. ४. 'कुलेषु' क.ख. ५. 'प्रह्लादते' घ.

अत्राविज्ञातोऽपि वासवः स्वसूनुमर्जुनं दृष्टः प्रीणयति ॥

आभियोगिकी यथा—

'[1]अज्ञातबन्धुरयमृक्षहरीश्वरो मे
पौलस्त्य एष समरेषु पुरः प्रहर्ता ।
इत्यादृतेन कथितौ रघुनन्दनेन
[2]व्युत्क्रान्तलक्ष्मणमुभौ भरतो ववन्दे ॥ ९६ ॥'

अत्र सीतान्वेषणादेरभियोगाद्रामस्य सुग्रीवविभीषणयोः प्रीतिरु[3]द्यते । सांप्रयोगिकीस्थाने आभ्यासिकी यथा—

'इति विस्मृतान्यकरणीयमात्मनः
सचिवावलम्बितधुरं नराधिपम् ।
परिवृद्धरागमनुबद्धसेवया
मृगया जहार चतुरेव कामिनी ॥ ९७ ॥'

अत्र

'शब्दादिभ्यो बहिर्भूता या कर्माभ्यासलक्षणा ।
प्रीतिः साभ्यासिकी ज्ञेया मृगयादिषु कर्मसु ॥'

इति लक्षणं घटते ॥

आभिमानिकी यथा—

'दत्तेन्द्राभयदक्षिणैर्भगवतो वैवस्वतादामनो-
र्दृप्तानां दहनाय दीपितनिजक्षात्रप्रतापाग्निभिः ।
आदित्यैर्यदि विग्रहो नृपतिभिर्धन्यं ममैतत्ततो
दीप्तास्त्रस्फुरदुग्रदीधितिशि[4]खानीराजितज्यं धनुः ॥ ९८ ॥'

---

१. 'दुःसैकबन्धु' क. ख. २. 'व्युत्क्रम्य' क. ख. ग. ३. 'रुत्पद्यते' क. ख. ४. 'दीधितिभरैर्नीराजितज्यं' क. ख.

अत्राभिमतप्रतिद्वन्द्विलाभाल्लब्धानुपदी कुशस्तुष्यति ॥

वैषयिकीषु शब्दे यथा—

'लावण्यैः क्षणदाविराममधुराः किंचिद्विनिद्रालस-
श्रोत्रैः सव्रणमुग्धचारणवधूदन्तच्छदावासिनः ।
पीयन्ते मृदुवक्त्रपीतमरुतः पौराणरीतिक्रम-
व्यालोलाङ्गुलिरुद्धशुक्तसुषिरश्रेणीरवा वेणवः ॥ ९९ ॥'

स्पर्शे यथा—

'प्रशान्तघर्माभिभवः शनैर्विवान्विलासिनीभ्यः परिमृष्टपङ्कजः ।
ददौ भुजालम्बमिवात्तशीकरस्तरङ्गमालान्तरगोचरोऽनिलः ॥ १०० ॥'

रूपे यथा—

'अयमभिनवमेघश्यामलोत्तुङ्गसानु-
र्मदमुखरमयूरीमुक्तसंसक्तकेकः ।
शकुनिशबलनीडानोकहस्निग्धवर्ष्मा
वितरति बृहदश्मा पर्वतः प्रीतिमक्ष्णोः ॥ १०१ ॥'

रसे यथा—

'इक्षुदण्डस्य मण्डस्य दध्नः पिष्टकृतस्य च ।
वराहस्य च मांसस्य सोऽयं गच्छति फाल्गुनः ॥ १०२ ॥'

गन्धे यथा—

'कपोलकण्डूः करिभिर्विनेतुं विघट्टितानां सरलद्रुमाणाम् ।
यत्र स्रुतक्षीरतया प्रसूतः सानूनि गन्धः सुरभीकरोति ॥ १०३ ॥'

उपलक्षणं चैतत् । तेनोत्साहस्य युद्धदानदयावीरादयः, क्रोधस्य

---

१. 'वैषयिकी यथा—' क. २. 'विनिद्रालसं' क. ख. ३. 'गीतिक्रम' क. ख. ४. 'मुक्त' क ख. ५. 'श्रेणीधरा' क. ख. ६. 'बद्धविश्रब्धनृत्यः' घ. ७. 'पिष्टघृतस्य' क. ख. ८. 'वराहस्य' क. ख. ९. 'स्रुत' ग.

१. 'होइहि' क.ख.ग., 'होहिइ' सेतुबन्धे, 'होइ' घ. २. 'महं च्चिअ' सेतुबन्धे. ३. 'उअत्थिअं' सेतुबन्धे, 'उअट्ठिअं' ग. ४. 'अत्र प्रवासदुःखेन' क.ख. ५. 'सीता विलपन्ती' क.ख., 'सीता' ग. नास्ति. ६. 'अवस्थापनार्थत्वे' क.ख.ग. ७. 'अहमेत्य' मुद्रितकुमारसंभवे. ८. 'विलोभ्यसे' मुद्रितकुमारसंभवे, ख. ९. 'शोकोद्वेगाद्' मुद्रित उत्तररामचरिते. १०.'न तु भिद्यते' क.ख. ११.'रामादेः' ग.घ. १२.'पालनार्थे' घ.

निर्यान्तीषु सखीषु वासभवनान्निर्गन्तुमेवेहते
बाला वामतयैव संप्रति मम प्रीत्यै नवोढा प्रिया ॥२७२'

अत्राप्रागल्भ्यवामताभ्यामनुकूलायामपि नवोढायामिच्छानुवृत्त्या रतिः पाल्यते ॥

मानानन्तरे कौटिल्यार्थो यथा—

'पादे मूर्धनि ताम्रतामुपगते कर्णोत्पले चूर्णिते
छिन्ने हारलतागुणे करतले संपातजातव्रणे।
अप्राप्तप्रियताडनव्यतिकरा हन्तुं पुनः कोपिता
वाञ्छन्ती मुहुरेणशावनयना पर्याकुला रोदिति ॥२७३॥'

अत्र प्रेम्णः स्वभावकुटिलत्वान्मानवत्याः कचग्रहणेन यत्पादताडनादिरूपाः कुटिला एव संभोगा जायन्ते ॥

प्रवासानन्तरेऽभ्यवहारार्थो यथा—

'वसिष्ठधेनोरनुयायिनं तमावर्तमानं वनिता वनान्तात्।
पपौ निमेषालसपक्ष्मपङ्क्तिरुपोषिताभ्यामिव लोचनाभ्याम् ॥२७४॥'

अत्र उत्तरार्धेनोपोषितस्यान्नोपयोग इव प्रियालोकजन्मा प्रीतेरभ्यवहारः कथ्यते ॥

करुणानन्तरेऽनुभवार्थो यथा—

'अणुमरणपत्थिआए पच्चागअजीविए पिअअमम्मि।
वेहव्वमंडणं कुलवहूअ सोहग्गअं जाअम् ॥ २७५ ॥'

[अनुमरणप्रस्थितायाः प्रत्यागतजीविते प्रियतमे।
वैधव्यमण्डनं कुलवध्वाः सौभाग्यकं जातम् ॥]

---

१. 'मेऽद्य सुतरां' इति मुद्रिते नागानन्दपुस्तके. २. 'पर्याकुलं' क.ख. ३. 'कुटिला एव जायन्ते' क., 'कुटिला एव संभोगा जायन्ते' ख. ४. 'उत्तरार्धे' क.ख. ५. 'अभ्यवहारार्थः' ख. ६. 'जीएम्मि' क., 'जीविएम्मि' ख.

अत्र यथेयं मत्प्राणभूतैवमस्या अहमपि जीवितमेवेति पत्या विस्रम्भजोऽनुरागः पत्न्याः पुनः प्रेत्यापि यत्संगमो मयाभिलषितः सोऽयं जीवन्त्यैव जीवितेश्वरः समासादित इति विस्रम्भादतिसुखमेवानुभूयते ॥

अत्र प्रथमानुरागानन्तरे संभोगः संक्षिप्तो यथा—

'अपेतव्याहारं धुतविविधशिल्पव्यतिकरं
करस्पर्शारम्भप्रगलितदुकूलान्तशयनम् ।
मुहुर्बद्धोत्कम्पं दिशि दिशि मुहुः प्रेरितदृशो-
रहल्यासुत्राम्णोः क्षणिकमिह तत्संगतमभूत् ॥ २७६ ॥'

अत्र संक्षेपो निगदेनैव व्याख्यायते ॥

स एव मानानन्तरे संकीर्णो यथा—

'अणुणिअखणलद्धसुहे पुणो वि संभरिअमण्णुदूमिअविहँले ।
हिअए माणवईणं चिरेण पणँअगरुओ पसम्मई रोसो २७७'

[अनुनीतक्षणलब्धसुखे पुनरपि संस्मृतमन्युदूनितविह्वले ।
हृदये मानवतीनां चिरेण प्रणयगुरुकः प्रशाम्यति रोषः ॥]

अत्रावस्थिता प्रकृष्टा च रतिर्व्यलीकस्मरणादिभिः संकीर्यते ॥

प्रवासानन्तरे संपूर्णो यथा—

'शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ
मासानेतान्गमय चतुरो लोचने मीलयित्वा ।
पश्चादावां विरहगुणितं तं तमात्माभिलाषं
निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ॥ २७८ ॥'

---

१. 'रागः' क.ख. २. 'च्युतविविध' क.ख. ३. 'करस्पर्शारम्भे' क. ४. 'विहलो' क. ५. 'पअणगरुओ' ख. ६. 'संपूर्णा' क.ख. ७. 'शेषान्मासान्' मुद्रिते मेघदूते.

अत्रामुना विरहिवाक्येनापि निर्वेक्ष्याव इति भविष्यत्कालोपाधेः प्रवासानन्तरेऽप्यविरुध्यमानेन तं तमात्माभिलाषमित्यादिना तदानीन्तनसंभोगस्य संपूर्णत्वं वर्ण्यते ॥

करुणानन्तरे समृद्धो यथा—

'तीर्थे तोयव्यतिकरभवे जह्नुकन्यासरय्वो-
र्देहत्यागादमरगणनालेख्यमासाद्य सद्यः।
पूर्वाकाराधिकतररुचा संगतः कान्तयासौ
लीलागारेष्वरमत पुनर्नन्दनाभ्यन्तरेषु ॥ २७९ ॥'

अत्रोत्तरार्धेनेन्दुमत्यजयोर्लोकान्तरप्रत्युज्जीवनेन संभोगसमृद्धिः प्रतिपाद्यते ॥

प्रथमानुरागानन्तरे सहार्थान्वयो यथा—

'मुहपेच्छओ पई से सावि हु पिअरूअदंसणुम्मइआ।
दो वि कअत्था पुहविं अपुरिसमहिलं त्ति मण्णंति ॥२८०॥'

[मुखप्रेक्षकः पतिस्तस्याः सापि खलु प्रियरूपदर्शनोन्मत्ता।
द्वावपि कृतार्थौ पृथिवीमपुरुषमहिलेति मन्येते ॥]

अत्र पूर्वार्धे रञ्जयत्यर्थ उत्तरार्धे राजत्यर्थः प्रथमानुरागे सह भावेन सिद्धस्तदनन्तरेऽपि तथैवानुवर्तते ॥

तत्रैव पश्चादर्थान्वयो यथा—

'अद्य प्रभृत्यवनताङ्गि तवास्मि दासः
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ।

१. 'प्रवेशानन्तरे' क.ख. २. 'भोगस्य' क.ख. ३. 'पूर्वाकाराधिकचतुरया' Mr. S. P. Pandit M. A. संपादिते रघुवंशे, क.ग.घ. ४. 'सविसेसदंसणुम्मइआ' इति गाथासप्त० ५. 'पुहइं' इति गाथासप्त०. ६. 'अमहिलपुरिसं व' इति गाथासप्त०. ७. 'सिद्धभावेन सिद्धः' क.ख.

अहाय सा नियमजं क्रममुत्ससर्ज
क्लेशः फलेन हि पुनर्नवतां विधत्ते ॥ २८१ ॥'

अत्र रञ्जयत्यर्थः प्रथमानुरागे पुंसि पश्चाद्भावेन सिद्धस्तदनन्तरेऽपि तथैवानुवर्तते ॥

अत्रैवानुरूपार्थान्वयो यथा—

'शशिनमुपगतेयं कौमुदी मेघमुक्तं
जलनिधिमनुरूपं जह्नुकन्यावतीर्णा ।
इति समगुणयोगप्रीतयस्तत्र पौराः
श्रवणकटु नृपाणामेकवाक्यं विवव्रुः ॥ २८२ ॥'

अत्र राजत्यर्थः प्रथमानुरागे स्त्रीपुंसयोरप्यानुरूप्येण सिद्धस्तदनन्तरेऽपि तथैवानुवर्तते ॥

तत्रैवानुगतार्थान्वयो यथा—

'स्थाने तपो दुश्चरमेतदर्थमपर्णया पेलवयार्भितप्तम् ।
या दास्यमप्यस्य लभेत नारी सा स्यात्कृतार्था किमुताङ्कशय्याम् ॥२८३॥'

अत्र पूर्वार्धे रञ्जयत्यर्थः प्रथमानुरागेऽनुगतार्थत्वेन सिद्धस्तदनन्तरे तथैवानुवर्तते । सोऽयं करणसाधनः प्रत्ययोत्पत्तिपक्ष उक्तः । भावसाधनपक्षे तु सर्वत्र सहार्थादिविशिष्टा रतिर्दीप्तिर्वानुरागशब्देनोच्यमाना तदनन्तरेऽपि समाससामर्थ्यादनुवर्तते । कः पुनरत्र समासः । षष्ठीलक्षणस्तत्पुरुषः । प्रथमानुरागस्यानन्तरैः प्रथमानुरागानन्तर इति । का च वृत्तिः । अजहत्स्वार्था न ह्यत्र नायकौ मिथः समागतावपि प्रथमानुरागमुत्सृजतः । युक्तं पुनर्यदजहत्स्वार्था परार्थाभिधानरूपा वृत्तिः स्यात्,

१. 'पेलवयापि तप्तं' इति मुद्रिते कुमारसंभवे, 'पेलवयाभितप्तं' क. २. 'प्रथमानुगतार्थत्वेन' ख. ३. 'करुणसाधनः' ख, ४. 'इति' इत्यधिकमत्रास्ति क.ख.

अवश्यं ह्यनेन परस्यार्थमभिदधता स्वार्थ उत्स्रष्टव्यः। बाढं युक्तम्। एवं हि दृश्यते लोके भिक्षुको द्वितीयां भिक्षामासाद्य पूर्वां न जहाति संचयायैव यतते, एवं तर्हि द्वयोर्द्विवचनमिति द्विवचनं प्राप्नोति। कस्या विभक्तेः। षष्ठ्याः। न षष्ठीसमर्थोऽनन्तरः। तर्हि प्रथमायाः। न प्रथमासमर्थः प्रथमानुरागः संबन्धाधिक्यात्। अभिहितः सोऽर्थोऽनन्तर्भूतः प्रातिपदिकार्थः संपन्न इति सामर्थ्यं भविष्यति। नैवम्। इह प्रथमानुरागानन्तर इत्येतस्मात्समुदायाद्विभक्त्या उत्पत्तव्यम्। तेन च समुदायेनैकोऽर्थपिण्डो मृत्पिण्ड इवाविभागापन्नपांसूदकविभागोऽवयवार्थशक्त्यानुगृहीतः पृथगव्यपदेश्यावयवशक्तिरभिधीयते। तस्मिंश्च समुदायार्थ एकत्वं समवेतमतो विद्यमानायामप्यवयवसंख्यायां तदाश्रया सुबुत्पत्तिर्न भविष्यति॥

मानानन्तरे पूजार्थान्वयो यथा—

'न स्पृष्टोऽपि त्रिदशसरिता दूरमीर्ष्यानुबन्धा-
न्नाप्युन्मृष्टो भुजगपतिना तर्जनाभिर्जयायाः।
मानस्यान्ते नयनसलिलैः क्षालितः शैलपुत्र्या
पत्युर्मौलौ नतियुजि जयत्यात्मनः पादपांसुः॥ २८४॥'

अत्र पादपतनादिपूजा मानसिद्धा तदनन्तरेऽप्यनुवर्तते॥

अत्रैव मानं प्रति प्रियत्वाभिमानार्थान्वयो यथा—

'विहायैतन्मानव्यसनमनयोरुच्चकुचयो-
र्निधेयः प्रेयांस्ते यदि वयमनुलङ्घ्यवचसः।

१. 'न द्वितीयां भिक्षां' क., 'यद्द्वितीयां भिक्षाम्' ख. २. 'अत्रान्तर्भूतः' क.ख. ३. 'इत्यस्मात्' क.ख. ४. 'तेन चैकोऽर्थः' ख. ५. 'अविभागोत्पन्न' क.ख. ६. 'नाप्युत्सृष्टो' क.ख. ७. 'प्रियत्वाभिमानान्वयो' क.ख. ८. 'विधेयः' क.ख.

सखीभ्यः स्निग्धाभ्यो गिरमिति निशम्यैणनयना
निवापाम्भो दत्ते नयनसलिलैर्मानसुहृदे ॥ २८५ ॥'

अत्र मानं प्रति प्रियत्वाभिमानो मानानन्तरेऽप्यनुवर्तते ॥

अत्रैव प्रेमावरोधार्थान्वयो यथा—

'दूमेंति जे मुहुत्तं कुविअं दासब जे[2] पसाएंति[3]।
ते च्चिअ महिलाण पिआ सेसा सामि च्चिअ वराआ[4] २८६'

[दूनयन्ति ये मुहूर्तं कुपितां दासा इव ये प्रसादयन्ति।
त एव महिलानां प्रियाः शेषाः स्वामिन एव वराकाः ॥]

अत्रास्यामपि प्रेमास्ति नास्ति वेति[5] जिज्ञासुः प्रियः[6] प्रियां केलीगोत्रस्खलनादिना दुनोति। सा च प्रेमवत्यवश्यमस्मै कुप्यति। स चोपलब्धप्रेमा दासवदेनां प्रसादयति[7]। अथैषात्मनि प्रेमास्तित्वमवबुध्यते[8]। सोऽयं मानसिद्धोऽर्थस्तदनन्तरेऽप्यनुवर्तते ॥

तत्रैव प्रेमप्रमाणार्थान्वयो[9] यथा—

'सुरकुसुमेहिं कलुसिअं जइ तेहिं चिअ पुणो पसाएमि तुमं।
तो पेम्मस्स किसोअरि अवराहस्सं अ ण मे कअं अणुरूअं[10] २८७'

[सुरकुसुमैः कलुषितां यदि तैरेव पुनः प्रसादयामि त्वाम्।
ततः प्रेम्णः कृशोदरि अपराधस्य च न मे कृतमनुरूपम् ॥]

अत्र रुक्मिण्याः सुरकुसुममञ्जरी दत्ता मम तु सुरतरुरेव प्रेयसा प्रतिपन्नस्तदहमस्याः सहस्रगुणत्वेन[11] प्रियतमेति सत्यभामा स्वप्रेमाणं

---

१. 'शिवमिति' क.ख. २. 'ते' ख. ३. 'पसाअंति' क.ख.ग. ४.'वरोआ' ख. ५. 'न वे ति' क.ख.घ. ६. 'प्रियः' नास्ति ग. ७. 'न दासवदेनां प्रवासयति' क., 'तद्दासवदेनां प्रसादयति' ख. ८. 'अनुबध्यते' ख. ९. 'प्रेमप्रमापणार्थान्वयो' क. १०. 'अणुरूवं' घ. ११. 'सहस्रगुणेन' क.ख.

मिमीते[1] । स चायमर्थो मानेन[2] सिद्धस्तदनन्तरेऽपि समाससामर्थ्यादनुवर्तते । कः पुनरत्र समासः । षष्ठीतत्पुरुष एव । का वृत्तिः । प्रथमानुरागानन्तर[3]वदजहत्स्वार्थैव । युक्तं तत्र विस्रम्भणादावपि प्रथमानुरागस्य विद्यमानत्वात् । इह तु माननिवृत्तौ मानापगमादयो जायन्ते । अन्वयाद्विशेषणं भविष्यति । तद्यथा—घृतघटस्तैलघट इति निषिक्तेऽपि घृते तैले वा[4] घृतघटोऽयं तैलघटोऽयमित्यन्वयात्पूर्वपदार्थो विशेषणं भवति । भवति[5] तत्र या च यावती चार्थमात्रा[6] इहापि तत्तुल्यमेव ॥

तथा हि—

'सकअग्गहतंसुण्णामि[7]आणणा पिअइ पिअअ[8]मविइण्णम् ।
थो[9]अं थोअं रोसो[10]सधं व मा[11]णंसिण मइरम् ॥ २८८ ॥'

[सकचग्रहत्रस्तावनामितानना पिबति प्रियतमवितीर्णम् ।
स्तोकं स्तोकं रोषौषधमिव मानिनी मदिराम् ॥]

सकषायैरेव वाक्यैर्नायकं निस्तुदन्ती शयनीयं गच्छेदिति मानशेषान्वयो दृश्यते ॥

प्रवासानन्तरे प्रिया न वसत इत्यर्थस्यान्वयो यथा—

'वसने परिधूसरे वसाना नियमक्षाम[12]तनुः कृतैकवेणिः ।
अतिनिष्करुणस्य शुद्धशीला मम दीर्घं विरह[13]व्रतं बिभर्ति २८९'

१. 'प्रमिमीते' ख. २. 'मानसिद्धः' क.ख. ३. 'प्रथमानुरागानन्तरम्' क.ख. ४. 'अयं घृतघटः, अयं तैलघटः' क.ख. ५. 'भवति' ख. नास्ति. ६. 'वा' क.ख. ७.'रहसुत्ताणिआणणा' इति गाथासप्त० ख., 'रभसोत्तानितानना' इति च्छाया. ८.'पिअमुह विइण्णम्' इति गाथासप्त०, 'प्रियमुखवितीर्णां' इति च्छाया च. ९. 'थोअं थोअं' इति गाथासप्त०, 'थोअत्थोअं' क., 'थोअथोअं' घ., 'त्थोअं त्थोअं' ख. १०. 'मइं व' इति गाथासप्त०. ११. 'उअ माणिणी' इति गाथासप्त०. १२. 'नियमक्षाममुखी धृतैकवेणिः' इति मुद्रितेऽभिज्ञानशाकुन्तले. १३. 'विरहज्वरम्' क.ख.

अत्र दुष्यन्तेन शकुन्तलायाः प्रवासे विभूषणाद्यग्रहणं यदवगतं तत्[1]तदनन्तरेऽप्यनुवर्तमानं प्रेमप्रकर्षाय भवति ॥

तत्रैव[2] युवानः प्रियसंनिधौ न वसन्तीत्यर्थस्यान्वयो यथा—

'समर्थये यत्प्रथमं प्रियां प्रति क्षणेन तन्मे परिवर्ततेऽन्यथा ।
अतो विनिद्रे सहसा विलोचने करोमि न स्पर्शविभावितो[3]प्रियः २९०'

अत्र पुरूरवाः प्रवासान्मत्त उर्वशीबुद्ध्या लतादिकं यद्य[4]दाससाद तत्त[5]दानेकशोऽन्यथा बभूव । त[6]त्संस्काराच्चायं यस्या लतारूपपरिवर्तनं प्रत्येति सोऽयं प्रियासंनिधौ यूनामवा[7]सः संसिद्धस्तदनन्तरेऽप्यनुवर्तते ॥

अत्रैवोत्कण्ठादिभिश्चेतो वासयतीत्यर्थस्यान्वयो यथा—

'अब्बो[8] दुक्करआरअ पुणो वि तत्तिं करेसि गमणस्स ।
अज्ज वि ण होंति सरला वेणीअ तरंगिणो चिउरा[9] २९१'

[हे दुष्करकारक पुनरपि चिन्तां करोषि गमनस्य ।
अद्यापि न भवन्ति सरला वेण्यास्तरङ्गिणश्चिकुराः ॥]

अत्र प्रवासानु[10]भूतभृशोत्कण्ठादिचित्तवासना[11]: प्रवासानन्तरेऽपि तस्या नोप[12]शाम्यन्तीति वेणिकावर्णनादिना सूच्यते ॥

अत्रैव प्रमापयतीत्यर्थस्यान्वयो यथा—

'त्वद्वियोगोद्भवे चण्डि मया तमसि मज्जता ।
दिष्ट्या प्रत्युपलब्धासि चेतनेव गतासुना ॥ २९२ ॥'

---

१. 'तदनन्तरे' क.ख. २. 'अत्रैव' क.ख. ३. 'स्पर्शविभावितप्रियः' क.ख. मुद्रिते विक्रमोर्वशीये च. ४. 'यद्यदासादयति' क. ५. 'तत्तदनेकशो' क.ख. ६. 'तत्तत्संकारात्' क.ख. ७. 'अवासः प्रवासः' क.ख. ८. 'अब्बो' इति खेदे. ९. 'चिहुरा' क.ख.ग. १०. 'प्रवासोद्भूत' क.ख. ११. 'चित्तवासना' ख. १२. 'नो शाम्यतीति' क.ख.

अत्रोर्वशीविरहात्पुरूरवा उत्तरां कामावस्थां प्रपन्नः प्रियाप्राप्तौ प्रेत्येव प्रत्युज्जीवितस्तदेवानुसंधत्ते । सोऽयं प्रमापणार्थः प्रवाससिद्धस्तदनन्तरेऽपि समाससामर्थ्यादनुवर्तते । कः पुनरत्र समासः । षष्ठीतत्पुरुष एव । का वृत्तिः । न तावदनुत्सृष्टस्वार्था, नहि प्रोष्यसमागतयोः प्रवाससंबन्धोऽपि विद्यते । उत्सृष्टस्वार्था तदिह भवतु । युक्तं पुनर्यदुत्सृष्टस्वार्था नाम वृत्तिः स्यात् । बाढं युक्तम् । एवं हि दृश्यते लोके—पुरुषोऽयं परकर्मणि प्रवर्तमानः स्वकर्मोत्सृजति । तद्यथा तक्षा राजकर्मणि प्रवर्तमानस्तक्षकर्मोत्सृजति । नन्वेवं सति राजपुरुषमानयेत्युक्ते पुरुषमात्रस्यानयनं प्राप्नोति । नैष दोषः । उत्सृजन्नप्ययं स्वार्थं नात्यन्तायोत्सृजति, यः परार्थविरोधी स्वार्थस्तमेवोत्सृजति । तद्यथा तक्षा राजकर्मणि प्रवर्तमानस्तक्षकर्मोत्सृजति न तु स्मितविहसितकम्पितादीनि । न चायमर्थः परार्थविरोधी विशेषणं नाम । तस्मान्नोत्स्रक्ष्यति ॥

करुणानन्तरेऽनुभूतप्रादुर्भावान्वयार्थो यथा—

'जयन्ति जायाश्लिष्टस्य शम्भोरम्भोधिमन्थने ।
मग्नामृतविषास्वादमदमूर्च्छा मनोमुदः ॥ २९३ ॥'

अत्र दाक्षायण्या हैमवतीत्वेन करुणानन्तरत्वम् । तत्र करुणदुःखेन मूर्च्छादयः प्रादुरासन् । इह त्वानन्देन ते प्रादुर्भवन्ति ॥

तत्रैवोच्चारणान्वयार्थो यथा—

'क्राम्यन्ती यदुपेक्षितासि पुरतः कामो यदग्रे हतः
क्लिष्टं यत्तपसा वपुर्यदपि च प्रोक्ता बटुच्छद्मना ।
तत्सर्वं प्रणतस्य मेऽद्य दयिते दाक्षायणि क्षम्यता-
मित्युक्त्वा चरणाब्जयोर्विजयते लुण्ठञ्छिवायाः शिवः २९४'

१. 'विरहे' क.ख. २. 'कामावस्थामापन्नः' क.ख. ३. 'कात्र वृत्तिः' क.ख. ४. 'प्रादुर्भावार्थान्वयार्थो' ख. ५. 'दाक्षायिण्या' ग.घ. ६. 'तुष्यन्' क.ख.

अत्र करुणावस्थायां प्रियापादाब्जयोर्लुण्ठता शोकेन यो विलापः कृतः स इह प्रकर्षालापत्वेन विपरिणमति ॥

अत्रैव मनोऽवस्थापनान्वयार्थो यथा—

'अखण्डितं प्रेम लभस्व पत्युरित्युच्यते ताभिरुमा स्म नम्रा ।
तया तु तस्यार्धशरीरलाभादधःकृताः स्निग्धजनाशिषोऽपि २९५'

अत्रैव—

'यदैव पूर्वं ज्वलने शरीरं सा दक्षरोषात्सुदती ससर्ज ।
ततःप्रभृत्येव विमुक्तसङ्गः पतिः पशूनामपरिग्रहोऽभूत् ॥२९६॥'

इति करुणावस्थायामतिस्नेहेनापरिग्रहत्वसाहसे यन्मनोऽवस्थापितं तदिहार्धशरीरप्रदानमहासाहसमेवावतिष्ठते ॥

तत्रैवाभ्यञ्जनान्वयार्थो यथा—

'भिन्ने सद्यः समाधावुपरमति परज्योतिषि स्पन्दसंज्ञे
संज्ञामापद्यमाने मृदुमनसि मनागुन्मिषत्स्विन्द्रियेषु ।
व्यापारे पारवश्यं विसृजति मरुति ब्रह्मसब्रह्मचारी
वामार्धस्पर्शजन्मा जयति पुररिपोरन्तरानन्दपूरः ॥ २९७ ॥'

अत्र यत्करुणावस्थायां मनः शोकप्रकर्षेणाभ्यक्तमासीत्तदिह प्रियाश्लेषजन्मना परमानन्देनाभ्यज्यते । सोऽयं करुणधर्मान्वयस्तदनन्तरेऽपि समाससामर्थ्याद्भवति । कः पुनरत्र समासः । षष्ठीतत्पुरुष एव । का वृत्तिः । जहत्स्वार्था । न ह्यत्र करुणार्थस्य गन्धोऽपि । कथं तर्ह्यन्वयः । यथा मल्लिकापुटः चम्पकपुट इत्यत्र निःकीर्णास्वपि सुमनःसु मल्लिकादिवासनावशाद्विशेषणं भवति—अयं मल्लिकापुटोऽयं चम्पकपुट इति, एवं

१. 'परिणमति' क.ख. २. 'साक्षादरोषात्' घ. ३. 'करुणधर्मसमन्वयः' क.ख. ४. 'निर्गीर्णासु' ख.

निवृत्तेऽपि स्वार्थे वासनावशात्करुणोऽनन्तरस्य विशेषणं भवति। अस्तु वा प्रथमानुरागादिष्वपि जहत्स्वार्थैव वृत्तिः। नन्वेवं राजपुरुषमानयेत्युक्ते पुरुषमात्रस्यानयनं प्राप्नोति। नैष दोषः। वृत्तौ समर्थाधिकारः क्रियते। सामर्थ्यं च भेदः संसर्ग उभयं वा। तत्र राज्ञ इत्युक्ते सर्वं स्वं प्रसक्तम्। पुरुष इत्युक्ते सर्वः स्वामी प्रसक्तः। इहेदानीं राजपुरुषमानयेत्युक्ते राजा पुरुषं निवर्तयत्यन्येभ्यः स्वामिभ्यः; पुरुषोऽपि राजानमन्येभ्यः स्वेभ्यः। एवमस्मिन्नुभयतो व्यवच्छिन्ने यदि राजार्थो निवर्तते, कामं निवर्तताम्। न जातुचित्पुरुषमात्रस्यानयनं भविष्यति। प्राक् च वृत्तेरकृतार्थस्य निवृत्तौ सामर्थ्याभावाद्वृत्तिरेव न स्यात्। वृत्तिनिमित्ता च निवृत्तिस्तस्माददोष इति। तत्र राज्ञः पुरुष इत्यत्र यदा तावदवधृतपरायत्तवृत्तिरयं पुरुषो न स्वतन्त्रस्तदा स्वामिसंसर्गस्यावगतत्वात्स्वामिविशेषज्ञानायोपादीयमानो राजशब्दः स्वाम्यन्तरेभ्यः पुरुषं व्यावर्तयति। सोऽयं स्वाम्यन्तरव्यवच्छेदो भेद इत्युच्यते। यदा पुनरनवगतपरायत्तभावस्य पुरुषस्य स्वामिसंबन्धद्योतनाय राजशब्दः प्रयुज्यते तदा विशेषसंसर्गस्य शब्दोपादानत्वादनवकाशो विशेषान्तरसंपात इत्यशब्दा स्वाम्यन्तरनिवृत्तिरवसीयते। यदा त्वर्थान्तरनिवृत्तिं वार्थसंसर्गं वाभिसंधायोपसर्जनपदानि प्रयुज्यन्ते तदा शब्दार्थसामर्थ्ययोः प्रतिपत्तिनिबन्धनयोरभेदापेक्षया भेदसंसर्गसमुदयः सामर्थ्यं भवति। यथा नीलं च तदुत्पलं चेति नीलोत्पलम्। प्रथमश्चासावनुरागश्चेति प्रथमानुराग इति,

१. 'सर्वस्वं' घ. २. 'स्वेभ्यः' क. नास्ति. ३. 'जातु कश्चित्' क.ख. ४. 'प्राक् प्रवृत्तेः' ख., 'प्राक् च प्रवृत्तेः' ग. ५. 'यत्र' ग.घ. ६. 'इति' ख. नास्ति. ७. 'विशेषसंसर्गं चाभिसंधायोपसर्जनस्य' ख. ८. 'अशाब्दी' क. ९. 'स्वात्मसंसर्गं च' क., 'स्वार्थसंसर्गं च' ख. १०. 'अभेदापेक्षायाम्' क. ख.ग. पुस्तके पाठोऽयं त्रुटितः.

प्रथमानुरागानन्तर इत्यादिषु च भेदसामर्थ्यं यथा राज्ञो भृत्य इति । यतोऽनन्तर इत्युक्तेऽवधृतमिदं कस्याप्यवधेरनन्तरोऽयं न स्वतन्त्र इति सर्वोऽवधिः प्रसक्तः । प्रथमानुरागस्येत्युक्ते सर्वः संबन्धी प्रसक्तः । इहेदानीं प्रथमानुरागानन्तर इत्युक्ते प्रथमानुरागोऽनन्तरं निवर्तयत्यन्येभ्योऽवधिभ्यः । अनन्तरः प्रथमानुरागं निवर्तयत्यन्येभ्यः संबन्धिभ्यः । तत्र योऽसौ भेदस्तत्सामर्थ्यं च, तन्निमित्ता च वृत्तिः । भेदनिमित्तायां च वृत्तौ सत्यां वृत्त्यभिमुखस्य भेदमुपजनय्योपसर्जनस्य प्रथमानुरागस्यार्थो निवर्तते। यस्यापि प्रधानस्यानन्तरस्यावधिमतो निवर्तते सोऽप्यवधिमवच्छिनत्ति । एवमुभयतो व्यवच्छेदे निर्ज्ञातेऽनन्तरविशेषे समुदायार्थे चान्यस्मिन्प्रादुर्भवति । यदि प्रथमानुरागाद्यर्थो निवर्तते, कामं निवर्तताम्, न जातुचिद्[1]वधिमन्मात्रस्य संप्रत्ययो भविष्यति । ननु चान्वयव्यतिरेकाभ्यां जहत्स्वार्थत्वं नोपपद्यते । तथा हि 'प्रथमानुरागानन्तरे' इत्युक्ते कश्चिच्छब्दः श्रूयते । प्रथमानुरागेत्यनन्तरेति च प्रतीयमानविभागः, अर्थोऽपि कश्चिद्गम्यते कन्याविस्रम्भणादिरवधिमत्त्वं च । 'मानानन्तरे' इत्युक्ते कश्चिच्छब्दभागो हीयते, कश्चिदुपजायते, कश्चिदन्वयी । प्रथमानुरागेति हीयते, मानेत्यु[2]पजायते, अनन्तर इत्यन्वयी । अर्थोऽपि कश्चिद्धीयते, कश्चिदुपजायते, कश्चिदन्वयी । कन्याविस्रम्भणादिर्हीयते, मानशैथिल्यादिरुपजायते, अवधिमत्त्वमन्वयि[3] । तेन मन्यामहे यः शब्दभागो हीयते तस्यासावर्थः; योऽर्थो हीयते, य उपजायते तस्यायमर्थो; योऽर्थ उपजायते, योऽन्वयी तस्यासावर्थो; योऽर्थः सोऽन्वयीति । नैवम् । यतोऽनन्यथासिद्धाभ्यामेवान्वयव्यतिरेकाभ्यां शब्दा-

---

१. 'जातु कश्चित्' क.ख. २. 'मान्येति' ख. ३. 'अन्वयित्वेन' क.ख.

र्थयोः संबन्धावधारणम् । अन्यथासिद्धौ चेमौ । तथा हि यत्र बृंहितं हीयते, ह्रेषितमुपजायते, रेणुचक्रमन्वयि; तत्र हस्तिनो हीयन्ते, अश्वा उपजायन्ते, पिपीलिका अन्वयिन्यः । न चैतावता रेणुचक्रादिपिपीलिकाः कारणं भवति । यत्र वा क्षीरं हीयते, दध्युपजायते, पात्रमन्वयि, तत्र माधुर्यं हीयते, अम्लतोपजायते, तृप्तिरन्वयिनी । न चैतावता पात्रस्य तृप्तिः कार्यं भवति । अवधृतं हि सामर्थ्यमन्वयव्यतिरेकाभ्यां प्रविभज्यते । यथा लोके बधिरोऽपि चक्षुष्मानालोकयति, सत्यपि श्रोत्र उपहतचक्षुर्नालोकयति रूपमित्यन्वयव्यतिरेकाभ्यां चक्षुःश्रोत्रसंनिधाने रूपालोकनं चक्षुष एव व्यवस्थाप्यते न श्रोत्रस्य। यस्य केवलस्य योऽर्थोऽवधृतः पदार्थान्तरसंनिधानेऽपि तस्य स एव । नहि रसनमसंनिधौ दर्शनस्य मधुरादिव्यञ्जकं दर्शनसंनिधौ नीलादिव्यक्तिं प्रति सामर्थ्यं लभते । प्रथमानुरागशब्दस्य केवलस्योत्कण्ठादिषु, मानशब्दस्येर्ष्यायितादिषु, अनन्तरशब्दस्य पुनरवधिमत्त्वेव सामर्थ्यमवधृतमतस्तेषां तावानेवार्थो भवति । यः पुनः पदयोरन्योन्योपश्लेषाद्विस्रम्भणादिर्मानशैथिल्यादिर्वावधिमद्विशेषोऽन्यावधिकः प्रतीयते वाक्यार्थः स भवतीति । यदि वा[2] यथानपेक्षितावयवार्था वृक्षश्रोत्रियशक्रगोपादयः स्वसामर्थ्यनियतमर्थमाचक्षते तथा संघाता एवैते प्रथमानुरागानन्तरादयो राजपुरुषादयश्चानपेक्षितावयवार्था यथासामर्थ्यमर्थेषु निविशन्ते । ननु चाव्यपदेश्यपूर्वापरविभागा भिन्नार्थाभिधायिनो[3] वृक्षादयः प्रतीयमानभागभेदानुयाताः संबन्धिपदार्थोपहितभेदवृत्त्यभिधायिनः पुनरिमे तत्कथं प्रथमानुरागानन्तरादयो वृक्षादिवद्रूढिशब्दा भवितुमर्हन्ति ? तदसत् । रूढिशब्दा यौगिका इति विभागोऽभेददर्शनादर्शनाभ्यामभिनिविष्ट-

१. 'भवन्ति' ख. २. 'च' क.ख. ३. 'अभिन्नार्थाभिधायिनः' ग.घ. ४. 'अभिनिविशते' क.ख.

बुद्धेः प्रतिपादनोपाय एव । अपर्थाभिनिविष्टो ह्ययं क्रमेण तस्मादप-र्थान्निवर्तयितव्यः । ततोऽस्याप्रत्यभिज्ञायमानप्रकृतयः श्रोत्रियक्षत्रिया-दयो दर्श्यन्ते । न ह्यत्र प्रकृतिरूपमवसीयते । यतः प्रकृत्यर्थावच्छिन्नः प्रत्ययार्थोऽभिधीयते । ततोऽनवसीयमानावयवविभागा रूढयः काश्चि-दुपन्यस्यन्ते । यत्रात्यन्तमसंभवोऽवयवार्थस्य यथा—शक्रगोपाः, तैल-पायिकाः, मण्डपेति । पुनः कदाचित्संनिहितावयवार्था जातिविशेषा-भिधायिनः सप्तपर्णकृतमालादय उदाह्रियन्ते । यतः प्रपलाशोऽप्यनुद्भि-न्नपलाशोऽपि च वनस्पतिः सप्त पर्णान्यस्य पर्वणि पर्वणीति सप्तपर्ण इत्याख्यायते । तथा निःकीर्णकुसुमस्तरुनारब्धकलिकाजालकोऽपि कृता मालानेनेति कृतमाल इत्यभिधीयते । अथ च पञ्चाङ्गुलमिवाश्व-कर्ण इव पर्णमस्येत्युपचरितार्थावयवा जातिवाचिन एव पञ्चाङ्गुलाश्वक-र्णादयो वर्ण्यन्ते । तेषु हि पञ्चाङ्गुलादिव्यपदेशः प्रोद्भिद्यमानप्रवालमपि यावदनुवर्तते । ततः संनिधानेऽप्यनाश्रीयमाणवृत्तिपदार्था लोहितशा-लिर्गौरखर इत्यादयो निगद्यन्ते । तत्र हि सन्नपि वर्णविशेषः समुदा-यस्य जातिवचनत्वाच्छब्दार्थत्वेन नावसीयते । तदेवमयं शकलीकृतवृ-त्तिपदार्थाभिनिवेशः प्रथमानुरागानन्तरादाविव राजपुरुषादावप्यवयवाभि-निवेशं शक्यते त्याजयितुम् । अत एव प्रथमानुरागादीनां विप्रलम्भसं-भोगादीनां च पारिभाषिकोऽपि संसर्गः संनिधीयत इति ॥

---

१. 'अयथाभिनिविष्टो' ख. २. 'अपदार्थात्' क. ३. 'मण्डप इति' क.ख. ४. 'च' क.ख.ग. नास्ति. ५. 'संनिधीयमानेऽपि' क.ख. ६. 'पदार्थाः' ख. ७. 'गौरस्वरः' ख.

प्रकीर्णकेषु स्पृहयन्तीव्रतमष्टमीचन्द्रकः। स हि चैत्रचतुर्थीतोऽष्टमचतुर्थ्यामुपादीयमानः कामिनीभिरर्च्यते। यथा—

'अवसहिअजणो पइणा सलाहमाणेण एच्चिरं हसिओ।
चन्दो त्ति तुज्झ[1] मुहसंमुह[2]दिण्णकुसुमंजलिविलक्खो[3] ॥२९८॥'

[अवशहृतजनः पत्या श्लाघ्यमानेनेयच्चिरं हसितः।
चन्द्र इति तव मुखसंमुखदत्तकुसुमाञ्जलिविलक्षः ॥]

यस्यां यवस्तरेष्वबला लोलन्ति सा कुन्दचतुर्थी। यथा—

'लुलिआ गहवइधूआ दिण्णं व फलं जवेहिं सविसेसं।
एण्हिं[4] अणिवारिअमेव गोहणं[5] चरउ[6] छेत्तम्मि ॥ २९९ ॥'

[लुलिता गृहपतिसुता दत्तमिव फलं यवैः सविशेषम्।
इदानीमनिवारितमेव गोधनं चरतु क्षेत्रे ॥]

वसन्तावतारदिवसः सुवसन्तको यथा—

'छणपिट्ठधूसरत्थणि महुमअतम्बच्छि कुवलआहरणे।
कण्ण[7]कअचूअमंजरि पुत्ति तुए मंडिओ गामो ॥ ३०० ॥'

[क्षणपिष्टधूसरस्तनि मधुमदताम्राक्षि कुवलयाभरणे।
कर्णकृतचूतमञ्जरि पुत्रि त्वया मण्डितो ग्रामः ॥]

यत्र स्त्रियो दोलामारोहन्ति सान्दोलनचतुर्थी। यथा—

'अंदोलणक्खणोट्ठिआए दिट्ठे तुमम्मि मुद्धाए।
आसंघिज्जइ[8] काउं[9] करपेल्लणणिच्चला[10] दोला ॥ ३०१ ॥'

[आन्दोलनक्षणोत्थितया दृष्टे त्वयि मुग्धया।
आशास्यते कर्तुं करप्रेरणनिश्चला दोला ॥]

---

१. 'तस्स' ख. २. 'मुहदिण्णकुसुमं' ख. ३. 'जातविलक्खो' ख. ४. 'पहिं' ख. ५. 'सेवगोहणं' क., 'सेवग्गेहणं' ख. ६. 'चवर' क. ७. 'कस्स' ख. ८. 'आसङ्घिज्जइ' क. ९. 'काओ' क.ख. १०. 'णिच्चता' क. ख.

एकमेव कुसुमनिर्भरं शाल्मलिवृक्षमाश्रित्य सुनिमीलितकादिभिः खेलतां क्रीडैकशाल्मली । यथा—

'को एसोत्ति पलोट्टुं सिंवलिवलिअं पिअं परिक्खसइ ।
हलिअसुअं मुद्धवहू सेअजलोल्लेण हत्थेण ॥ २०२ ॥'

[क एष इति प्रत्यावर्तितुं शाल्मलिवलितं प्रियं परिपातयति ।
हालिकसुतं मुग्धवधूः स्वेदजलार्द्रेण हस्तेन ॥]

त्रयोदश्यां कामदेवपूजामदनोत्सवः । यथा—

'गामतरुणीओ हिअअं हरंति पोढाण थणहरिल्लीओ ।
मअणूसअम्मि कोसुंभकंचुआहरणमेत्ताओ ॥ २०३ ॥'

[ग्रामतरुण्यो हृदयं हरन्ति प्रौढानां स्तनभारवत्यः ।
मदनोत्सवे कौसुम्भकञ्चुकाभरणमात्राः ॥]

गन्धोदकपूर्णवंशनाडीशृङ्गकादिभिर्यूनां प्रियजनाभिषेककर्दमेन क्रीडोदकक्ष्वेडिका । यथा—

'अह धाविऊणं संझामएण सव्वंगिअं पडिच्छंति ।
फग्गुमहे तरुणीओ गहवइसुअहत्थचिक्खिल्लं ॥ २०४ ॥'

[अथ धावित्वा संध्यामदेन सर्वाङ्गिकं प्रतीक्षन्ते ।
फल्गुमहे तरुण्यो गृहपतिसुतहस्तकर्दमम् ॥]

---

१. 'सुकुसुमनिर्भरं' क., 'सुकुसुमनिर्भरशाल्मलिवृक्षं' ख. २. 'पलट्टं' ख. ३. 'संवलि' क. ४. 'छेआणं' इति गाथासप्त०, 'विदग्धानाम्' इति च्छाया च. ५. 'मअणे कुसुम्भरञ्जिअकञ्चु[इ]आहरणमेत्ताओ' इति गाथासप्त०, 'मदने कुसुम्भरागयुक्तकञ्चुकाभरणमात्राः' इति च्छाया च. ६. 'अहं' ख. ७. 'धाविजण' ख. ८. 'सञ्झमएण' ख. ९. 'पग्गुमहे' क.

यत्रोत्तमस्त्रियः पादाभिघातेनाशोकं विकास्य[1] तत्कुसुममवतंसयन्ति साशोकोत्तंसिका। यथा—

'उत्तंसिऊण दोहलविअसिआसोअमिन्दुवदणाए।
[2]विहिणो णिप्फलकंकेल्लिकरणसद्दो समुप्पुसिओ॥ २०५॥'

[उत्तंसयित्वा दोहदविकसिताशोकमिन्दुवदनया।
विधेर्निष्फलकंकोलकरणशब्दः समुत्प्रोञ्छितः॥]

यत्राङ्गनाभिश्चूतमञ्जर्योऽवरुज्यानङ्गाय बाणत्वेन[3] दायं दायमवतंस्यन्ते सा चूतभञ्जिका। यथा—

'रइअं पि ता ण सोहइ रइजोग्गं कामिणीण छणणेवच्छं।
कण्णे जा ण रइज्जई[4] कवोलघोलंत[5]सहआरं॥ २०६॥'

[रचितमपि तावन्न शोभते रतियोग्यं कामिनीनां क्षणनेपथ्यम्।
कर्णे यावन्न रच्यते कपोलघूर्णमानसहकारम्॥]

यत्र युवतयो मदिरागण्डूषदोहदेन बकुलं विकास्य[6] तत्पुष्पाण्यवचिन्वन्ति सा पुष्पावचायिका। यथा—

'पीणथणएसु केसर दोहलदाणुम्मुहीअ णिवलंतो।
तुंगसिहरग्गपडणस्स जं फलं तं तुएँ[7] पत्तं॥ २०७॥'

[पीनस्तनेषु केसर दोहददानोन्मुख्या निपतन्।
तुङ्गशिखराग्रपतनस्य यत्फलं तत्त्वया प्राप्तम्॥]

---

१. 'विकाश्य' क.ख.ग. २. 'विरहिणो' क.ख. ३. 'बालरागत्वेनैव' ख. ४. 'जाव ण रइज्जइ' क., 'जाव ण रज्जइ' ख. ५. 'कवोलघोणन्तपल्लवसहआरं' क.ख. ६. 'विकाश्य' क.ख.ग. ७. 'तए' क.ख.

यत्र कस्ते प्रियतम इति पृच्छद्भिः पलाशादिनवलताभिः प्रियो जनो हन्यते सा चूतलतिका । यथा—

'णवलइपहारंमंगे जहिँ जहिँ महइ देअरो दाउं ।
रोमंचदंडराई तहिँ तहिँ दीसइ बहूए ॥ ३०८ ॥'

[नवलताप्रहारमङ्गे यत्र यत्रेच्छति देवरो दातुम् ।
रोमाञ्चदण्डराजिस्तत्र तत्र दृश्यते वध्वाः ॥]

'पश्चाल्यनुयातं भूतमातृका । यथा—

'विहलइ से णेवच्छं पम्माअइ मंडणं गई खलइ ।
भूअच्छणणच्चणअम्मि सुहअ मा णं पलोएसु ॥ ३०९ ॥'

[विह्वलयत्यस्या नेपथ्यं प्रम्लायते मण्डनं गतिः स्खलति ।
भूतक्षणनृत्ये सुभग मैनां प्रलोकयेः ॥]

वर्षासु कदम्बनीपहारिद्रकादिकुसुमैः प्रहरणभूतैर्द्विधा वनं विभज्य कामिनीनां क्रीडाः कदम्बयुद्धानि । यथा—

'सहिआहिँ पिअविसज्जिअकदंबरअभरिअणिब्भरुच्छसिओ ।
दीसइ कलंवथवओव्व थणहरो हलिअसोण्हाए ॥ ३१० ॥'

[सखीभिः प्रियविसर्जितकदम्बरजोभरितनिर्भरोच्छ्वसितः ।
दृश्यते कदम्बस्तबक इव स्तनभरो हालिकस्नुषायाः ॥]

प्रथमवर्षणप्ररूढनवतृणाङ्कुरासु स्थलीषु शाद्वलमभ्यर्च्य भुक्तपीतानां

---

१. 'णवलअपहरं' क.ख. गाथासप्त०. २. 'पञ्चाल्यनुनयन्ती' क., 'पञ्चात्मानुनयन्ती' ख. ३. 'णच्चणपाम्मि' ख. ४. 'पुलोएसु' क.ख. ५. 'दलं' क., 'बलं' ख. ६. 'क्रीडा' ख. ग.

कृत्रिमविवाहादिक्रीडा नवपत्रिका। तत्र च वरणविधानादौ तेषामेवंविधाः परिहासा भवन्ति। यथा—

'ता कुणह कालहरणं तुवरन्तम्मि वि वरे विवाहस्स।
जा[व] पंडुणहवआइं होंति कुमारीअ अंगाइं॥ ३११॥'
[तावत्कुरुत कालहरणं त्वरमाणेऽपि वरे विवाहस्य।
यावत्पाण्डुनखपदानि भवन्ति कुमार्या अङ्गानि॥]

अभिनवबिसाङ्कुरोद्भेदाभिरामं सरः समाश्रित्य कामिमिथुनानां क्रीडा बिसखादिका। यथा—

'गेण्हंति पिअअमा पिअअमाण वअणाहि विसलअद्धाइं।
हिअआइँ वि कुसुमाउहबाणकआणेअरंधाइं॥ ३१२॥'
[गृह्णन्ति प्रियतमाः प्रियतमानां वदनाद्बिसलतार्धानि।
हृदयानीव कुसुमायुधबाणकृतानेकरन्ध्राणि॥]

शक्रोत्सवदिवसः शक्रार्चा। यथा—

'सच्चं चअ कट्ठमओ सुरणाहो जेण हलिअधूआए।
हत्थेहिँ कमलदलकोमलेहिँ छित्तो ण पल्लविओ॥ ३१३॥'
[सत्यमेव काष्ठमयः सुरनाथो येन हालिकदुहित्रा।
हस्तैः कमलदलकोमलैः स्पृष्टो न पल्लवितः॥]

आश्विने पौर्णिमासी कौमुदी। यथा—

'अह तइ सहत्थदिण्णो कह वि खलंतमत्तजणमज्झे।
तिस्सा थणेसु जाओ विलेवणं कोमुईवासो॥ ३१४॥'
[अथ त्वया स्वहस्तदत्तः कथमिव स्खलन्मत्तजनमध्ये।
तस्याः स्तनेषु जातो विलेपन कौमुदीवासः॥]

---

१. 'तत्र' घ. २. 'विवालस्स' क. ३. 'जाव' क., 'जावं' ख. ४. 'पढुणहवआइ' ख. ५. 'इंधाइं' ख. ६. 'कट्ठमओ' ख. ७. 'धोआए' क., 'धीआए' ख. ८. 'कमलदलकोमलेहिं' ग. पाठस्त्रुटितः. ९. 'आश्विन' क.ख. १०. 'भइत्थदिण्णे' क.ख. ११. 'कह वि' ख. १२. 'तिण्णाथणेसु' क. १३. 'केमुईवासो' क.

दीपोत्सवो यक्षरात्रिः । यथा—

'अण्णे वि हुं[1] होंति छणा णं[2] उणो दीआलिआस[3]रिच्छा दे ।
जत्थ जहिच्छं गम्मइ पिअ[4]वसही दीव[5]अमिसेण ॥ २१५ ॥'

[अन्येऽपि खलु भवन्ति क्षणा न पुनर्दीपालिकासदृक्षास्ते ।
यत्र यथेच्छं गम्यते प्रियवसतिर्दीपकमिषेण ॥]

[6]शमीधान्यशूकधान्यानामार्द्राणामेवाग्निपक्वानामभ्यवहारोऽ[7]भ्यूषखादिका । यथा—

'वा[8]अग्गिणा करो मे दड्ढो[9]त्ति पुणो पुणो च्चिअ [10]कहेइ ।
हलि[11]असुआ मलिअच्छुसदोह[12]ली पामरजु[13]आणे ॥ २१६ ॥'

[निर्वाणाग्निना करो मे दग्ध इति पुनः पुनरेव कथयति ।
हालिकसुता मृदितोच्छ्वासदोहदिनी पामरयूनि ॥]

प्रथमत एवेक्षुभक्षणं नवेक्षुभक्षिका । यथा—

'दिअरस्स सरअमउअं अंसूमइलेण देइ हत्थेण ।
पढमं हिअअं बहु[14]आ प[15]च्छा गण्डं सदन्तवणं ॥ २१७ ॥'

[देवरस्य शरन्मृदुकमश्रुमलिनेन ददाति हस्तेन ।
प्रथमं हृदयं वधूका पश्चादिक्षुं सदन्तव्रणम् ॥]

---

१. 'हि' क., 'असे वि हि' ख. २. 'ण' क.ख. नास्ति., 'छणा णो' ग. ३. 'सरिच्छो दे' क.ख. ४. 'पिअवसदी' क.ख., 'पिअवसई' घ. ५. 'दीअवमिसेण' क.ख. ६. 'शमिधान्य' ख. ७. 'अभ्युपखादिका' क., 'अभ्युषखादिका' ख. ८. 'वा अणग्गिणा' क., 'अणग्गिणा' ख. ९. 'दद्धोत्ति' क.ख. १०. 'कहेहिइ' क. ११. 'हालिअसुआ' क.ख. १२. 'दोहला' क., 'दोहसा' ख. १३. 'पामरजुवाणे' क., 'पामरजुवाणो' ख. १४. 'बहुआ' घ. १५. 'पवट्ठा' ख.

ग्रीष्मादौ जलाशयावगाहनं तोयक्रीडा । यथा—

'पिसुणेंति कामिणीणं जललुक्कपिआवऊहण[1]सुहेल्लिं ।
कण्डइअकवोलुफुल्लणिच्चलच्छीइँ वअणाइं ॥ ३१८ ॥'

[पिशुनयन्ति कामिनीनां जललीनप्रियावगूहनसुखकेलिम् ।
कण्टकितकपोलोत्फुल्लनिश्चलाक्षीणि वदनानि ॥]

ना[3]ट्यादिदर्शनं प्रेक्षा । यथा—

'णच्चिहिइ णडो पेच्छिहिइ [4]जणवओ भोइओ [5]नायकः ।
सो वि दूसिहिइ [6]जइ [7]रङ्गविहडणअरी गहवइ[8]घूआ ण वच्चिहिइ[9] ॥'

[नर्तिष्यते नटः प्रेक्षिष्यते जनपदो भोगिको नायकः ।
सोऽपि दूषयिष्यति यदि रङ्गविघटनकरी गृहपतिदुहिता न व्रजिष्यति]

आलिङ्गनादिग्लहा दुरोदरादिक्रीडा[10] द्यूतानि । यथा—

'आश्लेषे प्रथमं क्रमेण विजिते [11]हृद्येऽधरस्यार्पणे
केलिद्यू[12]तविधौ पणं प्रियतमे कान्तां पुनः पृच्छति ।
सान्तर्हासनिरुद्धसंभृतरसोद्भेदस्फुर[13]द्गण्डया
तूष्णीं [14]सारिविसारणाय निहितः स्वेदाम्बुगर्भः करः ॥३२०॥'

रागोद्दीपनाय [15]माध्वीसेवा मधुपानं । यथा—

'थोआरूढमहुमआ खणप[16]म्हट्ठावराहदिण्णुल्लावा ।
हसिऊण संठविज्जइ पिएण संभरिअलज्जिआ कावि पिआ ३२१'

---

१. 'जललुक्कपिआवऊहहा' क., 'जललुक्काइआवऊहद्दा' ख. २. 'कण्ठइअकवोला पुल्ल' क., 'कण्ठइअकवोला पप्फुल्ल' ख. ३. 'नाथादिदर्शनं' ख. ४. 'जेण पओ' ख. ५. 'भोरओ' क. ६. 'जर' ख. ७. 'रङ्गविहउणभरी' ख. ८. 'गहवइधुआ' क., 'गहवरधुआ' ख. ९. 'यवच्चिहिइ' क., 'पविच्चिहिइ' ख. १०. 'दुरोदरक्रीडा' घ. ११. 'हृद्याधरस्यार्पणे' क., 'हृद्याधरस्यार्पणे' ख. १२. 'केलीद्यूतविधौ' क.ख. १३. 'स्फुरद्दन्तया' ख. १४. 'शारिविसारणाय' क. १५. 'माध्वीकादिसेवा' क. १६. 'पम्हुट्ठा विम्हरिया' इति धनपालपाइयलच्छीनाममाला । 'पम्हट्ट' क., 'पल्हदा' ख., 'पम्हठा' ग., 'पम्हट्ठा' घ.

[स्तोकारूढमधुमदा क्षणविस्मृतिरपराधदत्तोल्लापा ।
हसित्वा संस्थाप्यते प्रियेण संस्मृतलज्जिता कापि प्रिया ॥]

प्रेमप्रकारे विप्रियादिभिरप्यविनाशनीयो नित्यो यथा—

'दिट्ठाकुविआणुणआ पिआ सहस्सजणपेल्लणं पि विसहिअं[1] ।
जस्स णिसण्णाइ[2] उरे सिरीए[3] पेम्मेण लहुईओ[4] अप्पाणो ३२२'

[दृष्टा कुपितानुनया प्रिया सहस्रजनप्रेरणमपि विसोढम् ।
यस्य निषण्णयोरसि श्रिया प्रेम्णा लघूकृत आत्मा ॥]

तपश्चरणादिजन्मा नैमित्तिको यथा—

'इयेष सा कर्तुमवन्ध्यरूपतां समाधिमास्थाय तपोभिरात्मनः ।
अवाप्यते वा कथमन्यथा द्वयं तथाविधं प्रेम पतिश्च तादृशः ३२३'

अनिर्धारितविशेषः सामान्यो यथा—

'कुविआओ[5] वि पसण्णाओ ओरण्णमुहीओ[6] वि समाणीओ[7] ।
जह गहिआ तह हिअअं धारेंति अ णिव्वुइं बाला ॥ ३२४ ॥'

[[8]कुपिता अपि प्रसन्ना अवरुदितमुख्योऽपि समानाः ।
यथा गृहीतास्तथा हृदयं धारयन्तीव निर्वृतिं बालाः ॥]

निर्धारितविशेषप्रकारो विशेषवान् यथा—

'णवि तह अणालवंती हिअअं दूमेइ माणिणी[9] अहिअं ।
जह दूरं[10]विअंभि[11]अगरुअरोसमज्झत्थभणिएहिं[12] ॥ ३२५ ॥'

---

१. 'विसहिआम्' क., 'विसहिआ' ख. २. 'णिसण्णइ' क. ३. 'सिरीअ' क. ४. 'लहुअइओ' क.ख. ५. 'कुविआअ' ख., 'कुविआओ' क.ग. ६. 'ओरण्णमुहीओ' क., नास्ति. 'ओणामुहीओ' ख. ७. 'विसमाणीओ' इत्यादि गाथांशः—ग. त्रुटित एव. ८. ध्वन्यालोके त्वियमेव गाथैवमुदाहृता—'कुविआओ पसण्णाओ ओरण्णमुहीओ विहसमाणाओ । जह गहिओ तह हिअअं हरन्ति उच्छिन्तमहिलाओ ॥' [कुपिताः प्रसन्ना अवरुदितवदना विहसन्त्यः । यथा गृहीतास्तथा हृदयं हरन्ति स्वैरिण्यो महिलाः ॥] इति च्छाया च. ९. 'माणिईणी'(?) क. १०. 'दूरे वि' क. ११. 'गरुअ' ख. १२. 'भणिषेण' क., 'भणिएइ' ख.

[नापि तथा नालपन्ती हृदयं दुनोति मानिन्यधिकम् ।
यथा दूरविजृम्भितगुरुकरोषमध्यस्थभणितैः ॥]

इङ्गितादिभिरप्यनवगम्यः प्रच्छन्नो यथा—

'दिअहे दिअहे सूसइ संकेअभंगवड्ढिआसङ्का ।
आवंडुरोवणमुही कलमेण समं कलमगोवी ॥ ३२६ ॥'

[दिवसे दिवसे शुष्यति संकेतकभङ्गवर्धिताशङ्का ।
आपाण्डुरावनतमुखी कलमेन समं कलमगोपी ॥]

सख्यादिभिरवगतः प्रकाशो यथा—

'जइ होसि ण तस्स पिआ अणुदिअहं णीसहेहिँ अंगेहिँ ।
णवसूअपीअपेऊसमत्तपाडि व किं सुवसि ॥ ३२७ ॥'

[यदि भवसि न तस्य प्रियानुदिवसं निःसहैरङ्गैः ।
नवसूतपीतपीयूषमत्तमहिषीवत्सिकेव किं स्वपिषि ॥]

कारणोपाधिकः कृत्रिमो यथा—

'अद्दंसणेण पुत्तअ सुट्ठु वि णेहाणुबंधगहिआइं ।
हत्थउडपाणिआइँ वि(व) कालेण गलंति पेम्माइं ॥ ३२८ ॥'

[अदर्शनेन पुत्रक सुष्ठ्वपि स्नेहानुबन्धगृहीतानि ।
हस्तपुटपानीयानीव कालेन गलन्ति प्रेमाणि ॥]

---

१. 'रूपई' क. 'रूसइ' ख. २. 'वट्टिआसङ्का' क. ३. आवण्डुरोणअमुही' गाथासप्त०. ४. 'गोपी' घ. ५. 'संख्यादिभिः' ख. ६. 'दीअइ' क., 'अणुदिअहं' इति गाथासप्त०. पाठः, 'अनुदिवसं' इति च्छाया च. ७. 'मत्तपाडिव्व' क., 'मओपाडिव्व' ख., 'मत्तपाडिव्व' गाथासप्त० पाठः. ८. निःसहैः सुरतश्रमखिन्नैरङ्गैः. ९. पीयूषेणाभिनवदुग्धेन मत्ता पाडीव वत्सिकेव. १०. 'घडिआइं' गाथासप्त०. ११. 'व' गाथासप्त०. १२. 'वाडन्ति' क. 'वाह्रान्ति' ख.

कारणनिरपेक्षोऽकृत्रिमो यथा—

'जह जह जरापरिणओ होइ पई दुग्गओ विरूओ वि ।
कुलपालिआइं[1] तह तह अहिअअरं वल्लहो होइ ॥ ३२९ ॥'

[यथा यथा जरापरिणतो भवति पतिर्दुर्गतो विरूपोऽपि ।
कुलपालिकायास्तथा तथाधिकतरं वल्लभो भवति ॥]

जन्मान्तरसंस्कारजनितः सहजो यथा—

'आणिअपुलउब्भेओ[2] सवत्तिपणअपरिधूसरम्मि वि गुरुए[3] ।
पिअदंसणे पवड्ढइ मण्णुट्ठाणे[4] वि रुप्पिणीअ[5] पहरिसो ॥ ३३० ॥'

[आनीतपुलकोद्भेदः सपत्नीप्रणयपरिधूसरेऽपि गुरुके ।
प्रियदर्शने प्रवर्धते मन्युस्थानेऽपि रुक्मिण्याः प्रहर्षः ॥]

उपचारापेक्षप्रकर्ष आहार्यो यथा—

'घरिणीअ अकइअवं[6] चटुअं[7] पिअअमे कुणंतम्मि ।
अकअत्थाइं वि जाआइ झंति[8] सिढिलाइं[9] अंगाइं ॥ ३३१ ॥'

[गृहिण्या अकैतवं चटुकं प्रियतमे कुर्वाणे सति ।
अकृतार्थानीव जायाया झटिति शिथिलान्यङ्गानि ॥]

यौवनजो यथा—

'तंबमुहकआहोआ जह[10] जह थणआ किलेंति कुमरीणम्[11] ।
तह तह लद्धावासोव्व वम्महो[12] हिअअमाविसइ ॥ ३३२ ॥'

---

१. 'कुलवालिआणँ' गाथासप्त०., 'कुलवालिआए' क.ख. २. 'पुलओब्भेओ' क.ख. ३. 'गरुए' क., 'गरूए' ख. ४. 'मम्हट्ठाणे' क. ५. 'रुम्मिणीअ' क. ६. 'कइअव्वं' क.ख. ७. 'चडुलं' क., 'चडुलं' ख. ८. 'न्हत्ति' क., 'गत्ति' ख. ९. 'सिढिलिआइं' क.ख. १०. 'जह' क. ११. 'कुमारीणं' क. १२. 'मम्महो' घ.

[ताम्रमुखकृताभोगौ यथा यथा स्तनौ क्राम्यतः कुमारीणाम्।
तथा तथा लब्धावास इव मन्मथो हृदयमाविशति ॥]

उपचारानपेक्षो विस्रम्भजो यथा—

'ण वि तह छेअरआइं हरंति पुनरुत्तराअरमिआइं।
जह जत्थव-तत्थव जह व तह व सब्भावरमिआइं ॥२३३॥'

[नापि तथा छेकरतानि हरन्ति पुनरुक्तरागरमितानि।
यथा यत्रैव तत्रैव यथा वा तथा वा सद्भावरमितानि ॥]

प्रेमपुष्टिषु चक्षुःप्रीतिर्यथा—

'उत्पत्तिर्देवयजनाद्ब्रह्मवादी नृपः पिता।
सुप्रसन्नोज्ज्वला मूर्तिरस्याः स्नेहं करोति मे ॥ २३४ ॥'

मनःसङ्गो यथा—

'एषा मनो मे प्रसभं शरीरात्पितुः पदं मध्यममुत्पतन्ती।
सुराङ्गना कर्षति खण्डिताग्रात्सूत्रं मृणालादिव राजहंसी ॥२३५॥'

संकल्पोत्पत्तिर्यथा—

'तं पुलईअं वि पेच्छइ तं चिअ णिज्झाइ तीअ गेण्हइ गोत्तं।
ठाइअ तस्स समअणे अण्णं वि विचिंतअंम्मि सच्चिअ हिअए ॥'

[तां पुलकितां प्रेक्षते तामेव निर्ध्यायति तस्या गृह्णाति गोत्रम्।
तिष्ठति तस्य समदने अन्यामपि विचिन्तयति सैव हृदये ॥]

१. 'हृदयमित्यध्याहार्यम्'. २. 'व्युत्पत्तिः' ग. ३. 'सुरापगा' घ. ४. 'पुलइआ' ख. ५. 'पि' क.ख.ग. ६. 'तंचा' क., 'तं विअ' ख. ७. 'णिज्झाअइइ' क., 'णिज्झाअइ' ख. ८. 'घइअं तस्सा मअणे' ख. ९. 'पि' क.ख.ग. १०. 'विच्चितंअणि' ख.

प्रलापो यथा—

'अमअमअ गअणसेहर रअणीमुहतिलअ चंद दे छिवसु ।
छित्तो[1] जेहिं पिअअमो ममम्ं[2] वि[3] तेहिं चिअ[4] करेहिं ॥३३७॥'

[अमृतमय गगनशेखर रजनीमुखतिलक चन्द्र हे स्पृश ।
स्पृष्टो यैः प्रियतमो मामपि तैरेव करैः ॥]

जागरो यथा—

'तुह[5] विरहुज्जागरओ[6] सिविणे वि ण[7] देइ दंसणसुहाइं ।
वाहेण जहालोअणविणोअणं[8] पि से[9] विहअम् ॥३३८॥'

[तव विरहोज्जागरकः स्वप्नेऽपि न ददाति दर्शनसुखानि ।
बाष्पेण यथालोकनविनोदनमप्यस्या विहृतम् ॥]

कार्श्यं यथा—

'अइ[10]कोवणा वि सासू[11] रोआविआ[12] गअवईअ[13] सोण्हाए ।
पाअपडणोण्णआए[14] दोसु[15] वि गलिएसु वलएसु ॥ ३३९ ॥'

[अतिकोपनापि श्वश्रू रोदिता गतपतिकया स्नुषया ।
पादपतनावनतया द्वयोरपि गलितयोर्वलययोः ॥]

अरतिर्विषयान्तरे यथा—

'असमत्तो[16] वि समप्पइ अपरिग्गहिअ[17]लहुओ परगुणालावो[18] ।

---

१. 'छित्तो जेहिं पि पिआ' क., 'छित्तो ते जेहि' ख. २. 'ममं' इतिगाथासप्त०. ३. 'पि' क.ख.ग. ४. 'विअ' ख. ५. 'तह' ख. ६. 'विरहुज्जागरिओ' क., 'विरइज्जागरिओ' ख. ७. 'स' क.ख. ८. 'छोअणविलोअणं' क., 'लोअणविलोअणं' ख. ९. 'से हअं तं पि' गाथासप्त०, 'तस्या हृतं तदपि' इति च्छाया च. १०. 'आइ' क.ख. ११. 'सासु' ख. १२. 'रुआविआ' क., 'रूआविआ' ख. गाथासप्त०. १३. 'गअवईए' क.ख., 'गअवइअ' घ. १४. 'पाअपडणेण माए' ग.घ. १५. 'दोण्हवि' ग.घ. १६. 'असमंतो वि' ख. १७. 'अपरिअग्गहिअ' क., 'अपरिगाहिअ' ख. १८. 'परगुणलाओ' क.

तस्स पिआपडिवद्धा ण समप्पइ रइसुहासमत्ता वि कहा ॥३४०॥'

[असमासोऽपि समाप्यतेऽपरिगृहीतलघुकः परगुणालापः।
तस्य प्रियाप्रतिबद्धा न समाप्यते रतिसुखासमासापि कथा॥]

लज्जाविसर्जनं यथा—

'अगणिअसेसजुआणो बालअ वोलीणलोअमज्जाआ।
अह सा भमइ दिसामुहपसारिअच्छी तुह कएण॥३४१॥'

[अगणिताशेषयुवका बालक व्यतिक्रान्तलोकमर्यादा।
अथ सा भ्रमति दिशामुखप्रसारिताक्षी तव कृतेन॥]

व्याधिर्यथा—

'अण्णह ण तीरइ च्चिअ परिवड्ढतअगरुअसंतावं।
मरणविणोएण विणा विरमावेउं विरहदुक्खम्॥ ३४२॥'

[अन्यथा न शक्यत एव परिवर्धमानगुरुकसंतापम्।
मरणविनोदेन विना विरमयितुं विरहदुःखम्॥]

उन्मादो यथा—

'अवलंबह मा संकह ण इमा गहलंघिआ परिब्भमइ।
अत्थक्कगज्जिउब्भंतहित्थहिअआ पहिअजाआ॥ ३४३॥'

[अवलम्बध्वं मा शङ्कध्वं नेयं ग्रहलङ्घिता परिभ्रमति।
आकस्मिकगर्जितोद्भ्रान्तत्रस्तहृदया पथिकजाया॥]

मूर्च्छा यथा—

'जं मुच्छिआ ण अ सुओ कलंबगंधेण तं गुणे पडिअं।
इअरह गज्जिअसद्दो जीएण विणा ण बोलिंतो॥ ३४४॥'

---

१. 'पडिवद्धा' ग.घ. २. 'सेसजुअणा' क., 'सेसजुआणो' ख. ३. 'असाहण' ख. ४. 'गअगरुअसंतावं' घ., 'गरुअसंलावं' क.ख., 'गरुअं पिअअमस्स' इति गाथासप्त०. ५. 'मां संकरुणरसगाह' ख. ६. 'गज्जिअ उत्तन्द' क.ख.

[यन्मूर्च्छिता न च श्रुतः कदम्बगन्धेन तद्गुणे पतितम् ।
इतरथा गर्जितशब्दो जीवेन विना न व्यतिक्रामेत् ॥]

मरणं यथा—

'अज्ज वि[1] ताव एक्कं मामं[2] वारेहि[3] पिअसहि रुअंतिम् ।
कल्लिं उण[4] तम्मि गए जइ ण मरिस्सं ण रोइस्सम् ३४५'

[अद्यापि तावदेकं मा मां वारय प्रियसखि रुदन्तीम् ।
कल्ये पुनस्तस्मिन् गते यदि न मरिष्यामि न रोष्यामि ॥

ता इमा विप्रलम्भजन्मानो द्वादशापि प्रेमपुष्टिभूमयः संभोगेषु स्वानुरूपामेव प्रेमप्रकर्षभूमिकामास्कन्दयन्ति ॥

नायकेषु कथाव्यापी नायको यथा—

'गुरोः शासनमत्येतुं न शशाक स राघवः ।
यो रावणशिरश्छेदकार्यभारेऽप्यविक्लवः ॥ ३४६ ॥'

प्रतिनायको यथा—

'जेतारं लोकपालानां स्वमुखैरर्चितेश्वरम्[5] ।
रामस्तुलितकैलासमरातिं बह्वमन्यत ॥ ३४७ ॥'

उपनायको यथा—

'स हत्वा वालिनं वीरं[6] तत्पदे चिरकाङ्क्षिते ।
धातोः स्थान इवादेशं सुग्रीवं संन्यवेशयत् ॥ ३४८ ॥'

---

१. 'अज्जं पि' क.ख. गाथासप्त०. २. 'मासं' क.ख. ३. 'वारेइ' क., 'धारेइ' ख. ४. 'पहिऊण' क.ख., 'जइ ण मुआ ता ण रोइस्सम्' गाथासप्त०. अप्रत्यसाहित्याचार्यभट्टमथुरानाथशास्त्रिविरचितायां छायायां तु—'अद्यैव तावदेकं मा रुदतीं निवारयस्वालि । कल्ये गते तु तस्मिन् न हि रोदिष्यामि यदि न मृता ॥'. ५. 'तैर्मुखैः' क. ६. वीरः' इति S. P. Pandit M. A. संपादिते रघुवंशे.

अनुनायको यथा—

'स मारुतसुतानीतमहौषधिहृतव्यथः।
लङ्कास्त्रीणां पुनश्चक्रे विलापाचार्यकं शरैः॥ ३४९॥'

कथाव्यापिनी नायिका यथा—

'तीए सविसेसदूनिअसवत्तिहिअआइं णिव्वलंतसिणेहं।
पिअगरुइआइ णिमिअं सोहग्गगुणाण अग्गभूमीअ पअं॥३५०॥'

[तया सविशेषदूनितसपत्नीहृदयया निर्वर्त्यमानस्नेहम्।
प्रियगुरूकृतया निर्मितं सौभाग्यगुणानामग्रभूम्यां पदम्॥]

प्रतिनायिका यथा—

'तं[3] तिअसकुसुमदामं हरिणा णिम्महिअसुरहिगंधामोअं।
अप्पणइअं पि दूमिअपणइणिहिअएण रुप्पिणीअ विइण्णम् ३५१'

[तत्रिदशकुसुमदाम हरिणा निर्गच्छत्सुरभिगन्धामोदम्।
आत्मनानीतमपि दूनितप्रणयिनीहृदयेन रुक्मिण्यै वितीर्णम्॥]

उपनायिका यथा—

'देवीस्वीकृतमानसस्य नियतं स्वप्नायमानस्य मे
तद्गोत्रग्रहणादियं सुवदना यायात्कथं न व्यथाम्।
इत्थं यन्त्रणया कथं कथमपि क्षीणा निशा जाग्रतो
दाक्षिण्योपहतेन सा प्रियतमा स्वप्नेऽपि नासादिता ३५२'

अनुनायिका यथा—

'श्लाघ्यानां गुणिनां धुरि स्थितवति श्रेष्ठान्ववाये त्वयि
प्रत्यस्तव्यसने महीयसि परं प्रीतोऽस्मि जामातरि।

---

१. 'स मारुतिसमानीत' इति मुद्रिते रघुवंशे. २. 'णिव्वरणेन्तसिणेहं' क. 'णिव्वरणन्तसिणेतं' ख. ३. 'जं' ख. ४. 'दूम्मिअ' क. ५. 'पणइ पि' क.ख. ६. 'विअइण्णं' ग. ७. Dr.R.G.Bhandarkar संपादिते मालतीमाधवे तु 'श्रेष्ठान्वये च त्वयि' इति पाठः.

तेनेयं मदयन्तिकाद्य भवतः प्रीत्यै भवत्प्रेयसे[1]
मित्राय प्रथमानुरागघटिताप्यस्माभिरुत्सृज्यते ॥३५३॥'

आभासेषु नायकाभासो यथा—

'कह[2] मा छिज्जउ मज्झो इमीअ कंदोट्टदलसरिच्छेहिं ।
अच्छीहिं जो ण दीसइ घणथणहररुद्धपसरेहिं ॥ ३५४ ॥'

[कथं मा क्षीयतां मध्य एतस्या नीलोत्पलदलसदृशाभ्याम् ।
अक्षिभ्यां यो न दृश्यते घनस्तनभररुद्धप्रसराभ्याम् ॥]

नायिकाभासो यथा—

'कृतसीतापरित्यागः स रत्नाकरमेखलाम् ।
बुभुजे पृथिवीपालः पृथिवीमेव केवलाम् ॥ ३५५ ॥'

उभयाभासो यथा—

'अवऊहिअपुब्बदिसे समअं[3] जोण्हाए सेविअपओसमुहे[4] ।
माइ ण झिज्जउ रअणी[5] वरदिसाइत्तपच्छिअम्मि मिअङ्के ३५६'

[अवगूहितपूर्वदिशे समकं ज्योत्स्नया सेवितप्रदोषमुखे ।
मातर्न क्षीयते रजनी अपरदिशाभिमुखप्रस्थिते मृगाङ्के ॥]

तिर्यगाभासो यथा—

'ओरत्तपङ्कअमुहिं वम्महणडिअं[6] व सलिलसअणणिसण्णं ।
अलिअइ तीरणलिणिं वाआइ गमेइ सहचारिं[7] चक्काओ[8] ३५७'

[उपरक्तपङ्कजमुखीं मन्मथनटिताभिव सलिलशयननिषण्णाम् ।
आलिङ्गति तीरनलिनीं वाचा गमयति सहचरीं चक्रवाकः ॥]

---

१. 'तव प्रेयसे' मुद्रिते मालतीमाधवे. २. 'कहण्ण मा झिज्जउ' क., 'कहं ण हिज्जउ' ख. ३. 'समयं' क. ४. 'पओसं मुहे' क.ख. ५. 'अरणी' क.ख. ६. 'वम्महणदिअं' क., 'वह्माणदिअं' ख. ७. 'सहवारिं' क. ८. 'वक्काओ' क.ख.

नायकेषु सर्वगुणसंपद्योगादुत्तमः। स यथा—

'रामोऽयं जगतीह विक्रमगुणैर्यातः प्रसिद्धिं परा-
मस्मद्भाग्यविपर्ययाद्यदि परं देवो न जानाति तम्।
बन्दीवैष यशांसि गायति मरुद्यस्यैकबाणाहति-
श्रेणीभूतविशालतालविवरोद्भूतैः स्वरैः सप्तभिः ३५८'

पादोनगुणसम्पद्योगान्मध्यमो यथा—

'किं नो व्याप्तदिशां प्रकम्पितभुवामक्षौहिणीनां फलं
किं द्रोणेन किमङ्गराजविशिखैरेवं यदि क्लाम्यसि।
जीवद्भ्रातृशतस्य[1] मे भुजबलैश्छायां[2] सुखामाश्रिता
त्वं दुर्योधनकेसरीन्द्रगृहिणी शङ्कास्पदं किं तव ॥३५९॥'

अर्धगुणसम्पद्योगात्कनिष्ठो यथा—

'एकस्मिञ्शयने मया मयसुतामालिङ्ग्य निद्रालसा-[3]
मुन्निद्रं शयितेन मच्चरणयोः संवाहनव्यापृता।
पादाग्रेण तिलोत्तमा स्तनतटे सस्नेहमापीडिता
हर्षावेगसमर्पितानि पुलकान्यद्यापि नो मुञ्चति ॥ ३६० ॥'

सत्त्वप्रधानः सात्त्विको यथा—

'शक्त्या वक्षसि मग्नया सह मया मूढे प्लवङ्गाधिपे
निद्राणेषु च विद्रवत्सु कपिषु प्राप्तावकाशे द्विषि।
मा भैष्टेति निरुन्धतः कपिभयं तस्योद्भटभ्रूस्थिते-
र्मर्मच्छेदविसंष्ठुलाक्षरजडा वाचस्त्वया न श्रुताः ३६१'

---

१. नि. सा. मुद्रिते वेणीसंहारे तु—'भीरु भ्रातृशतस्य या भुजघनच्छाया सुखोपास्थिता' इति पाठः. २. 'भुजवनच्छायां' क. ३. 'निद्राश्रयां' ख.

रजःप्रधानो राजसो यथा—

'सामन्तमौलिमणिरञ्जितशासनाङ्क-
मेकातपत्रमवनेर्न तथा प्रभुत्वम् ।
अस्याः सखे चरणयोरधिगम्य सम्य-
गाज्ञाकरत्वमहमद्य यथा कृतार्थः ॥ ३६२ ॥'

तमःप्रधानस्तामसो यथा—

'तपो वा शस्त्रं वा व्यपदिशति यः कश्चिदिह वः
स दर्पादुद्दामद्विषमसहमानः कलयतु ।
अरामां निःसीरध्वजदशरथीकृत्य वसुधा-
मतृप्तस्तत्कुल्यानपि परशुरामः शमयति ॥ ३६३ ॥'

अनेकजातिः साधारणो यथा—

'स्नाता तिष्ठति कुन्तलेश्वरसुता वारोऽङ्गराजस्वसु-
र्द्यूते रात्रिरियं जिता कमलया देवी प्रसाद्याद्य च ।
इत्यन्तःपुरसुन्दरीः प्रति मया विज्ञाय विज्ञापिते
देवेनाप्रतिपत्तिमूढमनसा द्वित्राः स्थितं नाडिकाः ॥ ३६४ ॥'

अनन्यजानिरसाधारणो यथा—

'आविवाहसमयाद्गृहे वने शैशवे तदनु यौवने पुनः ।
स्वापहेतुरनुपासितोऽन्यया रामबाहुरुपधानमेष ते ॥ ३६५ ॥'

अहंकारप्रधानो धीरोद्धतो यथा—

'चक्रं वा मधुहा कृतान्तगृहिणीदत्ताग्रपञ्चाङ्गुलं
वज्रं भूधरपक्षशोणितसुरापानोन्मदं वा वृषा ।

---

१. मुद्रिते महावीरचरिते तु 'व्यवहरति' इति पाठः. २. 'उद्दामं द्विषमसहमानं' क., 'उद्दामस्त्विषमसहमानः स्खलयतु' इति च मुद्रिते वीरचरिते. ३. 'जगतीं' इति मुद्रिते वीरचरिते. ४. 'तत्कुल्यामपि' क., 'तत्कल्यामपि' ख. ५. 'अनुपाश्रितोऽन्यया' इति मुद्रित उत्तररामचरिते. ६. 'कृतान्तगृहिणां' ख.

शूलं वासुररक्तबिन्दुनिचितं गृह्णातु शूलायुधो
धृष्टद्युम्नमहं निहन्मि समरे कश्चित्परित्रायताम् ॥ ३६६ ॥'

रत्युपचारप्रधानो धीरललितो यथा—

'आधातुं विनयं निरागसि नरे कुप्यन्तु नामेश्वरा-
स्तेन स्वाशयशुद्धिरेव सुकरा प्रायः प्रभूणां पुरः ।
मिथ्यामानिनि मन्यसे यदि तदा नित्यं मनोवर्तिनी
ध्याता तामरसाक्षि चित्रपटके का वा त्वदन्या मया ॥३६७॥'

उपशमप्रधानो धीरप्रशान्तो यथा—

'कुलममलिनं भद्रा मूर्तिर्मतिः श्रुतिशालिनी
भुजबलमलं स्फीता लक्ष्मीः प्रभुत्वमखण्डितम् ।
प्रकृतिसुभगा ह्येते भावा मदस्य च हेतवो
व्रजति पुरुषो यैरुन्मादं त एव तवाङ्कुशाः ॥ ३६८ ॥'

विस्रब्धोदारकर्मा धीरोदात्तः । स यथा—

'कपोले जानक्याः करिकलभदन्तद्युतिमुषि
स्मरस्मेरं गण्डोड्डमरपुलकं वक्त्रकमलम् ।
मुहुः पश्यञ्शृण्वन्रजनिचरसेनाकलकलं
जटाजूटग्रन्थिं द्रढयति रघूणां परिवृढः ॥ ३६९ ॥'

कैतवप्रधानः शठो यथा—

'दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादरा-
देकस्या नयने निमील्य विहितक्रीडानुबन्धच्छलः ।

---

१. 'शूलं चासुर' ख. २. 'चित्रफलके' क., 'चित्तफलके' ख. ३. 'धीरशान्तो' घ. ४. 'ह्यन्ते' ख. ५. 'नवाङ्कुशाः' क.ख. ६. 'विश्रब्धोदारकर्मा' क., 'विलब्धदारकर्मा' ख.

ईषद्वक्रितकन्धरः सपुलकः प्रेमोल्लसन्मानसा-
मन्तर्हासलसत्कपोलफलकां धूर्तोऽपरां चुम्बति ॥ ३७० ॥'

कृतापराधोऽप्यविलक्षो धृष्टो यथा—

'शतं वारानुक्तः प्रियसखि वचोभिः स परुषैः
सहस्रं निर्धूतः पदनिपतितः पार्ष्णिहतिभिः ।
कियत्कृत्वो[1] बद्धाः पुनरिह न वेद्मि भ्रुकुटय-
स्तथापि क्लिश्यन्मां क्षणमपि न धृष्टो विरमति ॥ ३७१ ॥'

हृदयंगमप्रवृत्तिरनुकूलो यथा—

'मुञ्च कोपम[2]निमित्तकोपने सन्ध्यया प्रणमितोऽसि नान्यया ।
किं न वेत्सि सहधर्मचारिणं चक्रवाकसमवृत्तिमात्मनः ॥३७२॥'

औपरोधिकप्रवृत्तिर्दक्षिणो यथा—

'अनेन कल्याणि मृणालकोमलं व्रतेन गात्रं ग्लपयस्यकारणम् ।
प्रसादमाकाङ्क्षति यस्तवोत्सुकः स किं त्वया दासजनः प्रसाद्यते ॥'

नायिकागुणेषु सर्वगुणसंपद्योगादुत्तमा यथा—

'हसिआइं समंसलकोमलाइं वीसंभकोमलं वअणं ।
सब्भा[3]वकोमलं पुलइअं च णमिमो सुमहिलाणं ॥ ३७४ ॥'

[हसितानि समांसलकोमलानि विस्रम्भकोमलं वचनम् ।
सद्भावकोमलं प्रलोकितं च नमामः सुमहिलानाम् ॥]

पादोनगुणसंपद्योगान्मध्यमा यथा—

'णिअदइअदंसणुक्खित्त पहिअ अणेन वच्चसु पहेण ।
गहवइ[4]बहुआ दु[5]लंघिअवाउरा इह [6]गामे ॥ ३७५ ॥'

---

१. 'कियत्कृत्वा' ख. २. 'मानं' ख. ३. 'सब्भावकोमलपुलाइअं' क., 'सब्भाव-कोमच्छपुलाइअं व' ख. ४. 'गहवइहहूआ' ख. ५. 'दुल्लङ्घिवाउरा इअ इह ग्गामो' क., 'दुल्लङ्घिवाउदाइअप इह ग्गामो' ख. ६. 'इहअ ग्गामे' घ.

अर्थगुणसंपद्योगादधमा यथा—

'तं[1] किर खणा विरज्जसि तं किर उवहँससि[2] सअल[3]महिलाओ ।
एहेहि वारवालिइ अंसू[4] मइलं समुप्पिसिमो[5] ॥ ३७६ ॥'

[त्वं किल क्षणाद्विरज्यसे त्वं किलोपहससि सकलमहिलाः ।
एह्येहि वारपालिके अश्रु मलिनं समुत्प्रोञ्छामः ॥]

वयःकौशलाभ्यामसंपूर्णा मुग्धा यथा—

'सहिआहिँ भण्णमाणा थणए लग्गं कुसुंभपुप्फं[6] त्ति ।
मुद्धबहुआ[7] हसिज्जइ पप्फोडंती णहवआइं ॥ ३७७ ॥'

[सखीभिर्भण्यमाना स्तने लग्नं कुसुम्भपुष्पमिति ।
मुग्धवधूका हस्यते प्रस्फोटयन्ती नखपदानि ॥]

वयसा परिपूर्णा मध्यमा यथा—

'पडिवक्खमण्णुउंजे[8] लावण्णउडे[9] अणंगगअकुंम्भे[10] ।
पुरिससअहिअअधरिए कीस थणंती थणे वहसि ॥३७८॥'

[प्रतिपक्षमन्युपुञ्जौ लावण्यपुटावनङ्गगजकुम्भौ ।
पुरुषशतहृदयधृतौ किमिति स्तनन्ती स्तनौ वहसि ॥]

वयःकौशलाभ्यां संपूर्णा प्रगल्भा यथा—

'खिण्णस्स[11] ठवेइ[12] उरे पइणो गिम्हावरण्हरमिअस्स[13] ।
ओल्लं गलन्तउप्फं[14] ण्हाणसुअन्धं चिउरभारम् ॥ ३७९ ॥'

[खिन्नस्य स्थापयत्युरसि पत्युर्ग्रीष्मापराह्णरमितस्य ।
आर्द्रं गलत्कुसुमं स्नानसुगन्धं चिकुरभारम् ॥]

---

१. 'तकिं खण' ख. २. 'उवहससि' घ. ३. 'अलमहिलाओ' क.ख. ४. 'अंसुमइमलं' क.ख. ५. 'समुप्पिसिओ' ख., 'समुप्पुसिमो' घ. ६. 'लग्गकुम्भपुप्पुति' ख. ७. 'मुद्धवहूआ' ख. ८. 'मण्णुपुञ्जे' गाथासप्त०, 'मण्णुउडे' क., 'मत्तउञ्जे' ख. ९. 'लावसउद्दे' ख. १०. 'अणङ्गअकुम्भ' ख. ११. 'खिण्णस्स उरे पइणो ठवेइ' गाथासप्त० १२. 'ठवेइउ पइणो' क., 'वच्चेइर पइणो' ख. १३. 'गिम्हावरणहरणमिअस्स' ख. १४. 'गलन्तकुसुमं' इति गाथासप्त०.

यत्नापनेयमाना धीरा यथा—

'ण वि तह अणालवंती हिअअं दूनेइ माणिणी अहिअम्[1] ।
जह[2] दूरविअम्भिअगरु[3]अरोसमज्झत्थभणिएहिं[4] ॥ ३८० ॥'

[नापि तथानालपन्ती हृदयं दुनोति मानिन्यधिकम् ।
यथा दूरविजृम्भितकरोषमध्यस्थभणितैः ॥]

अ[5]यत्नापनेयमानाऽधीरा यथा—

'अवलंबिअमाणपरंमुहीअ[6] एं[7]तस्स माणिणि पिअस्स ।
पुट्टि[8]पुलउग्गमो तुह कहेइ संमुहट्ठिअं[9] हिअअं ॥ ३८१ ॥'

[अवलम्बितमानपराङ्मुख्या आगच्छतो मानिनि प्रियस्य ।
पृष्ठपुलकोद्गमस्ते कथयति संमुखस्थितं हृदयम् ॥]

आत्मीया स्वा यथा—

'घरिणीअ[10] महाणसकम्मलग्गमसिमलिइएण[11] हत्थेण ।
छित्तं मुहं हसिज्जइ चंदावत्थं गअं पइणा[12] ॥ ३८२ ॥'

[गृहिण्या महानसकर्मलग्नमलिनितेन हस्तेन ।
स्पृष्टं मुखं हसते चन्द्रावस्थां गतं पत्या ॥]

परकीयान्यदीया यथा—

'वइविवरणिग्गअदलो एरंडो[13] साहइ[14] तरुणाणं ।
एत्थ घरे हलिअवहू एद्दहमेत्तत्थणी वसइ ॥ ३८३ ॥'

---

१. 'हिअअम्' क. २ 'जइ' घ. ३. 'दूरे विअम्हिअ' क., 'दूरविअम्हिअ' ग.घ., 'दूरे विअमिअ' ख. ४. 'गरूअ' ख. ५. 'यत्नापनेयमानाऽधीरा' घ., 'अयत्नापनेयमाना धीरा' ग., 'अयत्नापनेयमानाऽधीरा' क. ख., 'अपलायनेऽपमानाऽधीरा' इति, एवं प्रथमेऽपि भेदे 'पलायनेऽपमाना धीरा' इति. ६. 'परम्मुहीए' इति गाथासप्त०. ७. 'तं एतस्स' ख. ८. 'पुट्ठ' गाथासप्त०. 'पुट्ठि पुलगामो' ख. ९. 'संमुहठिअं' इति गाथासप्त०. १०. 'घरिणीए' क.ख. गाथासप्त०. ११. 'मसिमइलेण' क.ख. १२. 'गअ पइण' क., 'गइ पइणा' ख. १३. 'एरण्णो' क., 'एरणो' ख. १४. 'साहइव्व' क.

[वृतिविवरनिर्गतदल एरण्डः साधयतीव तरुणेभ्यः ।
अत्र गृहे हालिकवधूरेतावन्मात्रस्तनी वसति ॥]

पाणिगृहीता ऊढा यथा—

'बालत्तणदुल्ललिआए अज्ज अणज्जं कअं णववहूए ।
भीआमि घरे एआईणित्ति णि[4]तो पई रुद्धो ॥ २८४ ॥'

[बालत्वदुर्ललितयाद्य अनार्यं कृतं नववध्वा ।
बिभेमि गृहे एकाकिनीति निर्यन् पती रुद्धः ॥]

अनूढा कुमारी यथा—

'कस्स करो बहुपुण्णफलेकतरुणो तुहं विसिम्मिहिइ ।
थणपरिणाहे मम्महणेहाणकल[6]सो व पारोहो ॥ २८५ ॥'

[कस्य करो बहुपुण्यफलैकतरोस्तव विश्रमिष्यति ।
स्तनपरिणाहे मन्मथनिधानकलश इव प्ररोहः ॥]

प्रथमोढा ज्येष्ठा यथा—

'पणअं पढमपिआए रक्खिउकामो वि महुरमहुरेहिं ।
छेअवरो विण[12]डिज्जइ अहिणवबहु[13]आविलासेहिं ॥ २८६ ॥'

[प्रणयं प्रथमप्रियाया रक्षितुकामोऽपि मधुरमधुरैः ।
छेकवरः सुखायतेऽभिनववधूकाविलासैः ॥]

---

१. 'बलत्तण' ख. २. 'आभा (भाआ?) मि' ख. ३. 'एआइणि वि' ख. ४. 'णित्तो' क.ख. ५. 'णिसम्मिहिइ' क.ख., 'णिसिम्मिहिइ' ग.घ., 'विसम्मिहइ' गाथासप्त०. ६. 'णिहाणकलसोव्व' ग.. ७. 'पारोहे' क.ख.ग.घ., 'णिधानकलसेव्व पारोहो' इति गाथासप्त० पाठः. ८. 'उपणअं' क., 'उपणअं पणअं' ख. ९. 'रक्खिउ(उ?) कामो वि महुरेहिं' क. १०. 'मधुरमधुरेहिं' ख., 'महुरमहुरेहि' ग.घ. ११. 'च्छेआवरो' ख. १२. 'विणलिज्जइ' क.ख. १३. 'अहिणववहूआ' ख.

पश्चादूढा कनीयसी यथा—

'उट्टन्तमहारम्भे थैणए दैट्ठूण मुद्धवहुँआए ।
ओसण्णँकवोलाए णीससिअं पढमघरिणीए ॥ ३८७ ॥'

[उत्तिष्ठन्महारम्भौ स्तनकौ दृष्ट्वा मुग्धवध्वाः ।
अवसन्नकपोलया निःश्वसितं प्रथमगृहिण्या ॥]

अहंकारर्द्धिरुद्धता यथा—

'अण्णमहिलापसंगं दे देवें करेसु अम्ह दइअर्स्स ।
पुरिसा एकंतरसौं ण हु दोसगुणे विआणंति ॥ ३८८ ॥'

[अन्यमहिलाप्रसङ्गं हे देव कुर्वस्माकं दयितस्य ।
पुरुषा एकान्तरसा न खलु दोषगुणौ विजानन्ति ॥]

गूढमानर्द्धिरुदात्ता यथा—

'जाँणइ जाणावेउं अँणुणअविहुरीअमाणपरिसेसं ।
रइँविक्कमम्मि विणआवलंबणं स च्चिअ कुँणन्ती ॥ ३८९ ॥'

[जानाति ज्ञापयितुमनुनयविधुरितमानपरिशेषम् ।
रतिविक्रमे विनयावलम्बनं सैव कुर्वन्ती ॥]

निर्वाणमाना शान्ता यथा—

'जइआ पिओ ण दीसइ भणह हला कस्स कीरए माणो ।
अह दिट्ठम्मिँ वि माणो ता तस्स पिअत्तणं कँत्तो ॥ ३९० ॥'

---

१. 'महारम्भत्थणए' ख. २. 'दट्ठेण' ख. ३. 'मुद्धवहूआए' ख. ४. 'ओसिण्ण' क., 'ओसिण' ख. ५. 'दै देक' क., 'दे देक' ख., 'दे देव' ग. ६. 'दरअस्स' क. ७. 'एकतरस' ख. ८. 'जाणाइ' क. ९. 'अणुणअविद्दविअमाणपरिसेसं' गाथासप्त०, 'अनुनयविद्रावितमानपरिशेषम्' इति च्छाया च; 'विहीणरीअमाणपरिसेसं' क. १०. 'अइरिक्कम्मि वि' इति गाथासप्त०, 'विजनेऽपि' इति च्छाया च । अथ च तत्र 'पइरिकशब्दोऽतिरिक्ते पइरिक्केति विजने देशीति केचित् । तदा 'पइरिक्कम्मि वि' इति पाठः । विजनेऽपीत्यर्थः' इति कुलनालदेवः. ११. 'पक्कुणन्ती' क. १२. 'निर्विण्णमाना' क.ख. १३. 'दिठम्मि' क. १४. 'कंसो' क., 'कन्तो' ख.

[यदा प्रियो न दृश्यते भणत हला कस्य क्रियते मानः।
अथ दृष्टेऽपि मानस्तत्तस्य प्रियत्वं कुतः ॥]

श्लाघनीयमाना ललिता यथा—

'हसिएहिँ उवालंभा अच्चुवआरेहिँ[1] रूसिअव्वाइं।
अंसूहिँ[2] भंडणाहिं[3] एसो मग्गो सुमहिलाणं[4] ॥ ३९१ ॥'

[हसितैरुपालम्भा अत्युपचारै रूषितव्यानि।
अश्रुभिः कलहा एष मार्गः सुमहिलानाम् ॥]

अनियतानेकोपभोग्या सामान्या यथा—

'कडुए[5] धूमंधारे[6] अब्भुत्तणमग्गिणो[7] समप्पिहिइ[8]।
मुहकमलचुंबणलेहलम्मि पासट्ठिए[9] दिअरे ॥ ३९२ ॥'

[कटुके धूमान्धकारेऽभ्युत्तेजनमग्नेः समाप्स्यते।
मुखकमलचुम्बनाभिलाषिणि पार्श्वस्थिते देवरे ॥]

पत्यन्तरं प्राप्ता पुनर्भूर्यथा—

'मयेन निर्मितां लब्ध्वा[10] लङ्कां मन्दोदरीमपि।
रेमे मूर्तो दशग्रीवलक्ष्मीमिव विभीषणः ॥ ३९३ ॥'

आत्मच्छन्दा स्वैरिणी यथा—

'तह सा जाणइ पावा[11] लोए पच्छण्णम[12]विणअं काउम्[13]।
जह पढमं चिअ सच्चिअ[14] लिक्खइ[15] मज्झे चरित्तवंतीण ॥३९४॥'

---

१. 'अच्छवआरेहि' ख. २. 'असूइ' ख. ३. 'भण्डाइ' क. ४. 'मण्णे' क. ५. 'कडूए' क., 'कडए' ख. ६. 'धूमद्धारे' क., 'धूमधारे' ख. ७. 'अद्धुत्तणमग्गिणो' क., 'अब्भुत्तणमागाणो' ख. ८. 'समप्पहिइ' घ. ९. 'आसत्थिए' क.ख. १०. पद्यमेतत् क. नास्ति। अथ च 'तह सा जाणइ' इत्यादिगाथात्रोदाहरणत्वेन वर्तते 'आत्मच्छन्दा स्वैरिणी यथा' इत्येतदीयावतरणिकापि नास्त्येव. 'लङ्कां लब्ध्वा' ख. ११. 'जारा' ख. १२. 'पच्छण्णाम्' ख. १३. 'कारम्' ख. १४. 'सच्चिअ' ख. नास्ति, १५. 'लिइ' क.

[तथा सा जानाति पापा लोके प्रच्छन्नमविनयं कर्तुम् ।
यथा प्रथममेव सैव लेख्यते मध्ये चरित्रवतीनाम् ॥]

कलाचतुःषष्टिविद् गणिका यथा—

'सच्छन्दरमणदंसणरसवड्ढिअगरुअवम्महविलासं ।
सुविअड्ढवेसवणिआरमिअं को वण्णिउं तरइ ॥ २९५ ॥'

[स्वच्छन्दरमणदर्शनरसवर्धितगुरुकमन्मथविलासम् ।
सुविदग्धवेषवनितारमितं को वर्णितुं शक्नोति ॥]

रूपयौवनमात्रोपजीविनी रूपाजीवा यथा—

'अयमेव दह्यमानस्मरनिर्गतधूमवर्तिकाकारः ।
चिकुरभरस्तव सुन्दरि कामिजनं किंकरीकुरुते ॥ २९६ ॥'

कुट्टमितादीनां कर्त्री विलासिनी यथा—

'सामण्णसुन्दरीणं विब्भममावहइ अविणओ च्चेअ ।
धूम च्चिअ पज्जलिआणं बहु मओ सुरहिदारूण ॥ २९७ ॥'

[सामान्यसुन्दरीणां विभ्रममावहत्यविनय एव ।
धूम एव प्रज्वालितानां बहु मतः सुरभिदारूणाम् ॥]

यथोक्तलक्षणासु खण्डिता यथा—

'पच्चूसागअणुरत्तदेह तइलोअलोअणाणन्द ।
अण्णत्थखविअसव्वरिअ णहभूसण दिणवई णमो दे ॥२९८॥'

---

१. 'चरित्तवतीण' क., 'चरित्तवतीण' ख. २. 'सुविअड्ढसवेवित' क., 'सुविअड्ढवेसवाणि' ख. ३. 'पच्चूसागअ रंजितदेह पिआलोअ लोअणाणंद' इति गाथासप्त० 'प्रत्यूषागत रञ्जितदेह प्रियालोक लोचनानन्द' इति च्छाया च । अथ 'प्रत्यूषागतो द्वीपान्तरात्, पक्षे महिलान्तरावसथात् । अनुरक्तदेहः स्वभावतः, पक्षे तदङ्गसंगतकुङ्कुमादिना । त्रैलोक्यलोचनानन्द, अथ च स्त्रीलोकलोचनानन्द । अन्यत्र द्वीपान्तरे, पक्षे नायिकान्तरगृहे क्षपितशर्वरीक । नभोभूषण, पक्षे परस्त्रीदत्तनखभूषण । भास्वानिव दूरादेवाभिवन्दनीयस्त्वं न त्वभिगम्य इति टीकानिर्गलितार्थः । 'पच्चसागअणुरत्ताअवसं तइलोअलोअणाणन्देम्' क., 'पच्चसागअणुरत्ताअवसं तइलोअलोअणाणन्द' ख. ४. 'वइ' ख.

[प्रत्यूषागतानुरक्तदेह त्रैलोक्यलोचनानन्द ।
अन्यत्रक्षपितशर्वरीक नभोभूषण दिनपते नमस्ते ॥]

कलहान्तरिता यथा—

'अह सो विलक्खहिअओ मए अहब्वाइ अगणिअप्पणओ ।
परवज्जणच्चिरीहिँ तुम्हेहिँ उवेक्खिओ जं(जें)तो ॥ ३९९ ॥'

[अथ स विलक्षहृदयो मया भव्ययागणितप्रणयः ।
परवाद्यनर्तनशीलाभिर्युष्माभिरुपेक्षितो गच्छन् ॥]

विप्रलब्धा यथा—

'अह सा तहिं तहिं विअ वाणीरवणम्मि चुक्कसंकेआ ।
तुह दंसणं विमग्गइ पब्भट्ठणिहाणठाणं व ॥ ४०० ॥'

[अथ सा तत्र तत्रैव वानीरवने विस्मृतसंकेता ।
तव दर्शनं विमार्गति प्रभ्रष्टनिधानस्थानमिव ॥]

वासकसज्जा यथा—

'एहिइ पिओ त्ति णिमिसं व जग्गिअं जामिणीअ पढमद्धं ।
सेसं संतावपरव्वसाए वरिसं व वोलीणम् ॥ ४०१ ॥'

[एष्यति प्रिय इति निमिषमिव जागृतं यामिन्याः प्रथमार्धम् ।
शेषं संतापपरवशया वर्षमिव व्यतिक्रान्तम् ॥]

स्वाधीनपतिका यथा—

'सालोए च्चिअ सूरे घरिणी घरसामिअस्स घेत्तूण ।
णेच्छंतस्स वि पाए धुअइ हसंती हसंतस्स ॥ ४०२ ॥'

---

१. 'अइब्वाएँ अगहिआणुणओ' गाथासप्त० 'अभव्यया अगृहीतानुनयः' इति च्छाया च, 'अहवाइ' ग.घ. २. 'णेंतो' इति गाथासप्त० 'निर्यन्' इति च्छाया च, 'जन्तो' क., 'जेतो' ख. ३. 'च्चिअ' क.ग.घ., 'विअ' ख., 'ञ्चिअ' इति गाथासप्त०. ४. 'चुक्कसंकेओ' क. ५. 'विअग्गइ' क., 'विमागइ' ख. ६. 'निहणठाणव' क., 'निहाणठाणाव्व' ख. ७. 'ञ्चिअ' इति गाथासप्त०. ८. 'धुअइ' क. ख.

[सालोक एव सूर्ये गृहिणी गृहस्वामिनो गृहीत्वा ।
नेच्छतोऽपि पादौ धावति हसन्ती हसतः ॥]

अभिसारिका यथा—

'गम्मिहिसि तस्स[1] पासं मा जूरसु[2] तरुणि वड्ढउ[3] मिअंको ।
दुद्धे[4] दुद्धम्मिवँ चंदिआए[6] को पेच्छइ[7] मुहं दे ॥ ४०३ ॥'

[गमिष्यसि तस्य पार्श्वं मा खिद्यस्व तरुणि वर्धतां मृगाङ्कः ।
दुग्धे दुग्धमिव चन्द्रिकायां कः प्रेक्षते मुखं ते ॥]

प्रोषितभर्तृका यथा—

'गिम्हे दवग्गि[8]मसिमइलिआइँ दीसंति विंझ[9]सिहराइं ।
आसससु[10] पउत्थवइए ण होंति णवपाउसब्भाइं ॥ ४०४ ॥'

[ग्रीष्मे दावाग्निमषीमलिनितानि दृश्यन्ते विन्ध्यशिखराणि ।
आश्वसिहि प्रोषितपतिके न भवन्ति नवप्रावृडभ्राणि ॥]

विरहोत्कण्ठिता यथा—

'अस्मिन् वर्षमहे न वर्तत इदं यत्कामदेवोत्सवे
स्थेयं पुत्रि निरन्नया तदधुना किंचिन्मुखे दीयताम् ।
इत्युक्ते जरतीजनेन कथमप्यध्वन्यवध्वा ततः
पर्यस्तेऽहनि कल्पितश्च कवलो धौतश्च धाराश्रुभिः[11] ॥ ४०५ ॥'

---

१. 'गम्महिसि' क., 'रम्मिहिसि तस्स ण संमार सूरसु' ख. २. 'दूरसु' क., सुन्दरि मा तुरअ' गाथासप्त०, 'सुन्दरिमा त्वरस्व' इति च च्छाया. ३. 'वड्ढउ' ख. ४. 'उले दुद्धम्मि वह' ख. ५. 'मिअ' इति गाथासप्त०. ६. 'चन्दिआइ' गाथासप्त०. ७. 'पेच्छाइ' क. ८. 'दवग्ग' ग.घ. ९. 'विज्झ' गाथासप्त०. १०. 'आसउ' क.ख. ११. 'धाराम्बुभिः' क.ख.

हीनपात्रेषु शकारो यथा—

'पलिच्च[1] ले लंबदशाकलाअं[2] पावालअं शुत्तशदेण[3] छत्तं[4] ।
मंशं च खादुं[5] तुह ओट्ठकाहिँ[6] चुकुश्चकुश्चुक्कुचुकुश्चुकुंति[7] ॥४०६॥'

[प्रतीच्छ रे लम्बदशाकलापं प्रावारकं सूत्रशतेन छन्नम् ।
मांसं च खादितुं तव ओष्ठकाभ्यां चुकुश्चुकुश्चुक्कुचुकुश्चुकुंति ॥]

ल्लको यथा—

'कंबलिवालिए[8] कंत्ति[9] कुडम्मलं-[10]
दन्ति थिद्धिलुद्धिए[11] मइवेआलसि ।
लत्तिसोवरि जंग्गिरि[12] तुमं
साहिँ खराविदुपोप्फलि[13] ण लेक्कीसि[14] ण आगसि ॥४०७॥'

[.........................................।
.........................................॥]

अमात्यादिरादिरासनार्हः पाषण्डादिर्वा पीठमर्दः । तयोरमात्येषु माल्यवान् यथा—

'हा वत्साः खरदूषणत्रिशिरसो वध्याः स्थ पापस्य मे
हा हा वत्स विभीषण त्वमपि मे कार्येण हेयः स्थितः[15] ।

---

१. 'जदिच्छसे' इति Bombay Sanskrit Series मुद्रिते मृच्छकटिके। 'पलिश्च ले' ग., 'पलिश्च ले' ख. २. 'लम्बदशाविशालं' इति मुद्रिते मृच्छकटिके. ३. 'शुत्तशदेहिं' इति मुद्रिते मृच्छकटिके. ४. 'जुत्तं' इति मुद्रिते मृच्छकटिके, 'छत्रम्' क.ख. ५. 'खादुं' इति मुद्रिते मृच्छकटिके ख. ६. 'तह तुट्टि कादुं' इति मुद्रिते मृच्छकटिके, 'तुह तुट्टि कादुं' ख. ७.'चुहू चुहू चुक्कु चुहू चुहूत्ति' इति मुद्रिते मृच्छकटिके. ८. 'कंबलिवाणिणए' क., 'कंबलवाणिए' ख., 'कंबलवालिए' घ. ९. 'कत्ति' क.ख. १०. 'कुड्डंमलदन्ति' क.ख. ११. 'तुद्धिए' क.ख. १२. 'जग्गिरिक्क' क.ख. १३. 'पुप्फलि' ख. १४. 'लोकी' क.ख. १५. 'स्थितेः' इति मुद्रिते महावीरचरिते.

हा मद्वत्सल वत्स रावण महत्पश्यामि ते संकटं
वत्से कैकसि हा हतासि ने चिरं त्रीन्पुत्रकान्द्रक्ष्यसि ४०८'

पाषण्डेषु भैरवानन्दो यथा—

'दंसेमि तं पि ससिणं वसुहावइण्णं
थम्भेमि तस्स वि रइस्स रहं णहद्धे ।
आणेमि जक्खसुरसिद्धगणंगणाओ
तं णत्थि भूमिवलए मह जं ण संजझम् ॥ ४०९ ॥'

[दर्शयामि तमपि शशिनं वसुधावतीर्णं स्तम्भामि तस्यापि रवे रथं नभोऽर्धे ।
आनयामि यक्षसुरसिद्धगणाङ्गनास्तन्नास्ति भूमिवलये मम यन्न साध्यम् ॥]

**वैहासिकः क्रीडनको विश्वास्यश्च विदूषकः ।**

यथा—

'फुल्लुक्करं कलमकूरसमं वहंति
जे सिंदुवारविडवा मह वल्लहा दे ।
जे गालिदस्स महिसीदहिणो सरिच्छा
रुचंति मुद्धविअइल्लपसूणपुंजा ॥ ४१० ॥'

[पुष्पोत्करं कलमभक्तसमं वहन्ति ये सिन्दुवारविटपा मम वल्लभास्ते ।
ये गालितस्य महिषीदध्नः सदृक्षा रोचन्ते मुग्धविचकिलप्रसूनपुञ्जाः ॥]

**मान्यः कलत्रवान्भुक्तविभवो गुणवान्विटः ॥ १७० ॥**

---

१. 'नैकशि' क., 'नैकषि' ग., 'नैकपि' घ. २. 'न चिरात्' इति मुद्रिते वीरचरिते. ३. 'दसिणं' ख. ४. 'वसुहावइंणं' ख. ५. 'रवस्स गई' क.ख., 'रविस्स रहं' इति च काव्यमालामुद्रितकर्पूरमञ्जर्याम्. ६. 'भूमिवलये' क. ७. 'सज्जम्' क.ख. मुदितकर्पूरमञ्जर्यां च. ८. 'दे किं च' Harvard Oriental Series मुद्रितायां कर्पूरमञ्जर्याम्, काव्यमालामुद्रितायां च.

स यथा—

'शकार किं प्रार्थनया प्रावारेणामिषेण वा।
अकार्यवर्जं मे ब्रूहि किमभीष्टं करोमि ते ॥ ४११ ॥'

धात्रेयकादिश्चेटो यथा—

'चन्द्रापीडोऽथ संजातपीडः कादम्बरीं प्रति।
प्राहिणोत्स्रस्तकेयूरः केयूरकमुपस्थितम् ॥ ४१२ ॥'

पताकासु—

**स्वात्मोपयोगिन्यन्योपयोगिन्यनुपयोगिनी।**
**पताकेत्यापताकेति प्रकरीति प्रकीर्त्यते ॥ १७१ ॥**

तासु पताका हनूमान् यथा—

'दिष्ट्या सोऽयं महाबाहुरञ्जनानन्दवर्धनः।
यस्य वीर्येण कृतिनो वयं च भुवनानि च ॥ ४१३ ॥'

आपताकाप्रकर्यौ मारीचजटायुषौ यथा—

'रक्षसा मृगरूपेण वञ्चयित्वा स राघवौ।
जहार सीतां पक्षीन्द्रप्रयासक्षणविघ्नितः ॥ ४१४ ॥'

**सहजा पूर्वजागन्तुः सखीह त्रिविधोच्यते।**

तासु लवङ्गिकादिः सहजा यथा—

'उज्ज्वलालोकया स्निग्धा त्वया त्यक्ता न राजते।
मलीमसमुखी वर्तिः प्रदीपशिखया यथा ॥ ४१५ ॥'

कामन्दक्यादिः पूर्वजा यथा—

'तथा विनयनम्रापि मया मालत्युपायतः।
नीता कतिपयाहोभिः सखी विस्रम्भसेव्यताम् ॥ ४१६ ॥'

---

१. 'प्रावारेण मिषेण वा' क., 'प्रावारेणामिषेण वा' घ. २. 'आकार्यवर्जं' ग. ३. 'करोति' ग. ४. 'यथा' ख. ५. 'कतिपयाहेन' Dr. R. G. Bhandarkar मुद्रिते मालतीमाधवे.

त्रिजटादिरागन्तुर्यथा—

'जाणइ सिणेहभणिअं मा रअणिअरित्ति मे जुउच्छसु वअणम् ।
उज्जाणम्मि वेणम्मि अ जं सुरहिं तं लआण घेप्पइ कुसुमं ४१७'

[जानकि स्नेहभणितं मा रजनीचरीति मे जुगुप्सस्व वचनम् ।
उद्याने वने च यत्सुरभि तल्लतानां गृह्यते कुसुमम् ॥]

नायकगुणेषु महाकुलीनत्वं पुंसो यथा—

'वासिष्ठैः सुकृतोद्भवोऽध्वरशतैरस्त्यग्निकुण्डोद्भवो
भूपालः परमार इत्यधिपतिः सप्ताब्धिकाञ्चेर्भुवः ।
अद्याप्यद्भुतहर्षगद्गदगिरो गायन्ति यस्योद्भटं
विश्वामित्रजयोर्जितस्य भुजयोर्विस्फूर्जितं गुर्जराः ॥ ४१८ ॥'

औदार्यं यथा—

'दिङ्मातङ्गघटाविभक्तचतुराघाटा मही साध्यते
सिद्धा सापि वदन्त एव हि वयं रोमाञ्चिताः पश्यत ।
विप्राय प्रतिपाद्यते किमपरं रामाय तस्मै नमो
यस्मादाविरभूत्कथाद्भुतमिदं यत्रैव चास्तं गतम् ॥ ४१९ ॥'

महाभाग्यं यथा—

'दोर्निष्पेषविशीर्णवज्रशकलप्रत्युप्तरूढव्रण-
ग्रन्थ्युद्भासिनि भग्नमोघमघवन्मातङ्गदन्तोद्यमे ।
भर्तुर्नन्दनदेवताविरचितस्रग्दाम्नि भूमेः सुता
वीरश्रीरिव तस्य वक्षसि जगद्वीरस्य विश्राम्यतु ॥ ४२० ॥'

---

१. 'जउछसे' घ. २. 'वणिम्मि' क. ३. 'गेण्हइ' काव्यमालामुद्रिते सेतुबन्धे. ४. 'गूर्जराः' ग.घ. ५. 'साध' ग.घ. ६. 'यत्रैव' क. ७. 'द्राङ्' मुद्रिते महावीरचरिते.

कृतज्ञता यथा—

'कृतककुपितैर्बाष्पाम्भोभिः सदैन्यविलोकितै-
र्वनमसि गता यस्य प्रीत्या धृतापि तथाम्बया।
नवजलधरश्यामाः पश्यन्दिशो भवतीं विना
कठिनहृदयो जीवत्येव प्रिये स तव प्रियः॥ ४२१॥'

रूपसंपद् यथा—

'व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः।
आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः॥ ४२२॥'

यौवनसंपद् यथा—

'महोक्षतां वत्सतरः स्पृशन्निव द्विपेन्द्रभावं कलभः श्रयन्निव।
रघुः क्रमाद्यौवनभिन्नशैशवः पुपोष गम्भीरमनोहरं वपुः॥४२३॥'

वैदग्ध्यसंपद् यथा—

'कोऽयं भामिनि भूषणं कितव ते शोणः कथं कुङ्कुमा-
त्कूर्पासान्तरितः प्रिये विनिमयः पश्यापरं क्वास्ति मे।
पश्यामीत्यभिधाय सान्द्रपुलकौ मृद्नन्मृडान्याः स्तनौ
हस्तेन प्रतिनिर्जितेन्दुरवताद्द्यूते हसन्वो हरः॥ ४२४॥'

शीलसंपद् यथा—

'का त्वं शुभे कस्य परिग्रहो वा किं वा मदभ्यागमकारणं ते।
आचक्ष्व मत्वा वशिनां रघूणां मनः परस्त्रीविमुखप्रवृत्ति॥४२५॥'

सौभाग्यसंपद् यथा—

'असौ विद्याधारः शिशुरपि विनिर्गत्य भवना-
दिहायातः संप्रत्यविकलशरच्चन्द्रमधुरः।

१. 'इवास्थितः' ग. २. 'क्वास्ति' ख.

यदालोकस्थाने भवति पुरमुन्मादतरलैः
कटाक्षैर्नारीणां कुवलयितवातायनमिव ॥ ४२६ ॥'

मानिता यथा—

'यदात्थ कामं भवता स याच्यता-
मिति क्षमं नैतदनल्पचेतसाम् ।
कथं प्रसह्याहरणैषिणां प्रियाः
परानुवृत्त्या मलिनीकृताः श्रियः ॥ ४२७ ॥'

उदारवाक्यत्वं यथा—

'ख्याता एव वयं जगत्सु चरितैर्वाग्भिः किमाख्यायते
संयत्तो भव शक्तिरस्ति भवतः सत्यं मनुष्यो भवान् ।
शस्त्रैरव्यवधीयमानयशसः प्रायो वयं तेषु चे-
ष्टाहुस्ते ननु सन्ति तेऽपि गिरयो यैर्वानराः शस्त्रिणः ॥४२८'

स्थिरानुरागिता यथा—

'ततः कैरप्युक्ते परिणयविधौ काष्ठमुनिभिः
पुराणैरातङ्कग्लपितहृदयेन क्षितिभृता ।
विना वाचं नैतत्क्षममिति निधायाननमधः
पतद्बाष्पाम्भोभिर्निखिलमिव दत्तं प्रतिवचः ॥ ४२९ ॥'

नायिकागुणेषु स्त्रिया महाकुलिनता यथा—

'मानुषीषु कथं वा स्यादस्य रूपस्य संभवः ।
न प्रभातरलं ज्योतिरुदेति वसुधातलात् ॥ ४३० ॥'

---

१. 'परानवला' श्रीमत्पितृचरणसंपादिते किरातार्जुनीये. २. 'ख्याता' मुद्रिते महावीरचरिते. ३. 'सत्यमस्ति' मुद्रिते वीरचरिते. ४. 'विजयाः' मुद्रिते वीरचरिते. ५. 'ग्राहस्ते मुखमाश्वसन्ति' मुद्रिते वीरचरिते. ६. 'क्षपयति' ख. ७. 'मानुषीभ्यः' ख.

औदार्यं यथा—

'भ्रूभेदे सहसोद्गतेऽपि वदनं नीतं परां नम्रता-
मीषन्मां प्रति भेदकारि हसितं नोक्तं वचो निष्ठुरम्।
अन्तर्बाष्पजलीकृतं प्रभुतया चक्षुर्न विस्फारितं
कोपश्च प्रकटीकृतो दयितया मुक्तश्च न प्रत्ययः ॥ ४३१ ॥'

महाभाग्यं यथा—

'तां नारदः कामचरः कदाचित्कन्यां किल प्रेक्ष्य पितुः समीपे।
समादिदेशैकवधूं भवित्रीं प्रेम्णा शरीरार्धहरां हरस्य ॥ ४३२ ॥'

कृतज्ञता यथा—

'पुरिससरिसं तुह इमं रक्खससरिसं कअं णिसाअरवइणा।
कह ता चिंतिज्जंतं महिलासरिसं ण संपडइ मे मरणं ॥ ४३३॥'

[पुरुषसदृशं तवेदं राक्षससदृशं कृतं निशाचरपतिना।
कथं तावच्चिन्तितसुलभं महिलासदृशं न संपद्यते मे मरणम् ॥]

रूपसंपद् यथा—

'आभरणस्याभरणं प्रसाधनविधेः प्रसाधनविशेषः।
उपमानस्यापि सखे प्रत्युपमानं वपुस्तस्याः ॥ ४३४ ॥'

यौवनसंपद् यथा—

'उन्मीलितं तूलिकयेव चित्रं सूर्यांशुभिर्भिन्नमिवारविन्दम्।
बभूव तस्याश्चतुरस्रशोभि वपुर्विभक्तं नवयौवनेन ॥ ४३५ ॥'

वैदग्ध्यसंपद् यथा—

'एकत्रासनसंस्थितिः परिहृता प्रत्युद्गमाद्दूरत-
स्ताम्बूलानयनच्छलेन रभसाश्लेषोऽपि संविघ्नितः।

१. 'भ्रभङ्गे' मुद्रितरत्नावल्याम्. २. 'सहसा कृतेऽपि' क. ३. 'अन्तर्बाष्पजडीकृतं' ख., मुद्रितरत्नावल्यां च. ४. 'प्रत्ययः' ख. ५. 'किअं' घ. ६. 'आचिन्तिज्जं' क.ख. ७. 'चिन्तिअसुलहं' इति काव्यमालमुद्रिते सेतुबन्धे. ८. 'ताम्बूलाहरणच्छलेन' ख., काव्यमालामुद्रितेऽमरुशतके च.

आलापोऽपि न मिश्रितः परिजनं व्यापारयन्त्यान्तिके
कान्तं प्रत्युपचारतश्चतुरया कोपः कृतार्थीकृतः ॥ ४३६ ॥'

शीलसम्पद् यथा—

'चत्तरघरिणी पिअदंसणा अ बाला पउत्थवइआ अ ।
असई सेअज्झिआ दुग्गआ अ ण हु खंडिअं सीलम् ॥४३७॥'

[चत्वरगृहिणी प्रियदर्शना च बाला प्रोषितपतिका च ।
असती प्रतिवेशिनी दुर्गता च न खलु खण्डितं शीलम् ॥]

सौभाग्यसम्पद् यथा—

'संचारिणी दीपशिखेव रात्रौ
यं यं व्यतीयाय पतिंवरा सा ।
नरेन्द्रमार्गाट्ट इव प्रपेदे
विवर्णभावं स स भूमिपालः ॥ ४३८ ॥'

मानिता यथा—

'शैलात्मजापि पितुरुच्छिरसोऽभिलाषं
व्यर्थं समर्थ्य ललितं वपुरात्मनश्च ।
सख्योः समक्षमिति चाधिकजातलज्जा
शून्या जगाम भवनाभिमुखं कथंचित् ॥ ४३९ ॥'

उदारवाक्यत्वं यथा—

'यथा श्रुतं वेदविदां वर त्वया
जनोऽयमुच्चैःपदलङ्घनोत्सुकः ।

---

१. 'प्रत्युपकारतः' ख. २. 'चतुरघरिणी' क.ख., 'चत्वरघरिणी' ग., 'चत्वरघरंणी' घ., 'चत्तरघरिणी' च गाथासप्त०. ३. 'तरुणी' गाथासप्त०. ४. 'पउत्थपइआ' गाथासप्त०. ५. 'असइसअणभा' क., 'असर(इ)सअज्जिआ' ख., 'असईसपज्जिआ' गाथासप्त०.

तपः किलेदं तदवाप्तिसाधनं
मनोरथानामगतिर्न विद्यते ॥ ४४० ॥'

स्थिरानुरागिता यथा—

'अलं विवादेन यथा श्रुतं त्वया[1]
तथाविधस्तावदशेषमस्तु सः ।
ममात्र भावैकरसं मनः स्थितं
न कामवृत्तिर्वचनीयमीक्षते ॥ ४४१ ॥'

पाकभक्तिषु आदावस्वादु, अन्ते स्वादु मृद्वीकापाकं यथा—

'प्राकामं दहता कृतः परिभवो येनाथ संध्यानतौ[2]
सेर्ष्या वोऽवतु चण्डिका चरणयोस्तं पातयन्ती पतिम् ।
कुर्वन्त्याभ्यधिकं[3] कृते प्रतिकृतं मुक्तेन मौलौ मुहु-
र्बाष्पेणाहृतकज्जलेन[4] लिखितं लक्ष्मेव चन्द्रे यथा ॥४४२'॥

आद्यन्तयोः स्वादु नारिकेलीपाकं[5] यथा—

'जह इच्छा तह रमिअं जाआ पत्ता पइं[6] गआ धूआ ।
घरसामिअस्स[7] अज्ज वि सकोउहल्लाइँ[8] अच्छीइं ॥ ४४३ ॥'
[यथेच्छा तथा रमितं जाया प्राप्ता पतिं गता दुहिता ।
गृहस्वामिनोऽद्यापि सकौतूहलान्यक्षीणि ॥]

आदिमध्यान्तेषु स्वादु स्वादुतरं स्वादुतममित्याम्रपाकं यथा—

'शापादसि प्रतिहता स्मृतिलोपरूक्षे[9]
भर्तर्यपेततमसि[10] प्रभुता तवैव ।

---

१. 'श्रुतस्त्वया' इति मुद्रिते कुमारसंभवे. २. 'संध्यानतः' ख. ३. 'कुर्वन्त्यभ्यधिकं' ख. ४. 'बाष्पेणाहृतकज्जलेन' इति. ५. 'नारिकेलीरीतिपाको' क., 'नारिकेलीपाकं' ख. ६. 'पदं' ख. ७. 'घरसामिअस्स अस्स' ख. ८. 'सोकोऊहच्छाइ अइम्' क., 'सोकोउहच्छाइ अच्छीइ' ख. ९. 'स्मृतिरोधरूक्षे' इति मुद्रिते शाकुन्तले. १०. 'भर्तुर्व्यपेततमसि' क.

छाया न मूर्च्छति मलोपहतप्रसादे
शुद्धे तु दर्पणतले सुलभावकाशा ॥ ४४४ ॥'

यन्नापैति न चातिशोभते तन्नीलीरागं यथा—

'हित्वा[1] सीतां दशमुखरिपुर्नोपयेमे यदन्यां
तस्या एव प्रतिकृतिसखो यत्क्रतूनाजहार ।
वृत्तान्तेन श्रवणविषयप्रापिणा तेन भर्तुः
सा दुर्वारं[2] व्यथमपि परित्यागदुःखं विषेहे ॥ ४४५ ॥'

यदपैति च[3] शोभते च तत्कुसुम्भरागं यथा—

'वहुवल्लहस्स जा होइ वल्लहा कह वि पंचदिअहाइं ।
सा किं छट्ठं मग्गइ[4] कत्तो मिट्ठं च[5] बहुअं[6] च ॥ ४४६ ॥'

[बहुवल्लभस्य या भवति वल्लभा कथं कथमपि पञ्चदिवसानि ।
सा किं षष्ठं मार्गते कुतो मृष्टं च बहुकं च ॥]

यन्नापैत्यति च[7] शोभते तन्मञ्जिष्ठारागं यथा—

'वेवइ जस्स सविडिअं वलिउं महइ पुलआइअत्थणअलसं ।
पेम्मसहावविमुहिअं बीओवासंगमणूसुअं[8] वामद्धम् ॥ ४४७ ॥'

[वेपते यस्य सव्रीडं वलितुं वाञ्छति पुलकाञ्चितस्तनकलशम् ।
प्रेमस्वभावविमुक्तं द्वितीयपार्श्वगमनोत्सुकं वामार्धम् ॥]

---

१. 'सीतां हित्वा' S. P. Pandit M. A. संपादिते रघुवंशे. २. 'दुर्वारं कथमपि' ख. मुद्रिते रघुवंशे च. ३. 'यदपैति न च शोभते च' क. ४. 'मग्गई' गाथासप्त०. ५. 'मिट्ठं अ' इति गाथासप्त०. ६. 'बहुअअ' इति गाथासप्त०. ७. 'यन्नापैति अपि च शोभते' ख. ८. 'बीआवासगमणूसुअं' इति काव्यमालामुद्रिते सेतुबन्धे, 'द्वितीयावकाशगमनोत्सुकं इति च्छाया च.

गूढव्यलीकमन्तर्व्याजं यथा—

'प्रत्यग्रोज्झितगोकुलस्य शयनादुत्स्वप्नमूढस्य मे
सा गोत्रस्खलनादपैतु च दिवा राधेति भीरोरिति।
रात्रावस्वपतो दिवा च विजने लक्ष्मीति चाभ्यस्यतो
राधां प्रस्मरतः श्रियं रमयतः खेदो हरेः पातु वः ४४८'

अगूढव्यलीकं बहिर्व्याजं यथा—

'चक्षुर्यस्य तवाननादपगतं नाभूत्क्वचिन्निर्वृतं
येनैषा सततं त्वदेकशयनं वक्षःस्थली कल्पिता।
येनोक्तासि विना त्वया मम जगच्छून्यं क्षणाज्जायते
सोऽयं दम्भधृतव्रतः प्रियतमः कर्तुं किमप्युद्यतः ॥४४९॥'

अव्यलीकं निर्व्याजं यथा—

'किं कण्ठे शिथिलीकृतो भुजलतापाशः प्रमादान्मया
निद्राच्छेदविवर्तनेष्वभिमुखी नाद्यापि संभाविता।
अन्यस्त्रीजनसंकथालघुरहं स्वप्ने त्वया लक्षितो
दोषं पश्यसि कं प्रिये परिजनोपालम्भयोग्ये मयि ॥४५०॥'

धर्मानुबन्धि धर्मोदर्कं यथा—

'अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे
नृपतिककुदं दत्वा यूने सितातपवारणम्।
मुनिवनतरुच्छायां देव्या तया सह शिश्रिये
गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतम् ॥ ४५१ ॥'

---

१. 'नामेति चाभ्यस्यता राधां०' क. २. 'किमभ्युद्यतः' क.ख., ३. 'अव्य॰लीकनिर्व्याजं यथा' क. ४. 'निद्रोच्छेदविवर्तनेषु' क.ख. ५. 'संभाषिता' क.ख. ६. 'वीक्षितो' क.ख. ७. 'किम्' क.ख. ८. 'धर्मोदकं' घ.

अर्थानुबन्धि अर्थोदर्कं यथा—

'भूत्वा चिराय चतुरन्त[1]महीसपत्नी
दौष्यन्ति[2]मप्रतिरथं तनयं [3]प्रसूय ।
भर्त्रा[4] तदर्पितकुटुम्बभरेण सार्धं
शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन् ॥ ४५२ ॥'

यत्पुनः काममेवानुबध्नाति तत्कामोदर्कं यथा—

'अद्वैतं सुखदुःखयोर[5]नुगुणं सर्वास्ववस्थासु य-
द्विश्र[6]म्भो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः ।
कालेनावरणात्ययात्परिणते य[7]त्स्नेह[8]सारे स्थितं
[9]भद्रं तस्य सुमानुषस्य कथमप्येकं हि यत्प्रा[10]र्थ्यते ॥४५३॥'

'नानालंकारसंसृष्टेः [11]प्रकाराश्च रसोक्तयः ।'

इत्युक्तं तत्र 'अलंकारसंसृष्टेः' इतीयत्येव [12]वक्तव्ये नानालंकार[13]ग्रहणं गुणरसानामुपसंग्रहार्थम् । तेषामपि हि काव्यशोभाकरत्वेनालंकारत्वात् ॥ यदाह—

काव्यशोभाकरान्धर्मानलंकारान्प्रचक्षते ।
ते चाद्यापि विकल्प्यन्ते कस्तान्कार्त्स्न्येन वक्ष्यति ॥
काश्चिन्मार्गविभागार्थमुक्ताः प्रागप्यलंक्रियाः ।
साधारणमलंकार[14]जातमन्यत् प्रदर्श्यते ॥

---

१. 'सदिगन्तमहीसपत्नी' ख. २. 'दौष्यन्तिम्' ख. ३. 'निवेश्य' इति मुद्रिते शाकुन्तले. ४. 'तत्संनिवेशितभरेण सहैव भर्त्रा' क.ख. ५. 'अनुगतं' इति मुद्रित उत्तररामचरिते. ६. 'विश्रामो' क.ख. मुद्रित उत्तररामचरिते च. ७. 'परिणतेर्यत्' ख.ग. ८. 'प्रेमसारे' इति मुद्रित उत्तररामचरिते. ९. 'भद्रे' घ. 'भद्र' (द्रे वा द्रं?) ग. १०. 'तत्प्रार्थ्यते' क., मुद्रित उत्तररामचरिते च । 'यत्प्रार्थ्यते' ख. ११. 'प्रकाराश्च' घ. १२. 'इत्येव' क.ख. १३. 'नानालङ्कारग्रहणं' ख. १४. 'अलङ्कारं जातमन्यत्' ख.

तत्र 'काव्यशोभाकरान्' इत्यनेन श्लेषोपमादिवद्गुणरसभावतदाभासप्रशमादीनप्युपगृह्णाति । मार्गविभागकृद्गुणानामलंक्रियोपदेशेन श्लेषादीनां गुणत्वमिवालंकारत्वमपि ज्ञापयति—

श्लेषः प्रसादः समता माधुर्यं सुकुमारता ।
अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः ॥
इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृताः ।
तेषां विपर्ययः प्रायो लक्ष्यते गौडवर्त्मनि ॥

इति श्लेषादीनां दशानामेव मार्गप्रविभागकारितां ब्रुवन्काव्यशोभाकरत्वेन गुणान्तराणामप्यलंकारत्वमुपकल्पयति ॥ तदाह, 'कस्तान्कारत्स्न्येंन वक्ष्यति' । युक्तमिदमुक्तम् । अयुक्तं त्विदमुक्तं रसानामलंकारतेति ॥

तेषां गुणानामिवालंकारव्यपदेशाभावात् । नायुक्तम् । युक्तोत्कर्षाणामूर्जस्विरसवत्प्रेयसामलंकारेषूपदेशात् । तद् यथा—

**प्रेयः प्रियतराख्यानं रसवद् रसपेशलम् ।**
**ऊर्जस्वि रूढाहंकारं युक्तोत्कर्षं च तत्रयम् ॥ १७२ ॥**

तत्रोर्जस्वि रूढाहंकारमित्यनेन आत्मविशेषनिष्ठस्योत्कृष्टादृष्टजन्मनोऽनेकजन्मानुभवसंस्काराहितद्रढिम्नः संग्रामे गुणसंपदुत्पादातिशयहेतोरलंकारविशेषस्योपसंग्रहादहंकाराभिमानशृङ्गारापरनाम्नो रसस्य मानमयविकाररूपेणाभिमानिनां मनसि जाग्रतः परां कोटिमुपवर्णयति । रस-

१. 'प्रसादादीन्' ख. २. 'अनुगृह्णाति' क. ३. 'गौडवर्त्मनि लक्ष्यते' क. ४. 'मार्गप्रतिभाकारितां' क. ५. 'इति' इत्यधिकं क. ६. 'उक्तोत्कर्षाणाम्' ख. ७. 'प्रेयानामुपदेशेन' क. ८. 'उत्कृष्टजन्मनो' ख. ९. 'संस्कारा हि तद्द्रढिम्नः' ख. १०. 'संग्रामेण सम्पदुत्पादातिशयहेतोः' क. ११. 'अलंकारविशेषस्य' इत्यस्य स्थाने 'विशेषस्य' ख.

चद्रसपेशलमित्यनेन विभावानुभावव्यभिचारिसात्त्विकसंयोगाद्रसनिष्पत्तिरिति रत्यादिरूपेणानेकधाविर्भवतो[1]ऽभिवर्धमानस्य परप्रकर्षगामिनः शृङ्गारस्य [2]मध्यावस्थां सूचयति । प्रेयः [3]प्रियतराख्यानमित्यनेन समस्तभावमूर्धाभिषिक्ताया रतेः परप्रकर्षा[4]धिगमाद् भावना[5]धिगमे भावरूपतामुल्लङ्घ्य प्रेमरूपेण परिण[6]ताया उपादानाद् भावान्तराणामपि परप्रकर्षाधिगमे रसरूपेण परिणतिरिति ज्ञापयन्नहं[7]कारस्योत्तरां कोटिमुपलक्षयति । सर्वेषामपि हि रत्यादिप्रकर्षाणां रतिप्रियो रणप्रियः परिहासप्रियोऽमर्षप्रिय इति [8]प्रेम्ण्येव पर्यवसानं भवति । युक्तोत्कर्षं च तत् त्रयमित्यनेनायुक्तोत्कर्षाणां त्रयाणामप्यूर्जस्विप्रभृतीनां गुणत्वमेव नालंकारत्वमित्यवस्थापयति । तथा हि—और्जित्यं [9]भाविकत्वं प्रेय इति [10]गुणेषूपदिश्यते, कुतः पुनरिदमेकदोर्जस्वि—रसवत्—प्रेयसामलंकारत्वमन्य[11]दा गुणत्वम् । उच्यते—

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने ।
संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः ॥

यथा गोमान् देशः, वाचालो बटुः, वाग्मी विपश्चित्, क्षीरिणो [12]वृक्षाः, बलवान् [13]मल्लः दण्डी, गोमती [14]शैलेति । तत्रोर्जस्विरसवतोरलंकारत्वविवक्षायामति[15]शायने भूम्नि वा [16]मत्वर्थीयः । गुणत्वविवक्षायां तु

---

१. 'विवर्धमानस्य' ग. २. 'मध्यमावस्थाम्' क.ख. ३. 'प्रे[यः प्रि?]यतराख्यानम्' क.,ख. पुस्तके 'प्रेयः' नास्ति. ४. 'परप्रकर्षाधिगमात्' इत्यस्य स्थाने 'प्रकर्षाधिगमात्' ख. ५. 'भावनाभिगमे' क.ख. ६. 'परिणतायामुपादानात्' क., 'परिणता [या] उपादानात्' ग. ७. 'ज्ञापयन्नलङ्कारस्योत्तरां' ख. ८. 'प्रेमण्येव' क., 'प्रेम्ण एव' ख. ९. भाविकं प्रेय' क.ख. १०. 'गुणेषु भण्यते' क.ख. ११. अन्यदा गुणत्वम्' क. १२. 'फलिनो वृक्षाः' क. १३. 'भन्द्रो' क. १४. 'शोणेति' क. १५. 'अतिशायने वा' क.ख. १६. 'मतुपर्थीयः' क.ख.

प्रशंसानित्ययोरिति योगयोरिति द्रष्टव्यम् । नित्यो हि काव्ये गुणयोग इव रसादियोगः । गुणवतो रसवतश्च निश्चितैवास्य प्रशंसा । संसर्गस्तु गुणानामवश्यमुपादानेषु । निन्दा पुनर्दोषहानेनैवतरति । गुणेषु प्रेयं इति रूपाभेदात् कथमलंकारत्वे तदुत्कर्षप्रतीतिः । यथा 'युधिष्ठिरः श्रेष्ठतमः कुरूणाम्' इति तत्रातिशायिकान्तरेण तदवगतिरिति चेत् इहापि 'युक्तोत्कर्षं च तत्रयम्' इति वाक्यान्तरेण भविष्यति । न चातिशायिका स्वार्थातिरिक्तं किमपि ब्रुवते, अपि तु प्रकृत्युपात्तमेव प्रकर्षादिकं गमयन्ति । स्वार्थिकेषु ह्येते विधीयन्ते । एवमवस्थापिते गुणरसानामलंकारत्वे षट्प्रकारो रसालंकारसंकरः संभवति–गुणसंकरः, अलंकारसंकरः, गुणालंकारसंकरः, रससंकरः, रसगुणसंकरः, रसालंकारसंकरः इति । ननु च गुणानां संकरव्यवहारो नोपपद्यते बहुष्वपि गुणेषु गुणवदित्येव व्यपदेशात् । नैवम् । त्रिविधा गुणाः–शब्दगुणाः, अर्थगुणाः, दोषगुणाश्च । ते तु प्रत्येकं द्विधा–उल्लेखवन्तः, निरुल्लेखाश्च । तत्र शब्दगुणेषु समाधिमाधुर्यौदार्यगाम्भीर्यादयः सोल्लेखाः, श्लेषप्रसादसमतामाधुर्यादयो निरुल्लेखाः । अर्थगुणेषु प्रसादरीतिकान्त्यादयः सोल्लेखाः, अर्थव्यक्तिसौक्ष्म्यगाम्भीर्यसंमितत्वादयो निरुल्लेखाः । दोषगुणेषु ग्राम्यपुनरुक्तापार्थान्यार्थादयः सोल्लेखाः, शब्दहीनसंभ्रमापक्रमविसन्ध्यादयो निरुल्लेखाः । तत्र सजातीयानां सोल्लेखानामेवं, विजातीयानां तु निरुल्लेखानामपि संकरव्यवहारः प्रवर्तते ॥

---

१. 'दोषहानेनं वितरति' क., 'दोषहानेन वितरति' ख. २. 'प्रेम इति' ख. ३. 'तत्रातिशायिगुणान्तरेण' क.ख. ४. 'षट्प्रकारको' क. ५. 'रसालंकारसंकरश्चेति' क.ख. ६. 'नन्वत्र' क.ख. ७. 'सौकुमार्यादयो' क.ख. ८. 'गाम्भीर्यादयो' ख. ९. 'विजातीयानां विजातीयानां तु' घ.

सजातीयानां शब्दगुणेषु समाध्यादीनां यथा—

'णवपल्लवेसु लोलइ घोलइ विडवेसु वलइ सिहरेसु ।
थवइ थवएसु अ तहा वसंतलच्छी असोअस्स ॥ ४५५ ॥'
[नवपल्लवेषु लोलति घूर्णते विटपेषु वलते शिखरेषु ।
स्थगति स्तबकेषु च तथा वसन्तलक्ष्मीरशोकस्य ॥]

अत्रान्यधर्माणामन्यत्रारोपणं समाधिः पृथक्पदता माधुर्यं, बन्धविकटत्वमुदारता, ध्वनिमत्ता गाम्भीर्यमिति सजातीयाः संकीर्यन्ते । यतो वसन्तलक्ष्मीरशोकस्येति पदयोः शब्दध्वनिरपि परिस्फुरति । यथा कस्यचिदशोकस्य मानिनोऽङ्गेषु प्रियाङ्गना सविलासं चेष्टते तथास्येयमिति ॥

अर्थगुणेषु श्लेषादीनां यथा—

'जनः पुण्यैर्यायाज्जलधिजलभावं जलमुच-
स्तथावस्थं चैनं निदधतु शुभैः शुक्तिवदने ।
ततस्तां श्रेयोभिः परिणतिमसौ विन्दतु यया
रुचिं तन्वन्पीनस्तनि हृदि तवायं विलुठति ॥ ४५६ ॥'

अत्र संविधाने सुसूत्रता श्लेषः, अर्थस्य प्राकट्यं प्रसादः, उत्पत्त्यादिक्रियाक्रमो रीतिः, दीप्तरसत्वं कान्तिरित्यर्थगुणाः सजातीयाः संकीर्यन्ते ॥

दोषगुणेषु ग्राम्यादीनां यथा—

'हन्यते सा वरारोहा स्मरेणाकाण्डवैरिणा ।
हन्यते चारुसर्वाङ्गी हन्यते मञ्जुभाषिणी ॥ ४५७ ॥'

अत्र हन्यत इत्यमङ्गलार्थम्, वरारोहेत्यश्लीलार्थम्, हन्यते हन्यत

१. 'विलग्नेषु' क.ख.ग. २. 'मद्या' क. ३. 'बन्धविगूढत्वम्' ख. ४. 'ऽध्वलिमत्ता' घ. ५. 'अन्यार्थगुणेषु' क. ६. 'शुभे' क. ७. 'यथा' क.ख. ८. 'संविधानेषु सूत्रता' ख. ९. 'अमादीनां' क. १०. 'इत्यसङ्गतार्थम्' ख. ११. 'हन्यते' क.ख.

इति पुनरुक्तम्, चारुसर्वाङ्गीत्युक्त्वा[1] वरारोहेति व्यर्थम्, त एते सजातीयाश्चत्वारोऽपि दोषगुणाः संकीर्यमाणाः कस्यचिदुन्मत्तभाषिणोऽनुकम्पाद्यतिशयविवक्षायामभ्यनुज्ञायन्ते ॥ यदाह—

अनुकम्पाद्यतिशयो[2] यदि कश्चिद्विवक्ष्यते[3] ।
न दोषः पुनरुक्तादौ प्रत्युतेयमलंक्रिया ॥

अर्थासंजातीयानां[4] शब्दगुणानामर्थगुणानां च संकरो यथा—

'को नाम नोदयति नास्तमुपैति को वा
लोकोत्तरः पुनरयं सविता जगत्सु ।
यत्रोदयास्तमयभाजि रुचां निधाने
द्वेधा भवत्यहरिति क्षणदेति कालः ॥ ४५८ ॥'

अत्र यावदर्थपदता संमितत्वम्[5], सम्यग्बन्धविकटत्वमुदारता, श्ला[6]घ्यविशेषगुणयोग उदात्तत्वमिति शब्दगुणाः, उक्तार्थनिर्वहणं प्रौढिः, अर्थप्राकट्यं प्रसादः, रूढाहंकारतौर्जित्यमित्यर्थगुणाः संकीर्यन्ते ॥

शब्दगुणानां दोषगुणानां च यथा—

'एह्येहि वत्स रघुनन्दन पूर्णचन्द्र
चुम्बामि मूर्धनि चिरं[7] च परिष्वजे त्वाम् ।
आरोप्य वा हृदि दिवानिशमुद्वहामि
वन्देऽथवा चरणपुष्करकद्वयं ते ॥ ४५९ ॥'

अत्र भावतो वाक्प्रवृत्तिर्भाविकत्वम्[8], प्रसिद्धार्थपदता प्रसादः, प्रियार्थपदोपादानं[9] प्रेय इति शब्दगुणाः, एह्येहीति पुनरुक्तम्, वत्से-

१. 'उक्तौ' क.ख. २. 'अनुकम्पाद्यतिशयं' ख. ३. 'विवक्षते' ख. ४. 'अथ सजातीयाम्' ख.घ. ५. 'ससितत्वम्' ख. ६. 'श्लाघ्यविशेषगुणयोग' इत्यस्य स्थाने 'विशेषगुणयोग' क.ख. ७. 'चिराय' क.ख. मुद्रिते महावीरचरिते च. ८. 'वाक्प्रतिपत्तिः' क. ख. ९. 'प्रियार्थपदोपादानम्' क.ख.

त्युक्त्वा त्वत्पादाब्जद्वयं वन्द इति विरुद्धम्, मूर्ध्नि चुम्बामि हृदि वहामीत्यादौ वन्द इति क्रियास्वनुपयोगात् पूर्णचन्द्रेतिदर्शनादिक्रियोपयोगि व्यर्थं चेति दोषगुणाः संकीर्यन्ते । रसाक्षिप्तचित्तादौ हि पुनरुक्तादयो न दुष्यन्ति ॥

अर्थगुणानां दोषगुणानां यथा—

'किं द्वारि दैवहतिके सहकारकेण
संवर्धितेन विषपादप एष पापः ।
अस्मिन्मनागपि विकासविकारभाजि
भीमा भवन्ति मदनज्वरसंनिपाताः ॥ ४६० ॥'

अत्र दीप्तरसत्वं कान्तिः, अर्थप्राकट्यं प्रसादः, उक्तार्थनिर्वहणं प्रौढिरित्यर्थगुणाः, दैवहतिके विषपादपोऽयं पाप इत्यमङ्गलार्थं ग्राम्यं, किमनेन संवर्धितेनेत्यत्र मदनज्वरसंनिपाता इत्यत्र च कृत्यप्रयोजनादेर्विरहिणो द्रष्टुरित्यादेश्चाध्याहारादसंपूर्णवाक्यतायामर्थव्यक्तिविपर्ययः । अस्मिन्विकासविकारभाजीति विकासशब्दस्य पुष्पविषयत्वाद्वृक्षेऽपि प्रयोगोऽवाचकत्वादसमर्थ इति दोषगुणा मिथः संकीर्यन्ते । यतो रसाक्षेपात्परिहासलेशोक्त्यामङ्गलम्, प्रविश पिण्डीं द्वारं भक्षय इति न्यायात्प्रसिद्धाध्याहारः, 'दरी वदति, मञ्चाः क्रोशन्ती'ति प्रयोगदर्शनादाधाराधेययोरभेदोपचारश्च विरुद्धलक्षणादिभिः प्रयुज्यमानो न दोषायेति ॥

## अथालंकारसंकरः ।

स यद्यपि व्यक्ताव्यक्तोभयात्मतया तिलतण्डुलकादिभेदैः प्रधानाङ्गभावसमकक्षताभ्यां पुरस्तादुक्तः तथापि तेषां गुणादिसंकरासाधारण-

१. 'पूर्णचन्द्रनिदर्शनादि—' ख. २. 'दोषगुणाः परस्परं संकीर्यन्ते' क.ख. ३. 'न' ग. नास्ति.

त्वात्संप्रति साधारणः प्रकार उच्यते। स षोढा शब्दालंकारसंकरः, अर्थालंकारसंकरः, उभयालंकारसंकरः, शब्दार्थालंकारसंकरः, शब्दार्थोभयालंकारसंकरः, अर्थोभयालंकारसंकरश्च। तेषु शब्दालंकारसंकरो यथा—

हंसाली भयतरला सारा सरसा सरासरसारसरासा।
अम्बरमरमारूढा सारासरसा सरासरसारसरासा॥

अत्र संस्कृतप्राकृतभाषासंश्लेषः, गतप्रत्यागतं चित्रं, पदावृत्तियमकं, वर्णानुप्रासश्चेति चत्वारः शब्दालंकाराः संकीर्यन्ते॥

अर्थालंकारसंकरो यथा—

'वासावस्थितताम्रचूडवयसामायामिभिः कूजितै-
र्दूरादप्यनुमीयमानवसतिर्ग्रामोऽयमन्तर्वणम्।
यत्रोद्दीप्तकुकूलकूटविसरज्झम्पाघनं घूर्णते
सन्ध्यान्तोल्लसदच्छभल्लपटलच्छायाजटालं तमः॥ ४६१॥'

अत्र ताम्रचूडवयसां कूजितैरित्यनुमानम्, यत्र तमो घूर्णत इति ज्ञापकहेतुः, कुकूलकूटविसरज्झम्पाघनमिति सन्ध्यान्तोल्लसदच्छभल्लपट-

१. 'शब्दोभयालंकारसंकरः' ख. २. अत्र 'च' इत्यधिकं क.ख. ३. 'हंसानामाली पङ्क्तिः। अम्बरमाकाशमरमत्यन्तमारूढा। किंभूता।' भयेन चञ्चला। पुनः किंभूता। सरसा रससहिता। पुनः किंभूता। सरासाः सशब्दा ये सारसास्तेषां रासः क्रीडा यस्यास्तथा। पुनः किंभूता। आरासे शब्दे यो रसस्तत्सहिता। पुनः किंभूता। सरसं सरः गमनं तेनास्यते क्षिप्यते सरासः। सरसि भवः सारसः। स चासौ स च। एवंविधो रासः क्रीडा यस्यास्तथेति'. घ. पुस्तकस्यायुषि टिप्पणी. ४. 'सरासुभा' क. ५. 'अम्बरमारूढा' क., 'अम्बरसारूढा' ख. ६. 'पादावृत्तियमकम्' क.ख. ७. 'शब्दालंकाराः' क.ख. ८. 'सृगालकूलविसरधूम्यान्धनं' क., 'कुकूलकूटविसरधूम्याघनं' ख.

लच्छायाजटालमिति च कारकहेतुः, जायमानपदार्थस्वरूपाभिधानं जातिरित्यर्थालंकाराश्चत्वारो मिथः संकीर्यन्ते ॥

उभयालंकारसंकरो यथा—

'ण हु णवरं दीवसिहासारिच्छं[1] चंपएहिं[2] पडिवण्णम् ।
कज्जलकज्जं[3] पि कअं उअरि भमन्तेहिँ भमरेहिँ[4] ॥ ४६२ ॥'

[न खलु केवलं दीपशिखासादृश्यं चम्पकैः प्रतिपन्नम् ।
कज्जलकार्यमपि कृतमुपरि भ्रमद्भिर्भ्रमरैः ॥]

अत्र चम्पकादीनां प्रदीपशिखाभिराकारकान्तिभ्यामुपमा[5], विरहिणीहृदयदाहोद्योतनार्थक्रियाभ्यां[6] साम्यं, कज्जलपटलानामिव[7] भ्रमरपटलानामुपरि मेलनान्मेलितं, चम्पकदीपकलिकयोरिव भ्रमरकज्जलपटलयोरौपम्यादिसंबन्धात्समुच्चय इत्युभयालंकाराश्चत्वारो मिथः संकीर्यमाणा[8] उपलभ्यन्ते ॥

शब्दार्थालंकारसंकरो यथा—

'सर्वाशारुधि दग्धवीरुधि[9] सदा[10] सारङ्गबद्धक्रुधि
क्षामक्ष्मारुहि मन्दमुन्मधुलिहि स्वच्छन्दकन्दद्रुहि[11] ।
शुष्यत्स्रोतसि तप्तभूमिरजसि[12] ज्वालायमानाम्भसि
ग्रीष्मे[13] मासि खरार्कतेजसि कथं पान्थ व्रजञ्जीवसि ॥४६३'॥

अत्रावन्तिका रीतिः, पदमुद्रा, विभक्तिमुद्रा, अनुप्रासश्चेति शब्दा-

१. 'सरिच्छं' ख. २. 'चम्पएहिं' ख. ३. 'कज्जम्मि' क. ४. 'आभमन्तेहि भमलेहि' ख. ५. 'आकारकान्तिमुपमा' क. ६. 'विरहिणीहृदयदाहोयमद्योतनार्थक्रियाभ्यां' क., 'विरहिणीहृदयदाहप्रद्योतनार्थक्रियाभ्यां' ख. ७. 'कज्जलपटलानामिवोपरि' क., 'कज्जलपटलानामुपरि' ख. ८. 'चत्वारो मिथः संकीर्यन्ते' क., 'चत्वारोऽपि संकीर्यन्ते' ख. ९. 'दग्धवीरधि' क. १०. 'रुधा' क. ११. 'स्वच्छन्दकुन्दद्रुहि' क.ख. १२. 'तप्तभूरिरजसि ज्वालायमानार्णसि' क.ख. १३. 'ज्येष्ठे' ख.

लंकाराः, जातिः, कारक[1]ज्ञापकौ हेतू, चित्रहेतुश्चेत्यर्थालंकारा मिथः[2] संकीर्यन्ते ।

शब्दोभयालंकारसं[3]करो यथा—

'स्तोकस्तोकममूभिरम्बरतले ताराभिरस्तं गतं
गच्छत्यस्तगिरेः शिरस्तदनु च च्छायादरिद्रः शशी ।
प्रत्यासन्नतरोदयस्य तरणेर्बिम्बारुणिम्ना ततो
मञ्जिष्ठारसलोहिनी दिगपि च प्राची समुन्मीलति ॥ ४६४ ॥'

अत्र समुन्मीलतीति विभक्तिमुद्रा, स्तोकस्तोकमस्तं [4]गतं गच्छतीत्यादिरनुप्रासश्च शब्दालंकाराः, हेतूपमा, समाधिः, अनुक्रमः, समुच्चयोक्तिश्चेत्युभयालंकारा मिथः संकीर्यन्ते ॥

अर्थोभयालंकारसंकरो यथा—

'खं वस्ते कलविङ्ककण्ठमलिनं कादम्बिनीकम्बलं
चे[5]र्चां पारयतीव दर्दुरकुलं कोलाहलैरुन्मदम् ।
गन्धं मुञ्चति सिक्त[6]लाजसुरभिं वर्षेण दग्धा स्थली
दुर्लक्ष्योऽपि विभाव्यते कमलिनीहासेन भासां पतिः ॥४६५॥'

अत्र जातिः, अनुमानम्, कारकज्ञापकहेतू चेत्यर्थालंकाराः, रूपकोपमा, हेतूपमा, उत्प्रेक्षोपमेति चो[7]भयालंकारा मिथः संकीर्यन्ते ॥

एतेन गुणालंकारसंकरोऽपि व्याख्यातः । य[8]तो यद्यपि गुणवत्येव वाक्येऽलं[9]कारयोगस्तथापि क्वचिद् गुणस्य प्राधान्यं क्वचिदलंकारस्येति प्रधानाङ्गभावेन गुणालंकारयोः संकरव्यवहारः प्रवर्तते । स षोढा—शब्द-

१. 'ज्ञापककारकहेतू' क. २. 'मिथः शब्दे संकीर्यन्ते' ख. ३. 'एवमुभयालंकारसंकरो यथा' क. ४. 'अस्तं गच्छतीत्यादिः' ख. ५. 'चर्चां' क.ग. ६. 'सिक्तजालसुरभि' क., 'सिक्तलाजसुरभिः' ख. ७. 'चेति उभयालंकाराः' क.ख. ८. 'अतो' क.ख. ९. 'संकरयोगः' क.ख.

गुणप्रधानः, अर्थगुणप्रधानः, दोषगुणप्रधानः, शब्दालंकारप्रधानः, अर्थालंकारप्रधानः, उभयालंकारप्रधानश्च ॥

तेषु शब्दगुणप्रधानो यथा—

'प्राप्तश्रीरेष कस्मात्पुनरपि मयि तं मन्थखेदं विदध्या-
न्निद्रामप्यस्य पूर्वामनलसमनसो नैव संभावयामि ।
सेतुं बध्नाति भूयः किमिति च सकलद्वीपनाथानुयात-
स्त्वय्यायाते वितर्कानिति दधत इवाभाति कम्पः पयोधेः ४६६'

अत्र हेतूत्प्रेक्षाभिधाने त्वयीत्यादौ पदे विष्णोः स्वरूपाध्यासेन तद्भावापत्तौ समाधेरिह प्राधान्यं प्रतीयते । ननु चायमर्थस्य प्राकट्यात्प्रसादोऽर्थगुणः कस्मान्न भवति । अस्मिन्नपि तद्व्यपदेशेन शब्दशक्तेराधिक्यात् । ननु च त्वयि इति, एष इति, अस्य इति, युष्मदेतदिदमां न कश्चन विष्णुवाची स कथं वर्णनीये न्यस्तस्तं तमर्थमभिदधीत । उच्यते, सर्वनामत्वेनैषां सर्ववाचित्वात् । सर्वनामानि हि सर्वाभिधायीन्यपि प्रकरणादिगम्यं विशेषमेव ब्रुवते स च इह प्राप्तश्रीरित्येवमादिभिरभिव्यक्तमेवावगम्यत इति ॥

अर्थगुणप्रधानो यथा—

'लक्ष्मीवशीकरणचूर्णसहोदराणि
त्वत्पादपङ्कजरजांसि चिरं जयन्ति ।

---

१. 'दोषालंकारप्रधानः' क. २. 'इति' इत्यधिकं क.ख. ३. 'मथितुं मन्दरं वा' ख. पद्यमेतद् ध्वन्यालोके( २।३० )ऽप्युदाहृतम्. ४. 'नाप्यहं तर्कयामि' क. ५. 'विदधति' क. ६. 'समाधेः प्राधान्यमिह' क.ख. ७. 'युष्मदेतदिदमदः' क., 'युष्मदस्मदिदमां' घ. ८. 'कश्चिन्न विष्णुवाची' क. ९. 'स कथं वर्णनीये वस्तुनि तमर्थमभिदध्यात्' क.ख. १०. 'सर्वनामाभिधायीन्यपि' क. ख. ११. 'प्रकरणादिगम्यं विशेषमर्थं च ब्रुवते' क., 'प्रकरणादिगम्यविशेषमिव ब्रुवते' ख. १२. 'अभिव्यक्तमेवाभिगम्यते इति' क., 'अभिव्यक्त एवाभिगम्यते इति' ख.

यानि प्रणाममिलितानि नृणां ललाटे
लुम्पन्ति दैवलिखितानि दुरक्षराणि ॥ ४६७ ॥'

अत्र हेतुसाम्योभयालंकाराभिधानेऽपि प्राधान्येनार्थप्राकट्यमर्थगुणः प्रतीयते ॥

दोषगुणप्रधानो यथा—

'येनापविद्धसलिलस्फुटनागसद्मा
देवासुरैरमृतमम्बुनिधिर्ममन्थे ।
व्यावर्तनैरहिपतेरयमाहिताङ्कः
खं व्यालिखन्निव विभाति स मन्दराद्रिः ॥ ४६८ ॥'

अत्र 'व्यावर्तनैरहिपतेरयमाहिताङ्कः' इति ज्ञापकहेतोः 'खं व्यालिखन्निव' इति उत्प्रेक्षावयवाच्च, देवासुरैरिति नित्यवैराविवक्षायां बहुवचनम्, 'अमृतमम्बुनिधिर्ममन्थे' इति द्विकर्मकेष्वपि मथिप्रभृतीनामुपसंख्यानमिति अमृतशब्दाद्द्वितीया इति दोषगुणयोः प्राधान्यं प्रतीयते । ननु चात्रार्थस्य प्राधान्यं कथं भवति तद्विषयस्य ज्ञापकहेतुनापहृतत्वात्सोऽप्यर्थालंकार एव । गुणालंकारयोश्च तुल्यकक्षतायामलंकारः प्रधानं भवति न गुणः । गुणैर्हि गुणभूतैरेवालंकाराः प्राय आरभ्यन्ते । तद्यथा—

'अस्पृष्टा दोषमात्राभिः समग्रगुणगुम्फिता ।
विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यते ॥
समस्तात्युद्भटपदामोजःकान्तिसमन्विताम् ।
गौडीयेति विजानन्ति रीतिं रीतिविचक्षणाः ॥

---

१. 'लिम्पन्ति' घ. २. 'अत्र हेतुवाक्यउभयालंकारप्राधान्येनार्थप्राकट्यमर्थगुणः प्रतीयते' क. ३. 'नित्यविवक्षायाम्' ख. ४. 'प्राधान्यं न भवति' क.ख. ५. 'समस्तेत्युत्कटपदाम्' क., 'समस्तात्युत्कटपदाम्' ख. ६. 'गौडीयां तां' क.ख.

आश्लिष्टश्लथभावां तु पुराणच्छायमाश्रिताम् ।
मधुरां सुकुमारां च पाञ्चालीं कवयो विदुः ॥
माधुर्यमपि वाञ्छन्तः प्रसादं च सुमेधसः ।
समासवन्ति भूयांसि न पदानि प्रयुञ्जते ॥
लाटीयावन्त्ययो रीत्योर्मागध्यां च क्वचित्क्वचित् ।
केचिदोजोऽभिधित्सन्तः समस्यन्ति बहून्यपि ॥
प्रतीतशब्दमोजस्वि सुश्लिष्टपदसंधि च ।
प्रसादि स्वभिधानं च यमकं कृतिना मतम् ॥' इति ।

मा भूदलंकारतुल्यकक्षतया अर्थस्य प्राधान्यं शब्दगुणस्य तु श्लाघ्यविशेषगुणयोग उदात्तमित्यादेः किमिति प्राधान्यं न भवति दोषगुणानामतीवोल्लेखवत्त्वेन प्राधान्यात् ॥

सा वामनप्रसिद्धिर्लङ्घितनभसो बलिद्विषोऽद्यापि ।
मत्सरिणः खलु लोका मर्माण्येवानुबध्नन्ति ॥

दोषस्य यो गुणीभावः स ततोऽप्यधिकं प्रकाशत इति ॥

शब्दालंकारप्रधानो यथा—

'यच्चन्द्रकोटिकरकोरकभारभाजि
बभ्राम बभ्रुणि जटापटले हरस्य ।
तद्वः पुनातु हिमशैलशिलानिकुञ्ज-
झात्कारडम्बरविरावि सुरापगाम्भः ॥ ४६९ ॥'

---

१. 'सुकुमारीं च' ख. २. 'सुश्लिष्टपदसंधिता' क., 'सुश्लिष्टपदसंधिमत्' ख. ३. 'चायामकं कृतिनां मतम्' क ख. ४. 'अर्थप्रधानोदारगुणस्य' ख. ५. 'मतीवोल्लेखविधित्वेन' क.ख. ६. 'प्र(प्रा)धान्यात्' क. ७. अत्र 'यथा—' इत्यधिकं क. ८. 'कोरकभारभाजि' क., 'कोरकहारभाजि' ख. ९. 'टाङ्कारडम्बरविरावि' क., 'प्राकारडम्बरविरावि' ख.

अत्रार्थप्राकट्यं प्रसादः विभवोत्कर्ष उदात्तता मृदुप्रस्फुटोन्मिश्रवर्णानामवैषम्यं समता, बन्धगाढता, और्जित्यमित्यादिभ्यो गुणेभ्यः प्राधान्येन शब्दालंकारानुप्रासः प्रतीयते ॥

अर्थालंकारप्रधानो यथा—

'आश्लेषिणः पृथुतरक्लमपीतशीत-
मायाविनीर्घनमुदो रजनीर्युवानः ।
ऊर्ध्वोर्मुहुर्वलनबन्धनसन्धिलोल-
पादान्तसंवलिततूलपटाः स्वपन्ति ॥ ४७० ॥'

अत्र बन्धविकटत्वमुदारता, श्लाघ्यविशेषणयोग उदात्तत्वम्, विभवोत्कर्ष औदार्यम्, दीप्तरसत्वम्, कान्तिरित्यादिभ्यो गुणेभ्यः प्राधान्येन जातिरर्थालंकारः प्रतीयते ।

उभयालंकारप्रधानो यथा—

'अभ्युद्धृता वसुमती दलितं रिपूरः
क्रोडीकृता बलवता बलिराजलक्ष्मीः ।
अत्रैकजन्मनि कृतं यदनेन यूना
जन्मत्रये तदकरोत्पुरुषः पुराणः ॥ ४७१ ॥'

अत्रोक्तिपरिपाटीः प्रौढिः, बन्धविकटत्वमुदारता, आशयोत्कर्ष उदात्तत्वम्, अर्थप्राकट्यं प्रसादः—इत्यादिभ्यो गुणेभ्यः श्लेषोपसर्जना विशेषोक्तिरुभयालंकारः प्राधान्येन प्रतीयते ॥ रससंकरोऽपि चालंकारसंकरवदेव । भावरसाभासप्रशमानां तिलतण्डुलादिप्रकारेण संकरः षट्प्रकारको भवति । तत्र भावानां तिलतण्डुलप्रकारो यथा—

१. 'पृथुरतक्लम' क.ख. २. 'कण्ठैः' ख. ३. 'लोलपटाः' क.ख. ४. 'उदात्तता' क.ख. ५. 'अभ्युद्गता' ख. ६. 'उक्तिपरिपाकः' क. ७. 'षट्प्रकारो' क.ख.

'न्यक्कारो हृदि वज्रकील इव मे तीव्रः परिस्पन्दते
घोरान्धे तमसीव मज्जति मनः संमीलितं लज्जया ।
शोकस्तार्क्ष्यविपत्तितो[1] दहति मां नास्त्येव यस्मिन्क्रिया[2]
मर्माण्येवं[3] पुनश्छिनत्ति करुणा सीतां वराकीं प्रति ॥४७२॥'

अत्रामर्षलज्जाशोकानुकम्पाः समकक्षतया मिथस्तिलतण्डुलवत्संकीर्यमाणा रामस्य विरहिणो वागारम्भानुभावोक्तिपरतया[4] प्रतीयन्ते ॥

क्षीरनीरप्रकारो यथा—

'मानोन्नतेत्यसहनेत्यतिपण्डितेति
मय्येव धिक्कृतिरनेकमुखी सखीनाम् ।
दाक्षिण्यमात्रमसृणेन विचेष्टितेन
धूर्तस्य तस्य हि गुणा नु परं जयन्ति ॥ ४७३ ॥'

अत्र सखीषु रोषः प्रियगुणेषु चासूया, क्षीरनीरवन्मिथः संकीर्यमाणौ[5] मानिनीवागारम्भपरतया प्रतीयेते[6] ॥

छायादर्शप्रकारो यथा—

'आः सीते पतिगर्वविभ्रमभरभ्रान्त[7]भ्रमद्बान्धव-
प्रध्वंसस्मितकान्तिमत्तव तदा जातं यदेतन्मुखम् ।
संप्रत्येव हठात्तदेवं[8] कुरुते केशोच्चयाकर्षण-[9]
त्रासोत्तानितलोललोचनपतद्बाष्पप्लुतं रावणः ॥ ४७४ ॥'

अत्र क्रोधाभासे छायादर्शन्यायेन रत्याभासः संकीर्यमाण[10] उपलभ्यते ॥

---

१. 'तातविपत्तिजो' ख., 'तार्क्ष्यसजातीयत्वात् तार्क्ष्योऽत्र जटायुरभिधीयते' घ. पुस्तकस्यायुषि टिप्पणी. २. 'दहति यत्रास्त्येव' क. ३. 'मर्माणीव' ख. ४. 'अनुरागोक्तिपरतया' क.ख. ५. 'संकीर्यमाणौ' क., 'संकीर्यमाणे' ख. ६. 'प्रतीयेते' क.ख. ७. 'भ्रान्त' क. ८. 'तदेव' क.ख. ९. 'केशोच्चयोत्कर्षण' क.ख. १०. 'संकीर्यते' क.ख

नरसिंहप्रकारो[1] यथा—

> 'किं द्वारि दैवहतिके सहकारकेण
> संवर्धितेन विषपादप एष पापः ।
> अस्मिन्मनागपि विकाश[2]विकारभाजि
> भीमा भवन्ति मदनज्वरसंनिपाताः ॥ ४७५ ॥'

अत्र नरसिंहजाताविव सिंहनरशरीरभागौ[3] सहकारवर्णनावागारम्भानुसारेण सखीविषयानुकम्पा सहकारविषया च कुत्सा मिथः संकीर्यते । तथा हि दैवहतिके इति[4]शब्देन लब्धायां नियत्युपाधौ सर्वथैवानुकम्प्यमानतायां सहकारसंवर्धननिबन्धनत्वमेवास्याः कला द्योत्यते । एवं नाम त्वं दैवोपहतासि यत्सहकारछद्मानं विषपादपं[5] द्वारि संवर्धयसीति[6] । विषपादपशब्देन च[7] लब्धायां सहकारस्य सर्वथैव कुत्सायां विकास[8]काले कामिनीनामसह्यस्मरज्वरसंनिपातहेतुकत्वमेवास्याः कप्रत्ययेन[9] प्रत्याय्यते ॥ तदुक्तम्—

> कुत्सितत्वेन कुत्सावान्सम्यग्वापि हि कुत्सितः ।
> स्वशब्दाभिहिते केन विशिष्टोऽर्थः प्रतीयते ॥
> न च सांप्रतिकी कुत्सा शब्दभेदे प्रतीयते ।
> पूज्यते[10] कुत्सितत्वेऽपि प्रशस्तत्वेऽपि कुत्स्यते[11] ॥

---

१. 'नरसिंहवद् यथा—' क. २. 'विकासविकारभाजि' क. ३. सिंहनरशरीरवागारम्भानुसारेण' क.ख. ४. 'दैवहतिकेशब्देन' क.ख. ५. 'सहकारविषपादपं' क.ख. ६. 'इति' क.ख. नास्ति. ७. 'च' क.ख. ८.'विकासकाल' क.घ. ९.'कप्रत्ययेन' क. १०. 'युज्यते' ख. ११. 'इति' इत्यधिकं क.

तद् यथा—

'एक इह जीवलोके जीवतिरूपं नृरूपपशुरूपः ।
य: प्रेमपाशपाशे मृग इव न मृगीदृशां पतति ॥ ४७६ ॥'

पांसूदकप्रकारो यथा—

'मा गर्वमुद्वह कपोलतले चकास्ति
कान्तस्वहस्तलिखिता मम मञ्जरीति ।
अन्यापि किं न सखि भाजनमीदृशानां
वैरी न चेद्भवति वेपथुरन्तरायः ॥ ४७७ ॥'

अत्र स्वसौभाग्यवर्णना मृत्पिण्डे पांसूदकयोरिवाविभागमापाद्यमानयोरसूयागर्वयोः संकर उपलभ्यते ॥

चित्रवर्णप्रकारो यथा—

'विरोधो विश्रान्तः प्रसरति रसो निर्वृतिघन-
स्तदौद्धत्यं क्वापि व्रजति विनयः प्रह्वयति माम् ।
झटित्यस्मिन्दृष्टे किमपि परवानस्मि यदि वा
महार्घस्तीर्थानामिव हि महतां कोऽप्यतिशयः ॥४७८॥'

अत्र वीरौद्धत्यस्वातन्त्र्यरसानामानन्दप्रशमपारवश्यरसैस्तिरस्क्रियमाणानां पट इव नीलादिभिः सीतादीनां प्रशमा रामदर्शनप्रभावोद्भवे

१. 'नृरूपपशुरूपः' इति क. पाठस्त्रुटितः । 'न रूपमभ्युदये' इति ख. पाठः. २. 'प्रेममात्रपाशे' क., 'यः प्रेममाशयाशे' ख. ३. 'मृगवन्न मृगीदृशां' ख. ४. 'पांशूदकप्रकारो यथा' ग. ५. 'पांशूदकयोरिव' ग. ६. 'उपपद्यते' क.ख. ७. 'किमिह महतां' क. ८. 'पटवर्णनीलादिभिः' क., 'पटनीलादिभिः' ख. ९. 'सितादीनां' क.

त्ववस्य विस्मयातिशयप्रशमजन्मनि वागारम्भानुभावोप[1]मापदे चित्रवर्णवत्संकीर्यमाणाः समुपलभ्यन्ते ॥

## अथ रस[2]गुणसंकरः ।

ननु च दो[3]षहानमिव गुणोपादानमपि नियमनिर्व[4]र्त्यम् । अलंकारयोग इव रसावियोगोऽप्यवश्यं विधेयः । कदाचिदलंकारयोगोऽपि त्यज्यते न तु[5] रसावियोगो गुणयोगश्च व्यभिचरितसंबन्धाविति । अत्रोच्यते । यत्र चित्र[6]वर्णवन्नरसिंहवत्पांसूदकव[7]च्चावयवावयविन्यायेन जातिव्यक्तिन्यायेन चा[8]पृथक्प्रयत्ननिर्व[9]र्त्यानां गुणरसानां वाक्ये संनिवेशस्तत्र संकरव्यवहारो न प्रवर्तते ॥

तद् यथा—

मधुरं रसवद्वाचि वस्तुन्यपि रसस्थितिः ।
येन माद्यन्ति धीमन्तो मधुनेव मधुव्रताः ॥
कामं सर्वोऽप्यलंकारो रसमर्थे निषिञ्चति ।
तथाप्यग्राम्यतैवैनं भारं वहति भूयसा ॥
शृङ्गार एव [10]मधुरः परप्र[11]ह्लादनो रसः ।
तन्मयं काव्यमाश्रित्य माधुर्यं प्रतितिष्ठति ॥
शृङ्गारे विप्रलम्भाख्ये करुणे च प्रकर्षवत् ।
माधुर्यमार्द्रतां याति यतस्तत्राधिकं मनः ॥

---

१. 'वागारम्भानुभावोपमाद्भवेदेतच्चित्रवर्णवत्' क., 'वागारम्भानुभावोपमोद्भवेत्चित्रवर्णवत्' ख. २. 'अथ कोऽयं गुणसंकरः' क. ३. 'ननु दोषहानिरिव' ख., 'दोषहानिनमिव' च ख. ४. 'नियमनिवर्त्यम्' क. ५ 'ननु रसादिव्यभिचरितसंबन्धाविति' क.ग. पुस्तके च 'नतु' इत्यस्य स्थाने 'ननु' इति वर्तते. ६. 'वर्णवत्' ग. ७. 'पांशूदकवच्च' ग. ८. 'वापृथक्' क. ९. 'प्रयत्नानिर्वर्त्यानां' क. १०. 'सर्वेषु' क. ११. 'परः प्रह्लादनो रसः' इति ध्वन्यालोके (२।८).

रौद्राद्यो रसा दीप्त्या लक्ष्यन्ते काव्यवर्तिनः ।
तद्व्यक्तिहेतू शब्दार्थावोजोधिष्ठाय तिष्ठति ॥
समर्थकत्वं वाक्यस्य यत्तु सर्वरसान्प्रति ।
स प्रसादो गुणो ज्ञेयः सर्वसाधारणक्रियः ॥'

सेयं गुणानां रसारम्भकत्वे संकराप्रसिद्धिः । एवं रसानां गुणारम्भकत्वेऽपि । तद्यथा—रूढाहंकारतौर्जित्यम्, भावतो वाक्प्रवृत्तिर्भाविकत्वम्, क्रोधादावप्यतीव्रता, माधुर्यम्, आशयोत्कर्षः, उदात्तत्वम्, अर्थस्याभीष्टतमता, प्रेयः, दीप्तरसत्वं, कान्तिरिति । यत्र तु तिलतन्दुलवत् क्षीरनीरवच्छायादर्शवत् तुल्यकक्षतयैव गुणरसानां वाक्येऽपृथक्प्रयत्ननिर्वर्त्यानां विनिवेशस्तत्र संकरव्यवहारः प्रवर्तत एव । स षोढा—गुणप्रधानः—रसप्रधानः, उभयप्रधानः, उभयाप्रधानः, गुणाधिकः, रसाधिक इति ॥

तेषु गुणप्रधानो यथा—

'अत्रान्तरे ललितहारलतानितम्ब-
संवाहनस्खलितवेगतरङ्गिताङ्गी ।
देवी व्यपास्य शयनं धृतमानतन्तु-
रन्तःपुरं गतवती सह सौविदल्लैः ॥ ४७९ ॥'

१. 'कार्यवर्तिनः' क. २. 'तद्व्यक्तिहेतू शब्दार्थावोजोऽधिष्ठाय तिष्ठति' क., ध्वन्यालोके तु 'तद्व्यक्तिहेतू शब्दार्थावाश्रित्यौजो व्यवस्थितम् ।' इति पाठः. ३. 'समर्पकत्वं वाप्यस्य' क., ध्वन्यालोके तु 'समर्पकत्वं काव्यस्य' इति. ४. 'भावतो वाक्प्रवृत्तिः' क., 'भावयतो वाक्यवृत्तिः' ख. ५. 'क्रोधादावप्यस्य तीव्रत्वं' क., 'क्रोधादावपि तीव्रता' ख. ६. अर्थस्याभीष्टतन्मयता' ख. ७. 'तिलतण्डुलवत्' क.ख. ८. 'वाक्ये पृथक् प्रयत्न' क.ख.

अत्रार्थप्राकट्योदार्ययोरर्थशब्दगुणयोः प्राधान्यं न रतिक्रोधयोरिति गुणप्रधानः ॥

रसप्रधानो यथा—

'अस्मिन्नगृह्यत पिनाकभृता सलील-
मारब्धवेपथुरधीरविलोचनायाः ।
विन्यस्तमङ्गलमहौषधिरीश्वरायाः
स्रस्तोरगप्रतिसरेण करेण पाणिः ॥ ४८० ॥'

अत्र श्लाघ्यविशेषणयोग उदात्तत्वम्, बन्धविकटत्वमुदारता, अर्थप्राकट्यं प्रसादः, दीप्तरसत्वं कान्तिरिति गुणाः साध्वसविलासानुरागसंगमरसैरतिशय्यन्त इति रसप्रधानः ॥

उभयप्रधानो यथा—

'आपातमात्ररसिके सरसीरुहस्य
किं बीजमर्पयितुमिच्छसि वापिकायाम् ।
कालः कलिर्जगदिदं न कृतज्ञमज्ञे
स्थित्वा हरिष्यति तवैव मुखस्य शोभाम् ॥ ४८१ ॥'

अत्र भणितिविशेष उक्तिः संविधाने सुसूत्रता श्लेष इति शब्दगुणयोर्लावण्यविलासवर्णनीयरसयोश्च तुल्यकक्षतया निर्देश इत्युभयप्रधानः ॥

उभयाप्रधानो यथा—

'अभिनववधूरोषस्वादुः करीषतनूनपा-
दसरलजनाश्लेषक्रूरस्तुषारसमीरणः ।
गलितविभवस्याज्ञेवाद्य द्युतिर्मसृणा रवे-
र्विरहिवनितावक्त्रक्लैब्यं बिभर्ति निशाकरः ॥ ४८२ ॥'

---

१. 'प्राधान्यं न रतिक्रोधयोः' ग. नास्ति. २. 'न भवति क्रोधयोः' ख. ३. 'स्वसूत्रता' ख. ४. 'निर्दिशत्युभयप्रधानः' क. ५. 'आज्ञेवाथ' ग.

अत्र स्वादुक्रूरमसृणक्लैव्यमित्यन्यधर्माणामन्यत्रारोपणं समाधिः, अभिनववधूरोषादीनां चतुर्णामप्यर्थानां स्वाद्वादीनां च लक्षणादिलक्षितानां प्राकट्यं प्रसादः, अभिनववधूरोषस्वादुः करीषतनूनपात् इति विशेषणविशेष्याणामुपक्रमेण निर्वहणं रीतिः, पादचतुष्टये चतुर्णामर्थानां विभक्त्यसमत्वेन निवेशः संमितत्वमिति चत्वारो गुणाः, चत्वारश्च रत्यमर्षविषादजुगुप्सात्मानो रसाः कालावस्थानिवेदनपरत्वेन प्रतीयन्त इत्युभयाप्रधानः ॥

गुणाधिको यथा—

'अजननिरस्तु विभूतेरपूरणिर्भवतु सर्वकामानाम् ।
मा याचिषि मा सेविषि मा सहिषि पराभवं धनिनः ॥ ४८३ ॥'

अत्र सुप्तिङ्व्युत्पत्तिः सौशब्द्यम्, वाक्यानां परिपूर्णत्वमर्थव्यक्तिः, अर्थस्य प्राकट्यं प्रसादः, विभूतेरनुत्पत्तौ कामा न पूर्यन्ते, अपरिपूर्णकामो याचते, याचमानस्तदनाप्नुवन् धनिनः सेवते, सेवमानस्तु तैः परिभूयत इत्युत्पत्त्यादिक्रियाक्रमो रीतिरिति गुणाश्चत्वारः, रसस्तु निर्वेद एवैक इति गुणाधिकः ॥

रसाधिको यथा—

'कमलमनम्भसि कमले कुवलयमेतानि कनकलतिकायाम् ।
सा च सुकुमारसुभगेत्युत्पातपरम्परा केयम् ॥ ४८४ ॥'

अत्र कमलमनम्भसि कमले कुवलयमेतानि कनकलतिकायाम् इत्यन्यधर्माणामन्यत्रारोपणं समाधिः, सा च सुकुमारसुभगेत्युत्पातपरम्परा केयमित्यश्लीलामङ्गलार्थौ दोषगुणावपि, श्लाघ्यविशेषणगुणयोग उदात्त-

१. 'वक्रक्लैव्य' ख. २. 'निबर्हणम्' ख. ३. 'व्युत्पत्तिसौशब्द्यम्' ख.

त्वम्, विकटबन्धत्वमुदारता, उपक्रमाभेदो रीतिः, अर्थप्राकट्यं प्रसादः, अनिष्ठुरता सौकुमार्यम्, अभीष्टतमता प्रेयः, दीप्तरसत्वं कान्तिरिति गुणा दश, रसास्तु रत्युत्कर्षहर्षधृत्युत्कण्ठावेगविस्मयमतिवितर्कचिन्ताचपलताहासोत्साहस्तम्भगद्गदोन्मादव्रीडावहित्थभयशङ्काः विंशतिर्वागारम्भानुभावे शृङ्गारिणः प्रियाचाटुकारस्य कस्यचित्प्रतीयन्त इति रसाधिकः ॥

रसालंकारसंकरोऽप्येतेन व्याख्यातः।

रसवन्ति हि वस्तूनि सालंकाराणि कानिचित्।
एकेनैव प्रयत्नेन निर्वर्त्यन्ते महाकवेः ॥ १७३ ॥
रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत्।
अपृथग्यत्ननिर्वर्त्यः सोऽलंकारः प्रकृष्यते ॥ १७४ ॥
रसाभावादिविषयविवक्षाविरहे सति।
अलंकारनिबन्धो यः स कविभ्यो न रोचते ॥ १७५ ॥

तत्र रसालंकारसंकरो द्विधा—रसप्रधानोऽलंकारप्रधानश्च। तयोर्योऽनुभवित्रैव वर्ण्यते स रसप्रधानः। तत्र ह्यलंकारवतो वाक्यस्य वागारम्भानुभावत्वं भवति ॥

तत्र रतावुपमायाः संकरो यथा—

'तीए दंसणसुहए पणअक्खलणजणिओ मुहम्मि मणहरे।
रोसो वि हरइ हिअअं मअपंको व मिअलंछणम्मि णिसण्णो ४८५'
[तस्या दर्शनसुभगे प्रणयस्खलनजनितो मुखे मनोहरे।
रोषोऽपि हरति हृदयं मदपङ्क इव मृगलाञ्छने निषण्णः ॥]

१. 'अर्थस्य प्राकट्यं' क. २. 'आभीष्टतमता' क. ३. 'मति' ख. नास्ति. ४. 'व्रीडावहित्थाभयशङ्काः' क. ५. 'निवर्त्यन्ते' क.ख.ग. ६. 'सोऽलंकारो ध्वनौ मतः' इति ध्वन्यालोके. ७. 'तयोर्यें' क. ८. 'पणअप्खलण' क.; 'पणअक्खलण' ख. ९. 'मअअंपंकोव' क., 'मअअंकोव्व' ख. १०. 'मअतद्धलण्णि निसण्गे' क.

अत्रोपमातिरस्कारेण रसवतो हरेर्वचसि वागारम्भरूपे रुक्मिणीप्रदत्तपारिजातमञ्जरीविलोकनप्रभवं सत्यभामाया रोषरामणीयकं प्राधान्यतः प्रतीयते ॥

एतावेव[1] विपरीतोपमा यथा—

'यत्त्वन्नेत्रसमानकान्ति सलिले मग्नं तदिन्दीवरं
मेघैरन्तरितः प्रिये तव मुखच्छायानुकारी[2] शशी ।
ये[3]ऽपि त्वद्गमनानुकारि[4]गतयस्ते राजहंसा गता-
स्त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते ॥४८६॥'

अत्र विरहिणो रामस्य प्रियावयवसादृश्यदर्शनेनात्मानं विनोदयत उपायभ्रंशादरति[5]प्रभवविषादवागारम्भे स्वरूपाभिधाने प्रक्षीणशक्तिरप्राधान्येनोपमा प्रतीयते ॥

एतावेव पर्याय[6]स्य यथा—

'किं गुरुजहणं अह[7] थणभरो त्ति भाअ[8]करअलग्गतुलिआए[9] ।
विहिणो खुत्तंगुलि[10]मग्गविब्भमं[11] वहइ से[12] तिवली ॥ ४८७ ॥'

[किं गुरुजघनमथ स्तनभर इति भागकरतलाग्रतुलितायाः ।
विधेः खाताङ्गुलिमार्गविभ्रमं वहत्यस्यास्त्रिवली ॥]

अत्र यद्यपि रतिप्रभवेभ्यो विस्मयादिभ्यः संशयहेतूत्प्रेक्षोपमादि[13]भ्यश्च पर्यायालंकारः प्राधान्येन प्रतीयते तथाप्यसौ वागारम्भानुभाव इति एताव[14]प्राधान्यमेवानुभवति ॥

---

१. 'एव' ख. २. 'मुखच्छायानुकारः' क.ख. ३. 'यो' ख. ४. 'त्वद्गमनानुसारिगतयः' घ. ५. 'उपायभ्रंशारतिप्रभ' क. ६. 'विपर्ययो' क. ७. 'अह थण' क.ख. ८. 'भावअकरअ' क. ९. 'तूलिआए' ख. १०. 'खत्तंगुलि' क. ११. 'यगा विम्भम' क., 'थणत्विब्भमं' ख. १२. 'स' क. १३. 'उपमास्यः' क. १४. 'एतावप्यप्राधान्यम्' क.ख.

एतावेव समाधिर्यथा।

'कृच्छ्रेणोरुयुगं व्यतीत्य सुचिरं भ्रान्त्वा नितम्बस्थले
मध्येऽस्यास्त्रिवलीतरङ्गविषमे निस्पन्दतामागता।
मद्दृष्टिस्तृषितेव संप्रति शनैरारुह्य तुङ्गौ स्तनौ
साकाङ्क्षं मुहुरीक्षते जललवप्रस्यन्दिनी लोचने ॥४८८॥'

अत्र वत्सराजेन स्वदृष्टौ प्राणिधर्माः समाधीयमानाः सागरिकादर्शनोत्थरतिवागारम्भे न्यग्भवन्ति॥

एतावेवार्थश्लेषस्य यथा—

'कपोले पत्राली करतलनिरोधेन मृदिता
निपीतो निःश्वासैरयममृतहृद्योऽधररसः।
मुहुर्लग्नः कण्ठे तरलयति बाष्पः स्तनतटीं
प्रियो मन्युर्जातस्तव निरनुरोधे न तु वयम् ॥४८९॥'

अत्र यद्यप्याक्षेपेण वाक्योपसंहारस्तथापि प्रिय इत्यादिभिः प्राधान्येनाभिधीयमानः श्लेष एव शृङ्गारिणो वागारम्भानुभावाङ्गतामङ्गीकरोति॥

एतावेव पर्यायोक्तेर्यथा—

'मुक्ताः कन्धरया धृता स्तनतटेनोत्तुङ्गता कुम्भयो-
रूरुभ्यां परिणाहिता क्रमवती हस्तस्य पद्भ्यां गतिः।
एतद्वः करिघातिनस्तु कठिनं चर्मैव कोऽयं हठ-
श्चण्डीति त्रिपुरारिकेलिवचनैरीर्यास्मितं पातु वः ॥४९०॥'

अत्र भगवतश्चाटूक्तिवागारम्भे देव्याः पर्यायवर्णना शेषभावं लभते

१. 'निष्पन्दताम्' क.ख. २. 'जलभरप्रस्यन्दिनी' क.ख. ३. 'दर्शनार्थे' क.ख. ४. 'रति—' क.ख. ५. 'निश्वासैः' क.ख.ग. ६. 'बाष्पस्तनतटी' क., 'बाष्पस्तनतटीं' ग. ७. 'अनुभावाङ्गत्वं' क. ८. 'धृताः' क., 'धृताः' ख. ९. 'आर्यान्वितं' क. १०. 'श्लेषभावं' क.ख.

यं[1] उदासीनेन वर्ण्यते सोऽलंकारप्रधानः स हि रसभावादेः संकरप्रकारमभिधित्सुः स्वभावोक्तिं वक्रोक्तिं वावलम्बते ॥

तत्र स्वभावोक्तिपक्षे जातिः ॥

सा विधिमुखेन यथा—

'थोओसरंतरोसं[2] थोअत्थोअपरिवड्ढमाणपहरिसम्[3] ।
होइ अ दूरपआसं उहअरसाअंतविब्भमं[4] तीअ[5] मुखम् ॥४९१॥'

[स्तोकापसरद्रोषं स्तोकस्तोकपरिवर्धमानप्रहर्षम् ।
भवति च दूरप्रकाशमुभयरसायत्तविभ्रमं तस्या मुखम् ॥]

अत्र सत्यभामाया रोषस्यापसर्पतः[6] प्रहर्षस्य च प्रसर्पतो येऽनुभावा जिह्मावलोकनमुखप्रसादादयस्त इह संकीर्यमाणाः कविनोभयरसायत्तविभ्रममित्यनेन[7] यथावदवस्थिता भवन्तीति विधिमुखेनाभिधीयन्ते ॥

जातिरेव निषेधमुखेन यथा—

'धीरेण माणभंगो माणक्खलणेण[8] गरुअ धीरारम्भो ।
उल्ललइ तुलिज्जंते[9] एकम्मि वि से थिरं ण लग्गइ हिअअं ४९२'

[धैर्येण मानभङ्गो मानस्खलनेन गुरुकधैर्यारम्भः ।
उल्ललति तोल्यमाने एकस्मिन्नप्यस्याः स्थिरं न लगति हृदयम् ॥]

अत्र यद्यपि हेतूपन्यासो वर्तते तथापि तस्य स्वभावाख्यानपरिकरत्वेनाप्राधान्येन[10] हृदयक्रियास्वरूपमेवेह[11] निषेधमुखेनाभिधीयत इतीयं जातिरेव भवति ॥

---

१. 'यत्र' क.ख. २. 'थोओउसरत' क. ३. 'थोअपरिवड्ढमान' क.ख. ४. 'उअह' क.ख. ५. 'बिब्भंतीअ' ख. ६. 'अपसज्जतः' क. ७. 'उभयरसायत्तमित्यनेन' ख. ८. 'माणकवलणेण सहार्यं गरुअधीरारम्भो' ख. ९. 'उललइ तुलिते' ख. १०. 'भावाख्यानपरिकरत्वेन' ख. ११. 'स्वरूपमेव हि' क.

सैव विधिनिषेधाभ्यां यथा—

'हेलोदस्तमहीधरस्य तनुतामालोक्य दोष्णो हरे-
हस्तेनांसतटेऽवलम्ब्य चरणावारोप्य तत्पादयोः ।
शैलोद्धारसहायतां जिगमिषोरस्पृष्टगोवर्धना
राधायाः सुचिरं जयन्ति गगने वन्ध्याः करभ्रान्तयः ४९३'

अत्र राधायाः प्रेयसि हरौ यथावदस्तितोद्भूतवृत्तिस्नेहशङ्कोत्साहा मिथः संकीर्यमाणा भयावेगस्मृतिमतिवितर्कादिभिर्व्यभिचारिभावैरालम्बनचरणाक्रमणसहकृतायां करभ्रान्तौ शरीरारम्भानुभावे प्रतीयमाना अस्पृष्टगोवर्धना वन्ध्या इति निषेधमुखेन जयन्तीति विधिमुखेन चाभिधीयन्ते ॥

वक्रोक्तिपक्ष उपमादयः ।

तेषूपमा यथा—

'चोरा सभअसतण्हं पुणो पुणो पेसअंति दिट्ठीओ ।
अहिरक्खिअणिहिकलसे व पोढमहिलाथणुच्छंगे ॥ ४९४ ॥'

[चोराः सभयसतृष्णं पुनः पुनः प्रेषयन्ति दृष्टीः ।
अभिरक्षितनिधिकलश इव प्रौढमहिलास्तनोत्सङ्गे ॥]

अत्र चौरगतभयानुरागयोः संकरस्सभावोक्तिमतिभूयोत्तरार्धागतमौपम्यं प्राधान्येन प्रतीयते ॥

---

१. 'हस्तेनास त एव' क., 'हस्तेनांसत एव' ख. २. 'यथावदवस्थिता अद्भुत-' ख. ३. 'चोरा भअसतहणं पुणो पेसवति दिव्वीओ । अहिरस्थिअनिहिकलसे थयोकहलपूरखणुत्सङ्गे' क. ४. 'पोढवइआथणुच्छङ्गे' गाथासप्त०., 'प्रौढपतिकास्तनोत्सङ्गे' इति च्छाया च. ५. 'चोरगत-' ग.घ.

रुपमैव रसाभाससंकरविषया यथा—

‘एकेनार्कं प्रविततरुषा पाटलेनास्तसंस्थं[1]
　　पश्यंत्यक्ष्णा[2] सजलतरलेनापरेणात्मकान्तम् ।
अह्नश्छेदे दयितविरहाशङ्किनी चक्रवाकी
　　तौ संकीर्णौ रचयति रसौ नर्तकीव प्रगल्भा ॥ ४९५ ॥’

अत्र निगदेनैव व्याख्याते[3] स्पष्टतयैवोपमायाः प्रधानत्वेन[4] प्रतीतिः ॥

रसप्रशमयोरुपमासहोक्तिर्यथा—

‘दृष्टे लोचनवन्मनाङ्मुकुलितं पार्श्वस्थिते चक्रव-
　　न्न्यग्भूतं बहिरासितं पुलकवत्स्पर्शं समातन्वति[5] ।
नीवीबन्धवदागतं शिथिलतामाभाषमाणे ततो
　　मानेनापसृतं ह्रियेव सुदृशः पादस्पृशि प्रेयसि ॥४९६॥’

अत्र कस्याश्चित्सखीविख्यातमानसंविधानकोपान्मानवत्याः प्रियसंदर्शनादालम्बनविभावादुत्पन्नप्रकृष्टरतिप्रभवे[6] प्रहर्षस्थायिभावे तत्पार्श्वो[7]पसर्पणादिभिरुद्दीपनविभावैरुद्दीप्यमाने[8] समुत्पद्यमानेषु[9] पुलकादिषु[10] मुखात्मकेषु व्यभिचारिषु नयननिमीलनाधोमुख्यनीवीविस्रंसनादिभिरनुभावैः[11] प्रकर्षणारोपणादानन्दरसतामापाद्यमाने[12] स्थायिनि प्रबलविरोधिभावान्तरोदयादेतेभ्य एव कारणेभ्यः प्रतिक्षणमपचीयमानयोर्लज्जारोषयोः प्रशमसंकरावभिभूय प्राधान्येनोपमासहोक्तिः प्रकाशते[13] ॥

---

१. ‘संस्थां’ क. २. ‘पश्येत्युक्त्वा’ क. ३. ‘व्याख्यायते’ क. ४. ‘प्राधान्येन’ घ. ५. ‘तत्स्पर्शमातन्वति’ ख. ६. ‘रतिप्रभवहर्षस्थायिभावे’ क., ‘रतिप्रभवे प्रहर्षस्यापि भावे’ ख. ७. ‘तत्पार्श्वेऽपि समर्पणादिभिः’ क. ८. ‘उद्दीप्यमानेषु’ क. ९. ‘समुत्पद्यमानेषु’ क. नास्ति. १०. ‘पुलकादिषु समुत्पद्यमानेषु व्यभिचारिषु’ क.ख. ११. ‘विश्रंसनादिभिः’ ख. १२. ‘आनन्दरसानाम्’ ख. १३. ‘संकीर्यते’ क.ख.

श्लेषाद्यलंकारसामर्थ्यात्तु क्वचिदवास्तवमपि रसाभाससंकरं कवयः प्रकल्पयन्ति ॥

स रूपकश्लेषेण यथा—

'राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी ।
गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा ॥ ४९७ ॥'

अत्र बीभत्सो रसः श्लेषरूपकसामर्थ्यादविद्यमानेनापि शृङ्गाररसेन संकीर्ण इव प्रतीयते ॥

श्लेषानुविद्धार्थान्तरन्यासेन यथा—

'दट्ठोट्ठ हो असिलअघाओ देवि मउलावइ लोअणभउँहो वे ।
सुपओहरकुँवलअपत्तलच्छि कह मोह णँ जणइ ण लग्गवच्छि ॥'

[दष्टौष्ठ हो असिलताघातो देवि मुकलयति लोचनभ्रुवौ द्वे अपि ।
सुपयोधरकुवलयपत्रलक्ष्मीः कथं मोहं न जनयति न लग्ना वक्षसि ॥]

अत्र वीरो रसः श्लेषसामर्थ्यादविद्यमानेनापि विप्रलम्भशृङ्गारेण संकीर्यते ॥

---

